श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

सप्तमस्कन्धः

।। अथ प्रथमोऽध्यायः ।।

राजोवाच–

समः प्रियः सुहृद् ब्रह्मन् भूतानां भगवान् स्वयम् ।
इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ।। १ ।।

श्रीयादवार्यविरचिता भागवतप्रकाशिका

सुखादिगुणसम्पूर्णं दुःखाज्ञानादिवर्जितम् ।
शुकादिमुनिमध्यस्थं व्यासयोगीशमाभजे ।। १ ।।

यदुक्तं पूर्वस्कंधान्ते,

हतपुत्रा दितिः शक्र पार्ष्णिग्राहेण विष्णुना ।
मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ।। इति ।

तच्छ्रुत्वा परीक्षित्पृच्छति ।। सम इति त्रिभिः ।। प्रियत्वादेव सुहृत् । समस्य सुहृदस्य वैषम्यं न सम्भावितमित्याशयः ।। १ ।।

श्रीव्यासतत्वज्ञविरचिता श्रीभागवतटिप्पणी मन्दनन्दिनी

चरणस्मरणात्सर्वदुरितस्य विदारणम् ।
शरणं नृहरिं वन्दे करुणावरुणालयम् ।। १ ।।
आपाततोऽन्यथाभातभागं भागवतं सताम् ।
तात्पर्यतोऽजितपद्यः तं तत्त्वज्ञमुनिं भजे ।। २ ।।

वाणीनर्तनरङ्गाभवक्त्रान् जयमुनीन् गुरून् ।
अस्मद्दैशिकपर्यन्तान् बुद्धिशुद्ध्यै समाश्रये ॥ ३ ॥
योऽतनोत्प्रभया विष्णुतत्त्वकर्मविनिर्णयौ ।
तमो निरास्यच्च तमाचार्यसूर्यमहं भजे ॥ ४ ॥
सृष्टिकूपे निपतितं द्विजमुद्धृत्य मापतेः ।
पदाम्बुजे जिहासन्तं भुवनेन्द्रमहं भजे ॥ ५ ॥
सप्तमस्कन्धगफले अतिस्वादयिष्टे रसम् ।
शुकानुकम्पया व्यासस्तत्त्वज्ञः कश्चन द्विजः ॥ ६ ॥
विजयध्वजतीर्थानां कृतेरनुकृतिर्मम ।
शिशोरिव कृतिः पित्रोर्हासहर्षावहासिताम् ॥ ७ ॥
सप्तमस्कन्धपद्यानां श्रीमद्भागवते शुभे ।
भुवनेन्द्राज्ञया कुर्वे योजनां मन्दनन्दिनीम् ॥ ८ ॥

अत्र सप्तमस्कन्धे सर्वसज्जनदुरितविदारिश्रीनृसिंहावतारस्तत्प्रसादाय विविधवर्णाश्रमाचारस्तत्सपर्याप्रकारश्च प्रतिपाद्यते । तदर्थं परीक्षित्प्रश्नपूर्वमुपोद्धातं रचयति ॥ सम इति ॥ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय इत्यादिवचनेषु समत्वाद्युक्तेरुभयत्र समात् । एकस्यार्थे परस्य वधाद्ययोगः । लोके तथा दर्शनात् । अत्र समत्वादेः प्रत्येकमेव वधायोगप्रयोजनकत्व वैशिष्ट्ये कृत्याभावात् । विषमो यथेत्युपलक्षणं बोध्यम् । यद्यपि सिद्धांत्यभितं समत्वं न वधविरोधि । प्रियत्वादिकं न सर्वत्रास्ति । तथापि तादृशसिद्धान्ताविर्भावायैवेयमुक्तिरित्यवधेयम् ॥ १ ॥

न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ।
नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥

प्रकाशिका — किञ्च यैर्यस्य प्रयोजनं सिध्यति स तत्पक्षपाती भवति । येभ्यो बिभेति तान् द्वेष्टि । न चैतदुभयमत्रास्तीत्याह ॥ न हीति ॥ निःश्रेयसं परमानन्द एव आत्मा स्वरूपं यस्य । असुरेभ्यश्चोद्वेगो भयं नास्त्यतो विद्वेषोऽपि नास्त्येव । उभयत्र हेतुरगुणस्येति । सत्वादिगुणविकारशून्यस्येत्यर्थः । हीति सर्वत्र प्रमाणसिद्धिं दर्शयति ॥ २ ॥

मन्दनन्दिनी — युक्त्यन्तरेणापि वधायोगमाशङ्कते ॥ न ह्यस्येति ॥ किं चेन्द्रस्यार्थे दैत्यवधः किमिन्द्रेण स्वप्रयोजनसद्भावात् । यद्वा स्वस्यैव दैत्यद्वेषसद्भावात् । यद्वा भाविबाधकशङ्काजनितभयात् । नाद्य इत्याह ॥ न ह्यस्येति । तत्र हेतुः । साक्षान्निःश्रेयसात्मन इति । निर्दुःखानन्दादेः स्वरूपत्वं

नासम्पादनीयत्वात् । स्वस्यानन्याधीनत्वेनाभिव्यक्त्यर्थं स्थित्यर्थमप्यधिकारिवद्रमावच्चानन्यापेक्षणात् । न द्वितीय इत्याह ।। नैवासुरेभ्य इति ।। विद्वेषस्यापि क्रोधादिरूपतया । क्रुधद्रुहेर्ष्यासत्यार्थानां यं प्रति कोप इति चतुर्थी । न तृतीय इत्याह ।। नोद्वेगश्चेति ।। उभयत्र हेतुः ।। अगुणस्येति ।। द्वेष उभयोर्गुणकार्यत्वात् । अस्य निर्गुणत्वात् ।। २ ।।

इति नः सुमहाभाग नारायणगुणान् प्रति ।
संशयः सुमहान् जातस्तद्भवान् छेत्तुमर्हति ।। ३ ।।

प्रकाशिका — नारायणस्य गुणाननुग्रहनिग्रहादीन् प्रति तत् तं संशयम् ।। ३ ।।

मन्दनन्दिनी — नारायणगुणान्प्रतीति समत्वादौ निःश्रेयसात्मत्वे निर्गुणत्वे च सति सुरोपकारकत्वदैत्यसंहारकत्वादिगुणायोगः । तस्मिन्वा सत्युक्तगुणायोग इति बहुगुणविषयकः सन्देह इत्यर्थः ।। ३ ।।

श्रीशुक उवाच –

साधु पृष्टं महाराज हरेश्चरितमद्भुतम् ।
यद् भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ।। ४ ।।

मन्दनन्दिनी — प्रश्नं स्तौति ।। साधु पृष्टमिति । यस्माद्भगवत्सम्बन्धिमाहात्म्यं पृष्टादिकं सत् भगवद्भक्तिवर्धनं तत्तस्मात्त्वया पृष्टं साध्विति योजना ।। ४ ।।

गीयते परमं पुण्यं ऋषिभिर्नारदादिभिः ।
नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ।। ५ ।।

प्रकाशिका — कृष्णाय व्यासाय ।। ५ ।।

मन्दनन्दिनी — नत्वा कृष्णायेत्यत्र क्रियार्थोपपदस्य तत्कर्मणि स्थानिन इत्यनेन चतुर्थी ।। ५ ।।

निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ।। ६ ।।

श्रीमदानन्दतीर्थ भगवत्पादाचार्यविरचितः श्रीमद् भागवततात्पर्यनिर्णयः

'बाध्यादिस्थो हरिर्नित्यं बाध्यतादिगतेत्यपि । गीयते न तु बाध्यत्वाद्यद-दोषयुतत्वत' इति भविष्यत्पर्वणि ॥ ६ ॥

प्रकाशिका –– उत्तरं वक्तुमाह ॥ निर्गुण इति ॥ निर्गुणोऽपीत्यनुवादः । तदुपपादनायाजत्वादि-कम् । स्वमायागुणं स्वाधीनप्रकृतिकार्यं देवासुरादिदेहम् । बाध्यबाधकतामिति ॥ असुरदेहेषु बाध्यतां देवदेहेषु बाधकताम् । अत्र देवासुरदेहो हरेः प्रतीयते । स च प्रमाणविरुद्धोऽतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति ॥ बाध्यादिस्थः इति ॥ आदिपदेन बाधकसङ्ग्रहः । बाध्यादिस्थः बाध्यादीनां बाध्यतादिप्रदः इत्यर्थः । बाध्यतादिगतेत्यत्र सुपां सुलुगिति विभक्तिलोपः । अपिशब्दात् बाध्यबाधकपदसङ्ग्रहः । गीयते भागवतादौ । तथा च हरौ तदधीनत्वादिति न्यायेन बाध्यतादिगतशब्द-प्रयोग इति भावः । न तु बाध्यत्वात् । बाध्यताधिकरणत्वादित्यर्थः । बाधकत्वाधिकरणत्वमप्यस्तीति ज्ञापनाय न तु बाध्यत्वादित्येवोक्तम् । ततश्चायं श्लोकार्थः । भगवान्निर्गुणोऽपि सत्वादिगुणकृत-विकारशून्योऽपि स्वमायागुणं स्वाधीनप्रकृतिगुणकार्यं देवासुरादिदेहं आविश्य बाध्यबाधकतां गतः । असुरादिदेहेषु प्रविष्टः बाध्यतां गतः । नियमनाय प्राप्तः इत्यर्थः । सुरादिदेहेषु प्रविष्टः बाधकतां गतः । नियमनाय प्राप्तः ॥ ६ ॥

मन्दनन्दिनी –– उत्तरमाह ॥ निर्गुणोऽपीति । अपीत्यावर्तते । भगवानिति च । अपि यद्यपि । भगवान्विष्णुर्निर्गुणो गुणत्रयरहितोऽत एव तत्कार्यद्वेषोद्वेगरहितः । प्रकृतेर्लक्ष्म्या अपि परः । भगवान्समग्रैश्वर्यवान् । अत एव सुरगणैर्नास्यार्थोऽस्ति । अपि तथापि स्वमायया गुणमाविश्य स्वतन्त्रेच्छालक्षणगुणं स्वेच्छाधीनसत्वादिगुणं वाऽऽश्रित्य बाधकतां गतो भवति । इन्द्रस्यार्थे दैत्यानवधीदिति यावत् । तथा चेन्द्रजन्योपकारादिकारणत्रयाभावेऽपि स्वेच्छाधीनगुणाद्यनुरुद्धया स्वेच्छयैव कारणेन वधो गुणाद्यनुरोधाच्च न वैषम्यादि । अत्र निर्गुणत्वस्य सत्वे तत्कार्यजननादिरूपकार्याभावः । तत्कारणीभूतजडप्रकृतेः परत्वं च लिङ्गमित्याशयेनाज इति । प्रकृतेः पर इति चोक्तम् । अनेन द्वितीयश्लोकोक्तशङ्काया निरासः । नन्वत्र षष्ठीतत्पुरुषोपगमे बाधकाभावेऽपि द्वन्द्वात्तल्प्रत्ययोपगमे कथं बाध्यबाधकतां गत इति सङ्गच्छते । तल्प्रत्ययस्य सर्वत्र सम्बन्धेन निर्दोषस्य बाध्यतां गतत्वस्यायोगादिति चेन्न । बाध्यस्थत्वेनैव निमित्तेन बाध्यतां गत इत्युक्तेः सम्भवात् । अत एवात्र तात्पर्यम् । बाध्यादिस्थो हरिरित्यादिभविष्यत्पर्वणीति । अत्र बाध्यतादिगतेत्यपीत्यत्राविभक्तिको वा सुपो लुका वा निर्देशः । अत्रादिपदेन विद्धदुःखादेर्ग्रहणम् । अनेन प्रवृत्तिनिमित्तनियामकत्वेन लक्षणतदधीनत्वनयन्यायेनैव प्रवृत्तिनिमित्ताश्रयस्थत्वेनापि तच्छब्दवाच्यत्वमित्युक्तं भवति । न च

बाध्यस्थत्वोक्तिरनुपयुक्तेति वाच्यम् । बाध्यताप्रयोजकलोकपीडाजनकबलप्रदत्वेन तत्स्थत्वस्य वक्तव्यत्वात् । न च बाध्यस्थत्वमनुपलब्धिबाधितम् । अव्यक्तत्वात् । अत एवाव्यक्त इति मूले उक्तम् । एतच्च प्रथमश्लोकोक्तशङ्कापरिहारस्याप्युपलक्षणम् । समत्वं न तावद्वधविरोधि । तस्य यमे समवर्तित्ववत्तत्तद्योग्यतानुसारेण फलप्रदरूपत्वात् । प्रीतिकत्वरूपं प्रियत्वम् । प्रत्युपकार-मनपेक्ष्योपकारकर्तृत्वरूपं सुहृत्वं च सज्जनेष्वेवेति ॥ ६ ॥

सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद् राजन् ह्रास उन्नाह एव च ॥ ७ ॥

प्रकाशिका — उक्तमेव विवृणोति । सत्वमित्यादिना ॥ प्रकृतेः स्वरूपभूताः । न तथा परमात्मन इत्यर्थः । अनेन निर्गुण इत्येतद्विवृतमिति ज्ञातव्यम् । बाध्यबाधकतां गतः इत्युक्तं प्रपञ्चयितुमाह ॥ न तेषामिति ॥ उन्नाहो वृद्धिः । अन्यथा बाध्यबाधकभावो न स्यादित्याशयः ॥ ७ ॥

मन्दनन्दिनी — निर्गुणत्वं विवृणोति ॥ सत्त्वं रज इति । अत्र सुरासुरादिगतसत्त्वादि-गुणानुसारेण भगवतस्तत्तत्कार्यकारित्वं कथम् । प्रत्येकगुणत्रयादिसत्वात् । न च प्राचुर्यानुसारेण तदिति वाच्यम् । तथात्वे सुरेषु तमःकार्यस्य कदाऽप्यनापत्तेरिति चेन्न । प्रचुरगुणस्यैव जन्मलयकाले विवृद्धत्वेन तदनुसारेण भगवत्कार्यव्यवस्थोपपत्तेः । मध्ये रजआदेरपि किञ्चिद्विवृद्ध्या सुरादिषु तत्कार्योपपत्तिरित्याशयेनाह ॥ न तेषामिति ॥ तथा च युगपद् ह्रासवृद्ध्यभावान्नाव्यवस्थेति भावः ॥७॥

जयकाले तु सत्वस्य देवर्षीन् रजसोऽसुरान् ।
तमसो यक्षरक्षांसि तत्कालानुगुणो भजन् ॥ ८ ॥

प्रकाशिका — ततः किमित्यत आह । जयकाल इति ॥ उन्नाहकाल इत्यर्थः । सत्वस्य जयकाले देवर्षीन् भजन्नाभाति । तान्प्रविश्यासुरादिबाधकतां ददातीत्यर्थः । रजसो जयकाले असुरान् भजन्नाभाति । तेषामपीतरबाधकतां ददातीत्यर्थः । तमसो जयकाले यक्षरक्षांसि भजन्नाभाति । तेषामपीतरबाधकतां ददाति । कुत एवं करोतीत्यत उक्तम् । तत्कालानुगुण इति ॥ सत्वादि-विजयकालमनुसृत्येत्यर्थः ॥ ८ ॥

मन्दनन्दिनी — कथं तर्हि व्यवस्थेत्यत आह ॥ जयकाल इति ॥ रजस इत्यादावपि जयकाल इति सम्बध्यते । असुरान्सुरभिन्नान्मनुष्यान् । नित्यसंसारिण इति यावत् । यक्षरक्षांसीति तमोयोग्योप-लक्षणम् । भजन् । एवं देवादीन् जन्मलयकाले विभजन् तत्कालगुणस्तत्कालेऽभिवृद्धगुणानुगुण आस्त इत्यन्वयः ॥ ८ ॥

ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ।
विन्दन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥

तात्पर्यम् — 'दधिस्थघृतवत्काष्ठे वह्निवच्च जनार्दनः । देहेन्द्रियासुजीवेभ्यो विविच्य ज्ञायते न त्वि'ति च ॥ ९ ॥

प्रकाशिका — नन्वेवं भगवतो देवादिदेहगतत्वे कस्मात्तैर्देहादिव्यतिरिक्ततया स नानुभूयत इत्याशङ्कापरिहाराय यदव्यक्तः इत्युक्तं तद्विवृणोति । ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यत इति । अप्रतिपत्तिविप्रतिपत्तिनिरासायास्य विवक्षितमर्थं प्रमाणेनैव दर्शयति ॥ दधिस्थेति ॥ आदिशब्दार्थकथनं दधिस्थेति । वह्निवदित्यनेन ज्योतिःशब्दो वह्निपर इति दर्शयति । सङ्घातशब्दार्थप्रदर्शनं देहेन्द्रियासु जीवेभ्य इति । न विविच्यते इत्यस्य व्याख्यानं विविच्य ज्ञायते न त्विति । ननु कथं ज्योतिरादिनिदर्शनं तस्य मथनेनान्तत उपलभ्यमानत्वादित्यतो भगवानपि तथेत्याह ॥ विदन्तीति ॥ आत्मानं परमात्मानम् । मथित्वा शास्त्रविचारेण निर्णीय । अन्ततः निर्णयपरिपाके ॥ ९ ॥

मन्दनन्दिनी — बाध्यादिस्थो भगवान् व्यक्त इत्येतद्दृष्टान्तमुखेनाह ॥ ज्योतिरादिरिति ॥ अरणौ ज्योतीरूपेण वह्निः । आदिपदेन दध्यादौ घृतादिः । यथा विद्यमानोऽपि न भाति तथाऽऽत्मस्थोऽपि परमात्मा न भाति । अमानोनाःप्रतिषेध इति प्रतिषेधार्थकं अभातीत्यत्र अइत्यव्ययम् । न भातीत्यस्यैवाभिप्रायमाह ॥ सङ्घातादिति ॥ देहेन्द्रियासुजीवसमुदायान्न विविच्यते विविच्य न ज्ञायते । अविद्यमान एव न भातीति किं न स्यादित्यत आह ॥ विदन्तीति ॥ यतः कवयो मथित्वा श्रवणादिविचारं कृत्वा तत आत्मादिस्थं देहादिस्थमपरोक्षन्ति जानन्ति । यथाऽरणौ वह्निं दध्नि वा घृतम् । कवयो मथनकुशलाः । अतो नास्तीति वक्तव्यमिति भावः । अत एवैतत्सर्वमभिप्रेत्योक्तं तात्पर्ये । दधिस्थघृतवदित्यादि ॥ ९ ॥

यदा सिसृक्षुः पुर आत्मनः परो
रजः सृजत्येष पृथक् स्वमायया ।
सत्वं विचित्रासु रिरंसुरीश्वरः
शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥

प्रकाशिका — भगवतः सत्वादिजयमपेक्ष्य प्रवृत्तौ सत्वादिगुणाधीनत्वं प्राप्तमत आह । यदेति ॥ आत्मनः स्वस्य निवासाय पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छति तदा पृथक् देवासुरादियोग्यतानुसारेण रजः रजोगुणकार्याणि शरीराणि स्वमायया स्वेच्छया सृजति । यदा विचित्रासु सुरनरतिर्यगादिरूपासु

पूर्षु रिरंसुः क्रीडितुमिच्छति तदा सत्वमीरयति । शयिष्यमाणः योगनिद्रां कर्तुमिच्छति संहरिष्यन्निति यावत्, तदा तम ईरयति । तच्छक्तिमुज्जृम्भयतीत्यर्थः । तथा च स्वतन्त्रसाधनापेक्षायां सत्वादिकं च भगवदधीनप्रवृत्तिकमतो नोक्तदोष इत्याशयः ।। १० ।।

मन्दनन्दिनी — जयकाले तु सत्त्वस्येत्यादिना गुणत्रयप्रकृतत्वात्प्रसङ्गात्सृष्टिरक्षासंहृतिष्वपि गुणत्रयोपादानं विवेकेनाह ।। यदा सिसृक्षुरिति ।। परः परमात्मा आत्मनः पुरः शरीरस्थानापन्नानि महदादितत्त्वानि तदभिमानिदेवशरीराणि ब्रह्माण्डं तदन्तर्गतशरीरजातं च सिसृक्षुर्भवति तदा पृथक् साम्यावस्थापन्नाद्विविच्य स्वमायया स्वेच्छया रजो रजोगुणं सृजति सृष्टौ व्यापारयति । यदा चैषः सृष्टासु विचित्रासु पूर्षु रिरंसुः । अन्तर्णीतणिच् । रिरक्षुरिति यावत् । तदा सत्वमीरयति । यदा चासौ शयिष्यमाणः स्वयं प्रलयजले स्वान्तर्वा लोकान् शयिष्यमाणः । अन्तर्णीतणिच् । स्थापयिष्यन् भवति । तदा तम ईरयति । अत्र सर्वत्रेश्वरः समर्थ इति ।। १० ।।

कालं चरन्तं सृजतीश आश्रयः
प्रधानपुंभ्यां नरदेव सत्यकृत् ।
स तत्र तत्रोभयसिद्धिमाप्नुयात्
लिङ्गात्मनो लिङ्गगुणाश्च सन्ति ।। ११ ।।

तात्पर्यम् — प्रधानपुंभ्यां सह ।। ११ ।।

प्रकाशिका — ननु तथापि तत्कालानुगुण इत्युक्त्या कालाधीनत्वं प्राप्तमित्याशङ्कायामाह । कालमिति ।। चरन्तं वर्तमानादिभेदेन प्रवर्तमानम् । ईश आश्रयः इत्येताभ्यां तस्य सर्जनसामर्थ्यं सूचयति । ननु तथापि प्रधानपुरुषाभ्यां सहकारिभ्यां सृजतीत्युक्त्या प्रधानाद्यधीनत्वं प्राप्तमित्याशङ्कायामत्रविवक्षितां योजनामाह । प्रधानपुंभ्यां सहेति । प्रधानपुंभ्यां सह कालं सृजतीत्युक्त्या प्रधानपुरुषयोरपि सृज्यत्वं लभ्यते । तथा च न किञ्चिद्भगवदनधीनं साधनमस्तीत्याशयः । नन्वविद्यमानमेव मायया प्रदर्शयति न तु सृजतीत्यत उक्तम् । सत्यकृदिति ।। सत्यमेव सृजतीत्यर्थः । कुतस्तत्सृष्टस्य सत्यत्वमित्यत आह ।। स तत्रेति ।। स परमात्मा तत्र स्वसृष्टे सत्वादौ कालादौ चोभयसिद्धिं बाध्यबाधकतादिप्रदत्वरूपां सिद्धिं प्राप्नुयात् । तथाचार्थक्रियाकारित्वात्तस्य सत्वमित्याशयः । ननूभयसिद्धिरपि मायामयी किं न स्यादित्यत आह । लिङ्गात्मन इति । शरीरस्वामिनो जीवस्य लिङ्गगुणाः शरीरधर्माः दुःखादयः सन्ति, अबाध्याः एवानुभूयन्ते । यदि भगवत उभयसिद्धिर्मायामयी तर्हि जीवे तद्दत्तबाध्यतादिना दुःखादिकमबाध्यतया नानुभूयेतेति बाधकमनेनोक्तमिति ज्ञातव्यम् ।। ११ ।।

मन्दनन्दिनी — कालादेव जगदुत्पत्त्युपपत्तेर्न भगवानपेक्षणीय इति कालशब्देश्वरैकत्वमतान्यप्येवमेव हीत्यनुव्याख्यानोक्ताः कालैकत्ववादिनः प्रधानपुंभ्यामेवोत्पत्तिरिति सांख्याः । तन्मतं निराह ।। कालं चरन्तमिति । कालोऽखण्डो न । क्षणलवादिभेदस्यौपाधिकत्वस्य समयपादे निरासेन स्वाभाविकत्वात् । तथा च प्रवाहतश्चरन्तं कालमपि भगवानेव सृजति । कलामुहूर्ता इत्यादि श्रुतेः । नापि प्रधानपुरुषयोः स्रष्टृत्वम् । ताभ्यां सह कालस्य सृष्टत्वात् । इत्याशयेनाह ।। प्रधानपुंभ्यामिति । नेयं पञ्चमी । किन्तु सहयोगे तृतीया । प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामासेति वचनात् । एतदेवाभिप्रेत्योक्तं तात्पर्ये ।। प्रधानपुंभ्यां सहेति ।। इदमिदानीमिति प्रतीतिसिद्धकालाश्रयत्वप्रदोऽपि भगवानित्यभिप्रेत्याश्रय इत्युक्तम् । आरोपितत्वाज्जगतो मायापेक्षा वक्तव्या । नतूक्तगुणत्रयापेक्षेत्येतद्वेति चोद्यं निराह ।। सत्यकृदिति ।। विश्वं सत्यमित्यादिश्रुतेः । अनीशो हि मिथ्यां दर्शयति । अयं चेश इतीत्युक्तम् ।। ईश इति ।। एवं जगत्सर्जनेन तत्र तत्र प्रवेशनादिना च स्वप्रयोजनाभावात्कथमेतदित्यत आह ।। स तत्र तत्रेति ।। योग्यायोग्यजनेषु स्थित्वा शुभाशुभलक्षणोभयसिद्धिमाप्नुयात् । अन्तर्णीत णिच् । आपयेत् । तथा च स्वस्य विहार एवायम् । जनस्य सदसन्मोक्षलाभ एव प्रयोजनमिति भावः । तथाप्युपादाननिमित्ताद्यपेक्षणात्परापेक्षत्वं तच्छक्त्यभावाच्चापूर्णत्वमित्यत आह ।। लिङ्गात्मन इति ।। लिङ्गं शरीरे चिह्ने च साधने शेफभस्मनोरित्यभिधानात् । लिङ्गस्य शरीरस्थानीयस्य साधनस्य वा प्रकृतिकालादेरात्मनः स्वामिनो लिङ्गगुणाः स्वाधीनतया सन्ति । षष्ठ्यर्थः स्वत्वम् । तथा च साधनानां साधनत्वं यदात्माधीनमिष्यते । तदा साधनसम्पत्तिरैश्वर्यं द्योतिका भवेदित्युक्तेः । साधनापेक्षया न स्वातन्त्र्यहानिः । नाप्यपूर्णत्वम् । यतो लिङ्गशक्तयः परमात्मनः सन्ति । सर्वसामर्थ्योपेतत्वात् । शशविषाणादिसर्जनसामर्थ्यमप्यस्ति । किन्तु सत्यसङ्कल्पत्वान्न तथा करोतीत्येव । यद्वा पृथिव्यबादीनां जडानां या आस्पदत्वतदर्थैकत्वादिशक्तयो याश्च देवानां शक्तयस्ताश्च सन्तीति न भगवतो न्यूनत्वम् । इदं च पद्यं प्राचीनैर्बहुधा योजितमपि मन्दानन्दायेत्थं योजितमिति क्षन्तव्यम् ।। ११ ।।

य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यजः ।
तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ।। १२ ।।

तात्पर्यम् — काले कालविषयेऽपीशिता । देहादिकारणत्वात् सुरानीकमिव स्थितं सत्वम् । **‘स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः । अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम् । देशकालौ गुणांश्चैव भक्त्यादीनप्यपेक्ष्य तु । योग्यतां च तथा कर्म सम इत्यभिधीयते । स्वतः प्रियोऽपि देवानामुत्पाद्यैव गुणानिमान् । इतरेषां तथा दोषान्सुखदुःखे ददात्यजः । उभयं तु मनुष्याणामतः सम इतीरितः । अनादिनियताश्चैव गुणदोषाः सुरादिषु । यथाक्रमं पुनश्चैव**

नियमाद्वर्धितास्तथा । विष्णुनैव ततो नित्यं विषमश्च जनार्दन' इति ब्रह्मतर्के ॥ 'न विष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित् । योग्यतायास्तन्नियत्या विषमत्वं भवेदिती'ति स्कान्दे ॥ 'विषमत्वं तु दोषाय शुभाशुभविपर्यये । अतस्तादृशवैषम्यं ब्रह्मसूत्रे निराकृतम् । शुभाशुभनियन्तृत्वं न दोषो गुण एव सः । अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोरि'ति तन्त्रनिर्णये ॥ १२ ॥

प्रकाशिका –– नन्वेवं ईश्वरस्य बाध्यतादिप्रदत्वे वैषम्यमेव प्राप्तं न समः प्रियः इत्यादेः परिहारः इत्यतो बाध्यबाधकतां गत इत्येतत् प्रपञ्चयति । य एष राजन्निति ॥ अत्र काल इत्यस्य प्रथमान्तत्वेन प्रकृतासङ्गतिरित्यालोच्य सप्तम्यंततया छेदं दर्शयति । काल इति । तस्य चाधिकरणार्थत्वे पुनरसङ्गतिरेवातो व्याख्याति । कालविषयेपीति । तथा च काल इति विषयसप्तमी । तेनच अपिशब्दस्य सम्बन्धः इत्युक्तं भवति । तथा च सर्वप्रवर्तककालविषयेऽपीशिता । किन्त्वितरविषय इति कैमुत्यार्थकत्वोक्त्या सर्वेशितृत्वं तत्पूर्वमुक्तं तदनूदितं भवतीति ज्ञातव्यम् । सत्वं सुरानीकमिवैधयतीत्यत्र सुरानीकमिव सत्वमेधयतीत्युक्ते न प्रकृतसङ्गतिः । रजस्तमस्कानसुराननितिवत्सत्वात्मकं सुरानीकमेधयतीत्येव प्रकृते वक्तव्यत्वात् । अत एतदर्थलाभाय स्थितशब्दमध्याहृत्य योजयति ॥ सुरानीकमिव स्थितं सत्वमिति । सुरानीकात्मकं सत्वमित्यर्थः । ननु कथं सत्वस्य सुरानीकात्मकत्वमित्यतस्तदुपपादयति । देहादीति ॥ देहेन्द्रियाद्युपादनत्वादित्यर्थः । तथाच सुरानीकमिव स्थितं सत्वं सत्वात्मकदेहाद्युपेतं सुरानीकमेधयतीति मूलं व्याख्येयमिति भावः ।

कुत इत्यतः सुरप्रियः इति हेतुगर्भं विशेषणमुक्तम् । तदसुरप्रिय इत्यादेरपि उपलक्षकमभिप्रेत्य श्लोकतात्पर्यं प्रमाणेनैव दर्शयति । स्वभावत इति । तुशब्दोऽवधारणे । स्वभावत एव प्रियत्वादित्यन्वयः । देवानामिति शेषः । असुराणामप्रियः । नृणामुभयं प्रियश्चाप्रियश्चेत्यत्र स्वभावत एवासुराणामप्रियत्वात्स्वभावत एव नृणामुभयरूपत्वादित्युपपादकं ग्राह्यम् । नन्वेवं समत्ववाचक श्रुत्यादिविरोध इत्यत आह ॥ देशकालाविति ॥ चशब्दार्थ एवकारः । देशकालौ चेति सम्बध्यते । गुणान् सत्वादीन् । तत्तद्गुणयोग्यतादीनां यद्योग्यं फलं नाधिकं न न्यूनं तदेव ददाति । अतः सम इत्युच्यते इत्यर्थः । अनेन सत्वं सुरानीकमिवैधयति रजस्तमस्कानसुरान् प्रमिणोतीत्यादिकमुक्ततात्पर्यमित्यवगन्तव्यम् । ननु स्वतः प्रियत्वादिनैव देवादीनां सुखदुःखादिदानोपपत्तौ किं भक्त्यादि गुणापेक्षया अत उक्तरीत्या समत्वानुपपत्तिरित्यत आह ॥ स्वतः प्रियोऽपीति । इमान् भक्त्यादीन् द्वेषादींश्च । सुखदुःखे देवानां सुखमितरेषां दुःखम् । स्वतः प्रियत्वादिके विद्यमानेऽपि वेदप्रामाण्यसंरक्षणायेमान् दोषांश्चोत्पाद्यैव । यदि सुखदुःखे ददाति तर्हि तत्पूर्वं गुणाद्यभावात्पुनर्वैषम्यमेव प्राप्तं न समत्वमित्यत आह । अनादीति । यथाक्रममेव नियमादेवेत्येवकारयोः सम्बन्धः । तथा च पूर्वपूर्वगुणादीनपेक्ष्यैवोत्तरोत्तरगुणादीनुत्पादयत्यतो न वैषम्यप्राप्तिरित्याशयः ।

नन्वेवमनादिगुणादिसत्वे किं तदुत्पादनेनेत्यत उक्तम् । नियमादेव वर्धिता इति । तथा यथाक्रममेवेत्यन्वयः । नन्वेवमनादिगुणादिपरंपरामपेक्ष्य फलदानेऽस्वातन्त्र्यं प्राप्तमित्यत उक्तम् । विष्णुनैवानादिनियता इति । ननु तर्हि पुनर्वैषम्यं प्राप्तमित्यत आह । तत इति ।। एतादृशं वैषम्यं तस्य भूषणमेवेत्याशयः । उक्तमर्थं प्रमाणान्तरेण दृढयति । न विष्णोरिति । तुशब्दोऽवधारणे । नैवेत्यन्वयः । योग्यतापदं कर्मादिरुपलक्षकम् । भवेद्भूषणमिति शेषः । अनेनोरुश्रवा इत्येतदुक्ततात्पर्यम् । नन्वेवमन्ततो वैषम्याङ्गीकारे वैषम्यनैर्घृण्येनेति ब्रह्मसूत्रे कथं वैषम्यं निराकृतमित्यतस्तदधिकरणतात्पर्यं प्रमाणान्तरेण दर्शयति । विषमत्वमिति । तुशब्दोऽवधारणे । शुभाशुभविपर्यय एवेत्यन्वयः । शुभकर्मणोऽशुभ-फलदानेऽशुभकर्मणः शुभफलदाने हि वैषम्यं एतादृशमेव वैषम्यं निराकृतमित्यर्थः । ननु पूर्वपूर्वतनं शुभादिकं भगवदनधीनं चेत्पुनर्वैषम्यं प्राप्तमित्यत आह । शुभाशभेति । शुभाशुभनियंतृत्वं तादृशवैषम्यं गुण एव भूषणमेव । यादवकृष्णव्यावृत्यर्थं ब्रह्मसूत्रकृत इत्युक्तम् । तदुक्तरूपं वैषम्यमिष्टम् । ''स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशितापी''ति श्रुतौ उपलभ्यतेचेति सूत्रखण्डेनोपपादि-तत्वादित्याशयः ।

ततश्चायं श्लोकार्थः । य एष हरिः कालविषये पीशिता किमु प्रकृत्यादीनाम् । स्वतन्त्र इति यावत् । अनेन सात्विकत्वात् सुराणां स्वभावत एव भगवत्प्रियत्वमुक्तमिति ज्ञातव्यम् । एधयति तत्तद्योग्यतानुसारेण भक्तिज्ञानादिकमुत्पाद्य सुखं ददाति । कुत इत्यत उक्तम् । यतः सुरप्रिय इति । स्वभावादेवेति शेषः । तत्प्रत्यनीकान् देवप्रतिपक्षभूतान् रजस्तमस्कानत्र रजोग्रहणं प्रसंगान्मनुष्याणामपि संग्रहाय । तमस्कान् तमोगुणप्रचुरदेहाद्युपेतात् । असुराणां स्वभावत एव भगवदप्रियत्वमुक्तमित्यावगंतव्यम् । प्रमिणोति हिनस्ति । तद्योग्यतानुसारेण स्वद्वेषादिकमुत्पाद्यांधे-तमसि दुःखं ददातीति यावत् । कुत इत्यतो यतः स्वभावत एवासुराप्रिय इति ग्राह्यम् । रजोगुणप्रचुरदेहाद्युपेतानत एव स्वभावत एव भगवति प्रीत्यतिप्रीतियुतान् मनुष्यान् एधयति प्रमिणोति च । तद्योग्यतानुसारेण गुणान् दोषांश्चोत्पाद्यसुरव अदुःखे ददातीत्यर्थः । नन्वेवं स्वभावत एव सुरप्रियत्वात् सुरानेधयति । स्वभावत एवासुराप्रियत्वादसुरान्हन्तीत्युत्तरमुक्तं स्यात् । एवं चेद्विषम एव स्यान्न सम इत्यत एतादृशंवैषम्यं तस्य भूषणमेव । न तु दूषणमित्याशयेनाह । उरु बहु श्रवः कीर्तिर्यस्येति । कीर्तिनाशकरोहि दोषोभवति । अनेनच तस्य कीर्तिरुत्कर्षैव भवति । अतो न दोष इत्यर्थः । समत्वं तु तत्तद्योग्यतानुसारेणैव फलदानादुपपद्यत इति ।। १२ ।।

मन्दनन्दिनी — निर्गुणोऽपि ह्यज इति प्रतिवचनश्लोके स्वमायागुणमाविश्येत्येतेन स्वेच्छाधीनसत्त्वादिगुणालम्बनाद्वधादिकं युक्तमित्युक्तम् । तदेव प्रयोजनोक्त्या प्रपञ्चयति ।। य एष इति श्लोकद्वयेन ।। य एष उरुश्रवाः पुरुकीर्तिर्दूरश्रवणादिकीर्तिमान्वा भगवान् कालप्रकृतिपुरुषादिविषये

ईशिता सुराणामनीकमिव बलोपष्ठम्भकसैन्यमिव स्थितं देहेन्द्रियादिकारणीभूतं सत्त्वमेधयति । रजस्तमस्कान् तत्प्रत्यनीकान् सुरविरोधिनोऽसुरान् प्रमिणोति निहन्ति । तमसि संसारे वा प्रक्षिपति । एतत्किमर्थमित्युक्ते स भगवान् स्वसृष्टस्य स्थितिरक्षानुवृत्तये स्थितेस्तदर्थं रक्षायाश्चानुवृत्तये प्रकृतैतावत्त्वं हीत्यधिकरणोक्तरीत्या संहर्तुरसंहारातिरिक्तान्नदानादिरूपरक्षां विना स्थित्ययोगात् । सत्त्वं सत्त्वगुणं तेन सुराणां च मुहुः प्रतिस्थितिकालमुपबृंहयते वर्धयते । असुरान्नाशयतीति च ग्राह्यम् । अत्र काल ईशितेत्यत्र प्रथमाभ्रान्तिं वारयितुं तात्पर्यम् । काले कालविषये ईशितेति । अनेन प्रकृतिपुरुषकालादि-भिर्बलात्कृत इत्थं करोतीति न प्रयोजनचिन्तेति चोद्यं निरस्तम् । सुरानीकमिवेत्यस्यैधय-तीत्यनेनान्वयभ्रान्तिं निवारयितुं सादृश्यं प्रकटयितुं च प्रवृत्तं तात्पर्यम् । देहादिकारणत्वेन सुरानीकमिव स्थितं सत्त्वमिति । एवं चेवेत्यस्य स्थितमित्यध्याहृतेनान्वयः । उपोद्बलकत्वेन च सादृश्यमित्युक्तं भवति । मूले सुरप्रियेत्युक्तिरनुपपन्ना । कदाचिदसुरादावप्यैश्वर्यादिप्रियकारित्वात् । न च सदा प्रियत्वेन विशेषः । तथात्वे सर्वसमत्वानुपपत्तेरित्यतस्तद्घटयितुं प्रवृत्तं तात्पर्ये ब्रह्मतर्कवचनम् ।

स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः ।
अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम् ॥

अत्र हरिर्देवप्रिय उच्यते । अत्र हेतुद्वयं सदा प्रियत्वात्स्वभावतः प्रियत्वादिति । प्रीतेः कर्तृविषयस्वभावोभयनिमित्तकत्वं बोध्यम् । तुशब्दो नैव सुरादिष्विति विशिनष्टि । चशब्दस्तुशब्दार्थे असुराणां त्वित्यर्थः । यद्वा अनुक्तसमुच्चयः सदा चेत्यर्थः । यद्वा । न केवलं सुरप्रियोऽसुराणामप्रियश्चेति । नृणां तूभयम् । प्रियाप्रिय इत्युच्यत इत्यर्थः । अत्रापि स्वभावात्सदेति ग्राह्यम् । एवं तर्हि समत्वानुपपत्तिरित्यत आह ॥

देशकालगुणांश्चैव भक्त्यादीनप्यपेक्ष्य तु ।
योग्यतां च तथा कर्म सम इत्यभिधीयते ।

भारतादिदेशं कृतत्रेतादिकालम् । सदाचारादिगुणान् भक्तिश्रद्धादीन् अनादियोग्यतां पूर्वपुण्यकर्म चापेक्ष्य । एवमसुराणां देशादिकं द्वेषादिकं तस्य योग्यतां पूर्वपापं च मनुष्याणां तु मिश्रमवेक्ष्य फलं ददातीति सम उच्यते । न वैषम्यम् । अत एव वैषम्यनैर्घृण्ये न सापेक्षत्वादिति सूत्रम् । प्रकारान्तरेण समत्वमाह ।

स्वतः प्रियोऽपि देवानामुत्पाद्यैव गुणानिमान् ॥
इतरेषां तथा दोषान् सुखदुःखे ददात्यजः ।
उभयं तु मनुष्याणामतः सम इतीरितः ।

पूर्वं स्थितं साधनमपेक्ष्य फलदानात्समत्वम् । अत्र तु स्वतः प्रियत्वादौ सत्यपि गुणादिकमुत्पाद्यैव फलदानात्समत्वमिति भेदः । एवं तर्ह्यसुरेषु गुणे सुरेषु दोषे सति (किं) करोतीत्यत आह ॥

अनादिनियताश्चैव गुणदोषाः सुरादिषु ।
यथाक्रमं पुनश्चैव नियमाद्वर्धितास्तथा ।
विष्णुनैव ततो नित्यं विषमश्च जनार्दनः ॥ इति ब्रह्मतर्के ।

यतः सुरासुरादिषु गुणदोषा यथाक्रममनादिनियता अतो नोक्तशङ्केति भावः । एवं मिश्रेषूभयमनादिनियतमिति ग्राह्यम् । अत्र गुणपदं मोक्षसाध्यपरम् । दोषपदं तमःसाधनपरम् । उभयं च संसारापादकं ग्राह्यम् । एवं च सुरेषु दुःखापादकस्यासुरेषु सुखापादकस्य च सत्वेऽपि न दोष इत्यवधेयम् । नन्वेवं गुणदोषप्रवाहस्यानादित्वे सदसन्मुक्तिः कदाचिदेव कथमापाद्येते इत्यत आह ॥ नियमाद्वर्धिता इति ॥ तथा च यथा योग्यमभिवृद्धयोरेव गुणदोषयोः सदसन्मुक्तिकारणत्वान्न पूर्वं तदापत्तिः । मनुष्याणां तु साधनानुष्ठानपर्यवसितपक्षे यथायोग्यं वर्धितत्त्वं ज्ञेयम् । यथायोग्यमनन्तरमनुष्ठितं च साधनं मुक्तानुष्ठितकर्मैव न फलसाधनं किन्तु पूर्वमेव । फलं तु स्वरूपसुखदुःखोभयानुसारि बाह्यसुखदुःखानुभवापर्यवसानमेव । केचिल्लिङ्गभङ्गमप्याचक्षते । साधनानुष्ठानापर्यवसितपक्षे तु न क्रमाद्वृद्धिरित्यवधेयम् । एवमपि सुरेष्वनादिगुणनियत्याऽसुरेषु दोषनियत्या विषमः स्यादेवेत्यत आह ॥ नित्यं विषमश्च जनार्दन इति ॥ तर्हि विषमत्वं नास्तीत्युक्तेः का गतिरित्यतस्तात्पर्ये स्कान्दवचनं प्रवृत्तम् -

न विष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित् ।
योग्यतायास्तन्नियत्या विषमत्वं भवेदिति । इति स्कान्दे ।

इति योग्यतापेक्षया योग्यताऽतिक्रमापेक्षया तद्व्यत्यासापेक्षया वा विषमत्वं नास्ति । यथास्थिततन्नियत्यापेक्षया तु विषमत्वं स्यादेव । विषमत्वं नास्तीत्युक्तिस्तु योग्यताऽतिक्रमापेक्षया नास्तीत्यभिप्रायिका । नन्वेवं तर्हि यथाकथंचिद्विषमत्वं दोषप्राप्तय इत्यतो नेदं विषमत्वं दोषायेत्याशयेन प्रवृत्तं तात्पर्यम् -

विषमत्वं तु दोषाय शुभाशुभविपर्यये । अतस्तादृशवैषम्यं ब्रह्मसूत्रे निराकृतम् ।

शुभाशुभनियंतृत्वं न दोषो गुण एव सः ।
अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोः ॥

इति तन्त्रनिर्णय इति । शुभाशुभविपर्यये । पुण्यपापविपर्यये योग्यताविपर्यये वा । विपर्ययेण फलदान इति यावत् । उक्तं चानुव्याख्याने ।

वैषम्यनिर्घृणत्वं च वेदाप्रामाण्यकारणम् ।
नाङ्गीकार्यमतोऽन्यत्तु न वैषम्यादि नामकम् ॥

इति । विवृतमेतत्सुधाचन्द्रिकयोः ॥ १२, १३ ॥

स वा पुनः स्वसृष्टस्य स्थितिरक्षानुवृत्तये ।
सत्वं सुरगणान् विष्णुरुपबृंहयते मुहुः ॥ १३ ॥

प्रकाशिका — सत्त्वात्मकं सुरानीकमेधयतीत्युक्तमेव विशदयति । सवा इति । सत्त्वं सत्वात्मकदेहाद्युपेतम् । त्रिमूर्तिषु विष्णोः फालकत्वाद्विष्णुरित्युक्तम् । उपबृंहयते भक्त्यादिगुणपूर्णान् कृत्वा सुखिनः करोतीत्यर्थः ॥ मुहुः प्रतियुगम् ॥ १३ ॥

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ।
प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे ॥ १४ ॥

प्रकाशिका — स्वभावत एव सुरप्रियोऽसुराणामप्रिय इत्येतदिति हासेन दर्शयति ॥ अत्रैवेति । महाक्रतौ राजसूये ॥ १४ ॥

मन्दनन्दिनी — अत्रैव स्वभावतः सुरप्रिय इत्यत्रैव ॥ १४ ॥

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ।
वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १५ ॥

प्रकाशिका — चेदिभूभुजः शिशुपालस्य ॥ १५, १६ ॥

मन्दनन्दिनी — महाद्भुतं निन्दकस्यापि सायुज्यरूपमाश्चर्यम् ॥ १५ ॥

तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ ।
पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १६ ॥

मन्दनन्दिनी — विस्मितमना आश्चर्ययुक्तचित्तः ॥ १६ ॥

युधिष्ठिर उवाच–

अहो ह्यत्यद्भुतं ह्येतद् दुर्लभैकान्तिनामपि ।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १७ ॥

प्रकाशिका — एकस्मिन् मुख्ये हरावेवांतो निर्णय एषामस्तीत्येकांतिनस्तेषाम् ॥ १७ ॥

मन्दनन्दिनी — चैद्यस्य शिशुपालस्य ॥ १७ ॥

एतद् वेदितुमिच्छामः सर्व एव वयं मुने ।
भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥ १८ ॥

प्रकाशिका — तस्य वेनवत्तमः प्राप्तिरेव युक्तेत्याह ॥ भगवन्निंदयेति ॥ १८ ॥

मन्दनन्दिनी — भगवन्निन्दायास्तमोहेतुत्वे निदर्शनमाह ॥ वेन इति ॥ १८ ॥

दमघोषसुतः पाप आरभ्य कलभाषणात् ।
सम्प्रत्यमर्षी गोविन्दे दन्तवक्रश्च दुर्मतिः ॥ १९ ॥

प्रकाशिका — दमघोषसुतः शिशुपालः कलभाषणात्कोमलभाषणमारभ्य । संप्रति अधुनापि । अमर्षी द्वेषी । दंतवक्रश्चेतीमौ कथं तस्मिन् लयं सायुज्यं ईयतुरिति वक्ष्यमाणेनान्वयः ॥ १९ ॥

मन्दनन्दिनी — कलभाषणमारभ्य सम्प्रत्येतत्कालपर्यन्तमप्यमर्षी द्वेषी ॥ १९ ॥

शपतोरसकृद् विष्णुं यद् ब्रह्म परमव्ययम् ।
श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥ २० ॥

तात्पर्यम् — **'नियमाद्भुज्यते पुम्भिर्धर्माधर्मफलं मृतौ । कैश्चिदत्रापि भुज्येत तस्मान्नाधर्ममाचरेदि'ति भारते ॥ २० ॥**

प्रकाशिका — श्वित्रः श्वेतकुष्ठम् । अत्र पापस्य पारत्रिकनरकप्राप्तिवदैहिकं कुष्टादिकमपि नियमेन फलमिति प्रतीतिवारणाय विवक्षितं तात्पर्यं प्रमाणेनैवाह ॥ नियमादिति ॥ मृतौ मृत्यनन्तरम् । अत्रापि पापसाधनदेह एव भुज्येत भुज्यते । धर्माधर्मयोरत्युत्कटत्वदिति शेषः । तथाच नियमाभावेप्यत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति वचनात् सम्भावनया श्वित्रो न कुतो जात इति पृष्टमित्याशयः ॥ २० ॥

मन्दनन्दिनी — श्वित्रः श्वेतकुष्टः । धर्मी स्वर्गं विधर्मी निरयमेत्येवेति श्रुतेः । धर्माधर्मयोर्मृत्यनन्तरभाविफलकत्वात् । श्वित्रो न जात इति कथमुच्यत इत्यतस्तात्पर्यं प्रवृत्तम् ।

नियमाद्भुज्यते पुंभिर्धर्माधर्मफलं मृतौ ।
कैश्चिदत्रापि भुज्येत तस्मान्नाधर्ममाचरेत् ॥ इति भारते ।

कैश्चिदत्युत्कटैरित्यर्थः । अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इत्युक्तेः । भगवन्निंदनस्य चात्युत्कटत्वात् ॥ २० ॥

कथं तस्मिन् भगवति दुरवग्राह्यधामनि ।
पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥ २१ ॥

प्रकाशिका — दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य तस्मिन् ईयतुः । यद्यपि दन्तवक्त्रलयः तदानीं न जातस्तथापि तदीयजातकप्रमाणेनैवं सिद्धवन्निर्देशः ॥ २१ ॥

मन्दनन्दिनी — दुरवग्राह्यधामन्यप्राप्यस्वरूपे ॥ २१ ॥

एतद् भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ।
ब्रूह्येतदद्भुततमं भगवन्नत्र कारणम् ॥ २२ ॥

मन्दनन्दिनी — एतदेतस्मिन्विषये बुद्धिर्भ्राम्यति । निन्दा तमः कारणमिति श्रुतिशतसिद्धां निन्दकस्य सायुज्यं प्रत्यक्षसिद्धम् । अतो मनो नान्यतरन्निश्चेतुमर्हतीत्यर्थः ॥ २२ ॥

श्रीशुक उवाच—

राज्ञस्तद्वच आकर्ण्य नारदो भगवान् ऋषिः ।
तुष्टः प्राह तमाभाष्य शृण्वन्त्याः सदसः कथाः ॥ २३ ॥

प्रकाशिका — आभाष्य सम्बोध्य । सीदन्ति निषीदंत्यस्यामिति सदः सभा तस्याः सदसः शृण्वन्त्याः सत्याः कथाः प्राहेत्यन्वयः ॥ २३ ॥

मन्दनन्दिनी — सदसः कथाः शृण्वंन्तः सन्त इत्यर्थः ॥ २३ ॥

नारद उवाच—

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम् ।
प्रधानपरयो राजन् अविवेकेन कल्पितम् ॥ २४ ॥

प्रकाशिका — भगवन्निंदकस्य नरकाद्यनर्थेन भवितव्यमिति वदतस्तव कोऽभिप्रायः । किं तदीयनिन्दया भगवति दुःखमुत्पादितमिति । उत तदभावेऽपि सुरापानादिवन्निषिद्धाचरणरूपं

भगवन्निंदनमिति । तत्राद्यस्य प्राकृतदेहधारिणां तदभिमानिनामेव परकृतनिन्दनादिना दुःखाद्युत्पत्तिर्भगवतस्तु न प्राकृतो देहो नापि तदभिमानः अतो न परकृतनिन्दया दुःखोत्पत्तिरित्युत्तरमाह । निंदनेति सार्धैस्त्रिभिः ।। निंदनं दोषसङ्कीर्तनम् । स्तुतिः गुणकथनम् । सत्कारः पूजा । न्यक्कारोऽवज्ञा । तदर्थं तन्निमित्तकदुःखाद्यनुभवार्थं कलेवरं षोडशकलात्मकं शरीरं प्रधानाद्देहेन्द्रियाद्यात्मकात्परस्य जीवस्याविवेकेन स्फुटतरभेदाग्रहेण कल्पितं समर्थं भवति । अत्र स्तुतिसत्कारयोः प्रसङ्गाद्ग्रहणम् ।। २४ ।।

मन्दनन्दिनी — युधिष्ठिरोक्तप्रश्नं प्रतिवक्तुमारभते ।। निन्दनेत्यादिना ।। अत्र निन्दनादिना भगवतः क्रोधदुःखहिंसनाद्युपद्रवप्राप्त्या कथं चैद्यस्य सायुज्यमिति वा । एतज्जन्मनि साधनाभावात्कथं तदिति वा । द्विषतोऽपि सायुज्ये वेनस्यापि तत्स्यादिति वा । नाद्य इत्याह ।। निन्दनेति ।। हे राजन् । प्रधानपुरुषयोः प्रकृतिपुरुषयोर्देहजीवयोर्वाऽविवेकेनात्यन्ताभेदज्ञानेन निमित्तेन यत्कल्पितं निष्पादितं तदेव कलेवरं देहादिकं निन्दनाद्यर्थं भवति । निन्दनस्तवौ दोषगुणसङ्कीर्तनरूपवाचकव्यापारौ । सत्कारन्यक्कारौ सन्मानावमानलक्षणौ कायिकौ । एतैः कार्यं क्रोधदुःखादिकं लक्ष्यते । तथा च स्वर्गार्थं याग इतिवन्निन्दनादिजन्यक्रोधाद्युपद्रवायेदं निन्दनाद्यर्थम् । अर्थेन नित्यसमासो विशेष्यनिघ्नता च ।। २४ ।।

हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा ।
वैषम्यमिह भूतानां ममाहमिति पार्थिव ।। २५ ।।

प्रकाशिका — उक्तरूपविवेकोऽपि कथं दुःखाद्यनुभवजनकः इत्यत उपलक्षणया दुःखाद्यनुभवजनकत्वं तस्योपपादयति ।। हिंसेति । भूतानां प्राणिनां तदभिमानेन तस्मिन् देहे स्फुटतरजीवभेदाग्रहरूपेण दण्डस्ताडनं, पारुष्यं निंदा तयोर्निमित्तभूतयोः सतोरिह देहे हिंसा ममाहमिति वैषम्यं च भवति । ताभ्यां च जीवो दुःखमनुभवतीति वाक्यशेषः ।। २५ ।।

मन्दनन्दिनी — एवं दण्डपारुष्ययोः शरीरदण्डननिष्ठुरवाचोरपि निमित्तयोः सतोः शरीराभिमानेन हिंसा भवति । चेतनस्य हिंसाऽभावेनाभिमन्यमानशरीरहिंसयैव हिंसितो देवदत्त इति व्यवहारात् । तदभिमानेनेत्येतत्सर्वत्रापि ग्राह्यम् । कोऽभिमानो नामेत्यतो भूतानां ममाहमिति यद्वैषम्यं तदिति । अस्वकीये ममेति स्वकीयता बुद्धिः । अनहंभूतेऽहमिति बुद्धिश्चेत्यर्थः ।। २५ ।।

**यन्निबन्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ।
परस्येदमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ २६ ॥**

तात्पर्यम् — कैवल्यात् देहाद्यभावादेव । अकर्तुस्तस्यान्यः कर्ता न विद्यते । इदं एषा । 'व्यत्ययोऽतिशय कुत्सनभेदेष्वि'ति सूत्रात् ॥ २६ ॥

प्रकाशिका — ननु देहे हिंसायां जीवे कस्माद्दुःखानुभव इत्यतस्तत्राप्युक्तरूपाभिमान एव सम्बन्धरूप इत्याह ॥ यन्निबन्ध इति ॥ यस्मिन्देहे निबद्धोऽयमुक्तरूपोभिमानस्तस्य देहस्य वधात्प्राणिनां दुःखाद्यनुभवो भवतीत्यर्थः । हरेस्तु नैवमित्याह । तथेति । अत्र श्लोके कैवल्यादकर्तुरिदमिति पदत्रयस्य प्रकृतसङ्गतमर्थं दर्शयति । कैवल्यादित्यादिना । नन्वेषेति वक्तव्ये कुतः इदमिति व्यत्ययेनोक्तमित्यतो प्रयोजनं महाव्याकरणसूत्रेणाह । व्यत्यय इति । हरेः जीवापेक्षयातिशयः हरौ हिंसादिकुत्सना हरौ जीवभेदः । एतेष्वर्थेषु विवक्षितेषु व्यत्ययो भवतीति सूत्रार्थः । तथाच हरौ हिंसायाः कुत्सितत्वद्योतनायेदमिति व्यत्ययेनोक्तमित्यर्थः । ततश्चायं श्लोकार्थः । यस्यास्य परस्य हरेः तथा इतरप्राणिवदभिमानः स्फुटतरविवेकाभावरूपो न । कुतः कैवल्यात् प्राकृतदेहाद्यभावादेव । तदपि कुतः इत्यतः उक्तम् ॥ अखिलात्मन इति ॥ प्रकृत्यादिसर्वस्वामिन इत्यर्थः । न हि शृङ्खलाद्यधिपतिः प्रेक्षावान् शृङ्खलया स्वात्मानमपि बध्नातीत्याशयः । एतदपि कुतः इत्यत उक्तं अकर्तुरिति । न विद्यते तस्यान्यः कर्ता यस्य स तथोक्त इत्यर्थः । तत्र प्रमाणप्रसिद्धिद्योतनाय हिशब्दः । इदमेषा कुत्सिता हिंसा तन्निमित्तकदुःखानुभवश्च केन कारणेन कल्प्यते । न केनापि तत्कारणी भूतोक्तरूपाभिमाना-भावादित्याशयः ॥ २६ ॥

मन्दनन्दिनी — तथा चायमभिमानो यद्देहनिबन्धस्तद्वधादेव प्राणिनां वधः । प्रकृते किमायातमित्यत आह ॥ यदिति ॥ यस्येत्यस्या परस्येत्युत्तरेणान्वयः । अकयप्रविसम्भूमसखहा विष्णुवाचका इत्युक्तेर्यस्य विष्णोरिति वार्थः । अभिमानो नास्तीत्यत्र कैवल्यादखिलात्मन इति च हेतुः । अखिलस्वामित्वादस्वकीयाभावेन नास्वकीयेस्वकीयताबुद्धिः । कैवल्यपदं च कैवल्याद्देहाद्यभावादिति तात्पर्ये एव व्याख्यातम् । हिंसालक्षणोपद्रवोऽपि नास्तीत्याह ॥ परस्येति ॥ अकर्तुरित्यत्र न तत्पुरुषः किन्तु बहुव्रीहिरित्याशयेन तात्पर्यं अकर्तुस्तस्यान्यः कर्ता न विद्यत इति । हिंसेत्यस्य विशेषणे इदमित्यत्र लिङ्गव्यत्ययेनेति प्रवृत्तं तात्पर्यं इदमेषा । व्यत्ययोऽति-शयकुत्सनभेदेष्विति सूत्रादिति । परमात्मनोऽतिशये हिंसायाः कुत्सितत्वम् । अस्वतन्त्रत्वादत्यन्तभेदं वा द्योतयितुं व्यत्यय इत्यर्थः । तथा च भगवतोऽभिमानाभावेन भिन्नदेहाभावेन स्वातन्त्र्येण च

निन्दनादिना कोऽप्युपद्रवो नास्तीति । नाद्यः पक्षो युक्तः । यद्यपि वेनादिकृतनिन्दनादिनाऽप्युपद्रवो नास्ति । अन्यथा परमात्मा केनापि निन्दनादिकं न कारयेत् । तथाऽपि वेनादिकृतनिन्दनादिना स्वाभाविककोप एवाभिव्यज्यते । तेन तस्य तमःप्राप्तिः । भक्ते तु चैद्यादौ स्वाभाविकः कोपो नास्ति । औपाधिकस्तु नोत्पद्यते । किन्तु स्वाभाविकी प्रीतिः । ततश्चान्यावेशकृतं निन्दनादिकं सोढ्वा कृपालुर्मुक्तिमेवाददादिति भावः ॥ २६ ॥

तस्माद् वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक् ॥ २७ ॥

तात्पर्यम् —— कथञ्चिन्नेक्षते पृथक् । तत्रैव मनसोऽभिनिवेशेन तदन्यं नेक्षते । वैरादीनामेकतमेनापि यो युञ्ज्यात् स नेक्षत इति स्वभावकथनं न विधिः ।

'कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः' । 'तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' ॥ 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम्' ॥ 'मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः' ॥ 'यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् । तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् । हिरण्यकशिपुश्चापि भगवन्निन्दया तमः । विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः' ॥ 'वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु । भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः । अन्यावेशकृतं यत्तु तद्वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथा न कथञ्चने'त्यादेः ॥

यस्मादेवं कोऽप्युपद्रवो नास्ति भगवतस्तस्मादेव द्वेषादिनापि मनो योक्तुं शक्यते तत्प्रेरणया । तादृशानां एतदेव चिन्तयति च । अन्यथा आत्मनो दुःखकारणं द्वेषादिकं कथं सर्वनियामको हरिरुत्पादयेत् ॥ २७ ॥

प्रकाशिका —— एवमाद्यस्योत्तरमुक्त्वा भगवति दुःखाभावेऽपि भगवन्निन्दनं निषिद्धाचरणरूपमिति द्वितीयस्योत्तरं वक्तुमाह । तस्मादिति । अत्र जीवः स्वस्मात् परमात्मानं पृथङ्नेक्षत इत्युच्यत इति भाति । अतोऽत्राभिप्रेतं तात्पर्यं दर्शयति । कथंचिदिति । तत्रैव भगवत्येव । तदन्यं भगवद्व्यतिरिक्तं पदार्थम् । वैरादीनामेकतमेनापि हरौ मनो युंज्यादिति विधाय कुत इत्यतो यस्मादेतैरुपायैः पृथङ्नेक्षत इति परकीयचतुर्थपादयोजनां दूषयितुं स्वयं तद्योजनाप्रकारमाह ॥ वैरादीनामिति । उक्तानुवादपूर्वकं यत्तच्छब्दावध्याहृत्य चतुर्थपादो योज्य इत्याशयः । नन्वेवं तस्य वैय्यर्थ्यमित्यत उक्तम् ।

स्वभावकथनमिति । प्रसङ्गादभिनिवेशेन मनोयोगस्वभावकथनमित्यर्थः । ननु कुत एवं परोक्तैव योजना किं न स्यादित्यत आह । न विधिरिति । स्यादेवं यदि युंज्यादिति विधिः स्यात् । तथात्वे वैरापरपर्यायद्वेषेणापि हरौ मनोयोगो मोक्ष हेतुतया विहितः स्यात् । स च बहुप्रमाणविरुद्धः इत्याशयेन द्वेषस्यानर्थहेतुत्वप्रतिपादकानि प्रमाणानि पठन्ति । कर्मणेति ।। तानहमित्यारभ्य गीतावाक्यम् । अवजानन्ति द्विषन्ति । मम भूतं विद्यमानं महेश्वरं महेश्वरत्वं अवजानंत इत्यन्वयः । यदनिन्ददिति सप्तमस्कन्धस्थं भागवतवाक्यम् । अनिन्दत्, द्वेषेणेति शेषः । हिरण्यकशिपुश्चापि इति चतुर्थस्कन्ध-गतम् । निन्दया द्वेषपूर्विकया । विविक्षुः वेशनसम्भावनाविषयः । ननु द्वेषिणामपि वरेण द्वेषागमे मोक्षः, भक्तानामपि शापेन भक्त्याद्यपगमे तमः क्वचिदुच्यतेऽतः कथमेतदित्यत आह । अन्यावेशेति । तद्विरुद्धस्वभावानां द्वेषविरुद्धस्वरूपाणाम् । स्वभावतो भक्तानामिति यावत् । वरेण यो द्वेषोऽपगत इत्युच्यते सोऽन्यावेशकृतो दैत्यावेशकृतो न स्वाभाविकः । तद्विरुद्धस्वभावानां भक्तिविरुद्धस्वभावानां स्वभावतो द्वेषिणां यो भक्त्या गुणः शापेनापगत इत्युच्यते सोऽपि अन्यस्य सज्जनस्यावेशकृतो न स्वाभाविक इत्यर्थः । तथा च येषां द्वेषिणां वरेण मोक्षः उच्यते ते न स्वभावतो द्वेषिणः किं त्वन्यावेशेनैव । येषां च भक्तानां शापेन तम उच्यते तेपि न स्वभावतो भक्ताः । किं त्वन्यावेशेनैव अतो नोक्तनियमभङ्ग इत्यर्थः । अन्यथेति । स्वभावतो द्वेषिणां मोक्षः स्वभावतो भक्तानां च तम इति कथंचन नेत्यर्थः । इत्यादेर्वाक्याद्वेषस्यानर्थहेतुत्वावगमेन न विधिरित्यन्वयः । विधित्वाभावे कथं तद्योजनेत्य-पेक्षायामवशिष्टं पादत्रयं द्वितीयपक्षोत्तरतया व्याख्याति । यस्मादेवमिति । एवं तथा न यस्य कैवल्यादित्युक्तरीत्या मनो युंज्यादित्यस्यार्थो मनो योक्तुं शक्यत इति । योक्तुं माहात्म्यज्ञानपूर्वकस्नेहयुक्तं कर्तुं शक्यत इत्यर्थः । योगशब्दः स्नेहवाचीत्यग्रे वक्ष्यमाणत्वात् ।

ननु वैरानुबन्धेन मनः कथं स्नेहयुक्तं कर्तुं शक्यमित्यत आह ।। तत्प्रेरणयेति । भगवत्प्रेरणयेत्यर्थः । ननु तर्हि मागधादिद्वेषिणामपि मनः कुतो न स्वस्मिन् स्नेहयुक्तं करोतीत्यत आह ।। तादृशानामिति । स्वभावतो भक्तानामन्यावेशेन द्वेषिणामित्यर्थः । एतदेव एतेषां मनः कदा मयि स्नेहयुक्तं करिष्यामीत्येतदेव । चिन्तयति कालप्रतीक्षां करोति । न सर्वद्वेषिणामतो नोक्तदोष इत्यर्थः । चशब्दः प्रेरणासमुच्चयार्थः । एतदेव विपक्षबाधकमुखेनोपपादयति । कथमिति । अन्यथा अन्यावेशेन द्वेषिणां मनस्यंततः स्वप्रेरणया स्नेहानुत्पत्तौ आत्मनो द्वेषादिकमित्यन्वयः । स्वसम्बन्धिद्वेषाधिकं तादृशानां भक्तानां दुःखकारणं तमःसाधनं कथमुत्पादयेत् । न कथमपि । यथा भक्तानां तम आत्मनः स्वस्य दुःखकारणमनिष्टकारणमित्यपि योज्यम् । ननु हरिस्तेषां न नियामक इत्यत उक्तम् । सर्वनियामक इति । उत्पादयेदित्यस्यानन्तरमुत्पादयति च । तस्मात्तेषां मनस्यंततः स्नेहो यथास्यात्तथा प्रेरयतीत्यपि ग्राह्यम् । तथाचान्ततो हरिप्रेरणया जायमानेन माहात्म्यज्ञानपूर्वकस्नेहेन तेषां निन्दाजनितपापपरिहार-सम्भवान्नानर्थप्रसक्तिरिति द्वितीयपक्षस्योत्तरमनेन लब्धमित्याशयः ।। २७ ।।

मन्दनन्दिनी — न द्वितीय इत्याह ॥ तस्मादिति ॥ सर्वथाऽप्युपद्रवाभावाद्वैरानुबन्धादिना केनापि प्रकारेण युंज्यात् । अत्र निर्वैरेण युंज्यादिति विशिष्टविधिः । वैरानुबन्धेनेत्यादावप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदित्यत्र वेनविशेषणे तात्पर्यम् । किन्तु योगमात्रविधाने वैरादेर्निषिद्धत्वात् । इयं चानुव्याख्यानसुधारीतिः । वस्तुतस्तु य इत्यध्याहारेण यो वैरानुबन्धादिना युंज्यात्सः कथंचित्पृथ-गन्यद्वस्तु नेक्षते इत्येकवाक्यतया योजना । तथा चान्यविषयकत्वे सति भगवद्विषयकत्वं मनसो लक्ष्यते । तदेव मुक्तिसाधनमिति भावः । अत एव तात्पर्यं कथंचिन्नेक्ष्यते पृथक् ॥ तत्रैव मनसोऽभिनिवेशेन तदन्यं नेक्षते । वैरादीनामेकतमेनापि युंज्यात्स नेक्षत इति स्वभावकथनं विधिरिति ॥ तथा चान्यविषयकभगवद्विषयकमनोयोगलक्षणसाधनसद्भावादिह जन्मनि साधनाभाव इत्येतत्सिद्धम् । ननु वैरानुबन्धाद्यंशेऽपि विधिः किं न स्यादित्यतो बाधकं वक्तुं प्रवृत्तं तात्पर्यं कर्मणा मनसेत्यारभ्य कथंचनेत्यादेरित्यन्तम् ॥

तत्र–

कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् ।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समा ॥ इति ग्रन्थान्तरस्थवचनम् ।

अत्र द्विषतः पितॄणामपि नरकोक्तेर्द्वेषस्याकार्यत्वं लब्धम् ।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम् ।
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ।
मोघशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥
इति गीतावचनम् ।

अत्र द्विषतामधोगत्युक्त्याऽवजानता मोघाशत्वादेः राक्षसासुरस्वभावत्वस्य चोक्त्या द्वेषस्या-कर्तव्यत्वं लक्ष्यते ।

यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ।

तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघाद् इत्यत्रैवं वक्ष्यमाणं वचनम् । अत्र निन्दनप्रसक्तात्पति प्रार्थनान्निन्दनस्याकर्तव्यत्वम् । एतच्च सज्जीवविषयम् । दुर्जनस्य विषये प्रार्थनस्य पावनस्य चायोगात् ।

हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।

विवक्षुरत्यागात्सूनोः प्रह्लादस्यानुभावतः । इति चतुर्थस्कन्धगतवचनम् । अत्रापि निन्दया तमोवेशनप्रसत्युक्तेर्निन्दनस्याकर्तव्यत्वम् । एतदपि सञ्जीवविषयम् ।

वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु ।
भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः ।

अन्यावेशकृतं यत्तु तद्वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथा न कथंचनेन इति ग्रन्थांतरस्थम् । अत्र स्वभावद्वेषिणो वरतोऽपि मुक्त्यभावोक्त्या द्वेषस्याकर्तव्यत्वम् । स्वभावभक्तस्य शापतोऽपि निपातनाभावोक्तेर्दृष्टान्तत्वम् । इतरैर्धर्मैरपि द्वेषिणो मुक्त्यभावः । अधर्मैर्निपतनाभाव इत्यर्थः । द्वेषविरुद्धस्वभावानामेवान्यावेशकृतद्वेषादेर्वरादिनापवादस्य स्वभावद्वेषानपवादस्य चोक्त्या द्वेषस्याकर्तव्यत्वम् । मूले तस्माद्वैरानुबन्धेनेति ।। अत्र तच्छब्दस्य यच्छब्दसापेक्षितत्वात् । तात्पर्यकृद्योजयति ।। यस्मादेवं कोऽप्युपद्रवो नास्ति भगवतस्तस्मादेव द्वेषादिनाऽपि मनो योक्तुं शक्यते तत्प्रेरणया । तादृशानां तदेव चिन्तयन्ति च । अन्यथाऽऽत्मनो दुःखकारणं द्वेषादिकं कथं सर्वनियामको हरिरुत्पादयेदिति । अनेन तथा नयस्य कैवल्याद्यभिमान इत्यनेनोक्ताभिमानो लक्षणोपद्रवाभावस्य परामर्श इति सूचितम् । शक्यते इत्यनेन युंज्यादिति लिङ्गो न विधिरर्थः । किन्तु शक्यत्वमिति सूचितम् । इदमपि द्वेषादिना मनोयोगादिकं भगवतो नोपद्रवादिकारणमित्यनेन न किन्तु तत्प्रेरणया । न ऋते त्वत्क्रियत इति श्रुतेः इति भावेनोक्तं तत्प्रेरणयेति । तादृशानामन्याविष्टानां भक्तानां तदेव यथाकथंचिद्योजनं भवत्विति द्वेषादिना मनोनिवेशनं चिन्तयति आलोचयति च । भगवांस्तादृशानां नित्यद्वेषादिमतां तदेव तत्पूर्वं मनोनिवेशनमेवेति वाऽर्थः । प्रेरणयाऽपि भगवतः उपद्रवाभावो लब्ध इति भावेनाह ।। अन्यथेति ।। २७ ।।

यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ।। २८ ।।

तात्पर्यम् — तत्रैव हेतुः । यथा वैरानुबन्धेनेति । यथा वैराभिनिवेशिनः तथा भक्त्यभिनिवेशिनो न सन्ति । तत्कथमन्यथा भक्तानेव बहून्हरिः कुर्यादिति भावः ।।

कीटः पेशस्कृतेत्यादि चैद्यादीनां भक्तियुतत्वप्रतिपादनम् । स्नेहाद्यायतननाशादिनाऽप्युपद्रवोऽस्य नास्तीति निर्वैरेणेत्याद्युक्तम् ।

'ततः कनीयसा एव देवा ज्यायसा असुरा' इति श्रुतिः । तन्मयतां मनसस्तत्राभिनिवेशनम् । 'मागधाद्या यथा नित्यं द्वेपादाग्रहिणो हरौ । न तथाऽऽग्रहिणो भक्ता ऋते ब्रह्माणमव्ययमि'ति हरिवंशेपु ।।

योगः स्नेहः । संरम्भभययुक्तस्नेहेन । 'प्रीतिः स्नेहस्तथा योगः प्रेमबन्ध इतीर्यत' इति शब्दनिर्णये ॥

वैरयुक्तयाऽप्यनुचिन्तया तमापुः । 'अनुचिन्तेति तामाहुर्भक्तिपूर्वा तु या स्मृतिरि'ति च ॥ 'स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपि च । विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा ॥ पेशस्कृद्रूपतां कीटो यथा याति तथैव तु । चैद्यादयोऽसुरावेशशाद्धरौ द्वेषयुता अपि निजस्वभावया भक्त्या नीता हरिसरूपताम् । तथा हि करुणो विष्णुरन्यावेशाद्यदि द्विषन् । हीयते किं ममानेन नित्यानन्द स्वरूपिणः । देहबन्धयुतानां हि द्वेषिणाऽपकृतं भवेत् ॥ मम को ह्यपराध्येत निर्दोषसुखरूपिणः । अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् ॥ अतो यच्चासुरावेशात्कृतमेतेन दुष्कृतम् । अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ॥ इति मत्वा मोचयति चैद्यादीनपि केशव' इति ब्रह्माण्डे ॥

प्रकाशिका — यथा वैरानुबन्धेनेत्यस्य तेष्वपि वैरानुबन्धः श्रेष्ठः इत्याहेति सङ्गतिकथनं प्रमाणविरुद्धमित्याशयेन स्वयं सङ्गतिमाह ॥ तत्रैव हेतुरिति । उच्यत इति शेषः ॥ तत्रैवान्यावेशेन द्वेषिणां चैद्यादीनां मनः स्वप्रेरणया भक्तियुक्तं करोति । न सर्वद्वेषिणामित्यत्रैवेत्यर्थः । एवकारः परोक्तसङ्गतिनिरासार्थः । श्लोकाभिप्रायमाह । यथेति । यथा यावन्तो वैराभिनिवेशिनः तथा तावन्त इत्यर्थः । इदं कथमुक्तार्थोपपादकमित्यत आह । तत्कथमन्यथेति । अन्यथा अन्यावेशेन द्वेषिणामेव मनः स्वप्रेरणया भक्तियुक्तं करोतीति नियममनङ्गीकृत्य सर्वद्वेषिणां मनः भक्तियुक्तं करोतीत्यङ्गीकारे तद्द्वेषिणां बहुत्वं, भक्तानामल्पत्वं च कथं घटते । न कथमपीत्यर्थः । तथात्वे वैपरीत्यमेव स्यादित्याह ॥ भक्तानेवेति ॥ तथात्व इति शेषः । न च करोति । तेन ज्ञायते तादृशानामेव मनः स्वप्रेरणया भक्तियुक्तं करोति न सर्वद्वेषिणामिति पूर्वोक्तार्थसिद्धिरनेनेति ज्ञातव्यम् ।

नन्वेवं कीटः पेशस्कृतेति श्लोके कीटदृष्टान्तेन चैद्यादीनां द्वेषेण मुक्त्युपपादनमनुपपन्नं स्यादित्यत आह । कीट इति ॥ तत्रापि चैद्यादीनां भक्तियुतत्वमेव प्रतिपाद्यतेऽतो न विरोध इत्यर्थः । यथा चैतत्तथाऽग्रे स्वयमेव दर्शयिष्यति । ननु वैरेण हिंसाद्युपद्रवप्रसक्तिवन्निर्वैरभयादिभिरुपद्रवप्रसक्तेरेवा-भावात् कथं यस्मात्कोऽप्युपद्रवो नास्तीत्यस्य निर्वैरादिना मनोयोगे हेतुत्वमित्याशङ्कायां तत्राप्युपद्रवप्रसक्तिं दर्शयंस्तदभावस्य हेतुत्वमुपपादयति ॥ स्नेहाद्यायतनेति ॥ आदिपदेन वैराभावभयकामानां ग्रहणम् । निर्वैरपदोदितवैराभावस्यादित्वेऽपि स्नेहग्रहणम् । मुच्यमानोप-द्रवप्रसक्तेस्तत्र शीघ्रमनुभवारोहात्कृतम् । स्नेहाद्यायतनं स्नेहाद्यवच्छेदकं स्नेहादिकर्तृशरीरं तस्य नाशेन । आदिपदेन तस्य रोगोपहतत्वग्रहणम् । तेन च स्नेहादिविषये य उपद्रवः मनःखेदादिरूपः सोऽप्यस्य भगवतो नास्तीति हेतोः निर्वैरेणेत्याद्युक्तमुपपन्नमित्यर्थः । इदमुक्तं भवति । लोके हि यो यस्मिन् स्नेहं

करोति यमिच्छति यस्माद्बिभेति यत्र च वैरं न करोति तस्य कर्तुः शरीरनाशादिके सति स्नेहादिविषयस्य मनःखेदो दृश्यते । न तथा स्नेहादिविषयस्य भगवतः मनःखेदाद्युपद्रवप्रसक्तिः प्राकृतशरीराद्यभावात् । अतः यस्मादेवं कोप्युपद्रवो नास्तीत्यस्य निर्वैरादिना मनोयोगेऽपि हेतुत्वेनोपादानमुपपन्नमिति ।

यथावैरानुबन्धेनेत्यत्र यद्वैरिणामसुराणां बहुत्वं भक्तानामल्पत्वमित्यभिप्रायवर्णनं कृतं तत्र श्रुतिसंवादं दर्शयति । ततः कनीयसा इति । कनीयसा अल्पा देवाः भक्ताः ज्यायसा बहवः । तन्मयतामित्यस्य तादात्म्यार्थताप्रतीतिवारणाय प्रकृतसङ्गतमर्थं दर्शयति । तन्मयतामिति । यथा वैरानुबन्धेनेत्यस्य यथा येन प्रकारेण मर्त्योऽसुरः वैरानुबन्धेन वैरलक्षणनिमित्तेन तन्मयतां हरौ आग्रहविशेषमिति यावत्, प्राप्नोति तथा तेन प्रकारेण भक्तः भक्तियोगेन तन्मयतां नेयादित्यपि व्याख्यानमभिप्रेत्य तत्र प्रमाणं पठति । मागधाद्या इति ॥ अस्मिन्व्याख्याने वैरानुबन्धेन मनोयोगस्य भक्तियोगेन मनोयोगस्य च स्वरूपकथनार्थमयं श्लोक इत्यवगन्तव्यम् । कीटः पेशस्कृतेत्यादि चैद्यादीनां भक्तियुक्तत्वप्रतिपादनमित्युक्तं तत्कथमित्यतस्तत्प्रकारं दर्शयति । योग इत्यादिना । ततः किमित्यत आह । संरम्भेति । ततश्च संरम्भभययोगेनेत्यस्य संरम्भभययुक्तस्नेहेनेत्यर्थः । सम्पन्न इत्यर्थः । तथा च कीटः यथा संरम्भभययुक्तस्नेहेन पेशस्कृत्स्वरूपतां प्राप्नोति तथा चैद्यादयोऽपि वैरयुक्तस्नेहेनैव भगवत्स्वरूपतां प्राप्नुवन्तीत्यर्थस्य विवक्षितत्वात्कीट इत्यादि श्लोकद्वयं चैद्यादीनां भक्तियुतत्वप्रतिपादकमित्याशयः । योगशब्दस्य स्नेहवाचित्वे प्रमाणं दर्शयति । प्रीतिरिति । नन्वेवं कृष्ण इति दार्ष्टान्तिकवाक्ये वैरेण धूतपाप्मान इति वैरस्यैव कथं मुक्तिहेतुत्वमुच्यत इत्यत आह ॥ वैरयुक्तयापीति ॥ युक्तयेत्यनेन वैरेणेति सहार्थे तृतीयेति सूचयति । वैरयुक्तयाऽप्यनुचिंतया तमापुरित्युक्ते वैरयुतत्वं सर्वेषामधिकारिणाम् ॥ अनुचिन्तायाः आवश्यकमिति भाति अतोऽपि शब्दोध्याहृतः । तेन वैरेण युक्तयाप्यनुचिन्तया तमापुः किमु शुद्धयेत्यर्थलाभान्नोक्तदोष इत्यवधेयम् । नन्वेवमपि वैरयुक्तानुचिन्तायाः एव मुक्तिहेतुत्वं प्राप्तम् । न भक्तेः तद्वाचकपदाभावादित्या शङ्कायामनुचिन्तापदमेव तद्वाचकमस्तीत्यभिप्रेत्यानुचिन्तापदस्य तद्वाचकत्वे प्रमाणं पठति । अनुचिन्तेति । एवं दृष्टान्तदार्ष्टान्तिकवाक्ययोर्भक्तेरेव सारूप्यहेतुत्वमुच्यत इति प्रतिपाद्य तद्दार्ढ्याय समाख्याप्रमाणं पठति । स्नेहादिति ॥ कीटः पेशस्कृता क्रियमाणस्वाकर्षणनिमित्तकभये विद्यमानेपि पेशस्कृति अल्पकोपे विद्यमानेपि पेशस्कृदन्नं ददाति इति स्नेहात्तथा पेशस्कृता साकं या संगतिस्तज्जनितस्नेहतः पेशस्कृद्रूपतां पेशस्कृत्सारूप्यं याति यथा तथैवेति योजना । तुशब्दः प्रकृतत्वानुसन्धानार्थः । भक्त्येत्यनन्तरं हरिप्रेरणयोद्भूतयेत्यपि ग्राह्यम् । एवं दार्ष्टान्तिकवाक्ययोस्तात्पर्यसमाख्यया दृढीकृत्य यन्निन्दनस्तव-सत्कारेत्यादिप्रकरणतात्पर्यमुक्तं तदपि प्रमाणशेषेण दृढयति । तथाहीति ॥ करुणः कृपालुः । ननु द्वेषिकृतहिंसादिना दुःखप्राप्तिरित्यत आह । देहबन्धेति ॥ एतेन तथा नयस्येत्येतदुक्तार्थमिति ज्ञातव्यम् ।

एतेन चैद्यादीन् इति मत्वेत्यनेन तादृशानां तदेव चिन्तयतीत्येतदपि प्रमापितमिति ज्ञातव्यम् । तस्माद्वैरानुबन्धेनेति श्लोकद्वयं तात्पर्यव्याख्यानेनैव स्पष्टार्थम् ।। २८ ।।

मन्दनन्दिनी — न केवलं वैरानुबन्धादिना मनो योजयितुं शक्यते । किन्तु भक्त्याद्यपेक्षयाऽतिशयेनेत्याह ।। यथेति ।। एतदभिप्रायेणैव तात्पर्यं तत्रैव हेतुरिति ।। वैरानुबन्धेन मनोयोजनस्य कर्तुं शक्यत्वेऽतिशयेन तत्साधनत्वं हेतुरित्यर्थः । तन्मयतां मनसस्तत्राभिनिवेशनम् । श्लोकार्थस्तु स्फुटः । अनेन प्रमेयान्तरमपि लब्धमित्याशयेनाह तात्पर्यकृत् यथा वैराभिनिवेशिनः सन्ति तथा भक्त्यभिनिवेशिनो न सन्ति । तत्कथमन्यथा भक्तानेव बहून्हरिः कुर्यादिति भाव इति ।। सदसन्मुक्तियोग्यानां भगवदभिनिवेशनस्यावश्यकत्वात्तत्र वैरादेः सुलभसाधनत्वाद्भक्तेश्च दुर्लभत्वा-द्वैराभिनिवेशिनो बाहुल्येन सन्ति । न तथा भक्ताः । अन्यथा भक्तेरेव सुलभत्वे बहून् भक्तान्कुर्यादित्याशयः ।। २८ ।।

कीटः पेशस्कृता रुद्धः कुड्ये यान्तमनुस्मरन् ।
संरम्भभययोगेन विन्दते तत्सरूपताम् ।। २९ ।।

प्रकाशिका — कीट इत्यादिश्लोकद्वयस्य चायमर्थः । द्वेषिणामप्यन्ततो जातया भक्त्यैव मुक्तिरित्युक्तमर्थं दृष्टान्तमुखेनोपपादयति । कीट इति । यथेत्यादौ उपस्कर्तव्यम् । पेशस्कृता भृङ्गेन कुड्ये भित्तिसुषिरे रुद्धः कीटः श्यामनामा कृमिः तस्य भृङ्गस्य सरूपतां समानाकारतां विन्दते प्राप्नोति । कीदृशः यान्तं स्वसुषिरं विहाय बहिर्गच्छन्तं भृङ्गं संरम्भभययोगेन संरम्भः स्वात्मानं रोधयतीति कोपः भयं स्वाकर्षणनिमित्तं ताभ्यां सहितेन योगेनान्नं ददातीति स्नेहेनानुस्मरन् ध्यायन् ।। २९ ।।

मन्दनन्दिनी — कीटः पेशस्कृतेत्यादि चैद्यादीनां भक्तियुक्तत्वप्रतिपादनमिति तात्पर्यम् । तथा च कीटः कृमिविशेषः पेशस्कृता भ्रमरविशेषेण कुड्ये तद्गतकर्दमकृतनीडे रुद्धः स्वाशनदानाय यान्तमनुस्मरन् संरभभययोगेन कोपभययुक्तस्नेहेन तत्स्वरूपतां तादृश्यं विन्दते लभत इति योजना । चैद्यादय ईदृशा इति भावः । अत्र सिंहावलोकनन्यायेन पूर्वस्य निर्वैरेणेत्यादेः कृत्यं वक्तुं तात्पर्यम् । स्नेहाद्यायतनदेहनाशादिनाऽपि उपद्रवः अस्य नास्तीति निर्वैरेणेत्याद्युक्तमिति । तस्माद्वैरानुबन्धेनेत्यत्र उक्तपक्षपाद्यके निर्वैरेण स्नेहात्कामेनेति पक्षत्रयं मुख्यम् । तत्रापि क्रमात्तारतम्यम् । वैरभयपक्षे तु भक्त्या मुक्तावप्यस्योपासकस्य स्वस्नेहाद्यायतनस्य देहस्य चक्रादिनाशयातनाद्युपद्रवोऽस्ति । उक्तपक्षत्रये तु नास्तीत्यभिप्रायेण निर्वैरेणेत्याद्युक्तमित्यवधेयम् । पूर्वं यथा वैराभिनिवेशिन इति स्ववाक्ये वैराभिनिवेशिनां बाहुल्यं भक्तानां स्वल्पत्वं युक्त्या समर्थितम् । अधुना श्रुतिमपि तत्राह । ततः कनीयांस एव देवा ज्यायांसो असुरा इति श्रुतिः । तत इत्यस्य भक्तेर्दौर्लभ्यादित्यर्थो भाति । पूर्वश्लोके तन्मयतामित्यस्याभेदार्थभ्रान्तिं वारयति ।। तन्मयतां मनसस्तत्राभिनिवेशनमिति ।। प्रमेयविशेषं चाह ।

मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ ।
न तथाऽऽग्रहिणो भक्ता ऋते ब्रह्माणमव्ययम् ।। इति हरिवंशेषु ।

द्वेषादाग्रहो नाम द्वेषविषये उत्तमत्वम् । माहात्म्यप्रतिपादकेषु तत्र स्नेहं कुर्वत्स्वपि द्वेषस्तद्वधोद्योगः । एवं भक्त्याऽऽग्रहोऽपि तद्विषयनिन्दकादेरपि जिह्वाच्छेदादि शपथं तदुन्मूलनोद्योगादि । एतच्च भाविब्रह्मत्वे भीमसेने स्पष्टम् । अनेन केवलभक्त्याऽभिनिवेशिनोऽल्पाः किन्तु तदाग्रही सुतरां दुर्लभ इति प्रमेयविशेष उक्तः । अत्र योगशब्दार्थमाह । योगः स्नेहः । संरम्भभययुक्तस्नेहेन । प्रीतिः स्नेहस्तथा योगः प्रेमबन्ध इतीर्यत इति शब्दनिर्णये । अनेन शाकपार्थिव इत्यत्र प्रियपदस्येव संरम्भभययोगेनेत्यत्र युक्तपदस्य लोप उक्तो भवति । अभिधाने स्नेहः प्रीतिरित्यादि शब्दैरीर्यत इति योजना ।। २९ ।।

एवं कृष्णे भगवति मायामनुज ईश्वरे ।
वैरेण धूतपाप्मानः तमापुरनुचिन्तया ।। ३० ।।

प्रकाशिका — दार्ष्टांतिकमाह ।। एवमिति । माययेच्छया मनुजे मनुवद्दृश्यमाने वैरेणान्यावेशप्रयुक्तेन युतयाऽनुचिन्तया भक्त्या वैरानन्तरं भगवत्प्रेरणयोद्भूतया स्वाभाविकभक्त्येति यावत् । धूतपाप्मानः परिहृतवैरनिमित्तपापाश्चैद्यादयस्तं कृष्णमापुः । तत्सारूप्यादिकं प्राप्ता इत्यर्थः ।।

मन्दनन्दिनी — न केवलं चैद्यः किन्तु बहवोऽप्यन्याविष्टा भक्ता एवमित्याह ।। एवमिति ।। एवं चैद्यवद्बहवो भगवति कृष्णे मायामनुजे स्वेच्छया मनुष्यवत्प्रतीयमाने वस्तुत ईश्वरे वैरेणानुचिन्तया वैरपूर्वकभक्त्या धूतपाप्मानः संतस्तमापुरिति योजना । अत्र वैरेणेत्यस्य युक्त्याऽपीत्यध्याहृत्यानुचिन्तयेत्यनेनान्वयः । न धूतेत्यनेन ।। अनुचिन्तापदं च भक्तिवाचीत्याशयेनाह तात्पर्यकृत् ।। वैरयुक्तयाऽप्यनुचिन्तया तमापुः । अनुचिन्तेति तामाहुर्भक्तिपूर्वा तु या स्मृतिरिति च । अत्र श्लोकेऽनुचिन्तापदस्य भक्तिपरत्वम् । द्वेषादेरन्यावेशकृतत्वं भगवतः कृपालुत्वात् द्वेषस्यागणनम् । स्वाभाविकभक्तेरेवानुसरणम् । इत्यादिकं कुतः कल्प्यत इत्यतोऽत्र सर्वत्रैकं प्रमाणमाह ।। स्नेहादन्नं ददातीति ।। स्वाकर्षणभयेऽपि च विद्यमानेऽल्पकोपे सङ्गतिस्नेहतस्तथा ।

पेशस्कृद्रूपतां कीटो यथा याति तथैव तु ।
चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि ।
निजस्वभावया भक्त्या नीता हरिसरूपताम् ।
तथा हि करुणो विष्णुरन्यावेषाद्यदि द्विषन् ।

हीयते किं ममानेन नित्यानन्दस्वरूपिणः ।
देहबन्धयुतानां हि द्वेषिणापकृतं भवेत् ।
मम को ह्यपराध्येत निर्दोषसुखरूपिणः ।
अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् ।
अतो यच्चासुरवशात्कृतमेतेन दुष्कृतम् ।
अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ।
इति मत्वा मोचयति चैद्यादीनपि केशव ।। इति ब्रह्माण्डे ।

अत्र चशब्दस्तथाशब्दश्च परस्परसमुच्चये । तथा चाकर्षणभयेऽप्यल्पकोपेऽपि तथा सङ्गतिस्नेहत एकत्र सहवासं स्नेहादन्नं ददातीति स्नेहाच्च पेशस्कृद्रूपतां यथा याति कीटस्तथा चैद्यादय इति योजना । यदि यद्यपि द्विषन्नास्ते चैद्यादिस्तथाऽपि करुणो विष्णुरिति मत्वा मोचयतीति योजना । एतत्सर्वमभिप्रेत्यैव स्मर्तव्यो भगवान्नित्यमित्यर्थेनैव हि क्वचित् । द्वेषादिव गुणानाह पुराणे वृद्धवाक्यवत् । इत्यनुव्याख्यानव्याख्यावसरे सुधायां वैरेण यन्नृपतय इत्यादि स्मरणयोगप्रधानकवाक्यानां स्मरणकर्तव्यत्वे तात्पर्यं गतिः । द्वेषाच्चैद्यादय इत्यादिना द्वेषप्रधानकानां गुणे तात्पर्यं गतिरित्युक्तम् । गुणप्रकारश्च शापादिना द्वेषिणोऽपि चैद्यादयस्तात्कालिकं द्वेषमनुरूप्य पूर्वतनीं भक्तिमेवापेक्ष्य भगवता मोचिताः । अहो कृपालुत्वं निर्विकारत्वं सत्यसङ्कल्पत्वं चेति तत्रैवोक्तः । वृद्धवाक्यवदिति प्रतीतार्थे तात्पर्याभाव एव दृष्टान्तः । ननु शाब्दप्रमाजनकत्वे पुराणवाक्यस्य तथात्वेऽप्रामाण्यापत्तेः । तथा च पुराणवाक्यस्य प्रतीयमाने द्वेषहेतुकत्वे न तात्पर्यम् । किन्तु कृपालुत्वे तात्पर्यम् । तद्बोधलाभश्च द्वेषादिति पञ्चमी ल्यब्लोपनिमित्ता । कृपयेत्यध्याहारः । द्वेषमनिरूप्य कृपया तद्गतिं गता इति योजनया वृद्धवाक्यं तु प्रतीतिकेऽर्थे न तात्पर्यवत् । द्विषदन्नं न भोक्तव्यमित्यत्र तात्पर्यवदपि न तच्छाब्दबोधजनकम् । वचनलिङ्गानुमा हि सेति कर्मनिर्णयोक्तेः । अनुमानप्रकारश्च तट्टीकायां न्यायामृते च व्यक्तः ।। ३० ।।

कामात् स्नेहाद् भयाद् द्वेषाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ।। ३१ ।।

तात्पर्यम् — कामादिभिरपि यथावद्भक्त्या सहैव मन आवेश्य तदघं यत्तु द्वेषादिकृतमघं यथाभूतया भक्त्या हित्वा ।। ३१ ।।

प्रकाशिका — एवं द्वेषिणामन्ततो जातया भक्त्यैव मुक्तिरित्युपपाद्यायं प्रकारः भयेन स्नेहात्कामेन वा युञ्ज्यादिति यत्कामादेरपि मोक्षहेतुत्वमुक्तं तत्रापि द्रष्टव्य इति सूचयन् विश्वासजननायात्र

पुराकल्परूपार्थवादमाह ।। कामादिति ।। अत्र यथा भक्त्या तद्गतिं गतास्तथा कामादिभ्य इति भाति । न तु कामादिमतां भक्तिरतो योजनां दर्शयति ।। कामादिभिरपीति ।। न केवलं द्वेषेणेत्यपिशब्दार्थः । यथाभक्त्येत्यनेन यथाशब्दो यथावदित्यर्थकः यथाभक्त्येत्येकं पदमिति सूचयति । तारतम्यानुसारिण्या भक्त्येत्यर्थः । सहैवेत्यनेन सहार्थे तृतीयेति दर्शयति । तदघमित्येतत्तस्येश्वरस्याघमिति प्रतीतिवारणाय व्याख्याति ।। तदघमिति ।। हित्वेत्यत्र कामादित्यादिनोक्तकामादेरेव हेतुतया सम्बन्धतया प्रतीतिं वारयितुं यथाभक्त्येत्येतस्यैवावृत्त्याऽत्र सम्बन्ध इत्यभिप्रेत्याह ।। यथाविर्भूतयेति ।। तारतम्यानुसारिण्येत्यर्थः । ततश्चायं श्लोकार्थः । कामादिभ्योऽपि यथाभक्त्या तारतम्यानुसारिण्या भक्त्येश्वरे मन आवेश्य ध्यात्वा यथाभक्त्या तदघं कामादिकृतमघं हित्वा परिहृत्य तस्य कृष्णस्य गम्यते इति गतिं लोकं गता प्राप्ता इति ।। ३१ ।।

मन्दनन्दिनी — न केवलं वैरेणानुचिन्तया तमापुः किन्तु कामादिभिरपीत्याह ।। कामादिति ।। कामादित्यादौ तृतीयार्थे पञ्चमी । कामेन यथा यथावत् । स्वयोग्यया भक्त्या सहेति केचित् । एवं स्नेहेन मित्रादिसाधारणस्नेहेन यथावद्भक्त्या सह । अपरे एवं भयेन द्वेषेणापि यथावद्भक्त्येश्वरे मन आवेश्य तदघं यद्वेषादिना प्राप्तमघं यथावद्भक्त्या पश्चात्तापयुक्तया भक्त्या हि बहवस्तद्गतिं गताः भगवत्प्राप्तिं गता इति योजना । अत्र यथेति दृष्टान्तस्तथेत्यस्याश्रवणात् । किन्तु योग्यतार्थः । यथा भक्त्येत्येतदावृत्त्या तदघं हित्वेत्यत्र सम्बध्यते । कारणान्तरश्रवणादित्याशयेनाह तात्पर्यकृत् । कामादिभिरपि यथावद्भक्त्या सहैव मन आवेश्य तदघं यत्तु द्वेषादिकृतमघं यथाभूतया भक्त्या हित्वेति । अनेन तदघमिति भिन्नं पदम् । यद्वेषादिकमिति शेषः । भक्त्येति सहयोगे तृतीया । यथापदं योग्यपरमिति सूचयति । कामस्यादित्वेऽपि द्वेषस्यैव विशेषमघकारणत्वात् । द्वेषादित्युक्तिः । मूले स्नेहपदेन भक्त्यन्तर्गतसुदृढस्नेहपरम् । पृथगुक्त्ययोगात् । अघकारणत्वायोगाच्च । किन्तु कृष्णस्य मार्गगमने शत्रवो नोपद्रवेयुरिति सैन्यस्य सह प्रेषणकारणीभूतयुधिष्ठिरादिगतस्नेहपरमिति ध्येयम् ।।३१।।

गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ।। ३२ ।।

तात्पर्यम् — 'गोप्यः कामयुता भक्ताः कंसाविष्टः स्वयं भृगुः । ज्ञेयो भययुतो भक्तश्चैद्यादिस्था जयादयः । विद्वेषसंयुता भक्ता वृष्णयो बन्धुसंयुताः । बहुमानस्नेहसाम्याद्देवा भक्ताः प्रकीर्तिताः । स्नेहोपसर्जनादेव बहुमानान्मुनीश्वराः । बहुमानोऽपि देवानामृषिभ्योऽप्यधिको मतः । ब्रह्मवीन्द्रेन्द्र-कामादेरितरेषां यथाक्रममि'ति ब्रह्मतर्के ।। ३२ ।।

प्रकाशिका —— के ते कामादिभ्यः प्राप्ता बहव इत्यतस्तान्विभज्याह ।। गोप्य इति ।। कामादित्यादेर्गता इत्यनेन सम्बन्धः । नन्वत्र कामादिभ्य एव भगवत्प्राप्तिरित्युच्यते न भक्त्येत्यतस्तत्राभिप्रेतमर्थं प्रमाणेनैव दर्शयति ।। गोप्य इति ।। कंसाविष्ट इत्यनेन कंसपदं तदाविष्टभृगुपरमिति सूचयति । चैद्यादिस्था इत्यनेन चैद्यादिदेहस्था जयादयश्चैद्यादिपदेन ग्राह्या इति दर्शयति । सम्बन्धस्यातिप्रसक्तत्वात्सम्बन्धाद्वृष्णय इत्यस्यार्थमाह ।। वृष्णयो बन्धुसंयुता इति ।। बन्धुत्वसंयुता इत्यर्थः । ततश्च सम्बन्धपदं शरीरसम्बन्धपरमित्याशयः । भक्ताः इत्यस्यात्रोत्तरत्र चानुवृत्तिः । स्नेहाद्यूयं वयं भक्त्येत्युक्त्या पाण्डवानां भगवति न भक्तिरिति प्रतीयते । न हि नारदादीनां भक्तिर्देवावताराणां पाण्डवानां न भक्तिरित्येतत्सम्भवत्यतोऽत्र विवक्षिततात्पर्यमाह ।। बहुमानेति ।। बहुमानो माहात्म्यज्ञानं स्नेहः तत्पूर्वकः तयोः साम्यात्समप्रधानभावात् । अनेन स्नेहात् माहात्म्यज्ञानेन समाधानादित्यध्याहृत्य मूलं व्याख्येयमिति दर्शयति । स्नेहोपसर्जनादेवेत्यनेन मूले भक्त्येति शब्दान्तर्गतस्नेहस्योपसर्जनत्वं माहात्म्यज्ञानस्य प्राधान्यमिति सूचयति । नन्वेवं देवापेक्षया ऋषीणां माहात्म्यज्ञानमधिकमति प्राप्तमित्यतो आह ।। बहुमानोऽपीति ।। तथा च ऋषीणां बहुमानतद्गतस्नेहापेक्षयैवाधिको विवक्षितो न सर्वापेक्षयेत्याशयः । देवानामपि बहुमानो न सम इत्याह ।। ब्रह्मवीन्द्रेति ।। ब्रह्मवीन्द्रेन्द्रकामादेस्तदितरेषां च यथाक्रमं तारतम्यक्रममनतिक्रम्य बहुमानोऽधिक इत्यर्थः । यथापदमिति पाठे पदानुसारेणाधिक इत्यर्थः । ततश्चायं श्लोकार्थः । गोप्यः कामात्कामानन्तरमाविर्भूतस्वाभाविकभक्त्या, कंसः कंसाविष्टो भृगुः भयात् भयानन्तरमाविर्भूतस्वाभाविकभक्त्या, चैद्यादयस्तद्देहस्था जयादयो द्वेषात् द्वेषानन्तरमाविर्भूतस्वाभाविकभक्त्या, यूयं पाण्डवाः स्नेहात् माहात्म्यज्ञानेन समप्रधानात् , वयं नारदाद्या ऋषयः भक्त्या स्नेहोपसर्जनान्माहात्म्यज्ञानात्तद्गतिं गता इत्यन्वयः ।। ३२ ।।

मन्दनन्दिनी —— कामादेरुदाहरणमाह ।। गोप्यः कामादिति ।। अत्र पूर्वानुरोधान्मानान्तरानुसाराच्च यथा भक्त्येत्यनुवर्तते । तद्गतिं गता इति च कामाद्भोगलौल्यात् । भयात्कदा मारयतीति भयात् । वृष्णयो यादवाः । सम्बन्धाद्देहानुबन्धरूपबान्धवात् । यूयमित्यपरोक्षीकृतयुधिष्ठिरादीनां निर्देशः । स्नेहान्मित्रादिसाधारणस्नेहात् । वयमिति नारदादिनिर्देशः । भक्त्या कामादिरहितया केवलभक्त्या । एतदपि कृष्णावतारदशायामिति ज्ञेयम् । अन्यदा सर्वेषामपि केवलभक्तत्वात् कंसाविष्टभृगोर्मुनित्वाद्धर्मादीनां चोत्तमदेवतया नारदादप्यधिकं केवलभक्तत्वात् । तत्रापि भीमसेनस्य न कदाऽपीदृशस्नेहः । परममाहात्म्यज्ञाने जाग्रति तस्याजननादित्यनुसन्धेया योजना । गोप्यः कामाद्गतिं गता इति प्रत्येकं द्रष्टव्यम् । अत्र भक्तेति पूरणीयमिति वक्तुं कंसचैद्याविष्टांश्च वक्तुं प्रमेयविशेषं च वक्तुं तात्पर्यं प्रवृत्तम् ।।

गोप्यः कामयुता भक्ताः कंसाविष्टः स्वयं भृगुः ।
ज्ञेयो भययुतो भक्तश्चैद्यादिस्था जयादयः ।

विद्वेषसंयुता भक्ता वृष्णयो बन्धुसंयुताः ।
बहुमानस्नेहसाम्याद्देवा भक्ताः प्रकीर्तिताः ।
स्नेहोपसर्जनादेव बहुमानान्मुनीश्वराः ।
बहुमानोऽपि देवानामृषिभ्योऽभ्यधिको मतः ।
ब्रह्मवीन्द्रेन्द्रकामादेरितरेषां यथा क्रमम् ।। इति ब्रह्मतर्के ।।

अत्र गोपीत्वदशायामेव कामयुतत्वम् । असुरत्वदशायां केवलभक्तत्वम् । भृगोरपि कंसेनाविष्टत्वदशायामेव भययुक्तभक्तत्वम् । चैद्यादिस्था इत्यत्र स्वनिष्ठावेशकर्तृत्वसम्बन्धेन हिरण्यकशिप्वादिनामकदैत्यस्थत्वं ज्ञेयम् । दैत्यानामेव पिशाचस्थानापन्नत्वात् । बन्धुसंयुता बन्धुत्वसंयुताः । माहात्म्यज्ञानपूर्वकसुदृढस्नेहो भक्तिः । केषुचित्तु भक्तेषु माहात्म्यज्ञानलक्षणबहुमानस्नेहयोः समानाधिकरणयोः साम्यम् । केषुचित्तु माहात्म्यज्ञानस्यैवाधिकत्वम् । अत्राधिकारिद्वैविध्यविवक्षायामधमेषु भक्तेषु ऋष्यादिषु स्वगताप्रचुरस्नेहकप्रचुरमाहात्म्यज्ञानवत्वम् । तदपि तारतम्यानुसारेणोत्तमेषु देवेषु स्वगतस्नेहसमानमाहात्म्यज्ञानवत्वम् । ऋष्याद्यपेक्षया माहात्म्यज्ञानमधिकमेव । एतदपि तारतम्येन । अधिकारित्रैविध्यविवक्षायां तु स्वगतस्नेहापेक्षया प्रचुरमाहात्म्यज्ञानवत्वम् । अधमानां समोभयत्वम् । मध्यमानां प्रचुरस्नेहवत्वं चोत्तमानां ब्रह्मादीनां सर्वमपि तत्तत्तारतम्यानुसारेणेत्यवध्येयम् ।। ३२ ।।

कतमोऽपि न वेनस्य पञ्चानां पुरुषं प्रति ।
तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ।। ३३ ।।

तात्पर्यम् — कतमोऽपि भक्तियोगो न वेनस्य । तस्मात्केनापि प्रकारेण उपायेनैव मनो निवेशयेत् । नानुपायेन.। 'उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायका' इति शब्दनिर्णये ।। ३३ ।।

प्रकाशिका — ननूक्तेषु भक्तियोगेषु मध्ये वेनस्यापि कस्यचिद्भक्तियोगस्य संभवात् स किमिति तमसि पातित इत्यत आह । कतमोऽपीति । अत्र विशेष्यं न प्रतीयते तस्मादध्याहृत्य योजयति । कतमोऽपीति । तथा च पुरुषं श्रीहरिं प्रतिपुरुषस्य वेनस्य कामासंभवाद्येऽवशिष्टा भयादयः पञ्चभक्तियोगा उक्तास्तेषां पञ्चानां मध्ये कतमोऽपि भक्तियोगो वेनस्य नास्ति अतस्तमसि पातित इति मूलार्थः । उपसंहरति । तस्मादिति । अत्र केनापि उपायेनेत्युक्त्या केवलद्वेषेणापीति प्रतीयतेऽतोऽवधारणमध्याहृत्य योजनामाह । तस्मात्केनापीति । कामादिषु केनापि प्रकारेणेत्यर्थः । कामादिव्यतिरिक्तौ कावुपायावित्यतः प्रमाणेनैव प्रकृतौपयुक्तौ तौ दर्शयति । उपाय इति । द्वेषाद्या इत्यत्राद्यशब्देनान्येऽपि मोक्षविरोधिनो ग्राह्याः । ततश्च कामादिषु केनापि प्रकारेणोपायेन भक्त्यैव कृष्णे मनो निवेशयेत् नानुपायेन केवलद्वेषादिनेति मूलार्थ इत्याशयः ।। ३३ ।।

मन्दनन्दिनी — द्वेषयुतस्यापि चैद्यस्य भगवत्प्राप्तौ वेनस्यापि स्यादिति तृतीयपक्षं निराह ॥ कतमोऽपीति ॥ केवलभक्तिस्तु नास्ति । कामाद्युपसर्जनानामपि पञ्चानां भक्तिलक्षणोपायानां कतमोऽपि पुरुषं प्रति पुरुषविषयकभक्तिलक्षणोपायो वेनस्य नास्ति । अतो न तस्य चैद्यवद्भगवत्प्राप्तिरिति शेषः । तस्माद्भक्तिसत्वे भगवत्प्राप्तेरावश्यकत्वात्केनाप्युपायेन कामाद्युपसर्जनभक्तिलक्षणोपायेन मनः कृष्णे निवेशयेदिति योजना । अत्रोपायशब्दो भक्तिपरः । अन्यथा द्वेषेणाभिनिवेशस्य चैद्यादेरप्यधिकं वेने सत्वेनोपायो नास्तीत्यस्य बाधापत्तेरित्याशयेन व्याचष्टे तात्पर्यकृत् - कतमोऽपि भक्तियोगो न वेनस्य ॥ तस्मात्केनापि प्रकारेणोपायेनैव मनो निवेशयेत् । नानुपायेन । उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायका इत्यभिधानमिति ॥ स्पष्टमेतत् ॥ ३३ ॥

मातृष्वस्रेयो वश्चैद्यो दन्तवक्रश्च पार्थिव ।
पार्षदप्रवरौ विष्णोर्विप्रशापात् पदच्युतौ ॥ ३४ ॥

तात्पर्यम् — स्वतो भक्ताश्चैद्यादयोऽपि परावेशाद्द्वेषिण इत्यत्र हेतुर्मातृष्वस्रेय इत्यादि ॥ ३४ ॥

प्रकाशिका — मातृष्वस्रेयो वश्चैद्य इत्याद्युत्तरग्रन्थस्य पूर्वग्रन्थेन सङ्गत्यप्रतीतेस्तामाह ॥ स्वतो भक्ता इति ॥ स्वतो इत्यादिबहुवचनं जात्यभिप्रायम् । स्वतोभक्ता अपीत्यन्वयः । हेतुर्विप्रशापरूप उच्यत इत्यादीत्यविभक्तिको निर्देशः । इत्यादिनेत्यर्थः । विष्णोः पार्षदप्रवरौ इत्यनेन तयोः स्वतो भक्तत्वं प्रदर्शितम् । पदच्युतौ असुराविष्टौ जातौ ॥ ३४ ॥

मन्दनन्दिनी — पेशस्कृता रुद्ध इत्यत्र चैद्यादयः स्वतो भक्ता असुरावेशाद्द्वेषिण इत्यत्र हेतुर्मातृष्वसेय इत्यादीत्येवं तात्पर्येणैव श्लोकोऽवतारितः । इत्यत्र हेतुः इत्यत्रेतिशब्दात्परमुक्तमिति । हेतुरित्यतः परमुच्यत इति शेषः । मातृष्वस्रेय इति । ढकि लोप इत्यनुवृत्त्या मातृष्वसुश्चेति सूत्रात् । ढकि अन्त्यलोपे च रूपम् । हे पार्थिव वो युष्माकं मातृष्वसुः पुत्रश्चैद्यो दन्तवक्रश्च विष्णोः पार्षदौ विप्रशापात्पदच्युताविति योजना स्पष्टा ॥ ३४ ॥

युधिष्ठिर उवाच—

कीदृशः कस्य वा शापो हरिदासाभिमर्शनः ।
अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः ॥ ३५ ॥

प्रकाशिका — हरिदासान् हरिभक्तान् अभिमृशति स्पृशति, अभिभवतीति यावत् । अश्रद्धेय इवानादरणीय इव । एकान्तिनां नियतभक्तानाम् । भवः उत्पत्तिः ॥ ३५ ॥

मन्दनन्दिनी — विप्रशापात्पदच्युताविति श्रुत्वा युधिष्ठिरः पृच्छति कीदृश इति श्लोकद्वयेन । हरिदासान् जयादीन् अभिमृशति स्पृशतीति हरिदासाभिमर्शनः शापः । कीदृशः किंप्रकारः । कस्येति कर्तृविशेषप्रश्नः । विप्रशापादित्यनेन सामान्यस्य निश्चितत्वात् । शापप्रयुक्तो भवश्चाश्रद्धेय इवाविश्वसनीय इव भाति । तत्र हरेरेकान्तिनां नियतभक्तानां देहेन्द्रियासुहीनानामसवः प्राणाः । वैकुण्ठपुरवासिनां वैकुण्ठस्य पुरं वैकुण्ठाख्यपुरमिति वा । एतत्त्रयं हेतुः । एकान्तिनां परोपद्रवायोगात् । देहादिहीनानां पुनरुत्पत्त्ययोगात् । वैकुण्ठपुरात्पुनरावृत्तेरयोगाच्च । अतो देहसम्बन्धस्य सम्बन्धं सम्बध्यतेऽनेनेति निमित्तं एतदाख्यातुमर्हसीति योजना ॥ ३५ ॥

देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् ।
देहसंबन्धसंबन्धमेतदाख्यातुमर्हसि ॥ ३६ ॥

प्रकाशिका — अश्रद्धेयत्वमेवोपपादयन्पृच्छति ॥ देहेन्द्रियेति ॥ प्राकृतदेहेन्द्रियासुहीनानामित्यर्थः । अत्रापि जात्यभिप्रायं बहुवचनम् । प्राकृतदेहसम्बन्धेन सम्बन्धो जनकतया यस्य तत्तथा । प्राकृतदेहसम्बन्धे निमित्तं विप्रशापरूपम् । एतत्त्वया पूर्वमुक्तं आख्यातुमर्हसि सनिमित्तकं वक्तुमर्हसीत्यर्थः ॥ ३६ ॥

नारद उवाच–

एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ।
सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ॥ ३७ ॥

मन्दनन्दिनी — नारद उत्तरमाह ॥ एकदेत्यादिना श्लोकपञ्चकेन । भगवद्भक्तान् भगवन्तं च द्रष्टुकामा भुवनत्रयं चरन्तो ब्रह्मणः पुत्राः सनंदनादयो यदृच्छया भगवदिच्छयैकदा विष्णोर्लोकं जग्मुः ॥ ३७ ॥

पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः ।
दिग्वाससः शिशून् मत्वा द्वास्थौ तान् प्रत्यषेधताम् ॥ ३८ ॥

तात्पर्यम् — द्वास्थावित्येननाधिकारस्थत्वमुक्तम् । 'अधिकारस्थिताश्चैव विमुक्ताश्च द्विधा जनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो न तु । देहेन्द्रियासुयुक्ताश्च पूर्वं पश्चान्न तैर्युताः । अप्यभीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युता' इति तन्त्रसारे ॥ ३८ ॥

प्रकाशिका — पञ्च वा षड्वा हायनानि वर्षाणि येषां ते च तेऽर्भाः बालास्तद्वदाभा दीप्तिः येषां ते तथा तत्समाना इत्यर्थः । दिग्वाससः दिगम्बराः । अत एव शिशून्मत्वा द्वास्थौ द्वारपालौ जयविजयौ । प्रत्यषेधतां वेत्रनिधानेन न्यवारयतामित्यर्थः । ननु युधिष्ठिरेण सयुक्तिकं पृष्टस्यैकदा ब्रह्मणः पुत्रा इत्यादिना नारदेन किमुत्तरमुक्तमित्यतस्तदुत्तरज्ञापकपदं प्रदर्शयन् तत्तात्पर्यमाह ।। द्वास्थावित्यनेनेति ।। अधिकारस्थितत्वोक्त्याऽपि कथमुत्तरं जातमित्यतः प्रमाणेनैव तं प्रकारं दर्शयति ।। अधिकारस्थिता इत्यनेन ।। तेषां द्विविधानां मध्ये अधिकारस्थिता एव वरशापादियोगिनः । आदिपदेन तज्जन्यं सुखदुःखादिकं ग्राह्यम् । नियतं नियमेन । न तु नैव । पश्चान्मुक्त्यनन्तरम् । ननु पूर्वं देहेन्द्रियासुयुतत्वे तदभिमानिदेवयुतत्वेनापि भाव्यमित्यतस्तदप्यस्तीत्याह ।। अप्यभीमानिभिरिति ।। तेषामिन्द्रियादीनामभिमानिभिर्देवैरपि पूर्वं युताः पश्चात्स्वोत्तमैर्मुक्तैर्देवैर्युता इत्यर्थः । ततश्च जयविजययोर्द्वारपालनरूपाधिकारस्थितत्वेन मुक्त्यभावाद्वैकुण्ठपुरवासित्वेऽपि शापयोग्यतास्तीत्युत्तरं द्वास्थावित्यनेनोक्तं भवतीति ज्ञातव्यम् ।। ३८ ।।

मन्दनन्दिनी — पञ्च वा षड्वा पञ्चषट् । समासान्तरस्य टचोऽभावो अनित्यत्वात् । पञ्चषड् हायना अब्दा यस्य । हायनोऽस्त्री शरत्समा इत्यमरः । तादृशोऽर्भोऽर्भकस्तस्याभेवाभा येषां ते पञ्चषड्वायनार्भाभाः । ब्रह्मणः प्रथमकल्पे रुद्रः प्रथमसम्भवः । सनकाद्याश्च वाराह इत्युक्तेः । पूर्वेषां पूर्वजा ब्रह्मणो ज्येष्ठपुत्राः । दिग्वाससः । एतच्च विशेषणत्रयं सनन्दनादीनाम् । तथा च जग्मुरिति पूर्वेणान्वयः । तान् शिशून्मत्वा द्वाःस्थौ जयविजयौ प्रत्यषेधतां वेत्रविधानेन न्यवारयतामिति योजना ।।

अत्र प्रत्यषेधतामित्यनेन शापनिमित्तमात्रमुक्तम् । शापप्रकारश्च वक्ष्यते । देहेन्द्रियासुहीनानामित्यादिना प्राप्तापुनर्भवासम्भवशङ्का कथं निरस्तेत्यतस्तात्पर्यकृदाह ।। द्वाःस्थावित्यनेनाधिकारस्थत्वमिति । अनेनापि कथं परिहारः इत्यतः प्रमाणमुपन्यस्यति ।। अधिकारस्थिताश्चैव विमुक्ताश्च द्विधा जनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो न तु । देहेन्द्रियासुयुक्ताश्च पूर्वं पश्चान्न तैर्युताः । अप्यभीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युता इति तन्त्रसारे ।। अनेन विष्णोः पार्षदा गरुडानन्तविष्वक्सेनजयादयो द्विविधाः सन्ति । वैकुण्ठादिधामत्रयोद्देशेऽपि द्विविधः । अमुक्तगम्यो मुक्तमात्रगम्यश्चेति । तत्रामुक्तगम्यदेशे विद्यमानाः पार्षदाः संसारिणः । मुक्तदेशे तु मुक्ताः । तथा च देहेन्द्रियासुहीनानामित्युक्तं हेतुत्रयसिद्धम् । अत एव शेषस्य लक्ष्मणादिभावेन भवः गरुडस्यापि शापादिना नावताराः । सनन्दनादीनामपि लिङ्गत्वमेव । वाराहकल्पब्रह्मजातशरीरवत्वात् । तथा चापराधशापतत्प्रयुक्तजन्मादिमत्वं सर्वं युक्तमित्युक्तं भवति । जना गरुडानन्तादयः पार्षदा अधिकारस्था विमुक्ताश्चेति द्विविधा विष्णुलोके स्थिताः । एषां मध्येऽधिकारस्थितास्तद्दशायां वरशापादियोगिनो ब्रह्मलयकाले

नियतं यथा भवति तथा मुक्तिं यांति । विमुक्त्यनन्तरं तैर्जडदेहादिभिरपि जडदेहादिनाऽपि स्वात्मोत्तमैर्देवैस्तेषां गतदेहादीनामभिमानिभिः । घञ्च मनुष्ये बहुलमिति अभीत्यस्य दीर्घः । अभिमानवद्भिर्युता भवन्ति अत एव चानन्याधिपतिरिति सूत्रम् । मुक्तः स्वकीयावरयन्त्रताऽस्ति इत्यनुव्याख्यानसुधयोर्विवृतमेतत् । अत्र देवैरित्यनेन एकादशस्कन्धे वक्ष्यमाणा असुरा मित्राश्चाभिमानिनो मुक्तौ न सन्तीति ध्वनितम् ॥ ३८ ॥

अशपन् कुपिता एवं युवां वासं न चार्हथः ।
रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ॥ ३९ ॥

प्रकाशिका — वासमपि नार्हथः । कुतस्तत्सेवामिति चकारार्थः ॥ ३९ ॥

मन्दनन्दिनी — एवं प्रतिषेधेन कुपिताः सनन्दादयोऽपश्यन् कोपेन जयविजयावपश्यन्नित्यर्थः । मधुद्विषः पादमूले पादसमीपे । रजस्तमोभ्यां तत्कार्याभ्यां रहितम् । युवां वासं न च नैवार्हथः ॥ ३९ ॥

पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ।
एवं शप्तौ स्वभवनात् पतन्तौ तैः कृपालुभिः ॥ ४० ॥

प्रकाशिका — हे बालिशौ ॥ ४० ॥

मन्दनन्दिनी — पापिष्ठां पापो दैत्यस्तद्युक्ता पापिनी । अतिशयेन तथाभूतामासुरीम् । सुरभिन्नोऽसुरस्तत्सम्बन्धिनीं योनिम् । आश्वितः शरीरात् । यात गच्छतामित्यूचुश्चेति शेषं कृत्वा योजना । न केवलं कुपिता अपश्यन् किं त्वित्यूचुश्चेत्यर्थः । अत्र पापिष्ठामित्यनेन महादैत्यावेशलाभः । आसुरीमित्यस्य सुरभिन्नसम्बन्धिपरतया व्याख्यानात् । दैत्यराक्षसमानुषभावेऽपि न दोषः ॥ ४० ॥

प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ।
जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ४१ ॥

प्रकाशिका — त्रिभिर्जन्मभिर्वां स्वलोकाय स्वस्थानप्राप्तये कल्पतामयं शाप इति शेषः । तावता समाप्यतामित्याशयः ॥ ४१ ॥

मन्दनन्दिनी — एवं शप्तौ अनन्तरमेव पतन्तौ । द्वाःस्थयोः प्रतिषेधो धर्मः । भगवद्भक्ताव-स्माभिर्वृथा शप्तौ । अत उद्धारः कार्य इत्येवं पतनकाले कृपालुभिस्त्रिभिर्जन्मभिरेवं भूत्वा पुनरिमं लोकं

वां विभक्तिव्यत्ययेन युवां पुनरिमं लोकं यातामिति प्रोक्ताविति योजना । ततोऽनुजो हिरण्यकशिपोरनन्तरं जातः । एवं क्रमेण ज्येष्ठकनिष्ठौ जयविजयौ ज्ञेयौ ॥ ४१ ॥

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥ ४२ ॥

प्रकाशिका — धरोद्धारे धरोद्धारार्थं सौकरं वपुः बिभ्रता ॥ ४२ ॥

मन्दनन्दिनी — सिंहरूपिणा नृसिंहरूपिणा । योजना तु स्फुटा । सौकरं वपुर्वराहसम्बन्धिशरीरं बिभ्रता हरिणा हिरण्याक्षो हत इति योजना ॥ ४२ ॥

हिरण्यकशिपुः पुत्रं प्रह्लादं भगवत्प्रियम् ।
जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४३ ॥

प्रकाशिका — हिरण्यकशिपोर्वधे कारणं सूचयति ॥ हिरण्यकशिपुः पुत्रमिति ॥ नाना यातनाः बहुविधतीव्रवेदनाकारणानि ॥ ४३ ॥

मन्दनन्दिनी — जिघांसुर्हन्तुमिच्छुर्मृत्युहेतवे मरणरूपप्रयोजनाय नानायातना बहून् शरीरोपद्रवान् हिरण्यकशिपुरकरोदिति योजना ॥ ४३ ॥

तं सर्वभूतात्मभूतं प्रशान्तं समदर्शनम् ।
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४४ ॥

तात्पर्यम् — सर्वभूतात्मनि भूतम् ॥ ४४ ॥

प्रकाशिका — सर्वभूतात्मभूतमित्येतत्सर्वभूतस्वरूपमिति प्रतीतिवारणाय व्याख्याति ॥ सर्वभूतात्मनीति ॥ तथा च सर्वभूतात्मनि सर्वप्राण्यन्तर्यामिणि भूतं मनसा स्थितमित्यर्थ इत्याशयः । प्रशान्तं द्वेषादिरहितम् । स्पृष्टं व्याप्तं गुप्तमिति यावत् । उद्यमैः शस्त्रप्रहारादिभिः ॥ ४४ ॥

मन्दनन्दिनी — सर्वभूतात्मभूतं तत्र तात्पर्यम् ॥ सर्वभूतात्मनि भूतमिति ॥ सर्वभूतस्वामिनि भूतं दासभूतम् । प्रशान्तम् । प्रकर्षेण विष्णुनिष्ठबुद्धिम् । अतदर्हणमुक्तनानायातनाऽयोग्यम् । भगवत्तेजसा स्पृष्टं भगवदनुग्रहाय तेजसा सामर्थ्यविशेषेण स्पृष्टं युक्तम् । तं प्रह्लादम् । उक्तैर्हननोद्योगैर्हन्तुं नाशक्नोदिति योजना ॥ ४४ ॥

ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ ।
रावणः कुम्भकर्णश्च सर्वलोकप्रतापिनौ ॥ ४५ ॥

तात्पर्यम् — 'हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ॥ अतो भयानको जातस्तत्र राजानमेव च । मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः । मृतिकाले हरिं चैव मत्वा भक्त्यैव केवलम् । द्वाःस्थत्वं हरिमाविश्य प्रापैव मनुजोऽपि त्वि'ति गारुडे ॥ 'विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः । विष्णोर्गुणह्रासवाचः श्रीब्रह्मादेस्तथा क्रमात् । विष्ण्वादिद्वेषतश्चैव सुखवाचस्तथाऽखिलाः । मोहनार्थाः समुद्दिष्टा यथार्थद्योतकास्तथे'ति प्रकाशसंहितायाम् ॥ ४५ ॥

प्रकाशिका — नन्वासुरीं योनिं यातमिति शापानुसारेण जयविजययोः हिरण्यकशिपुहिरण्याक्षजन्मवदवशिष्टं जन्मद्वयमपि दित्यामेव वक्तव्यं तत्कथं द्वितीयं जन्मराक्षसयोनौ तृतीयं राजयोनावित्यतोऽत्र कारणं प्रमाणेनैव परिहरति ॥ हिरण्यकशिपुरिति ॥ इदमुपलक्षणम् । हिरण्याक्षश्चेत्यपि ग्राह्यम् । भूतं भयङ्करम् । प्राणिनां मृतौ मृतिकाले ॥ अत इति ॥ 'यं यं वापि स्मरन्भावं' इति वचनादित्याशयः । भयानकः भयङ्करो राक्षसः । तत्र राक्षसजन्मनि मृतिकाले । चशब्दः हरिमित्यस्यानुकर्षार्थः । तयोरन्ते कृष्णप्रवेशोऽपि निमित्तमाह ॥ कृष्णमिति ॥ तत्रेत्यनुवर्तते । तत्र च मृतिकाले कृष्णं हरिमेव मत्वा हरिं कृष्णमाविश्य द्वाःस्थत्वमेव स्वमूलरूपैक्यमेव प्रापेत्यन्वयः । ननु गोप्यः कामादित्यादावुक्तरीत्या भक्तियुतत्वस्याभिप्रेतत्वे पुराणकर्त्रापि तथैव वक्तव्यम् । कामादित्यादिकमेव किंमर्थमुक्तमित्याशङ्कां प्रमाणेनैव दर्शयति ॥ विष्णुभक्तेरिति ॥ अन्यतः कामादेः । श्रीब्रह्मादेः अक्रमात्तारतम्यक्रमं विहाय गुणह्रासवचः न केवलमुक्तार्थवाचकं वाचः किन्तु तथार्थद्योतकास्तत्सदृशार्थसूचका अपि वाचः तथा मोहनार्थाः समुद्दिष्टा इत्यर्थः ॥ ४५ ॥

मन्दनन्दिनी — ततो वराहेण नृसिंहेन च हननानन्तरम् । तौ केशिन्यां राक्षस्यां राक्षसौ जातौ राक्षसत्वजातिमन्तौ । मातृजातिः सुतानामित्युक्तेः । कीदृशौ किं नामानौ कस्य सुतावित्यतः सर्वलोकप्रतापिनौ रावणकुम्भकर्णश्चेति नामवन्तौ विश्रवसः सुताविति ॥

तत्रापि रावणादिजन्मन्यपि शापमुक्तये न्यहनदिति योजना । त्रिषु जन्मस्वहमेव हन्मीति विष्णोर्वरो हिरण्यकशिप्वादिजन्मनि सुराद्यवध्यत्वविषयको धातुर्वरश्च ग्रन्थान्तरादवसेयौ । दैत्यजन्मान्तरं राक्षसत्वे तदनन्तरं मानुषत्वे तदनन्तरं सायुज्ये च किं कारणमित्यतस्तात्पर्यकृत्प्रमाणमाह ॥

हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ।
अतो भयानको जातस्तत्र राजानमेव च ।

मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः ।
मृतिकाले हरिं चैव मत्वा भक्त्यैव केवलम् ।
द्वाःस्थत्वं हरिमाविश्य प्रापैव मनुजोऽपि त्वितु ॥ इति गारुडे ॥

भूतं राक्षसं भयानको राक्षसः । यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवेति कौन्तेयेय इत्युक्तेः । केवलं भक्त्या द्वेषमुज्झित्वा बहुपश्चात्तापयुक्तया महाभक्त्या निमित्तेन मनुजोऽपि हरिमाविश्य प्रापेत्यन्वयः । तुशब्दस्य तत्रेत्यनेनान्वयः । रावणजन्मनि त्वित्यर्थः । राजैव सञ्जात इत्यनन्तरं तत्र त्वित्यनुवर्तते । राजजन्मनि त्वित्यर्थः । एतत्सर्वं हिरण्याक्षेऽप्यनुसन्धेयम् ॥ ४५ ॥

तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ।
रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात् प्रभो ॥ ४६ ॥

मन्दनन्दिनी — वनवासकाले भविष्यन्तीं मार्काण्डेयकथां मनसि कृत्य श्रोष्यसीति लृट् प्रयोगः ॥ ॥ ४६ ॥

तावद्य क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।
अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४७ ॥

मन्दनन्दिनी — तौ रावणकुम्भकर्णौ ॥ कृष्णचक्रहतांहसौ कृष्णचक्रहतमंहस्त्रिजन्मकृतं पापं ययोस्तौ ॥ ४७ ॥

वैरानुबन्धतीव्रेण ध्यानेनाच्युतसाम्यताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४८ ॥

तात्पर्यम् — वैरानुबन्धः वैरयुक्ता भक्तिः । 'अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत' इति च ॥ ४८ ॥

इति सप्तमतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

प्रकाशिका — वैरानुबन्धतीव्रेणेत्यत्र वैरानुबन्धाशब्दस्य प्रकृतसङ्गतमर्थं दर्शयति ॥ वैरानुबन्ध इति ॥ तथा च मध्यमपदलोपीसमासः । अनुबन्धशब्दो भक्तिवाचक इत्युक्तं भवति । अनुबन्धशब्दस्य भक्तिवाचकत्वे प्रमाणं दर्शयति ॥ अनुबन्धस्त्विति ॥ तुशब्दः प्रकृतत्वानुसंधानार्थः । अच्युतसाम्यतां कृष्णप्रवेशरूपाम् ॥ पुनः कृष्णस्य वैकुण्ठगमनानन्तरं विष्णुपार्षदौ सन्तौ स्वमूलरूपाभ्यां एकीभूयेति यावत् ॥ ४८ ॥

मन्दनन्दिनी — वैरानुबन्धतीव्रेण वैरयुक्तभक्तिभरेणात्युत्कटध्यानेनाच्युतसाम्यताम् । स्वार्थे ष्यञ् । अच्युतदेहप्रवेशं नीतौ । विष्णुपार्षदौ पुनर्हरेः पार्श्वं जग्मुरिति योजना । अत्र द्वेषेणैव साक्षात्साम्यं किं न स्यादित्यतो बहुप्रमाणबाध उक्तः ।। प्रमाणान्तरबाधं चाह तात्पर्यकृत् ।।

विष्णुभक्तेश्च तत्ज्ञानादन्यतो मुक्तिवाचकाः । विष्णोर्गुणह्रासवाचः श्रीब्रह्मादेस्तथा क्रमात् । विष्ण्वादिद्वेषतश्चैव सुखवाचस्तथाऽखिलाः । मोहनार्थाः समुद्दिष्टा यथार्थद्योतकास्तथा इति प्रकाशसंहितायाम् ।।

श्रीब्रह्मादेः क्रमाद्गुणह्रासवाच इत्यनुवर्तते । विद्यमानगुणानां ह्रासवाच इत्यर्थः । बुध्या विवेकिनां क्रमादवरताक्रमात् । विद्यमानश्रीब्रह्मादेः सकाशाद्विष्णोर्ह्रासवाच इति वाऽन्वयः । तथार्थद्योतका विरुद्धार्थद्योतकाः । अन्येऽपि तथा मोहनार्थाः समादिष्टा इत्यर्थः । एतच्च वचनं क्वचित्तात्पर्यकोश इह नास्ति । किंतूत्तराध्यायादौ । अवभिधानपूर्वकं वैरानुबन्धपदं व्याचष्टे । वैरानुबन्धो वैरयुक्ता भक्तिः । अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत इति प्रकाशसंहितायाम् ।। ४८ ।।

युधिष्ठिर उवाच–

विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ।
ब्रूहि मे भगवन् येन प्रह्लादेऽप्यच्युतात्मनि ।। ४९ ।।

इति श्रीमद्भागवते सप्तमस्कन्धे प्रथमोऽध्यायः ।

प्रकाशिका — अच्युते आत्मा मनो यस्य तस्मिन् ।। ४९ ।।

इति श्रीमद्भागवतसप्तमस्कन्धटिप्पण्यां यदुपतिविरचितायां
प्रकाशिकायां प्रथमोऽध्यायः ।। छ ।।

मन्दनन्दिनी — अच्युतात्मनि विष्णुमनस्के । अत एव महात्मनि । दयिते दयाविषये । पुत्रे प्रह्लादे विद्वेषः कथमासीत् । यन्निमित्तमासीत्तन्मे ब्रूहीति योजना ।। ४९ ।।

इति श्रीमद्भागवतटिप्पण्यां श्रीव्यासतत्वज्ञविरचितायां मन्दनन्दिन्यां प्रथमोऽध्यायः ।। ७-१ ।।

।। अथ द्वितीयोऽध्यायः ।।

नारद उवाच–

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ।
हिरण्यकशिपू राजन् पर्यतप्यद् रुषा शुचा ।। १ ।।

प्रकाशिका — विद्वेषो दयिते पुत्रे कथमासीदिति प्रश्नस्योत्तरं वक्तुं तदुपयुक्तां कथामाह ।। भ्रातरीति ।। एवं देवपक्षपातेन हरिविषयरुषा भ्रातृविषयशुचा ।। १ ।।

मन्दनन्दिनी — युधिष्ठिरकृतप्रश्नं प्रतिवक्तुं प्रारभते ।। भ्रातरीति । भ्रातरि हिरण्याक्षे क्रोडमूर्तिना वराहमूर्तिना । रुषा हरिविषयककोपेन शुचा भ्रातृविषयकशोकेन पर्यतप्यत सन्तापमकार्षीत् ।। १ ।।

आह चेदं रुषा पूर्णः सन्दष्टदशनच्छदः ।
कोपोज्ज्वलाभ्यां चक्षुर्भ्यां निरीक्षन् धूम्रमम्बरम् ।। २ ।।

प्रकाशिका — संदष्टः दशनच्छदो ओष्ठो येन । उज्ज्वलाभ्यां उज्ज्वलद्भ्यां तदुत्थितधूमेनैव धूम्रमभ्रम् ।। २ ।।

मन्दनन्दिनी — दष्टो दशनच्छदोऽधरोष्ठो येन स हिरण्यकशिपुर्धूम्रं यथा भवति तथांऽबरं निरीक्षन् इदं वक्ष्यमाणमुवाच ।। २ ।।

करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ।
शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ।। ३ ।।

प्रकाशिका — करालदंष्ट्राभिरुग्रदृष्ट्या च दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य स तथा ।। ३ ।।

मन्दनन्दिनी — करालदंष्ट्रोग्रदृष्ट्या भयंकरदंष्ट्राभिर्युक्तया उग्रदृष्ट्या निमित्तेन दुष्प्रेक्ष्यभ्रुकुटीमुखः प्रेक्षितुमशक्यभ्रुवोराक्रमयुक्तमुखः । इदं वक्ष्यमाणमब्रवीत् ।। ३ ।।

हिरण्यकशिपुरुवाच–

भो भो दानव दैतेय द्विमूर्धस्त्र्यक्ष शम्बर ।
शतबाहो हयग्रीव नमुचे पाक इल्वल ।। ४ ।।

विप्रचित्ते मम वचः पुलोमन् शकुनादयः ।
शृणुताऽनन्तरं सर्वैः क्रियतामाशु मा चिरम् ॥ ५ ॥

मन्दनन्दिनी — सम्बोधनद्योतकस्य भो इत्यस्यादराद् द्विरुक्तिः । स्युः प्याट् पाडङ्ग हे है भोरित्यमरः । भो भगो इति यादेशः । लोपोव्योरिति लोपः । दानवदैतेया इति सामान्यतः सम्बोधनम् । द्विमूर्धन्नित्यादि तन्नामकीर्तनम् । हयग्रीवेति तन्नामकदैत्यसम्बोधनम् । पाक इल्वलेत्यत्रा-विवक्षणात्संहिताभावेन तत्कार्य एकदेशाभावः । वाक्ये तु सा विवक्षामपेक्षत इत्युक्तेः । असंधिः काव्य एव दोषः । क्रियताम् । मदुक्तमिति शेषः । आश्वित्यस्य माचिरमिति विवरणं चिरं यथा न भवतीति ॥ ॥ ४, ५ ॥

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितस्सुहृत् ।
पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥

प्रकाशिका — समेनाप्युपधावनैर्भजनैर्निर्मित्तभूतैः । पार्ष्णिग्राहेण पक्षपातिना सता ॥ ६ ॥

मन्दनन्दिनी — क्षुद्रैरल्पैः सपत्नैः शत्रुभिः । अदितिपुत्रैरिति यावत् । वस्तुतो दैत्यादित्यसमेनापि उपधावनैर्देवकर्तृकोपसत्तिभिः । टीकायां स्योदवनैरिति लेखकदोषः । स्वपादवनैरित्येव स्वपादभजनैरित्यर्थः । एवमुत्तरत्रापि लेखकदोषा मार्जनीयाः । तुष्टेन पार्ष्णिग्राहेण देवरक्षकेण हरिणा घातितो हननं प्रापित इति योजना । तदानीमदित्यां हरेरवताराभावेन हरेः साम्यं बलवत्त्वं चेति तस्य ज्ञानम् ॥ ६ ॥

तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ।
भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥

प्रकाशिका — त्यक्तः स्वभावः समत्वरूपो येन तस्य । अत एव घृणेः शोच्यस्य । ''घृणिर्विभावसौ सूर्ये रश्मौ शोच्ये विघर्षण इत्यभिधानात् । भजन्तं स्वात्मानं सेव्यमानम् । भजमानस्यानुसरतः ॥ ७ ॥

मन्दनन्दिनी — स्वाभिप्रायमाविष्करोति ॥ तस्येति श्लोकद्वयेन । तस्य हरेः षष्ठ्यन्तानि तस्य विशेषणानि । त्यक्तस्वभावस्य त्यक्तसाम्यस्वभावस्य । घृणेः शोच्यस्य । घृणिर्विभावसौ सूर्ये रश्मौ शोच्ये विघर्षण इत्यभिधानम् । मायावनौकसो मायया कापट्येन वनस्थानकवराहरूपस्येत्यर्थः । भजन्तं स्वसेवकं भजमानस्य स्वसेवानुसारेण फलदातुः । बालस्येवास्थिरात्मनश्चञ्चलमनस्कस्य ॥ ७ ॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ।
युद्धप्रियं तर्पयिष्ये भ्रातरं मे हतव्यथः ॥ ८ ॥

मन्दनन्दिनी — युधि मच्छूलभिन्नग्रीवस्य तस्य भूरिणा रुधिरेण प्रियं भ्रातरं हतव्यथः सन् तर्पयिष्य इति योजना ॥ ८ ॥

तस्मिन् कूटेऽहिते नष्टे कृन्तमूले वनस्पतौ ।
विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥

प्रकाशिका — कूटे कपटिनि । अहिते वैरिणि ॥ ९ ॥

मन्दनन्दिनी — तस्मिन्नष्टेऽदृष्टे दुष्टे वा । कूटे कपटे हते सति । कृन्तमूले वनस्पतौ विटपाः शाखा इव विष्णुप्राणा दिवौकसः । अनायासेन शुष्यन्तीति योजना ॥ ९ ॥

तावद् यात भुवं यूयं ब्रह्मक्षत्रसमेधिताम् ।
सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानकान् ॥ १० ॥

तात्पर्यम् — 'विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् । हरिरेव हि सर्वस्य मूलं सम्यङ्मतो नृपे'ति ब्राह्मे ॥ १० ॥

मन्दनन्दिनी — अहं हरिमन्वेषयामि । यूयं तावद्विप्रादिसमेधितां भुवं यात । दानकानित्यत्र स्वार्थे कप्रत्ययः । यद्वा मत्वर्थे कः । तथा च तपादींस्तद्वतो ब्रह्मादीन्वा सूदयध्वामिति योजना ॥ १० ॥

विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।
देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥

यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः ।
तं तं जनपदं यात सन्दीपयत वृश्च्यत ॥ १२ ॥

मन्दनन्दिनी — तावता विष्णोः किमपकृतमित्यत आह ॥ विष्णुरिति ॥ देवर्षिपितृभूतानां धर्मस्य च परायणम् । मुख्याश्रयो यज्ञ इज्यत इति यज्ञः । पुमान्पुरुषः । धर्ममयो धर्मप्रधानो विष्णुः । द्विजक्रियामूलो द्विजानां ब्रह्मक्षत्रादीनां क्रिया तप आदिका मूलमुपोद्बलिका यस्य तादृशः । यत्र यत्र द्विजादयस्तं तं जनपदं यात । सन्दीपयत वह्निना ज्वलयत । वृश्च्यत । ओ व्रश्चू च्छेदन इति धातोः । छेदनं कुरुतेति योजना । तथा च द्विजानां यज्ञकारित्वेन गवां हविःसम्पादकत्वेन वेदानां

मन्त्रादिरूपत्वेन वर्णाश्रमोचितक्रियाणां विहितत्वेन विष्णुप्रीतिसाधनतया विष्णूपोद्बलकत्वेन तदपकारे विष्णोरपकृतं भवतीति भावः । विष्णोः स्वस्यैव सर्वमूलत्वेन द्विजक्रियामूलत्वमित्येतदासुरं मतम् । एवमन्यदपि विरुद्धमासुरं मतं बोध्यम् । अत एवात्र तात्पर्यम् ॥ विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् । हरिरेव हि सर्वस्य मूलं सम्यङ्मतो नृपेति ब्राह्मे ॥ सर्वस्य मूलमित्यतःपरमितिशब्दोऽनुवर्तनीयः ॥ ११, १२ ॥

इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥

पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ।
खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥ १४ ॥

केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ।
आजीव्यांश्चिच्छिदुर्वृक्षान् केचित् परशुपाणयः ।
प्रादहञ्छरणानन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥

मन्दनन्दिनी — आज्ञानुसारेण भृत्यानां करणप्रकारमाह ॥ इति ते भर्तृनिर्देशमित्यादि सार्धश्लोकत्रयेण । योजना तु स्फुटा । कदनं हिंसाम् । कद हिंसायामिति धातोः । राजाधिष्ठानं पुरम् । ग्रामो बहुजनाकीर्णस्थानम् । व्रजं गवामावासस्थानम् । गोपालवसतिर्वा । आश्रमो मुनिवासः उद्यानं महावनम् । क्षेत्रं श्रीमुष्णादि । आराम उपवनमाकरो रत्नाद्युत्पत्तिस्थानं खेटो नाव्यस्थानं खर्पटो वसनविक्रयस्थानं घोष आभीराणां पल्ली पत्तनं वणिग्भिरधिष्ठितम् । आजीव्यान्नारिकेल-क्रमुकपनसादिवृक्षान् । शरणानि गृहाणि ॥ १३, १५ ॥

एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः ।
दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥

मन्दनन्दिनी — एवं विप्रकृते विनाशिते लोके लोकपाला देवा अलक्षिता अदृष्टाः ॥ १६ ॥

हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः ।
कृत्वा कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥ १७ ॥

शकुनिं शम्बरं धृष्टं भूतसन्तापनं वृकम् ।
कालनेमिं महानाभं हरिश्मश्रुमथोत्कलम् ॥ १८ ॥

तन्मातरं रुशद्भानुं दितिं च जननीं गिरा ।
श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ॥ १९ ॥

मन्दनन्दिनी — कटोदकं धर्मोदकं । शकुनिमित्यादीनि नव पुत्रनामानि । रुशद्भानुं हिरण्याक्षपत्नीम् । जननीं हिरण्याक्षमातरम् । देशकालज्ञो मृतस्य पुत्रादिगृहे तत्काले यद्वक्तव्यं तत्ज्ञः । श्लक्ष्णया मनोहरया गिरा इदमाहेत्यन्वयः ॥ १७, १८, १९ ॥

हिरण्यकशिपुरुवाच–

अम्बाम्ब हे वधूः पुत्रा वीरं माऽर्हथ शोचितुम् ।
रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥

भूतानामिह संवासः प्रपायामिव सुव्रते ।
दैवेनैकत्र नीतानामुन्नीतानां तथाऽध्रुवः ॥ २१ ॥

मन्दनन्दिनी — अम्बाम्बेति दितेर्वधूरिति रुशद्भानोः सम्बोधनम् । श्लाघ्यो जनैः शूराणामीप्सित इष्टः । अनेन श्लाघ्याऽभीप्सितप्राप्त्या शोको न कार्य इत्युक्तं भवति । नाप्येकत्र संवासो गत इति तस्याध्रुवत्वनियमादित्याह ॥ भूतानामिति ॥ प्रपायां नानापथा गच्छद्भ्यो दीयमानपानीयशालायाम् । प्रपा पानीयः स्यान्मन्त्रशाला प्रतिश्रय इत्यभिधानम् । दैवेन कर्मवशेनैकत्र नीतानां सङ्गतानां तथा पूर्वं पश्चाच्चोन्नीतानां वियुक्तानां संवासोऽध्रुव इति योजना ॥ २०,२१ ॥

नित्य आत्माऽव्ययः शुद्धः सर्ववित् सर्वगः परः ।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन् गुणान् ॥ २२ ॥

यथाऽम्भसा प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥ २३ ॥

तात्पर्यम् — धत्तेऽसावात्मनो लिङ्गं जीवमनआदीनामाधारं ब्रह्म ॥ २२ ॥

मन्दनन्दिनी — तत्त्वमुपदिशति ॥ नित्य आत्मेत्यादिना श्लोकपञ्चकेन । नित्यः स्वरूपतोऽव्ययो देहतोऽपि व्ययरहितः । शुद्धो गुणत्रयरहितः । सर्ववित्सर्वज्ञः । सर्वगः सर्वत्र गतः । परः स्वतन्त्रः । असावात्मा हरिर्गुणान्पूर्वं सौक्ष्म्येण विद्यमानान् आदिसृष्टौ स्वमायया स्वेच्छया विसृजन् आत्मनो जीवस्य लिङ्गं मनआदिषोडशकलात्मकलिङ्गशरीरं धत्ते धारयति । पुष्णाति चेति योजना । एतदेवाभिप्रेत्य तात्पर्यम् ॥ जीवमनआदीनामाधारं ब्रह्मेति ॥ अत्र धत्त इत्यनेन नियामकत्वेन

भगवतोंऽतःस्थितत्वप्राप्त्या जीवस्येव गुणप्रयुक्तो बन्धस्तस्यापि स्यादित्यतः स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोरित्युक्तरीत्या तस्य न बन्धः। किं त्वङ्गेन बद्धजीवेन तत्समीपस्थो भगवानपि भ्रांत्या तथा दृश्यत इत्याह ॥ यथेति ॥ नौकादिकमधिरुह्य जले गच्छतः पुंसः प्रचलतांऽभसांऽभोगतप्रतिबिम्बभूततरुसमूहेन निमित्तेन तीरस्थतरवोऽपि यथा चला इव दृश्यन्ते। यथा वा चक्षुषा भ्राम्यमाणेन भ्रमणयुक्तेन भूरपि भ्रमतीव दृश्यते ॥ २२, २३ ॥

एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान्।
याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

तात्पर्यम् — लिङ्गवानिव। जीव इव। 'असमं समतामेति भ्रान्तिदृष्टचैव केवलम्। जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथञ्चने'ति षाड्गुण्ये ॥ 'यथोदचलनाद् वृक्षप्रतिबिम्बप्रचालनात्। तटस्थवृक्षचलनं कल्पयेदबुधो नरः। तथा मनसिजैर्दोषैराभासे दूषिते नरे। आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत्। आत्मनश्चक्षुषो भ्रान्त्या यथा पश्येद्भ्रमं भुवः। तथैव स्वात्मनो दोषाद्दोषवद्ब्रह्म पश्यती'ति ब्रह्मतर्के ॥ २४ ॥

मन्दनन्दिनी — एवं गुणैर्भ्राम्यमाणेऽज्ञानभ्रमादिबन्धयुक्ते। मननान्मन उद्दिष्टं इत्युक्तेः मनसि जीवे। अविकलो वैकल्यरहितः पुमान्परमपुरुषोऽलिङ्गो लिङ्गशरीररहितो लिङ्गवान् जीवभ्रांत्या। तत्साम्यताम्। स्वार्थे ष्यञ्। तत्साम्यतां यातीति योजना। एतत्सर्वमभिप्रेत्य प्रवृत्तं तात्पर्यम् ॥ लिङ्गवानिव जीव इव।

असमं समतामेति भ्रांतिदृष्टचैव केवलम्।

जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथंचनेति षाड्गुण्ये। यथोदचलनाद्वृक्षप्रतिबिम्बप्रचालनात्।

तटस्थवृक्षचलनं कल्पयेदबुधो नरः।
तथा मनसिजैर्दोषैराभासे दूषिते नरे।
आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत्।
आत्मनश्चक्षुषो भ्रांत्या यथा पश्येद्भ्रमं भुवः।

तथैव स्वात्मनो दोषाद्दोषवद्ब्रह्म पश्यतीति ब्रह्मतर्के ॥ असमं ब्रह्म तत्त्वदृष्ट्या न समम्। आभासे नरे प्रतिबिम्बभूते जीवे। आभासिनो बिम्बस्य। आत्मनः स्वस्य भ्रांत्या चलनेन भ्रमं चलनमित्यर्थः ॥ ॥ २४ ॥

एष आत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना ।
एवं प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥

मन्दनन्दिनी — एवमुक्तरीत्याऽलिङ्गे लिङ्गशरीररहिते लिङ्गाभावाना । अर्शाद्यच् । लिङ्गशरीरयुक्तस्य जीवस्य भावना साम्यबुद्धिः । य एषः प्रक्रम्यमानपरामर्शित्वात्पुल्लिङ्गम् । आत्मविपर्यासः परमात्माधिष्ठानको भ्रमः । तस्य फलमाह ॥ एवमिति ॥ एवं भ्रमे सति प्रिया-प्रिययोगादयो दोषा भवन्तीति योजना । वियोगो बन्धुभिः । कर्म पापम् । संसृतिः संसारबन्धः ॥२५॥

संभवश्च विनाशश्च शोकश्च विविधः स्मृतः ।
अविवेकश्च चिन्ता च विवेकस्मृतिरेव च ॥ २६ ॥

तात्पर्यम् — विवेकस्मृतिः अविवेकिन एव विवेकित्वभ्रान्तिः । 'अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे । असुरावेशतस्त्वन्यान् हरिस्तोतॄन्द्विषन्ति चे'ति पाद्मे ॥ २६ ॥

मन्दनन्दिनी — स्मृतोऽनुभवसिद्धो विविधशोकश्च विवेकःस्मृतिः वस्तुतोऽविवेकिन एव । अविवेकेऽसम्यग्ज्ञाने विवेकस्मृतिः सम्यग्ज्ञानमिति भ्रान्तिरित्यर्थः । अतो दोषमध्ये परिगणनं युक्तम् । एतदेवाभिप्रेत्य तात्पर्यम् ॥ विवेकस्मृतिरविवेकिन एव विवेकित्वभ्रान्तिरिति ॥ अत्र तत्त्वोपदेशे हिरण्यकशिपोः केशवे भक्तिः प्रतीयते । अतः कथं तत्स्तोतारं प्रह्लादं द्वेष्टीत्यत आह तात्पर्यकृत् ॥ अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे । असुरावेशतस्त्वन्यान् हरिस्तोतॄन्द्विषन्ति चेति पाद्मे ॥ २६ ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य प्रेतबन्धूनां संवादं तं निबोधत ॥ २७ ॥

मन्दनन्दिनी — भूतानामिह संवासोऽध्रुव इति न केवलं मयोक्तं किं त्वत्रेतिहासमप्युदाहरतीत्याह ॥ अत्रेति ॥ प्रेतबन्धूनां कस्यचिन्मृतस्य ज्ञातीनाम् । तमितिहासं निबोधत जानीत । बुध्यतेर्व्यत्ययेन शप् ॥ २७ ॥

उशीनरेष्वभूद् राजा सुयज्ञ इति विश्रुतः ।
सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥

मन्दनन्दिनी — उशीनरेषूशीनरस्य जनपदेषु । तद्राज्यस्य । लुग्बहुष्विति लुक् (?) । ज्ञातयो बान्धवा उपासन्त तद्विषयकचिन्तामकुर्वन् ॥ २८ ॥

विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ।
शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥ २९ ॥

मन्दनन्दिनी — असृगाविलं रक्तेन व्याप्तम् ॥ २९ ॥

विकीर्णकेशं स्तब्धाक्षं संरम्भाद् दष्टदच्छदम् ।
रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥ ३० ॥

मन्दनन्दिनी — स्तब्धाक्षं निश्चलनेत्रम् । संरम्भात्कोपात् । रजःकुण्ठमुखांभोजं धूलिधूसरं मुखाम्बुजं यस्य तम् । छिन्न आयुधयुक्तभुजो यस्य तम् ॥ ३० ॥

उशीनरेन्द्रं विधिना तथाकृतं
पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ।
हताः स्म नाथेति करैरुरो भृशं
घ्नन्त्यो मुहुस्तत्पदयोरुपापतन् ॥ ३१ ॥

मन्दनन्दिनी — तत्पदयोः पत्युः पदयोः ॥ ३१ ॥

रुदन्त्य उच्चैर्दयिताङ्घ्रिपङ्कजं
सिञ्चन्त्य अस्रैः कुचकुङ्कुमारुणैः ।
विस्रस्तकेशाभरणाः शुचं नृणां
सृजन्त्य आक्रन्दनया विलेपिरे ॥ ३२ ॥

प्रकाशिका — शुचः शोकान् । सृजन्त्यः कुर्वाणाः । विलेपिरे प्रलापनं चक्रुः ॥ ३२ ॥

मन्दनन्दिनी — आक्रन्दनयोच्चरोदनेन नृणां शोचं सृजन्त्यः कुर्वाणा विलेपिरे परिदेवनं चक्रुः ॥ ॥ ३२ ॥

अहो विधात्राऽकरुणेन नः प्रभो
भवान् प्रणीतो धिगगोचरं दशाम् ।
उशीनराणामपि वृत्तिदः पुरा
कृतोऽधुना येन शुचां विवर्धनः ॥ ३३ ॥

प्रकाशिका — नः दृशामगोचरं अविषयम्। देशं प्रणीतः गमितः। येन विधिना पुरा उशीनराणां वृत्तिदः कृतोऽसि तेनैवाधुना शुचां विवर्धनः कृतोऽसि ॥ ३३ ॥

मन्दनन्दिनी — हे प्रभो नाथ। भवान्येनाकरुणेन विधात्रा नोऽस्माकं दृशामगोचरमविषयं देशं नीतः। उशीनराणां वृत्तिदः कृतोऽधुना शुचां विवर्धनः कृतः। तं विधातारं धिक्। अहो आश्चर्यमिति योजना ॥ ३३ ॥

त्वया कृतज्ञेन वयं महीपते
कथं विना स्याम सुहृत्तमेन।
तत्रानुयानं तव वीर पादयोः
शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥

प्रकाशिका — त्वया विना कथं स्याम भवेम। अतः हे वीर यत्र त्वं यास्यसि तत्र अनुयानं अनुगमनं शुश्रूषतीनां श्रुश्रूषां कुर्वतीनां अस्माकं दिश देहि ॥ ३४ ॥

मन्दनन्दिनी — हे महीपते सुहृत्तमेन कृतज्ञेन त्वया विना कथं स्याम तिष्ठेम। हे वीर तव पादयोः शुश्रूषतीनामस्माकं त्वं यत्र यास्यसि तत्रानुयानं दिशेति योजना ॥ ३४ ॥

एवं विलपतीनां वै परिगृह्य मृतं पतिम्।
अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥

प्रकाशिका — निर्हारं दाहम् ॥ अस्तं अस्ताचलं प्रति ॥ ३५ ॥

मन्दनन्दिनी — निर्हारं शवर्निर्हरणम्। अनिच्छन्तीनां मृतं पतिं परिगृह्यैवं विलपतीनां सतीनाम्। विलपतीषु सतीष्विति यावत्। यस्य च भावेन भावलक्षणमिति षष्ठी। अर्कोऽस्तं यथा भवति तथा संन्यवर्तत रथनिवर्तनमकरोदिति योजना ॥ ३५ ॥

तत्र ह प्रेतबन्धूनामाश्रुत्य परिदेवनम्।
आह तान् बालको भूत्वा यमः स्वयमुपागतः ॥ ३६ ॥

मन्दनन्दिनी — परिदेवनं विलापनम्। योजना तु स्फुटा ॥ ३६ ॥

यम उवाच–

अहो अमीषां वयसाऽधिकानां विपश्यतां लोकविधिं विमोहः ।
यत्रोद्भवस्तत्र गतं मनुष्यं स्वयं सधर्मा अनुशोचन्त्यपार्थम् ॥ ३७ ॥

तात्पर्यम् — यत्रोद्भवस्तत्र गतं अदर्शनं गतम् । 'अदर्शनादिहायातः पुनश्चादर्शनं गत' इति भारते ॥ ३७ ॥

प्रकाशिका — लोकस्य विधिं जननमरणादिप्रकारं विशेषेणापि पश्यतामपि विमोहः । विमोहमेवाह ॥ यत्रेति । अत्र यत्रोद्भवस्तत्र गतमित्यस्य प्रकृतसङ्गतमर्थं सप्रमाणकमाह ॥ यत्रोद्भव इति । न विद्यते दर्शनं साक्षात्कारो यस्य तददर्शनं अतीन्द्रियं स्वर्गादिकम् । तथा च यत्र यस्मात्स्वर्गनरकादेरायात्तस्येहोद्भवस्तत्र तत्स्वर्गाधिकं गतं मनुष्यं प्रति अपार्थं व्यर्थं अनुशोचन्ति । जननमरणयोरपरिहार्यत्वान्न शोकः प्रेक्षावता कार्यः । एते च तत्रापरिहार्येऽर्थे वृथा शोकं कुर्वन्त्यतो विमोह इत्याशयः । कथंभूताः स्वयं सधर्माः । मृतेन सह समानो मृत्युपलक्षणो धर्मो येषां ते तथाऽतोऽपि विमोह इति मूलार्थः ॥ ३७ ॥

मन्दनन्दिनी — बालरूपस्य यमस्योक्तिप्रकारमाह ॥ अहो इति ॥ मतो वयसाऽधिकानां लोकविधिं मर्त्यलोकस्थितिं विपश्यताममीषां प्रेतबन्धूनामेषो विमोहो अहो आश्चर्यकरः । एष कः । यत्र पूर्वमदर्शनं उद्भव उत्पत्तिः । तत्र तद्दर्शनं गतं मनुष्यं स्वयं सधर्मास्तादृशोत्पत्त्यादिमतोऽपार्थं व्यर्थमनुशोचन्तीति य इति योजना । एतदेवाभिप्रेत्य तात्पर्यम् ॥

यत्रोद्भवस्तत्र गतमदर्शनं गतम् । अदर्शनादिहायातः पुनश्चादर्शनं गत ॥ इति भारते ॥ ३७ ॥

अहो वयं धन्यतमा यदत्र
त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबला वृकादिभिः
स रक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥

प्रकाशिका — स्थितिमरणादिकं सर्वं भगवदधीनमिति जानतां नैतादृशशोकप्रसक्तिरित्यत्र वयमेवोदाहरणमित्याह ॥ अहो वयमिति ॥ अबला दुर्बला अपि वृकादिभिरभक्ष्यममाणा वयं न विचिन्तयामः,अस्माकं रक्षिता क इति चिन्तां न कुर्मः कुतः । स परमात्मा रक्षति इति निश्चयवन्तो यत इति शेषः ॥ ३८ ॥

मन्दनन्दिनी — बन्धुवियोगेनानुशोचनस्याकार्यमुक्त्वा तादृशचिन्तारहितस्य स्वस्य धन्यत्वं रक्षकाभावे रक्षणं कथमित्यतो भगवत एव रक्षकत्वं चाह ।। अहो वयमिति ।। अत्र लोके पितृभ्यां मातापितृभ्यां त्यक्ताः । रक्षकरहिता इति यावत् । अबला दुर्बला अपि वृकादिभिरभक्ष्यमाणाः । यो हि गर्भे रक्षति स एव सर्वदाऽपि रक्षिता रक्षक इति निश्चित्य मातापितृवियोगादिकं न विचिन्तयामः । यद्यस्मादहो तस्माद्वयं धन्यतमा हीति योजना ।। ३८ ।।

य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते यः ।
तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसङ्ग्रहे प्रभोः ।। ३९ ।।

प्रकाशिका — ननु प्राणिनां मरणादिकं अवाप्तसमस्तकामो भगवान् किमर्थं करोतीत्यपेक्षायामिच्छयैव सर्वजगज्जन्मादिकर्तुरियं केवलं क्रीडेत्याह । य इच्छयेति ।। हे अबलाः । तस्य प्रभोः ईशितुश्चराचरं निग्रहेण मरणेन सहिते सङ्ग्रहे पालने विषये क्रीडासाधनमाहुः । न ताभ्यां तस्य प्रयोजनमित्याशयः ।। ३९ ।।

मन्दनन्दिनी — अन्यसृष्टं संहारके चास्मिन् सति प्रयोजनाभावे च कथं रक्षतीत्यतः सृष्ट्यादिकर्तैक एव । प्रयोजनाभावेऽपि रक्षणादिव्यापारेच्छारूपस्य भगवतः क्रीडैव । देवस्यैष इति श्रुतेः । जगच्च क्रीडोपकरणमित्याशयेनाह ।। य इच्छयेति ।। हे अबलाः । य एवेदं स्वेच्छयैव सृजति य एव रक्षति अवलुम्पते संहरति । स्वयमव्ययः । तस्य निग्रहसङ्ग्रहे सृष्ट्यादिना सङ्ग्रहे संहारदिना निग्रहे प्रभोः समर्थस्येशितुः स्वामिनश्चराचरं क्रीडनं क्रीडोपकरणमाहुर्विद्वांस इति योजना ।। ३९ ।।

पथि च्युतं तिष्ठति दिष्टरक्षितं
गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने
गृहेऽपि गुप्तोऽस्य हतो न जीवति ।। ४० ।।

प्रकाशिका — स्थितिमरणयोर्भगवदधीनत्वमन्वयव्यतिरेकाभ्यामुपपादयति ।। पथिच्युतमिति ।। दिष्टेन दैवेनेश्वरेण । तेनेश्वरेण विहतम् । अस्यानेन ।। ४० ।।

मन्दनन्दिनी — रक्षणादिकं भगवदधीनमेव न जीवव्यापारधीनम् । तस्यान्वयव्यतिरेकव्यभिचारादित्याशयेनाह ।। पथिच्युतमिति ।। अत्र दिष्टशब्देन भगवानभिधीयते । अस्यानेन । योजना तु स्फुटा ।। ४० ।।

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥

तात्पर्यम् — अन्यतम आत्मा परमात्मा । 'सुविरुद्धस्वरूपत्वाज्जीवादन्यतमो हरिरि'ति वामने ॥ भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात्स एव भजनीयो न शोकेन प्रयोजनमि'ति फलितार्थः ॥ ४१ ॥

प्रकाशिका — भूतानि तैस्तैरिति श्लोकेऽन्यतमशब्देनानन्वितस्यात्मशब्दस्य जीवपरत्वप्रतीति-वारणाय विवक्षितमर्थमाह । अन्यतम इति ॥ ननु परमात्मनः एकत्वात्कथमतोऽन्यत-मशब्दवाच्यत्वमित्याशङ्कां प्रमाणेनैव परिहरति । सुविरुद्धेति । अन्यतमः अन्यतमशब्दवाच्यः । तथा च अयमतिशयनार्थकतमबन्त इत्याशयः । ननु शोको न कार्य इत्येतदुपपादके वक्तव्ये भूतानि तैस्तैरित्यादिना किमर्थमसङ्गतं भगवन्माहात्म्यवर्णनं क्रियत इत्याशङ्कायां तत्रापि प्रकृतिरभिप्रेता-स्तीत्याह । भगवन्माहात्म्येति ॥ फलितार्थ अभिप्रेतार्थ इत्यर्थः । अतो न प्रकृतासङ्गतिरित्याशयः । ततश्चायं भूतानीत्यादि मूलार्थः । निजयोनिकर्मभिः स्वयोग्यदेवादियोनिसाधनैः कर्मभिः । काले देहारम्भककर्मसमाप्तिकाले । न भवन्ति नश्यन्ति । सर्वशः देवादयोऽपि । तत्र तदा प्रकृतौ देहाकारेण परिणतायां स्थितोप्यात्मा परमात्मा तस्याः प्रकृतेर्गुणैः सत्वादिभिर्जीववन्न निबध्यते । कुतः यतोऽन्यतमः । जीवात्सुविरुद्धस्वभावत्वेनातिशयेनान्यः अत्यन्तविलक्षणः ॥ ४१ ॥

मन्दनन्दिनी — किंचिदनिमित्तीकृत्य भगवतः स्रष्टृत्वादौ वैषम्यादीत्यत आह ॥ भूतानीति ॥ भूतानि प्राणिनः सर्वशः पूर्णेन भगवता तैस्तैर्निजयोनिकर्मभिः स्वजन्मकारणीभूतकर्मभिर्निमित्तीकृतैः काले कालविशेषे भवन्ति जायन्ते । एवं मृतिकारणीभूतकर्मभिः कालविशेषे न भवन्ति म्रियन्ते । तत्र जननादौ प्रकृतौ तत्कार्ये देहे स्थितोऽपि जीवादन्यतमः सुविरुद्धस्वरूप आत्मा परमात्मा । तस्याः प्रकृतेर्गुणैः सत्त्वादिभिः । सत्त्वं सुखे जयतीत्यादिनोक्तैस्तत्कार्ये न निबद्ध्यत इति योजना । एतदेवाभिप्रेत्य तात्पर्यम् ॥ अन्यतम आत्मा परमात्मा । सुविरुद्धस्वरूपत्वाज्जीवादन्यतमो हरिरिति वामने ॥ ४१ ॥

इदं शरीरं पुरुषस्य मोहजं यथा पृथग् भौतिकमीयते गृहम् ।
तथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥

प्रकाशिका — भगवान्न बध्यते चेत्तर्हि को बध्यत इत्याशङ्कां परिहरन् शरीरं तटस्थतयैव भगवतोधिकरणं अतो नास्य बन्धकमित्युपपादयति । इदमिति । पुरुषस्य जीवस्य मोहोऽहं

ममेत्यभिमानः । अनेन जीवस्यैव बन्धकमिति सूचितम् । यथा भौतिकम् ।। भूतविकृतैर्वृक्षादिर्जातं गृहं पुरुषस्य जीवस्य पृथक् तटस्थमेव सदीयते । अधिकरणतया ज्ञायते । तथा पुरुषस्य षड्गुणपूर्णस्य हरेः पृथगीयते । तटस्थमेव सदधिकरणतया ज्ञायतेऽतो हरौ न स्वगुणसम्बन्धापादकमित्यर्थः । एवं न बध्यत इत्येतदुपपाद्यान्यतम इत्युक्तं जीवादत्यंतवैलक्षण्यं हरेरुपपादयति । उदकैरित्यादिना ।। जनो जीवः उदकैः आप्यैः पार्थिवैस्तैजसैः परमाणुभिस्तदात्मकशरीरसम्बन्धेनेति यावत् । कालेन कालनामकेन हरिणा कर्त्रा जातः सन् विकृतो भवति । सुखदुःखादिनोच्चत्वादिप्रकारं प्राप्नोति । कालेनैव शरीरवियोगे विनश्यति । तथा च हरेः जीवजन्मादिकर्तृत्वात्तदपेक्षयात्यंतवैलक्षण्यमङ्गीकार्यमित्याशयः ।। ४२ ।।

मन्दनन्दिनी — देहे स्थितः परमात्मा न निबद्ध्यत इत्यनेन जीवो बाध्यत इत्यायातम् । तत्कथम् । तस्यापि देहात्पृथक्त्वादित्यतो जीवमिथ्याज्ञानमूलत्वाद्युक्तस्तस्य बन्ध इत्याशयेनाह ।। इदं शरीरमिति ।। यथा भौतिकं पञ्चभूतकार्यं गृहं गृहमानिना पृथगीयते । तथोदकैः पार्थिवतैजसैः । उपलक्षणया पञ्चभूतैरुपादानैः कालेन मुख्यनिमित्तेन भगवता जातमिदं शरीरं पृथगभिमानिनो भिन्नम् । यद्यपि तथाऽपि पुरुषस्य जीवस्य । मोहजं स्वातन्त्र्यादिमिथ्याज्ञाननिमित्तकं यतोऽतो जनो देहस्थो जीवो जातो विकृतो विनश्यति । जननजरादिविकारमरणप्रयुक्तदुःखलक्षणबन्धवान् भवतीति योजना । अत्र शोको न कार्य इत्यर्थे यत्रोद्धव इत्यादिना देहानित्यत्वोक्तेरुपयोगेऽप्यहो वयमित्यादिना भगवन्माहात्म्योक्तेः कोपयोग इत्यतस्तात्पर्यम् ।। भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात्स एव भजनीयो न शोकेन प्रयोजनमिति फलितार्थः ।। ४२ ।।

यथाऽनलो दारुषु भिन्न ईयते
यथाऽनिलो देहगतः पृथक् स्थितः ।
यथा नभः सर्वगतं न सज्जते
तथा गुणैः सर्वगुणाश्रयः परः ।। ४३ ।।

तात्पर्यम् — 'देहदारुगतौ प्राणवह्नी सर्वगतं नभः । देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः । तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैरि'ति च ।। ४३ ।।

प्रकाशिका — ननु शरीरस्य तटस्थतयाधिकरणस्य भगवति स्वगुणानापादकत्वेऽपि जीवस्य स्वान्तर्गतेन भगवता पृथगज्ञायमानत्वेन गुणादेर्गुण्यादिनैवाभेदोऽत एव तद्गुणत्वं च भगवतः प्राप्तमित्याशङ्कायामाह । यथाऽनल इति ।। अप्रतिपत्तिविप्रतिपत्तिनिरासाय श्लोकतात्पर्यं प्रमाणेनैवाह ।

देहदारुगताविति । आदिपदाद्दारुसर्वगतयोर्ग्रहणम् ॥ तद्गुणैर्देहादिगुणैः । अनेन मूलेऽनलानिलरूप-दृष्टान्तद्वये दार्वादिगुणलेपाभावोऽपि ग्राह्यः । नभोदृष्टान्ते सर्वस्माद्भिन्नमित्यपि ग्राह्यमिति सूचयति । ततश्चायं श्लोकार्थः । वह्निः भिन्नः ईयते ज्ञायते ज्ञानिभिस्तद्गुणी नेति चेयते ज्ञायते पृथक् स्थितः पृथक्त्वेन ज्ञातस्तद्गुणीनेति च ज्ञातं सर्वगतं सर्वपदार्थेषु विद्यमानं नभः सर्वस्माद्भिन्नमीयते गुणैः । सर्वपदार्थानां गुणैः न सज्जते न लिप्यते । तथा सर्वे च ते गुणाः अप्रधाना जीवाः स एवाश्रयो यस्य स परः परमात्मा सर्वगुणेभ्यः पृथगीयतेऽत एव भिन्नो न तद्गुणवानिति । तथा च विवेकिनामपृथक्सिद्धिर्नाभेदसाधिका दारुवह्न्यादिषु व्यभिचाराद्विवेकिनां जीवपरयोः पृथक्सत्त्वे नापृथक्सिद्धिरित्याशयः ॥ ४३ ॥

मन्दनन्दिनी — जीवस्य गुणबन्धे निमित्तमुक्त्वा परस्य तदबन्धे निमित्तं दृष्टान्तपूर्वमाह ॥ यथेति ॥ यथा भिन्नोऽनल ईयते सदाह्यत्वात्तद्गुणेन दाह्यत्वादिना न लिप्यते च । अनिलो देहगतः पृथक् स्थितः छेद्यदेहात्पृथगच्छेद्यत्वादिना विलक्षणतया स्थितस्तद्गुणेन छेद्यत्वादिना न सज्जते । यथा नभः सर्वगतं कूटस्थत्वान्न सर्वगुणैः सज्जते । तथा परः परमात्मा सर्वगुणाश्रयः सर्वज्ञः स्वातन्त्र्याद्याश्रयो गुणैर्देहस्य जीवस्य वा गुणैर्न सज्जत इति योजना । एतदेवाभिप्रेत्य तात्पर्यकृत्प्रमाणमाह ॥

देहदारुगतौ प्राणवह्नी सर्वगतं नभः ।
देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः ।
तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैरिति च ॥

जीवगतो जीवेन सह गतः । तद्गत इति वा । तद्गुणी तस्य जीवस्य देहस्य वा गुणलेपवानित्यर्थः ॥ ४३ ॥

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ।
यः श्रोता योऽनुवक्तेह न स दृश्येत कर्हिचित् ॥ ४४ ॥

तात्पर्यम् — इन्द्रियवान् जीवः । भजत्युत्सृजति ह्यन्यः परमात्मा । स एव श्रोताऽनुवक्ता च । 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता स योऽतोऽश्रुत' इत्यादेः ॥ मुख्यप्राणोऽपि स्वतो न श्रोता किमु जीव इति । अयं ननु सुयज्ञ इत्याक्षेपः । यश्च सुयज्ञः सोऽपि स्वतः श्रोतुं वक्तुं न च शक्तः । अतस्तस्यानुशोकेन किमित्यर्थः । 'अन्यो जीवो चितो देहात्तद्वशो देह उच्यते । पश्यामीत्यभिमानोऽस्य चक्षुराद्यभिमानवान् ॥ न तद्वशाश्चक्षुराद्या न दृष्ट्यादौ स ईश्वरः । चक्षुराद्या मनो जीवो दृष्ट्यादिश्चापि यद्वशे ॥ स प्राण इति विज्ञेयो ज्ञाता मन्ता च स प्रभुः । तस्यापि ज्ञातृमन्तृत्वं न स्वतः शक्यते क्वचित् ॥ यस्तस्य ज्ञातृमन्तृत्वदाता स भगवान्हरिः । स्वतो ज्ञाता च

मन्ता च द्रष्टा श्रोता च केशवः ॥ ज्ञानादिदो न तस्यान्यः सर्वस्य ज्ञानदो हरिः । स देहान्भजते विष्णुः स्वेच्छयैवोत्सृजत्यपि ॥ यावद्देहस्थितो विष्णुस्तावज्जीवो विपर्ययः । तावत् क्लेशादयश्चास्य वृक्षा चेन्द्रियवृत्तयः ॥ यदोत्सृजति देहं स हरिः सर्वात्मना विभुः । तदा तदभिमानी तु जीवो मुच्येत संसृतेः ॥ अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ । देहाभिमानीत्वेकोऽत्र न मानी मानदः पर' इति गारुडे । 'इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते । अतन्मानाद्धरिः प्रोक्त स्त्वदेहोऽनिन्द्रियस्तथा । जीवानभिमते देहे न विष्णुर्जीवति स्थितः । अतश्चादेह उद्दिष्टः परमात्मा सनातन' इति प्रकाशसंहितायाम् । स चान्यः श्रोतुर्वक्तुश्चेति चशब्दः ॥

भूतेन्द्रियमनोरूपान् । 'लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेवचे'ति शब्दनिर्णये ॥

आत्मा परमात्मा । कर्मनिबन्धनो जीवः । ततः परमात्मनो विपरीतः ॥ मृषा वृथा । स्वप्नदृष्टवित्तादिवत् । 'लेपाभिमानी जीवस्तु स्वरूपानुभवी न च । मुक्तेः प्राक्तेन मान्युक्तो न मानी विष्णुरुच्यते । सर्वं ममेति पश्यन्नप्यलेपाभिमतिर्यतः । सम्यक्स्वरूपानुभवात्स्वतन्त्रत्वाददोपत' इति ब्रह्मतर्के ॥ ४४ ॥

प्रकाशिका — देह एवात्मेति भ्रान्तान् प्रति शोको न कार्य इत्येतत्प्रकारान्तरेणाप्युपपादयति ॥ सुयज्ञ इत्यादिना ॥ तत्र यस्त्विहेन्द्रियवानिति सार्धश्लोकेऽन्योन्यभिन्नजीवद्वयविषयत्वप्रतीतिवारणाय विषयौ दर्शयति । इन्द्रियवानिति । आत्मशब्दार्थकथनम् । जीव इति । अस्य जीवपरत्वज्ञापकप्रदर्शनायेन्द्रियवानिति तल्लिङ्गमुक्तम् । इन्द्रियाभिमानवानित्यर्थः । परमात्मेति विभुशब्दकथनम् । अस्यासङ्गतिशङ्कापरिहारायापेक्षितं पूरयति । स एवेति । स्वत इति शेषः । तथा च स्वतः श्रोताऽनुवक्ताच क इत्यपेक्षायां तत्स्वरूपमनेनोक्तमित्याशयः । अत्र हिशब्दसूचितां श्रुतिमाह । नान्योऽत इति । असङ्गतिपरिहाराय न श्रोतेति श्लोकतात्पर्यमाह । मुख्यप्राणोऽपीति । इति भाव इति शेषः । सुयज्ञो नन्वित्यस्यापि प्रकृतसङ्गतमर्थं दर्शयति ॥ अयं नन्विति । तथा चाव्ययानामनेकार्थत्वान्नन्वित्यस्य किंशब्दार्थाक्षेपपरत्वमित्याशयः । तेन हे मूढाः यो देहः शेते इदानीं निश्चेष्टः पतितोऽस्त्यचेतन इति यावत् । यमुद्दिश्यानुशोचथ । अयं देहः न तु सुयज्ञः किं सुयज्ञः नैव किंत्वस्मादन्यस्तद्वश एवायं देह इति मूलयोजनां सूचयति । सत्यं सुयज्ञो देहादन्य इति । तथा च स पूर्वं अस्मिन् देहे श्रोतृत्वाद्यभिमानवत्तया दृष्ट इदानीं तथा न दृश्यतेऽतः शोक इति शङ्कापरिहाराय प्राप्तस्य यःश्रोता योऽनुवक्तेहेत्यर्धस्य तात्पर्यमाह ॥ यश्च सुयज्ञ इति । अनेन सुयज्ञ इत्यस्यावृत्तिश्चशब्दस्य चाध्याहार इति सूचयति । एतेन यश्च सुयज्ञः । श्रोताहं श्रोतेत्यभिमानवान् अनुवक्ताहं वक्तेत्यभिमानवान् । उपलक्षणमेतत् । अहं पश्यामीत्याद्यभिमानवान्, इह देहे दृश्यते दृष्टः सोऽपि न

कर्हिचित् कदापि न । स्वतः श्रोताऽनुवक्ता चातोऽविद्यमानकल्पस्य तस्य संबंधिना शोकेन किमिति मूलं योज्यमिति दर्शयति । उक्तव्याख्यानदार्ढ्याय एतत्प्रकरणव्याख्यानरूपां स्मृतिमेवोदाहरति । अन्यो जीव इति । अयं ननु सुयज्ञ इत्याक्षेपलब्धार्थप्रदर्शनं देहादन्यो जीव इति । अन्यत्वोपपादनायात इत्युक्तम् । अनेन शेत इत्यस्य लब्धार्थो दर्शितः । तद्वशस्तत्संबंधेन चेष्टावानित्यनेन शेत इति वर्तमानार्थकलट्योगात्पूर्वं सुयज्ञसंबन्धेन चेष्टावत्त्वमस्तीति ध्वनितं यत्तत्सूचितमिति ज्ञातव्यम् । यः श्रोतेत्यादिकमुपलक्षणपरमित्याशयेन पश्यामीत्यभिमानोऽस्येत्युक्तम् । श्रोतास्मीत्याद्यभिमानोपलक्षणमेतत् । चक्षुराद्यभिमानवानित्यनेनेन्द्रियवानिति वक्ष्यमाणमत्रापि संबध्यते । इन्द्रियपदं च तदभिमानोपलक्षकमिति दर्शयति न तद्वशाश्चक्षुराद्या इत्यनेन । सोऽपि स्वतः श्रोतुं वक्तुं च न समर्थ इति । यत्र तात्पर्यमुक्तं तत्प्रमापितम् ।

असुशब्दवाच्यस्य प्राणस्य मुख्यो महानिति यद्विशेषणद्वयमुक्तं तल्लब्धार्थप्रदर्शनं चक्षुराद्या इति । न श्रोता नानुवक्ताचे(ऽयं)त्यस्य व्याख्यानं तस्यापीति । असङ्गतिशङ्कापरिहाराय यत्पूरितं स एव श्रोता वक्ताचेति तस्य व्याख्यानं यस्तस्येत्यादि केशव इत्यंतम् । तच्च स्वेन तेजसेत्युक्तस्य व्याख्यानं ज्ञानादिद इति । भूतेन्द्रियमनोलिङ्गानीति श्लोकतात्पर्यं स देहानिति । विभुरित्यस्य व्याख्यानं विष्णुरिति । भजतीति क्रियायां स्वातंत्र्योक्त्या लब्धार्थप्रदर्शनं स्वेच्छयैवेति । यावल्लिङ्गान्वित इति श्लोकतात्पर्यमाह । यावद्देहे स्थित इति । विपर्ययः स्वरूपापेक्षया विपरीतो वर्तत इत्यर्थः । वृथा चेन्द्रियवृत्तयः इत्यनेन वितथाभिनिवेशोऽयमिति श्लोकतात्पर्यमुक्तम् । यावत्तावदित्यवधिवाचकशब्दप्रयोगेन लब्धार्थप्रदर्शनं यदोत्सृजतीति ॥ मरणव्यावृत्त्यर्थं सर्वात्मनेत्युक्तम् । एतत्प्रकरणलब्धार्थप्रदर्शनाय यस्त्विहेन्द्रियवानात्मेति वाक्यं, तस्य तात्पर्यमाह । अतिभिन्नेति । नन्विन्द्रियवानिति जीवस्य देहेन्द्रियादिमत्वमुक्तं तद्देहान् भजतीत्यादिना परमात्मनाप्युच्यते । तथात्वे तस्यादेहत्वादि प्रतिपादकश्रुतिविरोध इत्यतोऽत्राभिप्रायं प्रमाणेनैवाह । इन्द्रियेति । आदिपदेन देहग्रहणम् । अनेनेन्द्रियपदं देहोपलक्षकमिति दर्शयति । इन्द्रियवत्वं भगवत्यतिप्रसक्तमतो साधारण्येन व्यपदेशा भवन्तीति न्यायेनेन्द्रियवत्वं जीवस्याभिमानेनैवोपपादनीयमित्याशयः । एतल्लब्धार्थप्रदर्शनं अतन्मानादिति । विष्णोरदेहत्वे निमित्तान्तरं चाह । जीवानभिमत इति । मृतशरीरव्यावृत्यर्थं जीवतीत्युक्तम् । स्वयमेव पाञ्चभौतिकदेहस्थितत्वात्तं देहं न जीवयति । किन्तु जीवाभिमान युक्त एवातोऽप्यदेह उद्दिष्ट इत्यर्थः । स चान्यः प्राणदेहयोरित्यत्र चशब्दसमुच्चयस्यान्यस्य दर्शनात्तद्वैय्यर्थ्यमित्याशङ्कापरिहाराय तत्समुच्चयं दर्शयति । स चान्य इति ॥ इत्यत्रेति शेषः । तेन नकेवलं स जीवः देहप्राणयोरन्यः किन्तु यः स्वतः श्रोता वक्ता भगवांस्तस्मादप्यन्य इति दर्शयितुं चशब्द इत्युक्तं भवति । भूतेन्द्रियमनोलिङ्गानित्यत्र देहानां भूतादिज्ञापकत्वमुच्यत इति प्रतीतिनिरासायात्र विवक्षितं लिङ्गशब्दार्थं दर्शयति ।

भूतेन्द्रियमनोरूपानिति। भूतादिविकारभूतानित्यर्थः। अत्र प्रमाणं पठति। लिङ्गमिति। एवशब्दः प्रायेणेत्यर्थे। यावल्लिङ्गान्वितो ह्यात्मेत्यत्रात्मशब्दस्य जीवपरत्वप्रतीतिवारणाय योग्यमर्थमाह। आत्मा इति ॥ कर्मबन्धशब्दस्यापि योग्यमर्थं दर्शयति। कर्मनिबन्धन इति। ततो विपर्यय इत्यस्यापि प्रकृतसङ्गतमर्थमाह। तत इति। परमात्मनस्तत्प्रेरणयेत्यर्थः। विपर्यय इत्यस्यार्थो विपरीत इति। स्वरूपापेक्षया विरुद्धस्वभाव इत्यर्थः।

यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषेत्येतन्मृषापदेन मिथ्यात्वमुच्यते इति प्रतीतिवारणाय व्याख्याति ॥ मृषा वृथेति। भित्वामृषाश्रुरित्यादौ मृषापदस्य वृथेत्यर्थेपि प्रयोगदर्शनादित्याशयः। स्वप्नपदं मनोरथस्याप्युपलक्षकम्। अतन्मानाद्धरिः प्रोक्त इत्यादिना हरेर्देहाभिमानो नास्तीत्युक्तम्। तदयुक्तम्। अहं ममेत्यभिमानस्य तत्रापि सत्वादित्याशङ्कापरिहारायात्राभिमानं प्रमाणेनैव दर्शयति। लेपाभिमानीति। पापलेपकाभिमानवानित्यर्थः। तुशब्दः प्रकृतत्वानुसन्धानार्थः। एतदुपपादनायोक्तं स्वरूपेति। सम्यक् स्वरूपानुभवी नेत्यर्थः। चशब्दो हेत्वर्थे। अलेपाभिमतिः पापलेपकराभिमतिशून्यः। कुत इत्यत आह। सम्यगिति। सर्वदेति शेषः। ततश्च सुयज्ञो नन्वित्यादि मूलस्यायमर्थः। हे मूढाः यो देहः शेते इदानीं निश्चेष्टः पतितोऽस्ति अचेतन इति यावत्। यमुद्दिश्यानुशोचथ अयं देहः। ननु सुयज्ञः किं सुयज्ञः नैव किं त्वस्मादन्यः। सत्यम्। सुयज्ञो देहादन्य इति स पूर्वस्मिन् देहे श्रोतृत्वाद्यभिमानवत्तया दृष्टः इदानीं तथा न दृश्यतेऽतः शोचाम इत्यत आह। यः श्रोतेति। यश्च सुयज्ञ इह देहे श्रोता श्रोतृत्वाद्यभिमानवान् यश्चानुवक्ता यश्चेन्द्रियाभिमानवान् दृश्येत दृष्टः सः कर्हिचित् कदापि स्वतः श्रोता स्वतोवक्ता च न भवति अतस्तं प्रति शोकेन किमित्यन्वयः ॥ ४४ ॥

मन्दनन्दिनी — इतश्च शोको न कार्य इत्याह ॥ सुयज्ञ इति। हे मूढ। यमनुशोचथात्र यः शेते देहोऽसौ सुयज्ञोऽयं ननु किमित्याक्षेपः। तथा चानुशोच्यः सुयज्ञो देहो नेत्यर्थः। देहस्याश्रोतृत्वेन जडत्वात्। तर्हि श्रोतारमनुशोचाम इत्युक्ते किं मुख्यं श्रोतारमुतामुख्यम्। आद्ये आह ॥ य इति ॥ यो मुख्यतः श्रोताऽनुवक्ता च हरिः स इह लोके कर्हिचिन्न दृश्येत्। अव्यक्तत्वात् ॥ ४४ ॥

न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः।
यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४५ ॥

प्रकाशिका — कुतस्तस्य स्वतः श्रोतृत्वाद्यभाव इत्याशङ्कायां कैमुत्येनैतदुपपादयति। न श्रोतेति महान् जीवानां तदिन्द्रियाणां च नियामकोऽयं श्वासप्रेरकः मुख्योऽसुः प्राणोऽपि न स्वतः श्रोता न स्वतो वक्ता तदा किमु वाच्यं जीवः स्वतो वक्तृत्वादिमान्नेति ॥ ४५ ॥

मन्दनन्दिनी — सुयज्ञो जीवो मुख्यश्रोता किं न स्यादित्यतः कैमुत्येन नेत्याह ॥ न श्रोतेति ॥ अत्र लोके देहे वेतरापेक्षया महान्मुख्योऽसुरपि मुख्यप्राणोऽपि न स्वतः श्रोताऽनुवक्ता चेति यदा तदा देहप्राणयोः सकाशात् । चशब्दात्स्वतः श्रोतुर्वक्तुर्भगवतश्चान्योऽभिमानत इन्द्रियवानात्मा जीवो: यः स तु न स्वतः श्रोताऽनुवक्ता चेति किमु वक्तव्यम् इति योजना । अत एव तात्पर्यं प्रवृत्तम् । इन्द्रियवान् जीव इति ॥ ४५ ॥

भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान् विभुः ।
भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥

प्रकाशिका — कस्तर्हि स्वतः श्रोतृत्वादिमानित्यपेक्षायामाह । भूतेन्द्रियेति । भूतेन्द्रियमनांस्येव लिङ्गानि स्वरूपाण्युपादानानि येषां तानुच्चावचान् सुरनरादिरूपान् देवान् जीवेभ्योन्यः विभुर्विष्णुर्भजति प्रेरणाय स्वेच्छयैव प्रविशति । उत्सृजति । मरणकाले त्यजति । इदं जीववन्नपरापेक्षमित्याह । तच्चेति । चशब्दः प्रकृतत्वानुसन्धानार्थः । अपिरवधारणे । तद्देहभजनादिकं स्वेनैव तेजसा स्वसामर्थ्येन भवति न जीववत्प्रेरणया । अतः स एव स्वतः श्रोताऽनुवक्ता च । एतत्प्रमाणसिद्धमिति दर्शनाय हिशब्दः । ततश्च किमित्यपेक्षायामेतत्प्रकरणसिद्धमर्थं पिण्डीकृत्य दर्शयति । यस्त्विहेन्द्रियेति । इह देहे य इन्द्रियवान् इन्द्रियाद्यभिमानवान् । तुशब्दश्चशब्दार्थः । श्रोतृत्वाद्यभिमानवांश्चात्मा जीवः स प्राणदेहयोः प्राणादेहाच्चान्यः । न केवलमेतावत्किंतु यः स्वतः श्रोतृत्वादिमान् विष्णुस्तस्माच्चान्यः । विष्णुस्तु नेन्द्रियाद्यभिमानवान् किन्तु तद्दाता । अतो देह एवात्मेति भ्रांत्या शोको नोचित इत्याशयः ॥ ४६ ॥

मन्दनन्दिनी — यः श्रोताऽनुवक्तेत्यत्र मुख्यतः श्रोता यः स न दृश्यते इत्युक्तम् । स क इत्याशङ्कायामाह ॥ भूतेति ॥ यो जीवादन्यः परमात्मा विभुः समर्थः । जीवस्य संसारमोक्षार्थं भूतेन्द्रियमनोलिङ्गान् भूतेन्द्रियमनांसि लिङ्गं स्वरूपं येषां तान् । उच्चावचान्सुरनरतिर्यगादीन्देहान् जीवनियामकतया स्थातुं स्वयमपि भजते । लोकान्तरं च जीवं गमयितुमुत्सृजति । स एव स्वतः श्रोताऽनुवक्ता चेत्यध्याहृत्य योजना । जीवस्य देहभजनोत्सर्जनादिकं स्वान्याधीनमिव स्वस्याऽपि देहभजनादिकं किमन्याधीनमित्याशङ्कापरिहाराय तदपि स्वेन तेजसा च स्वसामर्थ्येनैवेति चतुर्थः पादो योजनीयः । एतावदभिप्रेत्यैव तात्पर्यं प्रवृत्तम् । भजत्युत्सृजति ह्यन्यः परमात्मा । स एव श्रोताऽनुवक्ता च । नान्योऽतोऽस्ति श्रोता स योऽतोऽश्रुत इत्यादेरिति । सिंहावलोकनन्यायेन पूर्वश्लोकतात्पर्यमाहाचार्यः ॥ मुख्यप्राणोऽपि स्वतो न श्रोता किमु जीव इतीति । एतदनुसारेणैव पूर्वं मूलं योजितं च । तत्पूर्वश्लोकस्यापि तेनैव न्यायेन तात्पर्यमाह ॥ अयं ननु सुयज्ञ इत्याक्षेप इति ॥ आक्षेपप्रकारश्च पूर्वमुक्तः । अमुख्यं श्रोतारं सुयज्ञमनुशोचाम इति तृतीयपक्षस्य सुयज्ञस्यास्वातन्त्र्यात् । तच्छोकेनापि

किं फलमित्यध्याहृत्य मूले उत्तरं द्रष्टव्यम् । एतदेवाभिप्रेत्य तात्पर्यं प्रवृत्तम् । यस्तु सुयज्ञः सोऽपि स्वतो वक्तुं श्रोतुं न शक्तः । अतस्तस्यानुशोकेन किमित्यर्थः इति । पूर्वश्लोकोक्तस्योत्तरश्लोके वक्ष्यमाणस्य तत्प्रसक्तस्य प्रमेयान्तरस्य निर्णायकं प्रमाणं मध्ये पठति तात्पर्यकृत् ।। अन्यो जीवो चितो देहात्तद्वशो देह उच्यते । पश्यामीत्यभिमानोऽस्य चक्षुराद्यभिमानवान् । न तद्वशाश्चक्षुराद्या न दृष्ट्यादौ स ईश्वरः । चक्षुराद्या मनोजीवो दृष्ट्यादिश्चापि यद्वशे । स प्राण इति विज्ञेयो ज्ञाता मन्ता च स प्रभुः । तस्यापि ज्ञातृमन्तृत्वं न स्वतः शक्यते क्वचित् । यस्तस्य ज्ञातृमन्तृत्वदाता स भगवान् हरिः । स्वतो ज्ञाता च मन्ता च द्रष्टा श्रोता च केशवः । ज्ञानादिदो न तस्यान्यः सर्वस्य ज्ञानदो हरिः । स देहान्भजते विष्णुः स्वेच्छयैवोत्सृजत्यपि । यावद्देहस्थितो विष्णुस्तावज्जीवो विपर्ययः । तावत्क्लेशादयश्चास्य वृथा चेन्द्रियवृत्तयः । यदोत्सृजति देहं स हरिः सर्वात्मना विभुः । तदा तदभिमानी तु जीवो मुच्येत संसृतेः । अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ । देहाभिमानी त्वेकोऽत्र न मानी मानदः पर इति गारुडे ।। अनेन पतितो देहः सुयज्ञो नन्वित्याक्षेपो विवृतः । चक्षुषा पश्यामीत्यभिमानोऽत एव चक्षुराद्यभिमानवान् चक्षुराद्या न तद्वशा दर्शनेच्छायामपि कदाचिदपाटवादौ ज्ञानाजनकत्वात् । कारणस्यानधीनत्वादेव तद्वृत्तौ वृष्ट्यादावपि स ईश्वरः समर्थो न भवति । अनेनाभिमानत एवेन्द्रियवानित्येतत्समर्थितं भवति । बाह्यकरणान्तःकरणतद्व्यापारवान् जीवो यस्य वशे स प्राण इति विज्ञेयः । तस्यापि प्राणस्यापि ज्ञातृमन्तृत्वं न स्वतः । अनेन न श्रोता नानुवक्ताऽयं मुख्योऽपीत्येतद्विवृतम् । यस्तस्येत्यादिना सर्वस्य ज्ञानदो हरिरित्यन्तेन यः श्रोता योऽनुवक्तेहेत्ये-तद्विवृतम् । उत्सृजत्यपीत्यन्तेन भजत्युत्सृजति ह्यन्य इत्येतद्विवृतम् । यावद्देहान्वित इत्यारभ्य यावल्लिङ्गान्वितो ह्यात्मेति वक्ष्यमाणश्लोकस्य तात्पर्यकथनं देहान्वितो लिङ्गदेहादिजडदेहान्वि-तस्तावत्पर्यन्तं विपर्ययः । विपर्येतीति विपर्ययः । विपरीतमतिमान् । इन्द्रियवृत्तयश्च संसारहेतवः । यदा सर्वात्मनोत्सृजति न कमपि जडदेहमवशेषयति तदा संसृतेर्मुच्यते । अतिभिन्नस्वरूपावति-विलक्षणस्वरूपौ । मानदोऽभिमानप्रदः । पूर्वमिन्द्रियवानित्यनेन जीव उक्तः । क्वचिद्देहोऽनिन्द्रिय इति भगवानुच्यते । तत्कथं स्वस्वामिभावसम्बन्धस्य भगवत्येव मुख्यत्वादित्यतोऽत्र विधिनिषेधयोर्विवक्षितं निमित्तांतरमुदाहरति तात्पर्यकृत् ।।

इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते ।
अतन्मानाद्धरिः प्रोक्तस्त्वदेहोऽनिन्द्रियस्तथा ।
जीवानभिमते देहे न विष्णुर्जीवति स्थितः ।
अतश्चादेह उद्दिष्टः परमात्मा सनातनः । इति प्रकाशसंहितायाम् ।।

अनेन देहादिमत्वोक्तावभिमानोनिमित्तम् । अदेह इत्याद्युक्तौ तु अभिमानाभावः । अदेहत्वोक्तौ निमित्तान्तरं चाह ।। जीवानभिमत इति ।। जीवतीति सप्तम्यन्तम् । श्वासोच्छ्वासादिमतीत्यर्थः । यदि रामकृष्णादिविग्रहः प्राकृतः स्यात्तदाऽयं नियमो न स्यात् । देवदत्तादिस्तु स्वेतरजीवानभिमते जीवति देहे तिष्ठतीति न तस्यादेहत्वम् । तथा च स्वेतरजीवानभिमतश्वासोछ्वासादिमच्छरीरकत्वं देहवत्वोक्तौ निमित्तम् । तदभावोऽदेहवत्वोक्तौ निमित्तमिति भावः । सिंहावलोकनन्यायेन स चान्यः प्राणदेहयोरित्यत्र चशब्दसमुच्चयमाह तात्पर्यकृत् । स चान्यः श्रोतुर्वक्तुश्चेति चशब्द इति स चान्य इत्यत्र चशब्दः श्रोतुर्वक्तुश्चेति समुच्चयार्थ इत्यर्थः । पुनः सिंहावलोकनन्यायेन भूतेन्द्रियमनोलिङ्गानित्यनूद्य लिङ्गशब्दस्य स्वरूपार्थे प्रमाणमाह तात्पर्यकृत् ।। भूतेन्द्रियमनोरूपान् । लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव चेति शब्दनिर्णये ।। ४६ ।।

यावल्लिङ्गान्वितो ह्यात्मा तावत् कर्मनिबन्धनः ।
ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ।। ४७ ।।

प्रकाशिका –– कियन्तं कालं एवं भगवदधीनो जीवः संसरतीत्यपेक्षायामाह । यावल्लिङ्गेति । यावंतं कालमात्मा परमात्मा लिङ्गान्वितः देहान् भजति तावत्पर्यंतमेव । नितरां कर्मभिर्बंधनं यस्य स जीवस्ततः परमात्मनः तत्प्रेरणयेति यावत् । विपर्ययः विपरीतः । स्वस्वरूपापेक्षया विरुद्धस्वभावो भवति । तमेव दर्शयति । क्लेश इति । अस्येति शेषः । मायायोगः । न वा देहसम्बन्धः । यदाऽयं परमात्मा सर्वथा देहान्न भजति तदा जीवः संसृतेर्मुच्यत इत्यपि ग्राह्यम् ।। ४७ ।।

मन्दनन्दिनी –– एवं जीवस्य पुनः पुनः देहप्राप्तौ कदा मोक्ष इत्यतो मूलं प्रवृत्तम् ।। यावल्लिङ्गेति ।। अत्र तात्पर्यम् । आत्मा परमात्मा । कर्मबन्धनो जीवः । ततः परमात्मनो विपरीत इति । तथा च यावल्लिङ्गान्वितो लिङ्गशरीरादिजडदेहान्वित आत्मा परमात्मा कर्मबन्धनं संसृतौ यस्य तादृशो जीवस्ततः परमात्मन एव विपर्ययो विपरीतमतिमान्वर्तते । क्लेशः संसारक्लेशो मायायोगोऽविद्यायोगस्तन्निमित्ताभिमानोऽपि तावदनुवर्तत इति योजना । यदोत्सृजति देहं सः हरिः सर्वात्मना विभुः । तदा तदभिमानी तु जीवो मुच्येत संसृतेरित्यपि योजनीयम् । गारुडे एवमेवोक्तेः । तथा च कदा मोक्ष इति शङ्का परास्ता ।। ४७ ।।

वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ।। ४८ ।।

प्रकाशिका –– ननु पराधीनेनापि सुयज्ञेनास्माकं शब्दादिविषयप्राप्तिरूपं प्रयोजनमभूत्तदिदानीं गतमतः शोचाम इत्याशङ्कायामाह ।। वितथेति ।। गुणेषु शब्दादिषु अर्थदृक् पुरुषार्थत्वेन ज्ञानं वचश्चेति

यत् सोऽयमभिनिवेशः आग्रहो वितथा व्यर्थः। एतदेव दृष्टान्ततमुखेनोपपादयति ॥ यथेति ॥ मनोरथः। मनोरथकल्पितस्वप्नस्तत्र दृष्टं वित्तादिकं यथा मृषा वृथा तथैन्द्रियकमिन्द्रियविषयभूतं शब्दादिकं मृषा वृथा। तेभ्यो मौक्तिकसुखालाभादित्याशयः ॥ ४८ ॥

मन्दनन्दिनी — एवं तर्हि संसारेषु पुरुषार्थो नास्तीत्यायातम्। कथं तर्हि स्वर्गलोके न भयं किञ्चनास्तीत्यादिवचनबलात्स्वर्गादौ पुरुषार्थत्वज्ञानं जीवस्येत्यत आह ॥ वितथेति ॥ गुणेषु गुणकार्येषु स्वर्गादिष्वर्थदृक् पुरुषार्थ इति ज्ञानमयं वितथाभिनिवेशोऽयथार्थाभिमानः। वस्तुतः स्वर्गादेः परमपुरुषार्थत्वाभावात्। वचोऽपि वितथा न प्रतीतार्थम्। तत्रत्यस्वर्गपदस्य मोक्षपरत्वात्। अत्र दृष्टान्तमाह ॥ यथेति ॥ सप्तसु प्रथमेत्युक्तेः। मनोरथे स्वप्ने वैन्द्रियकमिन्द्रियेण प्रतीयमानवित्तादिकं मृषा वृथा। इदं वित्तादिकं मम पुत्राद्युपयोगी भवतीत्यभिनिवेशो यथा तथेति योजना। स्वप्नमनोरथपदार्थानां वासनाद्युपादानकत्वेन सत्यत्वस्य तद्विषयकबाह्यार्थक्रियाकारित्वज्ञानभ्रान्तित्वस्य स्वप्नाधिकरणे निर्णीतत्वात्। अत एव तात्पर्यम् ॥ मृषा वृथा ॥ स्वप्नदृष्टवित्तादिवदिति मायायोगपदेनाभिमानः संसारकारणमित्युक्तं ईश्वरस्याभिमानस्य सत्त्वेन संसारापत्तेरित्यतोऽभिमानं विवेचयति प्रमाणेन तात्पर्यकृत्-लेपाभिमानी जीवस्तु स्वरूपानुभवी न च। मुक्तेः प्राक्तेन मान्युक्तो न मानी विष्णुरुच्यते। सर्वं ममेति पश्यन्नप्यलेपाभिमतिर्यतः। सम्यक्स्वरूपानुभवात्स्वतन्त्रत्वाददोषत इति ब्रह्मतर्के ॥ अत्र स्वकीयत्वबुद्धिमात्रं नाभिमानः किं त्वस्वकीये स्वकीयत्वबुद्धिः। किंचिद्दत्तस्वत्वकेऽपि वस्तुन्यदत्तस्वत्वबुद्धिश्चात एव लेपस्य पुण्यपापलेपस्य कारणम्। एवं लिप्यत इति लेपः। सम्बद्धं वस्तु तथा चासाधारण्येन व्यपदेश इति। स्वरूपसुखादौ मदीयत्वबुद्धिर्नास्ति किन्तु बाह्यमात्राभिमानवान्। उक्तद्विविधलेपाभिमानस्य मुक्तेः प्राक् सत्वाद्। तदैव जीवो मान्युक्तः। विष्णुस्तु तदभावान्न मानीत्युच्यते। लेपाभिमतेरेव मानीत्युक्तौ निमित्तत्वात्सर्वं पश्यन्नपि विष्णुरमानीत्युच्यते। लेपाभिमत्यभावमुपपादयति ॥ सम्यगित्यादिना ॥ आद्येन बाह्यमात्राभिमानाभावः। द्वितीयेनास्वकीये स्वकीयत्वबुद्धेरभावः। तृतीयेन पुण्यपापलेपकारणत्वाभाव उपपादित इति ध्येयम् ॥ ४८ ॥

अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः।
नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ४९ ॥

प्रकाशिका — उपसंहरति ॥ अथेति ॥ अथ तस्मात्। वाशब्द उपमार्थः। नित्यमिवानित्यं देहादिकमुद्दिश्य। तद्विदः उक्तरीत्या जीवादेः सर्वस्य हर्यधीनत्वादिविदः। ननु तर्हि लोकाः बन्धूनां मरणे सति किमर्थं शोचन्तीत्यपेक्षायां मूर्खा इत्याशयेनाह ॥ नान्यथेति ॥ इत्यनेन प्रकारेण शोचताम् ॥ ४९ ॥

मन्दनन्दिनी — शोको न कार्य इत्येतदुपसंहरति ।। अथेति ।। स्वभावो नित्यानित्यस्वभावः शोचतां शोचद्भिरन्यथा कर्तुं न शक्यत इति ज्ञात्वाऽथ तस्मादन्यथा कर्तुमशक्यत्वात् । तद्विदो नित्यानित्यविदो नित्यमनित्यं वोद्दिश्य नानुशोचन्तीति योजना ।। ४९ ।।

लुब्धको विपिने कश्चित् पक्षिणां निर्मितोऽन्तकः ।
वितत्य जालं विदधे तत्र तत्र प्रलोभनम् ।। ५० ।।

प्रकाशिका — स्वयं सधर्मा इति यदुक्तं तत्रेतिहासमाह ।। लुब्धक इत्यादिना ।। पक्षिणामन्तक ईश्वरेण निर्मितः । यत्र यत्र पक्षिणस्तत्र तत्र जालं वितत्य विस्तार्य तेषामामिषादिभिः प्रलोभनं विदधे कृतवान् ।। ५० ।।

मन्दनन्दिनी — एवं बालरूपो यमः स्वयमेवमुक्त्वा वैराग्यं जनयितुं काञ्चन कथामाह ।। लुब्धक इत्यादिभिः कतिपयैः श्लोकैः ।। योजना तु स्फुटा । लुब्धको मृगयुर्निर्मितः । विधिनेति शेषः । वितत्य विस्तृत्य प्रलोभनं वञ्चनम् ।। ५० ।।

कुलिङ्गमिथुनं तत्र विचरन् समदृश्यत ।
तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ।। ५१ ।।

मन्दनन्दिनी — कुलिङ्गमिथुनम् । दार्वाघाटो दारुकुट्टः कुलिङ्गो दीर्घतुण्डक इत्यभिधानम् । मिथुनं स्त्रीपुंसद्वन्द्वम् ।। ५१ ।।

साऽसज्जत सिचा तन्त्या महिषी कालयन्त्रिता ।
कुलिङ्गस्तां तथाऽपन्नां निरीक्ष्य भृशदुःखितः ।। ५२ ।।

प्रकाशिका — सिचा तंत्या जालरूपसूत्रेणासज्जत बन्धं प्राप । आपन्नां आपदं प्राप्ताम् ।। ५२ ।।

मन्दनन्दिनी — सिचा जालेन सह यन्त्रितया तन्त्या सूत्रेण । महिषी कुलिङ्गभार्या । कालयन्त्रिता मृत्युवशमापन्ना ।। ५२ ।।

स्नेहादकल्पः कृपणां पर्यदेवयदातुरः ।
अहो अकरुणो देवः स्त्रिया कृपणया विभुः ।। ५३ ।।

प्रकाशिका — अकल्पः असमर्थः । मोचयितुमिति शेषः । पर्यदेवयद्विलपितवान् ।। ५३ ।।

मन्दनन्दिनी — अकल्पो मोचयितुमसमर्थः । पर्यदेवयद्विलपितवान् । विलपनप्रकारमाह ॥ अहो इति ॥ देवो विधिर्यमो वा अकरुणो दयारहितः स्वप्रयोजनाभावेऽपि हंतृत्वात् । एवंविधया स्त्रिया हृतया किं करिष्यतीत्यकारुण्योपपादनम् ॥ ५३ ॥

कृपणं माऽनुशोचन्त्या दीनया किं करिष्यति ।
कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे ॥ ५४ ॥

प्रकाशिका — आत्मनो देहस्यार्धेन भार्याख्येन ॥ ५४ ॥

मन्दनन्दिनी — दुःखेन स्वात्मनो वधमाशास्ते ॥ काममिति ॥ अर्धेनात्मना देहेन ॥ ५४ ॥

दीनेन जीवता दुःखं मन्देन विधुरायुषा ।
कथं त्वजातपक्षांस्तान् मातृहीनान् बिभर्म्यहम् ।
मन्दभाग्या प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥ ५५ ॥

प्रकाशिका — विधुरायुषा विरहितायुष्येन । दुःखं यथा स्यात्तथा जीवतो देहेन मे किं प्रयोजनमतोऽपि मां नयत्वित्यन्वयः । मे प्रजा पुत्राः ॥ ५५ ॥

मन्दनन्दिनी — विधुरायुषा स्त्रीरहितायुष्मताऽर्धेन देहेन दुःखं जीवता । अनेनार्धस्य वैयर्थ्यमुपपादितम् । जीवनेऽनुपपत्तिमाह ॥ कथमिति ॥ मे प्रजाः ॥ ५५ ॥

एवं कुलिङ्गं विरुवन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ।
तदैव तं शाकुनिकः शरेण विव्याध कालप्रहितो निलीनः ॥ ५६ ॥

प्रकाशिका — शाकुनिकः पक्षिमारकः कालेनान्तकालेन प्रहितः प्रेरितः निलीनः छन्नःसन् ॥ ५६ ॥

मन्दनन्दिनी — शाकुनिकः पक्षिमारकः कालेनान्तकेन प्रहितः प्रेरितः । निलीनः छन्नः ॥ ५६ ॥

एवं यूयमपश्यन्त्य आत्मापायमबुद्धयः ।
नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥ ५७ ॥

प्रकाशिका — आत्मापायं स्वमृत्युम् ॥ ५७ ॥

मन्दनन्दिनी — एवं कुलिङ्गवत् । आत्मापायं स्वविनाशम् ॥ ५७ ॥

हिरण्यकशिपुरुवाच–

बाल एवं प्रवदति सर्वे विस्मितचेतसः ।
ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८ ॥

तात्पर्यम् —— 'अहं ममाभिमानादि त्वयथोत्थमनित्यकम् । महदादि यथोत्थं च नित्या चापि यथोत्थिता । अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च । यथार्थभूतश्च पर एक एव जनार्दन' इति **च ॥ ५८ ॥**

प्रकाशिका —— सर्वमनित्यमयथोत्थितमित्येतत्सर्वं ईश्वरादिकं जगदनित्यमयथोत्थितं मिथ्यैव प्रतीयमानमिति प्रततिवारणाय प्रमाणेनैव व्याख्याति ॥ अहं ममाभिमानादीति ॥ अहं ममेत्यभिमानो यत्रेति विग्रहेणाहं ममाभिमानविषयीभूतं स्वातंत्र्यमित्यर्थः । तुशब्दोऽवधारणे । तदेव अयथोत्थं मिथ्यैव प्रतीयमानं न सर्वमित्यर्थः । तुशब्दः महदादीत्यत्रापि योज्यः । तथा च महदाद्येव नित्यकं न सर्वमित्यर्थः । ननु कुत एवमुभयत्र सङ्कोच इत्यत आह ॥ यथोत्थमित्यादि ॥ महदादियत्थोत्थं प्रकृतिश्चेतनाऽचेतनाच यथोत्थितं यथार्थभूता । जनार्दनश्चायथार्थभूतोऽतो यथोत्थत्वस्यापि महदादिमात्रान्विततया सङ्कोचः कृतः इत्यर्थः । ननु प्रकृतिजनार्दनयोर्नित्यत्वे यथार्थत्वे च साम्यं प्राप्तमित्यत उक्तं प्रकृतिरस्वतंन्त्रैव जनार्दनः स्वतंत्र एवेति ॥ ५८ ॥

मन्दनन्दिनी —— विस्मितचेतसो वृद्धानामस्माकमविद्यमानमेतादृशं ज्ञानं बालस्यास्तीत्याश्चर्य-युक्तचेतसो ज्ञातयो बान्धवाः सर्वदेहगेहाद्यनित्यं तत्र प्रतीयमानस्वत्वं स्वकीयत्वादिकमयथोत्थितमसत्यं मेनिर इति योजना । एतद्व्याख्यातुं तात्पर्यं प्रवृत्तम् ॥

अहं ममाभिमानादि त्वयथोत्थमनित्यकम् ।
महदादि यथोत्थं च नित्या चापि यथोत्थिता ।
अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च ।
यथार्थभूतश्च पर एक एव जनार्दन ॥ इति ब्रह्मतर्के ॥

अहं ममाभिमानादिशब्देन तद्विषयीभूतगेहादि लक्ष्यते । तत्रापि प्रकारीभूतास्वत्वस्वकीयत्वादि । अयथोत्थमसत्यम् । विशेषभूतं देहगेहादि तु अनित्यम् । अविद्यायास्तन्मूलजगतश्च सत्यत्वात् । कथमयं विवेक इत्यतः सर्वं सत्यमित्याह । महदादि यथोत्थं सत्यमनित्यं च प्रकृतिश्चिदचित्प्रकृतिर्नित्या यथोत्थिता च । अपि तथाऽप्यस्वतन्त्रैव परः परमात्मा जनार्दन एक एव स्वतन्त्रः । तथा स्वयं च यथार्थभूतः । सत्यनित्य एव । नाचित्प्रकृतिवन्नित्यानित्य इत्यर्थः ॥ ५८ ॥

यम एतदुपाख्याय तत्रैवान्तरधीयत ।
ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत् सांपरायिकम् ।
ततः शोचत मा यूयं परं चात्मानमेव च ॥ ५९ ॥

प्रकाशिका — मूले सांपरायिकं पारलौकिकं कृत्यम् ॥ ५९ ॥

मन्दनन्दिनी — अन्तरधीयतादृश्योऽभूत् । साम्परायिकमौर्ध्वदेहिकम् । ततः स्वत्वादेरसत्यत्वात् देहादेरनित्यत्वात् । यूयं परं च परदेहमात्मानं स्वदेहं चोद्दिश्य मैव शोचत । मा शब्दोऽयं न माङ् ॥ ॥ ५९ ॥

क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव च ।
स्वपराभिनिवेशेन विनाऽज्ञानेन देहिनः ॥ ६० ॥

तात्पर्यम् — 'क आत्मा कः पर' इति देहाद्यपेक्षया । 'न हि देहादिरात्मा स्यान्न च शत्रुरुदीरितः । अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् । यस्तु देहगतो जीवः स हि नाशं न गच्छति । ततः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः । देहादिव्यतिरिक्तौ तु जीवेशौ प्रतिजानताम् । अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा । शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथञ्चने' ति ब्रह्मवैवर्ते ॥ ६० ॥ इति सप्तमतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

प्रकाशिका — शत्रुपक्षपातिना हरिणा स्वकीयो हिरण्याक्षो हत इति शोचतो मात्रादीनुद्दिश्याह । क आत्मेति । अत्र भेदनिराकरणप्रतीतिवारणाय तात्पर्यमाह ॥ क आत्मेति ॥ आदिपदेनेन्द्रियादि-सङ्ग्रहः । तथा च चेतनं देहेन्द्रियादिकं लक्षीकृत्यैव क आत्मा कः परः इत्याक्षिप्य तेन तद्गतौ चेतनौ येन भेदनिराकरणप्राप्तिरित्यर्थः । अत्र प्रमाणं पठति । न हीति । आत्मा स्वरूपम् । अचेतनत्वादित्याशयः । स्वदैहिकवृद्धौ शत्रुदेहक्षये । नाशं न गच्छतीत्युपलक्षणम् । स्वदेहगतो वृद्धिं च न गच्छतीत्यपि ग्राह्यम् । नन्वेवं स्वात्मवृद्धिः शत्रुनाशश्च कर्तव्यतया कथं शास्त्रेण कथ्यत इत्यतस्तस्य तात्पर्यमाह ॥ अत इति ॥ अवधारणार्थकतुशब्दस्य रतिरेवेत्यन्वयः । ततश्चायं श्लोकार्थः । स्वस्य दृश्यमानो देहादिः क आत्मा न कोऽपि । परस्य दृश्यमानो देहादि कः परः शत्रुः न कोऽपि । एवं स्वीय इत्यादिकमपि स्वपरसम्बन्धिदेहादिकं लक्षीकृत्यैव व्याख्येयम् । अयमभिप्रायः । स्वपोषणे शत्रुना शोचयता मानाः प्रष्टव्याः । किं शत्रुदेहावुद्दिश्यायं यत्नः उत तद्गतौ जीवावुद्दिश्य । नाद्यः । तयोरचेतनत्वेन स्वशत्रुत्वयोरभावात् । न द्वितीयः । जीवानां नित्यत्वेन पोषणनाशयोरसम्भवात् । अतः शत्रुविवृद्धौ स्वस्य स्वीयस्य वा नाशे शोको व्यर्थ इति । नन्वेवमयं स्वीयोऽतः पोषणीयोऽयं शत्रुरतोऽविनाश्य इति

लोके कथं व्यवहार इत्यत आह ।। स्वपरेति ।। स्वः पर इत्यभिनिवेशः आग्रहो येनाज्ञानेन विना क आत्मेत्याद्यन्वयः । ततश्चाज्ञानमूलकोऽयं व्यवहार इत्याशयः ।। ६० ।।

मन्दनन्दिनी — स्वपराभिनिवेशेन स्वदेहपरदेहादावात्मत्वपरात्मत्वभ्रान्तेः स्वपरगेहादौ स्वकीयत्वपरकीयत्वभ्रांतेश्च जनकेनाज्ञानेन विना देहिनां भिन्नदेहवतां को देहः । आत्मा स्वस्वरूपभूतः को वा देहः । परः परात्मभूत इत्याक्षेपः । न कोऽपि न देह आत्माभिन्नः । एवं को गेहदेहादिः स्वीयः को वा पारक्यः परकीयः न कोऽपीति योजना । एतदेवाभिप्रेत्य तात्पर्यं प्रवृत्तम् ।।

क आत्मा कः पर इति देहाद्यपेक्षया ।
न हि देहादिरात्मा स्यान्न च शत्रुरुदीरितः ।
अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् ।
यस्तु देहगतो जीवः स हि नाशं न गच्छति ।
ततः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः ।
देहादिव्यतिरिक्तौ तु जीवेशौ प्रतिजानताम् ।
अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा ।
शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथंचनेति ब्रह्मवैवर्ते ।।

देहादिरित्यादिपदेनेन्द्रियादिकम् । अतः स्वपरस्वरूपत्वाभावात् । क्षये वेत्यत्र बुद्ध्या विवेकेन दैहिकस्येत्यनुवर्तते । शत्रुदैहिकस्येत्यर्थः । तत उक्तहेतोरेव शोचनं कुतः । देहयोरात्मत्वाभावात् । अविवेकिनामकार्यमुक्त्वा विवेकिनां सम्पाद्यवृद्धिशत्रुनाशावाह ।। देहादिव्यतिरिक्ताविति ।। अतोऽन्यस्य वृद्धित्वाद्यभावात् । अज्ञाननाशोऽज्ञानतत्कार्यभ्रान्त्यादिनाशः ।। ६० ।।

नारद उवाच–

इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ।
पुत्रशोकं क्षणात् त्यक्त्वा तत्वे चित्तमधारयत् ।। ६१ ।।

इति श्रीमद्भागवते सप्तमस्कन्धे द्वितीयोऽध्यायः ।

प्रकाशिका — तत्त्वे परब्रह्मणि ।। ६१ ।।

इति श्रीमद्भागवते सप्तमस्कन्धतात्पर्यटिप्पण्यां यदुपतिविरचितायां प्रकाशिकायां द्वितीयोऽध्यायः ।।

मन्दनन्दिनी - दैत्यपतेर्वाक्येन दितेः शोकनिवृत्तिर्जातेत्याह ।। इति दैत्यपतेरिति ।। तत्त्वे परतत्त्वे ।

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां द्वितीयोऽध्यायः ।। ७-२ ।।

॥ अथ तृतीयोऽध्यायः ॥

नारद उवाच–

हिरण्यकशिपू राजन्नजेयमजरामरम् ।
आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत ॥ १ ॥

प्रकाशिका —— साधूनां कदने दानवानादिश्य, बन्धूनां शोकं तत्त्वनिरूपणेनापनीय हिरण्यकशिपुर्यत्कृतवांस्तदाह ॥ हिरण्यकशिपुरित्यादिना ॥ अप्रतिद्वन्द्वं प्रतिपक्षहीनम् । एकराजमेकमेव राजानम् । व्यधित्सत कर्तुमैच्छत् ॥ १ ॥

मन्दनन्दिनी —— साधनातिशयेनाप्ययोग्यं पदं न प्राप्यत इति हिरण्यकशिपुतपःकथनव्याजेन निरूप्यतेऽस्मिन्नध्याये । प्रायेण श्लोकाः स्फुटयोजनाः । हिरण्यकशिपुरात्मानमुक्तविशेषणविशिष्टम् । एकराजनं त्रिलोक्या अपि मुख्यं राजानं व्यधित्सद्विधातुमैच्छत् ॥ १ ॥

स तेपे मन्दरद्रोण्यां तपः परमदारुणम् ।
ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः ॥ २ ॥

प्रकाशिका —— नभसि दृष्टिर्यस्य । पादाङ्गुष्ठेनाश्रितावनिर्येन ॥ २ ॥

मन्दनन्दिनी —— तेपे तपः कृतवान् ॥ २ ॥

जटादीधितिभी रेजे संवर्तार्क इवांशुभिः ।
तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥

प्रकाशिका —— संवर्तार्कः प्रलयकालीनसूर्यः । पूर्वं येऽलक्षिताः सन्तो विचेरुस्ते देवा पुनः स्वानि स्थानानि भेजिरे ॥ ३ ॥

मन्दनन्दिनी —— संवर्तार्क इव प्रलयसूर्य इव । स्थानान्यगम्यस्थानानि ॥ ३ ॥

तस्य मूर्ध्नः समुद्भूतः सधूम्रोऽग्निस्तपोमयः ।
तिर्यगूर्ध्वमधोलोकानतपद् विष्वगीरितः ॥ ४ ॥

प्रकाशिका —— विष्वगीरितः सर्वतः प्रसृतः सन् ॥ ४ ॥

मन्दनन्दिनी —— विष्वगीरितः परितः सञ्चरन् ॥ ४ ॥

चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः ।
निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥

मन्दनन्दिनी — चुक्षुभुः क्षुब्धाः ॥ ५ ॥

तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ।
धात्रे विज्ञापयामासुर्देवदेव जगत्पते ॥ ६ ॥

मन्दनन्दिनी — तप्तास्तापिताः ॥ ६ ॥

दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ।
तस्य चोपशमं ब्रह्मन् विधेहि यदि मन्यसे ॥ ७ ॥

प्रकाशिका — उपशमं परिहारम् ॥ ७ ॥

मन्दनन्दिनी — न शक्नुमो न समर्थाः । उपशमं परिहारम् ॥ ७ ॥

लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तव प्रभो ।
तस्यायं किल सङ्कल्पश्चरतो दुश्चरं तपः ॥ ८ ॥

प्रकाशिका — बलिहाराः पूजाकारिणः ॥ ८ ॥

मन्दनन्दिनी — बलिहारा बलिप्रदाः ॥ ८ ॥

श्रूयतां किं न विदितं तवापि विनिवेद्यते ।
सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ॥
अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥

प्रकाशिका — ब्रह्मणस्तस्मिन् द्वेषमुत्पादयितुं तत्सङ्कल्पमाहुः । तस्येति चतुर्भिः । ब्रह्मा तप आदिना चराचरं सृष्ट्वा सर्वधिष्ण्येभ्यः परं यन्निजासनं अध्यास्ते । अहं तत्तथैवात्मनः साधयिष्य इत्यन्वयः ॥ ९ ॥

मन्दनन्दिनी — सङ्कल्पोऽभिप्रायः । निजासनमध्यास्ते सत्यलोकमधितिष्ठति । अधिशीङ्स्था-सामित्यधिकरणस्य कर्मत्वम् ॥ ९ ॥

तदहं वर्धमानेन तपोयज्ञसमाधिना ।
कालात्मनोश्च नित्यत्वात् साधयिष्ये तथाऽऽत्मनः ।। १० ।।

तात्पर्यम् — 'जानतामपि कर्तव्यं कर्मात्मसदृशं सदा । तत्रात्मसदृशाज्ञानाद्रागाद्यैर्वा विमोहिताः । जानन्तोऽपि ह्यसदृशं कर्म कुर्युर्ऋते विभुम् । चतुरास्यं स नायोग्यं कर्म कुर्यात्कथश्चने'ति नारदीये ।। 'तपसा विद्यया वापि ज्ञानध्यानादिनाऽथवा । व्यस्तैः समस्तैरपि वा कुर्वतां यत्नमुत्तमम् । संहारविक्षेपशतैर्बहुकोटिभिरेव वा । न शक्यन्ते समारोढुं स्वात्मायोग्यपदानि तु । तथाप्याचरतां कुर्युर्दैत्यानां सुरनायकाः । विघ्नं तु तप आदीनां वैयर्थ्यस्यापनुत्तय' इति प्रकाशसंहितायाम् ।। १० ।।

प्रकाशिका — स्वनाशो दुर्घटमिदमत्राह ।। कालात्मनोरिति ।। बहुभिर्जन्मभिः साधयिष्य इत्यन्वयः । ब्रह्मपदमन्येषामयोग्यमिति जानता हिरण्यकेन कथमिदं तपश्चरणरूपं कर्म कृतमित्याशङ्कां प्रमाणेनैव परिहरति ।। जानतामपीति ।। अपि यद्यपि जानतां ज्ञानवद्भिरात्मसदृशं स्वयोग्यं कर्म कर्तव्यमिति स्थितिः । तत एवं स्थितौ सत्यामपि केचिदात्मसदृशं इदमित्यज्ञानादसदृशं कर्म कुर्युरित्यन्वयः । अस्यापवादमाह । ऋत इति । ततश्च हिरण्यकशिपुरिदं स्वात्मयोग्यमिति जानन्नपि रागद्वेषादिभिर्मोहितः सन्निदं कृतवानिति समाधानमनेनोक्तं भवतीति ज्ञातव्यम् । ब्रह्मपदमन्येषां यत्नसाध्यं नेति देवाः सम्यक् जानंत्येव तत्कुतो ब्रह्माणं प्रति विज्ञाप्य तत्तपो विघ्नं कारितवन्तः इत्याशङ्कां प्रमाणेनैव परिहरति । तपसेति । व्यस्तैः समस्तैस्तपआदिभिः । संहार उपसंहारः पूरकमिति यावत् । विक्षेपशतैः प्राणायामशतैरित्यर्थः । बहुकोटिभिः संहारविक्षेपैः । तुशब्दोऽप्यर्थः । यद्यप्येवं जानन्तीत्यर्थः । आचरतां अयोग्यपदमुद्दिश्य कर्मकुर्वताम् । कुतो विघ्नं कुर्युरित्यत आह । तपआदीनामिति । वैय्यर्थ्यस्य वैय्यर्थ्यशङ्कायाः । यदि देवास्तपआदीनां विघ्नं न कुर्युस्तर्हि दैत्यानामस्माभिर्ब्रह्माणं प्रति तपः कृतं फलं न जातम् । अतः केनापि तं प्रति तपो न कार्यं वैय्यर्थ्यादिति बुद्धिः स्यात्तदपनुत्तये विघ्नं कुर्युः । विघ्ने कृते तु मध्ये विघ्नस्य देवैः कृतत्वात्फलं न जातमित्येव तेषां बुद्धिः स्यादित्याशयः ।। १० ।।

मन्दनन्दिनी — तत्तु ब्रह्मपदम् । तथा ब्रह्मवदात्मनः समाधियोगेन साधयिष्य इत्यन्वयः । अयोग्यपदकामना हिरण्यकशिपुप्रभृतीनामयोग्यत्वाज्ञानाद्रागाद्यौत्कण्ठ्याच्च युज्यते । अत एव तात्पर्यम् ।।

जानतामपि कर्तव्यं कर्मात्मसदृशं सदा ।
तत्रात्मसदृशाज्ञानाद्रागाद्यैर्वा विमोहिताः ।
जानन्तोऽपि ह्यसदृशं कर्म कुर्युर्ऋते विभुम् ।
चतुरास्यं स नायोग्यं कर्म कुर्यात्कथंचनेति नारदीये ॥
तपसा विद्यया वाऽपि ज्ञानध्यानादिनाऽथवा ।

व्यस्तैः समस्तैरपि वा कुर्वतां यत्नमुत्तमम् । सम्भारविक्षेपशतैर्बहुकोटिभिरेव वा ।

न शक्यन्ते समारोढुं स्वात्मायोग्यपदानि तु ।
तथाऽप्याचरतां कुर्युर्दैत्यानां सुरनायकाः ।

विघ्नं तु तप आदीनां वैयर्थ्यस्यापनुत्तय इति प्रकाशसंहितायाम् ॥ ब्रह्मज्ञानिनामप्यात्मसदृशमात्मयोग्यकर्म कर्तव्यम् । तत्र ब्रह्मज्ञानिष्वपि केचनात्मसदृशाज्ञानात् । सदृशपदमसदृशस्याप्युपलक्षणम् । तथा चेदं योग्यमिदयोग्यमिति विवेकाभावात् । अयोग्यस्यापि योग्यत्वभ्रमात् । जानन्तोऽपि ब्रह्मज्ञानिनोऽपि असदृशमयोग्यकर्म कुर्युः । जानन्तोऽपीत्यस्यासदृशमित्यनेनान्वयः । आत्मसदृशाज्ञानादित्यनेन व्याघातात् । केचन रागाद्यैर्विमोहिता ज्ञातामप्ययोग्यतां विस्मृत्य रागजनितयोग्यताभ्रान्तिमन्तः कर्म कुर्युः । उक्तस्यापवादमाह ॥ ऋते विभुं चतुरास्यमिति ॥ कथञ्चन योग्यायोग्यज्ञानाभावाद्रागौत्कण्ठ्यादित्यर्थः । अत्र यदि योग्यताभ्रांत्यादिना हिरण्यकशिप्वादयः कुर्युः । तर्ह्ययोग्यपदस्य सर्वथाऽप्यप्राप्तेः कुतो विघ्नं कुर्वन्ति सुरा इत्यत आह ॥ तपसेति ॥ विद्यया वेदविद्यया व्यस्तैः प्रत्येकमनुष्ठितैः समस्तैर्मिलितैः । बहुकोटिभिर्जन्मभिरार्जितैः सम्भारविक्षेपशतैः । सम्भारा यज्ञसाधनद्रव्याणि विक्षेपोऽग्नौ विक्षेपः । तथा च यागशतैरपीत्यर्थः । यद्यप्येवं तत्पदप्राप्तिभयं नास्ति । तथाऽपि वैयर्थ्यस्यापनुत्तये वैयर्थ्यज्ञानस्य परिहाराय यदि सम्पूर्णं तपआदिकम् । तदा पदाप्राप्त्या तपसोऽसाधनत्वे ज्ञातदैत्याः पुनरयोग्यपदोद्देशेन तपआदिकं न कुर्युः । विघ्ने तु कृतेऽविघ्नं चेत्तपस्तदा साधयेदेव पदमिति भ्रान्तिरनुवर्तत इति भावः ॥ १० ॥

अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ।
किमन्यैः कालनिर्धूतैः कल्पान्तैर्वैष्णवादिभिः ॥ ११ ॥

तात्पर्यम् —— वैष्णवादिभिर्ब्रह्मनिर्मितैः । 'ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतदृक्तथे'ति शब्दनिर्णये ॥ ११ ॥

प्रकाशिका — अन्यथेत्युक्तमेव विवृणोति । अन्यथेति । किमन्यैर्ध्रुवादिपदैः कल्पान्ते कालनिर्धूतैः कालेन विनाशितैर्वैष्णवादिभिरित्यस्य वैकुण्ठादिपरत्वे कालनिर्धूतैरिति विशेषणासम्भवमालोच्यात्र विवक्षितमर्थं दर्शयति । वैष्णवादिभिरिति । तथाच वैष्णवो ब्रह्मा आदिः कारणं येषामिति व्याख्यानं सूचयति । ब्रह्मणो वैष्णवशब्दवाच्यत्वे प्रमाणं पठति । ब्रह्मेति ॥ ११ ॥

मन्दनन्दिनी — मूले पुनर्हिरण्यकशिपोरभिप्रायमाह ॥ अन्यथेति ॥ इदं जगदन्यथा विधास्ये । अन्यथेत्यस्य विवरणं यथापूर्वमिति । धातुर्ब्रह्मत्वकाले इन्द्रादयो दिक्पालाः स्वायम्भुवादयो मन्वन्तराधिपा मम ब्रह्मत्वकाले तु दैत्या एव दिक्पालादय इत्येवमयथापूर्वमित्यर्थः । तर्हीन्द्रादयो विरुंध्युरित्यत आह ॥ किमिति ॥ वैष्णवादिभिर्ब्रह्मनिर्मितैः कल्पान्तैः मनुकल्पाद्यायुष्कैः कालनिर्धूतैः क्लृप्तकालावसितपदैरन्यैरिन्द्रादिभिः किं कार्यं भवतीति योजना । अत्र वैष्णवपदं ब्रह्मपरमिति साभिधानकमाह तात्पर्यकृत् ॥ वैष्णवादिभिर्ब्रह्मनिर्मितैः । ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतधृक्तथेति शब्दनिर्णये ॥ ११ ॥

इति शुश्रुम निर्बन्धं तपः परममास्थितः ।
विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ॥ १२ ॥

प्रकाशिका — निर्बन्धमिति मूलम् । असदाग्रहमित्यर्थः । अत एवासौ तपः परममास्थितः । यदत्रयुक्तं तदनन्तरमेव विधत्स्व ॥ १२ ॥

मन्दनन्दिनी — श्रुतं विज्ञाप्यानन्तरं यदुक्तं तत्कार्यमित्याह मूले ॥ इतीति ॥ निर्बन्धमाग्रह-युक्तम् ॥ १२ ॥

तवासनं हि जगतां पारमेष्ठ्यं जगत्पते ।
भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥

तात्पर्यम् – 'भवाय श्रेयसे चैव न कश्चित्तदपेक्षते । मधुकैटभयोश्चैव हिरण्यादेस्तथैव च । नान्यो ब्रह्मपदं वाञ्छत्यृजून्योग्यान्विना क्वचित् । ततः श्रेयांसि वाञ्छन्ति न तु तत्पदमाप्नुयुरि'ति ब्रह्माण्डे ॥ 'भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः । वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यत' इति शब्दनिर्णये ॥ १३ ॥

प्रकाशिका — हिरण्यकेनेतराणि पदानि विहाय तत्पदमेव कस्माद्वांच्छितमित्यत आह । तवासनमिति । पदमित्यर्थः । तथा च त्वत्पदस्यात्युत्तमत्वात्तेन तद्वांछितमित्याशयः । ननु ब्रह्माणं प्रति

तपः कृत्वा तत्पदमेव हिरण्यकेन वांछितमित्येतदसम्भावितमतो देवैर्ब्रह्मणस्तस्मिन्द्वेषजननार्थमविद्यमानमेवोक्तमित्याशङ्कापरिहाराय हिरण्यकेन तथा वांछा कृतेत्यत्र प्रमाणं पठति । भवायेति । भवाय लौकिकाभिवृध्यै श्रेयसे लौकिकसुखायच । तत् ब्रह्मपदम् । मधुकैटभयोश्चान्यः हिरण्यादेश्चान्यः । ब्रह्मपदं तथा मधुकैटभादिवन्नैव वांछति । अस्यापवादमाह । ऋजूनिति । योग्यानित्यनेनान्येषां तदयोग्यतां दर्शयति । ततो ब्रह्मणः आप्तये पुरुषार्थप्राप्त्यर्थं तत्पदं तस्य ब्रह्मणः पदं न तु वांछति । भवाय श्रेयसे भूत्यै इति पदत्रयस्य पौनरुक्त्यशङ्कापरिहाराय विवक्षितमर्थं प्रमाणेनैव दर्शयति । भवोवृद्धिरिति । क्षेमाय प्राप्तपरिपालनाय । विजयाय वैरिपराभवायोत्कर्षाय वा इति प्रसिद्धमेवेति तत्पदद्वयं न व्याख्यातम् ॥ १३ ॥

मन्दनन्दिनी — इतरद्धित्वा मत्पदमेव कुत आकाङ्क्षत इत्यतः पदं स्तौति ॥ तवासनमिति ॥ हे जगत्पते तव पारमेष्ठेयं चतुर्दशलोकाधिपत्यरूपमासनं पदं जगतां भवाय ज्ञानादिगुणवृद्धये श्रेयसे मोक्षाय भूत्यै ह्रासराहित्याय क्षेमाय प्राप्तपरिरक्षणाय विजयायाप्राप्तलाभाय भवतीति योजना । इतरान्विना कुतोऽयमेवाकाङ्क्षत इत्यतो ब्रह्मपदमाकाङ्क्षमाणानां परिगणनं प्रमाणेन भवादिपदार्थं चाभिधानेनाह तात्पर्यकृत् ॥

भवाय श्रेयसे चैव न कश्चित्तदपेक्षते ।
मधुकैटभयोश्चैव हिरण्यादेस्तथैव च ।
नान्यो ब्रह्मपदं वांछत्यृजून्योग्यान्विना क्वचित् ।
ततः श्रेयांसि वांछन्ति न तु तत्पदमाप्तय ॥ इति ब्रह्माण्डे ।
भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः ।
वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यत ॥ इति शब्दनिर्णये ॥

भवायेत्यादिकमुक्तमात्रोपलक्षणम् । न कश्चिदित्येतद्विवृणोति ॥ मधुकैटभयोरिति ॥ हिरण्यादेः सकाशादिति शेषः । ऋजून्योग्यानित्यनेन मधुकैटभादेरयोग्यत्वं सूचयति । एवं च योग्या ऋजवोऽयोग्यानां मध्ये मधुकैटभादयो ब्रह्मपदमाकाङ्क्षन्त इति परिगणना सूचिता ॥ १३ ॥

इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ।
परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४ ॥

मन्दनन्दिनी — अनन्तरं ब्रह्मणा कृतमाह ॥ इतीति ॥ परितः परिवृतः ॥ १४ ॥

तं ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ।
पिपीलिकाभिराकीर्णं मेदस्त्वङ्मांसशोणितम् ॥ १५ ॥

प्रकाशिका — पिपीलिकादिभिराकीर्णानि भक्षितानि मेदस्त्वङ्मांसशोणितानि यस्य तम् ॥१५॥

मन्दनन्दिनी — कीचकैरनिलेन स्वनवद्वेणुभिः । कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यभिधानात् । आकीर्णमिति मेदःप्रभृतीनां विशेषणं बहुव्रीहिः ॥ १५ ॥

तपन्तं तपसा लोकान् यथा भावितते रविम् ।
विलक्ष्य विस्मितः प्राह हसंस्तं हंसवाहनः ॥ १६ ॥

तात्पर्यम् –'सकामं तु तपः क्रूरं लोकानां भयकृद्भवेत् ॥ इतरच्छान्तये सर्वलोकानां भवति ध्रुवमि' ति प्रकाशिकायाम् ॥ 'ब्रह्माणमभजद्ब्रह्मपदार्थं स हिरण्यक' इति स्कान्दे ॥ १६ ॥

प्रकाशिका — तपंतं तपसा लोकानित्यत्र तपसो लोकतापकत्वमुच्यते । न हीदं सम्भवति । ऋष्यादिभिर्मोक्षार्थं क्रियमाणस्य तपसो लोकसन्तापकत्वाभावादतोऽत्र व्यवस्थां प्रमाणेनैव दर्शयति । सकाममिति । तुशब्दोऽवधारणे । सकाममेव तपः क्रूरं चेल्लोकानां क्षोभकृद्भवेत् । इतरन्निष्कामम् । शान्तये सुखाय । तथा च सकाममेव क्रूरेण तपसेति मूलं व्याख्येयमिति भावः । ननु हिरण्यकेन कृतमपि तपो निष्काममेव किन्न स्यादित्यतस्तस्य सकामत्वे प्रमाणं पठति । ब्रह्माणमिति । ब्रह्मपदार्थं ब्रह्मपदप्राप्त्यर्थम् । कया भासा विततम् ॥ १६ ॥

मन्दनन्दिनी — अभ्रपिहितं मेघेनावृतम् । लोकान् जनान् । तपसा तपंतं सन्तापयन्तं विलक्ष्य दृष्ट्वा हसन् अयोग्ये महाप्रयत्न इति हसन् हंसवाहनश्चतुर्मुखस्तं प्राह । मुनिषु तपत्सु प्राप्तौ लोकताप एतत्तपसा कुत इति चोद्यं निराकर्तुं तात्पर्यम् ॥

सकामं तु तपःक्रूरं लोकानां भयकृद्भवेत् । इतरच्छान्तये सर्वलोकानां भवति ध्रुवमिति प्रकाशिकायाम् ॥ १६ ॥

ब्रह्मोवाच–

उत्तिष्ठोत्तिष्ठ भद्रं ते तपः सिद्धोऽसि काश्यप ।
वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥

मन्दनन्दिनी — प्राहेत्युक्तोक्तिप्रकारमाह ॥ ब्रह्मोवाचेति ॥ अत्र ब्रह्मशब्देन हिरण्यगर्भ इति कथं निर्णयः । हंसवाहनशब्दस्य विष्णुपद्मासनावुक्तौ पण्डितैर्हंसवाहनावित्यभिधानेन विष्णुसाधारण्यात् ।

हिरण्यगर्भपदप्राप्तिकामं प्रति तस्यैव वरदत्वायोगाच्चेति चेन्न । तस्यैव तपसाऽऽराधितत्वेन वरदत्वोपपत्तेरित्याशयेन तात्पर्यम् ।। ब्रह्माणमभजद्ब्रह्म पदार्थं स हिरण्यक इति स्कान्दे ।। मूले काश्यप कश्यपपुत्र ।। १७ ।।

अद्राक्षमहमेतत् ते हृत्सारं महदद्भुतम् ।
दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ।। १८ ।।

प्रकाशिका — हृत्सारं हृदयदार्ढ्यम् । दंशैः मक्षिकाविशेषैर्भक्षितो देहो यस्य । हि यस्मादस्थिषु शेरते तस्मादद्भुतम् ।। १८ ।।

मन्दनन्दिनी — हृत्सारं हृदयदार्ढ्यम् ।। १८ ।।

नैतत् पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे ।
निरम्बुर्धारयेत् प्राणान् को वै दिव्यसमाः शतम् ।। १९ ।।

प्रकाशिका — निरम्बुर्जलपानरहितः ।। १९ ।।

मन्दनन्दिनी — ब्रह्माणमिति प्रमाणेऽपि हिरण्यगर्भनिर्णायकान्तराभावाद्ब्रह्मपदस्य पूर्ववच्छङ्का-वकुण्ठितत्वेना निर्णायकत्वात्कथमियं योजनेति विचार्यम् । ब्रह्माणं बृहस्पतिमित्यर्थोपपत्तेः । चतुर्मुखस्याराधितत्वानिश्चायकत्वाच्च । वस्तुतस्तु सकामतपः क्रूरमस्त्विदं निष्काममेव किं न स्यादित्यत आहेति पूर्वसङ्गतत्वेन योज्यम् । अथवा हिरण्यकशिपुतपसो ब्रह्मपदेतरफलानुद्देशितत्वात् । ब्रह्मणः कोपजननायैव देवैर्ब्रह्मपदोद्देशित्वमुक्तम् । वस्तुतस्तु न तथा तस्य काम इति मूलाशय-कल्पनोपपत्तेः । तदुद्देशित्वस्याप्यभावान्निष्कामत्वमेव तस्य सन्तापकत्वोक्त्या निष्कामतपोऽपि सन्तापकरी प्रकाशिका वचने शान्तय इत्यस्य नाशायेत्यर्थोपपत्तेः । अत एव पूर्ववाक्यान्यपि तात्पर्यकृद्भिर्न वक्तव्यानीति मन्दाशङ्कानिरासायाहेत्यवतरणमिदं भवति । निरम्बु जलरहितं यथा भवति तथा ।। १९ ।।

व्यवसायेन तेऽनेन दुष्करेणामनस्विभिः ।
तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ।। २० ।।

तात्पर्यम् — जितः वशीकृतः । 'पराभूतं वशस्थं च जितमित्युच्यते बुधैरि'ति शब्दनिर्णये ।। ।। २० ।।

प्रकाशिका — अमनस्विभिः मनोदार्ढ्यरहितैः । दुष्करेण ते तवानेन व्यवसायेन कारणेन भवता कर्त्रा जितः । अत्र पराजित इत्यर्थप्रतीतिवारणाय विवक्षितमर्थं दर्शयति ॥ जित इति ॥ अत्र प्रमाणं पठति ॥ पराभूतमिति ॥ २० ॥

मन्दनन्दिनी — अनेन तेन तपसा विजितो वशीकृतः । न तु पराजितः । अत्र तात्पर्यम् ॥ जितो वशीकृतः । पराभूतं वशस्थं च जितमित्युच्यते बुधैरिति शब्दनिर्णये ॥ २० ॥

ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव ।
मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं न च निष्फलम् ॥ २१ ॥

प्रकाशिका — अमर्त्यस्य मरणशून्यस्य देवस्य मम दर्शनं निष्फलं नैव ॥ २१ ॥

मन्दनन्दिनी — ते तुभ्यम् । अमर्त्यस्य मम ॥ २१ ॥

नारद उवाच–

इत्युक्त्वाऽऽदिभवो देवो भक्षिताङ्गं पिपीलिकैः ।
कमण्डलुजलेनौक्षद् दिव्येनामोघराधसा ॥ २२ ॥

प्रकाशिका — आदेर्भवो जन्म यस्य स तथा । सर्वस्यादौ भवतीति वा । औक्षत् प्रेक्षितवान् ॥ २२ ॥

मन्दनन्दिनी — आदौ भवो यस्य स आदिभवो ब्रह्मा । औक्षदसिंचत् । अमोघराधसाऽव्यर्थसिद्धिमता ॥ २२ ॥

स तत्कीचकवल्मीकात् सह ओजोबलान्वितः ।
सर्वावयवसम्पन्नो वज्रसंहननो युवा ।
उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥

मन्दनन्दिनी — वज्रसंहननो वज्रवद्दृढः । एधस इन्धनात् ॥ २३ ॥

स निरीक्ष्याम्बरे देवं हंसवाहनमास्थितम् ।
ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥

मन्दनन्दिनी — अम्बरे स्थितमिति योजना ॥ २४ ॥

उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम् ।
हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणत् ॥ २५ ॥

प्रकाशिका –– प्रह्वः प्रवणः ॥ २५ ॥

मन्दनन्दिनी –– प्रह्वः प्रवणः । अगृणादस्तौत् ॥ २५ ॥

हिरण्यकशिपुरुवाच–

कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम् ।
अभिव्यनग् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥

आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति ।
रजःसत्वतमोधाम्ने पराय महते नमः ॥ २७ ॥

तात्पर्यम् –– 'प्रायस्तु स्तुतिशब्देषु मिश्रा वाचो हरिं विना । केचिज्जीवगुणास्तत्र तन्नियन्तुर्हरेः परे । एकस्थानैककार्यत्वाद्विष्णोः प्राधान्यतस्तथा । जीवस्य तदधीनत्वान्न भिन्नाधिकृतं वच' इति ब्रह्मतर्के ॥ त्रिवृता प्रकृत्या ॥ २६, २७ ॥

प्रकाशिका –– कल्पांत इत्यादिना ब्रह्मस्तुतिर्हिरण्यकेन क्रियते । तत्र ब्रह्मण्यसम्भाविताः विष्णुमात्रनिष्ठाः केचन धर्माः कथ्यंतेऽतः कथं ब्रह्मस्तुतिरियमित्यतोऽत्राभिप्रायं प्रमाणेनैव दर्शयति । प्रायस्त्विति । तुशब्दोऽवधारणे । मिश्राः जीवेश्वरप्रतिपादकाः । प्राय एवेत्युक्तस्य व्यावर्त्यं दर्शयति । विनेति । केवलं हरिस्तुतिं विनेत्यर्थः । मिश्रत्वे कथं तत्र योजनेत्यपेक्षायामाह । केचिदिति । अत्र मिश्रस्तुतिषु केचिज्जीवगुणा जीवेप्यमुख्यया वृत्त्या सम्भाविता गुणा उच्यन्ते । परे ये जीवेष्वसम्भावितास्ते तन्नियंतृहरेरेवोच्यंत इत्यर्थः । सर्वापि स्तुतिः मुख्यया वृत्या ईश्वरविषयैव फलदाने तस्यैव स्वातन्त्र्यात् । अमुख्यया वृत्या जीवे सम्भाविताश्चेत्केचिद्गुणास्ते जीवेऽपि योज्या इत्याशयः । ननूक्तरीत्या मिश्राः स्तुतयो जीवांतर्यामिपराः कुतः प्रवृत्ताः पृथक्स्थितहरिजीवपराः कुतो न ज्ञाता इत्यत आह । एकेति । एकस्मिन् स्थाने शरीररूपे स्थित्वोभयोरपि स्तोतृपुरुषार्थप्रदानादि-रूपैककार्यकर्तृत्वाद्वचः मिश्रस्तुतिरूपं वाक्यं भिन्नौ पृथक् स्थितौ हरिजीवावधिकृतौ प्रतिपाद्यौ यस्य तत्तथा । पृथक्स्थितहरिजीवप्रतिपादकं न भवति । ननु तर्हि हरिजीवौ तत्र किं साम्येन प्रतिपाद्यौ नेत्याह । विष्णोः प्राधान्यतः । तथा जीवस्य तदधीनत्वादेकस्थानैककार्यत्वादित्यन्वयः । अतः न तयोः साम्येन प्रतिपाद्यत्वमित्याशयः ॥ त्रिवृतेत्यस्य प्रकृतसङ्गतमर्थं दर्शयति । त्रिवृतेति । त्रिगुणान् वृणोतीति त्रिवृत् । सा च प्रकृतिरेवेत्याशयः । ततश्च कल्पान्त इत्यादिमूलस्यायमर्थः ।

प्रलयकालप्रवर्तकेन हरिणा सृष्टेनान्धेन तमसा दुर्गाभिमन्यमानेनावृतमिदं जगदभिव्यनक् अभिव्यक्तमकरोत् । आत्मना कर्त्रा । त्रिवृता प्रधानेनोपादानेन । इदं श्लोकद्वयं हरिमात्रपरम् । प्रलयकालीनतमोनाशनस्य प्रधानोपादानकसृष्टेः पालननाशनयोश्च ब्रह्मकृतत्वासम्भवात् ॥ २६,२७ ॥

मन्दनन्दिनी — स्तौति ॥ कल्पान्त इति ॥ महाकल्पान्ते कालसृष्टेन तत्कालव्यक्तेन । अन्धेनान्धयतीत्यन्धं तेन तमसाऽऽवृतम् । तुच्छेनाश्वपिहितं यदासीदित्यादेः । इदं जगत् । जगत्सर्जकादिरूपं प्रद्युम्नादिकम् । स्वयं ज्योतिः स्वतन्त्रज्योतिः स्वरोचिषा स्वतेजसा । तमो व्यक्तीकृत्याभिव्यनगभिव्यक्तमकरोत् । तथाऽऽत्मना स्वेन कार्योन्मुखीकृतया त्रिवृता जडप्रकृत्योपादानभूतयेदं महत्तत्त्वादिकं सृजत्यवति लुम्पति च । यत्तदोर्नित्यसम्बन्धात्तस्मै रजः सत्त्वतमोधाम्ने । सृष्ट्यादिक्रमानुसारेणेत्थमुक्तिः । पराय च स्वतन्त्राय महते पूज्याय नम इति श्लोकद्वये इति योजना । अत्र चतुर्मुखेऽसम्भाव्यमाना गुणाश्चतुर्मुखनियामके भगवति । इतरे चतुर्मुखे योज्याः । हरिस्तुतिं विना देवतांतरस्तुतेः प्रायेण मिश्रस्तुतित्वात् । प्रकृतेस्त्रिभिर्गुणैर्वर्तत इति व्युत्पत्त्या त्रिवृच्छब्दवाच्यत्वम् । एतदभिप्रेत्य तात्पर्यकृदाह ॥ प्रायस्तु स्तुतिशब्देषु मिश्रा वाचो हरिं विना । केचिज्जीवगुणास्तत्र तन्नियंतुर्हरेः परे । एकस्थानैककार्यत्वाद्विष्णोः प्राधान्यतस्तथा । जीवस्य तदधीनत्वान्न भिन्नाधिकृतं वच इति ब्रह्मतर्के ॥ हरिं विना हरिस्तुतिं विना । मिश्रत्वं स्पष्टयति ॥ केचिदिति ॥ परेऽन्ये कुत एव मिश्रत्वमित्यत आह ॥ एकेति ॥ एकदेहस्थितत्वाद्वरदानादिलक्षणैक-कार्यकरत्वात् । एककार्यकरत्वेऽप्याराधितस्य देवतान्तरस्यैव स्तुतिः किं न स्यादित्यत आह ॥ विष्णोरिति ॥ वचः स्तुतिवचः । भिन्नाधिकृतं प्रत्येकमात्रविषयं न । त्रिवृच्छब्देति तात्पर्यं त्रिवृता प्रकृत्येति ॥ २६, २७ ॥

नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ।
प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥ २८ ॥

प्रकाशिका — आद्याय वासुदेवरूपेण जगदादौ व्यक्तायान्यत्र तस्मात्पुंनाम्ना जाताय । बीजाय व्यञ्जकाय कारणायेति यावत् । उभयत्र समम् । ज्ञानविज्ञाने मूर्तिः विग्रहो यस्यान्यत्र ज्ञानविज्ञानप्रवर्तकमूर्तये । प्राणेन्द्रियमनोबुद्धिलक्षणैर्विकारैर्ब्रह्माण्डान्तर्विराट्पुरुषतया व्यक्तिमीयुषे । उभयत्र समम् ॥ २८ ॥

मन्दनन्दिनी — आद्याय बीजाय कारणाय । ज्ञानविज्ञानमूर्तये सामान्यविशेषज्ञानोपदेष्टृशरीराय । प्राणेन्द्रियमनोबुद्धिलक्षणैर्विकारैः । ब्रह्माण्डान्तर्व्यक्तिं शरीरमीयुषे । प्राप्तायेति योजना ॥ २८ ॥

त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ।
चित्तस्य चित्तिर्मनइन्द्रियाणां पतिर्महाभूतगुणाशयेशः ॥ २९ ॥

तात्पर्यम् — प्राणेन सह ॥ २९ ॥

प्रकाशिका — त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य चेशिषे नियंता भवसि । प्राणेनेत्येतत्प्राणेन निमित्तेनेत्यन्यथा प्रतीतिवारणाय व्याख्याति । प्राणेनेति । तथा च सहार्थे तृतीयेति भावः ॥ चित्तिः स्मरणशक्तिप्रदः । पतिः पालकः । महाभूतानां गुणानां शब्दादीनां आशयस्यांतः करणस्येशः प्रवर्तकः । पालनेशनयोर्भेदान्नाशयांशेन पौनरुक्त्यम् । एतच्छ्लोकोक्तमुभयत्र समम् ॥ २९ ॥

मन्दनन्दिनी — मुख्येन प्राणेन सह । तस्य चतुर्मुखसमत्वात् । ईशितृकोटिप्रवेशः । न त्वीशितव्यकोटौ । हरिपरत्वे त्वीशितव्यत्वमेव । जगतो जङ्गमस्य तस्थुषः स्थावरस्य त्वमीशिषे ईश्वराकाररूपं यद्ब्रह्माण्डं तस्येश इत्यर्थः । अत एव तात्पर्यम् ॥ प्राणेन सहेति ॥ २९ ॥

त्वं सप्ततन्तून् वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च ।
त्वमेक आत्माऽऽत्मवतामनादिरनन्तपारः कविरव्ययात्मा ॥ ३० ॥

तात्पर्यम् — सप्ततन्तून्सप्तक्रतून् ॥ ३० ॥

प्रकाशिका — सप्ततन्तूनित्यस्य विवक्षितमर्थं दर्शयति । सप्ततंतूनिति । अग्निष्टोमादिसप्त-यज्ञानित्यर्थः । तन्वात्र तन्वाश्रितया त्रय्या वेदत्रयेण चत्वारो होतारो यत्र तच्चतुर्होतृकं कर्म तद्विषयया विद्यया च वितनोषि । विस्तारयसि । इदमुभयत्र समम् । आत्मवतां प्राणिनामन्तर्यामी । नास्त्यन्तः कालतः पारश्च देशतो यस्य स तथा । कविः सर्वज्ञः । अव्ययानां मुक्तानां आत्मा स्वामी अन्यत्राव्यये हरावात्मा मनो यस्य ॥ ३० ॥

मन्दनन्दिनी — मूले तन्वा भगवतः प्रतिमास्थानीयया त्रय्या वेदत्रयेण । स त्रिभिर्विधीयतेति श्रुतेः । चतुर्होतृकविद्यया च ब्रह्महोतृअध्वर्याग्नीध्रलक्षणर्त्विक्चतुष्टयव्यापारप्रतिपादिकया कल्पसूत्रादि-विद्यया च त्वं सप्ततंतून् क्रतून् वितनोषि । आत्मवतां ब्रह्मज्ञानिनां आत्मा प्रेष्ठः । आत्मा प्रेष्ठे स्वरूपे च जीवज्ञातरि केशवे । वायौ देहे स्वयं स्वान्ते नवसु प्रोच्यते बुधैरित्युक्तेः । अनादिरादिशून्याय । अनन्तपारोऽनन्तान् संसारान्पारयतीत्यनन्तपारः । अव्यये हरावात्मा मनो यस्याव्ययात्मा । अत्र तात्पर्यम् ॥ सप्ततंतून् क्रतूनिति ॥ सप्तक्रतूनित्यप पाठः । यज्ञः सत्रोऽध्वरो यागः सप्ततंतुर्मखः क्रतुरिति कोशात् ॥ ३० ॥

त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महान् त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥

तात्पर्यम् — जीवानां प्राणधारकः ॥ ३१ ॥

प्रकाशिका — कालः कालनामा । अनिमिषः जाग्रद्रूपः । आत्मा आदानादिकर्ता । परमेष्ठी सर्वोत्तमस्थानः । अजः उत्पत्तिशून्यः । अन्यत्राज्ञातः । महान् सर्वोत्तमः । अन्यत्र महत्तत्वाभिमानी । जीवलोकस्य जीवः । अत्र जीवादभेदप्रतीतिवारणाय प्रमाणमाह । जीवानामिति । तथा च लोकशब्दः समुदायपरः । द्वितीयो जीवशब्दः योगवृत्या प्राणधारकपर इत्युक्तं भवति । आत्मेति मूलं स्वामीत्यर्थः ॥ ३१ ॥

मन्दनन्दिनी — अनिमिषो जाग्रत्स्वभावः कालः कालनियामकः कूटस्थो निर्विकारः । आत्मा व्याप्तः परमेष्ठी सर्वोत्तमः । न जायत इत्यजः । महान्परममहान् । महत्तत्वमानी वा । जीवलोकस्य जीवजातस्य जीवः प्राणधारकः । जीवप्राणधारण इति धातोः । त्वं लवाद्यवयवैर्जनानामायुः क्षिणोषीति योजना । अत्र चतुर्मुखेऽसम्भवन्ति विशेषणानि तन्नियन्तरि हरौ योज्यानि । अत्र तात्पर्यम् ॥ जीवानां प्राणधारक इति ॥ ३१ ॥

त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद् व्यतिरिक्तमस्ति ।
विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत् त्रिपृष्टः ॥ ३२ ॥

तात्पर्यम् — 'परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः । तस्मान्न व्यतिरिक्तं त्वदित्याहुर्वेदवेदिन' इति पाद्मे ॥ विद्याश्च कलाश्च विद्याकलाः । 'महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः । विद्यातनुरिति प्राहुरतस्त्वां तत्त्ववेदिन' इति च । त्रिपृष्टः तुरीयः ॥ ३२ ॥

प्रकाशिका — त्वत्तः परं नापरमित्यत्र जगदभेदो ब्रह्मांतर्यामिण उच्यत इति भाति । अतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैवाह । परावरेष्विति । विद्याकला इत्येतद्विद्यानां कला एकदेशा इत्यन्यथाप्रतीतिवारणाय व्याख्याति । विद्याश्चेति । तथाच विद्याः वेदादिरूपाः कलाः गन्धर्वाद्युपवेदरूपा इत्यर्थः । ननु विद्यानां कलानां च कथं च तनुत्वमित्याशङ्कां प्रमाणेनैव परिहरति । महाविद्या इति । त्रिपृष्ट इत्यस्य विवक्षितमर्थं दर्शयति । त्रिपृष्ट इति । तथा च तिसृणां जागृदाद्यवस्थानां पृष्ठः परतः स्थितः ता अतिक्रम्य वर्तमान इति यावत् । स च तुरीय एवेत्युक्तं भवति । ततश्चायं श्लोकार्थः । परमतीतं परमेष्ठ्यद्वर्तमानं च यत्किंचिदनेजत् स्थावरमेजज्जंगमंच वस्तु तत्सर्वं त्वत्तो व्यतिरिक्तं नास्ति त्वयैव व्याप्तमित्यर्थः ॥ विद्याः महावेदादिरूपाः कलाः गन्धर्वाद्युपवेदरूपाः सर्वास्ते

तनवः त्वत्तनावाश्रिताः । हिरण्यं ब्रह्माण्डं गर्भे उदरे यस्य स तथा । त्रिपृष्ठः अवस्थात्रयातीतः तुरीयः ॥ ३२ ॥

मन्दनन्दिनी — मूले । परमतीतं अपरमनागतं वर्तमानमपि । अनेजत्स्थावरम् । एजत् जङ्गमं च । किञ्चित्सर्वं त्वया व्याप्यत्वात्त्वत्तो व्यतिरिक्तं नास्ति । सर्वा विद्याः कलाश्च विद्याकलाः । विद्या महाविद्याः कलाः कलाविद्यास्ते तनवस्तन्वाश्रिताः । तास्थ्यात्तच्छब्दम् । हिरण्यगर्भोऽसि हिरण्यात्मकं ब्रह्माण्डं गर्भे उदरे यस्य सोऽसि । बृहद्गुणपूर्णं वस्त्वसि । त्रिपृष्ठस्तिसृभ्योऽवस्थाभ्यः पृष्ठोऽतिक्रान्तः । तुरीय इति यावत् । एतादृशोऽसीति योजना । अत्र विष्णुगुणैर्ब्रह्मणो स्तोत्रं तद्गतविष्णुविवक्षयेति ज्ञातव्यम् । एतदेवाभिप्रेत्य तात्पर्यम् ॥ परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः । तस्मान्न व्यतिरिक्तं त्वदित्याहुर्वेदवेदिन इति पाद्मे ॥ विद्याश्च कलाश्च विद्याकलाः । महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः । विद्यातनुरिति प्राहुरतस्त्वां तत्त्ववेदिन इति च । त्रिपृष्ठस्तुरीयः । ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः । ब्रह्माणं तद्गुणैः स्तौति तद्गविष्णुविवक्षयेति च ॥ ३२ ॥

व्यक्तं विभो स्थूलमिदं शरीरं येनेन्द्रियप्राणमनोगुणांस्त्वन् ।
भुङ्क्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥

प्रकाशिका — हे विभो इदं स्थूलं ब्रह्माण्डाख्यं व्यक्तं यथा स्यात्तवैव शरीरम् । कुतः येनकारणेन तदन्तर्गते पारमेष्ट्ये धामनि स्थितस्त्वमिन्द्रियप्राणमनसां गुणान्विषयान् भुंङ्क्षे । अव्यक्तः स्वप्रसाद-मन्तरेण न व्यक्तः । आत्मा स्वामी ॥ ३३ ॥

मन्दनन्दिनी — मूले । हे विभो समर्थ । हिरण्यगर्भः पुराणपुरुष आदिपुरुष आत्मा स्वामी अव्ययस्त्वम् । येन यदधिष्ठायेन्द्रियप्राणमनसां गुणान्विषयान् भुङ्क्ष्ये । इदं ब्रह्माण्डाख्यं व्यक्तं स्पष्टं तव स्थूलशरीरं शरीरस्थानापन्नम् । ब्रह्मणो विराड्शरीरत्वात् । इति योजना ॥ ३३ ॥

अनन्ताव्यक्तरूपेण येनेदमखिलं ततम् ।
चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥

प्रकाशिका — स्थावरादिरूपं जगत् हरिणा व्याप्तमित्युक्तं तत्कीदृशेन रूपेणेत्यपेक्षायामाह । अनन्तेति । देशतः कालतो गुणतश्चानंतं स्वप्रसादमन्तरेणाव्यक्तं च यद्रूपं तेनेत्यर्थः । चिदचिच्छक्तियुक्ताय चिदचित्प्रेरकशक्तियुक्ताय ॥ ३४ ॥

मन्दनन्दिनी — अनन्ताव्यक्तरूपेणासंख्यातातीन्द्रियरूपेणेदमखिलं जगत्ततं व्याप्तं तस्मै चिदचिन्नियामकशक्तियुताय भगवते नम इति योजना । भगवच्छब्देन हरिग्रहणेऽखिलशब्देन निरुपचरितं सर्वं हिरण्यगर्भग्रहणे यथोचितं ग्राह्यम् ।। ३४ ।।

यदि दास्यस्यभिमतान् वरान् मे वरदोत्तम ।
भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ।। ३५ ।।

मन्दनन्दिनी — वरान्वृणोति ।। यदि दास्यसीत्यादि चतुःश्लोक्या ।। योजना तु स्फुटा । त्वद्विसृष्टेभ्यस्त्वन्निमित्तेभ्यः ।। ३५ ।।

नान्तर्बहिर्दिवानक्तमन्यस्मादपि चायुधैः ।
न भूमौ नाम्बरे मृत्युर्न नरैर्न मृगैरपि ।। ३६ ।।

तात्पर्यम् — 'ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः । ब्रह्माणं तद्गुणैः स्तौति तद्विष्णुविवक्षये'ति च ।। ३६ ।।

इति सप्तमतात्पर्ये तृतीयोऽध्यायः ।। ३ ।।

प्रकाशिका — नन्वस्त्वियं मिश्रस्तुतिरिति वस्तुगतिस्तथापि हिरण्यकस्य तदैवमनुसन्धानं स्थितमिति कुत इत्यतोऽत्र प्रमाणं पठति । ब्रह्मणोपीति । मूलेऽन्यस्मादपीति । नित्यात्प्रकृत्यादेः । त्वद्विसृष्टेभ्य इत्युक्तानेव प्रपञ्चयति । न नरैरिति ।। ३६ ।।

मन्दनन्दिनी — नान्तरिति नञ् । आयुधैरित्यन्तं प्रत्येकं सम्बध्यते । अपिचशब्दौ समुच्चये । अन्यस्मात् विभक्तिवचनव्यत्ययः । देहावयवभिन्नैरायुधैः खड्गादिभिः ।। ३६ ।।

व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः ।
अप्रतिद्वन्द्वता युद्धे ऐकपत्यं च देहिनाम् ।। ३७ ।।

प्रकाशिका — व्यसुभिर्विगतप्राणैः पाषाणादिभिः । असुमद्भिर्ग्रहादिभिः । सुरासुरमहोरगरूपैरसुमद्भिरिति वा । ऐकपत्यमेकाधिपत्यम् ।। ३७ ।।

मन्दनन्दिनी — व्यसुभिर्वा व्यसुभिः शिलादिभिः । असुमद्भिः शत्रुनियुक्तैः श्वानादिभिः । वा शब्दान्नञनुवर्तते । सुरासुरमहोरगैरित्यत्रापि वाशब्देन नञनुवर्तते । मृत्युरिति सर्वत्रान्वेति । भवेदिति शेषः ।। ३७ ।।

सर्वेषां लोकपालानां महिमानं तथाऽऽत्मनः ।
तपोयोगप्रभावेन यो न रिष्यति कर्हिचित् ॥ ३८ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे तृतीयोऽध्यायः ।

प्रकाशिका — तथाशब्दः समुच्चये । सर्वेषां लोकपालानां महिमानमात्मनो मम वृण इति शेषः । यो महिमा अन्येषां तपोयोगप्रभावेन कर्हिचिदपि न रिष्यति न नश्यति तं वृण इत्यन्वयः ॥ ३८ ॥

इति श्रीमद्भागवततात्पर्यटिप्पण्यां यदुपतिविरचितायां प्रकाशिकायां सप्तमस्कन्धे तृतीयोऽध्यायः समाप्तः ॥

मन्दनन्दिनी — यो महिमा कर्हिचित्कदाचिदपि न रिष्यति न नश्यति तं महिमानमित्यन्वयः । द्वितीयान्तानां देहीत्यध्याहृतेनान्वयः ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां तृतीयोऽध्यायः ॥ ७—३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

एवं वृतः शतधृतिः हिरण्यकशिपोरथ ।
प्रादात् तत्तपसा प्रीतो वरान् तस्य सुदुर्लभान् ॥ १ ॥

प्रकाशिका — शतधृतिर्ब्रह्मा ॥ १ ॥

मन्दनन्दिनी — अत्र दैत्यादीनां वरलब्धमैश्वर्यमनित्यम् । योग्येष्वेव भगवदनुग्रह इत्येतत्कतिपयैरध्यायैर्निरूप्यते । तत्रादौ हिरण्यकशिपुचर्यामाह ॥ एवं वृत इति ॥ श्लोकाश्च स्फुटयोजना इति तत्र तत्र पदार्थ एव निरूप्यते । अथ वरदानानन्तरम् । तस्य हिरण्यकशिपोः ॥ १ ॥

ब्रह्मोवाच—

तातेमे दुर्लभाः पुंसो यान् वृणीषे वरान् मम ।
तथाऽपि वितराम्यङ्ग वरान् यदपि दुर्लभान् ॥ २ ॥

प्रकाशिका — मम मतः । यदपि यद्यपि । इमे दुर्लभा इत्यन्वयः ॥ २ ॥

मन्दनन्दिनी — तात वत्स । यान्मम सकाशाद्वृणीषे इमे यदपि यद्यपि दुर्लभास्तथाऽपि वितरामीति योजना ।। २ ।।

ततो जगाम भगवानमोघानुग्रहो विभुः ।
पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ।। ३ ।।

प्रकाशिका — भगवान्पूज्यः ।। ३ ।।

मन्दनन्दिनी — अमोघानुग्रहोऽव्यर्थानुग्रहः ।। ३ ।।

एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ।
भगवत्यकरोद् द्वेषं भ्रातुर्वधमनुस्मरन् ।। ४ ।।

तात्पर्यम् — 'स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विषः' इति च ।। ४ ।।

प्रकाशिका — भगवति समग्रैश्वर्यादिगुणवति हरौ । ननु पूर्वाध्याये स्तुतिर्हिरण्यकस्य हरौ भक्तिरुक्ता इदानीं कथं द्वेषमकरोदित्युच्यत इत्यत्रोपपत्तिं प्रमाणेनैवाह ।। स्वतो भक्ता इति ।। परो वैरी असुरः तस्यावेशादित्यर्थः । तथा च स्तुतिकालेऽसुरावेशाभावात्स्वाभाविकीभक्तिरेव स्थिता । इदानीं असुरावेशात् द्वेषमकरोदत उभयथोक्तिर्युक्तेत्याशयः ।। ४ ।।

मन्दनन्दिनी — भ्रातुर्हिरण्याक्षस्य वधं वराहकृतम् । भगवति द्वेषमकरोत् । भक्तिमतोऽपि द्वेषः परावेशात् । तदुक्तं तात्पर्ये ।। स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विष इति ।। ४ ।।

स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः ।
देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान् ।। ५ ।।

मन्दनन्दिनी — गन्धर्वगरुडा गन्धर्वश्रेष्ठाः । यद्वा । गरुडजातीयाः पक्षिणः ।। ५ ।।

सिद्धचारणविद्याध्रान् ऋषीन् पितृपतीन् मनून् ।
यक्षरक्षःपिशाचेशान् प्रेतभूतपतीनपि ।। ६ ।।

मन्दनन्दिनी — विद्याध्रान् विद्याधरान् । पितृपतीन् चिरपितॄन् ।। ६ ।।

सर्वसत्वपतीन् जित्वा वशमानीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ।। ७ ।।

प्रकाशिका — सर्वसत्त्वपतीनिति मूलम् ।। सर्वेषां सत्त्वानां प्राणिनां ये ये पतयस्तान् । किं बहुना । विश्वजित् सर्वजित् । तेजसा सामर्थ्येन सह सञ्जहार ।। ७ ।।

मन्दनन्दिनी — सर्वसत्त्वपतीन् सिंहादीन् । बलश्रेष्ठान्वा । विश्वजित्सर्वजित् ।। ७ ।।

देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ।
महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा ।। ८ ।।

प्रकाशिका — त्रिविष्टपं स्वर्गम् । तत्रापि महेन्द्रभवनमध्युवास ।। ८ ।।

मन्दनन्दिनी — त्रिविष्टपं वर्णयति ।। देवोद्यानेत्यादिना ।। अध्यास्ते स्म अध्यासाञ्चक्रे । साक्षात्प्रत्यक्षम् । तुरीयं वा । विष्टपत्रयात् । साक्षात्प्रत्यक्षतुर्ययोरित्यभिधानात् ।। ८ ।।

त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ।
यत्र विद्रुमसोपाना महामरकता भुवः ।। ९ ।।

प्रकाशिका — अखिलवृद्धिमत्त्वमेवाह ।। यत्रेति त्रिभिः ।। ९ ।।

मन्दनन्दिनी — अखिलर्द्धिमत् सर्वसम्पत्तिमत् । भुवः । प्रवालश्रेणिका इन्द्रनीलमयी इत्यर्थः ।। ९ ।।

यत्र स्फटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः ।
यत्र चित्रवितानानि पद्मरागासनानि च ।। १० ।।

मन्दनन्दिनी — वितानान्युपरिधानवस्त्राणि ।। १० ।।

पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः ।
कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः ।
रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम् ।। ११ ।।

प्रकाशिका — मुक्तादामानि परिच्छदाः परितः स्थिताः यासां ताः । सुदतीः शोभमानदन्ताः स्त्रियः ।। ११ ।।

मन्दनन्दिनी — शब्दयंत्यः सञ्चारेण ध्वनिं कारयन्त्यः । सुदतीः सुदत्यः ।। ११ ।।

तस्मिन् महेन्द्रभवने महासुरो महाबलो निर्जितलोक एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥

प्रकाशिका — ऊर्जितं अधिकं चण्डं क्रूरं शासनं यस्य ॥ १२ ॥

मन्दनन्दिनी — सुरादिभिरित्यतद्गुणसंविज्ञानो बहुव्रीहिः । गन्धर्वादिभिरित्यर्थः । अन्यथा त्रिभिर्विनेति वक्ष्यमाणविरोधात् । वस्तुतस्तु अयज्ञभुजोऽपि देवाः सुरशब्देनोच्यन्ते । तत्पदं सुरपदम् । तात्पर्ये तथा वक्ष्यमाणत्वात् ॥ १२ ॥

तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥ १३ ॥

तात्पर्यम् — 'आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः । मरुतश्चैव विश्वे च साध्याश्चैव च तद्गताः । अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृता' इति स्कान्दे ॥ 'उपायनं ददुः सर्वे विना देवान् हिरण्यक' इति च । अयज्ञभागेष्वपि तु सुरशब्दः प्रदृश्य(युज्य)ते । यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिताः इति च ॥ १३ ॥

प्रकाशिका — अङ्ग हे राजन् ! मधुना सुरया मत्तं, अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तम् । अशेषधिष्ण्यपाः सर्वलोकपालाः । पदमाश्रयभूतम् । अत्र त्रिभिर्ब्रह्मविष्णुमहेश्वरैर्विना सर्वे देवा उपासतेति व्याख्यानमसदिति भावेन विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति ॥ आदित्या इति ॥ मरुदादीनां सत्त्वात् कथं त्रिविधा इत्युक्तमित्यत आह ॥ मरुत इति ॥ आद्यस्यैवशब्दस्य त्रिविधा एवेति सम्बन्धः । द्वितीयस्तु तद्गता एवेति ॥ तेष्वादित्यादिषु गतास्तत्रैवान्तर्भूता इत्यर्थः । त्रय इति प्रोक्तास्त्रिशब्देनोक्ता इत्यर्थः । तथा च त्रिभिर्विनेति त्रिशब्देनैते एव व्यावर्तिता इत्याशयः ॥ चत्वार इति ॥ ब्रह्मक्षत्रियवैश्यशूद्रभेदेन चत्वारो यतोऽतः क्वचिच्चतुर्शब्दो नोक्त इत्यर्थः । ननु त्रिभिरित्यस्य कुत एवं व्याख्यानं परोक्तमेव किं न स्यादित्यत आह ॥ उपायनमिति ॥ उपायनं ददुरित्युपलक्षणम् ॥ तमुपासतेत्यपि ग्राह्यम् ॥ तथा च तदीयव्याख्यानस्य विरुद्धत्वादस्मदीयमेव व्याख्यानं युक्तमित्याशयः ॥ ननु भवद्व्याख्यानेऽपि सुरादिभिरभिवन्द्यांघ्रियुग इति पूर्वग्रन्थविरोध इत्यत आह ॥ अयज्ञभागेष्विति ॥ तु विशेषेण प्र(दृश्य)युज्यते । तु विशेषेणाभिशब्दिता इति तुशब्दयोरन्वयः । तथा च पूर्वमयज्ञभागाः सुरशब्देन विवक्षिताः । अत्र तु त्रिशब्देन यज्ञभागभुज एवातो न विरोध इत्याशयः ॥ १३ ॥

मन्दनन्दिनी — अङ्गेति युधिष्ठिरसम्बोधनम् । तपोयोगबलौजसां पदमाश्रयं तमित्यन्वयः । त्रिभिर्विना वसुरुद्रादित्यभेदेन त्रिविधैः सुरैर्विना । मरुदादीनां तत्रैवान्तर्भावात् । नाधिक्यशङ्का कार्या । तदुक्तं तात्पर्ये ॥ आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः । मरुतश्चैव विश्वे च साध्याश्चैव तद्गताः । अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृता इति स्कान्दे ॥ मरुदादयः क्रमेण तद्गताः । आदित्यान्तर्गताः । मानुषाश्चत्वारो वर्णभेदेन । उक्तरीत्या देवानां त्रिशब्देन ग्रहणसम्भवेऽपि सुरादिभिरभिवन्द्यांघ्रियुगयुक्तत्वात् त्रिशब्दो ब्रह्मविष्णुरुद्रपरः किं न स्यात् । देवानां हिरण्यकशिपु सेवकत्वाभावस्य स्पष्टमनुक्तेरित्यतस्तात्पर्यम् ॥ उपायनं ददुः सर्वे विना देवान् हिरण्यक इति ॥ विषयसप्तमी । चतुर्थ्यर्थे वा । तर्हि पूर्वोत्तरविरोध इत्यतस्तात्पर्यम् ॥ अयज्ञभागेष्वपि तु सुरशब्दः प्रयुज्यते । यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिता इति चेति ॥ १३ ॥

जगुर्महेन्द्रासनमोजसाऽस्थितं विश्वावसुस्तुम्बुरुरस्मदादयः ।
गन्धर्वसिद्धा ऋषयोऽस्तुवन् मुहुर्विद्याधरा अप्सरसश्च पाण्डव ॥ १४ ॥

मन्दनन्दिनी — ओजसा स्वसामर्थ्येन । महेन्द्रासनं स्थितमास्थितम् ॥ १४ ॥

स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ।
इज्यमानो हविर्भागानग्रहीत् स्वेन तेजसा ॥ १५ ॥

मन्दनन्दिनी — इन्द्रादिपदत्यक्तमन्त्रैर्दीयमानान्हविर्भागान्स्वयमेवेज्यमान उद्देश्यः सन् अग्रहीदिति योजना ॥ १५ ॥

अकृष्टपच्या तस्यासीत् सप्तद्वीपवती मही ।
तथा कामदुघा द्यौश्च नानाश्चर्यपदं नभः ॥ १६ ॥

प्रकाशिका — अकृष्टपच्या कर्षणमन्तरेण सस्यादिपरिपाकोपेता ॥ १६ ॥

मन्दनन्दिनी — अकृष्टपच्योल्लेखमन्तरेण सस्यादिपरिपाकोपेता मही । कामदुघेच्छानुसारेण वर्षणाद्युपेता । नानाश्चर्यपदं नानाग्रहतारकाद्युपेतम् ॥ १६ ॥

रत्नाकराश्च रत्नानि तत्पत्न्यश्चोहुरूर्मिभिः ।
क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥

प्रकाशिका — रत्नाकराः समुद्रास्तत्पत्न्यो समुद्रपत्न्यो नद्यः । ऊहुः वहन्ति स्म । रत्नाकरानेवाह ॥ क्षारेति ॥ क्षारं लवणम् । सीधुशब्दः इक्षुरसपरः । क्षौद्रशब्दो मधुपर्यायः सुरापरः ॥ १७ ॥

मन्दनन्दिनी — क्षारेक्ष्वादयो रत्नाकराः समुद्रास्तत्पत्न्यो नद्यश्च रत्नानि । ऊर्मिभिस्तरङ्गैरूहुस्तीरं प्रापयामासुः ।। १७ ।।

शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः ।
दधार लोकपालानामेक एव पृथग् गुणान् ।। १८ ।।

प्रकाशिका — आक्रीडं क्रीडास्थानम् । गुणान् अस्योचितपुण्यफलादीन् पृथग्विधान् गुणान् वर्षणदहनशोषणादीन् ।। १८ ।।

मन्दनन्दिनी — आक्रीडं क्रीडास्थानम् । गुणान्पुष्पादिसम्पत्तीरूहुरित्यन्वयः । लोकपालानामिन्द्रादीनाम् । पृथग्गुणान्वर्षणपाचनादीन् । एक एव दधार ।। १८ ।।

स इत्थं निर्जितककुबेकराड् विषयान् प्रियान् ।
यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ।। १९ ।।

प्रकाशिका — निर्जिताः ककुभो येन स निर्जितककुप् । यथोपजोषं यथाप्रीतिम् ।। १९ ।।

मन्दनन्दिनी — यथोपजोषं यथाकामम् ।। १९ ।।

एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ।
कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ।। २० ।।

मन्दनन्दिनी — ब्रह्मशापं सनकादिशापम् ।। २० ।।

तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ।
अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ।। २१ ।।

मन्दनन्दिनी — संविग्ना भीताः ।। २१ ।।

तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ।
यद् गत्वा न निवर्तन्ते शान्ताः संन्यासिनोऽमलाः ।। २२ ।।

मन्दनन्दिनी — काष्ठायै तारतम्यान्तगायै । यत्र यः यत्पदम् ।। २२ ।।

इति ते संयतात्मानः समाहितधियोऽमलाः ।
उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ।। २३ ।।

मन्दनन्दिनी — संयतात्मनो निगृहीतमनस्काः ॥ २३ ॥

ओं नमो भगवते महापुरुषाय महात्मने ।
विशुद्धानुभवानन्दसन्दोहाय यतोऽभयम् ॥ २४ ॥

प्रकाशिका — यतो यस्माद्धरेरभयं भवति तस्मादित्यर्थः ॥ २४ ॥

मन्दनन्दिनी — यतोऽभयं यस्मादभयं लोकस्य ॥ २४ ॥

तेषामाविरभूद् वाणी अरूपा मेघनिस्वना ।
सन्नादयन्ती ककुभः साधूनामभयङ्करी ॥ २५ ॥

प्रकाशिका — अरूपा अशरीरिणी ॥ २५ ॥

मन्दनन्दिनी — अरूपाऽशरीरिणी ॥ २५ ॥

मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ।
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २६ ॥

प्रकाशिका — मद्दर्शनं मद्विषयकं ज्ञानम् । सर्वेषां श्रेयसामुपपत्तये प्राप्तये ॥ २६ ॥

मन्दनन्दिनी — सर्वश्रेयोपपत्तये सर्वश्रेयोलाभाय । अकारान्तोऽपि श्रेयःशब्दोऽस्ति । टालोपस्यासिद्धत्वं वा नाश्रितम् ॥ २६ ॥

ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् ।
तस्य शान्तिं करिष्यामि कालस्तावत् प्रतीक्ष्यताम् ॥ २७ ॥

मन्दनन्दिनी — दैतेयापसदस्य दैतेयक्षुल्लकस्य ॥ २७ ॥

यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ।
धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २८ ॥

मन्दनन्दिनी — स इति तच्छब्दश्रवणाद्यस्येत्यध्याहारः । आशु क्षिप्रम् ॥ २८ ॥

निर्वैराय प्रशान्ताय स्वसुताय महात्मने ।
प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २९ ॥

तात्पर्यम् — 'यत्र क्व च यशस्थानमन्येषामिति केशवः । सर्वत्रापि तु देवानामित्यन्यान्पूजयेत्कचिदि'ति च ॥ २९ ॥

प्रकाशिका — यदा वेदेषु देवेष्विति देवादिद्रोहं हिरण्यकनाशे निमित्ततयोक्त्वा प्रह्लादाय यदा द्रुह्येदिति प्रह्लादद्रोहे अतिशयेन तद्वधे निमित्ततयोच्यते । तेन देवाद्यपेक्षया प्रह्लाद अतिशयित इति भगवतोऽभिप्रेतमिति भाति । अतोऽत्र विवक्षितं भगवदभिप्रायं प्रमाणेनैव दर्शयति ॥ यत्रेति ॥ यत्र क्वच विषयेऽन्येषां देवव्यतिरिक्तानां प्रह्लादादीनां यशस्थानं यशोनिमित्तमस्तीति मत्वा देवानां तु सर्वत्रापि विषये यशोनिमित्तमस्तीति मत्वा अन्यान् प्रह्लादादीन् क्वजिद्ग्रन्थे पूजयेत् देवाद्यपेक्षयाऽतिशयितान्वदेदित्यर्थः । देवाः सर्वत्रापि विषये यशोनिमित्तवन्तः । अतस्तेषां यशोविस्ताराय नमया वाग्व्यापारः कर्तव्यः । प्रह्लादादयस्तु न तथेति मत्वा तेषां यशोविस्ताराय प्रह्लादाय यदा द्रुह्येदिति वाक्यं केशवेनोक्तमित्याशयः ॥ २९ ॥

मन्दनन्दिनी — प्रह्लादाय यदा द्रुह्येत्तदा वरोर्जितमपि हनिष्य इति । अत्र प्रह्लादद्रोहं निमित्तीकृत्य हननप्रतिज्ञया देवापेक्षया प्रह्लादे प्रीतिविशेष इति न मन्तव्यम् । देवानां सर्वदा प्रसिद्धत्वेन प्रह्लादादीनां देवाद्यपेक्षयाऽल्पभक्तानां यशःप्राप्त्यर्थमित्थं प्रतिज्ञोपपत्तेः । एतदुक्तं तात्पर्ये ॥ यत्र क्वच यशस्थानमन्येषामिति केशवः । सर्वत्रापि तु देवानामित्यन्यान्पूजयेत्कचिदिति च ॥ स्थानशब्दो निगूहस्थानमित्यत्रेव निमित्तवाची । यत्र क्वचित् यदा कदाचित् । सर्वत्रापि सर्वदाऽपि । यशः स्थानमित्यनुवर्तते । तथा च देवानां सर्वदा यशोनिमित्तं भवामीति हेतोरन्येषामपि कदाचिद्यशःस्थानं भविष्यमीत्यभिप्रायेण केशवोऽन्यानपि प्रह्लादाम्बरीषादीन्कदाचिदपूजयन्मानयामासेत्यर्थः ॥ २९ ॥

नारद उवाच–

इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ।
न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ ३० ॥

मन्दनन्दिनी — गतोद्वेगा गतभयाः । हतं मेनिरे । एष्यत्तु निश्चितं यत्तु तदतीतत्वेन भण्यत इत्युक्तेः ॥ ३० ॥

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः
प्रह्लादोऽभून्महान् तेषां गुणैर्महदुपासकः ।
ब्रह्मण्यः शीलसम्पन्नः सत्यसन्धो जितेन्द्रियः ॥ ३१ ॥

प्रकाशिका — सत्यसन्ध इति मूलं सत्यप्रतिज्ञ इत्यर्थः ॥ ३१ ॥

मन्दनन्दिनी — तेषां मध्ये महदुपासको महतः परमात्मन उपासकः । सत्यसन्धः । सत्यप्रतिज्ञः ॥ ३१ ॥

आत्मवत् सर्वभूतानामेकः प्रियसुहृत्तमः ।
दासवत् सन्नतार्याङ्घ्रिः पितृवद् दीनवत्सलः ॥ ३२ ॥

प्रकाशिका — सर्वभूतानामात्मवत् स्वात्मवत् एक एव प्रियः सुहृत्तमश्च । सम्यक् नता आर्याणामङ्घ्रयो येन ॥ ३२ ॥

मन्दनन्दिनी — सर्वभूतानां सज्जनानां मध्ये एको मुख्यः आत्मवत्प्रियः सुहृत्तमः प्रियः प्रीतिविषयः सुहृत्तमश्च । उत्तमहीनसमेषु वृत्तिप्रकारमाह ॥ दासवदित्यादिना ॥ ३२ ॥

भ्रातृवत् सदृशे स्निग्धो गुरुष्वीश्वरभावनः ।
विद्यार्थरूपजन्माढ्यैर्मानस्तम्भविवर्जितः ॥ ३३ ॥

प्रकाशिका — गुरुष्वीश्वरोऽस्तीति भावना यस्य । मानस्तम्भविवर्जितः अभिमानस्तब्धरहित इत्यर्थः ॥ ३३ ॥

मन्दनन्दिनी — विद्यादिनिमित्तैः प्राप्तगर्वस्तम्भादिदोषवर्जित इति विद्येत्यादेरर्थः ॥ ३३ ॥

नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ।
दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ॥ ३४ ॥

प्रकाशिका — व्यसनेषु सत्सु नोद्विग्नचित्तः । गुणेषु विषयेषु निस्पृहः । यतश्च वस्तुषु अवस्तुदृक् अनित्यत्वज्ञानी । शरीरस्य दान्तत्वमुपवासादिना । रहितः आसुरः असुरस्वभावो यस्य । असुरो जात्या ॥ ३४ ॥

मन्दनन्दिनी — व्यसनेषु सत्सु नोद्विग्नचित्तः । श्रुतादिषु गुणेषु शब्दादिविषयेषु निस्पृहः । यतोऽवस्तुदृक् अनित्यबुद्धिः । दान्तेत्यादि निगृहीतेन्द्रियप्राणशरीरमनाः । रहितासुर आसुरेण कर्मणा रहितः । राजदन्त्यादिवत्पूर्वनिपातः । जात्या त्वसुरः ॥ ३४ ॥

यस्मिन् महागुणा राजन् गृह्यन्ते कविभिर्मुहुः ।
न तेऽधुनाऽभिधीयन्ते यथा भगवतीश्वरे ॥ ३५ ॥

तात्पर्यम् — 'अन्येषां हरिसाम्यं तु किञ्चित्साम्यमुदीरितम् । सम्यक्साम्यं तु मत्स्यादेरिति शास्त्रस्य निर्णय' इति च ।। ३५ ।।

इति सप्तमतात्पर्ये चतुर्थोऽध्यायः ।। ४ ।।

प्रकाशिका — यस्मिन्विद्यमाना महागुणा गृह्यन्ते । अस्माकमेतादृशाः गुणा : स्युरिति प्रार्थ्यन्त इत्यर्थः । यथा भगवतीश्वरे इति प्रह्लादस्य गुणानाशे हरिसाम्यमुच्यमानं कथं घटत इत्याशङ्कां प्रमाणेनैव दर्शयति ।। अन्येषामिति ।। हरिव्यतिरिक्तानामित्यर्थः । तुशब्दोऽवधारणे । किञ्चित्साम्यमेवेत्यन्वयः । हरिसाम्यमुच्यते चेत्तत्रेति शेषः । मत्स्यादेर्हरिसाम्यमुच्यते तत्र सम्यक् हरिसाम्यमेवोदीरितमित्यर्थः । शास्त्रस्य द्विविधस्य ।। ३५ ।।

मन्दनन्दिनी — महागुणाः केचन गृह्यन्ते । गृहीता अपि नाभिधीयन्ते नाभिधातुं शक्यन्ते । यथा भगवानीश्वर इति दृष्टान्तीकरणेऽपि न तत्साम्यं ज्ञेयम् । सर्वथाऽसम्भवात् । किन्तु किंचित्साम्यम् । अत एवोक्तं तात्पर्ये - अन्येषां हरिसाम्यं तु किञ्चित्साम्यमुदीरितम् । सम्यक्साम्यं तु मत्स्यादेरिति शास्त्रस्य निर्णय इति ।। ३५ ।।

यं साधुगाथासदसि रिपवोऽपि सुरा नृप ।
प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ।। ३६ ।।

प्रकाशिका — मूले साधुगाथा सदसीति साधुकथावत्यां सभायामित्यर्थः । प्रतिमानं दृष्टान्तम् ।। ३६ ।।

मन्दनन्दिनी — रिपवोऽपि सुराः साधुगाथाः सज्जनविषयकगाथां कुर्वन्तो यं प्रतिमानं दृष्टान्तं कुर्वन्ति । किमुतान्ये भवादृशा इति ।। ३६ ।।

गुणैरलमसङ्ख्येयैर्माहात्म्यं तस्य सूच्यते ।
वासुदेवे भगवति यस्य नैसर्गिकी रतिः ।। ३७ ।।

प्रकाशिका — सूच्यते सुष्ठु कथ्यते ।। ३७ ।।

मन्दनन्दिनी — गुणैः । अलं कथितैरिति शेषः ।। ३७ ।।

न्यस्तक्रीडनको बालो जडवत् तन्मनाः सदा ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ।। ३८ ।।

प्रकाशिका — नैसर्गिकरतेर्लिङ्गान्याह ॥ न्यस्तक्रीडनक इति षड्भिः । कृष्णाख्यो ग्रहस्तेन वशीकृत आत्मा मनो यस्य ॥ ३८ ॥

मन्दनन्दिनी — न्यस्तेत्यादेर्निरस्तक्रीडासाधनक इत्यर्थः । जडवज्जडभरतवत् । विषयासक्तमूढवद्वा । कृष्णेत्यादेर्नारायणाख्याग्रहगृहीतमनाः इत्यर्थः ॥ ३८ ॥

आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन् ।
नानुसन्दध एतानि गोविन्दपरिरक्षितः ॥ ३९ ॥

प्रकाशिका — अनुसन्दधे सस्मार । एतान्यासनादीनि । गोविन्देन ध्यानविषयीभूतेन परिरक्षितः कृपयाऽभिवीक्षितः ॥ ३९ ॥

मन्दनन्दिनी — एतान्यासनादीनि ॥ ३९ ॥

क्वचिद् रुदति गोविन्दचिन्ताचञ्चलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥ ४० ॥

मन्दनन्दिनी — रुदति रोदिति । अनेन श्लोकत्रयेण सार्धेन भक्तलक्षणं सूचितम् ॥ ४० ॥

नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित् तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४१ ॥

प्रकाशिका — तद्भावनायुक्तः तध्यानेनोपेतः । तन्मयस्तत्प्रधानः । अनुचकार तदीयचेष्टां स्वयं कृतवान् ॥ ४१ ॥

मन्दनन्दिनी — तन्मयस्तदासक्तः ॥ ४१ ॥

क्वचिदुत्पुलकस्तूष्णीमशेषस्पर्शनिःस्पृहः ।
अस्पन्दप्राण आनन्दसलिलामीलितेक्षणः ॥ ४२ ॥

प्रकाशिका — स्पर्शेषु विषयेषु निःस्पृहः इच्छारहितः । अस्पन्दप्राणः प्राणचेष्टारहितः । आनन्दसलिलेन आनन्दाश्रुनिमित्तेन मीलिते ईषन्मीलिते ईक्षणे नेत्रे यस्य ॥ ४२ ॥

मन्दनन्दिनी — स्पर्शो विषयः । अस्पन्दप्राणोऽचञ्चलश्वासः ॥ ४२ ॥

स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिञ्चनसङ्गलब्धया ।
तन्वन् परां निर्वृतिमात्मनो मुहुर्दुःसङ्गहीनः स्वमनःशमं व्यधात् ॥ ४३ ॥

प्रकाशिका — अकिञ्चनानां महतां सङ्गेन सेवालक्षणेन लब्धया ॥ ४३ ॥

मन्दनन्दिनी — अकिञ्चनसङ्गलब्धया नारदादिसत्सहवासप्राप्तया ॥ ४३ ॥

तस्मिन् महाभागवते महाभागे महात्मनि ।
हिरण्यकशिपू राजन् अकरोदघमात्मजे ॥ ४४ ॥

प्रकाशिका — अघं द्रोहम् ॥ ४४ ॥

मन्दनन्दिनी — अघमपराधम् ॥ ४४ ॥

युधिष्ठिर उवाच–

देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ।
यदात्मजाय शुद्धाय पिताऽधात् साधवे अघम् ॥ ४५ ॥

प्रकाशिका — 'विद्वेषो दयिते पुत्रे' इति प्रथमाध्यायान्ते पृष्टमेवान्ते विस्मयेन पृच्छति ॥ देवर्ष इति ॥ तव त्वत्तः ॥ ४५ ॥

मन्दनन्दिनी — तव सकाशात् । आत्मजायेत्याद्युक्तिरपकरणायोग्यत्वद्योतनाय ॥ ४५ ॥

पुत्रान् विप्रतिकूलांश्च पितरः पुत्रवत्सलाः ।
उपालभन्ते शिक्षार्थं नैवाघमपरे यथा ॥ ४६ ॥

प्रकाशिका — उपालभन्ते आक्षिपन्ति । अघं मरणान्तिकं द्रोहम् । अपरे शत्रवः ॥ ४६ ॥

मन्दनन्दिनी — उपालभन्ते वञ्चयन्ति । भयं जनयन्तीति यावत् । अपरे शत्रवः ॥ ४६ ॥

किमुतानुवशान् साधून् तादृशान् गुरुदेवतान् ।
एतत् कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ।
पितुः पुत्राय यद् द्वेषो मरणाय प्रयोजितः ॥ ४७ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे चतुर्थोऽध्यायः ।

प्रकाशिका — पुत्राय प्रयोजितो विद्वेषः पितृमरणायाभूदिति यत्तदेव कौतूहलं विधम परिहर ॥ ४७ ॥

इति श्रीमद्भागवततात्पर्यटिप्पण्यां यदुपतिविरचितायां प्रकाशिकायां सप्तमस्कन्धे चतुर्थोऽध्यायः ॥

मन्दनन्दिनी — विधम परिहर । पितुः पित्रा ॥ ४७ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां चतुर्थोऽध्यायः ॥ ७-४ ॥

॥ अथ पञ्चमोऽध्यायः ॥

नारद उवाच—

पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः ।
शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥

प्रकाशिका — भगवद्भक्तिरेव प्रह्लादे विद्वेषकारणमिति वक्तुमाह ॥ पौरोहित्यायेत्यादिना ॥ काव्यः शुक्रः । अतस्तस्य शुक्रस्य शण्डामर्कनामानौ सुतौ ग्रहान्तिके न्यवसतामिति शेषः ॥ १ ॥

मन्दनन्दिनी — हिरण्यकशिपुप्रह्लादसंवादच्छलेन भक्तिस्वरूपं हरेर्निरतिशयस्वातन्त्र्यं च निरूपयत्यस्मिन्नध्याये । काव्यो भार्गवः । दैत्यराजगृहान्तिके पौरोहित्येन वासं चक्रतुः ॥ १ ॥

तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ।
पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥

प्रकाशिका — राज्ञा हिरण्यकशिपुना । प्रापितं, अध्ययनायेति शेषः । पाठ्यान् दण्डनीत्यादीन् ॥२॥

मन्दनन्दिनी — प्रापितं शिष्यत्वेन ॥ २ ॥

यत् तत्र गुरुणा प्रोक्तं शुश्रुवे न पपाठ ह ।
न साधु मनसा मेने स्वरूपासद्ग्रहाश्रयम् ॥ ३ ॥

प्रकाशिका — अपाठे हेतुर्न साध्विति ॥ हशब्दो यस्मादित्यर्थे । कुतो न साधु मेने इत्यत उक्तम् । स्वरूपेति ॥ स्वरूपतो वस्तुतोऽसत् यत्स्वातन्त्र्येण कर्तृत्वमात्मनः । तद्विषयो ग्रहः, दुराग्रहः, स एवाश्रयो यस्य ॥ ३ ॥

मन्दनन्दिनी — तत्र तत् । शुश्रुवे एव न पपाठ । नाभ्यासं चकार । स्वरूपासद्ग्रहाश्रयं स्वरूपेणासदसाधुग्रहः पक्षः । वैष्णवसिद्धान्तविरुद्ध इति यावत् । स आश्रयो यस्य तत् । मनसा न साधु मेन इति योजना ॥ ३ ॥

एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव ।
पप्रच्छ कथ्यतां वत्स मन्यते साधु यद् भवान् ॥ ४ ॥

मन्दनन्दिनी — यत्साधु मन्यते तत्कथ्यताम् ॥ ४ ॥

प्रह्लाद उवाच–

तत् साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।
हित्वाऽऽत्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥

प्रकाशिका – असद्ग्रहादविद्यमानस्वातन्त्र्यविषयकदुराग्रहात् ॥ आत्मनः स्वस्य पातो निरयं पतनं यस्मात् । अन्धकूपं अन्धकूपवन्मोहजनकम् । वनं गतः सन् हरिमाश्रयीतेति यत्तत्साधु संसारनिवर्तकं मन्य इत्यन्वयः ॥ ५ ॥

मन्दनन्दिनी — स्वेन मतं साध्वाह ॥ तदिति ॥ हे असुरवर्य । असद्ग्रहाद्दुर्विषयाभिनिवेशात्सदा समुद्विग्नधियां नित्यं चञ्चलमनसामात्मपातं स्वस्य निरयपातकारणमन्धकूपं प्रकाशरहितकूपस्थानापन्नं गृहं हित्वा वनं सज्जनसङ्गलक्षणं गतो हरिमाश्रयेदिति यत्तत्साधु मन्य इति योजना ॥ ५ ॥

नारद उवाच–

श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमीहिताः ।
जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६ ॥

प्रकाशिका – परपक्षो विष्णुः सः समीहितः प्रतिपाद्यतयेष्टो यासाम् ॥ ६ ॥

मन्दनन्दिनी — परपक्षसमीहिताः शत्रुपक्षनिष्ठा गिरः ॥ ६ ॥

सम्यग् विधार्यतां बालो गुरुगेहे द्विजातिभिः ।
विष्णुपक्षप्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ ॥

मन्दनन्दिनी — विष्णुपक्षप्रतिच्छन्नैर्वस्तुतो विष्णुपक्षैः प्रतिच्छन्नैर्गूढैरस्य धीर्यथा न भिद्येत तथाऽयं बालो विधार्यतां विविक्ततया धार्यतामिति योजना ॥ ७ ॥

गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः ।
प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः ॥ ८ ॥

मन्दनन्दिनी — प्रह्लादज्ञानं स्वारसिकमाहितं वेति ज्ञातुं सामभिः समपृच्छत् ॥ ८ ॥

वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा ।
बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥

प्रकाशिका – बालान् अति सर्वान् बालान् अतिक्रम्य । इतरेषां बालानामविद्यमान इति यावत् । तुभ्यं तव । कुतोऽभूदिति शेषः ॥ ९ ॥

मन्दनन्दिनी — बालान् अति अतिक्रम्यैष बुद्धिविपर्ययः । तुभ्यं तव कुतोऽभूदिति योजना ॥ ९ ॥

बुद्धिभेदः परकृत उताहो ते स्वतो भवेत् ।
भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ॥ १० ॥

मन्दनन्दिनी — गुरूणां समीपे । कुलनन्दन दैत्यकुलनन्दन ॥ १० ॥

प्रह्लाद उवाच–

परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ।
विमोहितधियां दृष्टः तस्मै भगवते नमः ॥ ११ ॥

प्रकाशिका – अहो भगवतः सामर्थ्यं, यस्य मायया मोहिता भवन्तो मामित्थं पृच्छन्तीत्याशयेनाह ॥ परः स्वश्चेति ॥ परः स्वातन्त्र्येण कर्ता । स्वः स्वयं स्वातन्त्र्येण कर्तेत्याग्रहः । जीवेष्वविद्यमानस्वातन्त्र्यविषयो दुराग्रहः । परमात्मन एव स्वातन्त्र्येण कर्तृत्वाज्जीवानां तद्वशत्वादित्याशयः । यस्य भगवतो माययेच्छया कृतः । विमोहितधियां एषां दृष्टश्च तस्मै इत्थं जगन्मोहकाय मेतादृशो मोहो न दत्तोऽतो न मया प्रतिकर्तुं शक्यमित्याशयेन नम इत्युक्तम् ॥ ११ ॥

मन्दनन्दिनी — उत्तरं वक्तुं मङ्गलमाचरति ॥ पर इति ॥ विमोहितधियामज्ञानावृतमनसां पुंसां तत्र विषये परो देवतादिः स्वतन्त्रोऽत्र विषये स्वात्माहं स्वतन्त्र इति दृष्टोऽनुभवसिद्धोऽसद्ग्रहो दुरभिमानः । यन्मायया यस्य परमात्मनो मायया मोहिन्या कृतः । तस्मै भगवते नम इति योजना ॥ ॥ ११ ॥

स यदाऽनुगतः पुंसां पशुबुद्धिर्विभिद्यते ।
अन्य एष तथाऽन्योऽहमिति देहगताऽसती ॥ १२ ॥

तात्पर्यम् — 'स्वातन्त्र्येणान्यसद्भावनिषेधाय श्रुतिस्त्वियम् । अन्योऽसावन्योऽहमि' ति पश्यन्नज्ञ इति स्म ह । आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः । आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु । स्वरूपसत्ता कर्तृत्वं भोगो मोक्षस्तथैव च । मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदे' ति ब्रह्मतर्के ॥ १२ ॥

प्रकाशिका – यन्माययेत्युक्तं प्रपञ्चयति ॥ स यदेति ॥ सः परमात्मा यदाऽनुगतः योग्यतादिकमनुसृत्य प्रेरयति तदा पशूनामिव स्थिता बुद्धिर्विभिद्यतेऽनेकस्वतन्त्रविषया भवति । तत्कथमित्यत उक्तं अन्य इति ॥ अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरिति श्रुत्यर्थानुवादपरेऽस्मिन् श्लोके जीवपरयोर्भेदो निराक्रियत इति भाति । अतस्तां श्रुतिं स्मृत्यैव सम्यग्व्याख्याति ॥ स्वातन्त्र्येणेति ॥ अन्योऽसावन्योऽहमिति श्रुतेरर्थानुवादोऽयमितीयं श्रुतिः स्वातन्त्र्येणान्यकर्तृसद्भावनिषेधाय प्रवृत्ता न स्वरूपतो भेदनिराकरणाय । तस्य श्रुतिसिद्धत्वादित्याशयेन स्म हेत्युक्तम् । तामेव श्रुतिं अर्थतः पठति ॥ आत्मानमिति ॥ अनेन य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति श्रुतिरुपात्तेति ज्ञातव्यम् । इति श्रुतिरिति शेषः । अनेनैष आत्मा निरुच्यत इति मूलमुक्तार्थमिति ज्ञातव्यम् । स्वातन्त्र्येणान्यसद्भावनिषेधायेत्युक्तमेव विशदयन्नुपसंहरति ॥ तत्, तस्मादिति । जीवाः ब्रह्मणो भिन्नाः । स यदा तु विशेषेण ब्रह्मणोऽधीना एव न स्वतन्त्रा इति श्रुत्यर्थ इति शेषः । तमेव विशेषं प्रपञ्चयन्नाह ॥ स्वरूपेति ॥ आद्य एवकारश्चशब्दार्थः । कर्तृत्वमित्यनेन सम्बध्यते । चशब्दो भोग इत्यनेन । द्वितीयस्यैवकारस्य विष्णोरेवेति सम्बन्धः । ततश्चैष परमात्मा अन्यः स्वातन्त्र्येण कर्ता । तथाऽहम् । अहमप्यन्यः स्वातन्त्र्येण कर्तेति विभिद्यते सा बुद्धिः पशुबुद्धितुल्येति मूलं व्याख्येयमित्याशयः । ननु सज्जीवानां कथमेतादृशी बुद्धिरित्यत उक्तं ॥ देहगतेति ॥ स्वरूपातिरिक्तमनोगतेत्यर्थः । कुतोऽस्याः पशुबुद्धितुल्यत्वमित्यत उक्तं ॥ असतीति ॥ शास्त्रविचारजन्या नेत्यर्थः ॥ १२ ॥

मन्दनन्दिनी — उक्तमेव विशदयति ॥ स यदेति ॥ स परमात्मा पुंसां यदा वक्ष्यमाणभ्रान्तेरनुगतोऽनुकूलस्तदा एषो ब्रह्मादिर्देवोऽन्यः स्वतन्त्रः । तथाऽहमन्यः स्वतन्त्र इत्याकारिका देहगता लिङ्गदेहगता । मनोगतेति यावत् । असती भ्रान्तिरूपा पशुबुद्धिः पशुवद्-सद्बुद्धिर्विभिद्यते उत्पद्यते । तथाहि श्रुतिः । अथ योऽन्यां देवतामुपास्ते । अन्योऽसावन्योऽहमस्मीति । न स वेद यथा पशुरिति । असौ ब्रह्मादिरन्यः स्वतन्त्रोऽहमन्यः स्वतन्त्र इत्यर्थः । न चेयं श्रुतिर्जीवस्य

परमात्मना स्वरूपतो निषेधति तथैव प्रतीतेरिति वाच्यम् । य आत्मानमन्तरो यमयतीति जीवनियामकत्वेनान्तःशब्देन च स्वरूपतो भेदस्यैवोक्त्या तद्व्याघातापत्तेः । व्याख्याता चैषा श्रुतिर्बृहद्भाष्ये । चर्चिता च न्यायामृते । तदेतत्सर्वमभिप्रेत्य तात्पर्यम् ।। स्वातन्त्र्येणान्यसद्भावनिषेधाय श्रुतिस्त्वियम् । अन्योऽसावन्योऽहमिति पश्यन्नज्ञ इति स्म ह । आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः । आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु । स्वरूपसत्ता कर्तृत्वं भोगो मोक्षस्तथैव च । मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदेति ब्रह्मतर्के ।। इयं श्रुतिः केत्यतोऽर्थतोऽनुवदति ।। अन्योऽसावित्यादिनेति स्म हेत्यन्तेन । प्रतीतेः स्वरूपभेदनिषेध एवार्थः किं न स्यादित्यत आह ।। आत्मानमिति ।। तत्तस्माद्ब्रह्मणः परब्रह्मणस्तधीनत्वमेव स्फुटयति सर्वं विष्णोर्वश इति । किं तत्सर्वमित्यत उक्तम् ।। स्वरूपसत्ता कर्तृत्वमित्यादि ।। १२ ।।

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरन्वयानुक्रमणो निरुच्यते ।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ।। १३ ।।

प्रकाशिका – ननु स्यादेवं यदि परमात्मन एव स्वातन्त्र्येण कर्तृत्वं प्रामाणिकं स्यात्तदेव कुत इत्यत आह ।। स एष इति ।। स एष एक एव स्वातन्त्र्येण कर्ता आत्मा परमात्मा निरुच्यते । नान्योऽतोऽस्ति कर्ता । 'द्रव्यं कर्म च कालश्चेत्यादौ प्रतिपाद्यत इत्यर्थः । नन्वेवमस्मदादिभिः कुतो न ज्ञायत इत्यत उक्तं ।। स्वपरेति ।। स्वः स्वयं स्वातन्त्र्येण कर्ता । परोऽपि स्वातन्त्र्येण कर्तेत्यबुद्धिभिर्यथार्थज्ञानविरोधिज्ञानवद्भिः पुरुषैः । दुरन्वयानुक्रमणः दुरन्वयं दुर्ज्ञानं अनुक्रमणं प्रवर्तनं यस्य स तथा । मिथ्याज्ञानित्वाद्युष्मदादीनां नैतादृशं सम्यग्ज्ञानमित्याशयः । नन्वेतादृशं मिथ्याज्ञानमस्मदादीनां कुत इत्यतोऽत्र कैमुत्यमाह ।। ब्रह्मादय इति ।। ब्रह्मा आदिः कारणं येषां मरीच्यादीनां त इत्यर्थः । अतद्गुणसंविज्ञानो वा बहुव्रीहिः । हिशब्दोऽप्यर्थे । इदानीं तैः पृष्टस्योत्तरमाह ।। एष इति ।। स्वातन्त्र्येण कर्ता हरिरित्यर्थः । भिनत्ति युष्मदादिमतिभ्यो भिन्नां करोति । स्वस्यैव स्वातन्त्र्येण कर्तृत्वादिविषयां करोतीत्यर्थः ।। १३ ।।

मन्दनन्दिनी — ब्रह्मणो दुर्विज्ञेयत्वं बुद्धिरेषा पराकृतोताहो ते स्वत इत्यस्योत्तरं चाह ।। स एष इति ।। स एष आत्मा परमात्मा । स्वपरेत्यविभक्तिको निर्देशः । सुब्लोपो वा । स्वपरस्वातन्त्र्यविषयिण्यबुद्धिर्विपरीतबुद्धिर्येषां तैर्दुरन्वयानुक्रमणो दुरवगममाहात्म्यो निरुच्यते निरूप्यते । यद्वर्त्मनि यत्सरूपैर्वेदवादिनो वेदार्थज्ञानकुशला ब्रह्मादयः । अतद्गुणसंविज्ञानो बहुव्रीहिः । रुद्रादय इत्यर्थः । एष आत्मा भिनत्ति मे मतिमिति योजना ।। १३ ।।

यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसन्निधौ ।
तथा मे भिद्यते चेतश्चक्रपाणौ यदृच्छया ।। १४ ।।

प्रकाशिका – अत्र किं कारणमित्यतस्तदिच्छैव कारणमित्येतद्दृष्टान्तेनोपपादयति ।। यथेति ।। अयः लोहः । आकर्षस्यायस्कान्तस्य सन्निधौ समीपे स्वयमेव दृष्टकारणाभावेऽपीश्वरेच्छया भ्राम्यति लोहमुद्दिश्य चलनशक्तिमद्भवति । यदृच्छया तदिच्छयैव चक्रपाणौ विषये भिद्यते युष्मद्बुद्धितो विलक्षणा जायत इत्यर्थः ।। १४ ।।

मन्दनन्दिनी — एतदर्थं सदृष्टान्तमाह ।। यथेति ।। ब्रह्मन् शण्डामर्क । आकर्षसन्निधावयस्कान्तसन्निधौ । स्वयं भ्राम्यति स्वतो गच्छति । यदृच्छया तदिच्छया भिद्यते तद्विषयीकरणशक्तीक्रियते । अयोगतिवच्चेतोगतिरपि नैसर्गिकीति भावः ।। १४ ।।

नारद उवाच–

एतावद् ब्राह्मणायोक्त्वा विरराम महामतिः ।
तं निर्भर्त्स्याथ कुपितः सुदीनो राजसेवकः ।। १५ ।।

प्रकाशिका – सुदीनः वाचा शिक्षणेऽशक्तः राजसेवक उवाचेति शेषः ।। १५ ।।

मन्दनन्दिनी — उपररामोपरतवान् । सुदीन इत्यनेन वाचा शिक्षणासामर्थ्यं राजसेवक इत्यनेन प्रह्लादोक्तं सम्यगिति जानतोऽपि राजसेवनाय शिक्षकत्वमिति सूचितम् ।। १५ ।।

आनीयतामरे वेत्रमस्माकमयशस्कृतः ।
कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ।। १६ ।।

प्रकाशिका – कुलाङ्गारस्य कुलनाशकवह्नितुल्यस्योपायानां मध्ये चतुर्थो दमो दण्ड उदितः उक्तः ।। १६ ।।

मन्दनन्दिनी — अस्य वाचा शिक्षणानर्हस्य । चतुर्थो दमो दण्ड उदितो विहितः ।। १६ ।।

दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः ।
तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ।। १७ ।।

प्रकाशिका – तस्य दैतेयचन्दनवनस्य यन्मूलं तदुन्मूले उन्मूलने छेदने इति यावत् । यः परशुस्थानीयो विष्णुस्तस्य नालायितः नालमिवाचरन् । यथा परशोः छेदकत्वे काष्ठविशेषनिर्मितो दण्डः सहकारी तं विना छेदनासम्भवात् । तथायं विष्णोर्दैत्यमूलछेदने सहकारी जात इत्यर्थः ।। १७ ।।

मन्दनन्दिनी — दैतेयचन्दनवनमूलोन्मूलकपरशुस्थानापन्नस्य विष्णोर्हरेर्नालायितोऽवष्टम्भकदण्डायितः । एतमवष्टभ्य हरिः छिनत्तीति भावः ॥ १७ ॥

इति तं विविधोपायैर्भीषयन् तर्जनादिभिः ।
प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥

प्रकाशिका – त्रिवर्गस्योपपादनं प्रतिपादनं यस्मिंस्तच्छास्त्रं ग्राहयामास अध्यापयामास ॥ १८ ॥

मन्दनन्दिनी — त्रिवर्गस्य धर्मार्थकामलक्षणपुरुषार्थत्रयस्य ॥ १८ ॥

तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ।
दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतम् ॥ १९ ॥

प्रकाशिका – ज्ञातं ज्ञेयं सामाद्युपायानां चतुष्टयं येन तं ज्ञात्वा । दैत्येन्द्रं प्रति । मात्रा मृष्टं उद्वर्त्य स्नापितम् ॥ १९ ॥

मन्दनन्दिनी — ज्ञातज्ञेयचतुष्टयं पुरुषार्थचतुष्टयम् ॥ यद्यपि त्रिवर्गस्येत्युक्तम् । तथाऽपि ज्ञात्वा शिवं शान्तिमत्यन्तमेतीत्यादेरापातार्थप्रतीतिमालम्ब्य मोक्षस्योपपादनं चोपलक्षणीयम् । यद्वा ज्ञेयचतुष्टयं सामाद्युपायचतुष्टयम् । मातृमृष्टं मात्रा मृष्टम् । निर्मलं स्नापितमलङ्कृतम् भूषितम् ॥ १९ ॥

पादयोः पतितं बालं प्रतिनन्द्याशिषाऽसुरः ।
परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥

मन्दनन्दिनी — आशिषा प्रतिनन्द्य सन्तोष्य । निर्वृतिमानन्दम् ॥ २० ॥

आरोप्याङ्कमवघ्राय मूर्धन्यश्रुकलाम्बुभिः ।
आसिञ्चन् विकसद्वक्त्रमिदमाह युधिष्ठिर ॥ २१ ॥

प्रह्लादानूच्यतां तात स्वधीतं किञ्चिदुत्तमम् ।
कालेनैतावताऽऽयुष्मन् यदशिक्षद् गुरोर्भवान् ॥ २२ ॥

प्रकाशिका – स्वधीतं सुष्ठु अधीतं पठितम् ॥ २२ ॥

मन्दनन्दिनी — मूर्धन्यवघ्रायाषिंचत् । मूर्धानमिति विभक्तिविपरिणामेनान्वेति । आयुष्मन्निति सम्बोधनम् । अशिक्षत् । अनुदात्तेतोपि व्यत्ययेन परस्मैपदम् । विद्यां मा दत्तेत्यर्थः ॥ २२ ॥

प्रह्लाद उवाच–

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥

तात्पर्यम् — आत्मस्थत्वेन वेदनमात्मनिवेदनम् । 'मुक्तस्यापि ममान्तस्थो नियन्तैव हरिः सदा । इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनमि'ति च ॥ २३ ॥

प्रकाशिका – पादसेवनं परिचर्याख्यम् । रक्षिष्यतीति विश्वासः । आत्मनिवेदनमित्यस्य देहसमर्पणमिति व्याख्यानमप्रामाणिकमिति भावेन स्वयं तद्व्याख्याति ॥ आत्मस्थत्वेनेति ॥ नियन्तृतयेति शेषः । तथा चात्मनीति सप्तम्यन्तं पदं आधारवाचीत्युक्तं भवति । अत्र प्रमाणमाह ॥ मुक्तस्यापीति ॥ २३ ॥

मन्दनन्दिनी — स्वधीतमनुवक्ति ॥ श्रवणमित्यादिना ॥ विष्णोरिति सर्वत्रान्वेति । श्रवणं श्रोत्रेण माहात्म्यस्य । कीर्तनं नाम्ना वाचा । मनसा स्मरणम् । पादसेवनं हस्ताभ्याम् । एतच्च भगवत्प्रतिमाभूतभक्तद्वारा । अर्चनं तुलस्यादिभिर्वन्दनमभिवादनम् । स्तुतिर्वा । दास्यं दासोऽहमित्यनुसन्धानम् । सख्यमत्यन्तस्नेह आत्मनिवेदनमात्मनि सर्वदा नियामकत्वेनास्थितत्व-ज्ञानम् । ननु दासोऽहमिति समर्पणं दास्यमिति पुनरुक्तेरत एवोक्तं तात्पर्ये ॥ आत्मस्थत्वेन वेदनमात्मनिवेदनम् । मुक्तस्यापि ममांतस्थो नियन्तैव हरिः सदा । इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनमिति च ॥ २३ ॥

इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥

प्रकाशिका – नवलक्षणेति मूलम् । नवानि लक्षणानि ज्ञापकानि यस्याः सा तथा । येनाधीतेन भगवति विष्णौ चेद्भक्तिस्तस्मिन्नर्पिता सती क्रियते । तर्ह्येव तदुत्तममधीतमहं मन्ये ॥ २४ ॥

मन्दनन्दिनी — मूले इत्युक्तप्रकारेण नवलक्षणा नवप्रकारा भक्तिर्भगवति विष्णौ । सप्तम्यर्थविवरणमर्पितेति । तस्यार्थो विषयिका क्रियत इति । येनाधीतेन नवलक्षणा भक्तिर्विष्णुविषयिका भवति । तदधीतं साधु इति मूलार्थः । येनाधीतेन निमित्तेन पुंसाऽर्पिता क्रियते तदधीतमुत्तमं मन्ये इति वा योजना ॥ २४ ॥

नारद उवाच–

निशम्यैतत् सुतवचो हिरण्यकशिपुस्तदा ।
गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥

मन्दनन्दिनी — प्रस्फुरिताधरश्चञ्चलीकृताधरोष्ठः ॥ २५ ॥

हिरण्यकशिपुरुवाच–

ब्रह्मबन्धो किमेतत् ते विपक्षं श्रयताऽसता ।
असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥ २६ ॥

मन्दनन्दिनी — एतद्दुर्वृत्तं किमित्यत आह ॥ विपक्षमिति ॥ मामनादृत्य विपक्षं श्रयता त्वया बालोऽसारं ग्राहित इति यदेतदिति योजना ॥ २६ ॥

सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ।
तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥

प्रकाशिका – ते त्वया मित्रत्वेन प्रतीयमानस्यापि तवास्मद्विरोधाचरणं नासम्भावितमित्याह ॥ सन्ति हीति ॥ दुष्टं मैत्रं मित्रत्वं येषान्ते तथा । अघं अपराधाचरणं पातकिनां पापफलेन रोगः यथोदेति तथेत्यर्थः । तथाच तेष्वेको भवानित्याशयः ॥ २७ ॥

मन्दनन्दिनी — सन्ति स्वामिद्रोहिण इत्याह ॥ लोक इति ॥ तेषां दुर्मैत्रादीनामघं मनसि विद्यमानं गूढद्वेषः पातकिनां रोग इव । काले कालविशेषे उदेतीति योजना ॥ २७ ॥

गुरुपुत्र उवाच–

न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ।
नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं क्व तदात्ममानः ॥ २८ ॥

तात्पर्यम् — **क्व तदात्ममानो मम ? ॥ २८ ॥**

इति सप्तमतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

प्रकाशिका – प्रणीतं पठितम् । आत्ममान इत्यत्रापेक्षितं पूरयति । क्व तदात्ममान इति । तथा च तदा तस्मिन्पक्षे मम दुर्मित्रत्वं इति यावत् । मम आत्ममानः ब्रह्मज्ञानं क्व कथं घटेत । न हि ब्रह्मज्ञानिषु छद्माचरणादिदोषः सम्भावितः । अतो मयि दोषारोपं मा कृथा इति मूलार्थ इति भावः ॥ २८ ॥

मन्दनन्दिनी — हे राजन् । अस्य प्रह्लादस्येयं विष्णुविषयिणी मतिर्नैसर्गिकी स्वाभाविकी । अतो मयि मन्युं नियच्छ । मामनादृत्येत्युक्तम् । तदा तत्र मतेर्नैसर्गिकत्वे त्वदनादरणनिमित्त-भूतोऽहङ्कारलक्षणो मान आत्मनो मम क्व । तथा च नासङ्गतिरत एवोक्तं तात्पर्ये क्व तदात्ममानो ममेति ॥ २८ ॥

नारद उवाच–

गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ।
न चेद्गुरुमुखीयं ते कुतोभद्रासती मतिः ॥ २९ ॥

प्रकाशिका – गुरुमुखी गुरुवाक्यजनिता । हे भद्र असती मतिः कुत उत्पन्ना ॥ २९ ॥

मन्दनन्दिनी — इयं मतिर्गुरुमुखी गुरुमुखादागता न चेत्तर्हि कुत आगतेति योजना ॥ २९ ॥

प्रह्लाद उवाच–

मतिर्न कृष्णे परतः स्वतोऽपि वा मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम् ॥ ३० ॥

प्रकाशिका – महीयसां पादरजोभिषेक एवात्र कारणमिति वक्तुं भवादृशां विषयासक्तानां अत्राधिकारो नास्तीत्याह । मतिरिति । परतः गुरोः स्वतो वा । मिथः अन्योन्यतो वा । नाभिपद्येत न सम्पद्येत । केषां गृहव्रतानां ग्रहाश्रमोपयुक्तकाम्यकर्मकर्तॄणाम् । अत एवादान्तैः अनिगृहीतैर्गोभि-रिन्द्रियैर्हेतुभूतैस्तामिस्रं नरकाद्यनर्थम् । गृहेऽपि नापूर्वो भोग इत्याह । पुनः पुनरिति । चर्वितस्य भुक्तस्यैव चर्वणं भोगो येषाम् ॥ ३० ॥

मन्दनन्दिनी — पुनः पुनश्चर्वितचर्वणानां भुक्तानेव विषयान् भुञ्जानानाम् । अदान्तैरनिगृहीतेन्द्रियैः । कृताभिर्गोभिर्नीतिशास्त्रादिवाग्भिः । तमिस्रं संसारं विशतां गृहव्रतानाम् । स्वतः परतो वेत्येवं मिथः परस्परम् । कृष्णे नारायणे मतिर्नाभिपद्येत इति योजना ॥ ३० ॥

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थभावाः ।
अन्धा यथान्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥

प्रकाशिका – एतदेव स्पष्टमाह । न त इति । स्वार्थगतिं स्वेषां पुरुषार्थभूतं गम्यम् । बहिरर्थभावाः बाह्यविषयासक्ताः । ननु गुरूपदेशेन तेऽपि विष्णुं कुतो न जानन्तीत्यत आह । अन्धेति । अन्धैरुपनीयमाना अन्धाः यथा पन्थानं न विदुः किन्तु गर्ते पतन्ति । तथा तेऽपीशस्य तंत्यां

दीर्घरज्जुभूतायां वाचि वेदलक्षणायामुरुदाम्नि ब्राह्मणादिबहुनामाख्य दाम्नि बद्धा भवन्ति । ब्राह्मणाद्यधिकृतकाम्यकर्मबोधकवेदतात्पर्यानभिज्ञाः । गुरूपदिष्टमोक्षमार्गं विहाय संसार एव पतन्तीत्याशयः ॥ ३१ ॥

मन्दनन्दिनी — तदेव स्पष्टयति ॥ न त इति ॥ ये दुराशयाः स्वतो दुष्टमनस्का बहिरर्थभावा आपातप्रतीतार्थज्ञानवन्तो गुरुभिरपि तादृशैरन्धैरुपनीयमाना अन्धा यथा तथोपनीयमाना उरुदाम्नि स्वर्गादिलक्षणफलेन्द्रादिलक्षणदेवताब्राह्मणादिलक्षणाधिकारिनामलक्षणदामवत्याम् । वाचि वेदलक्षणायामीशतंत्यां भगवदीयप्रतिबन्धकतंत्यां बद्धास्ते स्वार्थगतिं स्वपुरुषार्थप्रापकं विष्णुं न विदुरिति योजना । विषयाभिलाषवतां विष्णुज्ञानं न जायत इति भावः ॥ ३१ ॥

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥

प्रकाशिका – तर्हि कदैतेषां विष्णौ मतिरित्यपेक्षायामाह । नैषामिति ॥ यावदेषां गृहव्रतानां मतिर्निष्किंचनानां निवृत्तविषयाभिलाषाणां महीयसां महत्तमानां पादरजोभिषेकं न वृणीत तावन्तं कालं उरुक्रमस्यांघ्रिं न स्पृशति न विषयीकरोति । उरुक्रमांघ्रिस्पर्शस्य किं फलमत आह । अनर्थेति । संसारनिवृत्तिर्यदर्थो यस्योरुक्रमांघ्रिस्पर्शाख्यार्थः प्रयोजनम् । अनेन भद्रा सती मतिरिति स्पृष्टस्य महीयसां पादरजोभिषेक एवात्र हेतुरिति वदतोत्तरमुक्तमिति ज्ञातव्यम् ॥ ३२ ॥

मन्दनन्दिनी — भगवदेकान्तभक्तपादसेवनं विना गृहस्थानां भगवति मतिर्न जायत इत्याह ॥ नैषामिति ॥ निष्किञ्चनानां विषयानपेक्षाणां महीयसां महात्मनां पादरजोभिषेकं पादरजसां शिरसा धारणं यावन्न वृणीत वृणीरन् । तावदेषां गृहस्थानां मतिः । अनर्थापगमः संसारनिवृत्तिर्यदर्थः । परस्य प्रयोजनं तं उरुक्रमांघ्रिं उरुक्रमस्य विष्णोरन्घ्रिं न स्पृशतीति योजना ॥ ३२ ॥

नारद उवाच–

इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा ।
अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ।
आहामर्षरुपाऽऽविष्टः कषायीकृतलोचनः ॥ ३३ ॥

प्रकाशिका – अन्धीकृतात्मा विवेकरहितमनाः । निरस्यत चिक्षेप । अमर्षोऽसहनं तेन सहितया रुषा आविष्टो व्याप्तः । कषायीकृते ताम्रे लोचने यस्य ॥ ३३ ॥

मन्दनन्दिनी — अन्धीकृतात्मा जडीकृतमनाः । स्वोत्सङ्गात्स्वांकात् ॥ असहनप्रयुक्तकोपाविष्ट इत्यमर्षेत्यादेरर्थः । कषायीभूतलोचनो रक्तनेत्रः ॥ ३३ ॥

हिरण्यकशिपुरुवाच –

वध्यतामाश्वयं वध्यो निस्सारयत नैर्ऋताः ।
अयं मे भ्रातृहा शोच्यो हित्वा स्वान् सुहृदोऽधमः ॥ ३४ ॥

प्रकाशिका – हे नैर्ऋताः राक्षसाः । वध्यत्वे हेतुः । यतोऽयं मे भ्रातृहा कथं यो विष्णोः पादावर्चति तत्पक्षपातीत्यर्थः । सोऽयमित्यन्वयः ॥ ३४ ॥

मन्दनन्दिनी — यः प्रह्लादो मे भ्रातृहा भ्रातृघ्नः स्वस्य पितृव्यहन्तुर्विष्णोः पादौ स्वान् सुहृदो हित्वाऽर्चति । अयमधमः शोच्य इति योजना ॥ ३४ ॥

पितृव्यहन्तुः पादौ यो विष्णोर्दासवदर्चति ।
विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ॥
सौहृदं दुस्त्यजं पित्रोरत्यजत् पञ्चहायनः ॥ ३५ ॥

प्रकाशिका – विष्णुरप्यसमंजसमेनं किमिति स्वीकृतवानित्याशयेन आह ॥ विष्णोर्वेति ॥ कथमसमंजसमित्यत आह । सौहृदमिति । ओहाज्जहौ (अत्र मूले कः सम्भावितास्थात्?) ॥३५॥

मन्दनन्दिनी — अयं विष्णोर्वा साधु सहायं किं करिष्यति । अभक्तत्वादिति भावः । पित्रोः पितृपितृव्ययोः ॥ ३५ ॥

परोऽप्यपत्यं हितकृद् यथौषधं स्वदेहजोऽप्यामयवत् सुतोऽहितः ।
छिन्द्यात् तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विसर्जनात् ॥ ३६ ॥

प्रकाशिका – ननु तवायं सुतोऽतः कथं वध्य इत्यत आह । परोऽपीति । अस्वकीयोऽपीत्यर्थः । आस्तां ममतास्पदस्य कथा ॥ स्वांगमपि यच्चरणादि तदप्यात्मनोऽहितं चेच्छिंद्यादेवेत्यर्थः ॥ ३६ ॥

मन्दनन्दिनी — स्वकीयत्वपरकीयत्वे रक्षणहननयोर्न प्रयोजके । किंतु हिताहितत्वे एवेत्याशयेनाह ॥ परोऽपीति ॥ परकीयमप्यपत्यमरण्यस्थमप्यौषधं यथा तथा हितकृद्भवति । स्वदेहजोऽपि सुत आमयवदहितः । अनेन स्वकीयत्वपरकीयत्वे हिताहितत्वयोरप्रयोजक इत्युक्तं भवति । यत्त्वात्मनोऽहितं तदङ्गमुताङ्गमपि छिन्द्यात् । कुत इत्यत आह ॥ शेषमिति ॥ तद्विसर्जनाच्छेषमङ्गं जीवति यत इति योजना । यथा सर्पदष्टाङ्गुलिं छित्वा शेषमङ्गं जीवति । तथा वयमप्येतदपत्यं हत्वा जीवेमेति भावः ॥ ३६ ॥

सर्वैरुपायैर्हन्तव्यः सम्भोगशयनासनैः ।
सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥ ३७ ॥

प्रकाशिका – अतः सर्वैरुपायैर्हन्तव्यः । सम्भोगो भोजनम् । भोजनादिषु विषादिप्रयोगैरित्यर्थः । यथा दुष्टमिन्द्रियं मुनेः शत्रुः ॥ ३७ ॥

मन्दनन्दिनी — सुहृल्लिङ्गधरो मुनेर्द्रष्टेन्द्रियमिव वस्तुतः शत्रुरयं प्रह्लादः । सम्भोगादिभिः । सर्वैरुपायैर्हन्तव्य इति योजना । सम्भोगो विषसम्प्रक्तान्नभोजनम् । शयनं तप्तशिलादौ । आसनं शूलादाविति ज्ञेयम् ॥ ३७ ॥

नैर्ऋतास्ते समुद्दिष्टा भर्त्रा वै शूलपाणयः ।
तिग्मदंष्ट्राः करालास्याः ताम्रश्मश्रुशिरोरुहाः ॥ ३८ ॥

मन्दनन्दिनी — नैर्ऋता राक्षसाः । भर्त्रा स्वामिना समुद्दिष्टा आज्ञप्ताः ॥ ३८ ॥

नदन्तो भैरवं नादं छिन्धि भिन्धीति वादिनः ।
आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु ॥ ३९ ॥

मन्दनन्दिनी — भैरवं नादं भयङ्करं नादम् ॥ ३९ ॥

परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ।
युक्तात्मन्यफला आसन्नपुण्यस्येव तत्क्रियाः ॥ ४० ॥

प्रकाशिका – अखिलात्मनि सकलस्वामिनि । युक्तात्मनि समाहितमनसि । अपुण्यस्येवेति । पुण्यहीनस्य क्रियाः महोद्यमाः यथा अफला भवन्ति तथा तेषां नैर्ऋतानां क्रियास्ताडनादिरूपाः ॥४०॥

मन्दनन्दिनी — अनिर्देश्येऽदृश्यत्वादिगुणके परे ब्रह्मणि विषये । युक्तात्मनि प्रयोजितमनस्के प्रह्लादे । तत्क्रियाः वधोपायाः । अपुण्यस्य पापिनः । सम्पदुपाया इवाफला आसन्निति योजना ॥४०॥

प्रयासेऽपिहते तस्मिन् दैत्येन्द्रः परिशङ्कितः ।
चकार तद्वधोपायान् निर्बन्धेन युधिष्ठिर ॥ ४१ ॥

प्रकाशिका – निर्बन्धेनेत्याग्रहेण ॥ ४१ ॥

मन्दनन्दिनी — तस्मिन्प्रह्लादविषये वधार्थं कृतप्रयासेऽपिहते व्यर्थे सति निर्बन्धेनाग्रहेण ॥ ४१ ॥

दिग्गजैर्दन्दशूकेन्द्रैरभिचारावपातनैः ।
मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ४२ ॥

प्रकाशिका – अभिचाराः कृत्यादयः । अवपातनं गिरिशृङ्गादधःपातनम् । सन्निरोधैः अनिर्गमगर्ते निक्षिप्य पीडनैः ॥ ४२ ॥

मन्दनन्दिनी — दन्दशूकेन्द्रैः सर्पश्रेष्ठैः । आभिचारैर्मरणोद्देश्यकयागादिभिः । अवपातैर्गिरिशृङ्गादधः पातनैः । मायाभिः शून्यक्रियाभिः । सन्निरोधैर्गन्तुमशक्यस्थलवासैः ॥ ४२ ॥

हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ।
न शशाक यदा हन्तुमपापमसुरः सुतम् ॥ ४३ ॥

प्रकाशिका – पर्वताक्रमणैः पर्वतानां तदुपरि पातनैः ॥ ४३ ॥

मन्दनन्दिनी — हिमेत्यादेस्तत्प्रक्षेपैरित्यर्थः । पर्वतस्याक्रमणैरारोपणैः । तृतीयान्तानां तद्वधोपायमिति पूर्वेण हन्तुमित्युत्तरेणान्वयः ॥ ४३ ॥

चिन्तां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ।
एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ॥ ४४ ॥

प्रकाशिका – तद्धननं कर्तुं नाभ्यपद्यत । हननसाधनमिति शेषः ॥ चिन्ताप्रकारमेवाह ॥ एष इति त्रिभिः । मे मया असाधुपरुषं यथा भवति तथा ॥ ४४ ॥

मन्दनन्दिनी — चिन्तां हननविषयाम् । तद्धननं कर्तुम् । बह्वसाधूक्तो बहुनिष्ठुरैर्भर्जितः ॥ ४४ ॥

तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ।
वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयम् ॥ ४५ ॥

प्रकाशिका – असद्धर्मैरसतां योग्यैः प्रकारैरविदूरे वर्तमानोऽपि बालोप्ययं अजडधीः पटुतरबुद्धिः ॥ ॥ ४५ ॥

मन्दनन्दिनी — असद्धर्मैरसतां चोरादीनां योग्यैः । अजडधीरमन्दधीः ॥ ४५ ॥

न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ।
अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः ॥ ४६ ॥

प्रकाशिका – मेऽनार्यं मरणनिमित्तमपकारं न विस्मरति । अजीगर्तस्य मध्यमपुत्रः श्रुनःशेपो नाम पितृभ्यां हरिश्चन्द्राय विक्रीतः सन् तथा तयोरपकारं न विस्मृतवान् तथैवेति ॥ ४६ ॥

मन्दनन्दिनी — मे सकाशाद्भविष्यदनर्थम् । शुनःशेप इवाजीगर्तकृतं विक्रयणं भाविनं वाऽवयवद्वारा यागं न विस्मरति नालोचयति ॥ ४६ ॥

नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ।
इति तच्चिन्तया किञ्चिन्म्लानश्रियमधोमुखम् ।
शण्डामर्कावौशनसौ विविक्त इति होचतुः ॥ ४७ ॥

प्रकाशिका – न वा भविता ब्रह्मवरस्यामोघत्वादित्याशयः । औशनसावुशनसः पुत्रौ । विविक्ते एकान्ते ॥ ४७ ॥

मन्दनन्दिनी — एतद्विरोधेनैतादृशमहानुभावविरोधेन मे मृत्युः प्रायेण भविता नूनम् । वितर्के न वा । पाक्षिक्यभावकोटिः । औशनसावुशनसः शुक्रस्य पुत्रौ । विविक्ते एकान्तस्थले ॥ ४७ ॥

जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ।
न तस्य चिन्त्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥ ४८ ॥

प्रकाशिका – भ्रुवोर्विजृम्भणेनैव निरस्ताधिष्ण्यपाः लोकपाला यस्मिन् । यस्य तव चिन्त्यं नचक्ष्महे न पश्यामः । शिशूनां वृत्तं गुणदोषयोः पदं आस्पदं नैवेत्यर्थः ॥ ४८ ॥

मन्दनन्दिनी — भ्रुवो विजृम्भणेन त्रस्ताः समस्ता धिष्ण्यपा लोकपाला यस्मिंस्तादृशं जगत्त्रयम् । येन त्वयैकेन जितम् । तस्य चिन्त्यं चिन्तनीयं कार्यं न चक्ष्महे न पश्यामः । न च प्रह्लादहननं चिन्त्यम् । अतः शिशूनामन्तःकरणं गुणदोषयोः पदं नित्यस्थानं न वै इति योजना । एषा बुद्धिर्गच्छेदिति भावः ॥ ४८ ॥

इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ ४९ ॥

प्रकाशिका – यावद्गुरुरागमिष्यति तावद् बद्ध्वा निधेहि ततः किमित्यतः ऊचतुः । बुद्धिमिति । समीचीनेति शेषः । आर्यसेवया च भवति ॥ ४९ ॥

मन्दनन्दिनी — यावद्गुरुर्भार्गव आगमिष्यति तावद्भीतो यथा न पलायते वरुणस्य पाशैस्तथा। बद्ध्वा निधेहि। पुंसो वयसा। आर्यसेवया बुद्धिः समीचीना भविष्यतीति योजना॥ ४९॥

तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्।
धर्मा ह्यस्योपदेष्टव्या राज्ञां ये गृहमेधिनाम्॥ ५०॥

प्रकाशिका – अनुज्ञायाङ्गीकृत्य॥ ५०॥

मन्दनन्दिनी — अनुज्ञायाङ्गीकृत्य॥ ५०॥

धर्ममर्थं च कामं च नितरां चानुपूर्वशः।
प्रह्लादायोचतू राजन् प्रश्रितावनताय च॥ ५१॥

मन्दनन्दिनी — आनुपूर्वशः क्रमेण। प्रश्रितेति लुप्तचतुर्थीकम्। विनीताय नम्राय चेत्यर्थः॥५१॥

यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम्।
न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम्॥ ५२॥

प्रकाशिका – द्वंद्वारामोपवर्णितां रागद्वेषादिव्यावृत्तबुद्धिभिर्व्याख्याताम्॥ ५२॥

मन्दनन्दिनी — त्रिवर्गं धर्मार्थकामविषयम्। रागद्वेषादियुक्तो यथा भवति तथोपवर्णिताम्॥५२॥

यदाऽऽचार्यः परावृत्तौ गृहमेधीयकर्मसु।
वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः॥ ५३॥

प्रकाशिका – परावृत्तः अन्यत्रगतः। सः उपहूतः। क्रीडार्थमिति शेषः। सोपहूत इति सन्धिः सैष दाशरथी राम इत्यादाविव पादपूरणार्थः॥ कृतक्षणैः क्रीडार्थं लब्धावसरैः॥ ५३॥

मन्दनन्दिनी — गृहमेधीयकर्मस्वग्निहोत्रादिकर्मसु परावृत्तोऽध्यापनस्थानात्परावृत्त्योद्युक्तः। कृतक्षणैः कृतावसरैः। स प्रह्लाद उपहूतः। सोऽचिलोपो चेत्पादपूरणमिति सुलोपः॥ ५३॥

अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः।
उवाच विद्वान् तन्निष्ठां कृपया प्रहसन्निव॥ ५४॥

प्रकाशिका – तन्निष्ठां तेषां बालानां समीचीनां योग्यताम्॥ ५४॥

मन्दनन्दिनी — तान्वयस्यान्। तन्निष्ठां भगवन्निष्ठाम्॥ ५४॥

ते तु तद्गौरवाः सर्वे त्यक्तक्रीडापरिच्छदाः ।
बाला नदूषितधियो द्वन्द्वारामेरितेहितैः ॥ ५५ ॥

प्रकाशिका –द्वन्द्वारामाणामीरितैर्वचनैः रहितैश्चेष्टितैश्च न दूषिता धीर्येषाम् ॥ ५५ ॥

मन्दनन्दिनी — द्वन्द्वारामेरितेहितैः रागद्वेषाद्युक्तोऽध्येता यथा भवति तथेरितैः प्रोक्तैः । वचनैरीहितैः प्रवृत्तिभिश्च ॥ ५५ ॥

पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ।
तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५६ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे पञ्चमोऽध्यायः ।

प्रकाशिका – यतो बालास्तस्मिन्नेव न्यस्तं हृदयं ईक्षणं च यैः ॥ ५६ ॥

इति श्रीमद्भागवततात्पर्यटिप्पण्यां यदुपतिविरचितायां प्रकाशिकायां
सप्तमस्कन्धे पञ्चमोऽध्यायः समाप्तः ॥

मन्दनन्दिनी — तन्न्यस्तेत्यादेः प्रह्लादन्यस्तमनश्चक्षुष्का इत्यर्थः । असुरः प्रह्लादः ॥ ५६ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां पञ्चमोऽध्यायः ॥ ७—५ ॥

अथ षष्ठोऽध्यायः

प्रह्लाद उवाच–

हन्तार्भका मे शृणुत वचो वः सर्वतः शिवम् ।
वयस्यान् पश्यत मृतान् क्रीडान्धा मा प्रमाद्यथ ॥ १ ॥

प्रकाशिका – प्रह्लादो बालकानामनुकम्पया वैराग्यादिरूपमोक्षसाधनमुपदिशति । हन्तार्भका इत्यादिना । हन्तेत्यनुकम्पायाम् । सर्वतः इहामुत्र च शिवं सुखसाधनम् । क्रीडान्धाः क्रीडादिना आयुर्व्ययं कुर्वाणाः । प्रमाद्यथ । मोक्षसाधनसम्पादन इति शेषः । अधुना वयं बालाः । उत्तरत्र तत्सम्पादयिष्याम इत्यत उक्तम् । वयस्यानिति । आयुष्यं न स्वाधीनमित्याशयः ॥ १ ॥

मन्दनन्दिनी — मुकुन्दसेवैव बुभूषुभिः सम्पाद्येत्याशयेन प्रह्लादो बालानुपदिशति ॥ हन्तेति ॥ हे अर्भकाः । वो युष्माकं सर्वतः सर्वप्रकारेण शिवं मङ्गलं वचः शृणुत । हन्तेत्यनुकम्पायाम् । वयस्यान्पश्यत मृतान् । तेन दर्शनेन जातवैराग्याः । क्रीडांधाः सन्तो मा प्रमाद्यथ भगवद्विषये प्रमादं मा कार्ष्ट ॥ १ ॥

न पुरा विवशा बाला आत्मनोऽर्थे प्रियैषिणः ।
गुरुक्तमपि न ग्राह्यं यदनर्थेऽर्थकल्पनम् ॥ २ ॥

प्रकाशिका – ननु बालानां मोक्षसाधनसम्पादनं क्वापि न दृष्टमित्यत आह । न पुरेति । पुरा इतः पुरातनाः बालाः विवशा मोक्षसाधनसम्पादने प्रमादयुक्ता नेत्यर्थः । किं तर्हीत्यपेक्षायामाह । आत्मनोऽर्थे स्वात्मप्रयोजनाय प्रियैषिणः जन्मप्रभृतिपरमात्मज्ञानेच्छवः । नन्वस्माभिरपि गुरूक्तं त्रिवर्गसाधनं सम्पाद्यत इत्यत आह ॥ गुरूक्तमपीति । कुत इत्यत आह । यदनर्थ इति । संसारहेतुत्वादनर्थे त्रिवर्गेऽर्थकल्पनं यत्तस्मात् ॥ २ ॥

मन्दनन्दिनी — बालाः क्रीडान्धा भवन्त्येवेत्यत आह ॥ नेति ॥ पुरातना बालाः मार्कण्डेयप्रभृतय आत्मनोऽर्थे स्वश्रेयसे प्रियैषिणस्तत्साधनविचारपरा न क्रीडान्धा इति योजना । गुरूक्तं हितसाधनं गृह्णीम एवेत्यत आह ॥ गुर्विति ॥ अनर्थे वस्तुतोऽनर्थे त्रिवर्गेऽयमेव पुरुषार्थ इत्यर्थकल्पनं तद्गुरूक्तमपि न ग्राह्यम् ॥ २ ॥

यदुक्त्या न प्रबुध्येत सुप्तस्त्वज्ञाननिद्रया ।
न श्रद्दध्यान्मतं तस्य यथाऽन्धो ह्यन्धनायकः ॥ ३ ॥

प्रकाशिका – ननु वैषयिकसुखभोगरूपश्रेयःसाधनत्वात्कथं तदुक्तं न ग्राह्यमित्यत आह । यदुक्त्येति । यस्य गुरोरुक्त्याऽज्ञानाख्यनिद्रया सुप्तः अविद्यया संसारे पतितः पुमान्न प्रबुध्येत । आत्यन्तिकसुखसाधनमज्ञाननिवर्तकं च भगवज्ज्ञानं न सम्पादयेत् । तस्य गुरोर्मतं न बुध्यात् । तत्र श्रद्धां न कुर्यात् । संसारकारणीभूतेऽज्ञाने सति यद्वैषयिकं सुखं तद्दुःखाविनाभूतं अनर्थरूपमेवातो न साधनोपदेष्टृगुरूक्तं ग्राह्यम् किन्तु अज्ञाननिवर्तकभगवज्ज्ञानोपदेष्टृगुरूक्तमेव ग्राह्यमित्याशयः । अन्धनायकः ग्रामादिप्रापको यस्य स तथा ॥ ३ ॥

मन्दनन्दिनी — अज्ञाननिद्रया सुप्तो यदुक्त्या यस्य गुरोरुक्त्या न प्रबुध्येत ज्ञानलक्षणप्रबोधवान्न भवेत् । तस्य मतं न श्रद्दध्यान्न विश्वस्यात् । सः श्रद्दधानोंऽधो नायको यस्य तादृशोंऽधो यथा ॥ ३ ॥

कः शत्रुः क उदासीनः किं मित्रं चेह आत्मनः ।
भवत्स्वपि नयैः किं स्याद् दैवं संपद्विपत्पदम् ॥ ४ ॥

प्रकाशिका – ननु शत्रुमित्रोदासीनस्वरूपपरिज्ञानमस्मद्गुरूपदिष्टशास्त्राद्भवति । अतः कथं तदुक्तं न ग्राह्यमित्यत आह । क इति । हरिरेव तत्तत्कर्मानुसारेण शत्र्वादिषु स्थित्वा शत्रुत्वादिकं प्रेरयतीति जानतः आत्मनो मम पक्षे कः स्वातन्त्र्येण शत्रुः न कोऽपीत्यादि योज्यम् । ननु सम्पद्विपत्साधनानीति परिज्ञानं तस्माच्छास्त्राद्भवतीत्यत आह । भवत्स्वपीति । नयैर्नीतिभिर्भवत्स्वपि भवत्पक्षेऽपि किं स्यान्नकिमपि । ननु सम्पदादिकं स्यादित्यत आह ॥ दैवमिति । अदृष्टप्रेरको हरिरेव सम्पदां विपदां च पदं स्थानं निमित्तमिति यावत् । अतो न तदर्थमपि तच्छास्त्रं च ग्राह्यमित्याशयः ॥ ४ ॥

मन्दनन्दिनी — शत्र्वादिलक्षणस्य तेषु कर्तव्यस्य च ज्ञानाय तत्प्रयुक्तसम्पद्विपत्प्राप्ति-परिहारलक्षणप्रयोजनाय च नीतिशास्त्रमभ्यसनीयमित्यत आह ॥ कः शत्रुरिति ॥ आत्मनो मम कः शत्रुरित्यादिनाऽऽक्षेपो भवत्स्वप्येवमेवेति । नयैः नीतिशास्त्रैः किं प्रयोजनं स्यात् । सम्पद्विपदोः । पद्यते गम्यतेऽनेनेति पदं निमित्तं दैवमेव भगवानेवेति योजना ॥ ४ ॥

यो न हिंस्याद् धर्मकाममात्मानं स्वजनेऽवशः ।
पुनः श्रीलोकयोर्हेतुः स मुक्तान्ध्योऽतिदुर्लभः ॥ ५ ॥

प्रकाशिका – नन्वेवं त्वद्विधो ज्ञानी कुतोऽस्माभिर्न दृश्यत इत्यत आह । य इति । स्वजने पुत्रकलत्रादिरूपेऽवशः वशो न भवति । धर्मकामं निवृत्तधर्मेच्छावन्तं आत्मानं यो न हिंस्यान्न हिनस्ति । तदनुष्ठानपरित्यागेन स्वात्मघातं न करोति तदनुष्ठातेति यावत् । स मुक्तांध्यः । परिमुक्ताज्ञानोऽति दुर्लभोऽतो न दृश्यत इत्याशयः । ननु निवृत्तधर्ममनुतिष्ठतो नैहिकामुष्मिक-फलावाप्तिरित्यत उक्तम् । पुनःश्रीलोकयोर्हेतुरिति । चार्थे पुनःशब्दः । श्रीशब्द ऐहिकैश्वर्यादिपरः । श्रीलोकयोरैहिकैश्वर्यपुण्यलोकयोर्हेतुश्च सम्पादयिता च भवति । प्राप्य पुण्यकृतान् लोकानुषित्वा शाश्वतीःसमाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इति वचनात् ॥ ५ ॥

मन्दनन्दिनी — नीतिशास्त्रस्यानादरणीयत्वेऽपि स्वर्गसम्पदादिहेतुभूतं धर्मशास्त्रमध्येतव्यमित्यत आह ॥ य इति ॥ स्वजने वशः स्वस्वबन्धुषु हितः । राजसूयज्योतिष्टोमाद्यनुष्ठानेन तदनुष्ठापनेन च पुनर्मुहुः श्रीलोकयोः स्वाराज्यस्वर्गयोः स्वस्मिन्स्वजनेषु हेतुः स आंध्यवान् । जननमरण-मार्गापर्यवसानात् । प्रवृत्तधर्मकामं आत्मानं हिनस्ति च । इष्टापूर्तं मन्यमाना वरिष्ठमित्यादेः । यस्त्वेवं न

हि स्यात्स मुक्तांध्यः । जननादिमार्गपर्यवसानदर्शनवान् सोऽतिदुर्लभ इति योजना । निवृत्तधर्ममेवानुष्ठेयम् । इदं च गुरुणोच्यमानं प्रवृत्तधर्मशास्त्रं नाभ्यसनीयमिति भावः ॥ ५ ॥

कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ ६ ॥

प्रकाशिका – ननु निवृत्तधर्मानुष्ठानं चेदात्यन्तिकसुखसाधनं तर्हि न तदनुष्ठानस्याऽयमवसरः । बाल्ये विद्यां निषेवेत यौवने दारसङ्ग्रहम् । स्थाविर्ये मोक्षमातिष्ठेत्सर्वदा धर्ममाचरेदिति स्मृतेरित्यत आह । कौमार इति । धर्माचरणे सर्वदेति विशेषणाद्विद्याभ्यासकालेऽपि निवृत्तधर्मानुष्ठानं कार्यमेवेति तस्यामेव स्मृतावुक्तत्वादित्याशयः । इहास्मिन्मनुष्यजन्मनि । यतो मानुषं जन्मार्थदम् सर्वपुरुषार्थसाधकम् । तत्रापि कौमारे पूर्वे वयसि यतः तदपि पुरुषार्थसाधनमप्युध्रवम् । न चैवंविधे जन्मांतरे धर्माचरणं भविष्यत्यतः किमिहेति विशेषणेनेत्यत उक्तम् । दुर्लभमिति । जन्मान्तरमेवं विधमेव भविष्यतीति न नियम इति भावः ॥ ६ ॥

मन्दनन्दिनी — निवृत्तधर्मानुष्ठाता दुर्लभ इत्युक्तत्वात्तदनुष्ठानं कर्तव्यमित्यायातम् । तथाऽपि तत्तिर्यगादिजन्मनि भाविमानुषजन्मनि वा । इहाप्यवस्थान्तरे वा किं न स्यादित्यत आह ॥ कौमार इति ॥ प्राज्ञो बुद्धिमान् इह वर्तमाने मानुषजन्मनि कौमारे कौमारावस्थायां भगवत्तुष्टिकरान् धर्मान् आचरेत् । अर्थदं वेदाधिकारगुरूपसत्त्यादिद्वारा पुरुषार्थदम् । मानुषं जन्म दुर्लभमध्रुवमपि तत्तस्मादिति योजना । तिर्यगादिजन्मनोऽधिकाराद्यसम्पादकत्वान्मानुषस्य दुर्लभत्वाद्वर्तमाने जन्मनि कौमारे भगवद्धर्मा-नाचरेदिति सिद्धम् । बाल्ये विद्यां निषेवेत यौवने दारसङ्ग्रहः । स्थाविर्ये मोक्षमातिष्ठेत्सर्वदा धर्ममाचरेदिति स्मृतिस्त्वन्ततः स्थाविर्ये कर्तव्यत्वार्था न तु बाल्ये निषेधार्था । एतद्वै मुखतोऽन्नं राद्धं मुखतोऽस्मा अन्नं राध्यते । यदहरेव विरजेत्तदहरेव प्रवृजेदित्यादिश्रुतेरिति भावः ॥ ६ ॥

यदा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ।
यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ ७ ॥

प्रकाशिका – ननु मानुषं जन्मार्थदं चेत्सर्वेऽपि कुतो मोक्षं न साधयंतीत्यत आह ॥ यदा हीति इह मानुषे जन्मनि विष्णोः पादोपसर्पणं कुतः कार्यमित्यत उक्तं यदेष इति । आत्मा अन्तर्यामी । अन्ये तु नैतादृशा इत्याशयः ॥ ७ ॥

मन्दनन्दिनी — निवृत्तधर्मानुष्ठानबुद्धिः कदेत्यत आह ॥ यदेति ॥ यद्यस्मादेष विष्णुः सर्वभूतानां प्रियादिर्हि तस्मात्पुरुषस्य विष्णोः पादोपसर्पणं कर्तव्यम् । तच्च यदा तदा धर्मानुष्ठानबुद्धिरित्यध्याहृत्य योजना ॥ ७ ॥

सुखमैन्द्रियकं दैत्या देहयोगेन देहिनाम् ।
सर्वत्र लभ्यते दैवाद् यथा दुःखमयत्नतः ॥ ८ ॥

प्रकाशिका – नन्विदानीमेव भागवतधर्मानुष्ठानाय यत्नश्चेद्वैषयिकसुखयत्नाभावात्तदलाभ एवेत्यत आह । सुखमिति । ऐन्द्रियिकमिन्द्रियविषयसम्बन्धि । हे दैत्याः देहयोगेन नानादेहसम्बन्धेन सर्वत्र पश्वादिजन्मस्वपि दैवाददृष्टप्रेरकेश्वरात् । अत्रोदाहरणमाह । यथेति । अयत्नतः । यत्नाभावेपि ॥ ८ ॥

मन्दनन्दिनी — विषयानुभवद्वारेन्द्रियजन्यं सुखं कथं लभ्यत इत्यतो दैवात्प्रारब्धकर्मवशाद्दुःखवत्तदवर्जनीयमित्याह ॥ सुखमिति ॥ योजना तु स्पष्टा ॥ ८ ॥

तत् प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ।
न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ९ ॥

प्रकाशिका – निगमयति । तदिति । तत्तस्मादायासो यत्नतः सुखार्थमिति शेषः । कुत इत्यत आह । यत इति । यतः आयासात् । परं केवलमायुषो व्ययः । सुखं तु दैवादेव लभ्यत इत्याशयः । ननु सुखदुःखवन्मोक्षसाधनं मुकुन्दचरणाम्बुजसमर्पणमपि दैवादेव प्राप्तं भविष्यति । अतस्तदर्थमपि यत्नो न कार्य इत्यत आह । न तथेति । क्षेमं क्षेमकरम् । चरणाम्बुजं तदुपसर्पणं तथा सुखदुःखयोरिव दैवान्नविन्दते न लभते । तादृशादृष्टविशेषस्य पूर्वमसत्वात् । अनादौ संसारे सुखदुःखजनकान्येवादृष्टानि सम्पादितानि सन्ति नतु मोक्षजनकमदृष्टं येन तत्प्रेरकेश्वरादेव तल्लभ्यत इति शङ्का स्यादित्याशयः ॥९॥

मन्दनन्दिनी — यतः परं केवलमायुर्व्ययस्तत्प्रयासः प्रवृत्तधर्मानुष्ठानक्लेशो न कर्तव्यः । तथा विधः पुरुषः । क्षेमं मुकुन्दचरणाम्बुजं न विन्दत इति योजना ॥ ९ ॥

ततो यतेत कुशलः क्षेमाय च यमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ १० ॥

प्रकाशिका – तत इतःपूर्वं तादृशादृष्टाभावात्तदर्थम् । चशब्दोऽवधारणे यतेतैव । यमाश्रितः यमाद्यनुष्ठानं कुर्वन्पौरुषं पुरुषस्य विद्यमानम् । पुष्कलमवयवपुष्टिमत् । न विपद्येताक्षमं न भवेत् । तावच्छीघ्रं क्षेमाय यतेतेत्यन्वयः । अनेन कौमार आचरेदित्येतदुपसंहृतमिति ज्ञातव्यम् ॥ १० ॥

मन्दनन्दिनी — शरीरं पौरुषं बलोपेतं पुष्कलं सर्वेन्द्रियोपेतं यावन्न विपद्येतान्यथा न भवेत् । चोऽवधारणे । तावदेव तं विष्णुमाश्रितस्तत इतरेण प्रयोजनाभावादनेन प्रयोजनसद्भावाच्च कुशलः क्षेमाय मोक्षाय यतेत ॥ १० ॥

पुंसां वर्षशतं ह्यायुः तदर्धं चाजितात्मनः ।
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥ ११ ॥

प्रकाशिका – कौमारे धर्माचरणं कार्यमित्यत्र रतिमुत्पादयितुं विषयासक्तानां आयुर्व्ययप्रकारमाह । पुंसामिति त्रिभिः ॥ ११ ॥

मन्दनन्दिनी — कौमार एव यतेतेत्युपपादयितुं शतायुष्मतामङ्गीकृत्यापि यत्नाभावे प्रकारान्तरेण व्ययमुपपादयति ॥ पुंस इत्यादिना श्लोकत्रयेण ॥ अजितात्मनोऽजितेन्द्रियस्य । निद्रादिजयरहितस्येति यावत् । अन्धयतीत्यन्धतमः प्रापितः । यद्यस्मात् शेते तत्तस्मादर्धमायुर्निष्फलं याति ॥ ११ ॥

मुग्धस्य बाल्यकौमारैः क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ १२ ॥

मन्दनन्दिनी — अकल्पस्यासमर्थस्य ॥ १२ ॥

दुरापूरेण कामेन मोहेन च बलीयसा ।
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ १३ ॥

प्रकाशिका – दुरापूरेण अशक्यपूरणेन हिशब्दो हेतौ । तस्मादायासो न कर्तव्य इत्यन्वयः ॥ १३ ॥

इति श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचिता सप्तमस्कन्धव्याख्या प्रकाशिका समाप्ता ॥

मन्दनन्दिनी — शेषं षष्ठिवर्षात्मकम् ॥ १३ ॥

पश्यध्वं मतिवैषम्यं ज्ञातीनां नः कुटुम्बिनाम् ।
श्रेयोविघातादायासादीहतामनु संसृतिम् ॥ १४ ॥

॥ अथ श्रीमद्भागवतविवृतिः श्री सत्यधर्मतीर्थविरचिता प्रारभ्यते ॥

अत्यायासो न कर्तव्य इत्याचार्यवचनानुगः ॥
सप्तमस्कंधतात्पर्यं व्याकरोमि मितैः पदैः ॥ १ ॥

प्रल्हादो बालान्प्रति निद्राद्युपद्रवमन्तरेणापि योऽन्तरावशिष्टः कालः सोऽपि सान्तराय इति सदृष्टान्तमाचष्टे ॥ पश्यध्वं पश्यतेति । नः कुटुम्बिनां ज्ञातीनां मतिवैषम्यं कलहहेतुभूतबुद्धिविषमताम् ।

क्वचित्पश्यध्वमतिवैषम्यमिति दृश्यते पाठः । तत्रातिविषमतामित्यर्थः । श्रेयोविघातात् श्रेयस ऐहिकस्य पारत्रिकस्य च विघातो नाशो यस्मात्स तस्मादायासात् श्रमात् । अनु संसृतिमिति द्वे पदे । संसृतिमन्वित्यन्वयः । अनेनानुसंसृतीति भाव्यमिति शङ्का निरस्तेति मन्तव्यम् । प्रतिसंसारमीहतामीहमानानां मतिवैषम्यं पश्यध्वमित्यावृत्त्यान्वयो वा ॥ १४ ॥

मन्दनन्दिनी — न केवलमुक्तन्यायेनायुर्व्ययमात्रं किं त्वस्माकं ज्ञातीनां श्रेयोविघातायासजन्यं मतिवैषम्यं भगवता कलहलक्षणमतिवैषम्यं चास्तीत्याह ॥ पश्यध्वमिति ॥ संसृतिमनुसृत्येहतां चेष्टमानानामित्यर्थः ॥ १४ ॥

को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः ।
स्नेहपाशैर्दृढं बद्धमुत्सहेत विमोचितुम् ॥ १५ ॥

सत्यधर्मीया — नन्वस्माकमश्रेयस्कामत्वेऽप्यस्मिन्संसारे कश्चिद्विपश्चित्तत्कामुको वर्तेतेति चेत्तर्हि नैतादृशः स सुलभ इत्याह ॥ क इति । गृहेषु भार्यादिषु । अजितेन्द्रियोऽजितान्यन्यस्वाधीनानीन्द्रियाणि यस्य स तथा । पुमान् स्नेहपाशैर्दृढं विनेश्वरप्रसादं छेत्तुमशक्यं यथा तथा बद्धं सक्तमात्मानं विमोचितुं मोचयितुम् । उत्सहेतोत्साहं कुर्यात् । अनेनोत्साहस्यापि यदा न संभवस्तदा दूरे तच्छेदनमिति तस्यात्यशक्यतां सूचयति ॥ १५ ॥

मन्दनन्दिनी — गृहेषु सक्तश्चेन्न कोऽप्यात्मानं विमोचितुमुत्सहेत इत्याह ॥ क इति ॥ स्नेहपाशैः स्नेहलक्षणपाशैः ॥ १५ ॥

को न्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः ।
यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १६ ॥

सत्यधर्मीया — वित्तवितरणेन पुमर्थः संपादयितुं शक्यः किं भगवत्सेवयेत्यत आह ॥ को न्विति । अर्थतृष्णां द्रव्यस्पृहां को नु विसृजेत् । दौर्घट्यमेव तस्याह ॥ प्राणेभ्य इति । य इत्यर्थपरामर्शः । योऽर्थः प्राणेभ्योऽपीप्सितस्ततोऽपि प्रेमपदम् । अमुमर्थं निदर्शनेन द्रढयति ॥ यमिति । यमर्थं प्रेष्ठैः प्रीतिपात्रैरसुभिः प्राणैः । तस्करः सेवको वणिक् च । क्रीणाति । तस्करस्योपलम्भे देहनाशः । सेवकस्य युद्धादिगमने । वणिजस्तु मध्येध्वाऽध्वनीनचोरादित इति प्राणविक्रयो ज्ञेयः । पृथक् पृथगन्वयः । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्चेति सुट्तलोपश्च । न च तद्बृहच्छब्द-योस्तकारस्यैव से विहिते लघुसूत्रं भवतीति वाच्यम् । ससजुषोरुरिति रुत्वप्राप्तेः । यथोक्तं शेखरे । करपत्योस्तु सुडिति । अतो न रुत्वम् । यैः तद्बृहतोः सेत्यादेशे तु तद्वुर्वारमिति । सत्वविधानसामर्थ्यादिव रुत्वं नभवेदिति शङ्कनं समाधेयं शेखरैः ॥ १६ ॥

मन्दनन्दिनी — प्रवृत्तधर्मो न प्रयोजनमित्युक्त्वाऽर्थोऽपि न प्रयोजनमित्याह ॥ को न्विति ॥ तस्करादिः राजभृत्येन प्रतियोधेन चोरेण हतः प्रेष्ठैः प्राणैर्यमर्थं क्रीणाति तादृशार्थतृष्णां प्राणेभ्योऽपि गरीयसीं को न विसृजेदिति योजना । अर्थे तृष्णा जाता चेत्प्राणानपि विसर्जयतीति न स पुरुषार्थ इतिभावः ॥ १६ ॥

कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सुतस्नेहवशः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ १७ ॥

सत्यधर्मीया — नार्थतो भवतु भवच्छेदः कामेन स्यादित्यतः स कामः संश्लेदर्थोऽपि न तथाविधोऽनर्थकृदसंश्लेत्सोऽपि न कामनीय इत्याह ॥ कथमित्यादिना । अनुकंपितायाः पूर्वं स्वेन । प्रियाया भार्यायाः । एकवचनेनैकस्याः सहवासे दशेयं का कथा बव्हीनां महिषीणामिति कैमुत्यं ध्वनयामासेति ज्ञेयम् । रहस्यं रहसि एकान्ते भवम् । सङ्गं रमणलक्षणम् । शिशूनां कलाक्षराणां तेष्वनुरक्तं चित्तं यस्य स तथा । सुहृत्सुतस्नेहवशः । सुहृदो बन्धवः सुताश्च शिशुव्यतिरिक्ताः । तेषां स्नेहवशस्तदधीनः सन् । रुचिरान्मन्त्रांस्तत्त्वेन प्रतीतालापान्कथं त्यजेतेत्युत्तरेणान्वयः । सुहृत्सुत-स्नेहसितः इत्यपि क्वचित्पाठः । स्नेहसितः स्नेहबद्ध इत्यर्थः ॥ १७ ॥

मन्दनन्दिनी — परमपुरुषार्थसाधनवैराग्यपरिपन्थित्वात्कामोऽपि न पुरुषार्थ इत्याह ॥ कथमित्यादिना ॥ विषयकामुकः कथं विषयांस्त्यजेतेति वक्ष्यमाणेन योजना । प्रथमान्तानि कामुकताविवरणानि । द्वितीयान्तानि विषयविवरणानि । अनुकम्पिताया दयाविषयभूतायाः । एकान्तोपदेशान्मन्त्रान् । कलाक्षराणामव्यक्तमधुराणाम् । आकर्णने इति शेषः ॥ १७ ॥

प्रत्ताः स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ ।
गृहान् मनोज्ञान् रुचिरच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥ १८ ॥

सत्यधर्मीया — प्रत्ताः परस्मै दत्तास्ताः दुहितॄः पुत्रीः । हृदय्या हृदयस्य प्रिय इति यत् । हृदयस्य हृल्लेखेति हृदादेशाभाव आर्षः । भ्रातॄन्सहोदरान् स्वसॄर्भगिनीः । प्रत्ता हृदय्या इत्यत्राप्यन्वेति । अच उपसर्गात्त इति तादेशः । पितरौ पितामात्रेत्येकशेषः । मातरि पितरि दीनावित्यनेन न सेवानुसंधानेन स्मरणं किन्तु जनापवादेनानिर्वाहपक्षे रक्षणार्थमिति ध्वनयति । अत एव तत्र हृदय्या इत्युक्तिश्च युक्तमितीति ज्ञेयम् । गृहान्मनोज्ञानिति यथायथं योग्यान्वयि । गृहाः पुंसि च भूम्न्येवेत्यमरः । मनोहरान्रुचिरच्छदान् । मनोहरपरिकरान् । कुल्याः कुलपरंपरायाता वृत्तीर्जीवनकरीः । पशुभृत्यवर्गा-न्स्मरन्कथं त्यजेतेत्यन्वयः ॥ १८ ॥

मन्दनन्दिनी — प्रत्ता दूरदेशस्थितवरेभ्यो दत्ताः । अथ उपसर्गात्तः । हृदय्या हृदयहिताः । रुचिरच्छदान् रुचिरपरिच्छदान् । कुल्याः कुलपरम्परया समागता वृत्तीर्जीवनकरीः ॥ १८ ॥

त्यजेत कोशस्थ इवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः ॥ १९ ॥

सत्यधर्मीया — कोशस्थः कोशकारी कीटः स इव कर्माणि लोभात्तत्रैव कांक्षत ईहमानः कुर्वाणः । अवितृप्तकामो विषयालंबुद्धिहीनः । उपस्थे जिव्हायां च भवं औपस्थ्यं जैव्ह्यं च सुखं बहुमन्यमानः संमानयानो दुरन्तमोहादनवसानवैचित्याद्धेतोः कथं विरज्येत विरक्तो भूयान्न भूयादेवेत्यर्थः ॥ १९ ॥

मन्दनन्दिनी — कोशस्थः कोशे विद्यमानकीट इव कर्माणि अशनादीनीहमान औपस्थ्यजैव्ह्यमुपस्थजिह्वाकरणकं कर्म व्यसनाशनादिकमित्यर्थः ॥ १९ ॥

कुटुम्बपोषाय च यन्निजायुर्न बुध्यतेऽर्थं विहितं प्रमत्तः ।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥ २० ॥

सत्यधर्मीया — कुटुंबपोषाय तदर्थमेव एतीति यत् गच्छत् निजायुः स्वकमायुष्यं न बुद्धयते न जानाति । विहितं शास्त्रविहितम् । अर्थं परमप्रमेयं च न बुद्धयते । तत्र हेतुः प्रमत्त इति । सर्वत्र तापत्रयेण दुःखित आत्मा मनो यस्य स तथा । अथापि स्वकुटुंबरामः स्वकुटुंबे भार्यादौ रामः क्रीडादिर्यस्य स तथा । न निर्विद्यते न विरक्तो भवति । तत्तापत्रयमपि भगवद्दत्तमित्याह ॥ सर्वत्रेति । सर्वं त्रायत इति सर्वत्रो हरिः । तेन दत्तं यत्तापत्रयम् । पूर्ववदुर्वरितम् ॥ २० ॥

मन्दनन्दिनी — यत् गच्छत् । गतं निजायुर्विहितमर्थं च न बुद्धयते । स्वकुटुम्ब एव रमत इति स्वकुटुम्बरामः ॥ २० ॥

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ।
प्रेत्येह वाऽथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥ २१ ॥

सत्यधर्मीया — अनायाते नयतो धनेऽन्यायतो वा यतते विद्वानप्यहो पुत्रादिस्नेहमाहात्म्यमित्याह ॥ वित्तेष्विति । बहुवचनं चाद्यर्थे । कुटुंबभरणोपयुक्तपदार्थे । नित्याभिनिविष्ठचेता नित्यमभिनिविष्टं तदेकध्याननिरतं चेतो मनो यस्य स तथा । परवित्तहर्तुः परवित्तं हर्ता तस्य । दोषमागच्छन्तं विद्वान् जानन् । इह देहताडनादिकं तथा प्रेतनाथदण्डादिकं च प्रेत्याप्यागमिष्यन्तं शास्त्राचार्यमुखतो विद्वान् ।

अथापि । अजितेन्द्रिय इत्यशान्तकामोऽनुपरतविषयतृष्णः कुटुम्बी निन्दितैवंविधकुटुंबवान् हरते । ञित्वात् क्रियाफलस्यात्मगामित्वादात्मनेपदता । तत् परवित्तादिकम् ।। २१ ।।

मन्दनन्दिनी — वित्तनिविष्टमनस्कता न केवलं वैराग्यपरिपन्थिनी किन्तु दुष्कृतसम्पादिकाऽपीत्याह ।। वित्तेष्विति । वित्तेषु नित्याभिनिविष्टचेताः परवित्तहर्तुश्चोरस्य । प्रेत्य नरकलक्षणम् । इह ताडनादिलक्षणं दोषं विद्वानप्यजितेन्द्रियोऽशान्तकामश्च सन् । कुटुम्बी तत्परवित्तं हरतीति योजना ।।
।। २१ ।।

विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ।। २२ ।।

सत्यधर्मीया — कैश्चिच्छ्लोकैरुपपादितमन्यापदेशेनोपदेशेन साक्षात्तानेव सुमुखीकर्तुं वैराग्याद्यसम्भवमुपसंहरति ।। विद्वानपीति । इत्थं पूर्वं व्युत्पादितं दोषद्वयं विद्वानपि कुटुंबं पुष्णन्पोषयन् स्वलोकाय मोक्षाय तत्साधनज्ञानाय वा न कल्पते न समर्थो भवति । तर्हि का दशेत्यतः सदृष्टान्तमाह ।। स्वीयेति । स्वीयपारक्यभिन्नभावो यो योग्यतातिरेकेण स्वीयः पारक्यः स्वीयः स्वविहितकृदिति । तस्मै हितमिच्छतः । पर एव परकास्तत्र भव इत्यर्थे तद्धिता इति बहुवचनज्ञापितः ष्यञ् । परकीय इति विभिन्नो भावो मनो यस्य सः । अत एव विमूढो मिथ्याज्ञानी । तमस्तल्लोकं यथा प्रपद्येत तथा तमो ग्लानिप्रदमज्ञानं प्रपद्यते ।। २२ ।।

मन्दनन्दिनी — न भगवानस्तीति ज्ञानमात्रं श्रेयःसाधनं किन्तु स्वातन्त्र्याभिमानपरित्यागसहितमित्याशयेनाह ।। विद्वानपीति ।। हे दनुजाः । यः स्वीयपारक्यविभिन्नभावः स्वस्वातन्त्र्यपरस्वातन्त्र्याभिमानमोहितमनाः स विद्वानपीत्थं कुटुम्बं पुष्णन् स्वलोकाय मोक्षाय न कल्पते । किन्तु यथा विमूढस्तथा पुनः पुनः संसृतिलक्षणं तमः प्रपद्यत इति योजना ।। २२ ।।

यतो न कश्चित् क्व च कुत्र विद्वान् दीनं स्वमात्मानमलं समर्थः ।
विमोचितुं वामदृशां विहारक्रीडामृगो यन्निगडोऽक्षिसर्गः ।। २३ ।।

सत्यधर्मीया — भगवत्प्रसादमनासादयतो विद्वत्ता सत्यप्यकिञ्चित्करीति वक्ति ।। यत इति । विद्वान् दीनं स्वं स्वकीयं आत्मानं विमोचितुम् । अन्तर्णीतण्यर्थतया विमोचयितुम् । अलमत्यन्तं समर्थो न । सुदुर्लभः स इति भाषते । क्व च काले कुत्रचिद्देशे कश्चित्कोऽपीति । कुतः शक्तो न व्यक्त इत्यत इत इत्याह ।। यत इति । यतो वामदृशां योषितां अक्षिसर्गः कटाक्षमोक्षो यन्निगडो यस्य विदुषोऽपि निगडः शृङ्खलायितः । विहारक्रीडामृगो वामदृशां विहारे तद्विषये क्रीडामृगः । रूढः शब्दः । विहारमिति पाठोऽशठः । तस्यात्मानमित्यनेनान्वयः । तद्विहारसाधनमित्यर्थः । तस्मात्सोऽसमर्थ इत्यर्थः ।। २३ ।।

मन्दनन्दिनी — स्त्रीजितोऽपि न भवेदित्याह ॥ यत इति ॥ वामदृशामक्षिसर्गो निगडस्तेन बद्धस्तासां विहारे क्रीडामृगो योऽयम् । विद्वानपि दीनमात्मानं मोचयितुं यतो न कश्चित्कुत्रचिद्देशे क्वापि कालेनालं समर्थः । अतो न तादृशो भवेदित्यध्याहृतेन योजना ॥ २३ ॥

ततो विदूरात् परिहृत्य दैत्या दैत्येषु सङ्गं विषयात्मकेषु ।
उपेत नारायणमादिदेवं स मुक्तसङ्गैरिषितोऽपवर्गः ॥ २४ ॥

सत्यधर्मीया — एतादृशोऽपि संसारः कंसारिशरणागतिरूपोपायतोऽपैतीत्याह ॥ तत इति । हे दैत्याः । जातितः । विषयात्मकेषु विषयेष्वात्मा येषां ते तथा तेषु । दैत्येषु सङ्गं तन्मतावलंबनरूपं विदूरादतिदूरतः परिहृत्य वर्जयित्वाऽऽदिदेवं नारायणमुपेत । एवं मुक्तसङ्गैस्त्यक्तसङ्गैर्युष्माभिर्योऽपवर्गो मोक्षः स इषितः । इष गताविति स्मरणादवाप्तो भवति । मुक्तसङ्गैर्मुक्तानां सङ्गैस्तदादिभिः सह योऽपवर्गो मोक्षः स इषितो भवति । भवद्भिरिति शेषो वा । अविदूराच्छीघ्रं नारायणमुपेत । शरणमिति शेष इति वा ॥ २४ ॥

मन्दनन्दिनी — एवं विषयसङ्गे बाधकमुक्त्वा विषयसङ्गपरित्यागेन नारायणशरणागतिं विधत्ते ॥ तत इति ॥ हे दैत्याः । विषयसङ्गस्योक्तरीत्या दुष्टत्वाद्विषयात्मकेषु दैत्येषु रिपुषु विदूरात्सङ्गं परिहृत्यादिदेवं नारायणमुपेत शरणं गच्छत । अपवर्गहेतुः स नारायणो मुक्तसङ्गैरिषितः शरणं गत इति योजना ॥ २४ ॥

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ।
आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ २५ ॥

सत्यधर्मीया — सोऽपि दूरे वर्तत इति तदुपगतिरायाससाध्या किमित्यतो नेत्यभिधत्ते ॥ न हीति । हे असुरात्मजाः । अच्युतं प्रीणयतो जनस्य बह्वायासो बहुर्बहुलश्चासावायासः श्रमश्च न हि भवति । सर्वभूतानामात्मत्वात्स्वामित्वात् । इह सर्वतः सर्वत्र सिद्धत्वाच्च व्याप्तत्वेन । योगक्षेमं वहाम्यहमिति सुलभत्वात् । तद्वन्तिके । व्याप्य नारायणः स्थित इत्यादेः । सर्वभूतानामात्मत्वात्तत्प्रेष्टत्वादिति वा ॥ २५ ॥

मन्दनन्दिनी — नारायणस्य दूरस्थत्वाच्छरणागतावपि स्वत्वेनास्मत्स्वीकारस्य सन्दिग्धत्वादच्युतप्रीणनं बह्वायास इत्यत आह ॥ न हीति ॥ हे असुरात्मजाः । सर्वतः सिद्धत्वाद्व्याप्तत्वात्सर्वभूतानामिह देहे आत्मत्वात्स्वामितया विद्यमानत्वादच्युतं प्रीणयतो बह्वायासो न हीति योजना ॥ २५ ॥

परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु ।
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २६ ॥

सत्यधर्मीया –– कुतोऽयमेव सेव्यो नान्य इत्यतो हेतुमाह ॥ परावरेष्विति । तदेव विविच्योचे ॥ ब्रह्मान्तेत्यादिना । अशेषाणामविशेषेण हर्यधीनतां बोधयितुं ब्रह्मादिस्थावरादीत्युक्तिः । अन्यथा ब्रह्मादीत्यवक्ष्यत् । भूतेषु महत्स्वाकाशादिषु भौतिकेषु तत्संबन्धिषु विकारेषु घटादिषु । अथचेत्यणुसमुच्चयः । परमाणुषु ॥ २६ ॥

मन्दनन्दिनी –– देशान्तरे कालान्तरे पदार्थान्तरे नियामकान्तरस्य सत्वे कथमस्यैव शरणागतिर्युक्तेत्यत आह ॥ परावरेष्विति ॥ परावरेषु भूतभविष्यद्वर्तमानेषु । उच्चावचेषु वा । ब्रह्मान्तस्थावरादिषु भूतेषु प्राणिषु भौतिकेषु विकारेषु ब्रह्माण्डादिषु भूतेष्वाकाशादिषु महत्सु महदहङ्कारादिषु ॥ २६ ॥

गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ।
एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥ २७ ॥

सत्यधर्मीया –– गुणेषु सत्त्वादिराशौ । गुणसाम्ये प्रलये गुणव्यतिकरे गुणवैषम्ये सृष्ट्यवस्थायां परः सर्वविलक्षण एक एवान्यनिरपेक्षया भगवानीश्वरोऽव्ययो नाशरहित आत्मेति तं प्रीणयतो न बहुल आयास इति योजना ॥ २७ ॥

मन्दनन्दिनी –– गुणेषु सत्त्वादिषु । गुणसाम्ये प्रलये गुणव्यतिकरे सृष्टौ । अव्ययः पर आत्मा भगवानेवेश्वरो हीति योजना ॥ २७ ॥

प्रत्यगात्मस्वरूपेण कालरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २८ ॥

तात्पर्यम् –– 'अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृत' इति च ॥ २८ ॥

सत्यधर्मीया –– प्रत्यगात्मस्वरूपेणेति श्लोके लोकेश्वरस्य जीवतादात्म्यमिव क्षणादिलक्षणकालात्मकत्वं च प्रतीयते तत्प्रच्यावयितुं प्रमाणमाह ॥ अन्तर्यामीति । नात्र प्रत्यगात्मा जीवः किं त्वंतर्यामी हरिः । व्याप्तः कालो हरिः स्मृत इत्यन्वयः । ब्रह्मतर्कोऽपि स्वं समूलमालपत्स्मृत इत्यनेनेति मन्तव्यम् ॥ ततश्चायं मूलार्थः ॥ प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण बहिरनिर्देश्यः साकल्येन निर्देष्टुमशक्यः । व्याप्यव्यापकनिर्देश्यो व्याप्य इति तत्स्थाद्व्यापक इति निर्देश्यः । अविकल्पितो देशान्तरे कालान्तरे चान्य इति विगतविकल्पो विविधतया क्लृप्त इति वा ॥ २८ ॥

मन्दनन्दिनी — व्याप्तस्य परमात्मनोंऽतःस्थित्वा कथं नियामकत्वं युज्यत आह ।। प्रत्यगात्मेति ।। स्वयं भगवान्यद्यप्यनिर्देश्यः साकल्येन निर्देष्टुमशक्यः । व्याप्त एवेति वा । निर्देष्टुमशक्यश्च । तथाऽपि हि यस्मात्प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण व्याप्यो मूर्तः कालरूपेण व्यापके व्याप्त इति । अचिंत्यैश्वर्येण विशेषेण शक्तिव्यक्तिबलेन विकल्पितो विविधतया स्थितस्तस्माद्व्याप्यव्यापक-निर्देश्योंऽतर्यामीति व्याप्त इति च निर्देष्टुं शक्यो भवतीति योजना । एतदेवाभिप्रेत्य तात्पर्यम् । अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृत इति चेति ।। २८ ।।

केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययान्तर्हितैश्वर्य ईयते गुणसर्गया ।। २९ ।।

तात्पर्यम् — प्रकृत्या तमसाऽऽवृतत्वाद्धरेरैश्वर्यं न ज्ञायते ।। २९ ।।

सत्यधर्मीया — स सर्वत्र व्याप्तश्चेत्किमस्माभिर्न दृश्यते । त्वया चानिर्देश्यता निर्देश्यता चोच्यत इत्यतो माययेति ।। मायिकतया तथोक्तिरिति माययेति श्लोके भातीति शङ्कां स्वयं यथावद्व्याख्याय प्रत्याख्याति ।। प्रकृत्येति । मायया प्रकृत्या तद्धेतुकेन तमसाऽज्ञानेनावृतत्वात् । युष्मदादेर्जीवस्येति शेषः । तद्धहरेरैश्वर्यमीश्वरत्वं न ज्ञायते । जीवेनेति शेषः ।। ततश्चायं श्लोकार्थः ।। केवलानुभवानन्द-स्वरूपः केवलो जडामिश्रितो अनुभवो ज्ञानमानन्दश्च स्वरूपभूतो यस्य सः । गुणसर्गया गुणानां सर्गो यया सा तया मायया प्रकृत्या भावरूपाज्ञानेन जीवजातगतेन । अन्तर्हितमज्ञातमैश्वर्यं यस्य स ईयते । युष्माकं तद्भावरूपाज्ञानेनावृतत्वात्सदैश्वर्योऽपि परमेश्वरो न तथा युष्माभिर्ज्ञायत इति भावः ।। २९ ।।

मन्दनन्दिनी — मूले एवंविधमाहात्म्यो भगवान्कुतो न दृश्यत इत्यत आह ।। केवलेति ।। एतादृशो भगवान् गुणसर्गया गुणव्यक्तीकरणभूतया मायया प्रकृत्या जीवावरणभूतयांऽतर्हितैश्वर्यो जीवं प्रति पिहतैश्वर्य ईयते प्रमाणैः प्रतीयते । अतो नेदृशो दृश्यत इति योजना । एतदभिप्रेत्योक्तं तात्पर्ये ।। प्रकृत्या तमसाऽऽवृतत्वाद्धरेरैश्वर्यं न ज्ञायत इति । तमसा भगवत्ज्ञानप्रतिबन्धकया प्रकृत्या जीवावरणेनावृतत्वात्प्रतिबद्धत्वाद्धरेरैश्वर्यं न ज्ञायत इत्यर्थः ।। २९ ।।

तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
भावमासुरमुन्मुच्य तया तुष्यत्यधोक्षजः ।। ३० ।।

तात्पर्यम् — 'विष्णोर्गृहत्वाद्भूतेषु दया कार्या विजानते'ति च ।। ३० ।।

सत्यधर्मीया — तस्मादिति कस्मादिति न ज्ञायत इत्यतः प्रमाणेन परामृश्यं दर्शयंस्तस्मात्सर्वोष्विति श्लोकं व्याकरोति ।। विष्णोरिति । विजानता सर्वत्र भगवान्वर्तत इत्यनुसन्दधता

भूतानां विष्णोर्गृहरूपत्वात्तेषु दया कार्या इति च ब्रह्मतर्क इत्यत्रोत्तरत्र च ज्ञेयम् ।। ततश्चायं मूलार्थः ।। तस्माद्विष्णुगृहत्वात् सर्वेषां भूतानां तत्सन्निधानपात्रत्वात् भूतेषु स्वावरेषु दयां कुरुत । भूतेषु स्वसमेषु सौहृदं सख्यं कुरुत । तत्करणे इत्थंभावमाह ।। भावमिति । आसुरं भावम् । प्रद्विषंतोऽभ्यसूयका इत्यादेः । द्वेषादिकमुन्मुच्य त्यक्त्वा तया कृतया दययाऽधोक्षजो भगवांस्तुष्यति । तयेत्येकस्या ग्रहणमग्रहं च तेनेति सौहृदस्यात्युपकारानत्युपकाराभ्यामिति ज्ञेयम् ।। ३० ।।

मन्दनन्दिनी — मूले भूतदयां च विधत्तें तस्मादिति सर्वभूतानामीश्वरगृहस्थानापन्नत्वादासुरं भावमुन्मुच्य सौहृदमाश्रित्य सर्वभूतेषु दयां कुरुत । तया दययाऽधोक्षजस्तुष्यतीति योजना । एतदभिप्रेत्योक्तं तात्पर्ये ।। विष्णोर्गृहत्वाद्भूतेषु दयाकार्या विजानतेति च ।। ३० ।।

तुष्टे च तत्र किमलभ्यमनन्त आद्ये
किं तैर्गुणव्यतिकरैरिह येऽनुसिद्धाः ।
धर्मादिभिः किमगुणेन च कांक्षितेन
सारं जुषां चरणयोरुपगायतां नः ।। ३१ ।।

तात्पर्यम् — 'काङ्क्षतो मोक्षगमपि सुखं नाकाङ्क्षतो यथे'ति च ।। ३१ ।।

इति सप्तमतात्पर्ये षष्ठोऽध्यायः ।। ६ ।।

सत्यधर्मीया — तुष्टे तु तत्रेति श्लोकेऽगुणेन सत्त्वादिगुणाजन्येन मोक्षेण कांक्षितेन किं न किमपि फलमिति सर्वापेक्षितस्य मोक्षस्य कांक्षा सर्वथा धर्मादिकांक्षावन्न कर्तव्येति प्रल्हादेनोच्यते तदयुक्तम् । मोक्षशास्त्रवैयर्थ्यापत्तेरित्यतः प्रमाणेनैव तदभिप्रायमाह ।। कांक्षत इति । मोक्षगं मोक्षे विद्यमानं सुखं कांक्षतोऽधिकारिणः सकाशात् । आकांक्षतो विशिष्टाधिकारिण एकांतिकस्य मोक्षगं सुखं यथा सम्यग्भवति । अनेन कांक्षतोऽल्पमनल्पमनाकांक्षतः सुखं भवतीति प्रल्हादवादभावो द्योतितो भवतीति मंतव्यम् ।। ततश्चायं मूलार्थः ।। सुखदुःखप्राप्तिहानीतरत्वात्कथं भगवत्तोषस्तोषदो नः स्यादित्यत आह ।। तुष्टे त्विति । अनन्ते अपरिच्छिन्ने । आद्ये सर्वादिभवे । तत्र तस्मिन्भगवति तुष्टे प्रीते सति । अलभ्यं किं न किमपि दुर्लभं सर्वं सुलभमेवेत्यर्थः । चरणयोः । स्वित्यानन्दः समुद्दिष्टो वरिति ज्ञानमुच्यते । मुक्तिदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चैव सव्यश्चेति बृहद्भाष्योक्तेः । तयोः सारं रसं जुषां सेवमानानां नोऽस्माकं तमेव सारम् । उपगायतां च । ये इहानुसिद्धा जन्मप्रभृतिप्राप्तास्तैर्गुणव्यतिकरैः शब्दादिविषयसुखैः किं न किञ्चित्प्रयोजनम् । किं चागुणेन गुणत्रयाजन्येन मोक्षेणापि किम् । तर्हि तदभिधायकं मुधा स्याच्छास्त्रमित्यत आह ।। काङ्क्षितेनेति । तस्यानाकाङ्क्षणेऽपि तुष्टेऽनन्ते स्वत

एवाकाङ्क्षादधिकार्यधिकानन्दवतो लाभो भवतीति भावेनैव न चाकाङ्क्षितेनागुणेन किमित्युक्तवान्न तु सामान्यतो मोक्षाप्रतिष्ठां चकार प्रल्हाद इति ज्ञेयम् । मोक्षोऽपि यदि काङ्क्षितो नाकाङ्क्ष्यः सुतरां न कृत्यमेतैरतिनश्वरफलकैरित्याह ।। धर्मादिभिरिति ।। ३१ ।।

मन्दनन्दिनी — मूले तुष्ट्यापि किं प्रयोजनमित्यत आह ।। तुष्ट इति ।। आद्येऽनन्ते उत्पत्तिनाशरहिते तत्र भगवति तुष्टे त्वलभ्यं किम् । सर्वमाकाङ्क्षितं भवतीति भावः । परं त्वेकान्तैराकाङ्क्षाऽपि न कार्येत्याह । सारं जुषां सर्वोत्तमवस्तुसेवमानानाम् । प्रीणयतां चरणयोरुपगायतां नोऽस्माकं येऽनुषङ्गेणैव सिद्धा वैषयिकसुखादयस्तैर्गुणव्यतिकरैर्गुणत्रयकार्यैः काङ्क्षितं किम् । किं प्रयोजनम् । एवं धर्मादिभिः प्रवृत्तधर्मादिभिरपि काङ्क्षितैः किम् । अन्ततो गुणेन मोक्षेण काङ्क्षितेन किमिति योजना । न किमप्याकाङ्क्षणीयमिति भावः । मोक्षगं सुखं त्वाकाङ्क्षमाणापेक्षया नाकाङ्क्षमाणस्याधिकम् । एकान्तभक्तत्वात् । एतदेवाभिप्रेत्य तात्पर्यम् ।। एतदेवाभिप्रेत्य तात्पर्यम् ।। काङ्क्षतो मोक्षगमपि सुखं नाकाङ्क्षतो यथेति चेति ।। अकाङ्क्षतः काङ्क्षारहितस्य यथाऽतिशयितं तथा काङ्क्षतो नेत्यन्वयः ।। ३१ ।।

धर्मार्थकाम इति यो विहितस्त्रिवर्ग
ईक्षा त्रयी नयदमौ विविधा च वार्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं ।
स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ।। ३२ ।।

सत्यधर्मीया — तर्हि धर्मादिप्रतिपादकशास्त्रं सफलं कथं स्यादित्यत आह ।। धर्मेति । धर्मोऽर्थः कामश्चेति यो विहितस्त्रिवर्गस्तस्येक्षा ज्ञानमनुष्ठानं च । या त्रयी वेदस्तस्य चेक्षा शब्दतोऽर्थतश्च ज्ञानम् । यौ च नयदमौ नीतिदण्डसमयौ तयोश्चेक्षा ज्ञानम् । विविधा च वार्ता जीविका तदभिधायिशास्त्रज्ञानं च । ''नाम वा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणश्चतुर्थ'' इत्यारभ्य ''सर्पविद्यां नक्षत्रविद्यामित्यादि गर्भीकृत्य'' देवयजनविद्येत्यन्तोक्तस्य सर्वस्य संग्राहकश्चशब्दः । यदेतदुक्तमखिलं निगमस्यार्थजातं स्वसुहृदोऽस्मत्कृत्याभावेऽपि स्वयमेवानुकंपामुपाप्नोतीति सुहृत्तमस्य परमस्य पुंसः परमपुरुषस्य । स्वात्मार्पणं तत्साधनं चेत्सत्यं सफलं मन्ये । अखिलं बलवच्च मन्ये । सकलस्यानुष्ठितस्य ज्ञानस्य च भगवत्समर्पणं चेत्सार्थक्यमन्यथा नैरर्थक्यमिति । प्रागुक्तं किं धर्मादिभिरित्यसमर्पितधर्मपरमिति मम भाव इति वित्तेति प्रोचे प्रल्हाद इति ध्येयम् ।। ३२ ।।

मन्दनन्दिनी — भगवत्तुष्टिरेव सम्पाद्या चेद्धर्मार्थकामादिकमसत्यत्वान्निष्फलत्वाद्वा न सम्पाद्यमित्यायातमित्यत आह ।। धर्मेति ।। धर्मार्थशब्दाभ्यां परस्य सुपो लोपः । तथा च धर्मोऽर्थः काम इति यो विहितस्त्रिवर्ग ईक्षा । एतद्विषयकं ज्ञानम् । एतद्विधात्री त्रयी श्रुतिः । नयदमौ नीतिदण्डशास्त्रे । विविधा च वार्ता । कृषिगोरक्षवाणिज्यादिरूपा । तदेतदखिलं निगमस्य नियमेनोक्तत्वात् सत्यमबाध्यं तदुक्तफलसाधनं च मन्ये । अन्यथा वेदस्याप्रामाण्यानुपादेयत्वयोरापत्तेः । परं त्वेतदपेक्षया स्वसुहृदो निर्निमित्तोपकारकस्यास्य पुंसो भगवतः स्वात्मार्पणं नवविधभक्त्या स्वात्मसमर्पणं परमत्युत्तमसाधनमिति योजना । मोक्षफलकत्वात् । इतरस्य च संसारफलकत्वादिति भावः ।। ३२ ।।

ज्ञानं तदेतदमलं दुरवापमाह
नारायणो नरसखः किल नारदाय ।
एकान्तिनां भगवतस्तदकिञ्चनानां
पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ।। ३३ ।।

सत्यधर्मीया — संप्रदायागतत्वादवश्यं विश्वसनीयं लोक आलोकीदं तु लोकेश्वरोपदिष्टमिति सर्वथा श्रद्धेयमित्याह ।। ज्ञानमिति । ज्ञायतेऽनेनेति ज्ञानं तदुत्पादकशास्त्रम् । अमलं निर्दोषम् । अभागवतैर्दुरापं तदेतत् । नरसखोऽनन्तमित्रम् । अनेन शेषतत्समगरुडमार्गगमनसाधनतामेतस्य द्योत्यते । नारायणो नारदायाह । तत्रापि तदपि पुरातनमेव सोऽप्याहेति द्योतयति किलेत्यनेन । नास्माकमत्राधिकार इत्यतो नेत्याह ।। एकान्तिनामिति । भगवतः पादारविन्दरजसाऽऽप्लुतदेहिनां स्नाताङ्गानाम् । अकिञ्चनानामीश्वरव्यतिरिक्तं किञ्चन शक्तं नास्ति येषां तेऽकिञ्चनाः । तेषामेकान्तिनां नारायणमात्रमिच्छताम् । तत् पूर्वोदीरितं स्यात् । युष्माकमायुष्मतां तन्मात्रचिन्तनेन दुर्मिलं तदिति भावः ।। ३३ ।।

मन्दनन्दिनी — कथमेतादृशज्ञानं त्वया लब्धमित्यतः पुरावृत्तमाह ।। ज्ञानमिति ।। अवाप्तुमशक्यं तदेतदखिलं ज्ञानम् । ज्ञायतेऽनेनेति ज्ञानम् । शास्त्रम् । नरसखो नारायणः । धर्मपुत्रो नारदायाह किल । भगवदनुग्रहयोग्यानां एतादृशं ज्ञानं भवतीति सामान्येनाह । एकान्तिनां भगवतः पादारविन्द-रजसाऽऽप्लुतदेहिनाम् । अकिञ्चनानाम् । तत्ज्ञानं स्यादिति योजना ।। ३३ ।।

श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ।
धर्मं भागवतं शुद्धं नारदाद् देवदर्शनात् ।। ३४ ।।

सत्यधर्मीया — तव तु कथमिदं प्राप्तमित्यतस्तदवाप्तिं स्वस्याह ।। श्रुतमिति । ज्ञानविज्ञानसंयुतं तत्साधनं भागवतं तत एव शुद्धं धर्मम् । नारदात् । सोऽपि न यादृशतादृश इत्याह । देवदर्शनाद्भगवतो देवस्य दर्शनमपरोक्षज्ञानं यस्य तस्मात् । स्याद्धर्ममस्त्रियां पुण्यमित्यमरः ।। ३४ ।।

मन्दनन्दिनी — भवतु नारदादीनां ज्ञानं तव तु कथमित्यत आह ।। श्रुतमिति ।। योजना तु स्फुटा। ज्ञानं मोक्षसाधनम् । विज्ञानं विशेषतो मोक्षसाधनम् । धर्म्यं धर्मादनपेतम् । देवदर्शनाद्भगवदपरोक्षिणः ।। ३४ ।।

दैत्यपुत्रा ऊचुः–

प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् ।
एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरः ।। ३५ ।।

सत्यधर्मीया — त्वं क्वापि न गतो नागतश्च भगवान्नारदः कथं श्रद्धेयं तव वचनमिति पृच्छन्ति बाला इति लपति ।। दैत्यपुत्रा इति । हे प्रल्हाद । त्वं वयं चैताभ्यां गुरुपुत्राभ्यां शण्डामर्काभ्यामृते विना। यद्यपि उपयामगृहीतोऽसि शंडाय त्वैष ते योनिर्वीरतां पाहि । तं प्रत्नथा पूर्वथा विश्वथेमथाज्येष्टतातिं बर्हिषदं स्वर्विदं प्रतीचीनं वृजिनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे । उपयाम गृहीतोसि मर्काय त्वैषते योनिः प्रजाः पाहि इति प्रथमाष्टकचतुर्थाध्यायोक्तेः शण्डमर्काभ्यामिति वक्तव्यम् । तथापि शण्डामर्कौ सुतौ तस्य इत्यत्रैव बहुशः प्रयोगादन्येभ्योऽपि दृश्यत इति दीर्घः । छन्दःसमत्वात् सांहितिको वा । अथवा देवत्वविवक्षयाऽनङ् । अन्यारादितरर्त इति पञ्चमी । अन्यं गुरं न विद्मो न जानीमः । विदो लटो वेति । इतस्ततस्तातस्ततजनमुखतः श्रुतमिति वक्तुमुत्कण्ठां कुण्ठयति ।। हीति । हि यस्माद्बालानां शिशूनां नोऽस्माकमीश्वरो नियन्ता हिरण्यकशिपुरूपोऽप्यस्ति । अतो नान्यत्र गमनयोग इति भावः ।। ३५ ।।

मन्दनन्दिनी — नारदात् श्रुतमित्येतत्कथं विश्रम्भणीयम् । तवास्माकं च शण्डामर्काभ्यामृतेऽन्यस्य गुरोर्लभाभावात् । ईश्वरोऽपि बालानां नो साक्षादुपदेष्टा । तव चान्तःपुरस्थस्य महत्सङ्गो दुर्लभः । अत्र विश्वासजननोपायोऽस्तिचेत्तमुक्त्वा संशयं छिन्धीत्याशयेनाह ।। प्रह्लादेति ।। नोपीत्यत्र नो अपीति पदच्छेदः । प्रगृह्यं तु नाश्रितम् ।। ३५ ।।

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां षष्ठोऽध्यायः ।। ७—६ ।।

बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः ।
छिन्धि नः संशयं सौम्य स्याच्चेद् विस्रम्भकारणम् ॥ ३६ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे षष्ठोऽध्यायः ।

सत्यधर्मीया — बालस्य तत्राप्यन्तःपुरस्थस्य महत्सङ्गो महतो महतां नारदस्य नारदादीनां सङ्गः सहवासो दुरन्वयो दुःसंपादः । विस्रंभकारणं विश्वासहेतुर्वः स्याच्चेद्वर्तेत चेत् । तं नो दुरन्वयसंशयम् । हे सौम्य । छिन्धि छेदय । तन्निमित्तमुपन्यस्य नः संशयं छिन्धीति भावः ॥ ३६ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमस्कन्धे षष्ठोऽध्यायः ॥ ७-६ ॥

॥ अथ सप्तमोऽध्यायः ॥

नारद उवाच–

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ।
उवाच स्मयमानस्तान् स्मरन् मदनुशासनम् ॥ १ ॥

सत्यधर्मीया — भागवती भक्तिरेव तत्प्रसादसाधनमतः सैव संपाद्याऽधिकारिणेति बहुना ग्रन्थेन द्रढयितुं निरूप्यतेऽत्राध्याये । तत्र दैत्यपुत्रपृष्टः किमकरोत्प्रह्लाद इति युधिष्ठिरमानसां शङ्कां विध्यंकजः परिहरन्नाह ॥ नारद इति ॥ तान्बालान् । मदनुशासनं ममानुशासनं स्मरन्स्मयमानः संश्चासुर उवाच ॥ १ ॥

मन्दनन्दिनी — साधनेषु भक्तेरेव प्राधान्यात्सैव निरूप्यतेऽस्मिन्नध्याये । प्रह्लादः किमाहेत्यत आह ॥ एवमिति । मदनुभाषितं नारदानुभाषितम् ॥ १ ॥

प्रह्लाद उवाच–

पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम् ।
युद्धोद्योगं परं चक्रुर्विबुधा दानवान् प्रति ॥ २ ॥

सत्यधर्मीया — अस्माकम् । अस्मदो द्वयोश्चेति बहुवचनम् । गुरुत्वेनापीदानीं संभवत्सुवर्णसौगंध्याभावकमनुससारेति ज्ञेयम् । पितरि तपसे तदर्थम् । मन्दराचलं प्रति प्रस्थिते सति । तत्काले नागच्छन्तं मत्वा विबुधा देवा दानवान् प्रति परं पूर्ववैरस्मृतिसहिततया ॥ २ ॥

मन्दनन्दिनी — प्रस्थिते गते । परमतिशयितम् ॥ २ ॥

पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ।
पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥

सत्यधर्मीया — अहिः सर्पः पिपीलिकैः पिपीलिकाभिः । शनैर्याति पिपीलिक इति प्रयोगात् पुंस्त्वमपीति स्वामीति भानुः । यथा भक्ष्यते तथा लोकोपतापनो लोकोपद्रवकृत् पापः पापी स्वपापेनैवाभक्षि भक्षित इति वादिनो वासवादयो विबुधा युद्धोद्योगं परमत्यन्तमिति वा चक्रुरित्यन्वयः । दिष्ट्या सुखमस्तु । दिष्ट्या शमुपजोषं चेत्यमरः ॥ ३ ॥

मन्दनन्दिनी — पिपीलकैरहिर्यथा भक्ष्यते तथा लोकोपतापनः पापो हिरण्यकशिपुर्लोकस्य दिष्ट्या सुखकारणेन पुण्येन स्वपापेन चाभक्षि भक्षितः । नष्ट इति यावत् । इति वादिनो वासवादयो युद्धोद्योगं चक्रुरिति योजना । दिष्ट्या समुपजोषं चेत्यमरः ॥ ३ ॥

तेषामतिबलोद्योगं निशम्यासुरयूथपाः ।
वध्यमानाः सुरैर्भीताः दुद्रुवः सर्वतो दिशम् ॥ ४ ॥

सत्यधर्मीया — तेषामनिमिषाणाम् । भीतास्तेभ्यः ॥ ४ ॥

मन्दनन्दिनी — सर्वतो दिशं सर्वा दिशः ॥ ४ ॥

कलत्रपुत्रवित्ताप्तान् गृहान् पशुपरिच्छदान् ।
नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥

सत्यधर्मीया — प्राणपरीप्सवः प्राणानिच्छन्तः ॥ ५ ॥

मन्दनन्दिनी — पशुपरिच्छदान् पशुबन्धनगृहान् । नावेक्षमाण इति नसमासः ॥ ५ ॥

व्यलुम्पन् राजशिबिरममरा जयकाशिनः ।
इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥

सत्यधर्मीया — अमरा जयकाशिनो जयेन काशन्त इति ते तथा । जयसंबन्धिनः, काशास्तृणविशेषा येषां सन्ति ते तथा वा । राजशिबिरं व्यलुंपन् लुलुपुः । नाशितवन्तः । मम मातरं कयाधूम् ॥ ६ ॥

मन्दनन्दिनी — राजशिबिरं राजगृहं व्यलुम्पन्नाशितवन्तः । जयकाशिनो जयकाङ्क्षिणो जयेन प्रकाशमाना वा ॥ ६ ॥

नीयमानां भयोद्विग्नां रुदन्तीं कुररीमिव ।
यदृच्छयाऽऽगतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥

सत्यधर्मीया — भयोद्विग्नां भीतिहेतुत्रस्तां यदृच्छया हरीच्छया देवर्षिर्नारदः पथि नीयमानां कुररीमिव रुदन्तीं ददृशेऽपश्यत् ॥ ७ ॥

मन्दनन्दिनी — भयोद्विग्नां भयकम्पिताम् ॥ ७ ॥

प्राह मैनां सुरपते नेतुमर्हस्यनागसीम् ।
मुञ्च मुञ्च महाभाग सतीं परपरिग्रहम् ॥ ८ ॥

सत्यधर्मीया — अनागसीं अनागसम् । आगस इयं आगसी । सम्बन्धसामान्येऽण् । वृद्धलक्षणस्तुछः संज्ञापूर्वकविधेरनित्यत्वात् । सा नभवतीत्यनागसी तामिति वा । स्वयं निरपराधाम् । एनाम् । तवानुपयोगिनीत्याह । परपरिग्रहं परभार्याम् । परिग्रहः परिजने भार्यायां चेति विश्वः । तत्रापि सतीं पतिव्रतामिति । नेतुम् । माऽयम् । माऽर्हसि न योग्यो भवसि । मुंच मुंच ॥ ८ ॥

मन्दनन्दिनी — परपरिग्रहं परस्त्रियम् ॥ ८ ॥

इन्द्र उवाच–

आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ।
आस्यतां यावत् प्रसवं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥

सत्यधर्मीया — एतदत्त्यागे योगमाह ॥ आस्त इति । अस्याः कयाध्वाः जठरे उदरे सुरद्विषो हिरण्यकशिपोरविषह्यं वीर्यं आस्ते । यावत्प्रसवं प्रसवपर्यन्तम् । आस्यतां मद्वश इति शेषः । अर्थपदवीं प्रयोजनमार्गं मदभिलषितसिद्धिमिति यावत् । गतः । पुत्र एव जायत इति निष्कर्षस्तु वर्चआदिना वा ज्ञानितया वा वासवस्य वर्तत इत्यनेन ध्वन्यते । तं सुतं जातं गृहीत्वैनां मोक्ष्ये त्यक्ष्यामि ॥ ९ ॥

मन्दनन्दिनी — यावत्प्रसवमास्यतां मम निकटे । अर्थपदवीं प्रयोजनमार्गम् । एतत्प्रसूतशिशुं हत्वेति भावः ॥ ९ ॥

नारद उवाच–

अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ।
त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥

सत्यधर्मीया — वासव सत्यं भविता सुतस्तथाऽपि तदविता भगवानस्तीति न त्वया हन्तुं योग्य इति कामना तवायोग्येत्याह ॥ अयमिति । अर्थपदवीमित्यत्रार्थशब्दस्य निवृत्तिरर्थ इतीन्द्रस्य प्रायोऽभिप्राय इति मत्वा वदति । संस्थां मृत्युं न प्राप्स्यते । संस्था स्थितौ चरे नाश इति विश्वः । तत्र निष्किल्बिष इत्यादीनि हेतुगर्भविशेषणानि ॥ १० ॥

मन्दनन्दिनी — निष्किल्बिषो निष्पापः । संस्थां हननम् । अनन्तानुचरो भगवत्सेवकः ॥ १० ॥

इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन् वचः ।
अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥

सत्यधर्मीया — इत्युक्तो नारदेनेति शेषः । देवर्षेर्वचो मानयन् । उक्तानुष्ठानेन । अनन्तप्रियभक्त्याऽनन्तस्य भगवतः प्रियो दासतयाऽन्तस्थितोऽहम् । मयि भक्तिः स्नेहविशेषस्तया । एनां परिक्रम्य । इदमोऽन्वादेश इति त्यागरूपकार्यं विधातुमुपात्तायाः प्रदक्षिणरूपकार्यान्तरं प्रति पुनरुपादानाद् द्वितीया टौस्वेन इत्येनादेशः । अनन्तस्य शेषस्य प्रियो नारायणस्तस्मिन्भक्त्येति वा । अनन्तस्य प्रियं यया सा च सा भक्तिस्तयेति वा ॥ ११ ॥

मन्दनन्दिनी — अनन्तप्रियभक्त्याऽनन्तस्य भगवतः प्रियया भक्त्या । अनन्तप्रिये प्रह्लादे भक्त्या बहुमानेन वा । परिक्रम्य प्रदक्षणीकृत्य ॥ ११ ॥

ततो नो मातरमृषिः समानीय निजाश्रमम् ।
आश्वास्येहोष्यतां भद्रे यावत् ते भर्तुरागमः ॥ १२ ॥

सत्यधर्मीया — ततस्तुराषाड्गमनानन्तरम् । ऋषिर्निजाश्रमम् । नो मातरं समानीयाश्वस्य च । यावत्ते भर्तुरागमस्तावत्कालम् । इह मदाश्रमे । उष्यतामित्याहेति शेषः । आहोष्यतामिति पाठे इहेति शेषः ॥ १२ ॥

मन्दनन्दिनी — नोऽस्माकम्। उष्यतां वासः क्रियतां वेति शेषः ॥ १२ ॥

तथेत्यवात्सीद् देवर्षेरन्ति साऽप्यकुतोभया ।
यावद् दैत्यपतिर्घोरात् तपसो न न्यवर्तत ॥ १३ ॥

सत्यधर्मीया — अन्ति अन्तिके अन्तिषत्। यदन्ति यच्च दूरक इत्यादेः ॥ १३ ॥

मन्दनन्दिनी — अन्ति समीपे। अकुतोभया कुतोऽपि भयरहिता ॥ १३ ॥

ऋषिं पर्यचरत् तत्र भक्त्या परमया सती ।
अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥

सत्यधर्मीया — महति कालेऽन्तर्निहितस्य गर्भस्य कथंकारमवस्थानमथवा तत्रैव प्रसवः किमिति बालशङ्कां परिहरति ॥ ऋषिमिति । अन्तर्वत्नी अन्तर्वत्पतिवतोर्नुगिति नुक् । ङीप् च परिचरणपरमोद्देश्यमाह। स्वगर्भस्य क्षोमाय इच्छाप्रसूतये यथेच्छं गर्भमोचनाय चेति ॥ १४ ॥

मन्दनन्दिनी — अन्तर्वत्नी गर्भिणी ॥ १४ ॥

ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ।
धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ॥ १५ ॥

सत्यधर्मीया — उभयं गर्भगार्भिकक्षेमं इच्छाप्रसवश्चेत्युभयम्। धर्मस्य भगवतः। धारकत्वाद्धर्मो भगवानित्युक्त्वा पृथिवी धर्ममूर्धनीत्यादेरित्युक्तेः । भागवतस्य वा । श्रेयसस्तत्त्वं स्वरूपम् । ज्ञानं भगवद्भागवतज्ञानसाधनं चेत्युभयविधम् । निर्मलं मुमुक्षुयोग्यतया । मां मुख्यतया । अपिर्मातृसमुच्चायकः। तां चोद्दिश्य प्रादाद्दत्तवान्। उपदिदेश च। एतत्सर्वस्यासिद्धिशङ्कापराकरणायाह ॥ ईश्वर इति। किमुपाधिना ददौ विधिज इत्यत आह ॥ कारुणिक इति ॥ १५ ॥

मन्दनन्दिनी — उभयं गर्भक्षेममिच्छाप्रसूतिम्। ईश्वरः समर्थः। धर्मस्य निवृत्तिधर्मस्य। तत्त्वं स्वरूपम्। ज्ञानं ज्ञेयम्। भगवन्तं प्रादादुपदिदेशेत्यर्थः। मातरम्। निर्मलं योग्यं गर्भस्थं मामपि। अत्रेच्छाप्रसूतेर्नारदवरत्वाद्बहुकालं तपःकरणेऽपि हिरण्यकशिपोः शिक्षाकाले प्रह्लादस्य न पञ्चाहायनत्वविरोधः ॥ १५ ॥

तत् तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ।
ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात् स्मृतिः ॥ १६ ॥

सत्यधर्मीया — तत् उभयं कालस्य दीर्घत्वाद्बाहुल्यात् । स्त्रीत्वाच्च मातुस्तिरोदधे तिरोहितमभूत् । ऋषिणा नारदेनानुगृहीतं मां स्मृतिर्नाजहान्न तत्याज । मम गार्भस्थादेतदसामर्थ्येऽपि तदुपदेशेन सा बलवतीति न जहौ । जैहौ च मातरं मातरम् । चोद्दिश्येति कण्ठतः साक्षादनुक्तिरपिशब्देन समुच्चायकेनाप्यान्तरङ्गिकं गर्हणमपि कटाक्षितं संभवतोऽनेनेति ज्ञेयम् ॥ १६ ॥

मन्दनन्दिनी — तिरोदधे विस्मृतमभूत् । नाजहान्नात्यजत् ॥ १६ ॥

भवतामपि भूयान्मे यदि श्रद्दधते वचः ।
वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥

सत्यधर्मीया — किमार्द्रकवणिजो वहित्रचिन्तयेत्यस्माकं किमित्यत आह ॥ भवतामपीति । यदि मे मम वचः श्रद्दधते तर्हि भवतामपि वैशारदी विशारदो नारायणो नारदो वा तद्विषयिणी तदुपात्तेति वा वैशारदी धीर्भूयात् । न केवलं भवतामेव किन्तु श्रद्धातो विश्वासतो मे मम मातुश्च स्त्रिया यथा तथाऽबलानां बालानां चान्येषां वैशारदी धीर्भूयादित्यन्वयः ॥ १७ ॥

मन्दनन्दिनी — यथा मे वैशारदी धीर्भगवद्विषयिणी मतिः । तथा यदि भवन्तो मे वचः श्रद्दधते विश्वासं कुर्वन्ति । तर्हि भवतामपि भूयाद्भवेत् । एवं श्रद्धातः स्त्रीबालानां च भूयादिति योजना । श्रद्धैव सम्यग्ज्ञानोत्पत्तौ कारणमिति भावः ॥ १७ ॥

जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः ।
फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥

तात्पर्यम् — **'षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु । तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेदि'ति च ॥ हेतुत्वाद्विष्णवधीनत्वं शरीरस्य ॥ १८ ॥**

सत्यधर्मीया — जन्माद्याः षडिमे भावा इत्यादिश्लोकत्रिके इमे जन्माद्या जन्मास्तिवृद्धिपरिणामापक्षयविनाशाख्याः षड्विकारा देहस्य दृष्टाः । आत्मनो जीवस्य नेत्यात्मा जीवः । परैर्नित्यत्वादिद्वादशलक्षणैर्युक्त इति । विद्वान्देहदेहिस्वरूपं जानन् देहादौ मोहजमहंममेत्य-तद्भावमसन्तमाग्रहं त्यजेदित्यन्यथाप्रतीतिं प्रमाणेनैव निस्त्राणीकरोति ॥ षड्विकारा इति । विकाराः षट् तत्संख्याः पूर्वमाख्याताः शरीरस्य । तुरवधारणार्थं संच्छरीरस्येत्यनेनान्वेति । अथवा तद्गतस्य जीवस्यापि पराधीनविशेषावाप्तिरूपोत्पत्तिमत्त्वेन विकृतत्वात्तु विष्णोः षड्विकारा नैवेत्यन्वेति । ततो व्यावर्तितो जीव इति केचित् । तद्गतस्यात्मनो विष्णोस्तदधीनं शरीरं विष्णवधीनं ज्ञात्वा तन्ममतां तस्मिन्देहादौ ममतामभिमानं त्यजेत् । किं तद्गतता विष्णोराभिमानिकी जीववदित्यतो न किन्तु

सैतद्रूपिणीति निरूपयति ।। हेतुत्वान्मुख्यनिमित्तकारणत्वादिति । शरीरस्य विष्ण्वधीनत्वं न तु जीववदभिमानित्वात् । अधीनपदसमस्तस्य विष्ण्वित्यस्य बुद्धया विविक्तस्य षष्ठयन्तस्य हेतुपदेनान्वयोऽथशब्दानुशासनं केषां शब्दानामित्यादिमहाभाष्यादिवज्ज्ञेयः ।।

अथ मूलार्थः ।। नारदोपदिष्टा का सा वैशारदी धीर्विशारद वदेति वदेयुरिति किं कालगमनेनेति स्वयमेव विश्वस्य तांस्तदुक्त्याऽऽश्वासयति ।। जन्माद्या इति । दृष्टा इति तत्रानुभवं प्रमाणमाचष्टे । साक्षिसिद्धा इति । जन्मादयः षट् इमे भावा विकारा देहस्य तस्यैव । आत्मन आदानादिकर्तृतया तच्छब्दवाच्यस्य विष्णोर्न । अनेन जनितोत विष्णोरित्यादिना श्रीनाथस्यापि विकारश्रुतेः सोऽप्यस्मत्तुल इति को विशेषो येनाशेषसमर्पणं तत्र कर्तव्यत्वेन पूर्वमुक्तं युक्तं स्यादिति शङ्का परास्ता वेदितव्या । तुष्यतु न्यायेन जनितेत्यादेरर्थ उक्तः । वस्तुतस्तु न तत्र विष्णुः श्रीहरिः । किंतु तदितर इति जनिर्मुख्यैव । यथोक्तं सुधायाम् । तद्विष्णुरिति यजमानस्य यज्ञस्य वा नाम । तौ सोमाद्भवत इति सोमो जनितोत विष्णोरित्युच्यत इत्यादिव्याख्येयमिति । प्रत्यक्षत्वं हरेर्जन्म, न तस्य प्राकृता मूर्तिरित्यादिमानानुकूल्येन जनितपदार्थः प्रादुर्भावादिर्न तव दुर्भावस्तदर्थ इति वा दृष्टा इति वचसा सूचयतीति ज्ञेयम् । तत्र निदर्शनमनुरूपं निरूपयति ।। फलानामिति । वृक्षस्य चूतादेः फलानां कालेन वसन्तादिना । अत्र जन्माद्यास्तथाऽऽत्मनः सकाशादेव देहस्य जन्माद्या इति नात्मन इत्यावृत्त्याऽन्वयो ज्ञेयः । ननु कालेनेत्युक्तेरयुक्तमनवधिस्वाम्यं भावादिकं प्रति भगवत इत्यतो सोऽपि भगवत्तंत्र इत्याह ।। ईश्वरमूर्तिनेति ।। ईश्वरस्य मूर्तिरन्तर्निहिता फलाद्युपलंभिका यस्य तेनेश्वरमूर्तिना । ईश्वरस्य पूर्णमदः पूर्णमिदमित्याद्युक्त्या मूर्तिरेव मूर्तिर्यस्य तेन कालेन कालोऽस्मीत्याद्युक्तेस्तच्छब्दवाच्येन भगवता । इमे देहस्य षड् जन्माद्या भावा इति तेनात्मन इति वा तत्राप्यन्वयो ज्ञेयः ।। १८ ।।

मन्दनन्दिनी — एवं पूर्ववृत्तकथनेन बालानां स्वस्मिन् श्रद्धां जनयित्वा तानुपदिशति ।। जन्माद्या इत्यादिना ।। देहजीवयोर्वैलक्षण्यं परमात्मनश्च ताभ्यामत्यन्तवैलक्षण्यं सर्वस्य तदधीनत्वं ज्ञात्वा देहगेहादावहंममता न कार्येत्याह श्लोकत्रयेण । दृष्टाः प्रत्यक्षसिद्धा जन्माद्याः । स्वरूपोत्पत्तिलक्षणं जन्म, कालविशेष एव वर्तमानत्वलक्षणा सत्ता । उपचयलक्षणा वृद्धिः । परिणामोऽपचयलक्षणः । क्षयो ध्वंसलक्षणो विनाशः । इमे भावा विकाराः । चूतादिवृक्षस्य फलानामिव । कालेन कालनामकेनेश्वरमूर्तिना ईश्वर इति मूर्तिः रूपं यस्य तेन भगवता देहस्य भवन्ति । नात्मनो विष्णोरिति योजना । यद्यपि जीवस्याप्येते न सन्ति । तथाऽपि स्वातन्त्र्येणैव तदभावः परमात्मनो भगवदिच्छया तु जीवस्यापीति ज्ञेयम् । अनेन विकाराणां देहनिष्ठत्वं न जीवनिष्ठत्वं सर्वस्य विष्ण्वधीनत्वं चोक्तं भवति ।।

।। १८ ।।

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग् वश्यो व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥

सत्यधर्मीया — आत्मा यत्ने धृतौ जीव इत्यात्मशब्दो जीवे वर्ततेऽतः कथं न तेन वासुदेवमात्रग्रह इत्यतः श्रुतिवैभवादनेकानि लक्षणान्यात्मेति लक्ष्यमुद्दिश्याह ॥ आत्मा नित्य इत्यादिना । नित्यः । नित्यो नित्यानाम् । अविनाशी वा अरे अयमात्मेति मुख्यनित्यः । अव्ययः । परेऽव्यय इत्यादेरवयवादि-व्ययहीनदिव्यविग्रहः । अविः सूर्यः । अवयः शैलमेषार्का इत्यभिधानात्तस्मिन्कृष्णावतारे गोवर्धनं वा यत इति स तथा । शुद्धो निरञ्जन इति श्रुतेः । सान्तत्वसातिशयत्वादिरहित इति वा । एको मुख्यः । एकमेवाद्वितीयम् । एको नारायण आसीदित्यादेः । यद्वा । करोतीति क एकत्वात् ए । अव्ययत्वाद्विभक्तिलोपः । सचासौ कश्चेत्येकः । यथोक्तं गीतातात्पर्यन्यायदीपिकयोः । एकः सर्वोत्तमोऽप्यसत्कृतः । एकः सर्वाधिको ज्ञेय एक एव करोति यत् । एकशब्दः कथं सर्वोत्तमवाचीत्यत आह ॥ एक इति । एकत्वादे करोतीति क इत्यर्थः । अन्यनिरपेक्षया कर्ता हि सर्वोत्तम इति । क्षेत्रज्ञो भगवान्विष्णुर्न ह्यन्यः क्षेत्रमंजसा । वेत्त्यसौ भगवान्ज्ञेय इति गीतातात्पर्योक्तेः । क्षेत्रज्ञः क्षेत्रं शरीरादिकं जानातीति स तथा । क्षेत्रज्ञं चापि मां विद्धीत्यादेः । आश्रयः सर्वोपजीव्यः । यस्मिन्निदं सं च विचैधि सर्वम् । यस्मिन्द्यौः पृथिवी चान्तरिक्षमित्यादेः सर्वाश्रय इति वा । अविक्रियो निर्विकारोऽक्षरः शुद्ध इत्यादेर्विकाररहितः । स्वदृक् स्वं स्वयमेव पश्यतीति स्वदृक् । तद्ब्रह्मावेदहं ब्रह्मास्मीत्यादेः । वश्यः स्वाधीनः स्वतन्त्रः । हेतुरिति पाठे स इमाँल्लोकानित्यादेः कारणमित्यर्थः । व्यापकोऽनन्याधीनव्याप्तिमान् । अनेन समनेत्युक्ते रमापि तादृशीति संशयोत्तरो ज्ञेयः । असङ्गी । असङ्गो ह्ययं पुरुष इति श्रुतेः । कर्ता सन्नपि पुण्यपापलेपविधुरः । अनावृतोऽज्ञानाद्यावरणरहितः । अनेन मुख्यप्राणेनाप्या सम्यग्वृतः स्वामित्वेनेत्यनावृतो वा ॥ १९ ॥

मन्दनन्दिनी — परमात्मनोऽत्यन्तवैलक्षण्यं ज्ञापयितुं लक्षणान्याह ॥ आत्मेति ॥ आत्मा परमात्मा नित्यः । अनित्यत्वं देहहानिरित्याद्युक्तचतुर्विधनाशरहितः । अव्ययो नैमित्तिकनाशरहितः । शुद्धो दोषरहितः । एकः स्वतन्त्रकर्ता । एकत्वादे करोतीति क इत्यन्यत्र व्याख्यानात् । क्षेत्रज्ञः । एतत्क्षेत्रमिति प्रोक्तं तत्क्षेत्रं यच्च यादृक्चेति गीतोक्तरीत्या प्रकृत्यादिक्षेत्रज्ञः । आश्रयः सर्वोपजीव्यः । अविक्रियो विकाररहितः । स्वदृक् साकल्येन स्वस्वरूपदृक् । वश्यो वशं याति यापयतीति । सर्वस्य वशीति यावत् । सर्वस्य वशीति श्रुतेः । व्यापकोऽन्तर्बहिश्च व्याप्तः । अन्तर्बहिश्च तत्सर्वं व्याप्य इति श्रुतेः । असङ्गो विषयसङ्गरहितः । अनावृतोऽज्ञानाद्यावरणरहितः । अत्र कतिपयलक्षणस्याति-व्याप्तिशङ्काऽ- पराधीनत्वेन विशेषणेन परिहरणीयेति बोध्यम् ॥ १९ ॥

एतैर्द्वादशभिर्विद्वान् आत्मनो लक्षणैः परैः ।
अहं ममेत्यतद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥

सत्यधर्मीया — आत्मन एतैर्नित्यत्वादिभिर्द्वादशसङ्ख्यैः । द्वौ च दश च द्वादश । व्यष्टनः आसङ्ख्यायामित्यात्वम् । परैरव्यभिचारिभिर्धर्मिणा परस्परं चाभिन्नत्वेन परैर्लोकविलक्षणैरिति वा । सर्वहेतुत्वतो देहस्य तदधीनत्वं विद्वान् । तदादावहंममेत्यतद्भावम् । अस्वाधीने स्वाधीनताधियम् । स कस्माज्जात इत्यत आह ॥ मोहजमिति । चित्तविकारजं त्यजेत् ॥ २० ॥

मन्दनन्दिनी — परैरुत्तमैः । अनन्यसाधारणैर्वा । देहादौ मोहजमज्ञानं लक्षणैरात्मानं विद्वान् अतद्भावमतस्मिन्नहं भूतदेहे आत्मदीये गेहादावहम्भावं मदीयभावलक्षणं भ्रमं त्यजेत् । एतत्सर्वमभिप्रेत्योक्तं तात्पर्ये ॥ षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु । तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेदिति च ॥ (तात्पर्यमिदं (१८) श्लोके व्याख्यातं श्रीसत्यधर्मैः । अतः तत्रैव न्यवेशि) तुशब्दात्स्वातन्त्र्यलक्षणं विशेषमाह । शरीरं चेत्यतःपरमितिशब्दोऽध्याहार्यः । ममतामित्यनेन देहेऽप्यहन्ताभ्रमो नास्ति । प्राणिमात्रस्य मम देह इति भेदज्ञानात्किंतु स्फुटविवेकाभावमात्रमहन्तेति सूचयति । जन्माद्या इति श्लोके विष्ण्वधीनत्वं न स्फुटं प्रतीयत इत्यतः कालेनेति हेतुतोक्त्या तल्लब्धमिति वाक्यरूपतात्पर्यम् ॥ हेतुत्वाद्विष्ण्वधीनत्वं शरीरस्येति ॥ २० ॥

हेमं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथाऽऽत्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत ॥ २१ ॥

सत्यधर्मीया — हरिर्देहादिविविक्तत्वेन केनोपायेन ज्ञेय इत्यत आह ॥ स्वर्णमिति । हेमकारो हेम सुवर्णं करोतीति स तथा । ग्रावसु क्षेत्रेष्विति समानाधिकरणं व्यधिकरणं च । ग्रावात्मक्षेत्रविशेषेषु ग्रावसु तदुपयोगिपाषाणेषु क्षेत्रेषु तद्योग्यभूभागेषु । योगैस्तद्भवनोपायैस्तदभिज्ञ उपायज्ञो यथा सुवर्णमाप्नुयात् लभेत । तथा क्षेत्रेषु देहेषु । आत्मयोगैः प्राणायामभक्त्यादिसाधनैः । अध्यात्मविदधिकश्चासावात्मा च गुरुश्च तेन तदुपदेशेन वेत्तीति स तथा । वेदान्तशास्त्रज्ञ इति वा । ब्रह्मगतिं शरीरविविक्तत्वेन ब्रह्मज्ञानं लभेत । अत एतद्गुरूपदेशादिकं संपादनीयमित्याशयः ॥ २१ ॥

मन्दनन्दिनी — उपायेन ब्रह्मगतिलाभप्रकारं सदृष्टान्तमाह ॥ हेममिति ॥ यथा हेमकारो ग्रावसु निकषाश्मादिलक्षणेषु क्षेत्रेषु लिप्तं हेमयोगैरूपायैस्तदभिज्ञ आप्नुयात् । तथा देहेषु क्षेत्रेष्वात्म-योगैर्भक्त्याद्युपायैरध्यात्मविदात्मानमधिकृत्य विद्यमानं देहगतमनआदिकम् । प्रमेयमध्यात्मशास्त्रं वा । अधिकात्मानं बिम्बं वा वेत्तीति तद्वित् । ब्रह्मगतिं वैकुण्ठादिकं लभेतेति योजना ॥ २१ ॥

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ।
विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥

तात्पर्यम् — **'अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः । जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृत' इति च ॥ २२ ॥**

सत्यधर्मीया — अष्टौ प्रकृतयः प्रोक्ता इति श्लोके प्रकृतयश्च मूलप्रकृतिर्महदहन्तत्त्वे पञ्च महाभूतानीत्यष्टौ गुणत्रिकस्य प्रकृतिकार्यत्वात्तत्रान्तर्भावान्न पृथग्भाग इत्युक्तविकारषोडशकेन पुंसा च सहपञ्चविंशतितत्त्वान्युक्तानि । तत्र किं पुमान् जीवः किंवा वासुदेवो वेति ज्ञीप्सायां विवक्षात उभावपीति प्रमाणेनाह ॥ अभिमानीति । यदि प्रकृत्यादिपदैरभिमानी सर्वत्र जीवो विवक्ष्यते तदा तत्तदभिमन्यमानपदैस्तदभिमानी जीव एव गृहीत इति न तत्संख्यातोऽतिरेक इति तदपेक्षया विष्णुः पञ्चविंश इति स्मृतः । यदाऽभिमन्यमानानां प्रकृत्यादीनामेव तत्तत्पदैर्ग्रहणं तदा पञ्चविंशतिसङ्ख्या तमभिमानिनं गृहीत्वैव पर्यवसन्नेति जडव्यपेक्षया जीवः पञ्चविंशः स्मृतः । भगवांस्तु जीवेन सह पञ्चविंशतितत्त्वेषु सम्यङ्नियामकत्वेन तावद्रूपैरन्तःस्थित इति पञ्चविंशो ज्ञेय इति स्मृतः स्मृतिसिद्धोऽयमर्थ इत्यर्थः ॥ ततश्चायं मूलार्थः ॥ किमाकारेण भगवान्ज्ञेय इत्यत आह ॥ अष्टाविति । अष्टौ प्रकृतयो मूलप्रकृतिर्महदहन्तत्त्वे भूतपञ्चकं चेत्यष्टौ । हि यतस्तद्गुणाः प्रकृतिकार्यत्वात्तस्याः प्रकृतेर्गुणाः सत्वाद्यास्त्रयः । तस्मात्प्रकृतिपदेन कृतग्रहणा इति नातिरेकशङ्केव तदनुक्तिशङ्काऽपि विधुते इति बोद्धव्यम् । विकारा मनसा सहैकादशेन्द्रियाणि शब्दाद्या विषयाश्चेति षोडश षोडशसङ्ख्याः । षष उत्वं, दतृदशधासूत्तरपदादेः ष्टुत्वं च धासुवेति वाच्यमिति वार्तिकेन षषशब्दस्य उत्वं दशशब्ददकारस्य डकारश्च । आचार्यैः कपिलमन्वादिभिर्गणिता इति शेषः । स्वयमाचरते यस्तु शिष्यान्ग्राहयतीति च । आचिनोति हि शास्त्रार्थांस्तमाचार्यं प्रचक्षत इत्यादेराचार्यपदार्थो ज्ञेयः । पुमान्वासुदेवो जीवश्च सर्वत्राभिमानिनां विवक्षणे जीव उपायात इति पञ्चविंशो हरिः । अभिमन्यजडग्रहणे पञ्चविंशस्तु जीवस्तावद्रूपी समन्वयात् । नियामकत्वेनैतत्तत्वमध्यमध्यासीन इति तत्संबन्धात्पुमान्हरिरेवं पञ्चविंश इत्यर्थः । समन्वयस्तत्संबन्धेऽपि तद्बाधया निर्बाधरूपसमन्वयस्तस्मादिति वा । तर्हि तद्बाहुविध्याद्भगवतोऽपि बहुविधता स्यादित्यत आह ॥ एक इति । स्वगतभेदवर्जितः । न स्थानतोऽपि परस्येत्यादेः ॥ ॥ २२ ॥

मन्दनन्दिनी — आत्मनः क्षेत्रज्ञत्वमुक्तम् । तत्र क्षेत्रशब्दार्थं प्रकृत्यादिकं तद्गतं च विविच्याह ॥ अष्टाविति ॥ प्रकृतयो मूलप्रकृतिर्महानहङ्कारः पञ्चभूतानीत्यष्टौ प्रकृतयः । गुणत्रयस्यापि सत्वात्कथमष्टत्वमिति न वाच्यम् । त्रय एव हि तद्गुणास्त्रयः सत्त्वरजस्तमः । पदार्थास्तद्गुणा

अव्यक्तमूलप्रकृतेरवस्थाविशेषा एवेति तदन्तर्भावात् । विकारा मनसा सहैकादशेंद्रियाणि शब्दाद्यास्तन्मात्रा इति षोडशविकारा आचार्यैः प्रोक्ताः । समन्वयात् । ल्यब् लोपनिमित्ता पञ्चमी । सर्वत्रानुगतिं प्राप्य वर्तमानः पुमान्परमपुरुष एकः पदार्थ इत्थं चतुर्विंशतितत्त्वानि क्षेत्रं पुमांश्च । तद्गत इत्युक्तं भवति । अत्र जीवस्यातिरिक्तस्य सद्भावेऽपि तस्याभिमानित्वापेक्षयाऽभिमन्यमानवाचिपदेन ग्रहणाद्विष्णुरेव पञ्चविंशः । जडमात्रविवक्षया तु जीवः पञ्चविंशो विष्णुः षड्विंशतया सम्यग्ज्ञेयः । एतदेवाभिप्रेत्य तात्पर्यम् ॥ अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः । जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृत इति च ॥ अभिमान्यपेक्षयाऽभिमानिनोऽभिमन्यमानवाचिपदेन ग्रहणापेक्षयेत्यर्थः । जडव्यपेक्षया जडमात्रग्रहणापेक्षया जीवः पञ्चविंशो हरिस्तु सम्यक् षड्विंशतया ज्ञेय इति ॥ २२ ॥

देहस्तु सर्वसङ्घातो जगत् तस्थुरिति द्विधा ।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत् त्यजन् ॥ २३ ॥

सत्यधर्मीया — सर्वसंघातः प्रकृतिप्राकृतसमूहनिर्मितो देहः शरीरं तदुपचितः प्रपञ्चश्च । जगज्जङ्गमः । जगत्स्याज्जङ्गमे त्रिष्विति रुद्रकोशः । तत्र द्युतिगमिजुहोतीनां द्वे चेति क्विपि द्वित्वे गमः क्काविति मलोपे तुकि । जगज्जगतौ जगत इति रूपम् । तस्थुट् स्थावरश्चेति द्विधा । यद्यप्ययं प्रकारवचनो धाप्रत्ययस्तथाऽपि प्रकारिपरो लक्षणया ज्ञेयः । द्विविध इत्यर्थः । देहे प्रपञ्चे चेत्यत्रैव । पुरुषः पूर्णषड्गुणो नारायणो मृग्योऽन्वेषणीयः । केनेत्यत आह । योतत् स भगवान्न भवतीत्यतत् । नश्वरत्वादिनेश्वरादन्यत्त्यजन् अभजंस्तेन । तत्र मानमाह ॥ नेति नेतीति । स वा एष नेति नेत्यात्मेति श्रुतेः । प्रपञ्चविलक्षणतया मार्गणीयः पुरुष इत्यर्थः । यद्वा । बहुसंस्कारसहकारिवशाद्बुद्धौ सन्निहितं नेदं नेदमित्यतत्त्यजन्यः स नेति वा । अन्यापोहेन मृग्य इत्यर्थः । क्वचिदतत्यजेति तृतीयान्तः पाठो दृश्यते । सोऽपि दृश्यः । अतत्यजतीत्यतत्यक् तेनाधिकारिणा मृग्य इति तत्रार्थः ॥ २३ ॥

मन्दनन्दिनी — देहस्यातिरिक्तस्य सत्वात्कथमुक्तेर्विभाग इत्यत आह ॥ देहस्त्विति ॥ देहस्तु सर्वसङ्घात उक्तचतुर्विंशतितत्त्वकार्यभूतः । जगज्जङ्गमः । नरतिर्यगादिः । तस्थुः स्थावरस्तरुगुल्मादि-रिति द्विधा । अत्रैव देह एव पुरुषः पूर्णषड्गुणो भगवान् । अतत् हरिभिन्नं चेत् । नाचेतनात्मकं जगत् त्यजन् त्यजताधिकारिणा मृग्यो विचार्यः । स वा एष नेति नेतीति श्रुतेरिति योजना । आत्मा प्रकृतिर्न महानित्येवं सर्ववैलक्षण्यं श्रुतेरर्थः ॥ २३ ॥

अन्वयव्यतिरेकेण विवेकेनागतात्मना ।
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥

सत्यधर्मीया — अन्वयः समन्वयादित्यादिनोक्तं सर्वत्र वसनं तेन । व्यतिरेकोऽसङ्गीत्युक्तौ जगद्वैलक्षण्यमित्यन्वयसहितव्यतिरेकेण । अथवा सति हरौ कार्यमुखे प्रवर्तते प्रपञ्चो विरिञ्चादिरिति । यत्र जगत्तत्र हरिः । हरिर्यत्र यत्र तत्र जगदिति न । परिच्छिन्नत्वादस्वतन्त्रत्वादिति वाऽन्वयव्यतिरेकौ ज्ञेयौ । आगतात्मना एतदुभयलब्धस्वरूपेण । विवेकेन विविक्तत्वज्ञानेन । नोभयत्रापि प्रमाणाभावादाभासतेत्याह ॥ सर्गेति । सर्गः सर्जनं स्थानं पालनम् । स्थानपदेन तन्त्रन्यायेनान्तप्रवेशापरपर्यायसंहारग्रहणम् । स्थानं सन्निवेशावकाशयोरिति विश्वः । सर्गो विसर्गः संहारः । स्थानं प्रागुक्तम् । समाम्नायः सन्ततिः सृष्टिरिति यावत् । तैः । आम्नायः संप्रदाये स्याद्वेदाभ्यासे च सन्तताविति विश्वः । स्थानपदेन संहाराद्या उपलक्ष्यन्ते । सर्गस्थानादिप्रतिपादकाः समाम्नायाः । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्येवं- जातीयकवेदास्तैः । संशब्देनोपक्रमोपसंहारादिसाहितीसहितत्वमाम्नायानां द्योतयति । तथा च ते नान्यथयितुं शक्या इति तदन्वयव्यतिरेकाभासता वोद्धृतेति ज्ञेयम् । सत्वरास्त्वरया सहिताः सत्वराः । आम्नायान्तर्निविष्टदृष्टयः । पातनिकार्थपरास्ते न भवन्तीत्यसत्वरास्तैः । विमृशद्भिरधिकारिभिः कर्तृभिः । पूर्वोक्तकरणैर्मृग्य इति पूर्वेणान्वयः । यद्वा । विवेकेन हेतुनाऽऽगतेन । विद्यमानस्यैव स्फौर्त्येन तथा व्यवहार इत्यागतेन । यद्वा । एतद्विषयादन्यत्रागतेन तत्रैव लग्नेनेत्यागतेन । मनसा करणेन । सर्गस्थानसमाम्नायैरेतदाद्यावेदकवेदादिभिः स्त्रीशूद्रादिभिः कथं मृग्योऽत्रानधिकारादिति शङ्कापनुत्यै श्रुत्यादिपदमनिबन्धानो दधानश्चाम्नायपदं तदादीनां संप्रदायत इत्यर्थमभिप्रैतीति ज्ञेयम् । संप्रदायशब्दार्थस्तु आगमो ग्रन्थनिबद्धवाक्यम् । संप्रदायस्तूपदेशपरंपरामात्रमिति भेद इति प्रमेयदीपिकोक्तो ज्ञेयः ॥ २४ ॥

मन्दनन्दिनी — केनोपायेन मृग्य इत्यत आह ॥ अन्वयेति ॥ भगवति तिष्ठति देहो जीवति गच्छति तु पततीत्यन्वययुक्तव्यतिरेकेण पेपीयमानो मोदमानस्तिष्ठति । अस्य यदैकां शाखां जीवो जहात्यथ सा शुष्यतीत्यादिश्रुतेः । विवेकेन सार्वज्ञाल्पज्ञतादिलक्षणविरुद्धगुणेन गतात्मना मुक्तमनसाऽनुभवेन । अज्ञता चाल्पशक्तित्वं दुःखित्वं स्वल्पकर्तृता । सर्वज्ञतादीशगुणविरुद्धाद्यनुभूतिगा इति मूलोक्तेः । सर्गस्थानं समाम्नायैः सृष्टिस्थितिसंहारादिबोधकैर्वेदैरसत्वरैरापातप्रतीतिरहितैः । त्वरितोच्चारणादिदोषरहितैर्वा । अथवा सावधानमनस्कैर्विमृशद्भिरधिकारिभिर्विमृग्यत इति योजना ॥ २४ ॥

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥

तात्पर्यम् — बुद्धेर्जीवस्य । 'सत्वबुद्ध्यादिशब्दैस्तु जीवोऽपि क्वचिदीर्यते । जागृदाद्याः कर्म चैव सुखदुःखे च तस्य हि । जाग्रदादेः परो द्रष्टा सुखनिष्ठो हरिः स्मृतः ॥ २५ ॥

सत्यधर्मीया —— बुद्धेर्जागरणं स्वप्न इति श्लोके बुद्धेर्मनसो वा वृत्तयस्ता येनानुभूयन्ते स जीवः परः पुरुष इति तस्य जीवस्य परत्वमुच्यत इति वा परपुरुषभगवदैक्यमुच्यत इति वाऽन्यथाप्रतीतिं किंचित्स्वयं व्याकृत्य मानमुदाहरन्नन्यथयति ।। बुद्धेर्जीवस्येति । अथवा बुद्धेरित्यादावन्तःकरण-स्यावस्थात्रयोक्तिरयुक्ता । सुप्तौ मनसोऽकार्यकारित्वेनापरत्वादित्यतो बुद्धिपदार्थं स्वयमुक्त्वा समाख्यामप्याख्याति ।। बुद्धेर्जीवस्येति । क्वचिन्मन आद्यर्थबाधे । अबाधेऽपीति समुच्चये । तत्पर्याय-शब्दैरिति वा समुच्चयेऽपिशब्दः । जाग्रदाद्या अवस्थाः । कर्मैतत्प्रापकं सुखदुःखसाधनं च । सुखदुःखे हि यतस्तस्य जीवस्यातो बुद्धिर्जीवो भवन्तीत्यर्थः । जाग्रदादेः परश्च सर्वोत्तमो द्रष्टा । तृन्नन्तः । तेन दर्शनस्वाभाविकतामभिप्रैति । सुखनिष्ठो हरिः स्मृतः । सुखनित्यः सुषुप्तिस्थ इति पाठत्रिकम् । तत्र प्रथमः स्फुटार्थः । द्वितीये नित्यं सुखं यस्य स सुखनित्यः । विशेषणविशेष्यभावस्य कामचारित्वात् सुखविशिष्टाभिधानादित्यादिवदित्यर्थः । सुखेन नित्य इति वा । अर्थात् सुखे नित्यत्वं सेत्स्यतीति । तृतीये तदवस्थायामपि तदन्तःस्थ इत्यर्थः ।। ततश्चायं मूलार्थः ।। बुद्धेर्जीवस्य जागरणं स्वप्नः सुषुप्तिरिति तिस्रो वृत्तयः यो यास्तास्तिस्रः । येनैव जीवेन मुख्येन परमात्मना प्रेरितेनानुभूयन्ते सः प्रेरकोऽध्यक्षो द्रष्टा पुरुषो हरिः । इन्द्रियप्राप्यदुःखसुखादिरित्यध्यक्षः । परो विश्वादिहरिविलक्षणः पुरुषो जीव इत्यपि वृत्त्यन्तरं जीवपक्षे ज्ञेयम् ।। २५ ।।

मन्दनन्दिनी —— प्रकारान्तरेणापि भेदमाह ।। बुद्धेरिति ।। बुद्धेर्जीवस्य जागरणं स्वप्नः सुषुप्तिरिति वृत्तयोऽवस्थास्ता एता येनैवानुभूयन्ते । स पुरुषश्चेतनोऽध्यक्षः साक्षिसिद्धः परो भगवतोऽन्यः । भगवतोऽवस्थात्रयानुभवस्य तत्कारणीभूतकर्मणस्तत्कार्यस्य सुखदुःखादेश्चाभावात् । अथवा येन परमात्मनाऽनुभूयन्ते । अन्तर्णीतणिच् । अनुभाव्यन्ते । सोऽवस्थात्रयप्रवर्तकः पुरुषः परमात्मा । अध्यक्षोऽवस्थाद्रष्टा । परो जीवादन्यः । तदेतदभिप्रेत्योक्तं तात्पर्ये ।। बुद्धेर्जीवस्य । सत्त्वबुद्ध्यादि-शब्दैस्तु जीवोऽपि क्वचिदीर्यते । जाग्रदाद्याः कर्म चैव सुखदुःखे च तस्य हि । जाग्रदादेः परो द्रष्टा सुखनित्यो हरिः स्मृतः । स जीवेन सह स्थानात्तत्स्वरूपः प्रदृश्यते । अज्ञदृष्ट्याऽनज्ञदृष्ट्या यथा गन्धयुतोऽनिलः । अदृष्टेर्जीवपरयोर्भेदस्याप्नोति संसृतिम् । अभेदनिश्चयाद्याति तमो नास्त्यत्र संशय इति च ।। सत्त्वबुद्ध्यादिशब्दैरित्यनेन बुद्धेर्जीवस्येति व्याख्यानं प्रमापितं भवति । तस्य जीवस्य जाग्रदाद्यवस्था कर्म च तत्कारणीभूतपुण्यपापादिकं सुखदुःखे च तत्रानुभूयमाने भवन्ति । जीवात्परो हरिस्तु केवलं द्रष्टा । सुखनिष्ठः स्वरूपानन्दनिष्ठः स हरिः । तत्स्वरूपो जीवस्वरूपः प्रदृश्यते । अज्ञदृष्ट्या भ्रान्त्या न ज्ञदृष्ट्या जानातीति ज्ञः । तद्दृष्ट्या तु न । यथाऽनिलोऽज्ञदृष्ट्या गन्धयुक्तः पुष्परेणुयुत एव भेदाज्ञानाभेदनिश्चययोः क्रमेणानर्थातिशयमाह ।। अदृष्टेति ।। २५ ।।

एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ।
सरूपमात्मनो धत्ते गन्धैर्वायुरिवान्वयात् ॥ २६ ॥

तात्पर्यम् — 'स जीवेन सह स्थानात्तत्स्वरूपः प्रदृश्यते । अज्ञदृष्ट्या न ज्ञदृष्ट्या यथा गन्धयुतोऽनिलः ॥ २६ ॥

सत्यधर्मीया — एभिस्त्रिवर्णैरिति श्लोके परः पुरुष एभिस्त्रिवर्णैस्त्रिधा वर्णनीयैर्वा शुक्लादिवर्णोपेत-सत्त्वादिकार्यत्वाद्वर्णत्रिकयुक्तैर्जाग्रदादिभिः समन्वयात्संबन्धाज्जीवसारूप्यं भजते । ततश्च सुखदुःख-भोगो भवतीति प्रतीतिं मानेन विमानितां तनोति ॥ स इति । स भगवान् जीवेन सह स्थानात् । समानं वृक्षं परिषस्वजाते इति श्रुतेरेकस्थानात्तत्स्वरूपो जीवसमरूप इति अज्ञदृष्ट्या मूढदृष्ट्या प्रदृश्यते विषयीक्रियते । ज्ञदृष्ट्या न प्रदृश्यत इत्यन्वयः । तत्र निदर्शनं सर्वसंमतमाह ॥ यथेति । गन्धयुतः पार्थिवकुसुमाद्युपर्यागमेन सुगन्धिरितरस्माद्दुर्गन्धिर्मिश्रादुभयगन्ध इति जना जानते तमविदः । वेदितारस्तु न समीरगुणोऽयमपि तु पृथिव्या इति । तथा ज्ञाश्च न भगवत एतत्त्रिवर्णसम्बन्धः किन्तु जीवस्यैव मन्वत इत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ एभिः सर्वजनीनैस्त्रिवर्णैस्त्रय इति वर्णनीयास्त्रिवर्णाः । वर्णधातोः कर्मणि घञ् । त्रयः शुक्लकृष्णरक्ता इति वर्णा येषां गुणानाम् । तत्कार्यत्वात्त्रिवर्णा वा । प्रकृतिकार्यत्वाद्वा । अजामेकां लोहितशुक्लकृष्णामित्यादेस्त्रिवर्णा इति वा । तैर्जागरणस्वप्नसुषुप्तिसंज्ञैः क्रमाच्छुक्लरक्तकृष्णैः । सत्त्वादिगुणैर्वा । प्रकृतिगुणैरिति वा । पर्यस्तैरेकत्र संक्रान्तैः । बुद्धिभेदैर्बुद्धीनां जीवानां भेदैस्तत्तारतम्यादिज्ञापकैः । बुद्धयो भिद्यन्त एभिरिति वा तैः । क्रियोद्भवैः क्रियाया उद्भव उत्पत्तिर्येषां तैः । यथा वायुरनिलो गन्धैः सुरभ्यादिद्रव्यैः । गन्धः स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति विश्वः । अन्वयात्सहावस्थानान्निमित्तादात्मनो जीवजातस्य सरूपं समानरूपं सारूप्यं धत्ते । ज्योतिर्जनपदेति समानस्य सभावः । अन्वयात्संबन्धात्सुगन्धिः पूतिगन्धिरुभयगन्ध इति व्यवह्रियतेऽज्ञैः । ज्ञैस्तु नायं वायुगुण इति । तथा ज्ञैरतत्स्पृष्ट इत्यज्ञैस्तत्स्पृष्ट इति न धत्ते धत्ते सारूप्यमिति भगवान्पर्यस्तैः स्वसम्बन्धित्वेन निरस्तैरेभिर्ज्ञायत इत्यर्थः । गन्धाश्च तदाश्रयद्रव्यसूक्ष्मावयवास्तैरन्वयः सम्बन्ध इत्यर्थः । यथोक्तम् । वायुर्गन्धानिवाशयादिति गीताभाष्यटीकाटिप्पणीषु । गन्धानिव सूक्ष्माणि । अनेकेष्वाकृष्यमाणेषु गन्धोपादानेऽभिप्रायमाह ॥ गन्धानिवेति । गन्धवतः पुष्पाद्यवयवानित्यर्थः ।

ननु गन्धशब्दस्य गुणवाचित्वे सूक्ष्माणीत्युपमानोपमेयसाधारणधर्मोक्तिविरोधः । गुणस्य सूक्ष्मत्वाभावात् । यथा गन्धस्य भूमेश्च न भावो व्यतिरेकत इति तृतीयस्कन्धोक्तेराश्रयं विना गुणाकर्षणायोगश्चेत्यत आह ॥ यथा गन्धवत इति । गन्धो गन्धक आमोदे लेशो सम्बन्धगर्वयोः । स

एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इत्युक्तेर्गन्धशब्दस्य द्रव्यवाचित्वादिति भावः । एतेन गन्धानिति बहुवचनं च समाहितम् । न चावयवागमनपक्षे व्यतिरेको गन्धवदिति सूत्रविरोधः । तत्रापि भागगमनस्यैवाभिप्रेतत्वात् । अन्यथांऽशिनं विहायांशगतौ गन्धदृष्टान्तोपादानायोगात् । गन्धस्य गुणत्वेनांशत्वाभावात् । न च गुणाद्वेत्युक्तालोकवद्गुणस्यैवागमनं किं न स्यादिति वाच्यम् । वैषम्यात् । युक्तमालोकस्यागमनम् । तथात्वेऽपि स्वाश्रयं विहाय वृत्तेरभावात् । किन्तु स्वाश्रयमविहायैवान्यत्रापि वृत्तिः । गन्धागमने तु स्वाश्रयं विहायैवान्यत्र वृत्तिः प्रसज्यते । सा चोक्ततृतीयस्कन्धविरुद्धा । गुणस्य तथात्वाभावाद्युक्तिविरुद्धा च । न च व्यतिरेकसूत्रीयचन्द्रिकाविरोधः । तत्र स्थूलावयवागमनस्य दूषितत्वात् । इह पुनरतिसूक्ष्मभागागमनाङ्गीकारात् । अत एव सूक्ष्माणीत्युक्तमिति दिगिति ।

एतेनैव यथा पुष्पाद्गन्धः पृथग्गच्छतीति भाष्यं यथा पुष्पाद्गन्धः पृथग्गछतीति दृष्टान्तान्न विरोध इति तत्त्वप्रदीपिका च व्याख्याते भवतः । वस्तुतस्तु गुणगमनाङ्गीकारेऽपि न बाधकं पश्यामः । न च भागवतं निरंशत्वयुक्तिश्च बाधेते इति वाच्यम् । भूमिगुणत्वमेव नान्यभूतगुणभूतत्वमित्येवं परत्वाद्भागवतस्य । अत एव गीताविवृतौ यथाभाष्यटीकं गन्धानिव गन्धवतः पुष्पाद्यवयवानिति व्याचख्युरिति न तद्वैसंवाद्यम् । तदर्थस्यापि स्वीकारात् । ननु गुणो निरंश इति कथं तस्य गमनमिति वाच्यम् । न चानवयवं वस्तु क्वचित्स्यान्मानगोचरम् । तस्माद्गुणादिकमपि नास्त्यनंशतया क्वचित् । ननु गुणानां निरवयवत्वात् कथं नानवयवं वस्तु क्वचित् स्यादित्युच्यत इत्यत आह ।। तस्मादितीति । गीतातात्पर्यन्यायदीपिकयोर्गुणानां सांशतोक्तेर्गमनसंभवादिति । न चोक्तगीताभाष्यप्रमेयदीपिकाविरोध इति वाच्यम् । तत्र गन्धानिति बहुवचनस्वारस्यात्तथा व्याख्यानस्य न्याय्यत्वात् । न व्यासेधामो वयं द्रव्यगमनं नास्तीति किन्तु गुणगमनं च संभवतीति वदामः । न चोदाहृतटिप्पणीविरोधः । दत्तोत्तरत्वात् । गुणानामनंशत्वं पराभ्युपगमेन सा वक्तीत्युपपत्तेः । एवं च चन्द्रिकाऽपि न पीडिता स्यादिति ज्ञेयम् । तन्त्रदीपिका यथा पुष्पगन्धस्य स्वांशैर्विभागस्तथेति वदन्ती शिर आंदोलयत्येतदर्थ एवेति विभावनीया । अत्र च बलं गन्ध इत्येकवचनम् । अभिनवचन्द्रिका च यद्यपि गन्धो गुणो नांशस्तथाऽपि गुणोऽपि यदा व्यतिरिच्यते किमु तदांऽशस्यांशिव्यतिरेके वक्तव्यमिति भावेन गुणो दृष्टान्तत्वेनोपात्त इति प्रवृत्ता स्फुटं गुणगमनमनुगुणमावेदयति । गुणाद्वाऽऽलोकवदित्यस्य लोके गुणे द्रव्यमाश्रित्यैवागमनमिति तन्मात्रे तद्विशेषपरिकल्पकाभावात् । गीताभाष्यताम्रपर्णीये । ननु व्यतिरेको गन्धवदित्यत्र गुणस्य गन्धस्य गुणिनं विहाय गमनोक्तेरत्रापि तथार्थसम्भवाद्भाष्ये न लक्षणया सूक्ष्मग्रहणं युक्तमिति चेन्न । अत्र गन्धवत्पुष्पावयवगमनोक्तावपि गन्धमात्रस्य गमनानिषेधात् । इन्द्रियसूक्ष्माणां गमने द्रव्यसूक्ष्मगमनस्य दृष्टान्तत्वं संश्लिष्यत इति भावेनात्र सूक्ष्मग्रहणं न तु मुख्यानुपपत्त्येत्युक्तम् । किं च दीपप्रभाया द्रव्यतानिरासप्रस्तावे तस्य द्रव्यत्त्वसाधकत्वे विवादादिति

टीका तथोत्तराधिकरणे गुणस्यापि गन्धस्य द्रव्यं विहायापि वृत्तेर्वक्ष्यमाणत्वादिभाव इत्युक्तांत्यधिकरणीयचन्द्रिकाच गुणगमनमेव स्पष्टमवगमयत: । न च गीताभाष्यभावबोधे तस्य द्रव्यत्वसाधकत्वे विवादादितिवदद्भिष्टीकाकारैरुत्तराधिकरणे गुणस्यापि गन्धस्य द्रव्यं विहायापि वृत्तेर्वक्ष्यमाणत्वादित्यादिना पुन: प्रवेशकल्पने प्रमाणाभावादिति वदद्भिष्टीकाकारैरपि गुणस्य गमनमंगीकृतम् । अतस्तद्विरुद्धमवयवगमनं कथमंगीक्रियत इत्याशंक्य स्थूलावयवांगीकारस्य दूषितत्वात् । अतिपरमसूक्ष्मावयवागमनमंगीकृत्येदानीमुच्यत इत्याहुरित्युक्ते: कथमिदमुदाहृतमिति न च वाच्यम् । दत्तोत्तरत्वात् । किं चाहुरित्युक्तिस्वारस्येनास्वारस्यसूचनात् । तद्द्रव्यत्वे त्वविवादम् । परभाष्येच यथा गुणस्यापि सतो गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति । अप्राप्तेष्वपि कुसुमादिषु गन्धवत्सु कुसुमादिगन्धोपलब्धे: । एवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति । अतश्चानैकान्तिकमेतद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुपपत्तिरिति ।

गुणस्यैव सतो गन्धस्याश्रयविश्लेषदर्शनात् । गन्धस्यापि सहैवाश्रयेण विश्लेष इति चेन्न । यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसङ्गात् । अक्षीयमाणमपि तत्पूर्वावस्थातोऽवगम्यते । अन्यथा (इतरथा) पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत । स्यादेतद्गन्धाश्रयाणां विश्लिष्टानामल्पत्वात्सन्नपि विश्लोषो नोपलक्ष्यते । सूक्ष्माहिगन्धपरमाणव: सर्वतो विप्रसृता गन्धबुद्धिमुत्पादयन्ति । न नासिकापुटमनुप्रविशन्त इति चेन्न । अतीन्द्रियत्वात्परमाणूनाम् । स्फुटगन्धोपलब्धेश्च । नागकेसरादिषु । न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातमिति गन्ध एवाघ्रात इति लौकिका: प्रतियन्ति । रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गन्धस्याप्ययुक्त आश्रयव्यतिरेक इति चेन्न । प्रत्यक्षत्वादनुमानाप्रवृत्ते: । तस्माद्यथा लोके दृष्टं तत्तथैवानुगन्तव्यम् । निरूपकैर्नान्यथा । न हि रसो गुणो जिव्हयोपलभ्यत इति । अतो रूपादयो गुणा अपि जिह्वयोपलभ्येरन्निति नियन्तुं शक्यत इति । अतो गुणस्य गमनमद्रव्यांशस्यापि सांशत्वादुपपन्नमिति । वाक्यशाबल्यात् द्वावपि सरलौ पक्षाविति । गन्ध: सुरभिरसुरभिर्मिश्रश्चेति गन्धास्तैरिति बहुवचनोपपत्तिरेतत्पक्षे ज्ञेया ॥ २६ ॥

मन्दनन्दिनी —— पूर्वश्लोके बुद्धिशब्दितस्य जीवस्यावस्थात्रयलक्षणसंसारानुभवो भगवता भवतीत्युक्तम् । तत्कथम् । न हि भगवान्किंचिदनिमित्तीकृत्य संसारमनुभावयतीत्यत: संसारकारणान्याह श्लोकत्रयेण ॥ एभिस्त्रिवर्णैरित्यनेन ॥ बुद्धिस्थैस्त्रिवर्णैर्लोहितशुक्लकृष्णमित्युक्तवर्णत्रयोपेतै: पर्यस्तै: परिक्षिप्तै: । अनादित: सम्बन्धैरिति यावत् । बुद्धिभेदैर्बुद्धेर्जीवस्य भेदैर्भेदकै: स्वस्वाधिक्येन नीचमध्योच्चत्वलक्षणतारतम्यज्ञापकै: क्रियोद्भवै: सात्विकत्वादिक्रियाजनकै: सत्त्वादिगुणैरन्वयात्सम्बन्धाद्वायुगन्धैर्गन्धोपेतै: पुष्पाद्यवयवै: सुरभ्यसुरभिमिश्रै: । अन्वयादिवात्मन: स्वरूपज्ञानानन्दकेवलदु:खमिश्रात्मकं धत्ते पिधत्ते न जानातीति योजना । वायुर्निर्गन्धोऽपि गन्धसबन्धान्निर्गन्धस्वरूपो

न ज्ञायते । जीवोऽपि गुणत्रयसम्बन्धात्स्वरूपेण न ज्ञायत इति भावः ।. अत्र बुद्धिभेदैरित्यस्य तात्पर्यम् ।। बुद्धिभेदैर्जीवानां तारतम्यज्ञापकैरिति । एवं च सत्त्वादिगुणतन्निमित्तकर्मणी संसारकारण इत्युक्तं भवति ।। २६ ।।

एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवाप्यते ।। २७ ।।

तात्पर्यम् — अदृष्टेर्जीवपरयोर्भेदस्याप्नोति संसृतिम् । अभेदनिश्चयाद्याति तमो नास्त्यत्र संशय' इति च ।। बुद्धिभेदैर्जीवानां तारतम्यज्ञापकैः । दुःखरूपोऽपि संसारो बुद्धिपूर्वमवाप्यते । यथा स्वप्ने शिरश्छेदं स्वयं कृत्वाऽऽत्मनोऽवशः । ततो दुःखमवाप्येत तथा जागरितेऽपि तु । जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तत' इति च ।। २७ ।।

सत्यधर्मीया — एतद्द्वारोहि संसार इति श्लोके संसारस्याविद्योपादानकत्वेनापार्थो मिथ्याऽनिर्वचनीय इति यावदित्यपार्थप्रतीतिमिवैतद्द्वारं स्वप्न इवेति चाव्याख्यातमिति तत्रान्यथाप्रतीतिं पुंस इति पदोक्तस्य बुद्धिसन्निधेर्बुद्धिभेदैरित्यस्य तत्राव्याख्यातत्वात्किञ्चित्स्वयमनूद्य विविच्य प्रमाणोदाहरणेन तां तान्तयति ।। अदृष्टेरिति । जीवपरयोर्जीवेश्वरयोर्भेदस्य तात्त्विकवैलक्षण्यस्यादृष्टेरज्ञानात् । जीवः संसृतिमाप्नोति । अभेदनिश्चयान्मिथ्याज्ञानात्तमो याति । बुद्धिभेदैर्बुद्धीनां जीवानां भेदयन्तीति भेदास्तरतमभावज्ञापकविरुद्धधर्मास्तैरित्यर्थः । अस्मदीयं तत्पद्यस्य द्वितीयं व्याख्यानमेतत्तात्पर्यार्थपरमिति न जीवानामिति विरुणद्धीति ज्ञेयम् । केचित्तस्मिन्नेव तात्पर्ये सुपठमिदमिति वदन्ति । दुःखं रूपयति प्रतिष्ठापयत्यनुभोजयतीति यावत् । तद्बाहुल्यात्तत्त्वेन व्यपदेशो वा । बुद्धिपूर्वं भेदप्रतीतिबन्धकबुद्धिपूर्वम् । अवाप्यते जीवेनेति शेषः । यथा स्वप्ने आत्मनः स्वस्य शिरश्छेदं स्वयं कृत्वा दुःखमवाप्नोति । कुतः करोतीत्थमित्यत आह ।। अवश इति । विष्ण्वधीनः । सोऽपीत्थं कुतः कारयतीत्यतोऽप्याह ।। अवशोऽनन्याधीन इति । तत्तत्कर्म निमित्तीकृत्य प्रवर्तनाद्धरेरिति भावः । ततः छिन्नशिरोदर्शनाद्दुःखमवाप्नोति । तथा जागरिते एतदवस्थायाम् । अपि त्वित्यनेन कर्तृताऽभिमतित्वेन स्वप्नतोऽपि विशेषः सूच्यते । भेदाज्ञानेन राजाऽहमिति तत्स्थानासीनदुरवस्थां दृष्ट्वा जीवदेव देवभेदादर्शने च भवेदेवमिति जानन्नप्यवशः प्रवर्तते । तुस्तत्रापि तत्तद्योग्यतामनुसृत्य तरतमभावरूपविशेषसूचकः ।। ततश्चायं श्लोकार्थः ।। एतच्छब्देन भेदानुपलंभो ग्राह्यः । मानीयाधिकारफलानुकूल्यात् । एष द्वारं यस्य सः । संसारो हि यतः पुंसः प्राप्यते । संसारकारणं भेदादर्शनं किंनिमित्तमित्यतस्तदाह ।। गुणेति । एतत्पदार्थे गुणेत्यादेर्योग्यतयाऽन्वयः । गुणाः सत्त्वाद्याः कर्माणि च निबन्धनानि निमित्तानि यस्य सः । स्वप्न इव स्वाप्निककरितुरगादिरिव ।

अदृष्टेरित्यादेः । पुंसोऽभेददृष्टेस्तमोयोग्यस्य संसारोऽज्ञानमूलो विपरीतज्ञानमूलकः । नञो विरुद्धाभिधायित्वात् । अपार्थो अपगतोऽर्थो निवृत्तिः प्रत्यावृत्तिर्यतः स तमोलोक इत्यर्थः । स्वप्न इव स्वप्ने भगवति सत्येवाप्यते । अवश्य इत्युक्तेरुभयत्राप्ययमर्थोऽनुसंधेयः । स्वप्नपदस्य भगवद्वाचकत्वं तु बृहदारण्यकभाष्योदाहरणेन पूर्वं षष्ठोक्तमनुसन्धेयम् । अभेदनिश्चयाद्यातीत्यादेः । अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वित्यभिधानात् । सोऽयमात्मा चतुष्पाज्जागरितस्थान इत्यादिमाण्डूकेयोपनिषद्भाष्ये चतुर्धावस्थितो देहे परमात्मा सनातनः । वैश्वानरो जागरितस्थानगो गजवक्त्रक इत्याद्युक्तेः स्वप्नादिनियामकभगवद्रूपविशेषा ज्ञेयाः ॥ २७ ॥

मन्दनन्दिनी — एतदनूद्य मूलकारणं चाह ॥ एतदिति ॥ संसार एतद्द्वारः । तस्यैव विवरणं गुणकर्मनिबन्धन इति । हिशब्देनाजामेकां कर्मणा बध्यते जन्तुरिति प्रमाणप्रसिद्धिं द्योतयति । अज्ञानमूलः प्रकृत्यविद्यादिशब्दवाच्याज्ञानावरणलक्षणमूलकारणकः प्रकृतिः स्वात्मसंश्लिष्टान् गुणान् सत्वादिकान् अपीति । अज्ञानस्य प्रथमावरकत्वोक्तेः । दुष्कर्मणोऽनर्थहेतुत्वं जानता कथं बुद्धिपूर्वकृतकर्मणाऽनर्थः प्राप्यत इत्यत उक्तम् ॥ अपार्थ इति ॥ स्वप्ने स्वशिरच्छेदादिरूपात्महननानुभवजनितवासनावशादबुद्धिपूर्वकृतस्वशिरच्छेदेन दुःखमाप्यते । तथा रागादिवशादबुद्धिपूर्वं कृतकर्मणाऽपार्थोऽप्यनर्थोऽप्याप्यत इति योजना । एतदेवाभिप्रेत्य तात्पर्यं प्रवृत्तम् ॥ दुःखरूपोऽपि संसारो बुद्धिपूर्वमवाप्यते । यथा स्वप्ने शिरच्छेदं स्वयं कृत्वाऽऽत्मनो वशः । ततो दुःखमवाप्येत तथा जागरितेऽपि तु । जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तत इति च ॥ अवशः स्ववशो न भवतीत्यवशः । आत्महननानुभवजनितवासनया बलात्कृतः । अवशो रागादिवशः प्रवर्तते दुष्कर्मकरणे ॥ २७ ॥

मनोमयत्वात् सर्वार्थाः स्वप्नजागरयोः समाः ।
दृष्टानर्थानपि ध्यातुः शोकमोहभयप्रदाः ॥ २८ ॥

सत्यधर्मीया — अपार्थ इत्यस्य मनोमयतयाऽर्थानां मिथ्यात्वमुच्यत इत्यपार्थत्वभ्रमं भ्रंशयति ॥ मनोमयत्वादिति । मनोमयत्वाद्भगवन्निमित्तकवासनोपादानकत्वात्सर्वे च ते तादात्म्यव्यतिरिक्ता अर्थाः कार्याद्याः स्वप्नजागरयोरवस्थयोः समाः । अर्थक्रियाकारितया सत्यत्वेन समानाः । अर्थक्रियाकारिताऽसिद्धिं परिहरति ॥ दृष्टानर्थानिति । दृष्टोऽनर्थो दुःखादिर्यैस्तान् जानन्निति तात्पर्यानुकूल्यात् । तान्ध्यातुर्जीवस्य शोकमोहभयप्रदाः शोकादिकार्यकारिण इति समाः । न स्वप्नसत्यता साधनीयाऽपि तु सिद्धैवेति वक्तुं जागरसमतया निर्देशस्तत्रापि प्रथमतस्तद्ग्रहणमिति मन्तव्यम् । अस्थिरत्वाद्यभिप्रायिका स्वप्नमायासरूपमित्यादि प्रायिक्युक्तिरिति ज्ञेयम् ।

दृष्टानर्थानित्यैकपद्येनार्थपदातिरेकशङ्का तानित्येतन्मात्रेण पूर्तेरित्यवश इति तात्पर्यं च निर्मूलमिति च शङ्का समं निराकृते ज्ञेये ।। २८ ।।

मन्दनन्दिनी — मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्युक्तेर्मनोऽपि संसारकारणमित्याह ।। मनोमयत्वादिति । मनोमयत्वान्मनःपूर्वककर्मकारणकत्वेन मनःप्रधानत्वान्मानसवासनामयत्वात् । सर्वार्था गजतुरगादयः स्वप्नजागरयोः समा अनित्यत्वादिभिः समाः । अनित्यत्वविकारित्व-पारतन्त्र्यादिरूपतः । स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यतेत्युक्तेः । एवमुक्तरीत्या दृष्टानर्था ध्यातुरनुभवितुः शोकमोहभयप्रदा अपि भवन्तीति योजना ।। २८ ।।

तस्माद् भवद्भिः कर्तव्यः कर्मणां त्रिगुणात्मनाम् ।
बीजनिर्हरणे योगः प्रवाहोपरमो धियः ।। २९ ।।

तात्पर्यम् — धियः प्रवाहस्योपरमः परमेश्वरे रमणम् ।। २९ ।।

सत्यधर्मीया — तस्माद्भवद्भिरिति श्लोके बुद्धिप्रवाहोपरमस्तत्प्रसरणविसरणं येन योगेन स तथेति हरिस्मरणविच्छेदकता योगस्योच्यत इति प्रतीतिमतयति ।। धिय इति । धियः प्रवाहोपरम इत्यनुवादः परमेश्वरे रमणमिति व्याख्या । उः शिवः । उकारः क्षेत्रपे शंभौ हरमौलौ शुचौ हराविति एकाक्षररत्नमाला । तं पातीत्युपो विष्णुस्तस्मिन्परमेश्वरे । अनेनेश्वरात्परमः परमेश्वर इति तात्पर्यपरमेश्वरपदे विग्रहो ज्ञेयः । सति तदुत्तरे विरिञ्चे सतीपतिपालतया पुरस्करणं हरेः कुत इति शङ्का धिय इति मूलोक्तेर्हरस्य धीर्भिः सर्वं मन एवेत्युक्तेस्तस्मिन्नियामकत्वात्तद्ग्रहणमित्यौचित्यं भजत इति ज्ञेयम् । उपोधिके चेति सूत्रादिति तात्पर्यान्तरोक्तेः सर्वाधिक इति वा ।। ततश्चायं मूलार्थः ।। यदर्थमियानायास आस तान्प्रति तं विधत्ते ।। तस्मादिति । विपक्षेऽक्षेमात् । त्रिगुणात्मनां गुणत्रयकारणानां कर्मणां बीजस्य प्रकृतेर्लिङ्गशरीरस्य वा । निर्हरणे परिहारे यो योग उपायः स कर्तव्यः । किमात्मा स इत्यत आह । धियो यः प्रवाह ओघस्तस्योपरमः । उं पातीत्युप इति वा सर्वाधिक इति वा तस्मिन्रमो रमणं स एवोपाय इत्यर्थः । एकदेशान्वयस्तु शरैः शातितपत्र इत्यादौ दृष्ट इवात्रेष्टः ।। २९ ।।

मन्दनन्दिनी — तर्हि किं कर्तव्यमस्माभिरित्यत आह ।। तस्मादिति ।। कर्मणामिति मनसोऽप्युपलक्षणम् । बीजं मूलकारणमज्ञानम् । योग उपायः । सः क इत्यत आह ।। प्रवाहेति ।। धियो बुद्धेर्यः प्रवाहः । तस्योप परमात्मसमीपे रमो रमणं क्रमेण भक्तिरभिवर्धनीयेति भावः । एतदेवाभिप्रेत्य तात्पर्यम् ।। धियः प्रवाहस्योपरमः परमेश्वरे रमणमिति ।। रमणमासक्तिः ।। २९ ।।

तत्रोपायसहस्राणामयं भगवतोदितः ।
यदीश्वरे भगवति भक्तिः स्यान्नान्यथा रतिः ॥ ३० ॥

सत्यधर्मीया — रमारमणं धियः केन साधनेन भवतीत्यत आह ॥ तत्रेति । तत्र धियो हरिरमणविषये उपायसहस्राणामुपायानां साधनानां सहस्राणि तेषां मध्ये । निर्धारणे षष्ठी । सत्वरफलोपलंभकत्वेन उपायत्वावच्छिन्नः संस्तत उत्कृष्य इत्ययं भगवता नारदेन पाराशर्येण वोदितः । स किमात्मेत्यत आह । यदीति । ईश्वरे भगवत्यैश्वर्यादिगुणषट्के भक्तिः स्यात्तर्हि रती रमणं भवतीति नान्य एतत्तुलो मार्ग इत्याह ॥ नान्यथैतां विना रतिर्न स्यादिति । भगवतेति विरक्तत्वेन समग्रैश्वर्यादिमत्त्वेन परप्रतारणे कृत्याभावं दर्शयति ॥ ३० ॥

मन्दनन्दिनी — सत्स्वन्येषूपायेष्वयमेव कुतः कर्तव्य इत्यत आह ॥ तत्रेति ॥ सहस्राणां मध्येऽयं भक्तियोगो भगवता नरसखनारायणेन । तद्वच एव पठति ॥ यदीति ॥ नान्यथारतिरित्येकं पदम् । अनन्यविषयिणीति यावत् । तादृश्यन्यत्र नो भवेत् । अनन्यभक्तिः सा ज्ञेयेत्युक्तेः । यदीत्यस्य तदा मुक्तिरित्यध्याहृतेनान्वयः । इति यत्तदेव मुक्तिसाधनमिति वाऽन्वयः । भक्तिरतौ साधनमन्यथा रतिर्न भवतीति वा ॥ ३० ॥

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च ।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥ ३१ ॥

सत्यधर्मीया — तं भक्त्युत्पत्तिप्रकारं भक्तलक्षणं च कैश्चित्पद्यैराह ॥ गुरुशुश्रूषयेति । गुरुशुश्रूषया भक्तिपूर्वं तत्सेवया भक्त्या गुरुभ्यः शुश्रूषा श्रवणेच्छा तयेति वा । प्रारंभमात्रमिच्छा वा नानागुरुमुखांबुजादित्यादेः । शुश्रूषा श्रवणेच्छायां परिचर्याकथनयोरिति विश्वः । यस्य देवे पराभक्तिर्यथा देवे तथा गुरावित्यादेः । सर्वलाभार्पणेन सर्वेषां लाभानां वित्तादीनां लभ्यन्त इति ते तथा । अे भगवत्यर्पणमार्पणं तेन । अकयप्रवि । अकारो वासुदेवः स्यादित्यादेः । अ विष्णावेषत्वय इति विश्वः । ब्रह्मार्पणम् । पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छतीत्यादेः । अ अर्पणमित्यत्र सवर्णदीर्घः । सङ्गेन साधवः साक्षाद्भक्ताः । भक्ताश्च तद्दासास्तेषां साधु यथा भवति तथा । भक्तानां सङ्गेन सहवासेनेति वा । ईश्वराराधनेन पञ्चरात्राद्युक्तरमारमणपूजनेन ॥ ३१ ॥

मन्दनन्दिनी — षड्वर्गनिग्रहे भक्त्युत्पादने चोपायानाह ॥ गुरुशुश्रुषयेत्यादिना ॥ तृतीयान्तानां भक्तिः क्रियत इति वक्ष्यमाणेनान्वयः । गुरुशुश्रूषयेत्यत्र साधनपञ्चकमुच्यते । प्रत्येकं साधनविधायकवचनोदाहरणं तु गौरवभिया टीकायामुदाहृतम् । तेन च क्वचिन्न क्रियते । भक्त्या

गुरुभक्त्या । यथा देवतागुरावित्युक्तेः । सर्वलाभार्पणेन च सर्वेण यज्ञादिना लाभो लब्धं यत्पुण्यं तस्य समर्पणेन यद्यल्लब्धं स्वेन तस्य कर्तृत्वसमर्पणेन वा । साधुभक्तानां निर्व्याजभक्तानामीश्वराराधनेन पञ्चरात्रोक्तपाञ्चकालिकाराधनेन ॥ ३१ ॥

श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ।
तत्पदाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः ॥ ३२ ॥

सत्यधर्मीया — तत्कथायां यथायोग्यं तत्कथाश्रवणे श्रद्धयाऽऽस्तिक्यबुद्ध्या । गुणकर्मणां भगवद्गुणकर्मणां कीर्तनैः स्वयं हरे कृष्णेत्युच्चारणैस्तत्पदांबुरुहध्यानात् । सञ्चिन्तयेद्भगवतश्चरणारविन्दम् । पानेन ते देव कथासुधायाः । तन्नामस्मरणादिभिः । कलौ संकीर्त्य केशवमित्यादेः । तल्लिङ्गेक्षार्हणादिभिस्तस्य भगवतो लिङ्गानि चिदचिद्रूपाणि विप्रप्रतिमाशिलाप्रतिमादीनि तेषामीक्षा परोक्षज्ञानमर्हणं सत्कारः । आदिशब्देन वन्दनादिकं गृह्यते तैः ॥ ३२ ॥

मन्दनन्दिनी — श्रद्धयेति श्लोके साधनचतुष्टयम् । तल्लिङ्गेक्षार्हणादिभिस्तस्य भगवतो लिङ्गस्य प्रतिमाया ईक्षणं दर्शनमर्हणं पूजनं तदादिभिः ॥ ३२ ॥

हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३३ ॥

सत्यधर्मीया — सर्वेषु भूतेषु प्राणिषु । भगवानीश्वरो हरिरास्ते इति मनसैवमनुसन्धानेन तैस्तदपेक्षितैः कामैर्विषयैस्तानि भूतानि साधु सम्यक् मानयेत्सत्कुर्यात् ॥ ३३ ॥

मन्दनन्दिनी — भूतदयाऽपि साधनमित्याह ॥ हरिरिति ॥ भगवानीश्वरो हरिः सर्वेषु भूतेष्वास्त इति मनसा । तैः प्रार्थितैः कामैः काम्यैः स्वशक्तिविषयैर्वित्तविद्यादिभिः । भूतानि सज्जनान् साधु मानयेदिति योजना ॥ ३३ ॥

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।
वासुदेवे भगवति यया संलभते रतिम् ॥ ३४ ॥

सत्यधर्मीया — एवं पूर्वोदीरितरीत्या । निर्जितषड्वर्गैर्निर्जितः पराभावितः षड्वर्गोऽरिषड्वर्गो यैस्ते तथा तैरिन्द्रियैः करणैः । यया जनतयेति शेषः । वासुदेवे भगवति रतिर्भक्तिः क्रियते सा रतिं स्वरूपानन्दं संलभते । समा तस्या एकप्रकारतामाचष्टे ।ययाऽधिकारी रतिं मोक्षं संलभते सा वासुदेवे भवतीश्वरे । एवं निर्जितषड्वर्गैरिन्द्रियैः करणैर्भक्तिः क्रियत इत्यन्वयो वा । यया रतिं संलभतेऽधिकारी ।

सा भक्तिः निर्जितषड्वर्गैः पराभावितकामाद्यरिषड्वर्गैः ईश्वरे वासुदेवे भगवति भक्तिः क्रियत इति वाऽन्वयः ॥ ३४ ॥

मन्दनन्दिनी — उक्तसाधनैः साध्यं भवतीत्याह ॥ एवमिति ॥ एवमनुष्ठितैर्निर्जितोऽरिषड्वर्गो यैस्तैः साधनैरीश्वरे वासुदेवे भगवति स भक्तो यथा रतिं लभते तथा भक्तिः क्रियते उत्पद्यत इति योजना । रतिमुपासनापरोक्षस्वानन्दानुभवलक्षणम् ॥ ३४ ॥

निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।
यदाऽऽतिहर्षोत्पुलकाश्रुगद्गदः प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३५ ॥

सत्यधर्मीया — भक्तिरस्तीति तद्व्यक्तिः कथमित्यत आह ॥ निशम्येति । कर्माणि कंसहिंसादीनि वीर्याणि मह्युद्धरणादिकारणानि । अतुल्यान्गुणानानन्दादीन् । लीलातनुभिः क्रीडोपात्तक्रोडादिशरीरैः कृतानि निशम्य यदाऽतिहर्षोत्पुलकाश्रुगद्गदः प्रोत्कण्ठोऽतिहर्षेणास्वाधीनतया प्रसरत्सन्तोषेणोर्ध्वमायाताः पुलका रोमांचाः । पुलकः गजात्तपिण्डे रोमांच इति विश्वः । अश्रूणि नयनोद्गतशीतलजलबिन्दवः । तैः सहितो गद्गदमस्फुटाक्षरं यथा भवति । प्रोत्कण्ठो बहिःप्रगतोच्चध्वनिः । कण्ठो गले संनिधाने ध्वनाविति विश्वः । उद्गायति कश्चित् कश्चिद्रौति शब्दमात्रं वा रोदनं करोति । एवमिति श्लोकव्याकृतिरूपमेतदादिपद्यत्रिकं कुलकं च ॥ ३५ ॥

मन्दनन्दिनी — भक्तानां वृत्तिप्रकारमाह ॥ निशम्येत्यादिना ॥ यदेत्यस्य तदेति वक्ष्यमाणेनान्वयः । निशम्य श्रुत्वा । कर्माणि जगत्सर्जनादीनि । गुणान् ज्ञानानन्दादीन् । लीलातनुभिः कृतानि वीर्याणि कंसवधादीनि ॥ ३५ ॥

यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्मगतिर्गतत्रपः ॥ ३६ ॥

सत्यधर्मीया — ग्रहः पिशाचो हसति । असति कारणे । एवं सर्वत्र ज्ञेयम् । वन्दते वन्दति । अजनमपामरं महान्तं, जनं पामरं वा । जनो लोके महर्लोकात्परलोके च पामर इति विश्वः । मुहुरिति श्वसन् । वक्तीत्युभयान्वयि । आत्मगतिः स्वच्छन्दप्रवृत्तिः । गतत्रपो निर्लज्जः ॥ ३६ ॥

मन्दनन्दिनी — आक्रन्दते उच्चैः शब्दं करोति । जनं भक्तम् । आत्मगतिर्भगवद्विषयकमनोगतिः । गतत्रपो गतलज्जः ॥ ३६ ॥

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ।। ३७ ।।

तात्पर्यम् — तद्भावभावः तद्यथास्वरूपम् भक्तिः ।। 'केचिद्भक्ता विनृत्यन्ति गायन्ति च यथेप्सितम् । केचित्तूष्णीं जपन्त्येव केचिच्चोभयकारिण' इति च ।। ३७ ।।

सत्यधर्मीया — यद्यपि निशम्येत्यदिपद्यद्विकसङ्गतं केचिदित्यादिप्रमाणमादावुदाहृत्य यथाक्रमं तद्भावभावानुकृताशयाकृतिरिति व्याकर्तव्यम् । तथाऽपि श्लोकत्रिकमेकान्वयीति दर्शयितुं प्रदर्शयितुं च स्वभावमात्रावेदकतां तत्तात्पर्यस्य चातिविरोधकत्वात्तद्भावभावपदपातनिकार्थस्य तदसहमान आनन्दतीर्थमुनिरादौ तद्भावभावपदं सर्वस्योद्गानादेर्भक्तिपूर्वकत्वमावेदयितुं वा तदाकृतिः कीदृशीत्यतः केचिदित्यस्यावसरप्राप्तेरनन्तरवक्तव्यतां द्योतयितुं वाऽनुद्य व्याचर्करीति ।। तद्भावभाव इति । तद्यथा स्वरूपे भक्तिस्तस्य भगवतो भावे यथा स्वरूपे यथावस्थिते स्वरूपे भावो भक्तिः । भावो भक्तिः समुद्दिष्टा तद्वान्भावुक उच्यत इति बृहद्भाष्योक्तेः । नैकत्रोद्गानादिसर्वस्वमित्याह ।। केचिदिति । भक्ता इति सर्वत्रान्वयि । जपन्ति ध्यायन्ति । गायन्ति जपन्ति । नृत्यन्ति जपंन्तीत्यादिप्रकारेण केचिदुभयकारिणः ।। अथ श्लोकार्थः ।। यदैवं तदा । तद्भावभावानुकृताशयाकृतिः तस्य हरेर्भावे यथावदानन्दादिघनस्वरूपे भावो हि भक्तिस्तस्यानुकृतेऽनुकूलीकृते आशयो मनश्चाकृतिर्मूर्तिर्देह इति यावत् यस्य स तथा । निर्दग्धबीजानुशयो निर्दग्धं बीजं पुनः शरीराद्यापादकं कर्म यस्य सोऽनुशयोऽनुबंधः संसारबंधो यस्य सः । भवेदनुशयो द्वेषे पश्चात्तापानुबंधयोरिति विश्वः । निर्दग्धं बीजमुक्तरूपं येन सोऽनुशयः पश्चात्तापो यस्य स इति वा । तस्यापि प्रायश्चित्तानुष्ठानसाधनत्वात् । मुक्तसमस्तबंधनस्त्यक्तपुत्रकलत्रादिसमस्तस्नेहः । अनुबंधो हि भक्तिः स्याद्बंधः स्नेह उदाहृत इति तात्पर्यान्तरवचनात् । मुक्तसमस्तबंधनस्त्यक्तसमस्तसंसारानुबंधनः । निर्दग्धबीजा मुक्तास्तैरनु-शयोऽनुबंधो यस्येत्येष्यन्न्यायेनोक्तिर्वा । महीयसा केनाप्यवार्यप्रवाहेणेति महता भक्तिप्रयोगेण तल्लक्षणोपायेन । तस्या हरिविषयसंयोजनेन वा । अधोक्षजं श्रीभगवन्तं समेति प्राप्नोति ।। ३७ ।।

मन्दनन्दिनी — भक्त्युद्रेकफलमाह ।। तदेति ।। तस्य भगवतो भावे स्वरूपे भावो भक्तिः । अत एव तात्पर्यम् ।। तद्भावभावः । तद्यथा स्वरूपं भक्तिरिति ।। तयाऽनुकृतेऽनुकूलत्वेन कृते । आशयाकृतिराशयोंऽतःकरणमाकृतिर्देहाकारो यस्य स तथा । यदाऽतिहर्षेत्यादिनोक्तमुद्गानादिकं नैकैकस्मिन् भक्ते समुच्चयो किन्तु यथा तथेति ज्ञातव्यम् । अत एव तात्पर्यम् ।। केचिद्भक्ता विनृत्यन्ति गायन्ति च यथेप्सितम् । केचित्तूष्णीं भजन्त्येव केचिच्चोभयकारिण इति चेति ।। उभयकारिणो नर्तनगायनोभयकारिणः । निर्दग्धकर्मबीजः । अनुशयोंऽतःकरणं संसारो वा यस्य स निर्दग्धबीजानुशयः । अधोक्षजं समेति । भक्तिप्रयोगेण स्तोत्रेण वक्ति स्तौति ।। ३७ ।।

अधोक्षजालापमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ।
तद् ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३८ ॥

तात्पर्यम् — ब्रह्मनिर्वाणसुखं ब्रह्मनिमित्तनिर्वाणसुखम् ॥ ३८ ॥

सत्यधर्मीया — अधोक्षजालापेति पद्ये ब्रह्मनिर्वाणसुखमित्यस्य निर्वाणमशरीरं यद्ब्रह्म तदात्मकं यत्सुखमिति वा, तदनुभूयमानं यत्सुखमिति वा विपरीतमतिनिरासाय तदनूद्य स्वयं व्याचष्टे ॥ ब्रह्मेति । ब्रह्मनिर्वाणसुखं ब्रह्मनिमित्तं यन्निर्वाणं मोक्षस्तत्रत्यं सुखम् । मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृत-मित्यमरः । निर्वाणं गजमज्जनेऽपवर्गे चेति विश्वः ॥ ततश्च श्लोकव्याकृतिः ॥ इह संसारेऽशुभात्मनो विषयाभिलाषदूषिततयाऽशुभमनसः शरीरिणो निन्दितदेहस्य संसृतिचक्रशातनं संसृतीनां चक्रं समूहस्तस्य शातनं नाशकं ब्रह्मनिर्वाणसुखं ब्रह्मनिमित्तकं यन्निर्वाणं मोक्षस्तस्य सुखं येन स तम् । यद्बुधा विदुरित्यव्यभिचारम् अधोक्षजालापसंसृतिचक्रशातनब्रह्मनिर्वणसुखकार्यकारणभावस्य सूचयति । तेऽपि न दुःसहवासिन इत्यप्याह ॥ विदुर्बुधा इति । विरुद्धा दुर्बुधेभ्यो विदुर्बुधा इति ततो हेतोः । हृदीश्वरं हृदिस्थितमीश्वरं हृदये भजध्वम् । तर्हि तत्परिच्छिन्नं किं नेत्याह ॥ तदिति । ततत्वात्तत् । यथोक्तमृग्भाष्यटीकयोः । गुणैस्ततः केन निमित्तेन गुणैस्तत इति तत् । त्यजियजितनिभ्यो डित् इति तनोतेर्डप्रत्यय इति तत् । कीर्तनं वा । अधोक्षजस्यालापो यस्य तत् । एवं विशेषणद्वयेऽपि बहुव्रीहिः । स हि सर्वमनोवृत्तिप्रेरकः समुदाहृत इत्यादेः । यस्ततः तं तत्तस्माद्भजध्वमिति वाऽन्वयः । बालानां तत्रेतिकर्तव्यमुपदिशति । विदुर्बुधाः सतो भजध्वमिति वा ॥ ३८ ॥

मन्दनन्दिनी — पूर्वमशुभात्मनो भक्त्युद्रेकात्संसृतिचक्रस्य शातनम् । शदऌ शातने शदेरगतौत इति तः । नाशनम् ॥ अधोक्षजालापं तन्निमित्तं यत्सुखं ब्रह्मनिमित्तकं निर्वाणसुखं मोक्षसुखं विदुरिति योजना । अत एव तात्पर्यम् ॥ ब्रह्मनिर्वाणसुखं ब्रह्मनिमित्तनिर्वाणसुखमिति ॥ भगवत्कथयाऽपि सुषुप्ताविव स्वरूपसुखं व्यज्यत इति भावः । ततो भक्तेरेतादृशसुखसाधनत्वात् । यूयं हृदीश्वरमन्तःकरणनियामकं हृदये स्थूलहृदये विद्यमानं प्राज्ञं भजत । जीवाङ्गुष्ठमितो जीवो देहाङ्गुष्ठमितो हृदीत्युक्तेः ॥ ३८ ॥

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः ।
अस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३९ ॥

तात्पर्यम् — अशेषदेहिनां सामान्यतो हृदिस्थत्वेन ॥ ३९ ॥

सत्यधर्मीया — कोऽतिप्रयासोऽसुरबालका हरेरिति श्लोकेऽशेषदेहिनां सामान्यतो विषयोपपादनैः किमित्यन्वयभ्रमभ्रंशाय स्वयमन्वयं दर्शयति ॥ अशेषेति । अशेषदेहिनां सर्वजीवानाम् । सामान्यतो हृदिस्थत्वेनेत्येतदुपासन इत्यनेनान्वेतीति भावः ॥ अथ श्लोकार्थः ॥ सत्यां भक्तौ न दवीयःपदवीं श्रितः श्रितश्चासत्यां तस्याम् । तद्दूरे तद्वन्तिक इत्युक्तेः । युष्माभिः कृतायां तस्यां स सुलभ इति भाषते ॥ क इति । हे असुरबालका अशेषदेहिनां सामान्यतः साधारणत्वेन हृदि स्वे च हृदि छिद्रवदाकाशवत्सतः सदा विद्यमानस्य हरेरुपासनेऽतिप्रयासः को न कोऽपि । अस्यात्मनो जीवजातस्य सख्युः । द्वा सुपर्णा सयुजा सखायेत्यनुकरोत्यनेन । एतद्विषये उपपादनैः शास्त्रैः किं न प्रयोजनमिति भावः । अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवंव्योमवच्चेत्यादेः । विषयोपपादनैस्तदार्जनैः किं न प्रयोजनमिति वा । भक्तियुक्तो न चेत्को जनोऽतिप्रयासोऽतिक्रान्तः प्रयसादायासादिति स तथा । आयासशून्यः को न कोऽपि । तद्दूर इत्युक्तेरिति वाऽऽवृत्त्याऽन्वयः ॥ ३९ ॥

मन्दनन्दिनी — भगवदुपासनायां महाफलमुक्त्वाऽऽयासोऽपि नास्तीत्याह ॥ हे असुरबालकाः स्वे स्वकीये हृदि छिद्रवदाकाशवत्सतो विद्यमानस्यास्यात्मनः सख्युर्हरेरुपासने कोऽतिप्रयासः । अशेषदेहिनां सामान्यतो हृदिस्थत्वेन न कस्यापि । अत्र तात्पर्यम् ॥ अशेषदेहिनां सामान्यतो हृदिस्थत्वेनेति ॥ एवं सन्निहितत्वेन विषयोपपादनैर्देशान्तरगमनैः किं प्रयोजनमिति योजना ॥ ३९ ॥

रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।
सर्वार्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ॥ ४० ॥

सत्यधर्मीया — विषयोपपादनैः किमिति सामान्यत उक्तम् । तन्नामनिर्देशपूर्वकं तद्धेयतामाह ॥ राय इति । रायो वित्तानि । कलत्रं भार्या । सुतादयः पुत्रभ्रात्रादयः । गृहा मन्दिराणि । मही भूः । कुञ्जराः करिणश्च । कोशः धनागारं च भूतय एतदितरैश्वर्याणि चेति । सर्वे अर्थकामाः काम्या अर्थाः । चला अस्थिरा इति । क्षणभङ्गुरायुषः क्षणेन भङ्गुरं भङ्गवदायुर्यस्य तस्य मर्त्यस्य कियत्प्रियं कुर्वन्ति । अस्य नशिष्णुशरीरत्वात्तेषां चातिचलत्वात्किं तैः सम्पादितैः प्रियमात्यन्तिकं स्यादिति भावः ॥ ४० ॥

मन्दनन्दिनी — सर्वदाचलत्वेन देहहृदिस्थस्य नित्यस्य भगवतो महाप्रियकारित्ववन्न कस्यापि विषयस्यापि प्रियकारित्वं मर्त्यस्य । मृत्यनन्तरमभावात् । पूर्वमपि क्षणभङ्गुरत्वात्सतोऽपि देशान्तरचलनात् । अतस्तत्र वैराग्येण भवितव्यमित्याशयेनाह ॥ राय इति ॥ रायो हि बहिःस्थितवित्तानि । कोशो भूनिक्षिप्तद्रव्यम् । अर्थकामा अर्थाश्च कामाश्च क्षणभङ्गुरायुषः स्वरूपनाशवन्तश्चला अन्यत्र गमनवन्तः ॥ ४० ॥

**एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकमीशं भजतात्मलब्धये ।। ४१ ।।**

सत्यधर्मीया — यज्ञाद्यनुष्ठानेनाक्षयस्वर्गादिसंभवाद्भवदुक्तमेव कुतोऽनुष्ठेयमित्यत आह ।। एवमिति । क्रतुभिर्यज्ञादिभिः कृताः सम्पादिता लोकाः स्वर्गाद्याः क्षयिष्णवः कदाचित्सातिशयाः सुखातिशयसहिताः । न निर्मला नाप्राकृताः । हीति क्षीणे पुण्ये मर्त्यलोकं विशन्ति । कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिमानसिद्धतां, तथैवमिति ययात्यादिपातवत्पातं सूचयति । क्षी क्षय इत्यस्मात् भुवश्चेति अनुक्तसमुच्चयार्थेन चशब्देन इष्णुचि आर्धधातुके गुणेऽयादेशे क्षयिष्णुरिति ज्ञेयम् । यस्मादेते सदोषा एतानुपेक्ष्य । अदृष्टश्रुतदूषणमदृष्टान्यश्रुतानि दूषणानि क्षयिष्णुत्वसातिशयत्वानिर्मलत्वादीनि यस्य सः । तं परं विलक्षणम् । एकं सर्वोत्तमम् । ईशं निरवधिकेश्वरम् । लक्ष्मीसुखकरं तदीशं वा । भक्त्या भजत । तत्फलमालपति ।। आत्मलब्धय इति । स्वस्वरूपानन्दप्राप्तये । एकयेशमिति पाठे एकयाऽनन्ययेति भक्तिविशेषणम् । आत्मनः स्वस्वरूपस्य लब्धिर्लाभस्तस्या इति वा ।। ४१ ।।

मन्दनन्दिनी — अर्थकामौ दूषयित्वा प्रवृत्तकर्मफलं स्वर्गादिकं दूषयति ।। एवमिति ।। क्रतुभिः कृता अमी स्वर्गादय एवमर्थकामवत्क्षयिष्ण्वो नश्वराः स्वापेक्षयातिशयितलोकान्तरवन्तः । न निर्मलाः । न रागादिदोषरहिताः । हिशब्देन पुण्यचितो लोकः क्षीयते । अनैवंविन्महत्पुण्यं कर्म करोति तत्धास्यां ततः क्षीयत एवेत्यादिप्रमाणप्रसिद्धिं द्योतयति । तस्माददृष्टं श्रुतं च न भवतीत्यदृष्टश्रुतं दूषणं यस्य तम् । दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीता इति श्रुतेः । परं परमात्मानमीशमेकमनन्यसाधारण-भक्त्याऽऽत्मलब्धये स्वरूपानन्दलाभाय भजतेति योजना ।। ४१ ।।

**यदर्थमिह कर्माणि विध्यङ्गान्यसकृन्नरः ।
करोत्यतो विपर्यासममोघं विन्दते फलम् ।। ४२ ।।**

सत्यधर्मीया — तदपि कर्म हरिसमर्पितं चेदनश्वरफलोपलब्धये भवति । न भवत्यसमर्पितं ततो व्यर्थं तदित्याह ।। यदर्थमिति । विध्यङ्गानि विधिभिरङ्गचन्तेऽवगम्यन्त इति वा विधिप्राप्तानि । अगीत्यगिर्गत्यर्थः। यजेतेत्यादिविधिविहितानि यानि कर्माणि यदर्थं यत्फलमुद्दिश्य । नरोऽधिकारी । असकृदनेकवारं करोति । अतोऽसर्वोत्तमसमर्पितादेतत्कर्मणो विपर्यासं सङ्कल्पितान्यदमोघं दुःखसंपादकत्वेनावंध्यं फलं क्लेशादिरूपं विशरणं वा विन्दते लभते । ञि फला विशरण इति स्मरणात् ।। ४२ ।।

मन्दनन्दिनी — तर्हि विहितानि कर्माणि किमकार्याणीत्यत आह ।। यदर्थमिति ।। इह लोके विध्यङ्गानि विहिताङ्गकानि कर्माणि नरो यदर्थं यत्प्रीत्यर्थमसकृत्करोत्यतः प्रसन्नाद्भगवतोऽविपर्यासं नाशरहितममोघं फलं विन्दत इति योजना । भगवत्प्रीत्यर्थं कर्माणि कर्तव्यानीति भावः ।। ४२ ।।

सुखाय दुःखमोक्षाय संकल्प इह कर्मणः ।
सदाऽऽप्नोतीहया दुःखमनीहायां सुखोन्नतिम् ।। ४३ ।।

सत्यधर्मीया — तदेव वितत्य वक्ति ।। सुखायेत्यादिभिः श्लोकैः । सुखाय दुःखमोक्षायेति दलद्वयोक्तिः । कर्मण इह सङ्कल्प एतत्सुखार्थमेतद्दुरिष्टनिवृत्त्यर्थमिदं कर्म करिष्य इति कर्मविषयकः सङ्कल्पो मानसिको व्यापारविशेषः । सङ्कल्पः कर्ममानसमित्यमरः । तत्कर्मणः सकाशात् । ईहा फलेच्छा तया सदा दुःखं तदेवाप्नोति । अनीहायामकामने सुखोन्नतिम् । उन्नतिमित्यनेनासङ्कल्पितस्य महत्त्वमप्याह । सदाप्नोतीत्यावृत्तमन्वेति ।। ४३ ।।

मन्दनन्दिनी — एतदेव विवृणोति ।। सुखायेति ।। इह लोके कर्मणः सङ्कल्पः सुखाय दुःखमोक्षाय सदा भवति । सुखमेव मे स्याद्दुःखं मनागपि माऽभूदिति सर्वानुभवात् । परं त्वीहया स्वर्गादीच्छया कृतं चेद्दुःखमनीहायां सुखोन्नतिमाप्नोतीति योजना ।। ४३ ।।

कामान् कामयतेऽकाम्यान् यदर्थ इह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ।। ४४ ।।

सत्यधर्मीया — अकाम्यान् अनपेक्षणीयान् कामान्विषयान् । यदर्थे यं देहमुद्दिश्य कामयते पुरुषः स देहस्तु पारक्यः श्वशृगालादिपरकीयसंबंधी याति गच्छति । उपेत्य याति आगच्छतीति भङ्गुरः । अत एव तदर्थं तत्कामनर्थमिति भावः ।। ४४ ।।

मन्दनन्दिनी — कामा अनित्या इति पूर्वं दूषितम् । अधुना तु ते यदर्थाः सोऽपि देहोऽनित्य इत्याह ।। कामानिति ।। यदर्थं यद्देहस्थितेन्द्रियकारणकभोगार्थं कामान् तस्य विवरणं काम्यान् कामयते इह पुरुषः स देहः पारक्यः पूर्वं वनितादेः मृत्यनन्तरं शृगालादेर्भोग्यो भङ्गुरः क्षणभङ्गुरः यात्युपैति च वै प्रसिद्धम् ।। ४४ ।।

किमु व्यवहितापत्यदारागारधनादयः ।
राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ।। ४५ ।।

सत्यधर्मीया — सत्त्वेन कृतस्य शरीरस्य यदेदृशी दशा काऽऽशा किञ्चिद्व्यवहितसुतादिष्विति भाषते ॥ किम्विति । व्यवहिता इत्यपत्येत्यादिसमस्तं विशकलितमावर्तितराज्यादिपदेनाप्यन्वेति । ममतास्पदा ममताया आस्पदं स्थानं येषु ते तथा । अनेन आस्पदं प्रतिष्ठायामिति नित्यनपुंसकत्वोक्तेः कथमास्पदा इति शङ्का पराकृता ज्ञेया । पारक्या इति किं वक्तव्यमिति भावः । व्यवहिताश्च तेऽपत्यदारागारधनादयश्चेति विग्रहः ॥ ४५ ॥

मन्दनन्दिनी — अव्यवहितो देहो यदैवंविधस्तदा तत्सम्बन्धिनो व्यवहितापत्यादयः किमु इत्यत आह ॥ किम्विति ॥ भङ्गुराः पारक्याः किम्विति योजना ॥ ४५ ॥

किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ।
अनर्थैरर्थसंकाशैर्नित्यानन्दमहोदधेः ॥ ४६ ॥

सत्यधर्मीया — एतैस्तुच्छैर्देहेन सह नश्वरैरनर्थैरर्थशून्यैः । तर्हि प्रवर्तकता तेषु कुत इत्यत आह । अर्थसंकाशैरर्थवत्प्रतीयमानैः । किंकारणिकैतन्नश्वरतेत्यतो हेतुमाह ॥ पूर्णेति । पूर्णानन्दमहोदधिरीश्वरस्तस्मादेव । असमर्पणे स एव विघटक इति भावः । तर्हि समर्पणेनानश्वरफललाभश्चेत्तेन तस्य नूतनानन्दलाभोऽस्ति न वा । आद्यपक्षेऽपूर्णः स्याद्द्वितीये तत्तृप्तेरभावे न तदनुष्ठानमित्यतो वाऽऽह ॥ किमेतैः पूर्णानन्दमहोदधेरिति । स्वकीयकर्तव्यतया स्वोन्नत्या एव तदर्पणमिति भावः । अथवा पूर्णानन्दो हरिर्महोदधिरिव महोदधिरन्ततो गत्वा गम्यं स्थानं यस्य तस्यात्मनो जीवस्येत्यन्वयः । पूर्णश्च पूर्णं चेति पूर्णे । आनन्दश्च महश्च महोत्सवश्च ते पूर्णे आनन्दमहसी ददातीति पूर्णानन्दमहोदः । स धीयतेऽस्मिन्नित्यधिकरणे किः । तस्यात्मन इति वा ॥ ४६ ॥

मन्दनन्दिनी — अनित्यत्वमुक्त्वा तैः प्रयोजनं नास्तीत्याह ॥ किमिति ॥ नित्यानन्दमहोदधेः इति । ल्यब्लोपनिमित्ता पञ्चमी । एतादृशं परमात्मानं महान्तं विहाय तुच्छैरेतैः किमिति योजना । अर्थसङ्काशैः पुरुषार्थसदृशैः ॥ ४६ ॥

निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः ।
निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४७ ॥

सत्यधर्मीया — अविचारसहमिति न देहेन प्रयोजनमित्याह ॥ निरूप्यतामिति । देहभृत इति प्रथमाबहुवचनं सदसुरविशेषणम् । षष्ठ्यन्तं सद्विशेष्यं चेति ज्ञेयम् । हे देहभृतो देहधारिणोऽसुराः । निषेकादिष्ववस्थासु गर्भाधानादिनानावस्थासु कर्मभिः क्लिश्यमानस्य देहभृतः प्राणिनः क्लेशे निमित्तं कर्माणीत्यर्थः । कियानिह संसारे स्वार्थः प्राप्य इति निरूप्यतां भवद्भिरिति शेषः ॥ ४७ ॥

मन्दनन्दिनी — भगवद्भक्तिमन्तरा कर्मभिर्निषेकादिमरणान्तास्ववस्थासु क्लिश्यमानस्य स्वार्थः कोऽस्ति। न कोऽपीत्याक्षिपति ॥ निरूप्यतामिति ॥ ४७ ॥

कर्माण्यारभते देही देहेनात्मानुवर्तिना ।
कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४८ ॥

सत्यधर्मीया — प्रवाहतो नियतस्य संसारस्य कंसारिज्ञानं विना निवृत्तिर्न स्यादिति तज्ज्ञानं तद्धेतुर्भजनं चावश्यकमित्याह द्वाभ्यां पद्याभ्याम् ॥ कर्माणीति । देह्यात्मानुवर्तिना ईश्वरपरतंत्रेण देहेन कर्माण्यारभते । तैः कर्मभिः स्वानुष्ठितैः । दशावराणां देहानामित्यादेः । देहमेष्यन्तं तनुते सम्पादयति स्वप्राप्यं तनुते करोतीति वा । कर्म च देहश्चेत्येतदुभयम् । अविवेकतो भगवदज्ञानाद्भवति । तुः सर्वेषामेकप्रकारमज्ञानं व्यावर्तयति ॥ ४८ ॥

मन्दनन्दिनी — कर्मदेहोभयपरम्परा भगवदज्ञानलक्षणाविवेकादेवेत्याह ॥ कर्माणीति ॥ ४८ ॥

तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयाऽऽत्मानमनीहं हरिमीश्वरम् ॥ ४९ ॥

तात्पर्यम् — **'अप्रयत्नेन करणमनीहा प्रोच्यते बुधैरि'ति च ॥ ४९ ॥**

सत्यधर्मीया — भजतानीहयेति श्लोके लोकेश्वरस्यानीहमिति सर्वकर्तुश्चेष्टाभाव उच्यत इत्यपार्थं मानेन विमानयति ॥ अप्रयत्नेनेति । प्रयत्नेन विना यत्करणं कृतिः साऽनीहेत्युच्यते । न पामरोक्तिर्नाप्येकविवेक्युक्तिरियमपि न जिव्होपर्युक्तिरिति बुधैः प्रोच्यत इत्यनेन द्योतयति ॥ अथ मूलार्थः ॥ यदपाश्रया अनीहयाऽफलाकांक्षया । अनीहमक्लिष्टकारिणम् । न विद्यते ईहा प्रयत्नः कृतिर्यस्य स तं हरिमीश्वरं तस्माद्भजतेत्यन्वयः । अनीहोऽक्लिष्टकारित्वादित्यन्यत्रोक्तेः ॥ ४९ ॥

मन्दनन्दिनी — अवर्जनीयतया प्राप्ता अर्थकामादयः कथं त्यक्तुं शक्यन्त इत्यतस्ते यदपाश्रया यत्परमात्ममूलकास्तमेवानीहया कामेन भजतेति विधत्ते ॥ तस्मादिति ॥ अनीहमनीहाऽप्रयत्नेन जगत्करणम् । अर्शादच् । तद्वन्तम् । बीजं जगतो व्यञ्जनाद्बीजशब्दवाच्यमात्मानं भजतेति योजना । एतदेवाभिप्रेत्य तात्पर्यं प्रवृत्तम् ॥ अप्रयत्नेन करणमनीहा प्रोच्यते बुधैरिति च ॥ व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामतः इति च । अप्रयत्नेनाप्रयासेन परिणामतो विकारतः ॥ ४९ ॥

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ।
भूतैर्महद्भिः स्वकृतैः कृतानां बीजसंज्ञितः ॥ ५० ॥

तात्पर्यम् — 'व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामत' इति च ॥ ५० ॥

सत्यधर्मीया — सर्वेषामपि भूतानामिति श्लोके परमात्मनो बीजत्वमुच्यते । तेन परिणामिकारणं भगवानित्यापततीति प्रतीतिं सबीजं बीजपदार्थं मानेनैवोक्त्वा पराकरोति ॥ व्यञ्जनादिति । जगतः स्वोपादानतो जायमानस्य व्यञ्जनाद्व्यक्तत्वप्रापणाद्धेतोर्भगवान्बीजमित्युच्यते । मानिकी निरुक्तिर्व्यञ्जना-द्बीजमित्यत्र यथायथं पृषोदरादिनिवेशनेन ज्ञेया । परिणामतो विकृततया नेत्यर्थः । अथ मूलार्थः ॥ स्वकृतैः स्वनिर्मितैः स्थूलरूपेण महद्भिर्भूतैः कृतानामवान्तरभूतानामात्मा प्रिय ईश्वर इति विकारपरासः । बीजसंज्ञितो व्यञ्जक इति तदभिधानवान् । मूलस्थं संज्ञापदं बीजमिति संज्ञितो न वस्तुत उपादानमिति कटाक्षयदर्थं मानभूमिकेति ज्ञेयम् ॥ ५० ॥

मन्दनन्दिनी — बहुधा सम्बन्धसद्भावाद्भगवानेव भजनीय इत्याह ॥ सर्वेषामपीति ॥ आत्मांऽतर्यामी । ईश्वरः स्वामी । प्रियः प्रियकृत् । स्वकृतैर्महद्भिर्भूतैः । कृतानां देहेन्द्रियवत्तया कृतानां बीजसंज्ञितो जनकश्च ॥ ५० ॥

देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च ।
भजन् मुकुन्दचरणं स्वस्तिमान् स्याद् यथा वयम् ॥ ५१ ॥

सत्यधर्मीया — हीनजनुषोऽस्माकं कथं तेन स्वस्तिः स्यादित्यत आत्मनिदर्शनेन न जात्यादि प्रयोजकमित्याह ॥ देव इति । स्वस्तिमान् शाश्वतिकसत्तावान् । मुक्त इति यावत् । तत्सूचकैहिकक्षेमवांश्च ॥ ५१ ॥

मन्दनन्दिनी — मुकुन्दचरणं भजतः स्वस्तिमत्वे न जातिः प्रयोजिकेत्याह ॥ देवो वेति ॥ यथा वयमिति दृष्टान्तः ॥ ५१ ॥

नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ ५२ ॥

सत्यधर्मीया — बहूनां तत्रापि बालानां लोलमानसानामप्रातिस्विकोपदेशे स्थैर्यं न भवेद्भवेच्च न मन्मुखमभिवीक्ष्योचेऽयमिति कोपश्चेत्युक्तमेवार्थं पुनराह ॥ नालमिति । मुकुन्दस्य प्रीणनाय तोषणाय । वृत्तं सदाचारः ॥ ५२ ॥

मन्दनन्दिनी — भक्तिरेव भगवत्प्रीतिसाधनं नान्यदित्याह ॥ नालमिति श्लोकद्वयेन ॥ वृत्तं चरितम् ॥ ५२ ॥

न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम् ।। ५३ ।।

सत्यधर्मीया — व्रतानि च नालं समर्थानि नेति तत्तदन्वयोनुरूपी ज्ञेयः । अमलया निष्कल्मषया भक्त्या हरिः प्रीयते प्रीतो भवति । अन्यत्तदसत्कृतं पूर्वोक्तं सर्वं विडंबनं नटनं न घटनं फलस्य तेनेति भावः ।। ५३ ।।

मन्दनन्दिनी — विडम्बनं प्रीतिजनकतया प्रतीयमानमात्रम् ।। ५३ ।।

ततो हरौ भगवति भक्तिं कुरुत दानवाः ।
आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ।। ५४ ।।

सत्यधर्मीया — ततस्तां विना सर्वस्यापि नैष्फल्यात् । हे दानवाः । सर्वत्र सर्वभूतात्मनि भगवतीश्वरे हरौ । आत्मौपम्येन स्वयोग्यतानुसारेण भक्तिं कुरुत । उपमैवौपम्यम् । आत्मभिरौपभ्यं तेन । स्वदेहे स्वेषां यथा तत्सादृश्येनेति वा । सर्वत्र सर्वावस्थासु सर्वात्मनि सर्वसन्निहिते ।। ५४ ।।

मन्दनन्दिनी — पुनर्भक्तिं विधत्ते ।। तत इति ।। आत्मौपम्येनात्मदृष्टान्तेन । सर्वभूतात्मन्यन्तर्यामिणि । ५४ ।।

दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ।। ५५ ।।

तात्पर्यम् — अच्युततां च्युतिवर्जनम् ।। ५५ ।।

इति सप्तमतात्पर्ये सप्तमोऽध्यायः ।। ७ ।।

सत्यधर्मीया — दैतेया इति श्लोकेऽच्युततां तत्तादात्म्यं गता इति अन्यथाप्रतीतिं निरसितुं स्वयं व्याकरोति ।। अच्युततां च्युतिवर्जनमिति ।। अथ मूलार्थः ।। व्रजौकसो गोपालाः । पापजीवाः चर्ययोपरि तथा दृश्यमानाः । अच्युततां पुनरावृत्तिवर्जनं मोक्षमिति यावत् । गताः सन्ति । ततो जातिर्नातिकांक्षितेति भक्तिं कुरुतेत्यन्वयः । दैतेयाः शिशुपालादयः । यक्षा नलकूबरमणिग्रीवादयः । रक्षांसि स्वाविष्टोवर्शीविवक्षया पूतनाहिडिंबीघटोत्कचादयः । स्त्रियो गोपाङ्गनाः । खगाः खाण्डवदाहनकाले जरितार्यादयः । मृगाः पशवः । मृगः पशौ कुरङ्गे चेति विश्वः । पापजीवाः कृकलासतनुनृगादय इति ।। ५५ ।।

मन्दनन्दिनी — जातिरप्रयोजिकेत्युक्तम् । अधुना तु नानाजातिमन्तोऽपि भक्तिमन्तोऽच्युततां च्युतिवर्जनम् । मुक्तिमिति यावत् । गताः सन्तीत्याह ॥ दैतेया इति ॥ अत्र तात्पर्यम् ॥ अच्युततां च्युतिवर्जनमिति ॥ ५५ ॥

एतावानेव लोकेऽस्मिन् पुंसां स्वार्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत् सर्वत्र तदीक्षणम् ॥ ५६ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे सप्तमोऽध्यायः ।

सत्यधर्मीया — उपसंहरति ॥ एतावानिति । यत्सर्वत्र तदीक्षणम् । शुनि चैव श्वपाके च पण्डिताः समदर्शिन इत्यादेः । भगवान्संनिहित इति निरीक्षणं सैव गोविंदे एकान्तभक्तिरेतावानेव परः स्वार्थः स्मृतः । गोविन्दः इत्यनेन मूलरूपादवताररूपस्य विशेषं मन्यमानाः परास्ता वेदितव्याः । सर्वच्युतिवर्जनस्यात्रैव दृष्टेर्गोविन्द इत्युक्तिर्युक्तिमतीति ज्ञेयम् । प्रस्तावान्तरे सुधायां मूलरूपाणुत्वमहत्वे यौगपद्येन गोविन्द इत्यनेन यशोदाप्रत्यक्षं प्रमाणयतीत्युक्तेः ॥ ५६ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७-७ ॥

मन्दनन्दिनी — उपसंहरति ॥ एतावानिति ॥ परः स्वार्थः उत्तमः पुरुषार्थः । तदीक्षणं भगवदीक्षणम् ॥ ५६ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७—७ ॥

॥ अथ अष्टमोऽध्यायः ॥

नारद उवाच–

अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ।
जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥

सत्यधर्मीया — भगवति भक्तिः कर्तव्यतयोक्ता । तस्याप्यस्मद्वज्जननादिमत्त्वे न निरतिशयासभक्तिः स्यादित्यतः श्रीनृसिंहप्रादुर्भावं तन्निदर्शनेन समस्तभगवद्रूपाणीतराण्येवंरूपाणि न

किञ्चिद्विसदृशानीति व्याप्तिं ग्राहयितुं निरूपयन् दितिसुता उदितं प्रल्हादेनाल्हादतश्चक्रुरुत न चक्रुरिति धर्मशङ्कामर्म भिनत्ति ।। नारद इति । निरवद्यत्वात्प्रल्हादवर्णितस्यादोषत्वात् । निरवद्यत्वात्प्रल्हादोदितस्वीकारकारणदोषशून्यत्वाद्दैत्यसुता जगृहुरिति च तस्यान्वयो ज्ञेयः । गुर्वनुशिक्षितं शण्डामर्कशिक्षितं नैव जगृहुः । कुत इत्यत इत इत्यप्याह । निरवद्यत्वान्नितरां दोषवत्त्वादिति ।। १ ।।

मन्दनन्दिनी — प्रह्लादरक्षणाय नृसिंहः प्रादुर्भूत इत्यस्मिन्नध्याये निरूप्यते । प्रह्लादोपदेशानन्तरं बालकाः किमकार्षुरित्याह ।। अथेति ।। निरवद्यत्वात्प्रह्लादवर्णितस्य बालानां मनसो वा निर्दोषत्वात् । नैवेत्यत्रापि जगृहुरित्यनुवर्तते ।। १ ।।

अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम् ।
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद् यथा ।। २ ।।

सत्यधर्मीया — एकान्तसंस्थिताम् । एक एवान्ते स्थातेत्येकान्तो लक्ष्मीकान्तस्तस्मिन्सम्यगचाञ्चल्येन स्थिताम् । एकान्तो निर्णयस्तत्र स्थितां वा । अन्तो निर्णयः । उभयोरपि दृष्टोऽतस्त्वनयोरिति गीताभाष्योक्तेः । एकान्ते रहसि सयूथ्ये एव संस्थिताम् । अधुना प्रकटं वा । राज्ञ इति पञ्चम्यन्तं भीतपदेनान्वेति । चतुर्थ्यंतं षष्ठ्यंतं वा सदावेदयदित्यनेनाप्यन्वेति । यथा सम्यक् ।। २ ।।

मन्दनन्दिनी — एकान्ते भगवति स्थितां यथा स्थितं यथा प्रह्लादेन वर्णितं तथा । यथा बालैर्गृहीतं तत्सर्वमित्यर्थः ।। २ ।।

श्रुत्वा तदप्रियं दैत्यो दुस्सहं तनयानयम् ।
कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ।। ३ ।।

सत्यधर्मीया — तनयानयं तनयस्यानयमन्यायं स्वराद्धान्तविरुद्धसिद्धान्तावस्थितिरूपम् । पुत्रं पुन्नम्नो नरकात्त्राता पुत्र इत्यभिधीयत इत्युक्तेर्विविक्षुरत्यगात्सूनोः प्रल्हादस्यानुभावत इति स्वतारकमिति पुत्रशब्दं पुनर्निबंधानः सूचयामास व्यास इति ज्ञेयम् ।। ३ ।।

मन्दनन्दिनी — तनयानयं तनयस्य अनयः स्वसिद्धान्तविरुद्धप्रकारो यस्मिन्वचने तत्तनयानयम् ।। ३ ।।

क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ।। ४ ।।

सत्यधर्मीया — तिरश्चीनेन कुटिलेन चक्षुषा नेत्रेणेक्षमाणः । हे पापेन तद्गच्छ्रेष्ठेति परुषया वाचा क्षिप्त्वाऽतदर्हणं तदयोग्यं प्रल्हादं प्राहेत्यन्वयः । पापेन तन्मारणयत्नकारणभूतस्वपापेन चक्षुषेक्षमाण इति वा ॥ ४ ॥

मन्दनन्दिनी — अतदर्हणं निष्ठुरायोग्यम् । पापेन पापसाधनेन । तिरश्चीनेन वक्रेण ॥ ४ ॥

प्रश्रयावनतं दान्तं बद्धाञ्जलिमव स्थितम् ।
सर्पः पदाऽऽहत इव श्वसन् प्रकृतिदारुणः ॥ ५ ॥

सत्यधर्मीया — सर्पः पदाहतो यथा श्वसति तथा श्वसन् । तस्य गूढपात्वादनासिकादेस्तत्प्रदर्शनं कोपवदुचिततां भजते । पादाघाते कोप इति वच इति ज्ञेयम् ॥ ५ ॥

मन्दनन्दिनी — प्रकृतिदारुणः स्वभावेन दुष्टः ॥ ५ ॥

हिरण्यकशिपुरुवाच-
हे दुर्विनीत मन्दात्मन् कुलभेदकराधम ।
स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाऽद्य यमक्षयम् ॥ ६ ॥

सत्यधर्मीया — मन्दात्मन्नल्पबुद्धे कुलभेदकरास्मत्कुलनाशक । बालानामितरेषामपि बुद्धिभेदकत्वादेवमुक्तिः । यमक्षयं यमगृहं त्वाऽद्य नेष्ये । यं अक्षयं नाशरहितं मनुषे तमपि यमक्षयं नेष्य इत्यावृत्त्याऽन्वयः ॥ ६ ॥

मन्दनन्दिनी — मच्छासनोद्धूतमतिक्रान्तशासनम् । त्वा त्वां यमक्षयं यमगृहम् ॥ ६ ॥

क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ।
तस्य मेऽभिहितं मूढ शासनं किंबलोऽत्यगाः ॥ ७ ॥

सत्यधर्मीया — किंबलः कस्य बलं यस्य स किंबलः किं बलं यस्य स इति वा । अत्यगा अतिक्रान्तवानसि । मूढ शासनमित्यव्यवधाननिर्देशेन मूढस्य शासनमिति समासलभ्यमर्थविशेषं हिरण्यकमौढ्यमान्तरङ्गिकं ध्वनयति । को बलमित्याद्यलपन्किंबल इति च वदन् किं को वा का वेति निर्णयाभावात्तदानुकूल्यं प्रश्नस्य द्योतयति ॥ ७ ॥

मन्दनन्दिनी — तस्य मे तेन मया । किं बलः को बलं यस्य सः । अत्यगा अतिक्रान्तः ॥ ७ ॥

प्रह्लाद उवाच–

न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषाम् ।
परावरेषां स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥

सत्यधर्मीया — पित्रा पृष्टः किं त्रस्तस्तथैव तस्थौ किं वा पलायित इत्यतः किंबल इत्यस्योत्तरं तस्मै ददावित्याह ॥ प्रल्हाद इति । केवलं मे भवतस्तव चेति द्वयोरेव स नारायणो बलमिति न । किं तु येन ये स्थिरजङ्गमाः स्थावराश्चराश्च ये भवता वशं न प्रणीतास्ते अमी ब्रह्मादयो वशं स्वाधीनतां प्रणीताः प्रापिताः । तेषां परावरेषां तरतमभावेन परे चावरे च तेषाम् । द्वन्द्वे सुडागम आर्षः । परैः सहिता अवरे इति , मध्यमपदलोपीवा समासः । परावरेऽमीति पाठे विभाषा जसीति सर्वनामकार्योपपत्तिः । बलिनां तत्त्वेनेतरसंमतानामपि बलं तत्प्रदः । बलमानन्द ओजश्च सहोऽज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्धिभोरित्यादिश्रुतिं बलमिन्द्रस्य गिरिशो गिरिशस्य बलं मरुत् । मरुतस्तु हरिः साक्षान्न हरेर्बलमन्यत् इत्यादिस्मृतिं च वैशब्दः सूचयति । पितरित्यनुक्त्वा राजन्निति वदन् राजवच्चन्द्रवत्क्षययोग्यतामव्यवधानेन सूचयामासेति मन्तव्यम् । दुरनुबंधकथने जिहीषया राजन्नित्युक्तिरिति वा । पितरित्याद्यनुबन्धबोधने जिहीषया राजन्निति वदन् शिक्षाध्यक्षतामभिप्रैतीति वा ॥ ८ ॥

मन्दनन्दिनी — किं बलः इत्यस्योत्तरमाह ॥ न केवलमिति ॥ परावरे उच्चावचाः । वशं स्वाधीनत्वम् । अनेन सर्वबलत्वमुपपादितम् ॥ ८ ॥

स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा ।
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥

सत्यधर्मीया — स्थाणुमन्ये प्रपद्यन्ते । कालाद्भवन्ति भूतानीत्यादेः कथं नारायणो बलमित्युच्यत इत्यतस्तत्तच्छब्दवाच्यः श्रीश एवेति तदेव देवस्य बलरूपत्वं व्यनक्ति ॥ स इति । स नारायण ईश्वरः शिवादिशब्दवाच्यः । कालः कल कामधेनुरित्युक्तेः कालान्तर्गतः कालशब्दवाच्यश्चापेक्षितसर्वदः । उरुक्रमः उरवः क्रमाः पादविक्षेपास्त्रयो यस्य सः । ओजःसहःसत्त्वबलेन्द्रियात्मा । ओजोऽवष्टंभसामर्थ्यं सहः सहनं सत्त्वं सत्ता स्वभावो वा । बलं चेन्द्रियाणि च तेषामात्मा स्वामी स नारायण एव । परमः स्वशक्तिभिः । कार्यत्रयानुगुण्येन बहुवचनम् । स्वेन शक्तिर्येषामिति प्रकृत्यादिभिर्वा । सृजत्यवत्यत्ति । कुत एतस्यैतत्त्रिककर्तृतेत्यत आह ॥ गुणत्रयेश इति । कार्यत्रिककारणगुणत्रिकस्वामितयोक्तोपपत्तिर्ज्ञेया ॥ ९ ॥

मन्दनन्दिनी — पूर्वार्धेन जगत्कर्तृत्वोपयोगिगुणपूर्णत्वमुक्तम् । द्वितीयार्धेन जगज्जन्मादिकर्तृत्वम् । स्वशक्तिभिः स्वरूपभूताभिः शक्तिभिर्विश्वं सृजतीत्यादि योजना ॥ ९ ॥

जह्यासुरं भावमिमं स्वमात्मनः समं मनो धत्स्व न सन्ति विद्विपः ।
ऋतेऽजितादात्मन उत्पथस्थितात् तद् विद्ध्यनन्तस्य महत् समर्हणम् ॥ १० ॥

सत्यधर्मीया — स्वं आत्मन आसुरं भावं भगवान्नास्ति सर्वस्वाम्यहमेवेत्यासुरम् । इममभिप्रायं मनो वा जहि त्यज । मनः सर्वत्र त्रायकः सन्वर्तते भगवानिति समं धत्स्व धर । तेन किमित्यत आह ॥ न सन्तीति । विद्विषो द्वेषिणो न सन्ति । मनः समं चेन्नारयः सन्तीति भावः । द्वेषादिमूलं मन एवेत्याह ॥ ऋत इति । अजितादस्वाधीनात् । अत एवोत्पथस्थितादुद्गतः पथ इत्युत्पथो विरुद्धनिश्चयस्तत्र स्थितात् । आत्मनो मनसस्तदादेः । ऋते विना मन आदेर्दुर्मार्गावस्थान एवैते विद्विष इति मतिर्नापरथेति तत्समं धत्स्व । तद्धारणेन विचार्यमाणे न केऽपि शत्रव इति भावः । ये समबुद्धित्वेन तव संमतास्तेषां देवानामपि युद्धोद्योगं परं चक्रुर्विबुधा दानवान् प्रतीत्यादिकं कथं घटत इत्यतस्तत्समत्वं तत्तद्योग्यताऽनतिरेकेणेति तत्फलमाह ॥ तदिति । अनन्तस्य नाशरहितस्य तत्तद्योग्यतामनतिहाय तन्मनोधारणं महत्समर्हणं महद्भिः क्रियमाणं पूजनं महच्छ्रेष्ठं समर्हणमिति वा विद्धि जानीहि । अस्थाने द्वेषादिकमेवं चेन्न भवति भगवद्द्वेषिषु तैरनिमिषैः क्रियमाणं युक्तमेवेति तत्तत्स्वभावानुसारि प्रल्हादवच इति भावः । यद्वा चतुराननलब्धवर इति नार्होऽनन्तसमर्हण इति न वदेत्यप्याह । विद्ध्यनन्तस्येति । विधिना सहितोऽनन्तः विध्यनन्तः । यद्वा महतो महत्तत्वाभिमानिनो ब्रह्मणः समर्हणं विद्धीत्यभिमन्यमानाभिमानिनोश्चैकत्वं शब्दव्यवहृतौ ''महतश्चतुर्मुखात्'' इत्यादिकमुदाहरणमिति न चेतः संकोचनीयम् ॥ १० ॥

मन्दनन्दिनी — त्याज्यं निषेधयति । कर्तव्यं च विधत्ते ॥ जहीति ॥ विद्विषां सत्वात्कथं समं मन इत्यत उत्पथस्थिताच्छास्त्रमार्गमतिक्रम्य स्थितादजितादात्मनो मनसो ऋते विद्वेषो न सन्तीत्युक्तम् । समर्हणं पूजाम् ॥ १० ॥

दस्यून् पुरं षण्णविजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥ ११ ॥

सत्यधर्मीया — ज्ञान्यज्ञानिमननमाह ॥ दस्यूनिति । एके त्वादृशाः षड् दस्यून् इन्द्रियाख्यषट्चोरान् न विजित्यापराभाव्य दश दिशो स्वजिताः स्वेन जिता मन्यन्ते । ते हि किं कुर्वन्तीति दस्युभूता इत्यत आह ॥ पुरमिति । पुरं शरीरं लुंपतो लुण्ठयतः तान् । ज्ञस्य जितात्मानो

मनोजयवतः समस्य समधियवतः साधोः । अनेन षडिन्द्रियजयोऽस्त्येषामिति द्योत्यते । देहिनां स्वमोहप्रभवा आत्मात्मीयमोहात्प्रभवन्तीति ते तथा । परे बाह्यशत्रवः कुतः स्युः । मोहादिरूप-कारणविरहादिति भावः । एके सन्तः पुरं लुंपतः षट् दस्यून् न विजित्य दशदिशः स्वजिताः सु अत्यन्तमजिता इति मन्यन्ते । आन्तरारिजयाभावे बाह्यशत्रुजयो दुःशक इत्याशयः । देहिनां तद्विषये समस्येति वा । अतः क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः । भ्रातृहेत्याद्यसंबद्धभाषणमिति तात्पर्यम् ।। ११ ।।

मन्दनन्दिनी — दशदिशो जिता इति भ्राम्यन्तमपहसति ।। दस्यूनिति ।। पुरं स्वदेहं लुम्पतो विनाशयतः षट् कामादीन् । मन आदीन्द्रियाणि वा । दस्यून् अविजित्वैव दशदिशः स्वजिता इत्येके मन्यन्ते । जितात्मनो जितमनस्कस्य देहिनां समस्य साधारणस्य साधोर्ज्ञस्य सज्जनस्य स्वमोहप्रभवाः परे शत्रवः कुत इति योजना । शत्रुत्वकल्पकमिथ्याज्ञानस्यैवाभावादिति भावः ।। ११ ।।

हिरण्यकशिपुरुवाच—

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लुता गिरः ।। १२ ।।

सत्यधर्मीया — त्वं व्यक्तं स्फुटम् । मर्तुकामो मर्तुं काम इच्छा यस्य स तथा । असि । तत्र तत्रमाह ।। य इति । अतिमात्रम् । अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरा इत्यमरः । भृशं विकत्थसे मद्वैरिणं श्लाघयसि । सामान्यतस्त्वादृशानामीदृशानां स्वभावोऽयमित्याह । मुमूर्षूणां तद्वदाशङ्कितानां विप्लुता अतलस्पृशो गिरो वचनानि स्युर्ननु निश्चयः । ननु न नुमः । हरीतरं कमपि न स्तुम इति विप्लुता गिरः इति वा ।। इंद्रावरुण नूनुवामित्यृग्भाष्यटीकयोः । अथवा ननुमोलोपः स्वातन्त्र्यार्थं हि सूत्रतः । नु नुमः । णुस्तुतौ स्तुमः । ननु कथमेतत् । मसूप्रत्ययादर्शनात् । धातुमात्रस्य च प्रयोगायोगात् । कारकालाभाच्चेत्यत आह ।। लोप इति । लोपः मसूप्रत्ययस्य । स्तुत्यादौ परमेश्वरस्यैव स्वातंत्र्यं न स्तोतुर्जीवस्येत्येतदर्थप्रतिपादनायेत्याद्युक्तेः ।। १२ ।।

मन्दनन्दिनी — अतिमात्रमत्यर्थम् । विकत्थसे विरुद्धं भाषसे । अतो मर्तुकाम इति जानामि । विशेषमुक्त्वा सामान्यमाह ।। मुमूर्षूणामिति ।। विप्लुता असम्बद्धाः ।। १२ ।।

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ।। १३ ।।

सत्यधर्मीया — कुतो ममालापस्य विप्लुततेत्यतः प्लुतस्वरेणेता इति कुमारमीरयति ॥ यस्त्विति । हे मन्दभाग्य दरिद्र दुर्दैव वा । मदन्यो मदितरो जगदीश्वरो यस्त्वयोक्तोऽसौ सः क्व । क्व वर्तत इति पृष्टः पित्रा पुत्रः प्राह ॥ स सर्वत्रेति । यदि सर्वत्र तर्हि कस्मात्कारणात् स्तंभे न नास्तीति पिता । तं सुतः प्रोवाच ॥ दृश्यत इति । एवमन्वये श्लोक उत्तानितो भवतीत्यनुत्तानदृग्भिः किं चोत्तरत्र गोपायेत्यादिकं च सुलग्नमन्यथाऽलग्नमिति चालोचनीयम् । न च प्रश्नोत्तरज्ञापकमत्र किमपि न वर्तत इति कथमेवं कथनमर्थस्येति वाच्यम् । यद्वोषालवणमित्यादि व्याकृत्यवसरे तत्वनिर्णयादौ कथमिति पिता लवणमिति पुत्रः इत्याद्युक्तेर्हे मन्दभाग्येत्यादेरेवैतद्रमकत्वान्नचित्रयितव्यं चेतः ॥ १३ ॥

सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाऽद्य यस्ते शरणमीप्सितः ॥ १४ ॥

सत्यधर्मीया — दृश्यत इत्युक्तमसहमान आह ॥ सोऽहमिति । योऽहं त्वया तिरस्कृतः सोऽहं विकत्थमानस्यासंबद्धं भाषमाणस्य ते शिरः शीर्षं कायाद्विशिष्टशरीराद्धराम्यपहरिष्यामि । वर्तमानसामीप्याद्वर्तमानव्यपदेश इति वा क्रियाप्रबंधे लडित्युक्तेरेष्यदर्थे लट् संभवतीति वोपपत्तिर्ज्ञेया । पदसंस्कारपक्षेतु अध्याहारादिना भविष्यत्कालिकसंहारस्यैव प्रतीतेरिति वा । विस्तरस्तु व्याख्यां करोमीत्यनुव्याख्यावर्तमानसामीप्ये वर्तमानवद्व्यपदेश इति सुधावाक्यार्थचन्द्रिकातोऽवसेयः । यः स सर्वत्रेति ते शरणं रक्षक इतीप्सितः कांक्षितः स हरिस्त्वा त्वामद्य गोपायेत गोपायेत् रक्षेत् । गुपू रक्षणे । गुपूधूपविच्छिपणिपनिभ्य आय इत्यादयः ॥ १४ ॥

मन्दनन्दिनी — स्वातिरिक्तेश्वरस्यानुपलम्भबाधमाह ॥ य इति । भगवतः शरणत्वे तर्कबाधमाह ॥ स इति ॥ १४ ॥

नारद उवाच–

एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना ॥ १५ ॥

सत्यधर्मीया — एवं पूर्वोक्तेन वध्यतामाश्वसौ पाप इत्यादिप्रकारेण दुरुक्तैरसदालापैर्मुहुः पुनः पुनः । रुषा कोपेन महाभागवतं सुतं महासुरोऽर्दयन्पीडयन् वरासनात्स्वोपविष्टादुत्पतितः कृतोड्डीनः खड्गं प्रगृह्य गृहीत्वा स्वमुष्टिनाऽतिबलः स्तंभं तताडाताडयत् । न च निस्तंभां बहुरम्यां च सभामिति कूर्माद्युक्ते कथं स्तंभ इत्युक्तिरिति वाच्यम् । शक्तिहेतुबन्धाद्यर्थं गृहासंगिनः स्तंभस्य राजसभायां संभावितत्वात् । कस्मात् स्तंभे न दृश्यत इति तेन पुरस्करणात् आदौ तत्सर्जनस्य संभवात् । ननु पदा

स्तंभं तताडाश्विति पुराणान्तरे स्पष्टमुक्तेरत्र मुष्टिनेति निष्टङ्कनं कथमिति चेन्न । सिंहस्यार्धं तनुं कृत्वा नरस्यार्धं तनुं तदा । नृसिंहवपुरव्यक्तो हिरण्यकशिपोः पुरः । आविर्बभूव सहसेत्यादिकूर्मपुराणे । भगवानपि देवेशो नारसिंहमथाकरोत् । स्तूयमानो मुनिगणैर्हिरण्यकशिपोः पुरम् । तत्र गत्वेत्यादि नृसिंहपुराणे । नारसिंहमनाधृष्यं देवदानवरक्षसाम् । हिरण्यकशिपोः स्थानं जगाम प्रभुरीश्वरः । नरस्य कृत्वाऽर्धतनुं सिंहस्यार्धतनुं प्रभुः । ततोऽपश्यत विस्तीर्णां दिव्यां रम्यां मनोरमाम् । सर्वकामयुतामित्यादि हरिवंशे । हिरण्यकशिपोः स्थानं जगाम हरिरीश्वरः । नरस्यार्धतनुं कृत्वा सिंहस्यार्धतनुं तथा । ततोऽपश्यत विस्तीर्णां हिरण्यकशिपोः सभामित्यादिमत्स्यपुराणादौ स्तंभताडनादेस्तदुद्भूतेश्चानुक्तत्वात्पदा वा मुष्टिना वेति तव चिन्ता दूरनिहितेति तस्य कल्पभेदसमाधेयते वाऽस्या अपि शान्तिसंभवात् । स्वमुष्टिना खड्गं प्रगृह्य तताड । पादेनेति शेषेणान्वेतुं शक्यमित्यवेहि । मुष्टिकुट्टनस्य अत्युत्कटपापत्वाभावात् सद्यः संहारादिर्नस्यात् अतः पदेति युक्तम् । अयुक्तं च मुष्टिताडने खड्गग्रहणम् । तथाहि रुक्मिणीशविजये यदा नृसिंहाकृतिराविरासीत्पदाहतात् स्तंभवराद्धि पूर्वम् । तदानु काश्ची सुषुवे मुकुन्दं स कस्य वीर्यादजनिष्टकाय इत्युक्तेरिति । स्तंभोद्भवस्तूदाहृत-सर्वस्वदुर्मिलोऽपि भगवतो जनवत्प्रसक्तजनननिरासाय यथा नृसिंहाकृतिराविरसीत्स्तंभादिति निदर्शनीय इति यथायथं तत्र तद्वाचकपदमध्याहृत्य विपश्चिद्भिर्योजना कर्तव्येति दिक् ।। १५ ।।

मन्दनन्दिनी — न केवलं दुरुक्तिमात्रं किन्तु दुरुद्योगं च चकारेत्याह ।। एवमिति ।। स्तम्भे न दृश्यत इत्युक्त्वान्तर्वर्तते चेदायात्वित्याशयेन मुष्टिना स्तम्भं तताडेति भावः ।। १५ ।।

तदैव तस्मिन् निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् ।
यं वै स्वधिष्ण्योपगतं ह्यजादयः श्रुत्वा स्वधामाप्ययमङ्ग मेनिरे ।। १६ ।।

सत्यधर्मीया — यदा तताड तदैव तस्मिन्स्तंभे स निनदो निनादः । शब्दो निनादनिनदध्वनिध्वानरवस्वना इत्यमरः । अतिभीषणोऽत्यन्तं भीषयति जनानित्यतिभीषणः । अत्यन्तं भीषणं यस्मात्स इति वा । बभूवोदभूत् । येन निनदेन अण्डकटाहं ब्रह्माण्डकटाहः । यद्यपि कटाहो घृतलेपादिपाकपात्रे च कूर्पर इति विश्वे कटाहशब्दः पुल्लिङ्गतया पठितस्तथापि लिङ्गमशिष्यमिति भाष्याद्युक्तेर्वा साक्षात्तत्त्वमेतस्य नास्ति किन्तु तत्त्वेनारोप इति विशेषं सूचयितुं नपुंसकतयोक्तिरिति ज्ञेयम् । अस्फुटत् स्फुटितमभूत् । तद्वदभादिति भावः । अजादयो ब्रह्माद्या यं निनदम् । स्वस्वधाम सत्यलोकादिकम् । उपगतं स्वोत्पन्नशब्दान्तरद्वारा प्राप्तं श्रुत्वा । स्वस्वधाम्नां स्वस्वागाराणां अप्ययं नाशं मेनिरे व्यजानन् । अङ्ग इष्टेति छान्दोग्यभाष्योक्तेः । हे धर्मेति शेषः । तदुद्भूतेनेत्थमूहितवन्त इति भावः ।। १६ ।।

मन्दनन्दिनी — तदैव तस्मिन्नेवाविर्भावद्योतकशब्दो बभूवेत्याह ॥ तदैवेति ॥ निनदो ध्वनिर्येन ध्वनिना । अस्फुटदभिनत् । निनदशब्देन प्रकृतस्य ध्वनेर्यच्छब्देन परामर्शात्तच्छब्दाभावो न दोषः । स्वधिष्ण्योपगतं स्वस्थानम् । सत्यलोकादिस्थानमुपागतम् । स्वधामाप्ययं स्वधामनाशकालं प्रलयकालमित्यर्थः । अजादय इत्यतद्गुणसंविज्ञानः । अजस्य भ्रांत्ययोगात् ॥ १६ ॥

अभिक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ।
अन्तः सभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥

सत्यधर्मीया — ये पूर्वं न वितत्रसुर्न भीतिमापुस्तेऽपि सुरारियूथपाः । येन निनदेन वितत्रसुर्भीता इत्यप्यन्वयः । अनेन नादेन हिरण्यकशिपुराप भीतिमिति बलिष्ठतां तात्कालिकीं तस्य द्योतयति । पुत्रवधेप्सुः पुत्रवधमीप्सुः । न लोकेति षष्ठीसमासनिषेधात् । ओजसा परिक्रमन्पादविक्षेपं कुर्वाणोऽपूर्वं कदाऽपि न श्रुतपूर्वमद्भुतं आश्चर्यवहं निर्ह्रादं ध्वनिं निशम्य श्रुत्वा तत्पदं तदाश्रयं अन्तः स्तंभांतः सभायां च न ददर्श नापश्यत् । सुराश्चारयस्तदरयो दैतेयाश्च तेषां यूथपा इति वा । पूर्वश्लोकशंसितधामाप्ययमननस्वारस्यात् ॥ १७ ॥

मन्दनन्दिनी — निर्ह्रादं ध्वनिम् । तत्पदं तस्य निर्ह्रादस्य पदं निमित्तम् । कर्तारमिति यावत् । येन निर्ह्रादेन वितत्रसुरुद्विग्नाऽभूवन् ॥ १७ ॥

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां नमृगं नमानुषम् ॥ १८ ॥

सत्यधर्मीया — निनादेन हननं हिरण्यकशिपोः सुशकं कर्तुं तथाऽपि स्वभृत्यवर्गगिरमृतीकर्तुं विलक्षणलक्षणं स्वस्वरूपमाविश्चकारेत्याह ॥ सत्यमिति । निजभृत्यभाषितं निजो भृत्य एकान्तभक्तः प्रह्लादस्तेन भाषितं स सर्वत्रेत्यादिरूपम् । निजेन स्वेनैव भृत्यौ जयविजयौ प्रति भाषितं मयैव वध्यौ भवतं त्रिजन्मस्वित्यादिकमिति वा । प्रह्लादोऽप्यैहिककामुक इति किं तद्वचनं न कार्यं कुतः सत्यं वचनमित्यतो न तथा स इत्यप्याह ॥ निजभृत्येति । निजभृत्यै स्वपोषायाभाषितं न भाषितम् । निरुपधीति यावत् । निजभृत्याः सनकादयस्तैर्भाषितं दुर्जन्मत्रिकसंपत्त्यनन्तरं मुक्तौ भवत इति संहारं विहाय यत्संपत्तिर्न भवतीति तद्दतं कर्तुमिति वा । निजस्य स्वकीयस्य ब्रह्मणो भृत्यो हिरण्यकस्तद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो । नान्तर्बहिर्न नरैर्मृगैरित्यादिकं वा । तद्विषये च तथाऽस्त्विति निजभृत्येन ब्रह्मणा भाषितमिति वा । नूनमेतद्विरोधेन मृत्युर्मे भविता ध्रुवमिति स्वविषये तथा पुत्रविषये गोपायेतेति निजभृत्यभाषितमिति वा । भृत्यानां विषये भाषितं निजेन स्वेनैव यत्तत्तथा न

मे भक्तः प्रणश्यति । प्रियो हि ज्ञानिनोऽत्यर्थम् । योगक्षेमं वहाम्यहमित्यादिकमिति वा । अयमकुतश्चिद्भयोऽमर इति निजभृत्यप्रह्लादविषये निजभृत्येन नारदेन भाषितमिति । निजेन स्वेन भृत्यैर्दासैर्भाषितं च तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । मां रक्षतु विभुर्नित्यमित्यादिभाषितं वा । निजे स्वविषये भृत्यैर्भाषितं न शुक्लरक्तप्रभवोऽस्य देह इत्यादिकं वा । सत्यं यथार्थं विधातुं कर्तुम् । अखिलेष्वसंकुचितेषु भूतेषु चराचरेष्वात्मन आततत्वेनात्मशब्दवाच्यस्य स्वस्य व्याप्तिं सत्यमिति विपरिणतं सदन्वेति । विधातुं चात्यद्भुतरूपं धातुर्वरऋतीकरणकारणत्वादत्याश्चर्यावहम् । उद्वहन्नित्यनेन लीलामूलतां कलेवरस्य द्योतयति । कीदृगित्यत ईदृगित्याह । नमृगं नमानुषमिति । न विद्यते मृगस्तदाकारः । सर्वं वाक्यं सावधारणमितीरणात्स एव यस्य तन्न मृगं न मानुषमिति तद्वत् । कुत्रादृश्यतेत्यत आह ।। सभायामिति । तत्रापि स्तंभे तत्समाहृतं इति भावः ।। १८ ।।

मन्दनन्दिनी — तदैव तत्रैव । प्रादुर्भावे प्रयोजनद्वयमाह ।। सत्यमिति ।। निजभृत्यभाषितं सत्यं विधातुं व्याप्तिं च दर्शयितुं सभायां विद्यमाने स्तम्भे । नमृगं नमानुषमिति नसमासः ।। १८ ।।

ससत्त्वमेवं परितो विपश्यन् स्तम्भस्य मध्यादनु निर्जिहानम् ।
नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ।। १९ ।।

सत्यधर्मीया — स हिरण्यकशिपुः परितः सर्वत्र स्तंभस्य मध्यात् । अनु निर्जिहानं बहिरागच्छत् । सत्त्वं जन्तुविशेषम् । विपश्यन्विलोकयन् । अयं दृश्यमानः पदार्थो मृगः स एव न नरः स एव न अपि तु नृमृगेन्द्ररूपम् । अविचित्रं चित्रा माया सा विगता यस्मात्तद्विचित्रं तन्न भवतीत्यविचित्रं मायिकम् । अहो आश्चर्यम् । चित्रा मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियामित्यमरसुधायां चित्रभानुपदार्थवर्णन-कालिकचित्रपदार्थः । चित्रं भद्रमित्यादिऋग्भाष्योक्तोऽनुसंधेयः । उभयसमाहारसहितमेतत्किमिति विचचारेति शेषः । सत्त्वं प्राणिषु जन्तुष्विति विश्वः । ससत्त्वं सबलमिति वा । सत्त्वं बले चेति तत्रैवोक्तेः । अनु प्रदर्शनानन्तरम् । निर्जिहानमागच्छन्तं पदार्थम् । अयमित्यादिकमादिवत् । ओहाङ् गतावित्यतो लटः शानचि श्लाविति द्वित्वे ह्रस्व इत्यभ्यासस्य ह्रस्वे कुहोश्चुरित्यभ्यासस्य चुत्वेन जेभृञामितीत्वे इति रूपम् ।। १९ ।।

मन्दनन्दिनी — स हिरण्यकशिपुः । एवं भूतं सत्त्वं प्राणिनं परितो विमृशन् निर्जिहानमुद्गच्छत् । ओहाङ् गतौ । किमेतदिति मीमांसं चक्र इति शेषः ।। १९ ।।

मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ।। २० ।।

सत्यधर्मीया — एवं मीमांसमानस्य विचारयतो हिरण्यकस्याग्रतोऽग्रे नृसिंहरूपो हरिः समुत्थित उत्तस्थौ । तत् उक्तरूपविशेषणं रूपमिति तत्परामर्शः । अलमत्यन्तं भयानकं भयमानयतीति तथा भीतिप्रापकम् । प्रतप्तचामीकरं निष्टापितमष्टापदम् । चमीकरं जातरूपं महारजतकाञ्चने । रुक्मं कार्तस्वरं जांबूनदमष्टापदे स्त्रियामित्यमरः । कार्तस्वरेति पाठे कृतुस्वराख्या करे भवमिति कार्तस्वरम् । अणन्तः शब्दः । तद्वच्चण्डानि चाकचक्येनावलोकितुमशक्यानि लोचनानि यस्य तत् । त्र्यक्षमित्युक्तेः । हिरण्याक्षः सविता देव आगादिति श्रुतेः । स्फुरत्सटाकेसरजृंभिताननं स्फुरंत्यः प्रकाशमानाः सटा जटाः । सटा जटाकेसरयोरिति विश्वः । तत्रापि स्कंधगता ज्ञेयाः । केसरशब्दोऽपि सिंहसटायामिति तत्रैवोक्तेस्तद्व्यतिरिक्तकर्णादिगतरोमविशेषपरो ज्ञेयः । ते पुमांस्त्रियेत्येकशेषः । यस्य तच्च तज्जृभितं व्यात्तमाननं वक्त्रं यस्य तत् ।। २० ।।

मन्दनन्दिनी — उद्वहन्निति शेषः । तथा च नृसिंहरूपमुद्वहन् मीमांसमानस्य हिरण्यकशिपोरग्रतः समुत्थित इति योजना । द्वितीयान्तानां नृसिंहरूपविशेषणत्वम् । प्रतप्तचामीकरे निष्टप्तसुवर्णसदृशे चण्डे क्रूरे लोचने यस्य तत् । स्फुरन्ति सटाकेसराणि ग्रीवस्थतीक्ष्णरोमविशेषा यस्य तत् । जृम्भणयुक्तमाननं यस्य तत् । स्फुरत्सटाकेसरं च तज्जृम्भिताननं चेति विशेषणद्वयस्य कर्मधारयः ।। २० ।।

करालदंष्ट्रं करवालचञ्चलं क्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ।। २१ ।।

सत्यधर्मीया — तदेव देवदेवस्वरूपं निरूपयति कैश्चित्पद्यैः । कराले क्रूरे । करालो दन्तुरे तुङ्गे करालं तु कठोरक इति विश्वः । दंष्ट्रे यस्य तत् । करवालः खड्गः । खड्गे तु कौक्षेयको मण्डलाग्रो करवालः कृपाणवदित्यमरः । तद्वच्चञ्चला । क्षुरः छूरिकादि छेदनद्रव्यम् । क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुर इति विश्वः । तस्य अन्तः प्रान्तभागस्तद्वद्विद्यमाना जिव्हा रसज्ञा यस्य तत् । भ्रुकुटी भ्रूग्रन्थिः । तन्मुखं तदादिभागस्तेनोल्बणं क्रूरम् । स्तब्धावप्रवणावूर्ध्वावूर्ध्वतनीकृतौ कर्णौ यस्य तत्तथा । गिरेः पर्वतस्य कन्दरवद्विवरवत् । कन्दरो विवर इति विश्वः । अद्भुते मूलानवलोकनेन व्यात्तं आस्यं नासा नासिका च ते यस्य तत्तथा । हनुः कपोलावयव इति विश्वाद्धनोः कपोलावयवस्य भेदो विदारण इति विश्वाद्विदारणं विस्तारणं तेन भीषणं भयङ्करम् ।। २१ ।।

मन्दनन्दिनी — कराला भयङ्करा दंष्ट्रा यस्य तत् । करवालश्चन्द्रहासः । उभयतो धारोपेतः खड्गविशेषः । चञ्चलः क्षुरान्तः क्षुरधारा यस्यांश्चंचलक्षुरान्ता करवालवच्चञ्चलक्षुरान्ता तादृशी जिह्वा यस्य तत् । भ्रुकुटीयुक्तमुखं भ्रुकुटीमुखम् । तादृशमुखेनोल्बणं भयङ्करम् । स्तब्धोर्ध्वकर्णं

स्तब्धावचश्चलावूर्ध्वाग्रे कर्णौ यस्य तत् । गिरिकन्दरवदद्भुते व्यात्ते विवृते आस्यनासे । नासापदं नासापुटपरम् । यस्य तत् । हनुभेदेन दीर्घचुबुकविशेषेणभीषणं भयङ्करम् ॥ २१ ॥

दिवि स्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षः स्थलमल्पमध्यमम् ।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विश्वग्भुजानीकशतैर्नखायुधैः ॥ २२ ॥

सत्यधर्मीया — दिवि स्पृशत्कायम् । दिवीति विभक्तिप्रतिरूपकमव्ययम् । दिवं स्पृशन् अंबरचुंबी कायः शरीरं यस्य । दिवीति सप्तम्या । हृद्युभ्यां चेति अलुगिति च केचित् । अदीर्घपीवरग्रीवोरुवक्षस्थलं अदीर्घं पीवरं पुष्टं ग्रीवा च गलश्चोरूचौत्सङ्गौ च वक्षस्थलमुरस्थलं च तद्यस्येति विग्रहः । अल्पमध्यमं तनूदरम् । अनुक्तकटिं वा । छित्वरेत्यादिनिपातितः पीवरशब्दः पुष्टवाची यथाविशेष्य प्रयोज्यः । पीवरः कच्छपे स्थूल इति विश्वः । मध्यान्म इति मध्यशब्दान्मे कृते मध्यम इति ज्ञेयम् । चन्द्रांशुगौरैश्चन्द्रस्यांशवः किरणास्तद्वद्गौरैः श्वेतैः । चन्द्रस्य सुवर्णस्य । चन्द्रः सुधांशुकर्पूरंपिल्लस्वर्ण-वारिष्विति विश्वः । अंशवो लेशाः सूत्ररूपास्तद्वद्गौरैः पीतैः । गौरः पीतेऽरुणे श्वेत इति विश्वः । चन्द्रश्चांशुः सूर्यश्च ताविव गौरैः श्वेतैररुणैश्चेति वा । अंशुर्लेशेरवौ रश्माविति विश्वः । आकारद्वयानु-रूप्येण तनूरुहद्वैराश्यस्य युक्तता ज्ञेया । तनूरुहै रोमभिः छुरितं व्याप्तम् । विष्वग्भुजा-नीकशतैश्छुरितमित्यन्वयः । विष्वगिति नानार्थको निपातः । ऋत्विगादिना क्विप् । विषु अञ्चतीति विष्वञ्चः । ते च ते भुजाश्च तेषामनीकशतानि । अनेकशब्दपर्यायोऽनीकशब्दः । तेषामनेकेषां शतानि तैः । द्व्याद्यनन्तातबाहुक इत्यादेः। अनीकानां रणानां शतानि यैस्ते । विशेषणस्य परनिपातः । विष्वग्भुजाश्च तेऽनीकशताश्च तैर्विष्वग्भुजानीकशतानि । बहुसैन्यानि तैः । अनीकं तु रणे सैन्ये व्यलीक इति विश्वः । भीतिहेतोर्हिरण्यक एवं व्यञ्जनादिति वा । नखायुधं नखा एवायुधानि यस्य तत् ॥ २२ ॥

मन्दनन्दिनी — दिवि स्पृशत्कायं स्वर्गपर्यन्तं व्याप्तदेहम् । दिवि स्पृशच्छब्दस्य संज्ञत्वात् हलंतात् संज्ञायामित्यलुक् । अदीर्घा पीवरा ग्रीवा यस्य तत् । उरु विशालं वक्षस्थले यस्य तत् । अदीर्घपीवरग्रीवं च तत् । उरु वक्षस्थलं च । अल्पं मध्यमं यस्य तत् । चन्द्रांशुगौरैश्चन्द्रकलाधवलैः । तनूरुहैश्छुरितं मिश्रितं विष्वक् व्याप्तं भुजानीकं भुजलक्षणसैन्यं तद्भटकशतैर्युक्तम् । नखा एवायुधानि यस्य तत् ॥ २२ ॥

दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ।
प्रायेण मेऽयं हरिणौरसारिणा वधः स्मृतोऽनेन समुद्यतस्य किम् ॥ २३ ॥

सत्यधर्मीया — दुरासदमशक्यप्राप्ति । सर्वाणि निजानि स्वरूपभूतानि इतराणि तद्भिन्नाः चक्राद्याः आयुधप्रवेकास्तच्छ्रेष्ठास्तैर्विद्राविता दैत्यदानवा येन तत् । निजाः स्वरूपभूता इतरे तद्भिन्नाश्चक्राद्यायुधप्रवेका इत्यर्थस्तु न युक्तः । भूषणायुधलिङ्गाख्या धत्त इत्येतत्तात्पर्ये भूषाहेति ध्वजेष्वज इति तदन्तस्थत्वेनैव तदाख्याधारणोक्तेः । अन्यथा तदात्मत्वादेव तच्छब्दवाच्यत्वस्य सुवचत्वात् । ''सुदर्शनाद्यायुधानि पृथ्वाद्याश्चक्रवर्तिनः । इत्याद्या विष्णुनाविष्टा भिन्नाः संसारिणो हरे''रिति गीतातात्पर्ये च स्पष्टभेदस्योक्तत्वात् । तस्माच्चक्रादयो भगवता भिन्ना एव । ननु तर्हि चक्री हरिरिति कथम् । तत्संयोगवत्त्वादेवेति ब्रूमः । न च चक्रविनाशे तत्संयोगत्वमप्यसंभावितमिति वाच्यम् । चक्रं विनाऽपि तत्संयोगस्य शक्त्यात्मनावस्थानोररीकरणादिति सत्तत्त्वरत्नमालायामुक्तम् । अर्थादयमेवार्थो बिभ्रद्रापिं हिरण्मयमिति ऋग्भाष्यटीकाटिप्पणीषूक्तः । मीमांसमानस्याग्रत समुत्थित इति पूर्वेणान्वयः । भीकराकारनिरीक्षणेनेत्थमूहितवानित्याह ।। प्रायेणेति । समुद्यतस्य युद्धसन्नद्धस्य मे यो वधः स्मृतः । जातस्य हि ध्रुवो मृत्युरिति स्मृतः । औरसारिणा सहजवैरिणा । औरसो मत्पुत्रस्तेन तन्निमित्तेनारिर्द्वेषीति वा तेन । अनेन हरिणा प्रायेण बहुशोऽयमेव किम् ।। २३ ।।

मन्दनन्दिनी — सर्वाणि निजानि स्वीयानि नखेभ्य इतरायुधप्रवेकाणि चक्रादीनि तैर्विद्राविता दैत्यदानवा येन तत् ।। एतादृशं रूपं दृष्ट्वा हिरण्यकशिपोर्जातां शङ्कामाह ।। प्रायेणेति । समुद्यतस्य पुत्रवधे उद्युक्तस्य मे औरसारिणा सहजशत्रुणा हरिणा प्रायेणायं भविष्यद्वधः स्मृतश्चिंतितः किमिति योजना ।। २३ ।।

एवं ब्रुवंस्त्वभ्यपतद् गदायुधो नदन् नृसिंहं प्रति दैत्यकुञ्जरः ।
अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तथा ।। २४ ।।

सत्यधर्मीया — एवमिति विमृश्य विचार्य गदायुधो नदन् दैत्यकुञ्जरो नृसिंहं प्रत्यभ्यपतत् । सिंहो यद्यपि करिमारक इति निरूपितमिदं निदर्शनमनुरूपं तथाऽपि गजभञ्जने तनीयान्वायासः संभावितः सोऽप्यत्रासंभावित इत्यस्वारस्याद्वा समृगेन्द्रोऽयं गजेन्द्रश्चेदसामानाधिकरण्येऽपि स्वाप्निकतद्दर्शनमृतिवन्मृतिरस्य स्यादिति अस्वारस्यान्निदर्शनान्तरमीरयति ।। यथेति । अलक्षितो न विद्यते लक्षितं दीर्घदर्शनं यस्य स तथा । लक्षदर्शनाङ्कनयोरिति स्मरणात् । भावे क्तः । अग्नौ पतितः शब्दोऽपि निपातितः । अर्थश्च निपतित इति । पतङ्गमः शलभः । पतङ्ग इत्यपि कचित्पाठः सरलश्च । एकाक्षरन्यूनतादोषापेक्षया पतङ्गमपाठे पतङ्गः शलभे शालिप्रभेदे विहगे रवाविति विश्वोक्तेर्विहङ्गमशब्दवदनुशासनादर्शनादेतत्पर्यायताकल्पनदोषस्य ज्यायस्त्वादिति केचित् । तथा नृसिंहोजसि सोऽसुरोऽलक्षितोऽभ्यपतदित्यन्वयः ।। २४ ।।

मन्दनन्दिनी — एवमाशङ्क्य पलायितः किं नेत्याह ।। एवमिति ।। मनसि विद्यमानमेव ब्रुवन् गदायुधो दैत्यकुञ्जरो दैत्यश्रेष्ठो नदन् सोऽसुरः । अलक्षितः साहसिकः । पतङ्गमः शलभोऽग्नौ यथा पतितो भवति तथा नृसिंहोजसि अभ्यपतदिति योजना । अथवा । पतनानन्तरं पतङ्गमोऽग्नौ पतितोऽलक्षितो दृश्यमानो न भवति । तथा सोऽसुरो नृसिंहोजसि पतितोऽलक्षितो दृश्यमानो नाभूदिति योजना ।। २४ ।।

न तद् विचित्रं खलु सत्वधामनि स्वतेजसांऽशेन पुराऽपिबत् तमः ।
ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया ।। २५ ।।

सत्यधर्मीया — जगज्जयिनो हिरण्यकशिपोर्नृसिंहौजसि कलभशलभनिभतावर्णनमाकर्णन-विश्वसनीयं न किन्तु समसमरे किञ्चिच्छंकितातंकं तनुयाद्दनुज इत्यत इयंदनयवृत्तिर्यत्तमोमूलिका तद्दुरवस्थैतादृशी कथा का तत्स्वभावानामेतदादीनामित्याह ।। न तद्विचित्रमिति । तस्मिन्सत्त्वधामनि बलज्ञानसमाहृततनौ । बलमूर्तौ बलाद्याश्रये वा । तत् दितिजशलभीभवनादि न विचित्रमद्भुतं न भवति । योंऽशेन पुरुषरूपेण स्वतेजसा स्वसामर्थ्येन स्वप्रकाशेन वा करणेन । पुरा जगदुदयात्पूर्वं तमो दुर्गाभिमन्यमानं प्रलयकालीनं खलु निषिध्य तुच्छीकृत्येति यावत् । खलु निषेधने चेति विश्वः । अपिबत्। योऽन्विति क्वचित् पाठः न यच्छब्दाध्याहारस्तत्रौजस एव भगवदात्मकस्य साक्षात्तत्क्षयहेतुतालाभलाभश्चेति सुन्दरः । तदसुरसमसमरकरणेन तं लोके लोकेश्वरः शाश्वतिकं यश आसादयितुं लीलां काञ्चन लालयामासेत्यभिधत्ते कैश्चित्पद्यैः ।। तत इति । अभिपद्य समासाद्य । ततः सार्वविभक्तिकस्तसिः । तमभिपद्येति । तेन ल्यपैव हननस्यानन्तर्यलाभे तत इति व्यर्थमिति शङ्कानिरासः । पक्षान्तरेतु तत इति सुलग्नम् । अहनत् अभ्यहन् । उरुर्वेगः स्वकीयो यस्यां सा तया ।
।। २५ ।।

मन्दनन्दिनी — निनदेन ब्रह्माण्डकटाहभेदनमारभ्यैतत्पर्यन्तं वर्णितं माहात्म्यमसम्भावितमित्यतो नेत्याह ।। न तदिति ।। यो भगवान्प्रलयकाले व्याप्तं तमः सृष्टिकाले स्वतेजसा पुराऽपिबत् । तस्मिन्सत्त्वधामन्यपरिमेयपराक्रमशालिनि तद्वर्णितं माहात्म्यं न विचित्रमिति योजना । तर्हि सद्यो नाशितः किमित्यतो भगवाननेन चिक्रीड इत्याशयेनाह ।। तत इति ।। अभ्यहनत् । विकरणव्यत्ययः ।।
।। २५ ।।

तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत् ।
स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ।। २६ ।।

सत्यधर्मीया — गदाधरः कौमोदकीधरो विक्रमंतं विक्रामन्तम् । विविधक्रमवदाचरन्तमिति वा पादविक्षेपं कुर्वंतम् । सगदं गदाधरं तार्क्ष्यसुतः कश्यपतनुजो गरुडो यथा महोरगं महाहिं गृह्णाति तथाऽग्रहीत् । तदा विक्रीडत इति हस्तादिति चोत्कलित इति च दृष्टान्तदार्ष्टांतिकोभयान्वयि । विक्रीडतो गरुत्मतो गरुतः पक्षाः संत्यस्य । मतुप् । यवादित्वात् झय इति न वत्वम् । तसौ मत्वर्थ इति भत्वाज्जस्त्वाभावः । गरुडस्य हस्तादहिर्यद्वदुत्कलितो भवति तद्वत्तस्य विक्रीडतो नृसिंहस्य हस्तात्सोऽसुर उत्कलितो गलितो बभूव ॥ २६ ॥

मन्दनन्दिनी — तार्क्ष्यसुतो महोरगं यथा गृह्णाति तथा गदाधरो नृसिंहस्तं विक्रमन्तमग्रहीदिति योजना । चिक्रीडतो गरुत्मतोऽहिर्यद्वद्विक्रीडतस्तस्य नृसिंहस्य सोऽसुरो हस्तोत्कलितो हस्तादुच्चलित इति योजना । विक्रीडत इत्यनेनोच्चलने क्रीडेव निमित्तं न त्वसामर्थ्यमित्युक्तं भवति ॥ २६ ॥

असाध्वमन्यन्त हतौजसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः ।
तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः ॥ २७ ॥

सत्यधर्मीया — हस्तमुक्तो यस्य हस्तान्मुक्तो गलितो तं नृहरिं महासुरो यद्यतो निजवीर्यशङ्कितं निजपराक्रमसंशयग्रस्तं मन्यमानोऽभूत्तस्माद्घनच्छदा घनाः छदा अपवारका येषां ते तथा । सर्वधिष्ण्यपाश्चन्द्रादयो यथा तथाऽमरा इतरे । हतौजस इत्यसाधु अमन्यन्त व्यजानन् । यद्वा घनच्छदा घनेन छदाः छादनं येषां ते । येन स्वेन घनच्छदा इव । सर्वधिष्ण्यपा अमरा हतौजसः सन्तः स्वजीवनमसाधु नास्मन्मङ्गलमिति प्रागमन्यन्त । सोऽसुरो यद्धस्तान्मुक्तस्तं नृहरिं निजवीर्यशङ्कितं मन्यमानोऽभूदित्यन्वयो वा । अनेन वरवितरणेन सांप्रतं विश्वेश्वराश्वासितानां पामराणामिवामराणां मननमेवं न सुघटमिति मन्दा शङ्का विधुतेति ज्ञेयम् । हतौकस इत्यपि पठन्ति । हतान्योकांसि येषां ते तथेति तत्रार्थः ॥ २७ ॥

मन्दनन्दिनी — भगवत्क्रीडायाश्छिन्नभक्तसंशयजननमसुराणां मोहजननं च प्रयोजनमित्याशयेनाह ॥ असाध्विति ॥ सर्वधिष्ण्यपाः । धिष्ण्यं स्थानम् । घनच्छदा मेघावृता हतौजसो हतमुखकान्तयोऽमरा हस्तोच्चलनमसाध्वमन्यन्त । पुनः कथं हस्तगृहीतो भवेदिति चिन्तयेति भावः । यद्यस्माद्धस्तमुक्तो महासुरोऽतस्तं नृहरिं निजवीर्यशङ्कितं स्वसामर्थ्येन भीतं मन्यमानोऽभूत् । असुरस्य नृसिंहे स्वनिग्रहासामर्थ्यभ्रान्तिरभूदिति भावः ॥ २७ ॥

पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन गतश्रमो मृधे ।
तं श्येनवेगं शतचन्द्रवर्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः ॥ २८ ॥

सत्यधर्मीया — गतश्रमो मृधे युद्धे खड्गचर्मणी प्रगृह्य यद्धस्ताद्विस्रस्तस्तं पुनरसज्जत सन्नतोऽभूत्। तत्रापि न मांथर्यमित्याह ॥ वेगेनेति। तं श्येनवेगं श्येनस्य श्येनपक्षिण इव वेगो यस्य स तम्। शतचन्द्रचर्मभिः। शतचन्द्रशब्दः खड्गचर्मणीति पूर्वमुक्तेः खड्गपरः। चर्मण एकत्वेन तद्भ्रमणचातुरीतोऽनेकीभूय भानेन वा दितिः पाशानितिवदवयवबाहुविध्येन वा बहुवचनोपपत्तिर्ज्ञेया। शतं च ते चन्द्राश्च चर्मोपरि निविष्टाश्च चर्म च तैरिति। शतचन्द्राश्चर्म च चरतानेन सहचरन्तीवेत्येवमुक्तिरिति। शतचन्द्रः खड्गः। चर्मणी पार्श्वद्वंद्वधृते द्वे च शतचन्द्रचर्मणीति वा। न च खड्गचर्मणीति बाधेतेति वाच्यम्। खड्गेन सहिते च ते चर्मणी चेत्युत्तरपद-लोपसमासेनाबाधोपपत्तेः। तैः सह उपर्यधश्च निच्छिद्रं यथा तथा चरन्तम्। अथवा शतचन्द्रचर्मभिर्बहुबाहुगतैः सहितो हरिर्जगृह इत्यन्वयः। न च तत्कृत्यं न दृश्यत इत्यनावश्यकतयाऽवचनीयता तस्येति वाच्यम्। इयं शङ्का बाहुबाहुविध्यविषयेऽपि बहुश्लिष्टेति तत्रैव किं नाप्राक्षीः। विचारयतो मम स्वभाविकीयमुक्तिरिति मयैव समाधिरभूदित्यप्रश्न इति तु तुल्यम् ॥ २८ ॥

मन्दनन्दिनी — स्ववीर्यभ्रांत्यैव पुनरापदसुर इत्याह ॥ पुनरिति ॥ शतचन्द्रवर्त्मभिश्चर्मगृहीतवतः परत्वं च न मार्गा यैस्तैः। अच्छिद्रं परप्रवेशो यथा न भवति तथा। उपर्यधः सञ्चरन्तं श्येनवेगं हरिर्जगृह इति वक्ष्यमाणेनान्वयः ॥ २८ ॥

कृत्वाऽट्टहासं खरकेसरोल्बणो निमीलिताक्षं जगृहे महाजवः।
विष्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम् ॥ २९ ॥

सत्यधर्मीया — अट्टहासमारभटीं कृत्वा खरकेसरोल्बणो महाजवो विष्वक् सर्वत्राञ्चतीति तथा स चासौ स्फुरंश्च तं प्रकाशमानम्। ग्रहणातुरं ग्रहणेन भविष्यताऽऽतुरं व्यथायुक्तं कुलिशाक्षतत्वचं कुलिशेन प्रागिन्द्रसमरे वज्रेणाप्यक्षता त्वक् चर्म यस्य तम्। निमीलिताक्षम्। हिरण्याक्षस्य मम भ्रातुर्हननं जातमतो हिरण्याक्षश्रीनृसिंहविषये किं नेत्रोन्मीलनेनेति वा श्रमेणेति वा निमीलिताक्षत्वं ज्ञेयम्। यथा व्यालः सर्प आखुं मूषकं गृह्णाति तथा। अहरिः न केवलं हरिः, सिंह एव नेत्यहरिः। (एवं व्याख्यानेन ''ग्रहणातुरोऽहरिः'' इति पाठः स्याद्वा। तदा ग्रहणातुर इत्यस्य कोऽर्थः स्यात्? विमृशन्तु सुधियः) हरिर्जगृह इत्यखण्डान्वयः। व्यालो भुजङ्गमे क्रूरे। कुलिशो मत्स्यभेदे स्याद्दंभोलौ। उंदरुर्मूषकोऽप्याखुरिति विश्वामरौ ॥ २९ ॥

मन्दनन्दिनी — उत्स्वनोल्बणं पुनः पुनरुद्गतस्वनेनोल्बणं भयङ्करमट्टहासं स्वरं कृत्वा तद्भयेन निमीलिताक्षं विष्वक् स्फुरन्तं परितश्चलन्तं ग्रहणातुरं कुलिशेन वज्रेणाक्षतत्वचं महाजवः सन्हरिः। आखुं मूषकं हरिर्यथा तद्वज्जगृह इति योजना ॥ २९ ॥

द्वार्यूरवापात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ।
संरम्भदुष्प्रेक्ष्यकरालललोचनो व्यात्ताननान्तं विलिहन् स्वजिह्वया ॥ ३० ॥

सत्यधर्मीया — विरिञ्चवरं च मानयितुमाननादिग्रहणमिव कालस्थलाद्यानुकूल्यविलोकनेनापि तमानयदित्याह ॥ द्वारीति । नांतर्न बहिरित्युक्तत्वात्तथाविधे द्वारि वास्तुकाष्ठे । भ्वादिनिषेधात्तद्भिन्ने उरावित्युदीरणम् । उत्सङ्ग आपात्य पातयित्वा । ऊरावापात्येति भाव्ये तस्यैव नास्ति वृद्धिरिति ज्ञापयितुमवृद्धिमन्निर्देशः । सुनायासेन विदारणमित्युदीरयति ॥ लीलयेति । यथा गरुडो महाविषमहिं दारयति तथा नखैर्ददार । सिंहस्येव तत्कालप्रदर्शितकोपस्वभावमप्यावेदयति ॥ संरंभेति । संरंभेण कोपेन दुःप्रेक्ष्ये कराले लोचने यस्य सः । करालानि लोचनानि यस्य स इति वा । व्यात्ताननान्तम् । व्यात्तं व्यादितमाननं तस्यान्तोऽधरोष्ठस्तम् जिव्हया विलिहन् । अहन्नित्युत्तरेणान्वयः ॥ ३० ॥

मन्दनन्दिनी — ब्रह्मवररक्षणासुरवरशिक्षणचातुर्यमाह ॥ द्वारीति ॥ द्वारीति रेफान्तम् । अनेन नान्तर्बहिरिति । ऊरावित्यनेन न भूमौ नाम्बर इति । नखैरित्यनेन नायुधैरिति । वरो रक्षितः । संध्यायामिति च वक्तव्यम् । तेन न दिवा न नक्तमिति वरः । नृसिंहो हरिरित्यनुवृत्त्य न नरैर्न मृगैरपीति । न त्वद्विसृष्टेभ्यः इति । न व्यसुभिरसुमद्भिर्वेति वराः संरक्षिता इति ज्ञेयम् । नृसिंहस्य केवलं नरत्वाद्यभावात् । ब्रह्मसृष्टृत्वाभावाच्च । स्थिलावद्व्यसुत्वाभावात् । प्राणिवद्वायुविकारासुमत्वाभावाच्च । विवृताननान्तं कपोलद्वयं जिह्वया विलिहन् आस्वादयन् हिरण्यकशिपुं ददारेति योजना ॥ ३० ॥

असृग्लवाक्तारुणकेसराननो यथाऽऽन्त्रमाली द्विपहत्यया हरिः ।
नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ॥ ३१ ॥

सत्यधर्मीया — असृग्वलै रक्तबिंदुभिराक्तानि रूषितान्यत एवारुणानि केसराश्चाननं च तानि यस्य सः । द्विपहत्यया करिमारणेन । वदः सुपि क्यप् चेति क्यपि हनस्तचेति तोंऽतादेशः । हरिः सिंहो यथांऽत्रमाली अंत्राणां पुरीतताम् । अमिचमीति चन् । अंत्रं पुरीतदित्यमरः । माला साऽस्तीति तथांऽत्रमाली । शिखादिः । नरवांकुरोत्पाटितहृत्सरोरुहं नखा एवांकुरा नवोद्भिदस्तैरुत्पाटितं हृत्सरोरुहं यस्य तम् । मृतमारणेन रणे किमिति मतिमान्विसृज्य तस्यानुचरान्भृत्यान् अहन् हतवान् । तांश्चैकान्ते निलीलान् लक्ष्मीकान्तः कथं धर्ममर्मज्ञो जघानेत्यत आह । उदायुधान् । उद्धतान्यायुधानि येषां ते तथा तानिति । वसाक्तानितिपाठे वसा वपा । हृन्मेदस्तु वपा वसेत्यमरः ॥ ३१ ॥

मन्दनन्दिनी — हिरण्यकशिपुविदारणानन्तरं स्थितिकृतिप्रकारमाह ॥ असृगिति ॥ रक्तबिन्दुसम्बद्धताम्रे सटामुखे यस्य स इति असृगित्यादेरर्थः । हरिर्द्विपहत्यया यथा

तथेत्यसृगित्यादिनाऽन्वयः । आन्त्रमाली च । अयं च स्थितिप्रकारः । कृतिप्रकारमाह ॥ नखाङ्कुरेति ॥ द्वितीयान्तानामहन्नित्यनेनान्वयः । हतवानित्यर्थः ॥ ३१ ॥

अहन् समन्तान्नखशस्त्रपाणिभिर्दोर्दण्डयूथानुपथान् सहस्रशः ।
सटावधूता जलदाः परापतन् ग्रहाश्च तद्दृष्टिविनष्टरोचिषः ॥ ३२ ॥

सत्यधर्मीया — नखशस्त्रपाणिभिर्नखा एव शस्त्राणि येषां ते च ते पाणयो हस्तास्तैः । नखाश्च शस्त्राणि तेषामपहृतानि निर्जेतरेत्युक्तत्वाद्गदादीनि वा तानि च पाणयश्च तैरिति वा । दोर्दंडयूथानुपथान् दोष एव दण्डा दण्डाकारास्तेषां यूथानि । तान्यनु अनुसृत्य पन्था येषां ते तथा । भुजबाहुप्रवेष्टो दोः । यूथं तिर्यक्समूहे स्याद्वन्द्वमात्रेऽपि भाषितमिति चामरविश्वौ । ऋक्पूरब्धूः पथामानक्ष इत्यप्रत्ययः । यत्र भुजाकर्षस्तत्र गच्छत इति यावत् । सहस्रशः । स्वार्थे शः । प्रातिस्विकतया सहस्रसहस्रं । इयतायासेन किं क्लेश ईशस्यापि न भवितेत्यत आह । सहस्रश इति ॥ सहस्रमनन्तं शं सुखं यस्य स इति वा । हस्रेण स्वदूषकेन पित्रपदेशेन मूर्खेण वा सहितः प्रल्हादस्तस्य शं येनेति वा । समंतात्सर्वत्राहन्नित्यन्वयः । हस हसन इत्यतः स्फायितंचीत्यादिना रक्प्रत्ययः । हस्रो मूर्खे विदूषक इति संसारावर्तः । तदानीं नारसिंहाकारकृतकार्यं निरुपममिति निरूपयति ॥ सटेति । जलदा नीरदाः सटाभिरवधूता विधुताः परापतन् । तावदभिव्याप्ता जटा इति भावः । तद्दृष्टिभिर्विनष्टानि रोचींषि शोचींषि येषां ते तथा ग्रहाश्चन्द्राद्याः । रोचिः शोचिरुभेक्लीब इत्यमरः । अभवन्निति शेषः ॥ ३२ ॥

मन्दनन्दिनी — नखैः शस्त्रैः पाणिभिश्चेति द्वन्द्वः । भुजदण्डसमूहमार्गं गतानिति दोर्दण्डादेरर्थः । भगवत्कृतमुक्त्वा तदीयावयवादिकृतकार्यमाह ॥ सटेत्यादिना ॥ विधूताः कम्पिताः । विनष्टरोचिषस्तिरस्कृततेजसः । अभूवन्निति शेषः ॥ ३२ ॥

अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा जहुर्दिशः ।
द्यौस्तत्सटाक्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदाऽतिपीडिता ॥ ३३ ॥

सत्यधर्मीया — अंभोधयोंऽभांसि धीयन्तेऽस्मिन्नित्यंभोधिः समुद्रस्ते च चत्वारो वा सप्त वेत्यंभोधयः । स्वरूपभूतः श्वास ईश्वरस्य वर्तत इति वर्तन्या श्वासेन श्रीनृसिंहस्वरूपभूतेन । हताः संतश्चुक्षुभुश्चेलुरित्यर्थः । मूलान्यत्र तु व्यासतीर्थीये ॥ अवाय्वनाकाशमतेजस्कमिति । तदारब्धदेहरहितमिति वचनम् । तत्त्वप्रकाशिकाताम्रपर्णीययोर्वाक्यार्थमुक्तावलीप्रमेयमुक्तावल्योः । वाय्वादयः शरीरोपादानतया प्रसक्ता लोके तथा प्रसिद्धानां विषयावरणशून्येऽप्राकृतविग्रहे सर्वात्मना निरास इति भाव इत्यारभ्य विस्तरस्त्वित्यन्तवचनम् । तमोवाय्वादीनामिति ।

यद्यपीत्यादिकृत्येश्वरात्मकवाय्वाकाशयोरुक्तावप्यविरोध इति गर्भीकृत्यान्यवस्तुस्वभावस्थौल्याद्यभाव इत्यन्तं च। भावरत्नकोशे च तमोवाय्वादीनां सर्वात्मनेति। अदुःखमसुखमित्यादौ यथा सुखमित्यनेन बाह्यसुखनिषेधेऽप्यदुःखमित्यनेन दुःखमात्रस्य प्रतिषेधस्तथाऽप्यत्राप्यस्थूलमित्यादौ प्राकृतस्थौल्यादि-निषेधेऽप्यतमोवाय्वादौ सर्वात्मना तमआदेर्निषेध इति चन्द्रिका । प्रसिद्धस्थूलसूक्ष्मादि-वैलक्षण्याज्जनार्दनः । अस्थूलादिरिति प्रोक्तो नैव स्थौल्याद्यभावतः । अनावृत्तेस्तमो नास्य स्वातन्त्र्यान्नाद्यते क्वचिदित्यक्षरब्राह्मणम्। तथा च सुधा। इहाच्छायमतम इत्यादेरसंकुचितवृत्तित्वमेव विज्ञेयमित्याद्युदाहृत्य षोडशकलान्तर्भूतानां भावानां निवृत्तिर्ज्ञातव्येति स्वयं व्याख्याय तथा चाथर्वणभाष्यं षोडशकलाशरीरो न भवतीति निष्कल इति संमतित्वेनोदाहृत्य वाय्वादीनामेवंविध-वैलक्षण्यं द्योतयितुमेव सुधायामच्छयमतम इत्यादेरसंकुचितवृत्तित्वमेवेति छायातमसोः स्वशब्देन वाय्वाकाशादेरादिशब्देन ग्रहणं कृतमिति वदन्तः समस्तानां छायातमोवाय्वाकाशानां प्रस्थानभेदेन तमोवाय्वादीनामच्छायमतम इत्यादेरित्यादेः स्वशब्देनेत्यादिना गतिश्चिंतितेति तथैव चन्द्रिकास्वार्थ-साधनविद्रावितनिद्रेति तुतुषुः। परं तु साहसमात्रम्। मुख्यतो नैर्भर्यं तु स्वरूपश्वसनसत्तायां चेति तत्। किञ्चाक्षरब्राह्मणमप्यविवादस्थल एव मानं न मानं च श्वसनास्तित्वाश्वासन इत्युपर्येव ज्ञायत इति न तत्र पराक्रान्तमस्माभिः। तत्त्वोद्योतटीकायां अवातं वातप्रेरणया शून्यमिति व्याख्यानात्।

न चैवं तमोवाय्वादीनां सर्वात्मना निवृत्तिरिति तत्त्वप्रकाशिकाविरोध इति वाच्यम् । तत्रापि वायुपदस्य वायुप्रेरणार्थकत्वात्। अत एव श्वसितं मातरिश्वेत्यादौ तत्र विष्णोरपि श्वासवायुरुक्तः। स च चिदानन्दाद्यात्मक एव तादृशमूर्धांगसहपाठादितीति प्रह्लादकृष्णाचार्यवचनमाथर्वणविवरणगतं चैवमेव परिमलबिदरहल्लीयाचार्यादिवचनं चेति । वस्तुतस्तु नास्तीति निष्कण्टको वाटः ॥ तथाहि ॥ अपीडितातमोवाय्वादीनां सर्वात्मना निवृत्तिरिति तत्त्वप्रकाशिकोक्तिः। न च वातप्रेरणाशून्यमिति वा षोडशकलागतशरीरांरभकवातराहित्यमेव निवृत्तिपदार्थ इत्यङ्गीकृत्य स्वपथमानेतुं सा सर्वात्मना सर्वात्मनेति वर्त्मना नावकाशं दास्यति। तत्त्वोद्योतटीका तु आनीदिति प्राणाननस्य प्रायो वायुप्रेरणया सर्वत्र दर्शनादत्रापि तथेति शङ्कापराकृतिमात्रपरैवेति न निबंधसाधिका किं तूदास्ते। भागवतगतिश्चानु-पदमेव विविच्यते। चन्द्रिका तु न निद्रिता। इहाच्छायमतममित्यादेरसङ्कुचितवृत्तित्वमेव ज्ञेयमिति सुधा सावधारणेति नैतदादिविचिकित्सा चिकित्सा । व्याख्याता चेयं वाक्यार्थचन्द्रिकायाम् । ननु यद्यस्थूलादिपदानां लौकिकस्थौल्यादिराहित्यार्थकत्वेनालौकिक तमोवाय्वादिसिद्धिः स्यादित्यत आह ॥ इहेति ॥ अस्थूलमनण्वोस्तर्हि अच्छायमतमोवाय्वनाकाशपदानामपि लौकिकछायातमोवाय्वादि-राहित्यार्थत्वापत्त्याऽलौकिकतमोवाय्वादिसिद्धिः स्यादित्यत आह ॥ इहेति ॥ अस्थूलमनण्वित्यादि-वाक्येऽस्थूलादिपदानां प्राकृतस्थौल्यादिमात्रनिषेधकतया संकुचितार्थत्वेऽपि अच्छायमतमोवाय्वनाकाश

इत्यादीनां सर्वात्मना तमआदिनिषेधकतयाऽसङ्कुचितार्थत्वमेव विज्ञेयम् । अदुःखमसुखमित्येकस्मिन्नपि वाक्येऽसुखमित्यनेन बाह्यसुखनिषधेऽपि अदुःखमित्यनेन दुःखमात्रनिषेधदर्शनेन योग्यत्वा-योग्यत्वयोरेव सङ्कोचासङ्कोचनियामकतयैकवाक्यस्थत्वादेरप्रयोजकत्वादिति भाव इति । अभिनव-चन्द्रिकायां च नन्वस्थूलमनण्वित्यादिश्रौतपदानां लौकिकस्थौल्याद्यभावपरतया व्याख्यानमयुक्तम् । अतमोवाय्वित्यनयोरपि लौकिकतमोवायुनिवर्तकत्वप्राप्त्या परमेश्वरस्यालौकिकतमोवायुछायाकाश-प्रसङ्गादित्यत आह ।। तमोवाय्वादीनामिति । आदिशब्देन छायाकाशयोर्ग्रहणम् । अस्थूलमित्यादि-प्रायपाठेऽप्यच्छायमित्यादेः सर्वात्मना छायादिनिषेध एवार्थो ग्राह्यः । अलौकिकछायादेरप्रामाणिकत्वेन प्रायपाठस्य त्याज्यत्वात् । अन्यथाऽदुःखमसुखमित्यादौ प्रायपाठानुसरणायादुःखमित्यस्य प्राकृतदुःखराहित्यमर्थः स्यादिति भाव इति । भावबोधे च तमोवाय्वादीनां सर्वात्मनेति । यथाऽदुःखमसुखमित्यादावसुखमित्यनेन बाह्यसुखनिषेधेऽप्यदुःखमित्यनेन दुःखमात्रनिषेधस्त-थाऽत्राप्यस्थूलमित्यादौ प्राकृतस्थौल्यादिनिषेधेऽप्यतमोवाय्वित्यादौ सर्वात्मना तमआदेर्निषेध इत्यर्थ इति । गुर्वर्थदीपिकायां च लौकिकस्थौल्यादिराहित्यमित्यत्र लोकपदेन परतन्त्रमुच्यते । अस्थूलमित्यादौ परतन्त्रजडस्थौल्यादिराहित्यं स्वतन्त्राजडस्थौल्यादिसाहित्यं चाभिप्रेतम् । अन्यथाऽणोरणीयान्महतो महीयानित्यादिश्रुतेर्नैरर्थक्यप्रसङ्गात् । एवं च तत्प्रायपठितानां छायातमोवाय्वाकाशादीनामपि द्वैविध्यं स्यादित्यत आह ।। तमोवाय्वादीनामिति । छायाया आदित्वेऽपि तमोरूपत्वान्न पृथग्ग्रहणम् । यथैकवाक्यपठितत्वेऽप्यदुःखमसुखमिति श्रुतौ दुःखस्य सर्वथाऽभावः सुखस्य द्वैविध्यं तद्वदिहपीति भाव इति ।

श्वासाश्वासाविश्वपतेः श्वसतोस्यादिवाग्बलाः ।
केचित् द्वावप्रतिद्वंद्वौ पक्षौ ङीप्सांवलित्यतः ।
केचिद्व्यवस्थयेत्याहुर्वयं च श्रमशामकाः ।
श्वासाः स्वरूपभूता नेत्यत्र निर्भृतनिर्भराः ।
टीकैतरेयऋग्भाष्यादिदिशा रुच्यतेऽच्युते ।
न नो गृह्णंतु के वापि न गृह्णंतु प्रदर्श्यते ।
युक्तिश्लोक्तेतरा तां तु विदाङ्कुर्वन्तु विंदवः ।।

तथाहि ।। चक्षुः श्रोत्रं मनो वाक् प्राणः श्रयत इत्युपनिषद्भाष्ये अग्निवातदिनेशानामुत्थानानि पृथक् पृथक् । वदनं नासिका नेत्रमित्येतानि परात्मनः । अदनाघ्राणदृष्ट्याख्यभोगत्रयविभागतः । मुखनासाचक्षुषामित्यादिना प्राणस्य नासोत्पन्नत्वतदाश्रितत्वोक्तेः । तथाऽन्यत्रापि तथैव

नसिकातोऽभून्मुख्यवायोः सुतो मरुत् । प्राणो वायुरिति द्वेधेत्युक्तेः । सति विश्वासे मातरिश्वनस्तदुत्थत्वतदाश्रितत्वोक्तिः सुलग्नेति नासिकेत्युक्तिर्मानिकी न संभाविनी स्यात् । ऋन्वेदादिकमस्यैव श्वसितं प्राह चापरा । वाचो बभूवु रुशतीर्हयग्रीवादिति स्फुटम् । वचो भागवतेऽप्यस्ति ब्रह्माण्डेऽपि तथापरम् । हयग्रीवादिमा विद्या श्वसितत्वेन निःसृता इति भाष्यटीकायाम् । अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकः सूत्राण्यनुव्याख्यानान्यस्यैवैतानि निःश्वसिता इत्यपरा श्रुतिः । ऋग्वेदादिकमस्यैव विष्णोरेव निःश्वसितं प्राह । तेनापि तस्यर्षित्वं ज्ञायते । निश्वसितमिवानायासेनादिकाले तेनोच्चरितमित्यर्थः । वाचो बभूवुरुशतीः श्वसतोऽस्य न स्त इति भागवते स्फुटमेतमर्थं प्रतिपादयद्वचोऽस्तीति प्रोक्तेः । तस्मिन्सति श्वसितमिवानायासेनादिकाल इत्यायासस्यासंपादनीयत्वात् । अज्ञानकार्यत्वान्निद्रा न भगवत्यवकाशं लभते । तथा श्वासस्य श्रमशमनकार्यायावश्यं वक्तव्यस्य तदभावादेवाभाव इति तु मनोहरम् । श्वसितं मातरिश्वा । श्वसतोऽस्य न स्तः श्वासैजदलकव्रातेत्यादौ प्रस्तुते चाष्टमस्कंधोक्तछायाछायामाश्रित्य व्याकरणसंभवात् । संततं चिन्तयेत्कण्ठं भास्वत्कौस्तुभभासकम् । वैकुण्ठस्याखिला वेदा उद्गीर्यंतेऽनिशं यत इत्याचार्यैः कण्ठत कंठमनिशंयत इत्युक्तिरपि श्वासौत्कण्ठं कुण्ठयति । नस्तो मुखादपि निरन्तमुद्गिरन्तम् । हयास्यनासापुटवातजातः । द्वितीयस्कंधे च सर्वासूनां च वायोश्च तन्नासे परमायने इत्येवमादयश्चैतदनुकूलाः । सिंहास्यत्वेन श्वासानां तत्साम्यार्थं सृष्ट्वा प्रदर्शनस्य संभावितत्वादिति दिक् ।

सर्वात्मनेति न वचो दद्यात्सर्वात्मनान्तरम् ।
आपीडितं तदस्माभिर्नापीडितमपीडितम् ॥ १ ॥
असङ्कुचितवृत्तित्वमेवेति गुरुगीरपि ।
न सङ्कुचितवृत्तिः स्यात्तन्द्री नो याति चन्द्रिका ॥ २ ॥
आयासं यास्यति न साऽप्यनायासेन निःसृतिम् ।
वदन्ती गौरवी वाणी तथा गुर्वर्थदीपिका ॥ ३ ॥
वाक्यार्थचन्द्रिकाभावबोधाभिनवचन्द्रिकाः ।
तदैतरेयोपनिषद्भाष्यं चेत्येवमादिना ॥ ४ ॥
विश्वेश्वरे स्वापसमः श्वासो यच्छ्रमशामकः ।
नाङ्गीकार्यमतोऽस्माकं जानीहीति जनाः परे ।
न वा जानन्ति जानन्तु तद्व्रज्यां न व्रजत्यज ॥ ५ ॥)

ये निर्ह्रादभीता दिगिभा दिग्गजा मदं जहुस्तत्युजः । तेषां तदुपलक्षितघनमीनादिश्वासहता इति वाऽब्धयश्चुक्षुभुरित्यन्वयः । मदं दानोदकं । द्यौः सुरलोकः । तत्सटात्क्षिप्तविमानसङ्कुला तस्य नृसिंहस्य सटाभिरुत्क्षिप्तानि वा विमाना विमानानि व्योमयानानि च तैः सङ्कुला व्याप्ताऽभूदिति शेषः । विमानो व्योमयाने च सप्तभूमगृहेऽपि च । घोटके यानमात्रे च पुन्नपुंसकयोरपीति शब्दमञ्जरी । व्योमयानं विमानोऽस्त्रीत्यमरः । पुंसि संज्ञायामिति करणे घः । विविधतया विशिष्टं वा मानयंत्यनेनेति विमानः । घञ् तु न भवति । ततोऽपि परेण ल्युटापवादात् । विहितश्चाधिकरणे घः । मान्ति विशेषेणास्मिन्नित्यधिकरणे ल्युड्वा । क्ष्मा क्षितिः पदा । तत्सटेत्यनेन समस्तमपि तत्पदं षष्ठ्यन्तं सदन्वेति । तस्य पादेनातिपीडिता सती प्रोत्सर्पत निम्नोन्नता सत्यपासर्पत् । अमुष्येत्याकृष्यान्वयो वा । पदातिना पीडितेति वा । पादेदं संख्यामुद्रणं नास्त्येतत्पक्ष इति ज्ञेयम् । अज्यतिभ्यामतिरित्यातिः । पदातिपत्तिपतगेत्यमरः । पद्भ्यां भूमिरजायतेत्युक्तेः । पिता विक्रयते सुतमिति नीत्या क्षितेरुपसर्पणं युक्तमनन्यगतिकत्वादिति भावः । करेणेत्यनुदीरणेनोदीरणेन पदेति पदसंपदा ध्वनित इति ज्ञेयम् ॥ ३३ ॥

मन्दनन्दिनी — दिगिभा दिग्गजाः । सटाभिरुत्क्षिप्तमूर्ध्वं गमितं विमानसङ्कुलं यस्याः सा । प्रोत्सर्पत प्रोदसर्पत् । आगमशासनस्यानित्यत्वात् अडभावः ॥ ३३ ॥

शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ।
ततः सभायामुपविष्टमुत्तमे नृपासने सम्भृततेजसं विभुम् ॥ ३४ ॥

सत्यधर्मीया — अमुष्य रंहसा वेगेन । रंहश्च गुह्ये सुरते च वेग इति नामनिधानम् । शैलाः पर्वताः समुत्पेतुरुत्पतिताः । खमाकाशं ककुभो दिशश्च न रेजिरे न बभुः । अनन्तं सुरवर्त्मखं दिशस्तु ककुभः काष्ठा इत्युभयतश्चामरः । तत्तेजसेत्यराजननिमित्तोक्तिः । ततोनन्तरं सभायां उत्तमे नृपासने सिंहासने नृपस्य हिरण्यकस्यासने निरसने मारणरूपे जाते प्रह्लादस्याधुनाऽनधिकारात्तत्रोपवेश इत्यावृत्त्यान्वयेनार्थविशेषो ज्ञेयः । एतेन राजासनस्य सिंहासनमिति संज्ञा तदारभ्यान्वर्थाऽभूदिति सूचितं भवति । उपविष्टं संभृततेजसं जगद्व्यापिप्रभावं तं विभुम् । उपवेशनं च नापूर्वविलोकनेन दुरात्मोपवेशायातास्पृश्यतापनोदेन प्रल्हादस्योपवेशे सदात्मतांकूरणार्थमेवेति भावः ॥ ३४ ॥

मन्दनन्दिनी — रंहसा वेगेन । न रेजिरे न चकाशिरे । दैत्यहननाद्यनन्तरं सभोपवेशनमाह ॥ तत इति ॥ सम्भृततेजसं राशीकृततेजसम् ॥ ३४ ॥

अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ।
निशाम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ॥ ३५ ॥

सत्यधर्मीया — प्रतियोद्धृदर्शनादेव देवस्योपवेश इत्यादिशति ॥ अलक्षितद्वैरथमिति । द्वितीयस्य रथस्यायं द्वैरथः प्रतियोद्धा द्वितीयत्वेनाभिमुख्येन रथति यः स द्विरथः । स एव द्वैरथः । सोऽलक्षितो येन स तथा तम् । प्रचण्डवक्त्रं अत्यमर्षणमिति न कश्चन कोऽपि बभाज भेजे । अभजने हेतूक्तिः लोकत्रयमस्तकज्वरम् । लोकत्रयस्य मस्तकस्य शिरसो ज्वरो रोगात्मा तम् । शिरोरोगरूपम् । तं आदिदैत्यम् । हरिणा नृहरिणामृधे हतं निशाम्य दृष्ट्वा ॥ ३५ ॥

मन्दनन्दिनी — अलक्षितमदृष्टपूर्वं कश्चन भूतलगतः । लोकत्रयमस्तकज्वरं शिरोरोगायमाणम् ॥ ३५ ॥

प्रहर्षवेगोत्कलिताननां मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ।
तदा विमानावलिभिर्नभःस्थलं दिदृक्षतां संकुलमास नाकिनाम् ॥ ३६ ॥

सत्यधर्मीया — प्रहर्षवेगोत्कलिताननाः प्रहर्षस्य सन्तोषस्य वेगोऽतिरेकस्तेनोत्कलितानि विकसितान्याननानि वदनानि यासां ताः । सुरस्त्रियो मुहुरनेकवारं प्रसूनवर्षैः पुष्पवर्षैर्ववृषुरित्यन्वयः । पूर्वं कश्चन न बभाजेत्युक्त्या सुरस्त्रिय इत्यत्रोक्त्या च योषितामवलोकने पितृत्वादेव मरणभीतिर्नास्तीति ध्वन्यते । तदा तत्काले विमानावलिभिर्विमानानामावलयः पंक्तयः । वीथ्यालिरावलिः पंक्तिरित्यमरः । ताभिर्नभस्थलमाकाशस्थानम् । नभस्तलमित्यपि पाठे तत्प्रदेश इत्यर्थः । तद्विमानावलयश्च किं संबंधिन्य इत्यत आह ॥ नाकिनामिति । न विद्यतेऽकं दुखं यत्र स नाकः स्वः । स्वरव्ययं स्वर्गनाक इत्यमरः । सोऽस्ति निवासत्वेनैषामिति नाकिनो दिविषदस्तेषाम् । नभ्राडिति नञः प्रकृतिभावः । दिदृक्षतां द्रष्टुमिच्छताम् । दृशेः सनि द्वित्वहलादिशेषे षत्वक्षत्वेषु सत्सु रूपम् । शतायम् । सङ्कुलं व्याप्तं आस । अव्ययं वा । सतेर्गत्यर्थस्य रूपं वेति वेद्यम् ॥ ३६ ॥

मन्दनन्दिनी — प्रहर्षेत्यादेः सन्तोषातिशयविकसितवक्त्रा इत्यर्थः ॥ ३६ ॥

सुरानका दुन्दुभयो विनेदिरे गान्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ ३७ ॥

सत्यधर्मीया — सुरानका इति सनकारः पाठः । सुराणामानकाः । आनकः पटहो ढक्केत्यमराड्ढक्काः । आनिति जनोवादितेनानेनेत्यनतेः कन् । यद्वा नयति प्राणयति जनानित्यानक इति ण्वुलि ज्ञेयम् । आनकः पटहे भेर्यां मृदङ्गे ध्वनदंबुद इति विश्वः । असमानपदत्वान्न णत्वम् । सुराणका

इति सणकारः काचित्कस्तत्र शब्दार्थाद्रणतेर्णिच् ण्वुलि राणयन्ति हरितः प्रति स्वरयन्ति ये ते सुराणका इत्यर्थः । दुन्दुभिविशेषणम् । दुन्दुभयो भेर्यश्च विनेदिरे ध्वनिं चक्रुरनन्यहताः । यथोक्तं हरिवंशे । स्वयमेव प्रवाद्यन्ते देवतूर्याण्यनेकश इति । दुन्द्विति शब्देन भाति यः स दुन्दुभिः । अनुकरणशब्दः । भातेर्बाहुलिकः किः । यद्वा द्यामुंभति पूरयन्तीति दुन्दुभयः । पृषोदरादित्वाद्यस्य दः । औणादिकस्तु न भवति । अतो लोपस्याप्रसङ्गादिति भानुदीक्षितः । दुन्दुभिर्दिंतिजे भेर्यामिति विश्वः । जघ्निर इति पाठे स्वयमेव हता इव वादिता इत्यर्थः । गन्धर्वमुख्या गन्धं सौरभमर्वति गच्छन्तीति गन्धर्वाः । कचिच्च गान्धर्वमुख्या इत्यपि पाठः । तत्र कर्मण्यण् । पक्षद्वन्द्वेऽपि शकंध्वादिपाररूप्यं ज्ञेयम् । गन्धर्वकिन्नरा इत्यमरः । अपि गन्धर्वगान्धर्वदिव्यगायनगातव इति शब्दार्णवः । जगुः । गै शब्दे । गानं चक्रुः । स्त्रियस्तत्स्त्रियो ननृतुः ॥ ३७ ॥

मन्दनन्दिनी — आनकाः पटहा दुन्दुभयो भेर्यः ॥ ३७ ॥

तउपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः ।
ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ ३८ ॥

सत्यधर्मीया — सम्पादितैतद्दैतेयरूपापत्प्राणाशः पूर्णस्य कर्तव्यांतरमचक्षाणाश्चतुर्मुखमुखमखभुजः किमुपकारप्रतिनिधित्वेन चक्रुरित्यतो वक्ति ॥ त इति । नाकिपदोक्तास्त इति परामृश्यन्ते । ये प्राक् प्रार्थनामेतदर्थं कृतवन्तस्त इति वा । ईडिर इत्युत्तरेणान्वयः । ब्रह्मेन्द्रगिरिशादयः । दयाभावस्य सर्वसाधारणत्वेन कस्य कुत्रौक्तौ किमिति मध्ये इन्द्रस्य निवेशः । ब्रह्मेंद्रगिरिशेषु न विद्यते दया यस्य सः । यस्मात्तस्मात्तं ईडिर इत्यनेनान्वयः । तेन नातिदूरचरा इति सुलग्नम् ॥ ३८ ॥

मन्दनन्दिनी — कृतसर्वलोकोपकारकस्य भगवतो ब्रह्मादिभिः स्तोत्रप्रकारमाह ॥ तदिति ॥ तदुपव्रज्य तन्नृसिंहाधिष्ठितस्थलमुपव्रज्योपगम्य ॥ ३८ ॥

मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः ।
यक्षाः किम्पुरुषास्तात वेतालाः सह किन्नराः ॥ ३९ ॥

सत्यधर्मीया — अप्सरचारणाः । अयमकारान्तोऽप्सरःशब्दपर्यायोऽप्सरशब्दः । एकामप्सरामितिभाष्यादेः । अप्सराणां समूह आप्सरम् । गन्धर्वाश्चाप्सरं च चारणाश्चेति विग्रहः । सकारान्तत्वावच्छेदेनाकारान्तत्वमिति द्विरूपकोशे सजातीयानां बहूनां तमसा च तममित्यादीनां प्रदर्शनादिति वाऽकारान्तो ज्ञेयः ॥ ३९ ॥

मन्दनन्दिनी — अप्सरचारणा इत्यसंहितायां सकारलोपश्छान्दसः । तातेति युधिष्ठिर-सम्बोधनम् ॥ ३९ ॥

ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः ।
मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम् ।
ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ४० ॥

सत्यधर्मीया — सुनन्दकुमुदादयः । अनेन जयविजययोरधुना स्वमूलरूपाप्राप्तेरेतदादिग्रहः । नन्दकुमुदाक्षादय आदिपदार्थाः । नातिदूरचराः किञ्चिद्दूरे चरन्तीति तथा । पृथक् उत्तरत्र वक्ष्यमाणस्वस्वकार्यावाप्त्यानुकूल्यादियमुक्तिः । अनतिदूरचरणं च स्वस्तुत्या श्रुतया भाव्यं स्वेषां तद्रूपाटोपप्रेक्षणा दक्षिणतया चेति ज्ञेयम् ॥ ४० ॥

मन्दनन्दिनी — ते प्रसिद्धाः ॥ नरशार्दूलेति सम्बुद्धिः । शार्दूलमिति पाठे सिंहमित्यर्थो बोध्यः । नातिदूरचरास्तारतम्यक्रमेण समीपचराः ॥ ४० ॥

ब्रह्मोवाच—

नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ।
विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया सन्दधतेऽव्ययात्मने ॥ ४१ ॥

सत्यधर्मीया — तत्रेयदामननादित्यादेः सर्वसुपर्ववरत्वाच्चतुराननं आदौ तुष्टावेत्याचष्टे ॥ ब्रह्मेति । विश्वस्य प्रपञ्चस्य गुणैः सत्त्वरजस्तमोरूपैः सर्गस्थितिसयमान् सर्जपालनसंहृतीः स्वलीलया स्वरूपभूतलीलया सन्दधते विदधते । अनन्ताय नाशरहिताय । तच्छक्तिरपि तादृशीति वक्ति ॥ दुरन्तशक्तय इति । पवित्रकर्मणे पवित्राणि स्वयं पावयन्ति च जनानिति तानि कर्माणि यस्य तस्मै । विचित्रमद्भुतं वाऽमायं वा वीर्यं यस्य तस्मै । अव्ययात्मनेऽक्षयिष्णुशरीराय । अहं नतोऽस्मीत्यन्वयः ॥ ॥ ४१ ॥

मन्दनन्दिनी — आदौ ब्रह्मणः स्तोत्रमाह ॥ ब्रह्मेति ॥ दुरन्तज्ञानबलादिशक्तये विचित्रवीर्याय पराक्रमवते सर्गस्थितिसंयमान् । संयमो संहारः । गुणैः सत्त्वादिभिः । स्वलीलया स्वरूपभूतलीलया । अव्ययात्मने नित्यवपुषे ॥ ४१ ॥

रुद्र उवाच—

कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः ।
तत्सुतं पाह्यनुसृतं भक्तं ते भक्तवत्सल ॥ ४२ ॥

सत्यधर्मीया — रुद्रश्च क्रोधसंभव इत्यादेः कोपस्वभावस्य मम सांत्ववचनमेव दुर्मिलं तादृगुक्तं चेच्छृणुयादेव शृणोति चेल्लालयेदेव देव इति वा पौत्रत्वाद्युक्तमयुक्तं वोक्तं चेदपि पौत्रकवचो यदपि ह्ययोग्यं संभावयन्ति गुणिन इत्युक्तेः सफलीकुर्यादार्य इति फाललोचन आलोच्य कालानुकूलं प्रार्थयते ।। रुद्र इति । हे भक्तवत्सलेति स्वालापनेन तद्बाह्यपालने च हेतूक्तिः । ते तव कोपकालो विशिष्टक्रोधप्रदर्शनकालो युगान्तो नायमिति भावः । अयं कोपकाल इति काकुः किन्तु युगान्त इति वाऽन्वयः । यदर्थं प्रदर्शनं कोपस्यावश्यकं तन्निष्पन्नमित्युपसंहर हर इति हरो वक्ति । अल्पकोऽत्यल्पः । नखनिर्वर्त्यकर्मणि कठोरकुठारग्राहकवन्नाचातुरी सम्पादनीया दयापयोदधेऽसुरो हतः, इतःपरं तत्कृत्याभावादुपसंहरेति भावः । तत्सुतं प्रल्हादं पाहि रक्ष । स न तथाविध इत्याह ।। ते भक्तमिति । भक्ता अपि तत्कालिकासुरावेशादितो दुःशीला दुष्टा इत्यत आह ।। अनुसृतमिति । तत्सुतं भक्तं पाहि । मद्वचनकरणेनानुसृतं मां च पाहीति वैयधिकरण्येनान्वयो वा । कोपकालो युगान्तः सहस्रयुगान्तः । अयं त्वयुगान्त इति कोपमुपसंहृत्य तत्सुतं पाहीति वा आवृत्त्याऽन्वयः ।।

यद्वा अयं हिरण्यकशिपुर्हतः । अल्पको वयसा कनीयान् हिरण्याक्षो हत इति युगान्तः, युगस्य युग्मस्य हिरण्याक्षहिरण्यकशिपूरुपस्यान्तो नाशः जातः । इतः परं तत्सुतं पाहि । स च तदनुरूपश्चेन्नद्वेन्नद्व कथमवनं कथयेत्यत आह ।। कोपकालः, कोऽपकार इति । अस्य प्रल्हादस्य अपकारः कः, न कोऽपीत्यर्थः । अतः पाहीत्युक्तं युक्तमिति सोत्प्रासमुत्प्रेक्षयन्ति । स्तवप्रस्तावे अल्पक इत्युक्त्यस्वारस्यं अस्मदुत्प्रेक्षाबलमित्यालपन्ति ।। ४२ ।।

मन्दनन्दिनी — कोपशांत्या भक्तरक्षणं प्रार्थयते ।। कोपकाल इति ।। हे भक्तवत्सल नृसिंह । ते कोपकालः कोपावसरो युगान्त एवोचितो नेदानीम् । असुरहननायेति चेत् । अयमल्पकः । कृतो वा शाम्यतु । हननस्य जातत्वादित्याह ।। हत इति ।। कृपावसरश्चायमित्याह ।। तत्सुतमिति ।। अनुसृतं शरणं प्राप्तम् । भक्तं तत्सुतं तस्य हिरण्यकशिपोः सुतं प्रह्लादं पाहि रक्षेति योजना । पालनीयगतेऽनुसृतभक्तत्वे पालकगतं भक्तवत्सलत्वं पालने निमित्तानि ।। ४२ ।।

इन्द्र उवाच–

प्रत्यानीताः परम भवता त्रायता नः स्वभागा
दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते
मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम् ।। ४३ ।।

सत्यधर्मीया — हे परम । भवता नोऽस्मान् त्रायताऽवता स्वभागा अस्मद्योग्यहविर्भागाः सु अत्यन्तमभागास्तत्त्वेन तेन कृताः प्रत्यानीतास्तत्प्रतिबद्धा हते तस्मिन् प्रत्यानीय दत्ताः । अस्माकमुपभोग्या जाता इति भावः । दैत्याक्रान्तं सदा स एव स्मृतिपथमुपयात इति त्वत्स्मरणप्रतिबंधकत्वाद्दैत्येन हिरण्यकशिपुनाऽऽक्रान्तं हृदयकमलं प्रत्यबोधि फुल्लमभूत् । हृदयकमलमेव विकासकर्तृ । क्रमादमुं नारद इत्यबोधि स इति वत् । यद्वा त्वद्गृहमिति त्रायता त्वया प्रत्यबोधि । विकासितमभवदिति । कर्मणि वा । प्राबोधि श्रुतिपङ्कजं येनेतिवत् । हविः स्वर्गादि दैत्येन बलात्कवलितं तच्चानिष्टमिति प्रार्थना कृता । नेदं परमेष्टमित्याह । कालग्रस्तं कालेन ग्रस्तं नश्यदिति नष्टप्रायमिदं किं स्वर्गादि कियत् । किं सुखजनकम् । तज्जन्यं सुखं सुखमेव न भवतीश्वर नश्वरत्वादिति भावः । तेषामिति पारोक्ष्यनिर्देशोऽनहन्ताप्रकटनाय । ते त्वां शुश्रूषतां सेवमानानां तेषां भक्तानां न मुक्तिरपि ज्ञानफलत्वेनागमाद्यवगमितापि न बहुमता प्रार्थनीयार्थत्वेन न संमता । अहो चित्रम् । हि यत्तत् । हे नाथ नारसिंह । अपरैस्तदितरैरावृत्त्यानुत्तमैर्धर्मादिसंपाद्यैः स्वर्गादिभिः किं किं फलमित्यन्वयः । या अपरैरेकान्तिभिन्नैरनुत्तमैर्बहुमता सा ते त्वां शुश्रूषतां तेषामेकान्तानां न कस्यचित् । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमित्यादेर्मुक्तिः मोक्षोऽथ लिङ्गभङ्गानन्तरं न किम् । अप्रार्थनायामपि भवतीति नार्थनीयेति भाव इत्यप्यन्वयो ज्ञेयः ॥ ४३ ॥

मन्दनन्दिनी — हे परम । नोऽस्मान् त्रायता त्रायमाणेन भवता स्वभागाः प्रत्यानीताः प्रत्याहृताः। हिरण्यकशिपुकाले सहरक्षोनामकाग्निनेन्द्रादिनामकेभ्यो दैत्येभ्यो नीताः । हव्यवाहनो देवानां कव्यवाहनः पितॄणां सह रक्ष असुराणामिति श्रुतेः । इति स्मृतिश्च (?)। त्वद्गृहं त्वदावासयोग्यम् । अस्मदीयहृदयकमलं दैत्याक्रान्तं भीत्या तद्विषयकं तत एव निमीलितं तस्य हननात्प्रत्यबोधि । एकान्तभक्तानामस्मदादीनां त्वद्दयैव पुरुषार्थो न प्रत्यानीतस्वर्गाधिपत्यादिकं पुरुषार्थ इत्याह ॥ कालेति ॥ हे नाथ । त्वा शुश्रूषतामिदं स्वाधिपत्यादिकं कालग्रस्तं नश्वरं कियत्फलं न महाफलमित्यर्थः । मुक्तिरपि न महाफलमित्याह ॥ मुक्तिरिति ॥ हे नृसिंह । तेषां शुश्रूषतां मुक्तिरपि न बहुमता हि यस्मात्तस्मादपरैः पुरुषार्थैः किं प्रयोजनमिति योजना ॥ ४३ ॥

ऋषय ऊचुः

> **त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं समस्तम् ।**
> **तद् विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४४ ॥**

तात्पर्यम् — तद्विप्रलुप्तमिति सादृश्याभेदवचनम् । आलेचनमेव तपः । 'यस्य ज्ञानमयं तप' इति श्रुतेः ॥ ४४ ॥

सत्यधर्मीया — त्वं नस्तपः परममात्थ यदात्मतेज इति श्लोके हे आदिपूरुष यदात्मतेज आत्मनः स्वस्य तेजो ज्ञानं तप आत्थ तदमुना दैत्येन विप्रलुप्तं नाशितमिति हरिज्ञानात्मकतपोलोपः प्रतीयते। सा चेश्वरस्य तस्यानश्वरत्वादनुपपन्नेत्यत उपपन्नमर्थमाह ॥ तद्विप्रलुप्तमितीति। सादृश्याभेदवचनम्। सादृश्यात्मा योऽभेदस्तद्वचनं तद्विषयकं वचनमित्यर्थः। पृथगधिकरणीय सादृश्याभेदसंश्रयादित्यनुवाख्यासुधायां सादृश्यमेवाभेदः सादृश्याभेद इत्युक्तेः। तत्तपस्तत्सदृशं तपः। विप्रलुप्तमिति भावः। न हि तपोऽपि कृच्छ्रचान्द्रायणादिरूपम्। श्रीपतिप्रतिपत्त्यात्मकतपःस्वरूपमित्यतस्तदर्थमाह ॥ आलोचनमिति। नात्र तपः स्वरूपज्ञानं किन्तु भागवतज्ञानसदृशमेतदीयालोचनम्। तस्य लोपः। वृत्त्यात्मन इतरस्य तिरोभावो वा संभावित इति भावः। ननु ज्ञानात्मकं तपः श्रीपरस्य वर्तते चेत्तत्सादृश्यवर्णनं युज्यते। तदेव कथमित्यत आह ॥ यस्येति। यस्य हरेर्ज्ञानमयमेव तप इति श्रुतेर्नाप्रामाणिकं ज्ञानतपः श्रीनाथ इति भाव इति केचित्। वस्तुतस्तु सादृश्याभेदवचनमिति वचनं प्रथमस्कंधस्थतद्वैधनुस्त इषवः स रथो हयास्त इत्यादिव्याकृतिवेलायां स रथो हयास्त इति तादृशा इत्यर्थः। त इषव इतीव। सदृशे वा प्रधाने वा कारणे वा तदित्ययम्। शब्दः सङ्घटते भेदे विद्यमानेऽपि तत्त्वत इति ब्रह्मतर्क इत्युक्तेस्तच्छब्दार्थः सादृश्यमत्र गृहीतुं शक्यं ततश्च यत्तपस्तत् तप इव तद्विलुप्तमित्यन्वयः संभवेत्। तेनैवात्राभिप्रेतार्थे ज्ञातुं सुशके किमित्यत्रेति चेत्। सत्यम्। अत एव सिद्धवत्कृत्य सादृश्येत्येतावन्मात्रोक्तिरिति संभवात्। इदमपि व्यवधानेन बहुसंविधानसापेक्षमिति मन्दमतिदययेति मन्तव्यम्। एवं चात्मतेजसो भगवतो ज्ञानस्य समानविषयकत्वेन सदृशं तप आलोचनं यत्तस्य तिरोभावोऽनेन दत्त इति पर्यवस्यत्यर्थ इति ज्ञेयम्॥

ततश्चायं श्लोकार्थः॥ आदिपुरुष त्वं नोऽस्माकं यदात्मतेजः स्वज्ञानं परमं तप आत्थोक्तवान्। आहस्थ इति थः। येन तत्सरूपेण तपसेदं समस्तमात्मगतं मनोगतमभूत्तपो ज्ञानसदृशं आलोचनम्। तच्छब्द इवार्थे। अमुना विप्रलुप्तम्। तदद्य। हे शरण्यपाल। शरणमर्हतीति यदर्हार्थे। शरणागतान्पालयतीति स तथा। नोपलक्षणमिदमित्याह॥ रक्षागृहीतवपुषेति। रक्षार्थं गृहीतं वपुर्येन तेन। पुनरन्वमंस्थाः। मन् ज्ञाने लुङ्। नश्चेत्यनुस्वारः। अन्तर्णीतणिजर्थः। तपः कुरुतेत्यनुज्ञातवानसि। तप आलोचन इति स्मरणात्। तस्मै नम इत्युत्तरेणान्वयः॥ ४४॥

मन्दनन्दिनी — हे आदिपुरुष। यदात्मतेजः परमात्मापरोक्षसाधनं तप आलोचनं परममुत्तमसाधनं नोऽस्माकं त्वम्। आत्थ ब्रवीषि। तपसा ब्रह्म विजिज्ञासस्वेति श्रुतेः। येन तपसेदं समस्तमात्मगतं मनोगतं योगप्रभावेन। सर्वापरोक्षमिति यावत्। तद्विप्रलुप्तममुना। हे शरण्यपाल। जगद्रक्षायै गृहीतवपुषा। अद्य पुनरन्वमंस्था अनुगृहीतवानसीति योजना। तपोऽपि न सन्तापात्मकं किं त्वालोचनात्मकं ज्ञानरूपम्। यस्य ज्ञानमयं तप इति भगवदीयज्ञानेऽपि तपःशब्दार्थत्वदर्शनात्।

एतत्सर्वमभिप्रेत्य तात्पर्यम् ।। तद्विप्रलुप्तमिति सादृश्याभेदवचनम् । आलोचनमेव तपः । यस्य ज्ञानमयं तप इति श्रुतेः ।। यत्तप आत्थ तद्विप्रलुब्धमिति कथम् । आलोचनात्मकतपस आशुतरविनाशतयाऽधुना दैत्येन विनाशनायोगादिति तु न शक्यम् । अधुना विप्रलुप्तस्यापि तत्सदृशत्वेन तदित्यभेदोक्ति-सम्भवात् । तानेव शालीनुपभुज्महे इत्यादौ दर्शनात् ।। ४४ ।।

पितर ऊचुः–

श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजै-
र्दत्तानि तीर्थसमयेऽपि तिलाम्बु चापिबत् ।
तस्योदरान्नखविदीर्णवपाद् य आर्च्छत्
तस्मै नमो भगवतेऽखिलकर्मगोप्त्रे ।। ४५ ।।

सत्यधर्मीया — अत्याज्यं प्रथमोदाहरणीयस्यवश्यं करणीयस्य पिण्डावापादेरपि तत्प्रतिरोधः प्रागिदानीं तद्धननेन श्राद्धादेरस्मदुपयोगिताकरणेन महानुपकारस्तवेति पितरः स्तुवन्ति ।। श्राद्धानीति । श्रद्धासंबंधीनि श्राद्धानि । स्वधापिण्डावापादीनि अधि अधिकृत्य बुभुजे भुक्तवान् । युष्मदाज्ञया चेद्ग्रहणं कोऽपराधस्तस्य कोपरोध एव विहित इत्यत आहुः ।। प्रसभमिति । बलात्कारेण । तानि यौष्माकीणानि कथमित्यतः कथयन्ति । नोऽस्माकं तनूजैस्तनूभ्यो जायन्त इति ते तथा तैर्दत्तानीति । तीर्थसमये भागीरथ्याद्युत्तमतीर्थलाभकाले दत्तानीति दत्तं सदन्वेति । न उद्दिश्य दत्तं तिलाम्बु तिलोदकं चापिबत्पीतवान् । तीर्थसमयेषु तिलाम्बुमन्तीति क्वचित्पाठः । तत्र श्राद्धविशेषणं तिलाम्बुमन्तीति । बुभुजे पीतवानित्यर्थः । तिलान्सहाद्भिरिति पाठोऽप्यतुलः । स्फुटार्थः । तस्य बलादस्मच्छ्राद्धहर्तुर्नख-विदीर्णवपात् । नखैर्विदीर्णा । वपा वसेत्यमरः । वसा मांसस्नेहो यस्य तस्मादुदरात् । ल्यब्लोपनिमित्ता चेयं पञ्चमी । विदीर्णवपोदरं विधाय । तानि योऽस्मानाच्र्छत् । अन्तर्णीतण्यर्थोऽयमृच्छिः । प्रापयामास । निरुपद्रवेणास्मदुपयुक्तानि कृतवानिति यावत् । तस्मै अखिलधर्मगोपूत्रे । अनेन नास्माकमेवोपकारः किन्तु सर्वेषामप्यनेनावतारेण स्वस्वधर्मावाप्तिरिति सूच्यते । अखिलधर्मान् गोप्ता उदितोवेत्युक्तेरयमनिट्कोऽपि । तस्मै भगवते नम इत्यन्वयः ।। ४५ ।।

मन्दनन्दिनी — नस्तनूजैस्तीर्थसमये दत्तानि तिलाम्बुमन्ति श्राद्धानि कव्यान्नानि यः प्रसभं बुभुजे । तानि नखविदीर्णवपात् । वपा नाम हृदयगतान्त्रविशेषः । तस्योदरादार्च्छत्प्रापितवान् । यो भवान् । तस्मै अखिलधर्मगोप्त्रेऽखिलधर्ममर्यादासंरक्षकाय भगवते नम इति योजना ।। ४५ ।।

सिद्धा ऊचुः–

योो नो गतिं योगसिद्धामसाधुरहार्षीद् योगतपोबलेन ।
नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ४६ ॥

सत्यधर्मीया — योऽसाधुर्नो योगसिद्धामणिमादियोगलब्धां गतिमन्तर्धानानन्तर्धानादिरूपिणीम् । योगतपोबलेन योगः पवनजयादिस्तपः कायक्लेशादिकं तयोर्बलेन सामर्थ्येनाहार्षीदपहृतवान् तं नानादर्पम् । प्रयोजकानां बाहुविध्याद्दर्पा अपि बहुविधा इति नाना दर्पा यस्य तमित्युपपद्यते । नखैर्यो विददार तस्मै । विदारणस्य पारोक्ष्यात्तस्मा इत्युक्तिरिदानीमपरोक्षीकृतत्वात्तुभ्यमित्युक्तिश्च संभवत इति मन्तव्यम् । हे नारसिंह तुभ्यं तस्मै । तुभ्यमिव तुभ्यं नताः स्मः । त्वामनुकूलयितुं कृतनमस्कारा इत्यर्थः । क्रियार्थोपपदस्येति नमस्कुर्मो नृसिंहायोतिवच्चतुर्थी ॥ ४६ ॥

विद्याधरा ऊचुः –

विद्यां पृथग्धारणयाऽनुरुद्धां न्यषेददज्ञो बलवीर्यदृप्तः ।
स येन सङ्ख्ये पशुवद्धतस्तं महानृसिंहं प्रणताः स्म नित्यम् ॥ ४७ ॥

सत्यधर्मीया — पृथग्धारणया तत्तद्भिन्नोपासनयाऽनुरुद्धां तत्तद्योग्यतामनुरुध्य लब्धां विद्यामन्तर्धानान्तर्हितपरिज्ञानादिरूपिणीं यो न्यषेधत् निषेधितवान् । तत्र हेतुरज्ञो बलवीर्यदृप्त इति । सः । येन त्वया संख्ये युद्धे । संख्यं समितिसंख्या स्यादिति विश्वः । पशुवत् पशुरिव । अथवा पशुना तुल्यं हत इति पशुवत् । तेन तुल्यं क्रिया चेद्वतिरिति वतिः । उदाहरणं ब्राह्मणवदधीते क्षत्रिय इति । तं महानृसिंहं नित्यमविनाशिनम् । नित्यं सन्ततमिति क्रियाविशेषणं वा । प्रणताः स्मः ॥ ४७ ॥

नागा ऊचुः –

येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ।
तद्वक्षपाटनेनासां दत्तानन्द नमोऽस्तु ते ॥ ४८ ॥

सत्यधर्मीया — येन पापेन नो रत्नानि फणागणस्थानि तथा स्त्रीरत्नानि स्त्रीषु मुख्याः स्त्रीरत्नानि हृतानि । ततो वयं हृतानिनः, हृताश्च ते नाश्च ते संत्येषामिति गतासव इत्यावृत्तस्यार्थः । तद्वक्षःपाटनेन तस्य वक्षस उरसः पाटनेन दारणेन नोऽस्माकमासां च तन्निगृहीतानां च दत्तानन्द ते नमोऽस्तु । अस्मद्दत्तानन्द इत्यपि पठन्ति ॥ ४८ ॥

मनव ऊचुः –

मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ।
भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किङ्करान् ॥ ४९ ॥

सत्यधर्मीया — मनवोऽपि दानवे निहते स्वस्वकार्याज्ञां प्रार्थयन्ते ॥ मनव इति । वयं तव निदेशकारिणो निदेशं शासनं कुर्वन्ति ते तथा । णिनिः । निदेशः शासनोपान्तभाषणेष्विति विश्वः । हे देव येन दितिजेन परिभूतः तिरस्कृतः सेतुस्त्वया क्लृप्ता मर्यादा । त्वमेतत्काले वर्तस्व त्वमेवमिति सा एषां ते तथा । करिष्याम्यहमेवमिति वरणं वा । सेतुरालौ च वरण इति विश्वः । स खलः क्रूरो नीचो वा । क्रूरे नीचेऽधमे खल इति विश्वः । भवतोपसंहृतः । अत आज्ञावज्ञाकारिमारणे प्रतिबंधकाभावात् । प्रभो ते किं करवाम । किंकरान्भृत्याननुशाधि शिक्षय ॥ ४९ ॥

प्रजापतय ऊचुः –

प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ।
स एष त्वया भिन्नवक्षास्तु शेते जगन्मङ्गलं सत्वमूर्तेऽवतारः ॥ ५० ॥

सत्यधर्मीया — हे परेश । वयं ते त्वया प्रजेशा इत्यभिसृष्टा उत्पादिताः । प्रजासर्जनार्थमस्मत्सर्जनं त्वयाऽकारीति भावः । येन निषिद्धाः प्रजा न सृजामः । वै प्रसिद्धमेतदित्याहुः । नन्वन्यायेन प्रजासर्जनं वर्जयितुः किं दौर्जन्यं तस्येत्यतोऽप्याहुः । नयेन नीत्या प्रजाः सृजामो वै । तादृशा अपि निषिद्धा येनेति । स भिन्नवक्षा भिन्नं विदीर्णं वक्षो यस्यासौ स तथा शेते । सन्देहो नास्तीति तुना द्योत्यते । हे सत्त्वमूर्ते बलज्ञानात्मकाकृते । अनेन नायं कोपः स्वरूपभूतः किन्तु तात्कालिक इति सूच्यते । ते एषोऽवतारो जगन्मङ्गलं जगतो मङ्गलं श्रेयःशुभं वा उद्दिश्य कृत इति वा । जगतां मङ्गलं तदात्मक इति वाऽर्थः । मङ्गलं श्रेयसीति विश्वः । मगि सर्पणे । मङ्गति मंग्यते वा मङ्गलम् । मङ्गेरलच् । कल्याणं मङ्गलं शुभमित्यमरः ॥ ५० ॥

गन्धर्वा ऊचुः –

वयं विभो ते नटनाट्यगायका येनात्मसाद् वीर्यबलौजसा कृतः ।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५१ ॥

तात्पर्यम् — **नटनं तु कथाबन्धो नाट्यकं भावदर्शनमि'ति गान्धर्वे ॥ ५१ ॥**

इति सप्तमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

सत्यधर्मीया — वयं विभो ते नटनाट्यगायका इति श्लोके नटनाट्यपदयोरर्थाप्रतीतेः प्रमाणेन तदर्थभेदमाह ॥ नटनमिति । नटनं तु कथाबंध आहुरिति शेषः । नाट्यकं भावदर्शनम् । अभिनयदर्शकमित्यर्थः । गांधर्वे तच्छास्त्रे ॥ संबंधमनुवर्तत इति भाष्यप्रयोगान्नपुंसकता वा । अथ मूलार्थः ॥ विभो त इत्यत्र सामंत्रितमिति विभो इत्यस्यामंत्रितसंज्ञायामामंत्रि तमित्यविद्यमानवद्भावे चापदात्परत्वात्कथं त इत्यादेश इति चेत् न । वयमित्येतत्पदात्परत्वात्तदुपपत्तेः । त इत्यव्ययं वा । नटाः कथाप्रबंधनिबंधकाः । नाट्यमभिनयो येषां दर्शनीयत्वेनास्ति ते नाट्याः । अर्श आद्यच् । गायकाः पररचितगद्यपद्यगानकर्तारश्च । (ननु कै गै शब्देऽस्मादादेच इत्यात्वे आतो युक् चिण् कृतोरिति युकि गस्थकन्निति थकनि ण्युट् चेति ण्युटि गाथको गायन इति भाव्यं तत्कथं गायका इतीति चेत् । सत्यम् । गात इति गायका इति गां गतावस्मादातो युकि ण्वुल् तृचाविति ण्वुलि युवोरनाकावित्यकि गायक इति भवति । गत्यर्थोऽपि धातूनामनेकार्थत्वस्य कुर्दखुर्देत्यत्रत्यैवकारेण ज्ञापनाच्छब्दार्थ इति चेति ज्ञेयम् ।) (अयं भागः अमुद्रिते पुस्तके नास्ति) वीर्यबलौजसा वीर्यं चास्त्रशस्त्रादिजन्यं बलं शारीरं च सामर्थ्यम् । एताभ्यां सहितं च तदोजोऽवष्टंभस्तेन करणेन । येन कर्त्रा । आत्मसात्स्वाधीनाः कृताः । त्वत्स्तुत्यादिनिरसनेन स्वस्तुत्यादिकर्तॄन् अकृतेति भावः । स एष भवता इमां चरमां दशां नीतः प्रापितः । सामान्यार्थान्तरमीरयन्ति ॥ किमिति । उद्गतः पन्था उत्पथः । तत्रप्रतिष्ठतीत्युत्पथस्थः । जनः कुशलाय मोक्षाय कल्पते समर्थो भवति किं नेत्यर्थः ॥ ५१ ॥

मन्दनन्दिनी — हे विभो स्वामिन् । ते नटनाट्यगायकाः । नटो नटनं त्वत्कथानुबद्धवचनम् । नाट्यं त्वच्छृङ्गारादिप्रभावदर्शकवचनम् । एतदुक्तं तात्पर्ये ॥ नटनं तु कथा बद्धं नाट्यकं भावदर्शनमिति । गन्धर्वा ऊचुरिति । तयोर्गायका गीतविशेषयुक्तास्तया पाठका येन वीर्यबलौजसा पराक्रमदेहबलावष्टम्भनशक्त्या । आत्मसात्कृतः स्वाधीनकृतः । स एवेत्यादि योजना । विशेषत उक्तं सामान्येनाह ॥ किमिति । उत्पथस्थो दुर्मार्गस्थः ॥ ५१ ॥

चारणा ऊचुः —

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः ।
य एष साधुहृच्छ्रयस्त्वयाऽसुरः समापितः ॥ ५२ ॥

सत्यधर्मीया — हे हरे । तवांघ्रिपङ्कजं पादकमलं भवापवर्गं भवस्य संसारस्यापवर्गस्त्यागो यस्मात्तत् । अपवर्गस्त्यागमोक्षयोरिति विश्वः । वयं साध्वाश्रिता इति हृच्छ्रयः, हृदस्मद्धृदयं श्रयत इति स तथा । हृदेव श्रय आश्रयो यस्येति स तथा वा । स एषोऽसुरस्त्वया समापितो नाशितः । अंघ्रिपङ्कजं भव आपवर्गमिति वा पदानि । आ सम्यगपवर्गो मोक्षो यस्मात्तत् । आश्रिताः । असुरः समापित इति त्वं हृच्छ्रयोऽस्मद्धृदयाश्रितो भवेत्यर्थः । असाधारण्येन साधुहृच्छ्रय इति वा ॥ ५२ ॥

मन्दनन्दिनी — साधुहृच्छ्रयः साधून्हरन्ति संहरन्तीति साधुहृतो दैत्यास्तेषामाश्रयः । स एष हिरण्यकशिपुः । भवापवर्गं भवस्य । भवाद्वा । त्यागो मोक्षो वा यस्मात्तत् ॥ ५२ ॥

यक्षा ऊचुः –

वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञै-
स्त इह दितिसुतेन प्रापिता वाहकत्वम् ।
अनुजनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश ॥ ५३ ॥

सत्यधर्मीया — हे पञ्चविंश अष्टौ प्रकृतय इत्यादिनोक्तचतुर्विंशतितत्वातिरिक्तत्वात्तत्संख्यात्वेन जीवसहिततन्निविष्टत्वेन वा पञ्चविंशस्तत्संबुद्धिः । हे नरहरे । वयं तव मनोज्ञैः कर्मभिः । गाढभारवोढृत्वादिभिः । अनुचरमुख्याश्चरेषु मुख्याश्चरमुख्यास्तेभ्योऽनु हीना इत्यनुचरमुख्या इत्युक्तिः । अनु हीने सहार्थे च पश्चात्सादृश्ययोरन्विति विश्वः । अनुचरा ब्रह्माद्या मुख्या एषां त इति वा । पक्षद्वन्द्वेऽपि नात्युक्तिरिति ज्ञेयम् । स्वावराणानां वाऽनुचरपदेन ग्रहणमिति तन्मुख्यत्वोपपत्तिर्वा । ते वयमिह दितिसुतेन वाहकत्वं प्रापिताः । विष्टचेति शेषः । तत्कृतं तेन कृतमेदद्रूपम् । अनुजनपरितापम् अनुजनानां दासानां परितापं जानता ते त्वया पञ्चतां मृतिमुपनीतः प्रापितः । पञ्चता पञ्चभावे स्यात्पञ्चता मरणेऽपि चेति विश्वः स्यात्पंचताकालधर्मः इत्यमरः ॥ ५३ ॥

मन्दनन्दिनी — पञ्चविंशश्चतुर्विंशतितत्त्वानि भगवांश्चेति पञ्चविंशतिः । तथा च पञ्चविंशतिसंख्यापूरकः । नृहरे । ते मनोज्ञैः कर्मभिरान्दोलिकावाहनादिभिरनुचरमुख्या वयं ते तादृशाः । वयं दितिसुतेन वाहकत्वं प्रापिताः । एवं तत्कृतं ते तवानुजनपरितापं जानता त्वया सः पञ्चतां मृतिम् । उपयात इति योजना ॥ ५३ ॥

किंपुरुषा ऊचुः –

वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः ।
अयं कापुरुषो नष्टो धिक्कृतः साधुभिर्यतः ॥ ५४ ॥

सत्यधर्मीया — वयं किंपुरुषास्तज्जातयः । किमु क्षेप इति समासः । किंपुरुषस्तुरङ्गवदनो मयुरित्यमरः । त्वंतु महापुरुषः । तत्र तंत्रमीश्वरो लक्ष्मीपतिरिति । यतः साधुभिर्धिक्कृतस्ततोऽयं कापुरुषः कुत्सितः पुरुषः । कुपुरुष इत्यपि साधुः पाठः । विभाषा पुरुष इति कादेशस्य वैकल्पिकत्वोक्तेः । नष्टो नाशितः ॥ ५४ ॥

मन्दनन्दिनी — किंपुरुषाः किंपुरुषजातीयाः । ईश्वर इति महापुरुषत्वोपपादनम् । कुपुरुषत्वोपपादनं धिकृत इत्यादि ॥ ५४ ॥

वेताला ऊचुः –

सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ।
यस्तान् व्यनैषीद् भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन् यथाऽऽमयः ॥५५॥

सत्यधर्मीया — सभासु राजधानीषु सत्रेषु क्रतुषु सत्तम । भगवन् तवामलं निर्दुष्टं यशो गीत्वा प्रगाय महतीं सपर्यां पूजां लभामहे । यः तां पूजां स्वयं व्यनैषीत्स्वविषयत्वेन नीतवान् । यथाऽऽमयो रोगस्तथा दुर्जनः पीडाकारी एषते त्वया हतो दिष्ट्या भद्रम् ॥ ५५ ॥

मन्दनन्दिनी — सभासु राजसभासु । सत्रेषु बहुभिः कर्तृभिरनुष्ठीयमानेषु यज्ञेषु सपर्यां पूजाम् । तांस्तादृशान् अस्मान् व्यसनेषु दुःखेषु । भृशमेष इत्यपि पाठः । ते दृष्ट्वा त्वदनुग्रहेण । आमयो रोगः ॥ ५५ ॥

किन्नरा ऊचुः –

वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ।
भवता हरे सवृजिनोऽप सादितो नरसिंह नाथ विभवाय नो भव ॥ ५६ ॥

सत्यधर्मीया — ईश । वयं तवानुगा दासाः किन्नरगणाः किंपुरुषवत्किन्नराः । अमुना दितिजेन विष्टिं निर्वेतनं कर्म । विष्टिः कर्मकरे भद्रे प्रेषणे वेतनेऽपि चेति विश्वः । कारिताः । अप पालकरहित हरे हे नरसिंह । नाथ स्वामिन् । सवृजिन एतदादिपातकसहितो भवता सादितः सूदितः । स त्वं नो विभवाय मङ्गलाय । विरुद्धो भवेन संसारेणेति विभवो मोक्षस्तस्मै भव । विभवायनो मङ्गलाश्रयो मुक्त्याश्रयो वा भवेति वा ॥ ५६ ॥

मन्दनन्दिनी — विष्टिं वेतनम् । हीनतया बलात्कारकृतकार्यम् । सवृजिनः सपापः । कलुषं वृजिनैनोघमंहो दुरितदुष्कृतमित्यमरः । अपसादितो मारितः ॥ ५६ ॥

विष्णुपार्षदा ऊचुः –

अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ।
सोऽयं ते विधिकर ईश विप्रशापात्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५७ ॥

इति श्रीमद्भागवते सप्तमस्कन्धेऽष्टमोऽध्यायः ।

सत्यधर्मीया — स्वकूटे घटितस्य शरीरवियोगो गुणायैवेति वदन्ति ॥ अद्येति । हे शरणद । हे सर्वलोकशर्म सर्वलोकस्य शर्म सुखं यस्मात्तद्धरिनररूपं सिंहनरसमाहाररूपम् । अद्भुतम् । अद्य नोऽस्माभिर्दृष्टम् । यन्निमित्तं सृष्टं सोऽयं ते विधिकर आज्ञाकृत् । विप्रशापात्तस्येति पदमेकम् । विप्रशाप आत्तः सम्पादितो येन स तथा तस्येदं निधनम् । अनुग्रहाय । असुरसहवासनिरसनेन त्वत्सन्निधिनिवासघटनेनानुग्रहार्थमेव विद्मः । विप्रशापाद्धेतोस्तस्य धरां प्रत्यागतस्येति वा । तकारश्चागते चोर इत्येकाक्षररत्नमाला । निधनमनुग्रहायेति प्रहर्षणीयं विद्म इति वा ॥ ५७ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमस्कन्धे अष्टमोध्यायः ॥ ७-८ ॥

मन्दनन्दिनी — हरिनररूपं नृसिंहरूपम् । शरणद रक्षकतया तत्प्रद । शर्म सुखकारण । अयं हिरण्यकशिपुस्ते विधिकरोऽस्मद्वद्भृत्यः । अयं को यो विप्रशापादसुराविष्टो दैत्यो हिरण्यकशिपुः स इति योजना ॥ ५७ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां सप्तमस्कन्धे अष्टमोऽध्यायः ॥ ७—८ ॥

॥ अथ नवमोऽध्यायः ॥

नारद उवाच–

एवं सुरादयः सर्वे ब्रह्मरुद्रपुरस्सराः ।
नोपेतुमशकन् मन्युसङ्रंहं सुदुरासदम् ॥ १ ॥

सत्यधर्मीया — उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी । केसरीव स्वपोतानामन्येषामुग्रविग्रह इत्याद्यागमावगमितां भक्तवत्सलतां निरूपयितुं तत्कालप्रदर्शितकोपोपशमोपायं रमातामरस-संभवभवादीनां हर्यांतरज्ञतया कृतां काञ्चन प्रह्लादपुरस्कृतिकृतिं निरूपयत्यस्मिन्नध्याये । तत्र सर्वे तत्रसुरित्युक्तमुत्तरत्र का कथा प्रवृत्तेति धर्मसंशयं शमयितुं शंसति नारद इत्याह ॥ एवमिति । ब्रह्मरुद्रपुरःसरा ब्रह्मरुद्रावेव पुरःसरौ अग्रगौ मुख्याविति यावत् । योग्यतयैतस्य सुरादय इत्येकदेशसुरपदार्थेऽन्वयः । ब्रह्मरुद्रपुरःसरा सुरा एवादयो येषामृष्यादीनां ते तथेति वाक्यसम्पत्तिर्ज्ञेया । न चैतददृष्टचरम् । यथार्था युक्तय इत्यत्र प्रकृतिप्रत्यययोर्मध्ये आदिपदेन सह युक्त्यादय इति पदनिष्पत्तिवदुपपत्तेः । इदानीं दानवसूनुं पुरस्कृत्य प्रदर्शितकोपोपशमं कुर्यां नान्यथेति

हरिमानसभावगर्भवेदिनो वेदगर्भादयो नोपेतुमशकन्नित्यप्याह ॥ सुरादय इति । सुरेषु न विद्यते दया यस्य स तथा । अत एवासुरपुरस्कृतिरिति ज्ञेयम् । सुरा भगवद्गुणा एवादयो मूलं येषां ते तथा । सुरा हरेर्गुणाः प्रोक्ता इति एकादशतात्पर्योक्तेः । भगवद्गुणानुगुणाचरणा ब्रह्मरुद्रपुरःसरा ब्रह्मरुद्र-विष्णुपार्षदान्ता इति वा । नोपेतुं समीपं गन्तुं नाशकन्न शक्ता बभूवुः । तत्र हेतुर्मन्युसंग्रहं सुदुरासदमिति । मन्युं कोपं सङ्गृह्णातीति स तथा । अनेन नेतरवत्पारवश्येन कोपसंपातः श्रीपतेरिति प्रकटितं भवति । अत एव सुदुरासदमतिदुःखसाध्यप्राप्तिं । यद्वा तत्स्वभावमावेदयति ॥ दुरासदमिति । स्वासदं दयोदये । दुरासदं तद्विपर्यय इति सुदुरासदमित्यर्थः ॥ १ ॥

मन्दनन्दिनी — प्रह्लादस्य भक्तेषु प्रसिद्धतालाभाय नृसिंहावतारे प्रह्लादे कृतवात्सल्यं दर्शयत्यस्मिन्नध्याये ॥ एवमिति । एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसरा ब्रह्मरुद्रौ पुरःसरौ श्रेष्ठौ येषां ते सुरादयः । आदिपदेन ऋष्यादयः । अत्र भक्तसमुदायेऽसुराणां मुख्यत्वम् । तत्रापि ब्रह्मरुद्रयोरिति बुद्ध्या विवेक्तव्यम् । मन्युसङ्ग्रहं कोपप्राकट्यस्वीकर्तारम् । यद्यपि भगवतो देवदत्तादेरिव न ज्वलनात्मकः कोपः । तथाऽपि शत्र्वपकारहेतुत्वाल्लोकविभीषणचेष्टाहेतुव्यापारविशेषः कोप इत्युच्यते । स च ज्ञानानन्दात्मक इति मन्तव्यम् । उपेतुं समीपं गन्तुं नाशकन्न शक्ताः । लृदित्वादङ् ॥ १ ॥

साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ।
अदृष्टाश्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ॥ २ ॥

तात्पर्यम् — 'अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः । नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नो ययौ । प्रह्लादे चैव वात्सल्यदर्शनाय हरेरपि । ज्ञात्वा मनस्तथा ब्रह्मा प्रह्लादं प्रेपयत्तदा । एकत्रैकस्य वात्सल्यं विशेषाद्दर्शयेद्धरिः । अवरस्यापि मोहाय क्रमेणैवापि वत्सल' इति ब्रह्माण्डे ॥ २ ॥

सत्यधर्मीया — साक्षाच्छ्रीः प्रेषिता देवैरित्याद्यपद्येषु द्वावेतौ नित्ययुक्तौ नित्यमुक्तावित्यादे रमयाऽदृष्टाश्रुतपूर्वत्वोक्तिः कथं रूपस्य दर्शनेन तथा भीतताप्रोक्तिः प्रह्लादस्य निर्भयतयोपगमनोक्तिश्च ब्रह्मणोऽपि प्रातिस्विकतया कादाचित्कनारसिंहत्रैविक्रमादिविक्रान्त्याद्युपासनायोग्यस्य तदुपासना-गमनाद्युक्तिश्च, गुणास्त्रैविक्रमाद्याश्च संहर्तव्या न संशयः । विरिञ्चस्यैव नान्येषामित्यिदिमानबाधितेत्यतो मानेनाभिमतार्थमाह ॥ अदृष्टेति । अन्यैरितरैः साधारणैर्जनैः । एतेन मूले मानानुसारेणाध्याहारः कर्तव्य इति सूचयति । पूर्वमदृष्टमश्रुतं चेति तत्तथा । तस्य भावस्तस्मात् । अद्भुताकारस्येति शेषः । ते साधारणजना यथा शङ्कन्ते तथा न तु वस्तुतः शङ्का रमाया इति द्योतयितुमिवेत्युक्तम् । किं कृत्यं नित्यमुक्ताया आरोपित शङ्कयेत्यत आह ॥ लोकमोहायेति । नृसिंहं नो ययौ समीपं पत्युर्नोपयाता । न त्वसामर्थ्येनेत्यर्थः । हरेः प्रह्लादस्यैव । प्रह्लादे वात्सल्यदर्शनाय प्रीत्यतिशयप्रकटनायापि ।

इदमुभयान्वयि । हरेः प्रल्हादे एवेदानीं वात्सल्यमिति दर्शनाय । हरेर्मन इदानीमेतन्मुखेन मम कोपशान्तिर्भवत्विति मनो ज्ञात्वा तथा रमावच्छङ्कित इव ब्रह्मा संस्तदा । प्रल्हादं प्रेषयदप्रेषयत् । प्रल्हादः इति क्वाचित्कः पाठः प्रल्हाददः । ज्ञात्वा च ज्ञात्वैवेत्यर्थः । हरेरिति योग्यसर्वान्वयि ।

ननु सत्सु सत्सु रमातामरससंभवभवादिषु प्रल्हादस्य तदपसदस्य पुरस्करणं मुरहरस्य न युक्तम् । सर्वथाऽयुक्तकरणस्य सर्वज्ञेऽनुपपत्तेरित्यत आह ।। एकत्रेति । एकत्रैकस्मिन्काले हरिरेकस्यैकस्मिन् । अवरस्याप्यधमेऽपि विशेषात् तदुत्तमापेक्षयाधिक्यात् वात्सल्यं दर्शयेत् । किं नटनफलमित्यत आह ।। मोहायेति । अवरस्येत्यनुवर्तते । तच्च जात्येकवचनम् । अवराणां मोहाय मोहार्थम् । अन्यथा तद्गम्यगतेर्निरधिकारिकत्वप्राप्तेरिति भावः । सर्वदा तु कथं कदाचिदेवं चेद्देववृत्तिरित्यत आह ।। क्रमेणेति । तारतम्यक्रमेण वत्सलः प्रीतिकर्ता सन्नपि कदाचित्तद्यशस इत्थं करोतीश्वर इति भावः ।। ततश्चायं पद्यार्थः ।। देवैश्चतुराननेतरैः । तस्य ज्ञात्वा मनस्तथा ब्रह्मा प्रल्हादं प्रेषयत्तदेति एतत्तात्पर्यपर्यालोचनया न भारती मेऽङ्ग मृषोपलक्ष्यते इत्यादिना च देवदेव्यनुसारिकामावगतेः । या श्रीः प्रेषिता तन्महदद्भुतमत्याश्चर्यचर्यं रूपं दृष्ट्वा । महतामप्यद्भुतमिति वा । ताश्चेन्द्रधर्मनासत्य-श्रयणाच्छ्रिय ईरिता इति श्रीशब्दोऽन्यत्रापि वर्तत इति तद्व्यावृत्त्यै साक्षादिति । लक्ष्मीत्यनुदाहरन्नुदाहरन् श्रीरिति नित्यमुरोगाऽपि सरोजालया शङ्कितेवेति हरेर्महामाहात्म्यं ध्वनयामासेति ज्ञेयम् । वक्षःस्थलाश्रिता श्रीरिति संप्रदायविद इति तत्त्वप्रकाशिकोक्तेः । अदृष्टाश्रुतपूर्वत्वात् । पूर्वमदृष्टमश्रुतं चादृष्टाश्रुतपूर्वम् । तस्य भावस्तत्त्वं तस्मात् । इतरैः साधारणजनैरिति शेषः । सा शङ्किता शङ्कितेव नोपेयाय न समीपमुपगता ।। २ ।।

मन्दनन्दिनी — उपेतुमशक्तैर्देवैः प्रार्थिता श्रीरागतेत्याह ।। साक्षादिति । साक्षान्मुख्या श्रीर्महालक्ष्मीर्देवैः प्रेषिता प्रार्थनया प्रेरिता तन्महदद्भुतं नृसिंहरूपं दृष्ट्वा । साधारणजनानाम-दृष्टाद्भुतपूर्वत्वात् भयशङ्कायामपि स्वस्या अपि भयमिति लोकमोहाय प्रह्लादे वात्सल्यप्रदर्शनाय च स्वयं शङ्कितेव सा लक्ष्मीर्नोपेयायेति योजना ।। २ ।।

प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके ।
तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ।। ३ ।।

सत्यधर्मीया — नरहरेरान्तरवेदिता वेधास्तत्कालोचितमालोच्यालपदित्यालपति ।। प्रल्हादमिति । ब्रह्मांऽतिके स्वसमीपेऽवस्थितं प्रल्हादम् । हे तात । स्वपित्र्ये हिरण्यकशिपवे कुपितम् । दुर्बलकोपो दंष्ट्राविलयमूलः किं नेत्याह ।। प्रभुमिति । यस्मै कस्मैचन कुपितस्य मया किमिति समाधिर्विधेय इत्यतः स्वपित्र इत्युक्तम् । उपैहि उपगच्छ । शमयेत्युदीर्येति शेषः । प्रेषयामास प्रेषितवान् ।। ३ ।।

मन्दनन्दिनी — अनन्तरं भगवतो लक्ष्म्याश्च मनो ज्ञात्वा प्रह्लादं प्रेषयामास ब्रह्मेत्याह ॥ प्रह्लादमिति । हे तात वत्स । त्वदर्थमेव स्वपित्रे कुपितं प्रभुं नृसिंहम् । उपेहि । उपेत्य च कोपं प्रशमयेत्युक्त्वा ब्रह्मांऽतिकेऽवस्थितं प्रह्लादं प्रेषयामासेति योजना । श्लोकद्वयाभिप्रायं मनसि कृत्वा तात्पर्यं प्रवृत्तम् ॥ अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः । नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नो ययौ । प्रह्लादे चैव वात्सल्यदर्शनाय हरेरपि । ज्ञात्वा मनस्तथा ब्रह्मा प्रह्लादं प्रैषयत्तदा । एकत्रैकस्य वात्सल्यं विशेषाद्दर्शयेद्धरिः । अवरस्यापि मोहाय क्रमेणैवापि वत्सल इति ब्रह्माण्डे ॥ अन्यै रमाब्रह्माद्यन्यैः साधारणैर्जनैः । अदृष्टाश्रुतपूर्वत्वात्तेषां भयशङ्काजनकमपि स्वयं लोकमोहाय प्रह्लादे वात्सल्यदर्शनाय च नृसिंहं नो ययावित्यन्वयः । हरेः । अपिशब्दाच्छ्रियो हरिः क्रमेण तारतम्यक्रमेण वत्सलोऽपि । अयमेकाधिको भक्त इति मोहाय । एकत्रावतारेऽवरस्याप्येकस्य विषये विशेषाद्वात्सल्यं दर्शयेदित्यर्थः ॥ ३ ॥

तथेति शनकै राजन् महाभागवतोऽर्भकः ।
उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ ४ ॥

सत्यधर्मीया — तथा तथैवास्त्वहं गच्छामीति विधिमभिधायेति शेषः । शनकैर्मंदम् । महाभागवतोऽर्भको बाल उपेत्य विधृताञ्जलिः सम्पुटीकृतकरपुटः । कायेन भुवि ननाम । तमिति शेषः ॥

मन्दनन्दिनी — तथेत्यनन्तरमुक्त्वेति शेषः ॥ ४ ॥

स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ।
उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं कालाहिनिर्दष्टधियां कृताभयम् ॥ ५ ॥

सत्यधर्मीया — बालो बालिश इति न प्रविचार्यायात इत्यचातुरीं निरीक्ष्य तूष्णीकोऽभूद्धरिः किंवा चकार कोपमथवा यदर्थमियमारभटी सममारायं कुमारः किं कुर्यादित्यनरुणाक्षः सन्करुणामङ्कूरयामासेत्यतोंऽतिमपक्षमन्वाचिनोति ॥ स्वपादेति । स्वस्य पादयोर्मूलेऽधस्तनभागे पतितम् । अथवा पूर्वश्लोके भुवि ननामेत्युक्तेः स्वपादौ मूलं पद्भ्यां भूमिरजायतेत्यादेः कारणं यस्य तदवनितलं तस्मिन्पतितम् । अनेन भक्तिपारवश्यं द्योत्यते । तमर्भकं विलोक्य देवः कृपया परिप्लुतः स्रवत्कृपारससिक्त इव तमुत्थाप्य तस्य शीर्ष्णि शिरसि करांबुजं करसरसिजम् । अधान्यधात् । तत्साधारणतामपाकरोति । कालाहिनिर्दष्टधियां कृताभयमिति । कालेनाहिना निर्दष्टानां धीरिव धीर्येषां ते तथा तेषाम् । वित्रस्तधियामिति पाठः सुन्दरः । स्फुटार्थः । कृतमभयं येन तत्तथा । कालरूपाहिना निर्दष्टा ग्रस्ता वित्रस्ता वा धीर्येषामिति ते तथा तेषामिति वा ॥ ५ ॥

मन्दनन्दिनी — आपत्कालाख्येनाहिना । निर्दष्टा ग्रस्ता धीर्येषां ते । आपन्नानां भक्तानामिति यावत् ।। ५ ।।

स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ।। ६ ।।

सत्यधर्मीया — तत्करस्पर्शधुताखिलाशुभस्तस्य करस्पर्शेन धुतं ज्ञानाङ्कुरप्ररोहप्रत्यूहरूपमखिलमितरापरिहर्तव्यत्वेन दृढमशुभममङ्गलं यस्य स तथा । धुतान्यखिलान्यशुभानि यस्येति वा । सपदि तत्क्षणे । अभिव्यक्तं परमात्मनो भगवतो दर्शनं ज्ञानं यस्य सः । परश्च परमात्मा चात्मा च जीवश्च तयोर्दर्शनं विलक्षणताज्ञानं यस्य स इति वा । पर इत्यात्मेति दर्शनं यस्य स इति वा । पदि भगवत्पादे सव्ये विलोकिते सति । सोऽभिव्यक्तपरात्मदर्शनः । वरिति ज्ञानमुच्यत इत्यादेः । हृदि तत्पादपद्मं दधौ । निर्वृतः सुखितेऽपि चेति रभसः । सुखितो हृष्यन्ती रोमाञ्चिता तनुर्यस्य सः । क्लिन्नं हृदयं यस्य सः । अश्रुलोचनोऽश्रुयुक्ते लोचने नयने यस्य सोऽभूदिति शेषः । उत्तरश्लोकेन वाऽन्वयः । निर्वृत एतदादिः सन् दधाविति वाऽन्वयः । भक्तलक्षणं त्विदमादिकं पूर्वमुक्तमनुस्मर्तव्यम् ।। ६ ।।

मन्दनन्दिनी — शीर्ष्णि करनिधानफलमाह ।। स तत्करेति ।। धुतं निरस्तम् । अभिव्यक्तं परस्य परमात्मनो बिम्बस्यात्मनः स्वस्य प्रतिबिम्बस्य दर्शनं यस्य सः । निर्वृतोऽभिव्यक्तस्वरूपानन्दो हृष्यत्तनुः पुलकिताङ्गः क्लिन्नहृद्भक्त्याऽऽर्द्रान्तःकरणोऽश्रुलोचन आनन्दबाष्पोपेतनयनः ।। ६ ।।

अस्तौषीद् हरिमेकाग्रमनसा सुसमाहितः ।
प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ।। ७ ।।

सत्यधर्मीया — भक्तिव्यक्तिफलमालपति ।। अस्तौषीदिति । असुसमाहितोऽसवः प्राणाः समाहिता येन स तथा । एकाग्रमनसैकं चिन्त्यत्वेनाग्रे पुरतो यस्य तदेकाग्रम् । तच्च तन्मनश्च तेन । अनन्यलक्ष्येणेति यावत् । सुसमाहितः सु वैषयिकसुखं सममहितेन यस्य स तथा । स्वित्यानन्दः समुद्दिष्ट इत्युक्तेः । तन्न्यस्तहृदयेक्षणस्तस्मिन्हरौ न्यस्ते विन्यस्ते हृदयं चेक्षणं च । न्यस्तानि हृदयं चेक्षणे च यस्य स इति वा । प्रेमगद्गदया प्रेम्णा भक्तिविशेषेण स्खलन्ती प्रेमगद्गदा तया तादृश्या वाचा । अस्तौषीत्तुष्टाव ।। ७ ।।

मन्दनन्दिनी — तन्न्यस्तहृदयेक्षणस्तस्मिन्न्यस्ते हृदयेक्षणे यस्य सः ।। ७ ।।

प्रह्लाद उवाच–

ब्रह्मादयः सुरगणाः मुनयोऽथ सिद्धाः
सत्वैकतानमतयो वचसां प्रवाहैः ।
नान्तं परस्य परतोऽप्यधुनाऽपि यान्ति
किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥

सत्यधर्मीया — मुनयो मन्यन्त इति मुनयो विशिष्टमतयो वशिष्ठाद्याः । ब्रह्मादयः सुरगणा ब्रह्मा विधिरादिर्येषां ते तथा । सुरगणा देवसङ्घा अथानन्तरं सिद्धा अणिमादिसिद्धिमन्तः । अथवैतत्स्तवन एव सन्नद्धा इति सिद्धाः । अथ मङ्गले सिद्धा इत्यथसिद्धाः । पेद्दभट्टोऽप्यथ स्नपयाम्बभूवेत्यत्र मङ्गलस्नानं कारितवानिति व्याचख्यौ । परतोऽक्षरत्वात् । यस्य परस्योत्तमस्य । सत्त्वैकतानमतयः । सत्त्वेन केवलसत्त्वगुणेनैकतानमनन्यवृत्तिर्मतिर्येषां ते तथा । एकतानोऽनन्यवृत्तिः इत्यमरः । वचसां प्रवाहैः । स्तुवन्त इति शेषः । तेऽपि तैरपीति वा । अधुनाऽप्यन्तोऽवसितिं न यान्ति । स्तुतिफलं तत्तोषं स्वशक्त्या नापुरिति तात्पर्यम् । स तादृशो हरिरुग्रजातेरुग्रा तामसी जातिरासुरी यस्य तस्य मे मदुपरि । तोष्टुं तोषं प्राप्तुमर्हाति योग्यो भवति किम् । न हि भवेदित्यर्थः । उग्रान्मत्तो जातिर्जननं यस्य तस्मात् । मत्येकदेशात् । मे मदुपरीति वा । किं स्तोष्टुमर्हतीति पाठश्चेदस्तौषीद्धरिमेकाग्रेति प्राक्तनश्लोकानुकूल्यं ज्ञेयम् । आर्षः षुक् । न ते विष्णवित्यादेः ॥ ८ ॥

मन्दनन्दिनी — कैमुत्यन्यायेन स्वस्तोत्रयोग्यो भगवान्न भवतीति स्तौति ॥ ब्रह्मादय इति ॥ सत्त्वैकतानमतयः सत्त्वेन स्वाभाविकज्ञानबलसमाहारेण । सत्त्वगुणोद्रेकेण वा । एकताना विस्तृता मतिर्येषां ते । परतोऽपि रमाब्रह्मादेरपि परस्य यस्य सः । उक्तजातेरसुरजातेः । मम स्तोत्रेणेति शेषः । तोष्टुं तोषयितुमर्हति किम् । न ते विष्णो इति श्रुतेरिति योजना ॥ ८ ॥

मन्ये धनाभिजनरूपतपःश्रुतौज-
स्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो
भक्त्या तुतोष भगवान् ननु यूथपाय ॥ ९ ॥

सत्यधर्मीया — उग्रजातेः कथं प्रीयेतेश्वर इति न ममावमाननं मया कर्तव्यं जात्यादिकं सर्वं सर्वेश्वरप्रीणनेऽप्रयोजकं तद्योजिका भक्तिरिति सदृष्टान्तमाचष्टे ॥ मन्य इति । धनं द्रविणम् । अभिजनः सत्कुलजननम् । रूपं सुन्दरता । तपः कृच्छ्रचान्द्रायणाद्याचरणम् । आलोचनं वा । श्रुतं श्रवणम् ।

ओजोऽवष्टम्भः । तेजो बलम् । प्रभावः शास्त्रशक्तिः । बलं सदाचारस्तीर्थक्षेत्रादिसञ्चरणं वा । पौरुषं पुरुषपराक्रमः । बुद्धिः प्रस्तुतैकतानमतिर्योग उपायश्चेत्येते । पुंसः परस्य । अक्षरपुरुषात्परस्येति व्यधिकरणं समानाधिकरणं वा । आराधनायाराधनार्थम् । तोषरूपफलपर्यवसाय्याराधनार्थम् । न भवन्ति हि । भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् । भक्तिवशः पुरुष इति स्मृतिश्रुतिप्रसिद्धिं हिराह । प्रत्यक्षसिद्धमिदमामरपामरमितीरयति ॥ भक्त्येति । भगवानिति स्तावकलभ्यातिशय-शून्यताहेतुः । यूथपाय सेनानेतरि नागेन्द्रे यूथनाथः प्रकीर्तित इत्यभिधानाद्गजेन्द्राय । भक्त्या तदीयया । तुतोष । ननु निश्चयः । अत उग्रजातेरपि किञ्चिदङ्कूरितस्वभक्तिं वीक्ष्यालक्षयित्वा जातिं दययेदेव देव इति यूथपनिदर्शनेन ज्ञापयामासेति भावः प्रल्हादस्यावसेयः । तुतोषेत्युक्तिस्वारस्यात्तोष्टुं तोषं प्राप्नुमित्यर्थौचिती चेतस्यानेया । अनेकेषु कीटादिदुर्जातिषु सत्सु मदवज्जातित्वाद्गजग्रहणमिव नृसिंहस्य सर्वथानिर्वैरतास्फोरणायेति च ज्ञेयम् ॥ ९ ॥

मन्दनन्दिनी — भक्तिं विना धनादयः परस्य पुंस आराधनाय तोषाय न भवंतीति अहं मन्ये । कुत इत्यतो यत एतदभावेऽपि भक्त्या तुतोष नन्विति योजना । अभिजनः कुलीनत्वम् । रूपं सौन्दर्यम् । श्रुतं श्रवणम् । ओजोऽवष्टम्भशक्तिः । तेजो ब्रह्मवर्चसम् । प्रभावो माहात्म्यम् । बलं देहशक्तिः । पौरुषं पराक्रमः । बुद्धिः शीघ्रग्रहणबुद्धिः । योगो ध्यानम् । यूथपो यूथनाथः । नागेन्द्र इति यावत् । सेनानेतरि नागेन्द्रे यूथनाथः प्रकीर्तित इत्यभिधानम् ॥ ९ ॥

विप्राद् द्विषड्गुणयुतादरविन्दनाभ-
पादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनात्मगेह-
प्राणः पुनाति सकलं न तु भूरिमानः ॥ १० ॥

तात्पर्यम् — द्विषड्गुणयुतात् । 'ज्ञानं च सत्यं च दमः शमश्च (श्रुतं च) ह्यमात्सर्यं ह्रीस्तिति-क्षाऽनसूया । दानं च यज्ञश्च (धृतिः) तपः श्रुतं (शमश्च) च महाव्रता द्वादश ब्राह्मणस्ये'ति भारते ॥ १० ॥

सत्यधर्मीया — विप्राद्द्विषड्गुणयुतादिति श्लोके के ते द्वादशगुणा ब्राह्मणस्योक्ता इत्यतः किञ्चिदनूद्याव्यवहिताभिहितधनादिद्वादशगुणा इत्यन्यथाप्रतीतिर्विप्रादिति तन्मात्राननुगुणत्वात्तेषामिति मनसि कृत्वोद्योगपर्वगतसनत्सुजातगतं तन्मात्रद्वादशलक्षणप्रतिपादकं पद्यमुदाहरति ॥ द्विषड्गुण-युतादिति । ज्ञानं परापरतत्त्वविषयम् । सत्यं यथार्थभाषणम् । भूतहितं वा । दम इन्द्रियनिग्रहः । शमः

शान्तिः । अमात्सर्यम् । न मद्वशोऽसाविति चित्ततोदं मात्सर्यमार्याः समुदाहरन्तीति सङ्ग्रहरामायणोक्तेः । ह्रीरकार्यकरणे लज्जा । तितिक्षा द्वन्द्वसहनम् । अनसूयेर्ष्याभावः । दानं सत्पात्रेषु वित्तार्पणम् । यज्ञो ब्रह्मयज्ञादिः । तपश्चन्द्रायणादि । श्रुतं सच्छास्त्रश्रवणं धृतिर्विषयसान्निध्येऽपि तत्स्पृहारहितता । शमो बुद्धेर्भगवन्निष्ठता । (भारते सनत्सुजातीये एव पाठभेदः दृश्यते । स तात्पर्योऽपि स्यादिति भाति । यतः मुद्रितकोशे सत्यधर्मीये व्याख्याने परिदृश्यमानानुपूर्वी एका तद्भिन्नाचानुपूर्वी अमुद्रितकोशे वर्तते ।) एते द्वादश ब्राह्मणस्य विप्रस्य महाव्रताः । व्रतमस्त्रियामित्युक्तेः पुल्लिंगत । यस्त्वेतेभ्यः प्रवसेत् द्वादशेभ्यः सर्वामिमां पृथिवीं स प्रशिष्यात् । त्रिभिर्द्वाभ्यामेकतो वा वियुक्ताः क्रमाद्वियुक्ता मौनभूता भवन्तीति तदुत्तरस्तत्स्तावकश्लोकः । तदर्थस्तु । द्वादशेभ्य एतेभ्य एतल्लाभार्थं यः प्रवसेद्गुरुकुले निवसेत् । स सर्वामिमां पृथिवीं प्रशिष्याच्छिक्षयेत् । आत्मवशे कुर्यादिति यावत् । अधिकारिविशेषस्येदं फलम् । अन्ये तु सत्प्रिया भवन्तीत्यर्थः । एतेषां गुणानां मध्ये त्रिभिः क्रमाद्युत्क्रमाद्वा । एवमुत्तरत्रापि । द्वाभ्याम् । एकत एकेन वा । वियुक्ता रहिता अपि क्रमात्किञ्चिदालस्यादिना वियुक्ता । भूतबन्धादुज्झिताः सन्तो मौनभूता मुनिभिर्ज्ञानिभिः प्राप्यत्वान्मौनो वैकुण्ठादिस्तत्र भूताः सत्तावन्तः स्थिता इति यावत् । भवन्तीति ॥ ततश्चायं श्लोकार्थः । अहं द्विषड्गुणयुतात् द्विरावृत्ताः षट् द्विषट् ते च ते गुणाश्च ज्ञानादयो द्वादशगुणा यस्य स तस्माद्विप्राच्छ्वपचं वरिष्ठं मन्ये । कीदृशाद्विप्राच्छ्वपचोच्चतामननं त इत्यत आह । अरविन्दनाभस्यारविन्दं कमलं नाभौ यस्य स तथेति । अच् प्रत्यन्वेत्यत्र योगविभागादच् । तस्य पादारविन्दयोर्विमुखो वैमुख्ययुक्तोऽभक्त इति यावत् तस्मात् । अनेन श्वपचपदोत्तरमरविन्दनाभपादारविन्दसुमुख-मित्यध्याहर्तव्यमित्यसूचि । किं जातीयो वा भवतु । भवति भगवद्भक्तश्चेत्स पवित्रमात्रमिति न किन्तु लोकपावक इत्याह ॥ तदर्पितेति । तस्मिन्हरावर्पिता भक्तिपूर्वं समर्पिता मनश्च वचनं चात्मा देहश्च गेहं च प्राणाश्च पञ्च येन स तथा । स सकलं भुवनं पुनाति पवित्रयति । भूरिमानो भूरि मानो गर्वो यस्य स उक्तद्वादशगुणः आत्मानमिति शेषः । न पुनाति । न सकलमिति किं वक्तव्यमिति भावः । तदर्पितमनोवचनेहितार्थप्राणमिति पाठो दृश्यते । सोऽतिदृश्यात्मा । अध्याहारप्रयासनिरासकत्वात् । स्वकुलमित्यपि पठन्ति । तदर्पितमनोवचनात्मगेहप्राणः सकलपावकोऽपि यो भूरिमानो महाहङ्कारस्तं न पुनातीति वाऽन्वयः । एतादृशा भक्ता एव भवन्तीति तात्पर्यम् । सर्वथा तत्कर्तव्यताबोधन एव नैर्भर्यं प्रह्लादस्येति ज्ञेयम् । श्वपचमित्याद्युक्तिस्तु श्वपचादपि कष्टत्वमित्यादिवन्नैवं कदाचिद्घटेतेत्येतद्भावेनेति मन्तव्यम् ॥ १० ॥

मन्दनन्दिनी —— भगवन्तमेव स्तोतुं भगवदर्पणबुद्धिरहितमितरगुणोत्तमजातिमनुपयुक्तं निन्दितत्वात् । तद्वन्तं स्तौति ॥ विप्रादिति । द्विषड्गुणयुतात् ज्ञानसत्यादिद्वादशगुणयुतात् ।

अरविन्दनाभपादारविन्दयोर्विमुखात् । स्वस्वातन्त्र्याभिमानत्यागस्वकीयसर्वसमर्पणबुद्धिरहितात् । विप्रात् । तदर्पितमनोवचनात्मगेहप्राणं श्वपचं वरिष्ठमहं मन्ये । कुत इत्यतस्तदर्पितमनआदिकस्यैव लोकपावकत्वात् । स्वातन्त्र्यभ्रान्तिमतस्तदभावादित्याशयेनाह ।। तदर्पितेति ।। आत्मा देहः प्राणा इन्द्रियाणि । उपलक्षणमेतत् । पुत्रमित्रकलत्रादेः । भूरिमानो बहुस्वातन्त्र्यभ्रान्तिमान् किमपि नैव पुनातीति योजना । यद्यपि स्वस्वातन्त्र्याभिमानत्यागभगवदर्पणबुद्धिरहितस्यैते गुणा न संत्येव । तथाऽपि विद्यमाना अप्यप्रयोजका गौणाः कथंचित्सम्भवन्ति । अत्र तात्पर्यमाह ।। द्वादशगुणाश्च ।। ज्ञानं सत्यं दमः शमोऽमात्सर्यं ह्रीः तितिक्षाऽनसूया दानं यज्ञस्तपः श्रुतमित्येत एव विप्रगुणत्वेन भारतोक्तत्वान्नान्ये । अप्रामाणिकत्वात् । अत एव तात्पर्यम् ।। द्विषड्गुणयुतात् ।। ज्ञानं च सत्यं च दमः शमश्च ह्यमात्सर्यं ह्रीस्तितिक्षाऽनसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रता द्वादश ब्राह्मणस्येति भारते ।। १० ।।

नैवात्मनः प्रभुरयं निजलाभपूर्णो
मानं जनादविदुषः करुणो वृणीते ।
यद् यज्जनो भगवते विदधीत मानं
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ।। ११ ।।

सत्यधर्मीया — वेदादिवेदितसपर्याचर्याधिकाररहितस्य श्वपचस्य गरिष्ठताकथनं कथं सङ्गतम् । किञ्चैकस्मिन्भोजिते विप्रे तुष्टोऽहं सह दैवतैः । नाहं तथाऽद्मि यजमानहविर्वितानैरित्यादावादिवर्णस्यैव वर्णनादाधिक्ये (इदं सार्धवाक्यद्वयं मुद्रितपुस्तके दृश्यते । परमेतदनन्वितम् । किमपि त्रुटितं स्यादत्र । अस्मदुपलब्धे मूलकोशे एतानि वाक्यानि न सन्ति च ।) किमपचितिरुचिताऽच्युतस्य स्वार्थं परार्थम् । नाद्यः । अपूर्णत्वापत्तेः । न द्वितीयः । स्वानतिशयाधायकस्य स्वीकारस्यैवासम्भावितत्वाद्दूरे परार्थं सम्भवत्वं तस्येत्यत आह ।। नैवेति । अयं प्रभुः । परिवृढः परमात्माऽविदुषो जनाद्वेदाद्युपदेशा-योग्यस्याज्ञस्यैतज्जन्मनि जन्मान्तरार्जितोर्जितान्तर्गूढज्ञानिनः सकाशात् । मानं तत्कृतमिति यावत् । सपर्यादिकं वृणीत इति यत्तदात्मनः स्वस्य सुखाप्तये नैव । कुत इत्यत आह ।। निजलाभपूर्ण इति । निजः स्वरूपभूतो यो लाभः सुखादिलब्धिस्तेन पूर्णः । अतो न स्वार्थं भजमानसम्माननमिति भावः । तर्हि तद्ग्रहणं न युक्तमित्यतो वक्ति ।। करुण इति । करुणयतीति करुणः । करुणाऽस्यास्तीत्यर्श आद्यज्वा । देवस्यैष स्वभावोऽयम् । यमेवैष वृणुते तेन लभ्य इत्यादेः । विद्वदविद्विहितमहने तरतमभावो नास्ति किमित्यतोऽस्तीत्यप्याह ।। मेति । यद्यथाऽन(मुद्रितपुस्तके अनन्तजनात् इति पाठो वर्तते । सचार्थविरुद्धः पाठः । अनञ्जनेति पाठो अर्थानुसारी)ञ्जनान्निर्दोषाद्भक्ताद्वृणीते मानं

तथाऽविदुषो मा वृणीते न स्वीकरोति । तर्हि तदनुसारी तत्सम्पादनयत्नो जीवेन कर्तव्य इत्यतो न शक्तोऽयमित्यपि वक्ति ॥ अयमिति । अयं जीवो नैवात्मनो जडात् । नैवेति निपातोऽखण्डो नञ्पर्यायः । तस्मान्न मुक्ता न च सानकचिद्विष्णुवैभवमित्यत्र न कचिदिति निपातसमुदाय इति तथाऽथवेति निपातसमुदाय इति टिप्पणीदीपिकोक्तेः । यद्वा नैवात्मन इत्यत्र न, एव, आत्मन इति विभजनानन्तरं नकारेणात्मपदस्य संश्लेषणे नात्मन इति पदमुपजायते । न आत्मेति न समासे तद्भिन्नजडोपस्थितिरिति । न चैवदृष्टचरमिति वाच्यम् । वैदिकावैदिक साधारण्येनोपलब्धेः । तथाऽहि नरावशंस शुनश्शिछेप दशदिग्रथाय नवयं हि नीतमित्यादाविति न चित्तं, चित्रयितव्यम् । प्रभुः । प्रभुर्हि जीवो जडमपेक्ष्येति गीताभाष्योक्तेः । न त्वात्मनश्चेतनात्प्रभुरित्यप्यर्थः । यर्हि ग्रहणमर्हणस्यास्य स्वभावस्तर्हि तामसादपि वृणीते किमित्यतो नेत्यप्याह । जनात्पामरात्तामसादेः । जनः पामर इति विश्वः । नैवात्मनो मानं वृणीते । नैतावदेवापि त्वनर्थ इत्यप्याह ॥ अविदुष इति । अविदो विद्वद्विरोधिनो जनानुषति दहति तापयतीति यावत् । स तथा । तत्कर्तुः फलमस्तीति तदवश्यानुष्ठेयमित्याह ॥ यद्यदिति । यद्यदित्यव्ययम् । तदिति तथा । द्वितीयस्तच्छब्दोऽध्याहार्यः । विस्तृतस्त्वेतत्प्रकारः षष्ठस्कन्धव्याख्यानान्ते ते पिबन्त्वित्याद्यृग्भाष्यटीकाद्युदाहरणेनास्माभिरनुसन्धेयः। यं यं मानं भगवते जनो विदधीत तत्तत् स आत्मने स्वस्मै स्वप्रयोजनायैव भवति । तत्र निदर्शनमाह ॥ प्रतिमुखस्येति । यथा मुखश्रीर्बिम्बीभूतमुखश्रीरादर्शप्रतिफलितं यत्प्रतिमुखं तस्य तथेति । पृथक् तस्य सपर्यानर्हत्वात् । नित्योपाध्या स्वरूपया । चिद्रूपया युतो जीवः केशवप्रतिबिम्बक इत्यादेः प्रतिबिम्बभूतस्य जीवस्य जनजनितं जनार्दनसभाजनं स्वावरसभाजितत्वे इदमावश्यकमिति भावः ।

तरतमभावेनोत्तममध्यमाधमभक्तसपर्यां गृह्णाति न गृह्णाति तमोयोग्यस्यैवेति जातिर्न प्रयोजिकेति वा वक्ति ॥ नेति । यद्यो निजलाभपूर्णो निजस्य स्वस्य लाभः प्राप्तिस्तेनैव पूर्णः । अर्थे नारायणो देव इत्यादेरेकान्तिकः । मानञ्जनात् । अनञ्जनो हि न विद्यतेऽञ्जनं दोषो यस्येति निरञ्जनः स न भवतीति मानञ्जनो दोषी । तस्मादविदुषोऽज्ञात् । मानं सत्कारमात्मनः स्वस्य न वृणीते । स जनो यद्यम् । भगवते मानं विदधीत तम् । अयं प्रभुः भगवान् करुणः सन् वृणीते स्वीकरोति । अथवा अभगवते भगवद्भिन्नाय ब्रह्माद्यंगदेवसंघाय यं मानं विदधीत तम् अयं प्रभुरात्मनः स्वस्यैवेति करुण इति वृणीते । येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः । तेऽपि मामेवेत्यादिगीतागीतेः । तच्च समानेऽप्यात्मने एकान्तिकायैव भवति । प्रतिमुखस्य श्रीरिति शेषः । सा मुखश्रीस्तत्सम्बन्धिन्येवेति योजना । अहमात्मनो मम देहस्य विषये न प्रभुः कर्तुं कारयितुं वा न समर्थः किन्त्वयं निजलाभपूर्णो हरिरेव प्रभुरित्यविदुषो विद्वांसमपि स्वं तत्त्वेन जानत इत्यविदुषः । तथा लोक आत्मानं दर्शयतो वा जनादुत्तमान्मानं करुणो वृणीते । उर्वरितं पूर्ववत् । अहं निजलभपूर्णो योग्यतया स्यामिति यो यो जनो

मध्यमोऽधमश्च भगवते आत्मने परमात्मने विदधीत तस्मादविदुष ईषज्ज्ञानाज्जनान्मानं तत्कृतसत्कारं करुणो वृणीते । तच्च सोऽपि मानः कामनानुसारेणात्मनः स्वस्यैव भवति । मुखश्रीः प्रतिमुखस्य यथेति ।

अविदुषोऽयथामतेर्जनात्पामरात् । आत्मनो जीवजातस्यायं प्रभुर्नारायणः करुणः सन्नपि तं मानं दम्भपूर्वकं सत्कारं न वृणीते । यद्यद्यो जनो मानमपदेशमात्रेण वस्तुतोऽमानमिति कृतपदस्यानुवृत्तिः । आत्मनो विदधीत । यथा दर्पणादेरिव चिद्रूपोपाधेरभावत् । अप्रतिमुखस्याप्रतिबिम्बस्य मुखश्रीर्नैवेति सम्बन्धः । अचिद्रूपोपाधिवशादीशस्तत्तत्प्रतिबिम्बानुसारेण बिम्बः कल्यादिदोषविशेषतो भवतीति भावः । प्रभुरयम् । अहं प्रभुरिति यो मतिवेगः वचसां प्रवाहैरिति प्रकृतो वचो वेगो वा येन स तथा तम् । मानमहन्ताम् । यो जनो विदधीत । स कीदृश इत्यतस्तत्स्वरूपं निरूपयति ।। निजलाभपूर्ण इति । निजलं जलभिन्नं तत्सदृशं मरुमरीचिका तद्वदाभा यस्य प्रतीतिसुन्दरस्य वैषयिकसुखस्य । तेन पूर्णः पूरितः कृतार्थ इति यावत् । तस्मात् । मानंजनात्सदोषादविदुषोऽन्यथामतेः । करुणः क्षेपकः सन्मानं न वृणीते । तर्हि तत्सपर्यापर्यायः क इत्यतो वक्ति । अभगवते आत्मने दरिद्रदैत्याद्यात्मने चेन्न विदधीतेति समुच्चीयते । यथा प्रतिमुखस्याप्रतिबिम्बस्य मुखश्रीर्बिम्बसम्पत् न भवेत्तथा तद्दशेति भावः । तर्हि भगवान्न बिम्ब इत्यायातमिति तत्राप्याह ।। यथा मुखश्रीरिति । मुखमिति श्रीर्भाषामात्रमित्यर्थः । श्रीर्वेषरचना शोभा भारती सरलद्रुमेष्विति विश्वः । यद्यद्यज्जनो यद्यद्यज्जन्मवानिति वा । यद्यदित्यव्ययम् । तद्वदिति वा ।। ११ ।।

मन्दनन्दिनी — पूर्वं भगवते सर्वसमर्पयिता सकलं पुनातीत्युक्तम् । तत्र किमर्पितं हविरादिकं भगवान्स्वीकरोति न वा । आद्येऽतिथ्यादेरिव भगवतोऽपूर्णत्वापत्तिः । द्वितीयेऽर्पयितुः फलानापत्तिरित्यत आह ।। नैवेति ।। अर्पयिता स्वस्य प्रभुत्वादिकं वेत्ति न वा । नेति पक्षे उत्तरम् । अविदुषः स्वस्वामित्वादिकमविजानतो जनान्मानं दत्तहविरादिसपर्यामात्मनो जीवस्य प्रभुरयं भगवान्नैव वृणीते । स्वस्मिन्नविद्यमानस्वामित्वाज्ञानिनि प्रीतेरभावात् । क्षुन्निवृत्तये स्वीकुरुतामिति तु न । यतो निजलाभेन स्वरूपानन्दादिना पूर्णः । अविदुष इत्यनेन विदुषो मानं तु वृणीत इति लब्धम् । तर्ह्यपूर्णत्वं स्यादित्यत उक्तम् ।। निजलाभपूर्ण इति ।। तर्हि कुतः स्वीकुरुत इत्यतः ।। करुण इति ।। तथा च दययैव स्वीकरोतीति न तदनुपपत्तिः । स्वस्य प्रयोजनाभावेऽपि दयया स्वीकारेऽर्पयितुः किं प्रयोजनं भवतीत्यतः ।। यद्यदिति । जनो विद्वान् भगवते यद्यन्मानं विदधीत तच्चात्मने आत्मन आनन्दादिलाभाय । यथा मुखश्रीर्मुखालङ्कारादिभिः प्रतिमुखस्यालङ्कारादयो भवति । तथा बिम्बस्य भगवतः पूजादिकं प्रतिबिम्बस्य पुरुषार्थाय भवतीति योजना ।। ११ ।।

तस्मादहं विगतविक्लव ईश्वरस्य
सर्वात्मना न हि गृणामि यथामनीषम् ।
नीचोऽजया गुणविसर्गमनुप्रविष्टः
पूयेत येन हि पुमाननुवर्णितेन ।। १२ ।।

सत्यधर्मीया — भक्त्यैव तुष्यति स्तोतुं च सामस्त्येन सर्वेऽपि न समर्था अतो योग्यतामनतिहाय स्तोतुर्मम नरहरिर्हि करुणां कुर्यादुत्तरत्र विमुक्तिं यच्छेदेवेति कैश्चिचच्छ्लोकैरुपश्लोकयति ।। तस्मादिति । तस्माद्भक्तिपूर्वकेणाल्पेनापि स्तवनादिनां नारायणः प्रीणति तस्मादहं ईश्वरस्य सर्वात्मना सामस्त्येन न हि शक्तस्स्तवने सन्नपि यथा मनीषं मत्यानुकूल्येन गृणामि । तत्रापि नान्तश्चापल्यमित्याह ।। विगतविक्लव इति । निःशङ्क इति यावत् । हि यस्मात्सर्वात्मना सर्वश्चासावात्मा च तेन सर्वजीवजातेन । सर्वात्मना साकल्येनेश्वरस्यानुवर्णनं न हि शक्यमिति शेषः । तस्माद्विगतविक्लवोऽहं यथामनीषं गृणामीति वा । तेन किं फलमसमस्तेन कृतेनेत्यतोऽनुष्ठातैतदेतादृशोऽपि शुध्यतीति प्रोचे । नीच इति । अजया प्रकृत्या गुणविसर्गं गुणैः सत्त्वाद्यैर्विसर्गो यस्य तं संसारमनुप्रविष्टः प्रवेशितः पुमान् अधिकारी । अत एव नीचः । येनानुवर्णितेन । भावे क्तः । ईश्वरस्य यथामनीषं कीर्तनेन पूयेत शुद्धचेत् । मुक्तो भवेदिति यावत् । यस्मादहं यथामनीषं गृणामीत्यन्वयो वा ।। १२ ।।

मन्दनन्दिनी — ननु सुदृढस्नेहपूर्वकमाहात्म्यज्ञानवता विदुषा समर्पितं भगवान्स्वीकुरुत नाम । तव किमायातम् । न च मया स्तुतिः क्रियत इति वाच्यम् । यावद्गुणकीर्तनस्याशक्यत्वात् । यत्किंचिद्गुणकीर्तनस्याप्रयोजनवत्त्वादित्यत आह ।। तस्मादिति ।। अहमीश्वरस्य स्वरूपं तस्मात्तस्याचिंत्यमहिमत्वात्सर्वात्मना न गृणामि न स्तौमि । किं त्वजया प्रकृत्या नीचो बद्धो गुणविसर्गं संसारमनुप्रविष्टः पुमान् येन यथा शक्त्यनुष्ठितेनानुवर्णितेन गुणकीर्तनेन संसारात्पूयेन्मुक्तो भवेत् । तर्हि यस्मात्तस्माद्यथा शक्त्यनुष्ठानस्यैव फलवत्वात् । तस्माद्भगवतो भक्तेषु करुणत्वादहं विगतविक्लवः । भावप्रधानो निर्देशः । मोचयति न वेति मनः सन्देहरहितो यथामनीषं यथाशक्ति यथाबुद्धि गृणामीति योजना । भगवतः करुणत्वाद्यथाशक्ति गुणकीर्तनमेव स्वीकृत्य मोचयतीति भावः ।। १२ ।।

सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो
ब्रह्मादयो वयमिवेश न चोद्विजन्तः ।
क्षेमाय भूतय उतात्मसुखाय चाऽस्य
विक्रीडितं भगवतो रुचिरावतारैः ।। १३ ।।

सत्यधर्मीया — प्रस्तुतस्तुतिं विवृणोति ॥ सर्व इति । सत्त्वधाम्नस्तव । अमी ब्रह्मादयो वयं च विधिकरा निदेशकारिणः । वयमिव । ते न चोद्विजन्त इदानीं तेऽपि न भीतिमन्तः । कुतः । अप्रलयकालत्वादेतदवतारस्यासर्वहन्तृत्वाच्च । मत्पुरस्करणाय दूरस्थितिरिति भावः । अवतारप्रयोजन-माह ॥ क्षेमायेति । अस्य भगवतो रुचिरावतारैर्मनोहरावतारैर्विक्रीडितं विक्रीडनमस्य जगतः क्षेमाय भूतयेऽनन्तरमात्मसुखाय स्वरूपसुखरूपमोक्षाय च भवति । तस्य तव रुचिरावतारैर्विक्रीडनं क्षेमाय प्राप्तपरिपालनाय । भूतये ऐश्वर्यायात्मसुखाय च भवति । अस्य भगवतः सत्त्वधाम्नो वयमसुरजातीया उद्विजन्तः सदा दानववधार्थमेव त्वयाऽवतरणाद्देव भूदेवरक्षणार्थं चेति ते वयमिव विधिकरा अपि विध्यादयो न चोद्विजन्त इति वाऽन्वयः । हे इवेशनच । इ कामः मन इति यावत् । तस्य वेशनं निवेशस्तेन चाय्यते पूज्यत इति स तथा तत्सम्बुद्धिः । इष्टदानात्तथेन्दव इत्याद्दग्भाष्यटीकोदाहरणपूर्वकं तथा वर्च इत्येतद्व्याख्या छान्दोग्यभाष्यवेदेशीयोदाहरणेन सह पदद्वयविवरणं कृतमनुसन्धेयम् । सर्वे हिंसाकाले । अमी ब्रह्मादयो वयं चोद्विजन्तो विधिकरा उतेदानीं रुचिरावतारैरेतदादिभिर्भगवतस्तवास्य जगतः क्षेमाद्यर्थं विक्रीडितमिति । उद्विजन्त उ उद्गता उद्विजद्भ्य इति ते तथा । अनुद्विजन्त इति यावत् । शिष्टं स्पष्टम् । हीति सर्वस्यार्थस्यास्य मानसिद्धतामाह ॥ १३ ॥

मन्दनन्दिनी — स्वतन्त्रमन्यं कुतो न स्तौषीत्यतः सर्वेऽपि तवाज्ञाकारिण इत्याह ॥ सर्व इति ॥ सत्त्वधाम्नो ज्ञानानन्दपूर्णस्य तव ब्रह्मादयः सर्वेऽप्यमी वयमिव विधिकरा आज्ञाकारिणः । हिशब्देन विष्णोस्तिष्ठन्ति प्रदिशेति श्रुतिप्रसिद्धिं द्योतयति । उद्विजन्तश्चात्मरक्षणोद्योगप्रयुक्तभयवन्तश्च न । तव सर्वव्याप्तत्वज्ञानेनात्मगोपायनेच्छाभावात् । ततो न विजुगुप्सत इति श्रुतेः । भगवद्विक्रीडितस्य प्रयोजनमाह ॥ क्षेमायेति ॥ अस्य भगवतो रुचिरावतारैर्विक्रीडितं क्षेमाय ब्रह्मादिरक्षणाय लक्ष्म्या भूतये भूत्यै । उतात्मसुखाय स्वस्य पूर्णानन्दत्वज्ञापनाय भवतीति योजना । सोऽयं विहार इह मे तनुभृत्स्वभावसम्भूतये भवति भूतिकृदेवेति स्मृतेः ॥ १३ ॥

तद् यच्छ मन्युमसुरश्च हतस्त्वयाऽद्य
मोदेत साधुरपि वृश्चिकसर्पहत्या ।
लोकाश्च निर्वृतिमिताः प्रतियान्तु सर्वे
रूपं नृसिंहविभवाय जनाः स्मरन्ति ॥ १४ ॥

सत्यधर्मीया — एतेनावतारेणावता भवता दयात इयदिदानीं कार्यं कार्यमिति प्रार्थयते ॥ तदिति । यतोऽयमसुरो मम पिता । चात्तदनुचरा रणे हत इत्येतद्बहुवचनान्तमावृतं सदन्वेतव्यम् । त्वयाद्य हतो हताश्च । आद्य आदिपुरुष । उपजीव्येति वा । तत्तस्मान्मन्युं यच्छ नियच्छ । अनेनेश्वरस्य क्रोधोपरोधो

नास्तीति कृत्याभावाच्चोपसंहरणं युक्तमिति सूचयति । मन्युः कोपे क्रतौ युद्ध इत्यभिधानात्प्रति-भटाघटनाद्युद्धं वा यच्छोपसंहर । इयांश्च साधुव्यापार इति पितृमारणेन मम दुःखलेशोऽपि नास्तीति पारोक्ष्येण विज्ञापयति ॥ मोदेतेति । साधुरपरमारणश्रवणासक्तः सन्नपि । वृश्चिकसर्पहत्या निरपराधमितरोपरोधं कुर्वतां हिंसाशीलानां वृश्चिकदीनामन्येन हनने कृते भाविजनपीडा गतेति मोदेत तोषं भावयेत् । अनेन मम पिताऽपि तादृशदुरावेशवानिति युक्तं कृतमिति मोदेऽहमिति ध्वनिः । यद्वा मोदेत सज्जन इति शेषः । साधुरपिवृश्चिकसर्पहत्येति पदमेकम् । रपो व्याहरणं सोऽस्यास्तीति रपी । रपलपव्यक्तायां वाचीति स्मरणात् । इन्यर्थश्च निन्दा । साधून्प्रति निन्दावचनवान् । ईश्वरो नास्तीत्यादि शासनवच्चनः । वृश्चिकशब्द उपलक्षणया सर्पादिपरः । वृश्चिकवत्तदादिवत् । सर्पति स्वयमेवोपद्रवार्थं द्रवतीति स तथा । साधुरपी चासौ वृश्चिकसर्पस्तस्य हतिस्तयेत्यावृत्त्यान्वयो वा । वृश्चिकसर्पहत्या मोदे इति अहमपि पुत्रोऽपि । अतसाधुः । अताः सततं गमिता नाशिता इति यावत् । साधवो येन सोऽसुरो हत इति मोद इति वाऽन्वयः । तर्हि पुनः पुनरागच्छदनच्छजनहननेन मोदः साधूनां भविष्यति । तच्च न विना कोपं युज्यत इति तदवस्थितिरेव हितदेत्यभिहितमभिज्ञार्थादित्यत आह ॥ लोकाश्चेति । निर्वृतिं परमानन्दं इताः प्राप्ताः स्वं गृहं सर्वे प्रतियान्तु । उत्तरत्र बाधाविधायकस्याभावात्कोपसंहरणं कुर्विति भावः । गत्वा किं कुर्वन्तीत्यतोऽप्रतिबन्धात्सदा यद्रुचयस्तत्तन्वन्तीत्याह । हे नृसिंह । आकारानु-कारनाम्ना सम्बोधयामासेति बोध्यम् । विभवाय मुक्तय इति । विभयायेत्यप्यभयदः पाठः । संसृतिभीतिहत्या इत्यर्थः । रूपं गता जनाः स्मरन्ति । नृसिंहादिकमन्यच्च दुरितादिनिवृत्तय इत्यादेः । अन्यन्नृसिंहादिकमिति सामानाधिकरण्यमिति टीकोक्तेर्मानेऽन्यन्नृसिंहादिकमित्यन्वयो ज्ञेयः । प्रतियन्तीति पाठे कोपशमनं प्रतीक्षन्त इत्यर्थः । मन्युं रणाध्वरम् यच्छ । असुरः पशुश्च हत इतःपरं कर्तव्याभावान्मन्युं ज्ञानं यच्छ । तत्प्रतिबन्धकश्चासुरो हत इत्यपि योजयन्ति । लोका ज्ञानिनो जना इतर इति वा ॥ १४ ॥

मन्दनन्दिनी — यदर्थं ब्रह्मणा प्रेषितस्तत्प्रार्थयते ॥ तदिति ॥ च यस्मादसुरस्त्वयाऽद्य हतः । साधुरपि स्वयमहिंसाशीलोऽपि वृश्चिकसर्पायमाणदैत्यहननेन मोदेत मोदते । लोकाः प्रजाश्च निर्वृतिमानन्दमिताः प्राप्ताः । तत्तस्मात् । हे नृसिंह । मन्युं कोपं यच्छ नियच्छ शान्तं कुरु । प्रसन्नेन च त्वयाऽनुज्ञाता आयाताः सर्वे देवाः प्रतियान्तु । जनाश्च विभवाय दुरितादिनिवृत्तये तव रूपं स्मरन्ति स्मरंत्विति योजना । कोपं प्रति साक्षात्प्रयोजनस्यासुरहननस्य परंपरया प्रयोजनस्य साधुमोदलोक-निर्वृत्यादेश्च जातत्वात्कोपं शामयेति भावः ॥ १४ ॥

नाहं बिभेम्यजित तेऽतिभयानकास्य
जिह्वाग्निनेत्रभ्रूकुटीरभसोग्रदंष्ट्रात् ।
आन्त्रस्रजः क्षतजकेसरशङ्कुकर्णा-
न्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥

सत्यधर्मीया — तव दयालुत्वात्त्वद्रूपमभीकरं चेदप्यपरिहार्यमियत्याऽन्यदस्ति भयं तदपहृति-हेतुमर्थय इत्याह ॥ नाहमिति । यद्वा त्वदर्थमयमवतार इति त्वं बिभेषि चेत्तर्ह्यन्तर्हितां तनुमिमां तनुयामित्यत आह ॥ नाहमिति । (इयं द्वितीयावतरणिका मूलकोशे नास्ति ।) हे अजित । ते तव रूपादतिभयानकास्यजिम्हाग्निनेत्रभूकुटीरभसोग्रदंष्ट्रादतिभयानकं यदास्यं वदनम् । जिम्हे च जिम्हानि च वक्रे वक्राणि चाग्निवद्धियमाने च ते नेत्रे च । अग्निवद्धियमानानि च तानि नेत्राणि च । भृकुट्यो रभसोऽट्टहासः स चोग्रा क्रूरा दंष्ट्रा चेति यस्य तत्तस्मात् । आन्त्रस्रज अन्त्राणामियमान्त्रा स्रङ् माला यस्य तस्मात् । ज्वाला सिंहोऽन्त्रमालिक इति वेङ्कटेशसहस्रनाम्नयुक्तेः । क्षतजकेसरशङ्कुकर्णात् क्षतजेन युक्ताश्च ते केसरा रोमविशेषाश्च । शङ्कुवत्स्तब्धौ कर्णौ चेति यस्य तस्मात् । निर्ह्रादभीतदिगिभात् निर्ह्रादाद्भीता दिगिभा दिग्गजा यस्मात्तत्तस्मात् । अरिं मत्पितरं भिन्दन्तीत्यरिभिन्दि नखानामग्राणि यस्य तस्मात् । अहं न बिभेमीत्यन्वयः । जिम्हेत्यत्र जिव्हेत्यपि पठन्ति । भ्रुकुटिर्भ्रूकुटिः स्त्रियामित्यमरे सरेफो भकार इति भ्रुरिति पठनीयम् । तथाऽपि लघुपाठश्छान्दस इति केचित् । तन्न । पृषोदरादित्वाद(त्+अ)कारे भूकुटीत्यपीति भानुदीक्षितोक्तेः ॥ १५ ॥

मन्दनन्दिनी — त्वमेव भीतः कोपशान्तिं प्रार्थयसे किं, भीतिकराश्चावयवाः के इत्यतस्तथारूपं विशिष्याभयंकरस्य करस्य शिरसि निधानान्नाहं बिभेमि । किन्तु लोको बिभेतीत्याशयेनाह ॥ नाहमिति ॥ हे अजित । अतिभयानकस्यातिभयङ्करस्य ते तव । रूपादिति शेषः । तस्मान्नाहं बिभेमीति योजना । रूपं विशिनष्टि । अग्नियुक्तनेत्रेऽग्निनेत्रे ते च भ्रुकुटी चाग्निनेत्रभ्रुकुट्यः । जिह्वाः कुटिलाश्च ता अग्निनेत्रभ्रुकुट्यश्च तासां रभसं यस्मिंस्तत् । उग्रे दंष्ट्रे यस्य तत् । तच्च तदुग्रदंष्ट्रं च तस्मात् । अनेनाग्नियुक्तत्वाज्जिह्वात्वाच्च नेत्रयोः । जिह्वात्वाद्भ्रुकुट्या उग्रत्वात्तीक्ष्णाग्रत्वाद्दंष्ट्रयोर्भयङ्करत्वमुक्तं भवतिह । आंत्रसृज आंत्राणां सृक् यस्मिंस्तत् । आंत्राणामेव भयङ्करत्वम् । सृजस्तु सुतरामिति भावः । क्षतजयुक्तानि रक्तयुक्तानि केसराणि यस्य तस्मात् । शङ्कुवत् स्थूणावत् स्तब्धौ कर्णौ यस्य तस्मात् । क्षतजकेसरं च तच्छङ्कुकर्णं च । निर्ह्रादेन ध्वनिना भीता दिगिभा यस्य तस्मात् । अरिं भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्य तस्मात् ॥ १५ ॥

त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्र-
संसारचक्रकदनात् कृशतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं
भीतापवर्गमरणं समियां कदा नु ॥ १६ ॥

सत्यधर्मीया — तर्हि निर्भीतस्य पोतस्य तव मया किं कार्यं कार्यमित्यतो विज्ञापयति ॥ त्रस्त इति । कृपणवत्सल दीनदयालो । दुःसहोग्रसंसारचक्रकदनात् दुःसहं दुःखेन सोढुं शक्यं संसाराणां चक्रं समूहस्तत्र यत्कदनं कलहः ज्ञातिभिरज्ञातिभिस्तस्मात् त्रस्तो भीतः । कृशतां कार्श्यं प्रणीतः प्रापितः स्वकर्मभिः । तत्राप्याचरितैर्बद्धः । वश कान्तौ । कान्तिरिच्छा । उशन्तीच्छन्तीत्युशन्तस्तेषु श्रेष्ठ उत्तमः । तमर्थातिशयनमवन्ध्यत्वरूपमुशने विशेषणेऽन्वेति । तत्सम्बुद्धिः हे उशत्तम । अवन्ध्यकाम । वाचो बभूवुरुशतीरित्यृग्भाष्यटीकायामुशतीरुशंत्यः प्रकाशमाना इत्युक्तेः प्रकाशवत्तमेति वा । वशकान्तावित्यस्माल्लटः शतरि ऋकारशकारलोपे शित्त्वेन सार्वधातुकतया पित्त्वेन ङिद्वद्भावे वकारस्य ग्रहिज्यावयिव्यधिवष्टीति सम्प्रसारण उशदिति रूपम् । भीतापवर्गं भीतानामेतस्मादपवर्गो मुक्तिर्यस्मात् । तेऽङ्घ्रिमूलं पादपीठमरणं शरणम् । कदा नु यथा समियां प्राप्नुयाम् । तथा दास्ययोगं वदेत्युत्तरेणान्वयः ॥ १६ ॥

मन्दनन्दिनी — मद्रूपाद्भयाभावेऽपि तव कस्माद्भयं तत्परिहारोपायं वा किमिच्छसीत्यत आह ॥ त्रस्त इति ॥ हे उशत्तम । वश कान्तौ । कान्तिरिच्छाऽमोघस्वतन्त्रेच्छ । कृपणवत्सल । दुःसहादुग्रात्संसारचक्रात्प्राप्तं यत्कदनं विषयाभिलाषस्तदप्राप्तिरूपचिन्ता तया कृशतां शोषणं प्रणीतः प्राप्तः । स्वकर्मभिर्बद्धो वशीकृतः । अत एवाहं त्रस्तोऽस्मि । एवं भीतानामपवर्गं मोचकमरणं रक्षकं तेंऽघ्रिमूलं कदा नु समियामिति योजना । अनेन संसाराद्भयं, तत्परिहाराय त्वदङ्घ्रिमूलप्राप्तीच्छाऽस्तीत्युक्तं भवति ॥ १६ ॥

यस्मात् प्रियाप्रियवियोगसुयोगजन्म-
शोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाऽहं
भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥

सत्यधर्मीया — नानाविधव्यसनानुविद्धहीनजन्म माऽस्त्वस्तु सुखानुभावक(भाविका इति मूलकोशपाठः)मखभुग्जनिरित्यतः साऽपि पितृतेजसा विलुलितसम्पदिति सपद्यनुभवः समेषामतो

भगवन्निमं दयया मया याचितो देहीत्याह ।। यस्मादिति । यस्मात् । प्रियाप्रियं प्रियं चाप्रियं च प्रियाप्रिये हिताहिते । विप्रतिषिद्धश्चेत्येकवद्भावस्तु समाहारविधान्तरप्रतीतेर्नाश्रितः । वियोगश्च सुयोगश्च तौ । प्रियाप्रिययोर्वियोगसुयोगौ यस्मिंस्तच्च तज्जन्म च तस्मिन्यः शोकः स एवाग्निस्तेन । ताभ्यां जन्म यस्य स शोकाग्निस्तेनेति वा । सकलयोनिषु समस्तजातिषु । सकला विद्यावत्यस्तासु योनिष्विति देवादियोनिषु वा । दह्यमानः तप्यमानो दुःखस्यौषधं भेषजं यत्तदपि दुःखं तत्प्रदम् । तर्हि कुतः प्रयतसे तत्सम्पादन इत्यत आह ।। अतद्धियेति । तद्धीस्तात्त्विकतदौषधधीः सा नेत्यतद्धीस्तया । इदं सुखमिति दुर्धिया । भ्रमामि । तत्र गमने मन ईप्सितं भवेदित्येकत्र निष्ठां न प्राप्नोमि । तस्मादेतदनवस्था-दुरवस्थानसमर्थं तव दास्ययोगं दास्यसम्बन्धं तल्लक्षणोपायं वा । वदोपदिश । दास्यं दास्यसि चेत्परिभ्रमश्रमशमस्तेन स्यात्तमेव वदेत्यर्थयामासेति भावः ।। १७ ।।

मन्दनन्दिनी — संसारचक्रे क्वापि जन्मनि सौख्यं नास्तीति किमित्यत आह ।। यस्मादिति ।। हे भूमन् । सकलयोनिषु प्रियाप्रिययोर्वियोगसुयोगौ जन्मशोकश्चैतल्लक्षणाग्निना दह्यमानोऽतद्धिया तच्छामकोपायज्ञानाभावेन यस्मादहं भ्रमामि तस्मात्तच्छांतिहेतुं तव दास्ययोगमुपायं वदोपदिश । न च मद्दास्यातिरिक्तं किमपि दुःखौषधं सेवनीयमिति वाच्यम् । यदौषधं तदपि दुःखमेवेति योजना ।। १७ ।।

सोऽहं प्रियस्य सुहृदः परदेवताया
लीलाकथास्तव नृसिंह विरिञ्चगीताः ।
अञ्जस्तराम्यनुगृणन् गुणविप्रमुक्तो
दुर्गाणि ते पदयुगालयहंससङ्गः ।। १८ ।।

सत्यधर्मीया — सर्वं हस्तिपदे मग्नमितिवत्सकलमुपासनाद्येतत्सुसम्पादमिति तद्दाने दानवार इत्थम्भवतीत्याह ।। स इति । सोऽहम् । हे नृसिंह । प्रियस्य सकाशादपि सुहृदोऽनिमित्तोपकारिणः । व्यत्यासो वा । सुहृदः शुद्धबुद्धेर्वा । गीताभाष्योदाहरणेन सुहृच्छब्दो व्याख्यातः प्रोक्त इत्यप्यनुसन्धेयम् । (गीताभाष्यमुदाहृत्य सुहृच्छब्दो व्याख्यातः प्राक् । तदप्यनुसंधेयम्'' इति । मूलकोशपाठोऽयम् । अयमेव सूपपन्न इति भाति ।) परदेवतायास्तव लीलाकथा विरिञ्चगीता विरिञ्चादिभिर्गीतास्ता अनुगृह्णन् गृणानः । गुणेभ्यः सत्त्वादिभ्यो विप्रमुक्तः । पुनः सम्बन्धो नेति द्योत्यते विप्राभ्याम् । दुर्गाण्येतदितराशक्यतरणानि दुःखानि । आगच्छन्नरकाणि वा । तरणसहकारिणोऽप्यनेनैव सुमिला इत्याह ।। त इति । पदयुगम् । पादयोर्युगलं तदेवालय आश्रयो येषां ते च ते हंसाः परमहंसास्त्यक्तसंसारास्तेषां सङ्गो यस्य स तथा सन्नञ्जस्तरामीत्यन्वयः । हंसानां पक्षिणां सङ्गे तद्वद्दुर्गोत्पतनं सुलभसाधनमिति ध्वनिः ।। १८ ।।

मन्दनन्दिनी — किमनेनापि दास्ययोगेन सर्वदुर्गाणि तरसि किमित्यत आह ॥ सोहमिति ॥ हे नृसिंह । सः संसारे क्लिश्यमानोऽहं प्रियस्य सुहृदः परदेवतायास्तव विरिंचगीता लीलाकथा अनुगृणन् योग्यतानुसारेण गृणन् । गुणविप्रमुक्तस्त्रैगुण्यलक्षणपाशाद्विमुक्तस्ते पदयोर्युगं पदयुगं तदालयो येषां ते हंसा नारदादयस्तत्सङ्गवान्सन् दुर्गाण्यंजस्तरामीति योजना ॥ १८ ॥

बालस्य चेह शरणं पितरौ नृसिंह
आर्तस्य चागदमुदन्वति मज्जतो नौः ।
तप्तस्य तर्पणविधिर्यदिहाञ्जसेष्ट-
स्तद्वत्प्रभो तनुभृतां त्वदुपासकानाम् ॥ १९ ॥

सत्यधर्मीया — ननु मात्रादय इष्टतया संप्रतिपन्नाः सन्ति तत्कथमहं प्रियादपि सुहृदित्यत आह ॥ बालस्य चेति । सर्वत्रापि काकाऽन्वयः । नेह शरणं नृसिंह नार्तस्य चागदमित्यपि गदन्ति । तत्र विना काका विवक्षितार्थसिद्धिर्ज्ञेया । पितरौ पितामात्रेत्येकशेषः । पितरौ मातापितरौ । बालस्य शरणं रक्षकौ । नियत्या किम् ? न । रुक्माङ्गदादिभिर्धर्माङ्गदादिमारणदर्शनात् । रुक्माङ्गदादीनां स्वकुमार-मारणयत्नदर्शनात् (मूलकोशपाठोऽयम्) । तत्पाल्यमानानां बालानां यथायथं व्यथादर्शनाच्च । आर्तस्य रोगार्तस्यागदमगद औषधं शरणं रक्षको नात्यन्तिकमित्यर्थः । केषामित्यतः त्वदुपासकानां अन्यो-पासकानाम् । तत्वावन्यपर्यायावित्युक्तेः । औषधनिषेवणेऽपि मरणादर्शनारिरिति भावः । नृसिंहश्च आर्तस्येत्यत्रासंधिरेतेषां आत्यन्तिकेष्टसंधाननिदानतानास्तीति द्योतयितुमिति ज्ञेयम् । उदन्वति उदन्वानुदधौचेति निपातितः । उदधौ निमज्जतः पुंसः शरणं नौः नौका तस्याः तत्स्थितिमज्जनैः सह मज्जनदर्शनान् । तप्तस्य निदाघादिना । तर्पणविधिः जलादिनाप्यायनविधिः शरणम् । पानकालेऽपि कस्यचित्कचिन्निवृत्तिदर्शनात्तद्वत्वमिष्टः । अगदमुत् अनु इति छेदः । अनु स्वीकारानन्तरं अगदेन मुत् किं नेत्यर्थः । इदानीं न लिङ्गभङ्गः । समुद्रादावतिमज्जतः नौः इष्टा न । किं तर्हि अंजसा व्यभिचारेण केषामित्यतोप्याह । त्वदुपासकानां तनुभृतामिति । त्वदुपेक्षितानामित्यपि लक्ष्यते पाठः । बालादीनां त्वदुपेक्षितानां पित्रादयः शरणं किं नेति तत्र योजना ज्ञेया । (अत्र मुद्रितामुद्रितकोशयोः वाक्यानुपूर्वी व्यत्यस्ता । अमुद्रितकोशानुसारी पाठोऽत्रानुसृतः) यद्बालादीनां पित्रादय इष्टा यत्त्वं ज्येष्ठस्तत्तव गुणान्गृणन्दुर्गाणि तरामीत्यन्वयो वा । तद्वत्प्रभवित्येकं पदम् । पितरावित्यारभ्य तर्पणविध्यन्तास्ते संत्यस्मिन्निति । तद्वान्सर्वरूप इत्यर्थः । तद्वांश्चासौ प्रभुश्च तत्सम्बुद्धिः ॥ १९ ॥

मन्दनन्दिनी — प्रियस्येत्यनेनेष्टत्वमुक्तम् । तद्दृष्टान्तमाकलय्योपपादयति ॥ बालस्य चेति ॥ चशब्दोऽनुक्तस्य पांथस्य समुच्चये । यदित्यस्य यद्वदित्यर्थः । इष्टशब्दस्य लिङ्गविपरिणामादिना

प्रत्येकमन्वयः । त्वमिति शेषः । एवं च । हे प्रभो नृसिंह । पांथस्य शरणं गृहमिष्टं यद्वदेवं बालस्य पितरौ । आर्त्तस्य रोगार्तस्यागदमौषधम् । उदन्वति समुद्रादौ मज्जतो नौर्नौका । तप्तस्य घर्मतप्तस्य तर्पणविधिः शीतलोदकपानविधिः । त्वदुपासकानां तनुभृतां त्वं तद्वदंजसेष्ट इति योजना । इष्टत्वेपि वैलक्षण्यद्योतनायासन्धिः ।। १९ ।।

यस्मिन् यतो येन च यर्हि यस्य
यस्मै यथा यमुत यस्त्वपरः परो वा ।
भावं करोति विकरोति पृथक् स्वभावः
सञ्चोदितस्तदखिलं भवतः स्वरूपम् ।। २० ।।

तात्पर्यम् — 'कर्तृकर्मक्रियादीनां सत्ता वृत्तिस्तथैव च । विष्णवधीनं यतः सर्वं सर्वरूपस्त-दुच्यत' इति ब्रह्मतर्के ।। २० ।।

सत्यधर्मीया — यस्मिन्यतो येन चेत्यादिश्लोके कारककलापः स्वरूपभूतो भगवत इति प्रतीयते । तां प्रमाणसम्प्लवविरुद्धां मानेनावमानयति ।। कर्तृकर्मक्रियादीनामिति । आदिपदेन मानानुदितानां मूलेऽधिकरणादीनां ग्रहणम् । तेषां सत्ता स्थितिः वृत्तिः प्रवृत्तिः । चशब्देन प्रमितेर्ग्रहणम् । एवशब्दस्तत्तस्मादेवेति सम्बध्यते । यत एतत्सर्वं विष्णवधीनं तस्मादेव सर्वरूप उच्यते । न तु तादात्म्यादिति भावः । अन्यत्रापि यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्याद्युक्तेः ।। अथ मूलार्थः ।। ननु कर्तृत्वादिकं दृश्यतेऽन्यत्रापि । तत्कथमिष्टता निष्टङ्किता ममैवेत्यतस्तेषां त्वन्निघ्नत्वात्तत्त्वतस्त्व-मेवेष्ट इति मम वाण्यव्यभिचारिणीति विज्ञापयति ।। यस्मिन्निति । यस्मिन्नधिष्ठाने । यत उपादानात् । येन तोयादिना । यर्हि काले । यस्य दैवादेः । सहायेन यत्सम्बन्धि यस्मै प्रयोजनाय । यथा येन प्रकारेण यमभीप्सिततमं घटादिकम् । यः कुलालादिः । अपरः परः । बहोरेतादृशस्य कर्ता हिरण्यगर्भादिः । भावं पदार्थं परोऽपरश्च पृथक्स्वभावः । कार्यविलक्षणाकारः सञ्चोदितो येन त्वया प्रेरितः करोति । उत विकरोति विविधतया विशिष्टतया करोति । विकारमापयतीति वा तत् अखिलं कार्यकारणलक्षणं भवतः स्वरूपं त्वदधीनसत्तादिकमिति तथोच्यते । न तु तादात्म्यात् । सञ्चोदितो यः परश्चापरश्च भावं करोति विकरोति । तच्चोदकस्त्वम् । पृथक्स्वभावस्तद्विलक्षणज्ञानानन्दस्वभावश्चेदपि तदखिलं भवतः स्वरूपमुच्यत इत्यन्वयो वा । यः कर्ता सोऽपरो नीचः । चोदकस्त्वं पर उत्तम इति वा । आन्तरङ्गिको भावश्च मानानुसारेण ग्रन्थकृतः सु अरूपं स्वरूपमिति ज्ञेयः ।। २० ।।

मन्दनन्दिनी — उक्तरीत्या ममेष्टत्वेऽपि स्वातन्त्र्याभावात्कथं फलं दास्यामीत्यतः स्वातन्त्र्यं वर्णयति ।। यस्मिन्निति ।। अत्र सर्वकारकाणां सप्रभेदानां प्रकाराणां च भगवदधीनत्वमुच्यते । परो ब्रह्मादिः । अपरः स्वर्णकारादिः । तथा च यः परो ब्रह्मादिः पृथक्स्वभावः । भवता सञ्चोदितः । यस्मिन् ब्रह्माण्डे । यतः पाञ्चभौतिकपञ्चलक्षणोपादानात् । उपादानावशिष्टभागस्यापादानत्वम् । यर्हि सृष्टिकाले कालदेशभेदेनाधिकरणं द्विविधम् । येन निमित्तभूतदृष्टादृष्टकरणेन यस्य जनस्य सम्बन्धि । शेषत्वं षष्ठ्यर्थः । यस्मै देवसमूहाय । यथा येन संस्थानविशेषादिप्रकारेणायं भावं चतुर्दशलोकादिकं करोति । उत्पादयति । विकरोति विविधं करोति । यश्चापरः स्वर्णकारादिः । तत्राप्येवं द्रष्टव्यम् । तदखिलं भवतः स्वरूपं सर्वात्मना त्वदधीनमिति योजना । अत एव तात्पर्यम् ।। कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैव च । विष्ण्वधीनं यतः सर्वं सर्वरूपस्तदुच्यत इति ब्रह्मतर्के ।। सत्ता स्वरूपसत्ता । वृत्तिः प्रवृतिः । अर्थक्रियाकारित्वम् । प्रमितेरप्युपलक्षणमेतत् । सर्वरूप इति बहुव्रीहिः । सर्वस्वरूप उच्यत इत्यर्थः । अनेनाधीनं स्वरूपमुच्यत इत्युक्तं भवति ।। २० ।।

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ।
छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ।। २१ ।।

तात्पर्यम् — दशेन्द्रियप्राणमनोऽरम् । मूलं मन एव संसारचक्रस्य ।। २१ ।।

सत्यधर्मीया — माया मनःसृजतीति श्लोके षोडशारमित्युक्तेस्तान्यराणि कानीति न ज्ञायतेऽतस्तत्स्वयं निरूपयन्पूर्वार्धेनोत्तरार्धस्यान्वयं च दर्शयति ।। दशेन्द्रियेति । दशेन्द्रियाणि प्राणपञ्चकं वृत्तिभेदात्कारणं मनश्चेति षोडशाराणि यस्य तदिति । मूलं मूलोपेतं मनस्तदेव संसारचक्र-मित्यन्वयः ।। अथ श्लोकार्थः ।। भक्तिव्यक्तिमत्त्वत्प्रसादं विना तत्तरणं दुःशकमिति सा च न चेन्द्रियनिग्रहमन्तराभिव्यज्यत इति । तज्जय एवैतत्पराजयहेतुरिति संसारस्वरूपं निरूपयति ।। मायेति । माया चित्प्रकृतिः । अजया चित्प्रकृत्याभिमता । उदितगुणानुमतेनोदिताः कार्योन्मुखा गुणा सत्वादिगुणास्तदनुमतेन तेन कालेन । यद्वोदितगुणा सती । अनुमतेन तदनुसारिकालेन चेति । अनुमतेनेत्यावर्तते । अनुमतमनुमतिस्तेन दैवाद्यनुमत्या । अनुमतेन देवादिनेति वा । सहकारिणा पुंसो जीवस्य । कर्ममयं नानाकर्मविकारास्पदम् । बलीयो मार्गान्तरापरिहार्यत्वाद्बलिष्ठम् । छन्दोमयं सङ्कल्पविकल्पेच्छारूपम् । यन्मनः कार्यं वृत्तिरूपं सृजति तन्मनोमूलकं संसारचक्रम् । त्वदन्य-स्त्वद्विमुखः । हे अज । एतत्क्षेपकः कोऽतिचरेन्न कोऽपि तरिता स्यदित्यर्थः । चक्रं चेद्भवितव्य-मरेरित्यत आह ।। अजयार्पितषोडशारमिति । अर्पितानि षोडशसङ्ख्याकान्यराणि चक्राङ्गानि । दलानीति यावत् । इन्द्रियदशकं प्राणादिपञ्चकं चैकं मनश्चेति यस्य तत्तथा । अरं शीघ्रे च चक्राङ्ग इति

विश्वः । प्रकृत्येत्यनुक्त्वोक्त्वाऽजयेति त्वदनुग्रहेणाचित्प्रकृतिः क्षेप्येति तद्यत्नो न निष्फल इति ध्वनयति । अजगतिक्षेपणयोरिति स्मरणात् । केऽपि न तारितश्चेत्तद्याश्चा कुत इत्यतोऽप्याह ॥ अजक इति । अज एवाजको ब्रह्मा त्वदन्यस्त्वद्भिन्नः पुंसः परमपुरुषस्य तवानुमतेन त्वज्ज्ञानेनातितरेत् । अजकस्त्वां प्रति भक्तियुक्त आगच्छंस्त्वदन्यः सोऽप्यतितरेदित्यर्थवत्यर्थनेति भावः ॥ २१ ॥

मन्दनन्दिनी — भगवत्प्रसादमन्तरा मनोमूलस्य संसारचक्रस्य दुस्तरत्वमाह ॥ मायेति ॥ माया चित्प्रकृत्यनुगृहीताऽचित्प्रकृतिः चोदितगुणानुमतेन भगवत्प्रेरितसत्त्वानुगुणानुकूल्येन पुंसः कर्ममयं पुण्यपापादिकारणीभूतं छन्दोमयं सङ्कल्पविकल्पाद्यात्मकं बलीयो दुर्निग्रहं मनः सृजति । यन्मनोऽजया प्रकृत्याऽर्पितषोडशारमर्पितानि षोडश दशोन्द्रियाणि पञ्चप्राणा मनश्चेति । अराणि यस्य तत् । संसारचक्रम् । षोडशारमध्ये पतितस्यापि मनसः प्राधान्यात्तस्यैव संसारचक्रत्वाभिधानमेतत् । हे अज । त्वदन्यः कोऽतितरेदतितारयेत् अन्तर्णितणिच् इति योजना । त्वमेव मनोनिग्रहादिकं कारयित्वोत्तम-प्रसादमासाद्य संसारचक्रं तारयेति भावः । षोडशारपदस्य पृथङ्मनोग्रहणस्य च तात्पर्यं कथितं तात्पर्ये ॥ दशेन्द्रियप्राणमनोऽरम् । मूलं मन एव संसारचक्रस्येति ॥ दशेन्द्रियप्राणमनोलक्षणषोडशारमित्यर्थः । मन एव मूलं प्रधानमिति तदेव संसारचक्रमिति कथितमित्यर्थः ॥ २१ ॥

स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना
कालो वशीकृतविसृज्यविसर्गशक्तिः ।
चक्रे विसृष्टमजयेश्वर षोडशारे
निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ॥ २२ ॥

सत्यधर्मीया — यदर्थं तं स्तुतवांस्तत्प्रस्तुतं विज्ञापयति ॥ स इति । नित्यविजितात्मगुणो विजिता आत्मनो देहस्य जीवस्य वा गुणा उत्पत्त्यादयो दुःखादयो वा येन सः । हे नित्यं विजितापराजित । आत्मगुण आत्मनः स्वस्वरूपभूता गुणा यस्य स वा । तदुभयहेतुमाह ॥ स्वधाम्नेति । स्वतेजसा गुणानामात्मत्वेऽपि स्वे महिम्नीत्यादेः स्वधाम्नेति स्वधामत्वेनेति हेतूक्तिः । कालः । सर्वगुणः कालप्रेरक इति वा । विष्णुः सर्वगुणत्वेन काल इत्यभिधीयत इति दशमतात्पर्योक्तेः । साऽजापि त्वदायत्तेति त्वमेव तद्वियोजक इत्याह ॥ वशीकृतेति । वशीकृतेति नच्व्यर्थो मुख्योऽत्र ग्राह्यः । इतरावशाः स्ववशत्वेन सम्पद्यमाना वशीकृताः । विसृज्यानां स्रष्टुं योग्यानां विसर्गः सृष्टिस्तद्धेतवो याः शक्तयस्तन्निष्ठतया प्रतीयन्ते ता येन सः । षोडशारे चक्रे संसारे । अजया विसृष्टम् । निष्पीड्यमानं बाध्यमानम् । त्वां प्रपन्नं शरणागतं माम् । हे विभो । ईश्वरेत्यादिकं तत्तत्कर्षणसाधनोत्कर्षहेतुः । स त्वमुपकर्ष त्वत्समीपं प्रकर्षय । हीतीश्वरत्वादेः प्रसिद्धतामाह । एतस्येन्द्रियादिषोडशकस्य घटको

यथाऽसि तथाऽसि विघटकोऽपि समासादितप्रसादस्येति वाऽऽह । षोडशारे षोडशस्य शरीरसम्बन्धिनः प्राकृतस्यारे वैरिन्निति ।। २२ ।।

मन्दनन्दिनी — उक्तविधसंसारचक्रे स्वस्य निष्पीड्यमाणत्वमुक्त्वा ततोऽपकर्षं प्रार्थयते । तत्त्वमिति । हे विभो ईश्वर नृसिंह । त्वं स्वधाम्ना स्वसामर्थ्येनैव नित्यविजितात्मगुणो नित्यविजिता दूरनिरस्ता आत्मनो देहस्य गुणाः स्वरूपोत्पत्तिध्वंसादयः । जीवस्य वा देहयोगवियोगादयो येन सः । कालः कलयति सर्वमिति सर्वज्ञः । वशीकृतविसृज्यविसर्गशक्तिर्वशीकृता स्वाधीना विसृज्यानां जीवानां विरिंचादिगता विसर्गशक्तिर्यस्य सः । अजया प्रकृत्या षोडशारे चक्रे विसृष्टं निष्पिड्यमाणं च मां त्वां प्रपन्नं ततोऽपकर्षेति योजना ।। २२ ।।

दृष्टा मया दिवि विभोऽखिलधिष्ण्यपाना-
मायुः श्रियो विभव इच्छति यान् जनोऽयम् ।
येऽस्मत्पितुः कुपितहासविजृम्भितभ्रू-
विस्फूर्जितेन लुलिताः स तु ते निरस्तः ।। २३ ।।

सत्यधर्मीया — सुरतादावपि न सुरता मम मतिरिति प्रोक्तं सङ्कुच्य विविच्योच्यते ।। दृष्टा मयेति । यानिति प्रथमान्तो वा । स्वयं गच्छन्नेवेच्छति । फलं न भवतीति यावत् । अयं जन इच्छति । दिवि । अखिलधिष्ण्यपानां समस्तेन्द्रादिसिंहासनाधीश्वराणामायुर्जीवितकालः श्रियः सम्पदः । शोभा वा । विभवो निभृतिः पोषो धनं वा । विभवो निभृतौ धन इति विश्वः । ते मया दृष्टा इति । दृष्टामया दृष्ट आमयो ध्वंसरूपरोगो येषु त इति वा । सोपद्रवा इति यावत् । तर्हि तदुपद्रवदान्वद तान्हत्वा त्वां निश्चिन्तं तनुयामथवा पित्र्ये सिंहासने तिष्ठेत्यतस्तन्नश्वरतामीश्वरं प्रत्यावेदयति ।। य इति । येनाके विभवादयोऽस्मत्पितुर्हिरण्यकस्य कुपितेन सहितो यो हासो वासवाद्यपहासः । कुपितस्य कोपस्य हासो विकासो वा तेन विजृम्भिते स्फुटिते । जृम्भितं करणे स्त्रीणामीहास्फुटितयोरपीति विश्वः । ते च ते भ्रुवौ च तयोर्विस्फूर्जितं भङ्गस्तेन लुलिता विनाशितास्ते च मया दृष्टा इति । दृष्टामया इति वा सम्बन्धः । तव दया न सोदया चेत्स तादृशोऽपि ते त्वया निरस्तः । अतः पित्र्यमपि त्वदत्रातं माऽस्त्विति भावः ।।

मन्दनन्दिनी — देवताविभवापहर्ता त्वया हत इति स्तौति ।। दृष्टा इति ।। हे विभो नृसिंह । अखिलधिष्ण्यपानामिन्द्रादीनाम् । आयुर्मन्वन्तरायुः श्रियस्त्रैलोक्यसम्पदो विभवो हिरण्यलक्षणो योऽर्थ एते ये दिवि मया योगदृष्ट्या दृष्टाः । याश्च यान् जन इच्छति । ते यस्य अस्मत्पितुः कुपितहासो दुष्टहासस्तेन विजृम्भितयोर्विस्मृतयोर्भ्रुवोर्विस्फूर्जितेन चेष्टाविशेषेण विलुलिता विनाशिताः । स तु तादृशो दैत्यस्त्वया निरस्त इति योजना ।। २३ ।।

तस्मादमूस्तनुभृतामहमाशिषो ज्ञः
आयुः श्रियं विभवमैन्द्रियमाविरिञ्चात् ।
नेच्छामि ते विलुलिता गुरुविक्रमेण
कालात्मनोपनय मां निजभृत्यपार्श्वम् ॥ २४ ॥

सत्यधर्मीया —— स्थूलदृशविवक्षया अस्मत्पितुरित्याद्युक्तं परमरहस्यं तु तदपि त्वयैव कारितमीरयति तस्मादिति । यस्मादेते क्षणभङ्गुरास्तस्मात् । ज्ञो जानातीति ज्ञ एतदस्थिरतां जानन्नहं तनुभृतां देहधारिणाममूराशिषोऽस्थिरा इति । आविरिञ्चात् । विरिञ्चशब्दः सत्यादितल्लोकपरः । तमभिव्याप्यायुः श्रियं विभवमैन्द्रियं तदिन्द्रियोपभोग्यं विषयं च नेच्छामि । तदस्थिरतां स्थिरयति- कालात्मना कालरूपिणा गुरुविक्रमेणाप्रतिहतसामर्थ्येन । ते त्वया विलुलिता इति । एतत्सङ्गं व्युदस्य निजभृत्यपार्श्वं स्वाभाविकसेवकसन्निधिं मामुपनय तत्कूटघटितं मां कुर्विति भावः । ये न तादृशा न तत्पार्श्वमुपनयेत्यप्याह ॥ निजभृत्यपार्श्वमिति । निजानां भृतिर्येषां त उदरम्भरयस्तेषामपार्श्वमसमीपमुपनयेति । सुखदुःखसम्पत्तिविपत्त्यन्यतरेतरत्वान्निजभृत्यपार्श्वोपनयनं किमिति मतिमन्नज्ञवद्विज्ञापयसि त्वमित्यत उत्तरत्र विवरिष्यंत्सङ्कुच्य वदति ॥ हे उपेति । यस्मादाप्तान्निजभृत्यपार्श्वात् या गुरुविक्रमेण कालात्मना कालप्रयत्नेनाविलुलिताऽनाशिता तां श्रियं नयमां यमोपद्रवशून्यतया तद्रहिताम् । ज्ञः ज्ञानिजनः । आहेति शेषः । तादृशतनुभृतामायुर्नित्यायुर्विमुक्तिरिति यावत् । तस्मात्तं ना पुमानहमिच्छमीत्यावृत्त्यान्वयोऽन्तर्लापीति ज्ञेयः ॥ २४ ॥

मन्दनन्दिनी —— संसारतरणमेव किं प्रार्थयसे । आशिषः प्रार्थयस्वेत्यत आह ॥ तस्मादिति ॥ हे नृसिंह । उरुविक्रमेण दुर्निरसनसामर्थ्येन कालात्मना कालनामकेन ते त्वयाऽऽशिषो विलुलिता भवन्ति । तस्मात्स्वर्गमारभ्याविरिंचाद्विरिंचलोकपर्यन्तम् । अनुभूयमाना आयुः श्रियमैन्द्रियभोग्यं विभव एतल्लक्षणास्तनुभृताममूराशिषः । ज्ञः मन्वन्तरायुषः स्वर्ग्या महर्लोके तु काल्पिका इत्यादिना कालपरिमितत्वं जानन् अहं नेच्छामि । अतो निजभृत्यपार्श्वं मामुपनयेति योजना ॥ २४ ॥

कुत्राशिषः श्रुतिसुखा मृगतृष्णरूपाः
क्वेदं कलेवरमशेषरुजां विरोहम् ।
निर्विद्यते न तु जनो यदपीह विद्वान्
कामानलं मधुलवैः शमयन् दुरापैः ॥ २५ ॥

सत्यधर्मीया —— इयन्तमायासं कायनिकायादनुभवतोऽपि जिज्ञासा तस्मिन्नोत्पद्यत इत्याह ॥ कुत्रेति । आशिषः श्रुतिः श्रवणेन्द्रियं सुखयन्तीति तास्तथा । श्रुत्या श्रवणमात्रेण सुखं याभिरिति वा । श्रुत्या वार्तयैवेति वा । श्रुतिः श्रोत्रे तथाऽऽम्नाये वार्तायां श्रोत्रकर्मणीति विश्वः । अखिलैः श्रुतेरिति च । मृगतृष्णरूपा । मृगतृष्णा मरीचिकेत्यमरः । ह्रस्वश्छान्दसः । यद्वा मृगाणां तृष्णाऽस्त्यस्यामित्यर्श आद्यजिति भानुदीक्षितव्याख्यानात् । मृगाणां तृष्णा साऽस्त्यस्येति स्थलग्रहणेन पुन्नपुंसकलिङ्गतौ-चित्याद्ध्रस्वता ज्ञेया । तस्य रूपमिव रूपं येषामिति वा । अशेषरुजामशेषाश्च ता रुजश्च ताम् । विरोहं विशेषतो रोहः प्रादुर्भावो यस्य तत्तथा । कलेवरं शरीरं क्व । आशिषामशेषरोग्यङ्गस्य चानुबन्धे सत्यपि मृत्युरन्तरागच्छन्दुष्परिहर इति । यदपि यद्यपि विद्वान् जानन् जनः कामानलं कामोऽभिलाषा एवानलो न विद्यतेऽलं पर्याप्तमिति मतिर्यस्य सोऽनलस्तम् । यथोक्तम् । दुष्पूरेणानलेन चेत्येतद्व्याख्यावसरे गीताभाष्ये । यद्यपीन्द्रादिपदं प्राप्तं पुनर्ब्रह्मादिपदमिच्छतीत्यलम्बुद्धिर्नास्तीत्यनल इति । मधुलवैर्मधु नीरं क्षीरं वा । मधु क्षौद्रे जले क्षीर इति विश्वः । तस्य मधुनो लवैर्बिन्दुभिरपरत्र सुखलेशैः । तेऽपि दुरापा दुःखप्राप्या इति तैः शमयन् शान्तिं कुर्वन् । इह देहादौ न निर्विद्यते न विरज्यते किन्तु रज्यत एवेति तुर्द्योतयति । ननु राजराज्याद्याशिषः स्युश्चेदोङ्करोषि किमित्यतो न ता अपि सम्मता ममेत्यप्याह ॥ कुत्राशिष इति । कुं भूमिं त्रायन्ते पालयन्तीति कुत्रा राजानस्तेषामाशिषः क्वेत्युभयत्रान्वेति । कोऽपि न निर्विद्यते किमित्यत एतादृशो निर्विद्यत इत्यप्याह । निर्विद्येति । निर्वेदं प्राप्य यदपीति विद्वान् यस्य कलेवरस्यापीतिमप्ययं विद्वानपरोक्षज्ञानी तेन कलेवरेणैव कामानलं शमयन्यः तस्य कुत्राशिष इत्यन्वयो वा ॥ २५ ॥

मन्दनन्दिनी —— कालपरिमितत्वात् स्वर्गाद्याशिषामिच्छा माभूत् । इह लोके आशिषः कुतो नेच्छसीत्यत आह ॥ कुत्रेति ॥ इह त्वित्यन्वयः । तुशब्देन स्वर्गाद्यपेक्षया वैशेष्यं द्योतयति । इह तु लोके आशिषः कुत्र सन्ति । आशिषो मे भवन्तीत्याशामात्रम् । तथा चाशिषो भवन्तीति मित्रवचनादिना श्रुतिसुखा एव श्रवणसुखजनकभ्रान्तिविषया एव । यथा मृगतृष्णासु मरुमरीचिकासु जलं पास्यामीत्याशयमात्रम् । न त्वर्थक्रियाकारि अत एव मृगतृष्णरूपा इत्युक्तम् । ह्रस्वश्छान्दसः । सन्तु वा क्वचिदाशिषस्तथाऽपि तद्भोगायेदं कलेवरं क्व । तद्भोगक्षमं न भवतीति भावः । कुत इत्यत आह ॥ अशेषरुजां सर्वरोगाणां विरोहम् ॥ विशेषोत्पत्तिकारणम् ॥ तर्हि लोको न निर्विद्यते कुत इत्यत आह ॥ निर्विद्यत इति । यदपि यद्यप्येवं तथाऽपि कामानलं दुरापैरायाससाध्यैर्मधुलवैर्विषयलक्षणाज्यबिन्दुभिः शमयन् भवामीति विद्वान् जनो न निर्विद्यते न विरक्तो भवतीति योजना । भ्रान्तो लोक इति भावः । अनलत्वदुरापत्वमधुलवत्वाद्युक्तिर्वस्तुस्थितिप्रदर्शनम् । न तु भ्रान्तस्यैवं ज्ञानमिति न मन्तव्यम् ॥२५॥

काहं रजःप्रभव ईश तमोऽधिकेऽस्मिन्
जातः सुरेतरकुले क्व तवानुकम्पा ।
न ब्रह्मणो न तु भवस्य न वै रमाया
यन्मेऽर्पितः शिरसि पद्मकरप्रसादः ॥ २६ ॥

तात्पर्यम् — **रमादीनामिदानीं नार्पितः ॥ २६ ॥**

सत्यधर्मीया — काहं रजःप्रभव इति पद्योत्तरार्धे रमादीनां शिरसि नार्पितः पद्मकरप्रसादो यः स मे शिरस्यर्पित इति तदपेक्षया स्वस्याधिक्यं प्रल्हादेनोक्तमिव प्रतीयते । तत्र किञ्चिदध्याहृत्य प्रमाणाबाधितां योजनां स्वयं दर्शयति । रमादीनामिदानीं नार्पित इदानीमेव नार्पितः किन्तु सदेति भावः ॥ ततश्चायं श्लोकार्थः ॥ देवभक्तवत्सलतां प्रकटयन्निवाप्रकटयन्स्वज्ञानितां मोहनीयान्मोहयन्नाह ॥ क्वेति । हे ईश लक्ष्मीकान्त । समर्थ वा । तमोधिके तमोगुणभूयिष्ठे । रजःप्रभवे रजसः प्रभवत्युत्पद्यत इति तत्तथा । सप्तम्यन्तं कुलविशेषणम् । सुरेतरकुले दैत्यवंशेऽस्मिन् जातोऽहं क्व । तव अनुकम्पा कृपा क्व । रजःप्रभव इति प्रथमान्तमिति केचित् । तत्र जात इति तु न सुललितमन्वयं भजत इति ज्ञेयम् । अनुकम्पैतद्रूपिणीति निरूपयति ॥ नेति । नाप्ययमौत्तम्यक्रमो नाप्याधम्यक्रम इति क्रमोऽयं पातनिकार्थापार्थतां ध्वनयतीति मन्तव्यम् । यद्यो मे मम शिरस्यर्पितस्ते पद्मकरप्रसादः कमलकोमल-हस्तस्थापनरूपः प्रसादो न भवशिरस्यार्पितो नापि ब्रह्मशिरसि नवै रमायाः शिरसीदानीमेवार्पितः किन्तु सदा । अत्र त्विदानीमेवेति स्वकानिष्ठ्यं प्रकटयामासेति तात्पर्यमवधेयम् । यद्यस्मान्मे मयि वैरमाया वैरवैचित्र्यं त्वत्प्रयोज्यकापट्यं वा नास्ति । वैरमाया न सन्तीति वा । अयं मे शिरसि पद्मकरप्रसादोऽर्पित इति न वा रमाया इत्याद्यनिर्दिशन्निर्दिशंश्चैवमेवं ध्वनयामास व्यास इत्यवसेयम् । हे पद्म पद्मेव मा रमा यस्य तत्सम्बुद्धिरिति वा ॥ २६ ॥

मन्दनन्दिनी — भक्तवात्सल्यद्योतनाय स्वमिन् भगवदनुकम्पोत्पत्तेराश्चर्यकरत्वमाह ॥ काहमिति ॥ हे ईश । तमोऽधिके रजःप्रभवे विषयरागोत्पादकेऽस्मिन्सुरेतरकुले जातोऽहं क्व । एतादृशे मयि तवानुकम्पा क्व । असुरकुलसुरोत्तमयोर्विरुद्धत्वादाश्चर्यमेतत् । भक्तवत्सलत्वादेवेयमनुकम्पेति भावः । स्वस्मिन्कृतः प्रसादो नान्यत्रेत्यसुरजनमोहायाह ॥ नेति ॥ मे शिरस्यर्पितः पद्मकरप्रसादः पद्मोदरनिभपाणिनिधानलक्षणो यद्यः सः । न ब्रह्मणो न तु भवस्य न वै रमाया इति योजना । वस्तुतस्तु मे इदानीमर्पितस्तेषु सदाऽर्पितो मदपेक्षया भक्तिज्ञानादेः सुखस्य च तेषु सृतौ मुक्तावप्याधिक्यात् । तारतम्यस्य सर्वथाऽप्यपनेतुमशक्यत्वात् । अत एव तात्पर्यम् ॥ रमादीनामिदानीं नार्पितः । रमादीनामधिकोदयोऽपि सेवाधिकत्वादेव । श्रीब्रह्मब्राह्मिवीन्द्रादि त्रिकतत्स्त्रीपुरुष्टुताः ।

तदन्ये च क्रमादेव सदा मुक्तौ सृतावपि । हरिभक्तौ च तज्ज्ञाने सुखे च नियमेन तु । परतः स्वतः कर्मतो वा न कथंचित्तदन्यथेति ब्रह्मतर्के ।। किं तु सर्वदाऽर्पित इति ग्राह्यम् । अधिकोदयोऽपि सुखादिलक्षणम् । अभ्युदयोऽपि सेवाऽधिकत्वात् । ज्ञानभक्त्यादिलक्षणसाधनाधिकत्वात् । ब्राह्मिवीन्द्रेति ह्रस्वश्छान्दसः । ब्रह्मब्राह्मीपदाभ्यां वायुभारत्यावपि ग्राह्ये । वीन्द्रादित्रिकं गरुडशेष-रुद्रत्रयम् । तत्स्त्रियः सौपर्णीवारुणीपार्वत्यः । पुरुष्टुत इन्द्रः । कामोऽप्युपलक्षणीयः । तदन्ये सूर्यादयः परतो वरशापादिना स्वतः स्वभावतः कर्मतोऽत्युत्कटतपआदितः । तत् तारतम्यम् ।। २६ ।।

नैषा परावरमतिर्भवतो ननु स्यात्
जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथाऽपि ।
संसेवया सुरतरोरिव ते प्रसादः
सेवानुरूप उदयो न परावरत्वम् ।। २७ ।।

तात्पर्यम् —— रमादीनामधिकोदयोऽपि सेवाधिकत्वादेव ।। 'श्रीब्रह्मब्राह्मीवीन्द्रादि त्रिकतत्स्त्री-पुरुष्टुताः । तदन्ये च क्रमादेव सदा मुक्तौ सृतावपि । हरिभक्तौ च तज्ज्ञाने सुखे च नियमेन तु । परतः स्वतः कर्मतो वा न कथञ्चित्तदन्यथे'ति ब्रह्मतर्के ।। २७ ।।

सत्यधर्मीया —— नैषा परावरमतिरिति श्लोके लोकेशस्य तव परावरमतिरुत्तमाधममतिर्नास्ति । नीचोपि नीचेतरां सेवां करोति चेत्सोऽनुत्तमं प्रसादमासादयति । तथोत्तमोऽपि नोत्तमां सेवां कुर्वन्नोत्तमं प्रसादमिति प्रतीयते । तेन च न च तरतमभावः स्वरूपकृतोऽस्तीति ततश्च विषमता स्यादित्यतः स्वयं व्याकृत्य तत्स्थेम्ने मानं चोदाहरति ।। रमादीनामिति । अधिक उदयो महाप्रसादरूपः सेवाधिकत्वादेव तन्निमित्तक एवेत्यर्थः । ब्रह्मब्राह्मीशब्दाभ्यां वायुभारती ग्राह्ये । वीन्द्रादित्रिकं गरुडशेषरुद्रा इति त्रिकम् । तत्स्त्रियस्तत्त्रिकस्त्रियश्च सौपर्णी वारुणी सत्यः । पुरुष्टुतः पुरुहूत इत्येते । तदन्ये नियतपदकाः । क्रमादेव स्वयोग्यताक्रमादेव सदा सृतौ मुक्तावपीति सदा मुक्तौतु ब्रह्मब्राह्मीद्विकं सुपर्णादिद्विकं तद्भार्याद्विकं चेति ज्ञेयम् । सृतावपीत्युक्त्याऽऽनुकूल्यादेव मरुत्सरस्वतीहरगिरि-कुमार्यादिग्रह इति ज्ञेयम् । हरिभक्तौ तद्विषये । एवं तज्ज्ञाने तत्फले सुखे च नियमेन । अधिका इति शेषः । नियमेनेत्युक्तनियमस्याव्यभिचारमाह । परतो वरशापादितः कर्मतः कृतकत्वादेः स्वतः स्वतन्त्राद्धरेरपि । परस्वो हरिः । स्वात्मना चोत्तरयोः । स्वातन्त्र्यात्स्व इति प्रोक्त इत्यादेः । परतः सार्वविभक्तिकस्तसिरिति परतः स्वत इति षष्ठ्यौ । परस्य कर्मतः शापवरादेः स्वतः स्वस्य कर्मतोऽध्वरादेर्वेति कथञ्चिदुपाधिवशात्तन्नियमनमिति वा । तदित्यव्ययं वा । तत् सः । तत् आधिक्यमिति वा । अन्यथा न भवेदित्यर्थः ।।

ततश्चायं मूलार्थः । सेवावैभवमेवातिशयाधायकं नैहिकपरावरत्वमिति सनिदर्शनं प्रदर्शयति ।। नेति । या जन्तोर्यथा एष पर एषोऽवर इति मतिरेषा भवतः तथा स्यान्न । ननु निश्चयः कुत इत्यत आह ।। जगत इति । आत्मसुहृद आत्मन एव सुहृत्तस्य स्वरमणस्येति यावत् । सुरतरोः। सुरतस्य रुः शब्दो भणितं यस्य सः । कामुकः । तस्य सञ्जातोरित्यन्वयो वा । आत्मा स्वामी चासौ सुहृच्चेति तस्येति वा । तथाऽऽप्यन्यत्र फलाद्युदयप्रयोजकत्वेन दृष्टपरावरमतिरहितत्वेऽपि । सुरतरोः कल्पपादपस्येव ते संसेवया च प्रसादः तत्सेवानुरूपः । सेवानुगुण उदयः । जगत इति सुहृत्संसेवोदयान्वयि । तत्परावरत्वम् । न तत्र कारणमिति शेषः । हे पर । सेवानुरूप उदय इति भवतः अवरत्वं वैषम्यनैर्घृण्यप्रयुक्तं नैष्कृष्ट्यं नेति वा । भवतः परावरत्वम् । परे उत्तमत्वेन सम्प्रतिपन्ना अप्यवरे यस्मात्स तथा । तस्य भावस्तत्त्वम् । वैषम्यादिकृतः प्रसादोऽवसादनं न नास्तीति वा । एतत्पक्षे चोदय इत्युभयान्वयीति ज्ञेयम् । हे अनपर । अवरत्वं भवतो नेत्यनुवर्तत इति नास्तीति वाऽर्थः । यथा सुरभूरुहः सेवातिशयात्फलातिशयदायी तथा त्वमपीति नाभिजात्यादिकं तत्प्रयोजकमिति तात्पर्यम् । यावत्सेवा परे तत्त्वे तावत्सुखविशेषतेत्यादेः । माने यावत्सेवा परे विष्णाविति पठनेऽप्यभिमत-सिद्धेस्तदाद्युच्चारयितुर्मानिनिर्मातुः सुखमैहिकं तु न महाफलं किन्तु परे तत्त्वे मृतत्वे प्राप्ते लिङ्गभङ्गानन्तरमिति यावत् । सुखविशेषता स्वार्थे तल् । बहुव्रीह्याश्रयेण न भावार्थको वा । पक्षाद्वयेऽपि सुखविशेषः । स्वरूपभूतः इत्यप्यान्तरङ्गिकं तत्त्वमिति ज्ञेयम् । अन्यथाऽर्थान्तरवितरणरचनाचातुरी न पारणीया तेन स्यादिति प्रसङ्गादुक्तिरिति सन्तोष्टव्यम् ।। २७ ।।

मन्दनन्दिनी — भक्तिरेव भगवत्प्रसादे निमित्तमिति गूढमभिसंधाय देवविरुद्धकुले जाते मयि तवानुकम्पेत्येतदाश्चर्यमित्युक्तम् । अधुनाऽभिसन्धिमुद्घाटयति ।। नैषेति । जन्तोर्जनस्य परावरमतिः स्वकीयपरकीयजातिविषयिणीमतिर्यथा प्रसादहेतुस्तथा जगत आत्मसुहृदो भवत एषा मतिर्न प्रसादहेतुः स्यान्ननु । नन्वेतन्मतेः प्रसादहेतुत्वाभावे किं निर्निमित्तः प्रसाद इत्यत उक्तम् ।। तथाऽपीति । तथाऽप्येतादृशमतेर्हेतुत्वाभावेऽपि । जातिविवेकमन्तरा संसेवया सुरतरोरिव ते प्रसादोऽपि संसेवयैव । सोऽप्यनेकप्रकार इत्याह ।। सेवेति ।। उदयः सेवानुरूपो भक्त्यनुसारी । न तु परावरत्वं परावरत्वकारणक इति योजना । रमादीनामपि सेवाधिकत्वादेवेत्यादि तात्पर्यमत्राप्यनुसन्धेयम् ।। २७ ।।

एवं जनं निपतितं प्रभवाहिकूपे
कामाभिकाममनु यः प्रपतन् प्रसङ्गात् ।
कृत्वाऽऽत्मसात् सुरर्षिणा भगवन् गृहीतः
सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ।। २८ ।।

सत्यधर्मीया — वद मे तव दास्ययोगमित्युक्तं किल तत्तिष्ठतु । त्वद्भृत्यसेवायां नारदोत्पादितरुचिरिति कथं तद्विमुखः स्यामिति विज्ञापयति ॥ एवमिति । प्रभवाहिकूपे प्रकृष्टस्त्वद्दासत्वसेवां विना दुष्पार इति स चासौ भवः संसारः स चासौ विषयविषविषमतयाऽहिमान् यः कूपः प्रहिस्तस्मिन् । कामाभिकामं कामा विषयास्तानभिकामयत इति स तथा तम् । निपतितं जनमनुप्रसङ्गाज्जन्मापादकदुष्कर्मसम्बन्धात् । सङ्गं प्राप्येति ल्यब्लोपनिमित्ता पञ्चमीति वा । प्रपतन्पतनोन्मुखो यः सुरर्षिणा सुराणामृषिः । सुरश्चासावृषिश्चेति वा । नारदेनात्मसात्कृत्वा स्वाधीनजनेष्वेकत्वेनानुसन्धाय । उपसर्गाश्च धातुलीनार्थद्योतका इति गृहीतोऽनुगृहीतोऽहम् । हे भगवन् । तव भृत्यसेवां कथं नु विसृजे विसृजामि । एतेनोपनय मां निजभृत्यपार्श्वमिति न जिव्होपरितनं वचनं मनःपूर्वकमिति ध्वन्यते ॥२८॥

मन्दनन्दिनी — केनानुग्रहीतोऽसि येनेदृशी भक्तिस्तव जातेत्यत आह ॥ एवमिति ॥ हे भगवन् । एवं कामानलमित्युक्तरीत्या प्रभवाहिकूपे प्रकृष्टभवलक्षणदुविषर्यरूपाहियुक्तरूपे निपतितं कामाभि कामं विषयाभिलाषिणं जनमनुसृत्य प्रसङ्गात्तादृशजनसङ्गात्प्रतपन्योऽहं सुरर्षिणाऽऽत्मसात्कृत्वा गृहीतोऽनुगृहीतः सोऽहं तव भृत्यसेवां कथं नु विसृज इति योजना ॥ २८ ॥

मत्प्राणरक्षणमनन्त पितुर्वधं च
मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ।
खड्गं प्रगृह्य यदवोचदसद् विधित्सु-
स्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥

सत्यधर्मीया — स्वभृत्यऋषिवाक्यं स्वभृत्यश्चासावृषिश्च नारदश्च तस्य वाक्यम् । स्वभृत्यं मां प्रति ऋषिवाक्यमिति हरिः सर्वत्र भूतेषु भगवानास्त ईश्वरः । यत्सर्वत्र तदीक्षणमित्यादिवाक्यम् । असदयुक्तम् विधित्सुश्चिकीर्षुर्हिरण्यकशिपुः । खड्गं प्रगृह्य यदि मदपर इत्येकमनेकं च । मत्तोऽपरोन्य ईश्वरो वर्तते तर्हि तव कं शिरो हरामि स त्वामवतु रक्षतु इति । मदपर इत्यावर्तते । अहङ्कारपरो यदवोचत्तच्च वचो ऋतं यथार्थं विधातुं कर्तुमेव । हे अनन्तापरिच्छिन्न । अबद्ध वा । मत्प्राणरक्षणं तथा मत्पितुर्वधं च मन्य इत्यन्वयः । अनन्तः केनापि नाशरहितः पिता मम पिता तस्यानन्तपितुरिति वा । ईश्वरोऽस्तीत्युक्तो मदपरो मदविषयो दृष्टिपथं न गत इति यावत् । इति कं हरामि कं हनिष्याम्यहं मुख्यविषयालाभात्तव कं हरामीत्यावृत्त्याऽर्थविशेषलाभलोभादन्वयो वा ॥ २९ ॥

मन्दनन्दिनी — भक्तरक्षणाय दुष्टशिक्षणाय भक्तवाक्यपरिपालनाय च त्वदवतार इति स्तौति ॥ मदिति ॥ हे अनन्त । मत्प्राणरक्षणं भवान्सर्वत्र व्याप्तो भक्तं रक्षतीति नारदोक्तम् । असद्विधित्सुर्मदपरो

मत्तोऽन्यो यदीश्वरस्तर्हि त्वामवतु । तव कं शिरो हरामीति खड्गं प्रगृह्य यदवोचदस्मत्पिता तस्य पितुर्वधं च सर्वत्र व्याप्त इत्यादि स्वभक्तर्षिवाक्यं ऋतं विधातुं कर्तुमवतीर्णं त्वां मन्य इति योजना ॥ २९ ॥

एकस्त्वमेव जगदेतदमुष्य यत् त्व-
माद्यन्तयोः पृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं
नानेव तैरवसितस्तदनुप्रविष्टः ॥ ३० ॥

सत्यधर्मीया — जगज्जननादिकं भ्रूविभ्रममात्रात्कुर्वतस्तव मम पितृहननमिव व्याप्तस्य स्तम्भसम्भवोऽपि नाद्भुतावहतामुपयातीति तत्स्थितिं विज्ञापयति ॥ एक इति । त्वमेवैतज्जगन्नान्य इत्यत्र हेतुमाह ॥ एक इति । एकः प्रधान इति तदसिद्धिमसिद्धीकरोति । यदिति । यद्यतोऽमुष्य जगत आद्यन्तयोः सृष्टेः प्रागन्तान्नाशादुपरि मध्यतश्च मध्येऽपि । तादात्म्यमेवार्थः किं न स्यादेक इत्यस्य प्राधान्यार्थकता कुतः कल्प्यत इत्यत आह ॥ पृथगिति । भिन्नोऽमुष्य सकाशादवस्यति वर्तत इति निश्चितोऽसि । पुनः सृष्टिकाले गुणव्यतिकरमिदं जगन्निजमायया स्वशक्त्या प्रकृत्या च सृष्ट्वाऽनुप्रविष्टः । तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेः । तैः स्वसृष्टैः पदार्थैर्निमित्तैर्नानेव भिन्न इव स्वान्तर्भेदहीन इत्यवसितोऽसि निश्चितोऽसि । इति जगदव्यक्तमुक्तम् । इन्द्रो मायाभिः पुरुरूप ईयते । नेह नानास्ति किञ्चन । एवं धर्मान्पृथक् पश्यंस्तानेवानु विधावति । भेददर्श्यधरं तम इत्यादिना वेदादिनेति शेषः । तद्गुणव्यतिकरं त्वमेक एवेत्येवमन्वयेऽन्वयो ज्ञेयः ॥ ३० ॥

मन्दनन्दिनी — जगतो वैलक्षण्यं तत्स्रष्टृत्वं च तवेति स्तौति ॥ एक इति ॥ अनन्तेत्यनुवर्तते । हे अनन्त । त्वमेवैको मुख्योऽभिन्नश्च । एतज्जगतोऽमुख्यं परस्पभिन्नं च । यतोऽमुष्य जगत आद्यन्तयोर्मध्यतश्च प्रागभावध्वंसकाले स्थितिकाले च यथाक्रमं पृथक् अवस्यस्यवतिष्ठसि । धातूनामनेकार्थत्वात् । अनेकमुख्यत्वमेकत्वं चोक्तम् । गुणव्यतिकरं गुणवैषम्यम् । तत एव तदुपादानकं निजसामर्थ्येनेदं दृष्ट्वा तदनुप्रविष्टस्तैर्भिन्नैरधिष्ठानैस्त्वमपि नानेवावसितोऽसीति योजना । वस्तुतस्तु नानाऽधिष्ठानकस्त्वमेक एव । इन्द्रोमायाभिः पुरुरूप इयते । प्रतिदृशमिव नैकधार्क-मेकमित्याद्यागमात् ॥ ३० ॥

त्वं वा इदं सदसदीश भवांस्ततोऽन्यो
माया यदात्मपरबुद्धिरियं ह्यपार्था ।

यद् यस्य जन्मनिधनं स्थितिरीक्षणं च
तद् वै तदेव खलु कालवदुष्टितर्वोः ॥ ३१ ॥

तात्पर्यम् — **यथा वृक्षश्च वृक्षदाहश्च दैवकालाधीनत्वाद्दैवं कालश्चेत्युच्यते एवं त्वदधीनत्वात्सर्वस्य सर्वं त्वमित्युच्यसे, स्वतस्तद्भिन्नोऽपि ॥ अहं चान्यश्च परमेश्वर एवेत्यपार्था भ्रान्तिः । तदधीनत्वादेव स इत्युच्यते । न स्वरूपत्वादित्यर्थः ॥ ३१ ॥**

सत्यधर्मीया — एक इति प्रधान इति न व्याख्यानं युक्तम् । त्वं वा इदं सदसदीश इति श्लोके जगताऽभेदस्यैव बोधनादित्यतो यथावत्तदभिप्रायं विवक्षुः अस्फुटाभिप्रायं कालवदुष्टितर्वोः इत्येतद्व्याचष्टे । यथेति । उष् दाहेत्किन् । उष्टिर्दाहः ॥ वृक्षो वृक्षदाहश्च दैवकालाधीनत्वात् दैवं कालश्चेति पृथगन्वयादुच्यत इत्युक्तिः । यथा दैवकालाधीनत्वाद्दैवं कालश्चेति तादात्म्यव्यवहार एवं सर्वस्य जगतस्त्वदधीनत्वात्सर्वं जगत्त्वमित्युच्यते । न तु त्वत्ताद्रूप्यात्तदित्याह । स्वतस्तद्भिन्नो जगद्भिन्नोऽपि सन्निति । अहं चान्यश्च परमेश्वरः साक्षात्स एवेत्यपार्थेत्यनूद्य व्याकरोति ॥ भ्रान्तिरिति । खण्डश उक्तमर्थं निगमयति । त्वदधीनत्वाद्भगवदधीनत्वादेव स इत्युच्यते न त्वच्युतस्वरूपत्वादित्यर्थ इति । मानानां बहूनां पूर्वमेतदर्थ उक्तत्वात्स्ववचनव्याख्यानेनैव मुखबन्धः पूर्वपक्षिण इति तदनुदाहरणमुत्तरत्रोदाहरिष्यमाणत्वाद्वेति मन्तव्यम् ॥ ततश्चायं श्लोकार्थः ॥ प्राग्जगद्भगवदितरदिति न स्फुटं प्रतीतमिति तत्स्पष्टं करोति ॥ त्वं वेति । हे ईश । सदसन्मूर्तामूर्तलक्षणं कार्यकारणात्मकं वा जगत् त्वं त्वदधीनसत्तादिमत्त्वात् । अयं व्यपदेशः कुत इत्यत आह ॥ भवांस्तत इति । भवांस्ततो जगतोऽन्यो भिन्नः । ततत्वाद्व्याप्तत्वादन्य इत्यन्यत्वे हेतूक्तिरान्तरङ्गिकी ज्ञेया । त्वत्वावन्यपर्यायावित्युक्तेर्भवानित्यवदन्वदंश्च त्वमिति सदसदिदं त्वं भिन्नमिति सूचयमासेत्यवसेयम् । यद्यत इयमात्मपरबुद्धिरात्मनि परमात्मनि पर इति प्रपञ्च इत्यात्मैव परः प्रपञ्च इति बुद्धिः । आत्मा स्वयं पर इति बुद्धिरिति वा । माया त्वदिच्छाधीनाऽपार्था निरर्था भ्रान्तिरिति यावत् । हि मानसिद्धा । प्राधान्यवत्प्रयोजकान्तरमीरयति ॥ यदिति । यस्य सकाशाद्यस्य जन्म उत्पत्तिर्निधनं संहृतिः स्थितिः पालनमीक्षणं ज्ञानम् । चात् नियमनादिकम् । यद्येतीति प्राप्तं तज्जगत्तदेवेत्युच्यते । यद्यतस्तत्तत इति वा । वास्तविकैकात्म्यं किं न स्यादित्यत उक्तं खल्विति । तदेवेत्येतत्खलु निषिद्धमित्यर्थः । खलु निषेधन इति विश्वः । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति स्मरणात् । लोकावसितं निदर्शनमाह ॥ उष्टितर्वोः कालवदिति । उष्टिर्दाहस्तरुर्वृक्षस्तयोः कालवत् । यथा वृक्षतद्दाहयोर्दैवकालाधीनत्वाद्दैवं कालश्चेति व्यपदेशः । यथोक्तं ब्रह्माण्डपुराणे सत्यक्षेत्रमाहात्म्ये प्रथमाध्याये । सत्याब्जिनीतीरे, तस्यास्त्वेको महान्वृक्षः स कालत्रयवित्तमः । शाखाभिर्जगतां वृत्तिं सर्वां यत्सूचयत्यसौ । कृते भद्रवटो

नाम त्रेतायामेव वृक्षराट् । द्वापरे पुत्रदीपश्च पनसः स्यात्कलौ युगे । धनधान्यप्रजावृद्धिर्यतः स्याद्राजराष्ट्रयोः । शाखोपशाखावृद्ध्या वा फलवृद्धिस्तथा भवेत् । यदा शाखा विदीर्णा स्यात्तदा राजा विनश्यति । उपशाखा विदीर्णाश्चेन्महामात्यो मरिष्यति । यदा स्यात्फलवैकल्यमनावृष्टिस्तदा भवेत् । पत्रं श्यामं यदि पतेत्प्राणिनाशो भविष्यतीति । कालवित्तम इति स्वाभिमानिदेवत्वं कथितमिति ज्ञेयम् । तद्वत्त्वदधीनसत्तादिकं जगदिति त्वमेवेत्युच्यत इत्यर्थः ॥ ३१ ॥

मन्दनन्दिनी — सृष्ट्वा गुणव्यतिकर इत्यनेन परमात्मजगतोर्भेदः प्राप्तस्तर्हि सर्वं खल्विदं ब्रह्म भूतानि विष्णुर्भुवनानि विष्णुरित्यादावभेदव्यपदेशः कथमित्यतस्तद्गतिमाह ॥ त्वं वेति ॥ हे ईश । सदसन्मूर्तामूर्तात्मकं चेतनाचेतनात्मकं वेदं जगत्तत्त्वं वा उच्यते । त्वद्वाचकेन ब्रह्मविष्ण्वादिशब्देन सामानाधिकरण्येनोच्यते । त्वदधीनसर्गादिमत्वात् । यदधीना यस्य सत्ता तत्तदित्येव भण्यते । इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भव इत्याद्युक्तेः । न च वस्तुतोऽभेद एव किं न स्यादिति वाच्यम् । यतो भवांस्ततो जगतोऽन्यः स्रष्टृत्वादेरेव । न हि स्रष्टृसृज्ययोरभेदो दृश्यते । न चान्येनान्यत्वं युज्यते । मदधीनत्वात् । मदभेदव्यपदेशे देवतादेरपि स्वातन्त्र्यात्तदभेदव्यपदेशोऽपि किं न स्यादित्यतः स्वातन्त्र्यमेव नास्ति । तद्बुद्धेस्तु भ्रान्तित्वमित्याह ॥ मायेति ॥ यद्याऽऽत्मनो जीवस्य परबुद्धिः परत्वबुद्धिः । स्वातन्त्र्यबुद्धिरिति यावत् । सा मायाऽज्ञानजन्या । अत एवापार्थाऽयथार्था । अचेतनेऽभेदव्यपदेशस्योक्तगतावपि । तद्योऽहं सोऽसौ सोऽहमित्यादौ चेतनेऽभेदोक्तेर्नेयं गतिस्तदभेदस्यैव सम्भवादिति वाच्यम् । चेतनं प्रत्यपि जननादिहेतोर्भगवतश्चेतनेनाभेदायोगात् । तर्ह्यहं देवदत्तश्च भगवानिति बुद्धिः कथमित्यतः सा च भ्रान्तिरित्याह ॥ यदिति ॥ याऽऽत्मनः स्वस्य परस्य देवतादेर्बुद्धिर्भगवदभेदबुद्धिः साऽपि मायाऽज्ञानजन्या । अत एवापार्थाऽनर्थप्रदा च । यज्जननादेर्यदधीनत्वं तस्य तत्सामानाधिकरण्यमिति सामान्यव्याप्तिमाह ॥ यद्यस्येति ॥ यस्य जन्मनि धनं स्थितिरीक्षणं ज्ञानं च यद्यतस्तदेव तत्सामानाधिकरण्यव्यपदेशभागेव खलु । वै प्रसिद्धम् ।उदाहरति ॥ कालवदिति ॥ दैववदिति उपलक्षणम् । उष्टिर्वृक्षदाहः । उष दाह इति धातोः । तत्र कालाधीनत्वात् । कालशब्दो यथा प्रलयाग्नौ कालाग्निरिति व्यवहारस्तथा । यथा वा । तरौ कल्पवृक्षादौ दैवाधीनत्वाद्दैवतरुः सुरतरुरित्यादि तथेत्यर्थ इति योजना । एतत्सर्वमभिप्रेत्योक्तं तात्पर्ये ॥ यथा वृक्षश्च वृक्षदाहश्च दैवकालाधीनत्वाद्दैवं कालश्चेत्युच्यते । एवं त्वदधीनत्वात्सर्वस्य सर्वं त्वमित्युच्यते । स्वतस्तद्भिन्नोऽपि । अहं चान्यश्च परमेश्वर एवेत्यपार्था भ्रान्तिः । तदधीनत्वादेव स इत्युच्यते । न स्वरूपत्वादित्यर्थ इति ॥ सुरतर्वादिकं दैवमुच्यते कालाग्न्यादिकं च काल इति चोच्यते । सर्वमित्युच्यते सर्वं ब्रह्मेत्युच्यते । इत्यर्थः । स्वतस्तद्भिन्नोऽपि तथाऽपि सर्वं ब्रह्मेत्युच्यते । यद्वा । अपिशब्दो हेतौ । यतः स्वतो भिन्नस्तत इत्यर्थः । अहं च परमेश्वर एवेति बुद्धिरपार्था भ्रान्तिरित्यर्थः । आद्यन्तयोः पृथगवस्यसीति प्रलयादिसृष्टिकाले स्थितिरुक्ता ॥ ३१ ॥

न्यस्येदमात्मनि जगद् विलयाम्बुमध्ये
शेषासनो निजसुखानुभवो निरीहः ।
योगेन मीलितदृगात्मनि वीतनिद्र-
स्तुर्यस्थितो ननु तमोऽनुगुणांश्च युंक्षे ॥ ३२ ॥

तात्पर्यम् — तुर्यः स्थितः ॥ ३२ ॥

सत्यधर्मीया — न्यस्येदात्मनीति श्लोके तुर्यस्थित इत्यत्र हेतुर्येवा तुर्येति स्थित इति तुर्याधिकरणकोऽन्यः प्रतीयत इति भ्रमं तुर्यःस्थितः इति पदच्छेदेन भ्रंशयति अनुवादापदेशेन ॥ तुर्यः स्थित इति । अवस्थात्रयातीतत्वेन स्थितस्तुर्यनामेत्यर्थः । नन्वशितेऽपि लशुने न शान्तो व्याधिरिति तात्पर्यतोऽपि सम्बुद्ध्यादिशङ्का न निष्टङ्कमातङ्किता । वा शरीति लोपे पुनस्तच्छङ्कासम्भवादिति चेन्न (नन्वित्यादि चेन्नेत्यन्तं वाक्यानि अमुद्रितकोशे न सन्ति ।) निवृत्तेः सर्वभावानामीशानः प्रभुरव्ययः । अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः । तुर्यं तत्सर्वदृक्सदा । सा च तुर्ये न विद्यते । न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः । तुरीयं पदमश्नुत इति माण्डूकोपनिषत् । भाष्ये विष्णुस्तुरीयरूपेण द्वादशान्ते व्यवस्थितः । मुक्तानां प्राप्यरूपोऽसौ व्यवहारे न दृश्यते । सम्यक्समाहितानां तु प्राप्तानां षोडशीं कलाम् । अपरोक्षदृशां क्वापि तुरीयं दृश्यते पदम् । एतत्सर्वं तुरीयेण रूपेण न करोत्यजः । सर्वज्ञानप्रदश्चापि मुक्तस्यैव तुरीयक इति ब्रह्माण्डे । अमुक्तस्य त्वदृश्यत्वात् षोडशीं वा कलामृते । तुरीयोऽदृष्ट इत्युक्तो ग्रहणादेरगोचरः । विना मुक्तिं यतस्तेनाव्यवहार्य इतीरितः । जाग्रदादिप्रवृत्तिस्तु लक्षणं ह्यनुमापकम् । अलक्षणस्तद्राहित्यादचिन्त्यस्तत एव च । तत एव ह्यनिर्देश्यश्चिदानन्दैकलक्षण इति विस्तृत्य व्याकरणात्तं सम्बोध्य वक्तव्यस्यार्थस्यासम्भवादिव तस्मिन्नन्यावस्थितेरपि बाधितत्वात् संवलितवचसापि तुर्यः स्थित इत्यर्थनिश्चायकतोपपत्तेः । यतोऽनुववाद तेन जानीमो यथा न सम्बोधनादिशङ्का स्यात्तथाऽर्थो ज्ञेय इत्याचार्यो ज्ञापयामासेति । अन्यथा तद्वैय्यर्थ्यापत्तेरिति । यथोक्तं तात्पर्यप्रकाशे । तुर्यस्थित इत्यत्र तुर्ये भगवति स्थितोऽन्यः प्रतीयते । अतः पदद्वयमित्याह ॥ तुरीय इति । एतत्तुर्यपदव्याख्यानं तुरीयस्त्वेव मुक्तिद इति वचनात्तुरीयो मुक्तिदाता सन् स्थित इत्यर्थः। तुर्यस्थित इति तात्पर्यपाठेऽप्युक्तरीत्या पदच्छेद एवाभिप्रत इति ॥ अथ श्लोकमर्थापयामः ॥ आद्यन्तयोरित्यन्ते श्रीकान्तोऽवशिष्यत इत्यभिहितम् । तद्विशदयति ॥ न्यस्येति । आत्मनि स्वोदरे । तमो हि मूलप्रकृतिर्दुर्गाऽभिमतिमती । तदनुगुणान्सत्त्वादींश्च युङ्क्षे योजयसि । तत्कारणकमिदं जगच्चात्मनि न्यस्य स्थापयित्वा विलयाम्बुमध्ये लयजलमध्ये शेषासनः शेषशायी निजसुखानुभवः स्वरूपानन्दमनुभवन् । निःस्पृहः निरीहो योगेन मीलितदृक् समाधिना मीलितौ दृशौ यस्य सः ।

वीतनिद्रः । निद्राशब्देन तत्कारणाज्ञानग्रहः । अथवा निद्रेति स्वप्नस्याप्युपलक्षकम् । वीता निद्राऽज्ञानम् । निद्रा स्वप्नाद्या यस्मिन्सः । तुर्यः स्थितोऽप्रवर्तकः सन्वर्तसे ननु । नियुङ्क्षे नन्विति वाऽन्वयः । युजिर् योगे ।। ३२ ।।

मन्दनन्दिनी — तामेव विवृण्वन् स्तौति ।। न्यस्येदमिति ।। हे भगवन् । विलयाम्बुमध्ये इदं जगन्महदादि । आत्मन्युदरे न्यस्य शेषासनः । शिष्यत इति शेषं प्रलयकाले विद्यमानं वटपत्रमासनं यस्य सः । भूत्वा कालविशेषाविवक्षया वा शेषासनो निजसुखानुभवो निरीहः सृष्टीच्छाव्यक्तिरहितः । पूर्णकामो वा ।योगेनात्मसामर्थ्येन । स्वेच्छयैवेति यावत् । मीलितदृक् । कुत इत्यतो वस्तुतो वीतनिद्रः । तदपि कुतस्तुर्यस्थितः । ननु जीवस्य संसारेऽवस्थात्रयम् । तुर्यावस्था मुक्त्यनन्तरावस्था । भगवांश्च नित्यमुक्तः । तथा तुर्ये मुक्त्यवस्थायामेव स्थितो विद्यमानः । एतदभिप्रायेण तुर्ये स्थित इति विग्रहः प्रदर्शितस्तात्पर्ये । अन्वनन्तरं प्रलयचरमभागे आत्मनि स्वाधीनतया विद्यमानं तमः प्रकृतिमन्वनन्तरं गुणांश्च सत्त्वादिगुणान् युंक्षे कार्योन्मुखीकरोषीति योजना ।। ३२ ।।

तस्यैव ते वपुरिदं निजकालशक्त्या
सञ्चोदितं प्रकृतिधर्मिण आत्मगूढम् ।
अम्भस्यनन्तशयनाद्विरमत्समाधेः
नाभेरभूत् स्वकणिकाद्वटवन्महाब्जम् ।। ३३ ।।

तात्पर्यम् — जगदात्मकमब्जमपि भगवद्वशत्वात्तद्वपुः । **'स्थावराणां तु सर्वेषां देवता याऽभिमानिनी । विशेषाद्वटबीजे च साऽश्वत्थे च व्यवस्थिता ।। अदृश्या कणिका नाम सा वृक्षान्व्यञ्जयत्यपि । अतो बीजमिति प्रोक्ता सा जातेऽप्यङ्कुरे स्थिता ।। एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं नात्र दृश्यत'** इति च ।। ३३ ।।

सत्यधर्मीया — तस्यैव ते वपुरिदमिति श्लोके तव नाभेर्यदब्जमभूत्तत्ते वपुरिति साक्षाद्भगवच्छरीरत्वमित्यन्यथाप्रतीतिं तत्पद्मस्वरूपाप्रतिपत्तिं च पराकर्तुं व्याकरोति ।। जगदिति । जगदात्मकमिति तत्स्वरूपनिरूपणम् । तदपि भगवद्वशत्वात्तद्वपुरित्युच्यत इति शेषः । तस्मिन्नेव च पद्मे वटकणिकाद्वटवदिति निदर्शनेन नाभेरम्भोजस्योपादानोपादेयभावभ्रान्तिं च मानामानेन (मानाननेन रवकोशपाठः अयमेव साधुः इति भाति) निवारयति ।। स्थावरणामिति । सर्वेषां स्थावराणां याऽभिमानिनी अभिमतिमती देवता सा विशेषाद्बहुप्ररोहवशाद्वटाश्वत्थयोरेव मुखतो ग्रहः । यथोक्तं सप्तमपञ्चकशतखण्डब्राह्मणे । ते च न्यंचो रोहंस्तस्मान्यग्रोहति न्यग्रोहो वै नामेति । अश्वत्थः सर्ववृक्षाणामित्यादेर्वनस्पतिश्रैष्ठ्यात् साक्षात्तद्ग्रहः । प्रलयजलशायित्वेन भगवतः प्रसक्तेस्तच्छयनस्य

बहुमानबहुमतत्वादवान्तरप्रलयेऽपि मार्काण्डेयस्य तत्र तत्पत्र एव भगवतः प्रत्यक्षीभवनाच्च वटबीजोक्तिरिति तद्बीजमवधेयम् । वटबीज इत्यानुकूल्येनाश्वत्थ इत्यत्रापि बीज इति ग्राह्यम् । व्यवस्थिता तथा प्रमाणतो ज्ञाता । अत एवादृश्येत्युक्तिः । सा कणिकेति नाम प्रसिद्धा । नाम नाम्ना कणिका वेति वा । कणिका कथ्यतेऽत्यन्तसूक्ष्मवस्त्वग्निमन्थयोरिति विश्वः । वृक्षानिति वचनाद्वटाश्वत्थबीजेति सर्वबीजोपलक्षकमिति ज्ञेयम् । व्यञ्जयति । अतोऽत एव बीजमिति प्रोक्ता । व्यञ्जनाद्बीजमिति पूर्वोदाहृतमानत इति मानतश्च प्रोक्ता ।(इदं वाक्यं अमुद्रित कोशे नास्ति) सा अङ्कुरे जाते सति प्रथमं वृक्षवृद्ध्यादिजनकतया मुख्यतस्तत्र वृक्षादिके दृश्यते । अनुमानतो ज्ञानिविशेषैरपरोक्षीक्रियत इति वा । यथैवं तथा हरिः स्वयं कारणेष्ववान्तरेषु तत्त्वेन स्वेन क्लृप्तेषु स्थितो व्यवस्थितः । कार्यजनेस्तज्जन्मनः । अनु अनन्तरं तानि कार्याण्यनुप्रविष्टस्तत्तद्रूपानुरूप्येणप्रविष्टः सन् प्रथमं मुख्यतः तत्कार्ये ''तत्र कार्ये'' इति खपाठः तदुन्नाहकतया दृश्यत इति ब्रह्मतर्क इति शेषः । एतत्प्रकारस्तु न्यग्रोधफलमत आहरेत्यादिनवकृत्वोपदेशे विस्तृत्योक्तोऽनुसन्धेयः । अतोऽपि प्रमाणे वटपुरस्कृतिरिति मन्तव्यम् ॥

ततो मूलविततिः ॥ आद्यन्तयोरित्युक्तान्तःस्थितिरतिदुःसहेति तामभिधायादावादावित्येतद्वितत्य वदति ॥ तस्यैवेति । ते जगत्कारणस्य तस्य तुर्यस्य । एवकारेण गुणकर्मादिविशेषो नास्तीति द्योत्यते । प्रकृतिधर्मिणः प्रकृतिः प्रकृष्टा कृतिश्चासौ धर्मश्च सोऽस्यास्तीति स तथा । सृष्टावुद्यतत्वादेवमुक्तिः । क्वचित्प्रकृतिधर्मण इति दृश्यते । तत्र प्रकृतिरुक्तरूपा धर्मो यस्य स इति विग्रहः । धर्मादनिच् केवलादित्यनिच् । अम्भसि समुद्रे । अनन्तशयनाच्छेषशय्यातः । विरमत्समाधेर्विरमत् विरतिमव-सानमिति यावत् । प्राप्नुवानः । समाधिर्योगनिद्रारूपो यस्येति तस्य । विरमंश्चासौ समाधिश्च तस्मादिति हेतूक्तिर्वा । तव नाभेर्निजकालशक्त्या निजः स्वप्रेरितः स्वाधीन इति यः कालस्तच्छक्त्या सञ्चोदितं सृष्ट्यभिमुखत्वेन स्वाभिमानिदेवताद्वारा प्रेरितं यन्महानं जगदात्मकं पद्ममभूत्तदिदं तव वपुः सन्निधानपात्रतयाऽऽधीनत्वात्तदिवोच्यते । तदुपादानं त्वन्नाभिर्नेति वक्तुम् । आत्मगूढमिति । आत्मनि गूढं निलीनम् । तत्र निदर्शनमाह ॥ स्वकणिकाद्वटवदिति । स्वकणिका परिदृश्यमान-बीजान्तर्निहिताऽदृश्या देवता तस्या अत्यते बहिः सन्ततमागम्यत इति स तथा । स चासौ वटश्च । वटः कपर्दे न्यग्रोध इति विश्वः । न्यग्रोधश्च स इव । अन्तर्निलीनदेवतावटयोर्यथा नोपादानोपादेयभावस्तथा नाभेर्जगदात्मकमब्जमभूदिति भावः । ऐकपद्याश्रयणेन न तात्पर्यव्याख्यानकालोदाहृतविश्वकोशोक्त-स्त्रीलिङ्गबाधापीति ज्ञेयम् । यद्वा स्वकणिकादिति वटवदिति वा पदे । सामानाधिकरण्येनान्वयः । संसारः सर्वोऽपि प्राग्वत् । (मूलकोशे यद्वेत्यादि वाक्यत्रयं नास्ति) स्वकणिका देवता यस्मिंस्तत्स्वकणिकं परिदृश्यमानबीजं तस्माद्वटवत् । प्रकृतिधर्मिण इत्युक्ताप्रकृतिरुपादानं बीजवत् धर्मी हि भगवान्देवता वत् । वटवत् जगज्जलजवदित्युपादाननिमित्तोक्तिरिति वा ॥ ३३ ॥

मन्दनन्दिनी — महाप्रलये विद्यमानेन भगवता पद्मनाभस्य निर्विशेषाभेदमुक्त्वा स्तौति ॥ तस्यैवेति । तस्यैव प्रलयकालवर्तिनो निर्विशेषाभिन्नस्यैव ते प्रकृतिधर्मिणः प्रकृत्यादितत्त्वसमुदायाश्रयस्यांभस्यनन्तशयनादनन्तशयनमधिष्ठाय विरमत्समाधेः समाप्नुवद्योगनिद्रस्य आत्मगूढमुदरे विद्यमानं निजा स्वाभाविकी । कलयतीति कालविषयिणी या शक्तिस्तया सञ्चोदितं ते नाभेः स्वकणिकाद्वटवद्वटाङ्कुरमिव यन्महाब्जमभूदिदं ते वपुर्वपुस्थानीयं त्वद्वशत्वादिति योजना । अत्र कणिकाशब्दवाच्यस्य बीजस्य वटं प्रति विकारिकारणत्ववद्भगवन्नाभेर्विकारिकारणत्वं न मन्तव्यम् । कणिकाशब्दस्य बीजान्तर्वर्तिदेवतापरत्वात् । एतदेवाभिप्रेत्य तात्पर्यम् ॥ जगदात्मकमब्जमपि भगवद्वशत्वात्तद्वपुः । स्थावराणां तु सर्वेषां देवता याऽभिमानिनी । विशेषाद्वटबीजे च साऽश्वत्थे च व्यवस्थिता । अदृश्या कणिका नाम सा वृक्षान्व्यञ्जयत्यपि । अतो बीजमिति प्रोक्ता सा जातेऽप्यङ्कुरे स्थिता । एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं तत्र दृश्यत इति च ॥ जगदात्मकमित्यनेन जडत्वं सूचितम् । तद्वशत्वादिति निमित्तोक्त्या वपुःशब्दो गौण इत्युक्तं भवति । सा देवतांऽकुरोत्पत्तेः पूर्वं बीजे व्यवस्थिता संनिहिता । तत्रापि वटबीजेऽश्वत्थेऽश्वत्थबीजे च विशेषेण व्यवस्थिता । तस्या एव कणिकेति नाम । न चैवं कणिकाया बीजत्वोक्तिरनुपपन्ना । व्यञ्जकत्वादिना तदुपपत्तेरित्याह ॥ सा वृक्षान्व्यञ्जयत्यपीति । न च बीजस्याङ्कुरतायां देवता क्व वर्तत इति वाच्यम् । परिणामानन्तरमङ्कुरे स्थित्युपपत्तेरित्याह ॥ सा जातेप्यङ्कुरे स्थितेति । हरेरप्येवं स्थितिमाह ॥ एवमिति । प्रथमं कार्यजनने । पूर्वं तत्र कारणेऽनन्तरं तत्र कार्ये दृश्यत इत्यर्थः ॥ ३३ ॥

तत्सम्भवः कविरतोऽन्यदपश्यमान-
स्त्वां बीजमात्मनि ततं स बहिर्विचिन्वन् ।
नाविन्ददब्दशतमप्सु निमज्जमानो
जातेऽङ्कुरे कथमिहोपलभेत बीजम् ॥ ३४ ॥

सत्यधर्मीया — यदर्थमम्भोभवसम्भव उक्तः । षष्ठे च कञ्जमुलोकतन्त्रमिति सङ्कुच्योक्तं देवतावददृश्यत्वं यदुक्तं भगवतस्तदिदानीं प्रकटयंश्चतुराननविचारमाह । तत्सम्भव इति । तस्मात्पद्मनाभात्सम्भवतीति सम्भवो यस्येति वा स इति । तत्र लोकात्मके सम्भवोऽभिमतिरूपो यस्येति वा । अतः प्रकृत्यात्मकात्कमलात् । अन्यद्वस्त्वपश्यमानोऽपश्यन् । कस्याप्यधुना अजननात् । अप्सु लयजलेऽब्दशतं निमज्जमान आत्मनि स्वस्मिन्नेव ततं व्याप्तं बीजं व्यञ्जकं त्वामन्तर्बहिरपि विचिन्वन्विचारयन् स कविर्ज्ञानी सन्नपि नाविन्दन्नोपलब्धवान् । अङ्कुरे जाते बीजे (तमुद्भाव्य नष्टे)

तु तत्वेन परिणते इह पुनस्तद्बीजं कथमुपलभेत। पुमानितिस्वयं विचारयन्बीजं व्यञ्जकं नाविन्ददिवेति। जातेऽङ्कुरे कथमुपलभेतेत्यत्र यद्वक्तव्यं तदतीतश्लोकतात्पर्ये सा जाते त्वङ्कुरेस्थित्यादिनोक्तं मननीयम्। अत्र वक्तव्यं सर्वं षष्ठेऽज्ञानं च चतुर्वारं द्विवारं भयमेव चेत्याद्युदाहरणपूर्वकमाचार्यैर्विचारितमिति नेह पराक्रान्तमतस्तदेवेहानुसन्धेयम्॥ ३४॥

मन्दनन्दिनी — पूर्वश्लोके पद्मोत्पत्तिमुक्त्वाऽधुना ब्रह्मणः पद्मादुद्भवं पद्मोपादानगतरूपस्य पद्मादन्यत्रादर्शनं चाह॥ तदिति॥ तत्सम्भवः पद्मसम्भवः कविः सर्वज्ञः सः प्रसिद्धो हिरण्यगर्भोऽतः पद्मादन्यद्वस्त्वपश्यन्। व्यञ्जकत्वाद्बीजशब्दवाच्यम्। उपादानगतम्। वस्तुत आत्मनि स्वदेहभूते पद्मे ततमब्दशतमप्सु निमज्यमानः सन् बहिः पद्माद्बहिर्विचिन्वन् गवेषमाणो नाविंदत्। कुत इत्यत आह॥ जात इति॥ अङ्कुरे जाते तत्रैव विद्यमानं बीजगतं रूपम्। इह ततो बहिः कथमुपलभेतेति योजना। अत्र पद्मोपादानगतस्य कर्णिकाशब्दवाच्यस्यादृश्ययोगिगम्यस्य कार्ये जाते तद्गतत्वेनान्यत्राभावात्। अन्यत्रादर्शनं पद्मगतत्वेनैव दर्शनं च ग्राह्यम्। बहिर्गवेषणं च लोकविडम्बनाय भगवत्प्रीत्यर्थमेव वा। अन्यथा कविरित्युक्तसर्वज्ञत्वविरोधात्। उपादानाद्यनन्तर्गतपद्मनाभदर्शनं तु तपसाऽस्त्येव। तृतीयस्कन्धे तथैवोक्तेरित्येव मन्तव्यम्॥ ३४॥

स त्वात्मयोनिरति विस्मित आश्रितोऽब्जं
कालेन तीव्रतपसा परिशुद्धभावः।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं
भूतेन्द्रियाशयमये विततं ददर्श॥ ३५॥

सत्यधर्मीया — कविरेवं विचारयन्व्यज्ञासीद्वा नेति ज्ञीप्सायामाह॥ स इति। आत्मयोनिरात्मा परमात्मा त्वमेव योनिः कारणं यस्य सः। सत्त्वात्मयोनिरित्यखण्डं वा पदम्। सत्त्वं शुद्धं तदेवात्मयोनिः स्वकारणं यस्य सः। सत्त्वसत्त्वश्चतुर्मुख इत्यादेः। अतिविस्मितो विना कारणं न कार्यनिष्पत्तिः सा च जाता तत्त्वन्तर्बहिरपि नोपलभ्यत इति कुतूहलाकुलः स्वयं यज्जातस्तदब्जं पुनराश्रित उपारूढः। कालेनाब्दशतात्मना। तीव्रेण त्वरया स्वकामितदेन तपसा तपतपेत्यशरीरगिरोऽनन्तरं चीर्णेन। परिशुद्धभावो भगवद्दयोदययोग्यमनस्कः। आत्मनि ततं त्वाम्। तथा भूतेन्द्रियाशयमये। भूतानीति पञ्च। मनसोऽन्यानीन्द्रियाणि। आशयो मनश्चैतदात्मके जगति भुव्यतिसूक्ष्मं गन्धं तदभिमानिनीं देवताम्। गन्धस्य घ्राणग्राह्यस्यातिसूक्ष्मत्वं सूक्ष्मेक्षिकयाऽऽलोचने सम्भवद्दैवतैवात्रार्थ इत्यवगमयतीति ज्ञेयम्। हे ईश। यथा योगी गन्धं देवतां पश्यति। तद्वत्त्वां ददर्शेत्यन्वयः॥ ३५॥

मन्दनन्दिनी — बहिर्नाविन्ददित्युक्त्या बहिरेवादर्शनम् । अन्तस्तु दर्शनं जातमित्याह ॥ स त्विति ॥ हे ईश आत्मयोनिः परमात्मकारणकः स हिरण्यगर्भः । तुशब्देन देवतान्तराद्वैशिष्ट्यमाह । एकस्य हरेर्बहुधा जन्मास्तीति । अतिवस्मितो भगवद्विषयेऽत्यन्ताश्चर्यबुद्धिमान् अब्जमाश्रितः । कालेन भगवन्नियुक्तकालावच्छिन्नेन तीव्रतपसा परिशुद्धभावस्तादृशरूपदर्शनसमर्थमनस्को य इति काले तपस्यनुष्ठित एव ब्रह्मणा दृश्ये एवमिति भगवत्सङ्कल्पादिति भावः । त्वां भूतेन्द्रियाशयमये आशयो मनस्तत्त्वं भूतादिविकारे आत्मनि देहस्थानीये पद्मे भुवि गन्धमिव गन्धाख्यदेवतामिवातिसूक्ष्मं विततं व्याप्य स्थितं ददर्शेति योजना । अत एव तात्पर्यम् ॥ गन्धाख्या देवता यद्वत्पृथिवीं व्याप्य तिष्ठति । एवं व्याप्तं जगद्विष्णुं ब्रह्मात्मस्थं ददर्श हृति चेति ॥ जगद्व्याप्तं जगद्व्याप्यतिष्ठन्तम् । आत्मस्थं देहस्थानीयपद्मस्थमित्यर्थः ॥ ३५ ॥

एवं सहस्रवदनाङ्घ्रिशिरःकरोरु-
नासास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सदुपलक्षणसन्निवेशं
दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥ ३६ ॥

तात्पर्यम् — 'गन्धाख्या देवता यद्वत्पृथिवीं व्याप्य तिष्ठति । एवं व्याप्तं जगद्विष्णुं ब्रह्माऽऽत्मस्थं ददर्श हे'ति च । मायामयं ज्ञानस्वरूपम् । सदुपलक्षणसन्निवेशं आनन्दादिलक्षण-समुदायरूपम् ॥ ३६ ॥

सत्यधर्मीया — मायामयं सदुपलक्षणसन्निवेशमिति पद्यार्धे दृष्टरूपस्य मायिकत्वं तथैव सदुपलक्षणसन्निवेशं सद्ब्रह्मैवोपलक्षणस्य मायिकरूपस्य सन्निवेशमन्तर्धानस्थानमित्यर्थ इति भ्रमभ्रमणाय तदनूद्य व्याकरोति ॥ मायामयमिति । माया वयुनं ज्ञानमिति तन्नामसु पाठान्मयटश्च विकारार्थे प्राचुर्यार्थे मयट् त्रिधेति वचनात्तादात्म्यार्थतेति ज्ञानरूपमित्यर्थ उक्तः । सदुपलक्षण-सन्निवेशम् । "सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचकाः ॥" इति गीतातात्पर्योक्तेः "लक्षणं परमानन्दो विष्णोरेव न संशयः" इत्यादिवचनात् । सन्ति आनन्दादीनि उप इतरविलक्षणत्वेनाधिकानि लक्षणानि तेषां सन्निवेशः समुदायस्तद्रूपमिति भावेन व्याचष्टे ॥ आनन्दादिसमुदायरूपमिति । सत्त्वात्मयोनिरिति श्लोके भुवि गन्धमिवात्मनि विततं त्वां ददर्शेति गन्धनिदर्शनेन दर्शनकर्मात्रापि तदेव नान्यदिति निष्टंकयितुं दृष्ट्वेत्यनुवादानुकूल्यार्थं भुवि गन्धमिव दृष्ट्वेत्यपि योजनीयमिति ग्रन्थकृद्भावमावेदयितुं संसारोऽखण्डश्लोकद्वयस्यायं तदुपसंहाररूप इति सूचयितुं गन्धोऽयं जड इति भ्रमं वारयितुं मानं ब्रह्मतर्कवचनमुदाहरति ॥ गन्धाख्येति । आत्मस्थं विष्णुं जगद्व्याप्तं सर्वव्यापिनम् । एतदर्थः सप्रमाणं षष्ठोक्तोऽनुसन्धेयः ॥

ततश्चायं श्लोकार्थः ।। यत्सूक्ष्मतमं प्राग्ददर्शेत्युक्तं तदेवेदं न तिलतुलव्यत्यास इति वेदव्यास आवेदयति ।। एवमिति । आत्मयोनिरित्युक्तिस्वारस्यान्न पद्मभवस्य स्वयंभुवश्च तदुभयविभातवस्तुनो विशेष इति ज्ञायते । सहस्रेत्येतद्वदनादिभिः सर्वैः सहान्वायि । सहस्रमनन्तानि वदनानि तथाऽङ्घ्रयः पादाः शिरांसि करा उरव उत्सङ्ग नासा नासिका आस्यानि वक्त्रमध्यप्रदेशाः । आस्यं वक्त्रे वक्त्रमध्य इति विश्वः । कर्णाः श्रोत्रेन्द्रियाणि नयनानि नेत्राणि । आभरणान्यलङ्कारा आयुधानि चक्रादीनि तैराढ्यं युक्तम् । स्वरूपभूतवदनादिभिः सहपाठादाभरणायुधानामपि तदात्मकानां ग्रहणमौचितीं भजत इति वा भिन्नानां ग्रहणं सहपाठेऽपि तन्मुख्यं ज्ञानशब्दयोरित्यादाविव विशेषसम्भवादिति यथासम्प्रदायं ज्ञेयम् । एवं शेषासन इति प्रागभिहित आसनत्वेन सहस्रवदनः शेषो यस्य स चासावङ्घ्र्याद्याढ्यश्चेति वा । एतत्पक्षेऽङ्घ्र्यादिपदान्येव बहुवचनान्ततया विगृहीतानि बाधकाभावाद्बहुत्वसमर्पकाणीति मन्तव्यम् । मायामयं ज्ञानात्मकम् । मायेति भगवत्प्रज्ञेत्यादेः । सदुपलक्षणसन्निवेशमानन्दाद्यधिक-लक्षणसमुदायरूपम् । अथ कस्मादुच्यते सदिति सन्तो ह्यस्मिन्नानन्द ओजो बलमित्यादिश्रुतेः । सन्निवेशश्च यः स्तोमः समुदायो गुणः स्मृत इत्यभिधानम् । विज्ञानमानन्दं ब्रह्मेत्यादेस्तदात्मकता ज्ञेया । विरिञ्चो महापुरुषः । योगी यथा भुवि गन्धं तद्देवतां दृष्ट्वा मुदमुपैति तथा मुदमापेत्यर्थः ।।३६।।

मन्दनन्दिनी — न केवलं पद्मान्तर्गतसूक्ष्मरूपं बहिः पद्मनाभरूपं दृष्टवान् किन्तु पातालमेतस्य हीत्यादिनोक्तं विराड्रूपं दृष्ट्वा मुदमापेत्याह ।। एवमिति ।। अनन्तार्थकसहस्रपदं वदनादेः सर्वस्य विशेषणम् । मायामयम् । एतच्च मायामयं ज्ञानस्वरूपमिति वा तात्पर्ये व्याख्यातम् । मायेत्युक्ता प्रकृष्टत्वात्प्रकृष्टं हि मायाभिधम् । विष्णोः प्रज्ञप्तिरेवैकेति श्रुतेः । सदुपलक्षणसंनिवेशम् । एतदप्यानन्दादिलक्षणसमुदायरूपमिति तात्पर्ये व्याख्यातम् । अथ कस्मादुच्यते सदिति । सन्तो ह्यस्मिन्नानन्द ओजो बलमिति स्पष्टश्रुतेः । उपशब्दस्योपपन्नार्थकत्वात् । संनिवेशशब्दस्य संनिवेशश्च यःस्तोमः समुदायो गुणः स्मृत इत्यभिधानात् ।। ३६ ।।

तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्
वेदद्रुहावतिबलौ मधुकैटभाख्यौ ।
हत्वाऽनयत् श्रुतिगणांश्च रजस्तमश्च
सत्वं तव प्रियतमां तनुमामनन्ति ।। ३७ ।।

सत्यधर्मीया — यो मुदमाप विरिञ्चस्तस्मै । भवान्हयशिरस्तनुवं हयग्रीवशरीरम् । तनुवमित्यत्र इयङादिप्रकरणे तन्वादीनां छन्दस्युपसंख्यानमित्युवङ् । बिभ्रद्दधत् । मधुकैटभाख्यौ मधुश्च कैटभश्चेत्या-ख्या ययोस्तौ । इतराबध्यत्वे हेतुमाह ।। अतिबलाविति । अति बहुसन्निहितो बलति सदा इति बलो

वायुर्ययोस्ताविति । तत्कृतमनुपकारमाह ।। वेदद्रुहाविति । तद्द्रोहोऽपहारात्मा तदुक्तानुष्ठानप्रतिबन्धादिनेति ज्ञेयम् । हत्वा तद्वरयाचनादिकं विधाय चक्रेण। रजस्तमश्च किञ्चिद्रजोमिश्रभूयोभागस्तामस इति तद्रूपौ । श्रुतिगणाननयत्प्रापयामास । तदभिमानिनः तद्वशान्कारयामासेत्यर्थः । शुद्धसात्त्विकत्वाद्धातुस्तद्धितकरणमुचितमच्युते इत्याह ।। सत्त्वमिति । तव प्रियतमां तनुमामनन्ति । म्ना अभ्यासे इति । अस्य मनआदेशे रूपम् । आगमा आगमज्ञाश्चेति शेषः । तदुत्पत्त्यादिस्तु त्वया पुरा कर्णपुटाद्विनिर्मितौ महासुरौ तौ मधुकैटभाख्यौ । प्रभञ्जनावेशवशात्तवाज्ञया बलोद्धतावाशु जलेऽभ्यवर्धताम् । त्वदाज्ञयेत्यारभ्य मेदिनीमित्यन्तेनोक्तः श्रीमन्महाभारततात्पर्यनिर्णयेऽनुसन्धेयः । महाभारते वनपर्वणि धुन्धुमारोपाख्याने च । एकार्णवे तदालोक इत्यारभ्य वित्रासयेतामित्यादि गर्भीकृत्य चक्रेण शितधारेण न्यकृन्तत महायशा इत्यन्तेनेश्वरस्य ताभ्यां वरदानं ततो हरिणाऽप्यरिणा तयोर्वधादिकं विस्तरतः प्रतिपादितमनुसन्धेयम् । स्वोत्पत्तिस्थानत्वाच्छ्रवसोर्बहुश्रवणादिना श्रान्तिर्न भवत्विति श्रुतितस्करणं युक्तिमदिति ज्ञेयम् ।। ३७ ।।

मन्दनन्दिनी — भवान्हयशिरस्तनुवं च बिभ्रत् श्रुतिगणांश्च । तस्मै ब्रह्मणेऽनयत् रजस्तमः सत्त्वं च प्रियतमां तनुं प्रीतिविषयप्रतिमाम् । देवताप्रजेश्वरराक्षसादिषु स्थित्वा लीलाकर्तृत्वात् ।। ३७ ।।

इत्थं नृतिर्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।
धर्मं महापुरुष पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ।। ३८ ।।

सत्यधर्मीया — नरो रामकृष्णादयश्च । तिर्यञ्चः कूर्माद्याश्च । ऋषयश्च व्यासदत्तात्रेयकपिलाद्याश्च । ननु त्रषयोऽपि नरास्तत्कथं कथनं पृथगिति चेन्न । देवर्षिपितृपनरा इति मुक्तास्तु पंचधा'' इति ऋषित्वं धर्मविशेषः इत्येवं कथनसंभवात् । देवाश्चोपेन्द्रायश्च । झषो मत्स्यश्च । एतेच ते अवताराश्च । तैः यद्यपि तिर्यक्पदेन मत्स्योऽपि वराहादिवद्गृहीतुं शक्य इति न पृथक् झषो ग्राह्यस्तथाऽपि यद्रूपोपास्तिं स्वयं करोति तदनुक्तिर्न युक्तेति ना च तिर्यक् सिंहश्चेति तदुक्तावावश्यक्यां झषग्रहणमावश्यकम् । तदपि कूर्माद्युपलक्षकमिति वेदयितुं पृथगुक्तिः । यद्वा ब्रह्मसत्यव्रतायेत्युक्तेरुपदेशकत्वरूपकार्यविशेषेण विशेषत उत्तरस्कन्धनिबन्धनीयकथात्वेन बुद्धिसन्निहितत्वादिमत्त्वात्तद्ग्रहे कूर्मादिग्रहः सुलभ इति तिर्यग्झषेति पृथक् कथनमिति ज्ञेयम् । अत एवेत्थं नृतिर्यगित्युक्तिर्युक्ता । इत्थं प्रात्यक्षिकेदमाकारेण नृतिर्यगिति तद्योजना ज्ञेया । लोकान् विभावयसि सृजसि । अथ जगत्प्रतीपांस्तत्प्रतीपफलत्वेन हंसि घातयसि । हे महापुरुष । धर्मं लोकांश्च पासि । स कीदृशो धर्म इत्यत आह ।। युगानुवृत्तमिति ।

कृतत्रेताद्वापरयुगानुसारिणम् । यद्यस्मात्कलौ युगे च्छन्नो विशेषतः स्वसत्कार्यानुजृम्भकोऽभवो यः स त्वं त्रियुगस्तत्संज्ञः । अभव इत्यावर्तितेनान्वयः ॥ ३८ ॥

मन्दनन्दिनी — भगवदवताराणां लोकविभावनधर्मपरिपालनदुष्टहननादिकमेव प्रयोजनमित्याशयेन स्तौति ॥ इत्थमिति ॥ हे महापुरुष । नरावतारो ऋषभादिः । तिर्यगवतारो वरहादिः नृतिर्यगवतारो नृसिंह इति वा । ऋषिः कपिलादिः । देवो यज्ञादिः । झषो मस्त्यः । लोकान्विभावयसि ऐश्वर्ययुक्तान्करोषि । जगत्प्रतीपान् दुष्टान्हंसि । धर्मं चतुष्पादं धर्मं पासि । युगानुवृत्तं कृताद्यनुवृत्तम् । एतादृशस्त्वम् । यतः कलौ छन्न उक्तप्रयोजनायावतीर्णः । अथ तस्मात्सः त्वं त्रियुगोऽभव इति योजना । उक्तप्रयोजनायेत्युक्तत्वात् दैत्यमोहनाय बुद्धावतारोऽपि न दोष इति मन्तव्यम् ॥ ३८ ॥

नैतन्मनस्तवकथासु विकुण्ठनाथ
सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हर्षशोकभयेषणार्तं
तस्मिन् कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥

सत्यधर्मीया — त्वं तु व्यक्तं भक्तवत्सलोऽहं तु भक्तस्तथाऽपि न शक्तः किं तनुयामिति मतिमत्प्रवेकोऽप्यात्मानमविवेकीव दर्शयन् विज्ञापयति ॥ नैतदिति । हे विकुण्ठनाथ विकुण्ठाः प्रत्यावृत्त्यादिकुण्ठितकुण्ठितनाः (विगतप्रत्यावृत्यादिकुण्ठनाः'' इति अमुद्रितपाठः सरलार्थः) मुक्ताः तेषां नाथ । विकुण्ठाय मुक्तये नाथ्यते याच्यत इति स तथा । एतत् मम मनः । स्तवकथासु स्तवो हि मत्कर्तृकस्त्वत्कर्मकः । स च कथाः भवदवतारचरितरचितनिबन्धास्तास्वेकैकाऽपि कथा विचित्रतया श्रवणर्ध्यजननकारणम् । तदानन्त्येऽपि नर्द्रवति मम हृदयमिति हा मम मनःकठिनतेति द्योत्यते बहुवचनेन । न सम्प्रीयते । तत्रैव तुष्टिमत् न सम्यग्भवति । तत्र निमित्तं स्वपरानुभवसिद्धमाह ॥ दुरितदुष्टमिति । दुरितैर्मदुपार्जितैः पातकैर्दुष्टमसुसाधनिग्रहम् । सत्यसति वाऽसति वा विषये न सरच्चेत्तदप्येकं मङ्गलम् । न तथेत्याह ॥ असाधुतीव्रमिति । असाधौ विषये तीव्रमेकान्तं रतम् । तदाकारमाह ॥ कामेति । कामातुरमसत्कामलम्पटम् । हर्षः शोकश्च तत्प्राप्त्यप्राप्तिभ्यां भयम् । पदा रासम् । (''पादेन तदीयत ईषणं च वित्तादीनां तैरार्तम् ।'' इति मुद्रितपाठः । स च दुरुपपदार्थः, परदारवित्तेषणं च तैरार्तम् इति अमुद्रितपाठः स च सुलभार्थः ।) असाध्वमङ्गलम् । तीव्रं कामातुराद्यन्वयीति वा । तस्मिंस्तादृशे मनसि सति तव गतिं मोक्षरूपिणीं दीनोऽहं कथं विमृशामीत्यन्वयः । यतस्तस्मिंस्तादृशमानसे मयि तव गतिं त्वन्निवेशं कथं विमृशामि । सा भवेदिति कथं जानीयाम् । उपायलोपादिति वा । तवेत्येकस्यैव कथागतिपदाभ्यामन्वयलापनसम्भवे

तवेत्यतिरिच्यत इति शङ्कनमातङ्कितं स्तवेति छेदेनेति ज्ञेयम् । तव गतिं कथं आमि । अमगत्यादिष्विति स्मरणात् गच्छामि । त्वं विमृश विचारयेति वा ।। ३९ ।।

मन्दनन्दिनी — इन्द्रियेषु मनसः प्राधान्यात्तन्नैर्मल्यकामस्तद्दोषं वक्ति ।। नैतदिति ।। हे वैकुण्ठनाथ । एतदेतादृशं मनस्तव कथासु न सम्प्रीयत इति क्रियाकारकयोजना । कीदृशमित्यतः पञ्चविशेषणैर्मनसो दोषमुक्तम् । तीव्रं वेगेन विषयसञ्चारवत् । ईषणं दारापुत्रवित्तादीच्छा । भवत्वेवं किं तेऽनिष्टमित्यत आह ।। तस्मिन्नित्यादि ।। ३९ ।।

जिह्वैकतोऽच्युत विकर्षति मा वितृप्ता
शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्ति-
र्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ।। ४० ।।

सत्यधर्मीया — मनसि बन्धमोक्षहेतुभूत एवं सति पराणीन्द्रियाणीमां दशां मां प्रापयन्तीत्याह । जिह्वेति । लेढीति जिव्हा । लिह आस्वादन इत्यस्मात् शेवयव्हजिव्हेति निपातितः शब्दः । रसना जिह्वेत्यमरः । रसनेति । एकतस्त्वत्कथाभिन्नगोष्ठीषु मा मां विकर्षति । ममापीतोऽप्यधिक आधिरतो मद्दलोलूखलनीतिमनुकरोति मां प्रति त्वन्नाथनमिति न नाथ वदेति वदति ।। अच्युतेति । इन्द्रियहेतुकच्युतिप्रच्युत । ततोऽपि नोपशमस्तस्या इत्याह ।। वितृप्तेति । तृप्तविरुद्धेति वा । तृप्तं तृप्तिर्विगतं तद्यस्या इति वा वितृप्ता । अनाप्तपर्याप्तिः । यथायथं वितृप्तपदमन्वेतव्यं शिश्नादिपदैः । विकर्षतिवदिति ज्ञेयम् । अन्यतोऽन्यत्र शिश्नो मेढ्रम् । शशसूगतावित्यतो नक् । त्वक् त्वचसंवरणे क्विप् । स्त्रियां तु त्वगसृग्धरेत्यमरः । पुंसि घप्रत्यये त्वच इत्यदन्तोऽपि । त्वक् त्वचो वल्के चर्मणि पत्रक इति रत्नकोशः । प्रसङ्गोक्तिरन्यत्राङ्गनालिङ्गनादौ । उदरं कुक्षिः । कुक्षिजठरोदमित्यमरः । उत्पूर्वकाद्दतावित्यतोच् । श्रवणं कर्णः । श्रु श्रवणे । करणे ल्युट् । कर्णशब्दग्रहौ श्रौत्रं श्रुतिःस्त्री श्रवणं श्रव इत्यमरः । कुतश्चिदसद्गोष्ठीश्रवणे । घ्राणो घ्राणम् नासिका । क्लीबे घ्राणं गन्धवहेत्यमरः । घ्रागन्धोपादाने ल्युट् । घ्राणं क्लीबे नासिकायां घ्राता स्याद्घ्राच्यलिङ्गकमिति भानुः । अन्यतस्त्वदनर्पितकुसुमाद्यास्वादने । दृक् दृशिर् प्रेक्षणे क्विप् । दृश्यतेऽनयेति सम्पदादिक्विब्वा । दृग्दृष्टी चेत्यमरः । चपला च सा दृक् च । क्वचिदसद्वीक्षणे । कर्मशक्तिर्हस्तादिकर्मेन्द्रियगणः । बव्ह्यः सपत्न्य एकभर्तृकाः । गेहपतिं भर्तारमिव । देहस्वामिनं मां लुनन्ति । त्रोटयन्तीत्यन्वयः ।। ४० ।।

मन्दनन्दिनी — मनस उक्त्वेतरेन्द्रियाणां दोषं वक्ति ।। जिह्वेति ।। हे अच्युत । मा मामेकत्र स्वविषये रसास्वादनेऽवितृप्ताऽलम्बुद्धिरहिता जिह्वा विकर्षति । तद्विषयकरागवन्तं करोति ।

एवमुत्तरत्रापि मां विकर्षतीत्यनुवर्तनीयम् । विषयवाचिपदाभावस्थलेऽन्यत इति । उदरस्यानिन्द्रियत्वेऽपि अशनायालक्षणबुभुक्षाजनकत्वेन तदुक्तिः । उक्तेतरपाण्यादिसमूहः सपत्न्यः स्वस्य विषये गेहपतिं यथा लुनन्ति तथेति योजना ॥ ४० ॥

एवं स्वकर्मपतितं भववैतरण्या-
मन्योन्यजन्ममरणाशनिभीतभीतम् ।
पश्यन् जनं स्वपरविग्रहवैरमैत्रं
हन्तेति पारमतिपीपृहि मूढसत्त्वम् ॥ ४१ ॥

सत्यधर्मीया — मारमण मामिव संसारे क्लिश्यन्तं सन्तं जनं पारयेति प्रार्थयते ॥ एवमिति । स्वकर्मपतितं भववैतरण्यां संसाररूपसंयमिनीपरिखारूपनद्यां स्वकर्मवशात्पतितम् । अन्योन्यजन्ममरणाशनिभीतभीतम् । अन्योन्यं जन्मानि च मरणानि चेति तान्येवाशनयो निर्घाता वज्रा वा । तेभ्यो भीतभीतमतिभीतम् । (शनैः अशनयश्च्यावयितुं शक्याः । एतद्बाधा अगाधेत्यप्याह ॥ आशनीति । आसमन्तात् द्वादशाष्टमस्थानगत इति शनेः । शनैश्चरत्वप्रायेणायमशुभग्रहः इति पञ्चम्युक्तेः । इति अमुद्रितकोशे अधिकः पाठः ।) स्वपरविग्रहवैरमैत्रम् । स्वैः परैश्च विग्रहेण विस्तारेण फलपर्यवसानेन वैरं मैत्रं च यस्य तम् । स्वजनैर्वैरमपरैर्मैत्रं च कुर्वन्तमिति यावत् । विग्रहः समरे काये विस्तारे प्रविभागयोरिति विश्वः । अत एव मूढसत्त्वमज्ञजन्तुविशेषं पश्यन् । हन्तेति खेद इति । पारम् । अतिपीपृह्यत्यन्तं पूरय । गमयेति यावत् । तज्ज्ञानं मम नास्तीत्यतो नेत्याह ॥ पारमिति । पारं पश्यंस्तज्ज्ञ इति । अतिपीपृह्यतिपारयेति वा । हन्तेति । पारच्चर पीपृहि मूढमद्येति पाठे एवं मूढं जनं तस्याः पारे स्थित नित्यमुक्त । हन्त कष्टमिति सञ्चिन्त्य पीपृहि पालय । पालनं च विनोत्तारणं न सम्भवतीत्येवमुक्तिरिति तदर्थः ॥ ४१ ॥

मन्दनन्दिनी — एवं संसारपतितत्वं स्वस्योक्त्वा भववैतरण्याः पारगमनं प्रार्थयते ॥ एवमिति ॥ पश्यन्नित्यस्य विभक्तिव्यत्ययेन पश्यन्तमित्यर्थो बोध्यः । द्वितीयान्तानि जनस्य स्वस्याऽपि विशेषणानि । तथा चैतद्विशेषणविशिष्टं जनं पश्यन्तम् । एतद्विशेषणविशिष्टं मां पश्यंस्त्वं पारं वैतरिण्याः पारं तीरमतिपीपृहि अतिशयेन गमयेति योजना । पिपर्तेर्धातूनामनेकार्थत्वाद्गमनार्थत्वम् । अभ्यासदीर्घश्छान्दसः । अलिट्यपि कितिशृदृपां ह्रस्वो वेति ह्रस्वश्च । वैतरण्यां पतितमित्यन्वयः । परस्परं जननमरणं च भवतीति तल्लक्षणादतिशयेन भीतम् । स्वपरविग्रहयोर्देहयोर्यथायोग्यं वैरमैत्रे यस्य तम् । मूढसत्त्वं पारगमनोपायाज्ञं प्राणिनम् । हन्तेति भगवद्दर्शनाह्लादास्वादने ॥ ४१ ॥

कोऽन्यत्र तेऽखिलगुरो भगवन् प्रयास
उत्तारणेऽस्य भवसम्भवलोपहेतोः ।
मूढेषु वै महदनुग्रह आर्तबन्धो
किं तेन ते प्रियजनाननुसेवमानः ॥ ४२ ॥

सत्यधर्मीया — कियदिव (कियदिदं खपाठः(**अमुद्रितपाठः**)) तवास्मत्संसारतारणं नारायणेति वदति ॥ को न्विति । अत्रोत्तारणे । अत्र पालकरहितेति वा । हे भगवंस्तव प्रयासः श्रमः को नु । न कोऽपीत्यर्थः । समुद्रतरणं दाशसाध्यमिदं तु सदाशयसामान्यगुरूपदेशसाध्यं त्वं त्वेतादृश इति न दुस्साध्यमिदानीं तवेति तथा सम्बोधयति ॥ अखिलगुराविति । गृणाति तत्त्वमिति गुरुः । अखिलस्य गुरुस्तत्सम्बुद्धिरिति । अखिलो बलवांश्चासौ गुरुश्च तत्सम्बुद्धिर्वा । हेत्वन्तरमप्याह ॥ अस्येति । अस्य जगतो भव उत्पत्तिः सम्भवः सत्ता स्थितिरिति यावत् । लोपो नाशस्तेषां हेतोः कारणस्य । मूढेष्वस्मदादिषु । आर्तबन्धो आर्तानां बन्धुरिति वा । आर्ता बन्धवो यस्येति वा । तत्सम्बुद्धिः । वै गजेन्द्रादिषु प्रसिद्धो महदनुग्रहः । महत्सु क्रियमाणोऽनुग्रहो महदनुग्रहः । अनुग्रहो यस्तेन ते किं महत् । भावप्रधानः । महत्त्वं न किमपीत्यर्थः । प्रयोजनमिति शेषः । किं महत्प्रयोजनं वा नेत्यर्थः । न चैतेन प्रयोजनं चेत्तत्करणं कथमित्यत आह ॥ त्वं प्रियजनाननु सेवमान इति । प्रियजनाननु तत्कर्मानुकूल्येन सेवमानः । भजन्तं भजमानस्येत्यादेः । यतोऽहं ते प्रियजनान्नारदादीननु सेवमान इति ममोत्तारणे को नु प्रयास इति वाऽन्वयः । प्रियजनाननु सेवतां न इति क्वाचित्कः पाठो न सरलः ॥ ४२ ॥

मन्दनन्दिनी — पूर्वत्र भववैतरण्या उत्तारणा प्रार्थिता कथमुत्तारणं करोमीत्यत आह ॥ हे अखिलगुरो ॥ आर्तबन्धो भगवन्! अस्य जगतो भवसम्भवलोपहेतोर्भव उत्पत्तिः सम्भवः सम्यक् स्थितिर्लोपो नाशस्तद्धेतोस्तेऽत्र जगद्विषये उत्तारणे कः प्रयासः । अन्याधीनोत्पत्त्यादिके प्रयासः स्यात् । त्वदधीनोत्पत्त्यादिके तव न कोऽपि प्रयास इति भावः । द्वितीयेऽपि परप्रयोजनमस्तीत्याह । मूढेषु उत्तारणोपायाज्ञेषु भक्तेषूत्तारणकरणं महदनुग्रहो महाननुग्रहः । आत्वस्यानित्यत्वादभावः । आत्यन्तिकदुःखोच्छेदस्वरूपानन्दाविर्भावस्य परप्रयोजनाभावत् । तृतीयमङ्गीकरोति ॥ किं तेन त इति ॥ स्वप्रयोजनं नास्त्येवेत्यर्थः । तर्हि कथं करोमीत्यतो दयालुत्वादिति भावेन तं बन्धो इति सम्बोधनम् । स्वभावश्चायमित्याह । प्रियजनाननुसेवमानः प्रियजनान् भक्तजनान् अनु भक्त्यानुसारेण फलदानेन सेवमानः । ताच्छील्ये शानच् । भक्तेषु फलप्रदानस्वभाव इति योजना ॥ ४२ ॥

नैवोद्विजे भवदुरत्ययवैतरण्या-
स्त्वत्तीर्थगायनमहामृतपानमत्तः ।
शोचे नु ते विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥

सत्यधर्मीया — मम तु तव ममतास्पददासस्य हस्तन्यस्ता विमुक्तिरिति न मद्विषये चिन्तातान्तिः । किन्तु ये हा कष्टं देव लक्ष्मीश लोकाः पापानि कुर्वते ते कथं पारं संसारपारावारस्य गच्छेयुरिति शोचामि तानिति शंसति ॥ नैवेति । हन्ताहं भवदुरत्ययवैतरिण्या नैवोद्विजे न बिभेमि । तदपायापगमकोपायस्तव दययोदयवान्यतस्तत इत्याह ॥ त्वत्तीर्थेति । तव तीर्थं सर्वौत्तम्यप्रतिपादकं वेदवेदान्तादिसच्छास्त्रम् । तीर्थं शास्त्रेऽध्वर इति विश्वः । तस्य गायनं गानं तदेव महामृतं तस्य यत्पानं श्रवणादिरूपं तेन मत्तः । महामृतमत्तचित्त इति पाठे महामृतेन मत्तं चित्तं यस्येति वा । (त्वत्तीर्थगायनाश्च ते । महामृतम् अप्रत्यावृत्तिर्मोक्षः । तेन क्लृप्तेन मत्ताः । तेषु चित्तं यस्येतिवा । इतीदं खपाठे अधिकं पठ्यते) त्वत्तीर्थं गच्छन्त्यवगच्छन्तीति त्वत्तीर्थगाः । त एवायनमाश्रयो यस्य तन्महामृतं मोक्षस्तन्मत्तचित्त इति वा । तेषामयनं मोक्षो येन स चासौ महामृतो मुख्यामृतरामात्मको भवांस्तस्मिंस्त्वय्येव मत्तं निमग्नतयेतरत्रासरच्चित्तं यस्य स इति । त्वत्तीर्थगायनं च महामृतं च त्वदध्वरशेषश्च ताभ्यां मत्तं चित्तम् । त्वत्तीर्थगं तदभ्याससाध्यं यदयनं मोक्षो महामृतं सर्वथा अयाचितं च स्वत एवागच्छदिति तेन मत्तं तुष्टं चित्तं यस्येति वा तम् । अमृतं यज्ञशेषे स्यादयाचिते चेति विश्वः । ते त्वयि विमुखचेतसो विमुखं चेतो येषां ते तथा तान् । त्वत्पराङ्मुखमनस्कानित्यर्थः । इन्द्रियार्थमायासुखायेन्द्रियाणामर्था विषयास्तज्जनितं यन्मायासुखं सुखवच्छद्मना प्रतीतं वस्तुतस्तु न सुखमात्यन्तिकं तस्मै । भरं संसारमुद्वहत उदुह्य वर्तमानान्विमूढान् । तदपि दुःखमित्याद्युक्तेरज्ञान् । शोचे । तेषामेतत्तरणं कथं स्यादिति शोचामि । यथा सह्यं स्वस्य दुःखं तथाऽन्यस्यापि तत्समम् । स्वावरेषु दया कार्येत्यादेः । करुणापरवशः प्रह्लाद एवं विज्ञापयतीति भावः । शोच इत्यात्मनेपदेन तद्दुःखमात्मगामीति मननंद्योतयति ॥ ४३ ॥

मन्दनन्दिनी — एवं माहात्म्यं ज्ञात्वा स्तुवतस्तव निश्चिते उत्तारणे कुतः संसारादुद्वेग इत्यतो न मदर्थं प्रार्थये किं तु संसारलोलुपयोग्यजनायेत्याह ॥ नैवेति ॥ त्वत्तीर्थस्य वेदान्तादिशास्त्रस्य गायनमहामृतेन मत्तचित्तः सुखीकृतचित्तोऽहं भवलक्षणाया अत्येतुमशक्याया वैतरण्या नोद्विजे । किं तु ततो भगवतो विमुखचेतस इन्द्रियार्थजन्यप्रकृत्यात्मकसुखाय भरं संसारभरमुद्वहतो विमूढान् भक्तान् शोचे कथमुत्तारयेदिति चिन्तयामीति योजना ॥ ४३ ॥

प्रायेण देवमुनयः स्वविमुक्तिकामा
मौनं चरन्ति विजने न परार्थनिष्ठाः ।
नैतान् विहाय कृपणान् विमुमुक्ष एको
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥ ४४ ॥

तात्पर्यम् — प्रायेण देवमुनयः । 'आश्रितेषु कृपा कार्या विशेषात्तात्त्विकैः सुरैः । मुनिभिश्च तथा कैश्चित्कैश्चित्कार्याऽखिलेष्वपि । तथापि तात्त्विकसुरकृपाविषयतां गताः । एत एव विमुच्यन्ते तदन्ये न कथञ्चने'ति च ॥ ४४ ॥

सत्यधर्मीया — प्रायेण देवमुनय इति श्लोके प्रायपदाभिप्रायतः केचन चरन्ति मौनं न च चरन्ति केचनेति प्रतीयते । (प्रायेण देवमुनयः परार्थनिष्ठाः । अहं तु तान् विहाय मुमुक्ष इति तदपेक्षातोऽयं प्रल्हादः स्वस्यातिशयालुतां दर्शयतीति च प्रतीयते । इति खकोशेऽधिकोऽयं पाठः । युक्तश्चायं प्रमाणबाधिते इति विषयद्वयकथनात् ।) ते च प्रमाणबाधिते इति दर्शयितुं किञ्चिदनूद्य मानमुदाहरति ॥ प्रायेण देवमुनय इति । प्रायेण बाहुल्येन । तत्पदार्थमेवाह ॥ विशेषादिति । तात्त्विकैः सुरैराश्रितेषु विशेषात्कृपा दया कार्या । तथा मुनिभिश्च कैश्चित्प्रस्तुतनारदादिभिश्च विशेषादुपदेशादिभिः कृपा कार्या । कैश्चित्तात्त्विकेतरैर्देवैर्मुनिभिश्चाखिलेषु जनेषु दया कार्या । तर्हि तदतात्त्विकदेवदयातो विमुक्तिः स्यात्किमित्यतो नेत्याह ॥ तथाऽपीति । ये तात्त्विकसुरकृपा(दया)विषयतां गता एत एव विमुच्यन्ते । संसारादिति शेषः । तदन्ये तात्त्विककरुणाविषयतां नोपगता इतरसुरकरुणाविषयतां गताश्च कथञ्चन न विमुच्यन्ते । मुख्यतस्तात्त्विकदेवोपास्तिरावश्यकीति प्रल्हादस्तद्दयापूर्वकं तान्कृपणान्विहाय न विमुमुक्ष इत्यूचिवानिति भाषाभावो ज्ञेयः । केचित्तु प्रायेणेति श्लोके देवाः स्वप्रयोजनपराः स्वयं तु परप्रयोजनार्थ इति स्वस्य कृपालुतातिशयः प्रल्हादेनोच्यत इति भाति । तदयुक्तम् । देवादीनामेवातिशयित-दयालुत्वादित्याह ॥ प्रायेणेति । श्लोकसमग्रव्याख्यानमिति ज्ञापयितुं पदद्वयप्रतीकग्रहणम् । यथा हीश्वरः सर्वप्रेरकोऽपि ज्ञानिविशेषान्प्रियान्करोति भविष्यति च तेषां स्वयं प्रियः । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इत्यादेः । एवं तत्त्वदेवा अपि दयया सर्वप्रेरकाः स्वोपासकेषु विशेषतः प्रीतिं कुर्वन्ति । न तथा सर्वत्रेत्याह ॥ तात्त्विकैरिति । तात्त्विकैः सुरैराश्रितेषु स्वोपासकेषु विशेषादतिशयेन कृपा कार्या । तथा कैश्चिद्वसिष्ठादिभिर्मुनिभिश्चाश्रितेषु कृपा कार्या । कैश्चिन्मुनिभिर्देवैश्च विशेषाधिकाररहितैर-विशेषादखिलेष्वपि कृपा कार्या । यद्यपि सर्वेषां कृपाऽऽवश्यकी तथाऽपि ये जनास्तात्त्विकसुर-कृपाविषयतां गताः त एव मुच्यन्ते । तदन्ये कथञ्चन न मुच्यन्ते । प्रल्हादेनापि तत्त्वदेवानुग्रहसाहित्येनैव स्वानुग्रहस्यैव मुक्तिहेतुत्वमुच्यत इति भावः । प्रायःपदं च विशेषानुग्रहस्य सार्वत्रिकत्वाभावाद्युज्यत

सर्वेषु गोब्राह्मणेभ्यः शुभं भवतु । ब्राह्मणाः सन्तु निर्भया इत्यादिरूपेणैव साधारणदया । न च देवादीनामपि साधारण्येन दयाऽस्तीति तथैवालमिति मन्तव्यम् । यद्यप्यस्ति तथाऽपि विशेषतः । तात्विकसुरकृपाविषयतां गता एव विमुच्यन्ते नान्यथेति साऽऽवश्यकी । प्रकृते तु दैत्यबालानां स्वाश्रितत्वात्तेषु स्वस्य विशेषतो दयाऽस्तीति तदुत्तारणप्रार्थना युक्तेति भावः ॥ ४४ ॥

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति देहकृपणा बहुदुःखभाजः
कण्डूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥

सत्यधर्मीया — संसारेऽपि सारसाक्ष्यादिसङ्गमङ्गलमनुभवारूढं किं मूढाननुभवारूढं सन्देहमदं प्रल्हाद मप्रल्हादं मुक्तिव्यक्तिं स्तौषीत्यतो भाषते ॥ यदिति । गृहमेधिसुखं गृहमेधिनां गृहस्थानां यत्सुखं तदेतद्रूपमिति निरूपयति ॥ मैथुनादीति । करयोः कण्डूयनेन परस्परसङ्घर्षणेन सद्यः सुखमनन्तरं दुःखदुःखमिव । पूर्वं तेन सुखेन तृप्यन्ति । स्वांस्तृप्तानिव मन्वते । तन्वते च तत्कर्मेति ते देहकृपणा देहपोषणपरायणाः । उत्तरत्र च परस्परकरसङ्घर्षो दुःखदुःखकस्तथेदं वैषयिकं सुखमिति बहुदुःखभाजो भवन्तीति शेषः । दुःखदुःखमिति वीप्सया लभ्योऽर्थोऽयमिति दर्शयितुमत्र बह्वित्युक्तिरिति मन्तव्यम् । (दुःखदुःखमिति । दुःखाद्दुःखमिति विग्रहलभ्योऽतिशयो बह्विति विवृतः । इति खपाठः) येन मन्मथेन मैथुनादि तुच्छं सुखमिच्छन्ति स एव निग्राह्य इत्याह ॥ मनसिजमिति । कण्डूतिमिव कण्डूतिवत् । व्याख्यातचरमिदम् । मनसिजं विषहेत । तत्सहनं दुःसाधमप्येवं चेत्सुसाधमित्याह ॥ धीर इति । धैर्यवान् बुद्धिरतो वा । धैर्यं बुद्धिरमणं कन्दर्पदर्पनाशकमिति भावः । मनसिजः कुसुमेषुरित्यमरः । सप्तम्यां जनेर्डः । तत्पुरुषे कृतीति तस्या अलुक् । विषहेत । इण्कोरिति षत्वम् । कण्डूञ् गात्रघर्षण इत्युक्तेर्गात्रघर्षणमर्थः । इदं तर्हि कण्डूयतेः क्विच् । ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिरिति प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् । यलोपो ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिरिति महाभाष्यं चाटीकत कैय्यटः । कण्डूयतेरिति क्यजन्तात्क्विप् । यगन्तात्तु क्विन्न भवति । उक्तं हि भाष्ये नैतेभ्यः क्विब् दृश्यत इतीति ॥ ४५ ॥

मन्दनन्दिनी — एवं मोक्षयत्नेन मनोनिग्रहः कार्यः । तस्मिन्कार्ये तु वनितादिविषयजो मनसिजो बाधते । तत्सुखं च न लभ्यते । अतः कथं कार्यमित्यतस्तादृशं सुखं तुच्छं दुःखबहुलं चातः करयोः कण्डूत्या भवत्सुखमल्पम् । अनन्तरं दुःखमधिकमतो यथा कण्डूतिं सहते प्रेक्षावांस्तथा धीरः कामं विषहेतेत्याह ॥ यदिति ॥ तदिति शेषः । हिशब्देन तुच्छत्वप्रसिद्धिमाह । देहकृपणा देहमात्रपोषणाः ॥

मौनव्रतश्रुततपोऽध्ययनस्वधर्म-
व्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां
वार्ता भवन्त्युत न वाऽत्र तु दाम्भिकानाम् ॥ ४६ ॥

सत्यधर्मीया — मुमुक्षुभिरिन्द्रियजय एव सम्पादनीयोऽन्यथा तत्साधनत्वेन सम्प्रतिपन्न-मौनादयोऽनुष्ठातृणां प्राणत्राणमात्रहेतवो भवन्ति न भवन्ति वा भवन्त्येवेति निष्कर्षोऽपि दुष्कर इतीरयति ॥ मौनेति । मौनमव्यवहारः । व्रतं कृच्छ्रादि । श्रुतं श्रवणं तपः पञ्चाग्निमध्येऽङ्गतापनम् । अध्ययनं स्वाध्यायस्य । स्वधर्मः स्वस्ववर्णाश्रमयोग्यः । व्याख्या प्रवचनम् । रह एकान्तवासः । जपो मन्त्रादिजपनं समाधिर्ध्यानम् । समाधिर्नियमे ध्यान इति विश्वः । एते दश प्रायो बाहुल्येनापवर्ग्या अपवर्गसाधका अपि । हे पुरुष पूर्णषड्गुण । परमत्यन्तं यथा तथा । अजितेन्द्रियाणां दाम्भिकानामिति सामानाधिकरण्यम् । वैय्यधिकरण्येऽपि मोहितैरमोहितैश्च तद्दम्भेन वार्ता भवन्ति क्वचिन्न भवन्तीत्यन्वयः । ज्ञात्वाऽपि स्वात्मनोऽल्पत्वं दम्भो माहात्म्यसूचनमिति गीताभाष्योक्तदम्भव-तामित्यर्थः । दम्भस्तु कैतवेऽनल्प इति विश्वः । कैतवपराणाम् । अत्र भुवि । ते मौनादिसमाध्यन्ता वार्ता जीवनोपाया भवन्ति । आजीवो जीविका वार्तेत्यमरः । उतैवं तर्कः । वस्तुतस्तु न भवन्ति । वाकारस्तुद्वयं च यथायथं व्रताद्यन्वयि । तेऽपीति समुच्चये वा वाशब्दः । भवन्ति वा भवन्तीव भवन्ति चेतीवार्थे वा वाशब्दः । उत प्रश्ने वितर्के वा स्यात्, वाशब्द उपमायां स्यादिवार्थे च समुच्चये । तुद्वयं परस्परसमुच्चये वा । तु समुच्चयेऽवधारण इति विश्वस्मिन्विश्वः । परवल्लिङ्गं द्वन्द्वतत्पुरुष-योरित्युक्तेरापवर्ग्या इत्युपपन्नम् ॥ ४६ ॥

मन्दनन्दिनी — मनसिजं विषहेतेत्यनेन निग्रहपूर्वकं भगवच्छरणागतिः कर्तव्येत्युक्तम् । इदानीं मौनादीनां समाध्यन्तानामपवर्गसाधनानामपीन्द्रियनिग्रहपुरःसरभक्तभावे जीवनमात्रसाधनत्वं तदपि क्वचिन्नास्तीत्यह ॥ मौनेति ॥ हे पुरुष । मौनादयः समाध्यन्ता आपवर्ग्या अपवर्गहेतवः प्रायः । परं परं तु । अजितेन्द्रियाणां दाम्भिकानां मनोनिग्रहाभावेऽपि बाह्यव्यापारप्रदर्शकानां ते मौनादयोऽत्र लोके देहभरणोपाया भवंत्युत न वा भवन्ति । बाह्यव्यापारेण मनोनिग्रहभ्रांतौ पूजयन्ति । वित्तादिकं वितरन्ति । मनोनिग्रहाभावज्ञाने तु न किमपि ददति । प्रत्युतापहसन्तीति भावः ॥ ४६ ॥

रूपे इमे सदसती तव वेददृष्टे
बीजाङ्कुराविव न चान्यदरूपकस्य ।

युक्ताः समक्षमुभयत्र विचिन्वते त्वां
योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥

तात्पर्यम् — कार्यकारणरूपे तद्वशत्वापेक्षया साक्षात् स्वरूपापेक्षया स्वरूपादन्यद्रूपं न ॥४७॥

इति सप्तमतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

सत्यधर्मीया — रूपे इमे सदसती तव वेददृष्टे इति श्लोकार्धे इमे सदसती तव रूपे त्वदात्मके ताभ्यामन्यत्तव रूपनाम नास्तीति हरेः सदसदात्मकत्वं (सदाद्यात्मकत्वं, खपाठः) प्रतीयते । तच्च प्रमाणबाधितमिति यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् । वाक्यं वेति सतां नीतिः सावकाशेन तद्भवेत् । सोपस्कराणि वाक्यानि भवन्तीत्यादेः सदसच्छब्दार्थमुद्बोधयन्नपेक्षितमध्याहृत्य तद्वाक्ययोजनामाह ॥ कार्येति । सदसती कार्यकारणरूपे । तद्वशत्वापेक्षया हर्यधीनत्वमपेक्ष्य तद्रूपे इत्युच्येते । न तु साक्षात्तद्रूपत्वेन । (साक्षात् स्वरूपापेक्षया । खपाठः) साक्षादित्यत्राप्यन्वेति । साक्षात्स्वरूपं मूलरूपं तदपेक्षया । पूर्णमदः पूर्णमिदमित्याद्युक्तेः । साक्षात्स्वरूपान्मत्स्यादेरन्यत्सदसदात्मकं स्वरूपं नेत्यर्थः । साक्षात्स्वरूपापेक्षयेत्यत्र स्वरूपपदं भावप्रधानम् । यतः साक्षात्स्वरूपत्वेन विद्यमानात् । स्वरूपात् मत्स्यादेः अन्यद्रूपं साक्षात्स्वरूपं हरेर्नास्त्यतः कार्यकारणे तद्वशत्वापेक्षयैव रूपे न तु साक्षात्स्वरूपापेक्षयेति वाऽर्थः । तद्वशत्वादेव तद्रूपता कुतस्तत्तादात्म्यादिति किं न स्यादित्यत आह ॥ साक्षादिति । साक्षात्तद्रूपापेक्षयाऽन्यद्रूपं प्राकृतं देहिनो देहादिवन्नास्तीति । इदमेव तर्हि भवत्वेतर्हीत्यत आह ॥ अस्वरूपादिति । अस्वरूपत्वात्तद्वशत्वादेव स्वरूपमित्युच्येते सदसती इति वा ॥

अथ मूलार्थप्रथनम् ॥ अनिन्द्रियजयवतां विद्यमानं मौनादिकमविद्यमानप्रायं तदादिसाधनं चासुसाधं साधारणं विना मनआद्यासनमुपासनमेतदित्यवेत्यावेदयति ॥ रूप इति । सदसती कार्यकारणरूपे । जगती मूर्तामूर्ते वा । तव रूपे त्वद्वशत्वात्त्वदधीनत्वात्त्वत्सन्निधानपात्रत्वादित्यादेरुपलक्षकमेतत् । नात्र मानं विनोच्यत एवमित्याह ॥ वेदेति । वेददृष्टे । द्वे वाव ब्रह्मणो रुपे मूर्तं चैवामूर्तं चेत्यादिवेदावेदिते । इदं भगवद्रूपत्वं नोपादानोपादेयभावेन बीजाङ्कुरादिवत्किन्तु प्राङ् निरुक्तबीजाङ्कुरवदित्यप्याह । बीजाङ्कुराविव प्रसिद्धबीजाङ्कुराविव न च । किन्तु व्यञ्जकत्वाद्बीजम् । जलादिकमङ्कुरश्च ताविव निमित्ततया त्वं कार्यतया तज्जगदिति निदर्शनविवेकप्रदर्शनं चेन सूचयामासेति ज्ञेयम् । अत एवान्यत् । अन्ये इति त्वद्वशादिति तात्पर्यभूमिकेयं चेति ज्ञेयम् । कुतोऽन्ये ते इत्यत आह ॥ अरूपकस्येति । भिन्नरूपरहितस्य । इदमपि भेदं स्फुटमवबोधयद्ग्रन्थकृद्वचनमिव च प्रेक्षावतां प्रेक्षणमत्र प्रमाणमित्याह

॥ युक्ता इति । उभयत्र कार्यकारणप्रपञ्चे त्वां विचिन्वत इति वचनेनाधाराधेयभावाविर्भावकेन भेदो बोध्यते । अन्यथोभयं रूपं विचिन्वत इत्यवक्ष्यदिति वीक्षणीयम् । समक्षमित्यनेन प्रत्यक्षम् । प्रतिपरसमनुभ्योऽक्ष्ण इत्यच् । तत्प्रत्यक्षं नाविश्वसनीयमित्याह ॥ युक्ता इति । ते च द्रष्टारो युक्ता मनोयोगिनः । उपायज्ञा वा । शोभना इति वा । तथा हि कर्मनिर्णयटीकाटिप्पण्योः । युक्तं शोभनम् । यथाऽऽह भिक्षुः । बालक्रीडा वासुदेवस्य युक्तेतीति । भेदानुमोदकं निदर्शनमुदाहरति ॥ योगेनेति । दारुषु काष्ठेषु योगेन मथनाद्युपायेन वन्हिमग्निमिव । यथाऽन्यतो तदुपायतो न स्याद्वन्हिस्फुरणमतस्तद्रूपमन्यदिति योजना । स वन्हिरन्यतो न स्यात् प्रत्यक्षविषय इति शेष इति वा ॥ ॥ ४७ ॥

मन्दनन्दिनी — इन्द्रियनिग्रहं विना मौनादेरप्रयोजकत्वमुक्त्वा इन्द्रियनिग्रहस्यावश्यकत्वमुक्तम् । तेन साध्यमुपासनं क कर्तव्यमित्यत आह ॥ रूपे इति ॥ बीजाङ्कुराविव कार्यकारणभूते । सदसती मूर्तामूर्ते । द्वेवाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेति वेददृष्टे । इमे तव रूपे । प्रतिमास्थानीये शरीरे इव त्वद्वशत्वात् । वस्तुतो रूपे एव किं न स्यातामित्यत उक्तम् । न चान्यदरूपकस्य । अरूपमक्षरं ब्रह्मेत्यादिश्रुत्या प्राकृतरूपरहितस्य अन्यत्प्राकृतरूपं न च । रूपं नैव । उपसनाऽधिकरणत्वं कथमनयोरित्यत आह ॥ युक्ता इति ॥ योगेन मथनाद्युपायेन दारुषु वह्निमिव । योगेन ध्यानयोगेन युक्ताः समाधिशीलाः । उभयत्र कार्यकारणयोस्त्वां समक्षं विचक्षते । तथा च ध्यानेनात्र तव प्रत्यक्षत्वादनयोः प्रतिमात्वं युक्तमिति भावः । ध्यानयोगादन्यस्य प्रत्यक्षोपायत्वं नास्तीत्याशयेनान्यतः कर्माद्युपायात्तवेक्षणं न स्यादित्युक्तम् । एतदभिप्रेत्योक्तं तात्पर्ये ॥ कार्यकारणरूपे तद्वशत्वापेक्षया साक्षात्स्वरूपापेक्षया स्वरूपादन्यद्रूपं नेति ॥ कार्यकारणे इत्यनेन कार्यकारणभूतमूर्तामूर्तपरे सदसती इति व्याख्यातम् । तद्वशत्वापेक्षयेत्यनेन रूपपदं गौणमित्युक्तम् । मुख्यत्वमेव किं न स्यादित्यत उक्तम् ॥ साक्षादिति ॥ अप्राकृतशरीरस्य भगवतः प्राकृतरूपाभावादित्यर्थः ॥ ४७ ॥

त्वं वायुरग्निरवनिर्वियदम्बुमात्राः
प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८ ॥

सत्यधर्मीया — तद्वशत्वात्सदसती रूपे इति सांमुग्धेन निरूपितमिदानीं ते विविच्य वदति ॥ त्वं वायुरिति । आत्मन आकाशः सम्भूत इति श्रुतिप्रतिबोधितक्रमतोऽनुदाहरन् उदाहरन्नव्यवस्थयाऽन्योन्यै-तत्कार्यकारणभावो भगवदायत्त इति सूचयामास व्यास इत्यवधेयम् । मात्राः पञ्च प्राणाश्चेन्द्रियाणि

चेति तानि । चिदनुग्रहश्चेतनो अनुगृह्यते इति अनुग्रहो जीवः । सगुणः ससत्त्वादिगुणः । विगुणो मुक्तश्चेत्येतत्सर्वम् । वस्तुतस्तु त्वम् । त्वदन्यदेव । तत्र हेतुः । मनोवचसा निरुक्तमिति । त्वन्त्वनिरुक्तः । हे भूमन् । भावभवित्रोरभेदादेवमुक्तिः पूर्ण । त्वत् त्वत्तः । अन्यन्नास्तीत्युच्यते । त्वं त्वमिति द्विरभिधास्यन्नेको युष्मच्छब्दप्रकृतिक एकस्त्वत्वावित्यन्यपर्यायावित्युक्तोऽन्यवाची त्वशब्द इति सूचयतीति ज्ञेयम् । अन्यथैकेनैव पूर्तेर्व्यसनितया व्यासो निबबन्धेति बोद्धव्यं स्यात् । न च सर्वत्रान्वयप्रदर्शनार्थं द्विरुच्चारणमिति वाच्यम् । त्वदन्यन्नास्तीत्युत्तरवचनतोऽप्यवचने द्विःसर्वत्रान्वयस्य सुज्ञानत्वात् । त्वं वायुरग्निरित्याद्यर्थस्तु विनैतदानुपूर्वीमात्रं यः पृथिव्यां तिष्ठन्नित्यादिनाऽत्रानुक्तैरर्थविशेषैः सहारुणिरुपररामेत्यन्ते बृहदारण्यकान्तर्यामिब्राह्मणे तद्भाष्ये स्फुटमुक्त इति च पूर्वं समानाधिकरणविभक्तेस्तद्वशत्वादिति गतिश्चिन्तितेति च नात्र पुनः पराक्रान्तमाचार्यैरपराक्रान्तितिरोहितत्वादर्थस्येति मन्तव्यम् ॥ ४८ ॥

मन्दनन्दिनी — सदसती इत्युक्तं विवृणोति ॥ त्वमिति ॥ प्राणेन्द्रियाणि प्राणाः पञ्च प्राणा, इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि, हृदयं मनश्चिदनुग्रहो जीवः । अनुगृह्यते इत्यनुग्रहः । चिच्चासावनुग्रहश्च । योग्यजीव इति यावत् । वायुरित्यादौ सर्वत्र त्वमिति सम्बन्धः । त्वं तदधीनमित्यर्थः । यदधीना यस्य सत्तेत्युक्तेः यस्य पृथिवी शरीरमित्युक्तेः । यस्यात्मा शरीरमित्यादिनांऽतर्यामिब्रह्मणे पृथिव्यादेः शरीरस्थत्वोक्तेः । उपलक्षणमेतत् । प्रकृत्यादिकं सर्वं त्वमेव त्वदधीनमेव । त्वं च सगुणो ज्ञानानन्दादिगुणः । विगुणस्त्रैगुण्यवर्जितः । मनोवचसा निरुक्तं सर्वमपि त्वदन्यथा नास्ति । अनधीनप्रवृत्तिमान्नेत्यर्थः ॥ ४८ ॥

नैते गुणानुगुणिनो महदादयो ये
सर्वे मनःप्रभृतयः सहदेवमर्त्याः ।
आद्यन्तवन्त उरुगाय विदन्ति हि त्वा-
मेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥ ४९ ॥

सत्यधर्मीया — तत्तद्वस्तुनिष्ठं भगवन्तं तत्तद्वस्तुनिष्ठा बहिष्ठाश्चेन्द्रादयो न साकल्येन जानन्त्यतस्त्वदुपास्तिरेवास्ति गतिरिति तामेव बहवो बहु मन्वते तन्वते ते च तथेत्याह ॥ नेति । एते गुणानुगुणिनो गुण अनुगुणिनो येषां ते तथा तद्गुणाभिमतिमन्तः । गुणाः सत्त्वाद्यभिमानिनो गुणिनो गुणविकृता इति वा । महदादयो ब्रह्माद्याः । मनःप्रभृतय उमापतिचन्द्राद्याः । तथा सहदेवमर्त्याः । देवाश्च तत्त्वेशव्यतिरिक्ता देहवन्त इन्द्राद्याः । मर्त्या मनुष्योत्तमाश्चेति सर्वे आद्यन्तवन्त उत्पत्तिमृतिमद्देहाः । उरुगाय उरुरित्येव गीयत इत्युरुगायस्तत्सम्बुद्धिः । त्वां न विदन्ति न जानते

साकल्येन । एवं शब्दाद्वेदाद्विमृश्य । सुधियस्त्वदितरे विरमन्ति संसारतः । आद्यन्तवन्त इत्यमानिकं नेत्यपि शब्दादित्यन्वितम् । तेन बोधयति नु निश्चयः । सुधिय इत्यस्य गुणा इत्यादिभिः सामानाधिकरण्यं वा । ये गुणादय आद्यन्तवन्तस्तेषां सुधियः शास्त्रनिश्चितार्थविषयिण्यः सुबुद्धयः । शब्दाद्वेदं विचार्य विरमन्ति । अशक्यत्वाद्विशेषविवित्सात इति वा । विमृश्यसुधिय इत्येकं पदम् । विमृश्या उपदेशकतया विचार्याः सुधियो येषां ते तथेति वा । शब्दादेवं निश्चित्य विरमन्तीति । स चोपदेशको भवानेवेति हिनाऽऽहेति वा ।। ४९ ।।

मन्दनन्दिनी — युक्ताः समक्षमुभयत्र विचक्षते त्वामिति कार्यकारणात्मकप्रपञ्चलक्षणप्रतिमायामुपास्य प्रत्यक्षीकुर्वन्तीत्युक्तम् । तच्चोपासनं न साकल्येन । तदभिमानिदेवानामपि साकल्येन ज्ञानाभावेनेतरेषां कैमुत्यन्यायेन साकल्येनोपासनाभावात् । किन्तु यथाशक्त्युपास्य साक्षात्कृत्य संसाराद्विरमन्तीत्याह ।। नैत इति ।। हे उरुगाय विष्णो । ये गुणा गुणत्रयाभिमानिनो गुणिनो गुणविकारमहदाद्यभिमानिनो मनःप्रभृतयस्तदभिमानिनः सहदेवमर्त्याः । रूपांतरेण विद्यमानैर्देवैर्मर्त्यैर्ऋषिभिश्च सहिता आद्यन्तवन्तः सृष्ट्यादौ प्रलये चोत्पत्तिविनाशवन्तः । बहुकालीना इति यावत् । एते सर्वे सुधियस्त्वां साकल्येन न विदन्ति । एवं विमृश्य निश्चित्य । अन्येऽधिकारिणः शब्दाद्वेदात्सर्ववेदान्तप्रत्ययन्यायेन यथायोग्यं श्रुत्वा मत्वा ध्यात्वा साक्षात्कृत्य च संसाराद्विरमन्ति । एवं निश्चिनोमीति योजना ।। ४९ ।।

तत्वे मनो दर्शने दृगपि स्तुतौ च
वाक् कर्मणि ह्यपि करौ श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं
भक्तिं जनः परमहंसगतौ लभेत ।। ५० ।।

सत्यधर्मीया — वद मे तव दास्ययोगमिति यदर्थितमन्ते तदेव देवं प्रति प्रार्थयन्नुपसंहरति ।। तत्त्व इति । तत्वो इतररहस्ये त्वयि मनो दर्शने दृक् चक्षुर्वाग्जिव्हा स्तुतौ त्वत्स्तोत्रे कर्मणि करौ । अपिशब्दात्पादौ तव क्षेत्रयात्रायामिति ग्राह्यम् । कथायां श्रवणमेवं षडङ्गया । षट् अङ्गानि यस्याः सा तया । संसेवयोपास्त्या । विना तामतिहाय परमहंसगतौ परमहंसानां गतिर्मोक्षो येन तस्मिंस्त्वयि । परमहंसप्राप्ये वा । जनः संसारी भक्तिं लभेत प्राप्नुयात्किम् । न प्राप्नुयात् । अत उपास्तिः सर्वार्थसाधिकेति साधिका । तस्याश्च त्वद्दाससहवासादिकं साधनमिति तद्योगस्तु तत्सम्पन्नानामेवेति दास्यं दिशेति भावः । प्रकरणमुपरमितवानिति मन्तव्यम् ।

हे परम । हंसगो हि हंसकः पादाभरणम् । हंसकः पादकटक इत्यमरव्याख्यायां हंस इव कायति । अन्येभ्योऽपीति डः । इवे प्रतिकृताविति कन्वेत्युक्तेर्हंसवद्रायतीति । गैशब्द इत्यतोपि डोऽर्थात्तदुपस्थाको हंसगशब्दो भवति । तयोर्हंसगयोर्हंसकयोस्तमागतिर्ययोस्तौ । हंसगतौ पादौ कर्मणीति सञ्चाररूपे क्षेत्रयात्रादौ इति विनोपलक्षणं चरणसञ्चरणोपलब्धिर्वाऽनुसन्धेया । तकारश्चागते चोर इत्येकाक्षररत्नमाला । हंस इव गतं ययोस्तौ चरणाविति वा । हे परम त्वयि । इति षडङ्गया संसेवया विना । भक्तिं च विना । तथा हंसगतौ हंसवाहे च चतुरास्ये भक्तिं परमहंसगतौ लभेत किमित्यावृत्त्याऽन्वयो वा । षडङ्गया संसेवया च विना । भक्तिं च विना । स जनो गतौ मोक्षरूपिण्याम् । परमहं महोत्सवं लभेत किमिति । जनः परं जनोलोकात्परं गतौ गम्ये । लभेत किमिति । अहं मन्य इति वा । सगतौ साधकलोकगतौ । सः साधक इति विश्वः । मह उद्धव उत्सवः । महं तु महसा सार्धं, जनो लोकान्तर इति चामरद्विरूपकोशादेः ।। ५० ।।

मन्दनन्दिनी — सुधियः संसाराद्विरमंतीत्युक्तम् । सुष्ठु ध्यानं च भक्तिज्ञाने विना न भवति । भक्तिज्ञाने च षडङ्गसेवया विना न भवत इति प्रदर्शयति ।। तत्त्वे इति ।। तत्त्वे ध्यातव्ये योग्यगुणविशिष्टे रूपे मनः । तथा च मनसा ध्यानम् । मनोङ्गकसेवा । दर्शने दृक् । स्तुतौ च वाक् । पूजादिकर्मणि करौ । कथायां श्रवणम् । क्षेत्रानुगमने च पादाविति वक्तव्यम् । चरणौ तौ तु सफलौ केशवालयगामिनावित्यन्यत्रोक्तेः । एवं प्रकारेण षडङ्गया सेवया विना जनः परमहंसगतौ परमहंसानां गतावाश्रयभूते त्वयि भक्तिं लभेत किम् । साधनान्तराभावान्नाप्नोतीति योजना ।। ५० ।।

नारद उवाच–

एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ।
प्रह्लादं प्रणतं प्रीतो गतमन्युरभाषत ।। ५१ ।।

सत्यधर्मीया — देवासुरो वेत्यादिनाऽऽदितः प्रल्हादेन जातिमप्रयोजिकीकृत्य भक्तिः प्रीणने प्रयोजिकीकृता यत्तन्नृसिंहो लालयामासोत दितिसुतस्य साक्षात्सुत इति कोपमुपाददे पुनरिति धर्मसंशयमर्म नारदो दूरयतीत्याह ।। नारद इति । भक्त्येत्यनुपलक्षणतां तस्याह । कोपापहारे कारणमाह ।। निर्गुण इति । सत्त्वादिगुणहीनः । यद्वा स्वस्वामीरितेन क्रोधोऽनुष्ठेयश्चेत्तदाज्ञयैव समाधिरपि विधेयो दृष्टो लोक एतस्यान्योऽस्ति नियन्ता यर्हि तर्हि तदाज्ञयैव क्रोधोपरोधः स्यादित्यत आह ।। निर्गुण इति । गुणेभ्योऽप्रधानेभ्यो निर्गतः स्वयमेव मुख्य इत्यर्थः । प्रीत इति प्रागुदीरयन् गतमन्युरिति तदनन्तरं गदन्कोपस्योपादानं कार्यानुगुण्येनेति दर्शयति । पूर्वमेव यन्मेऽर्पितः शिरसि पद्मकरप्रसाद इति विकोपितोक्तप्राया यद्यपि तथाऽपि तन्मात्रानुभववेद्या भाषणादिना सा सार्वजनीना जातेति गतमन्युरित्युक्तिरिति ज्ञेयम् ।। ५१ ।।

मन्दनन्दिनी — एवं वर्णितो भगवान् शान्तमन्युरभूदित्याह ॥ एतावदिति ॥ योजना तु स्फुटा ॥ ५१ ॥

श्रीभगवानुवाच–

प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम ।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५२ ॥

सत्यधर्मीया — प्रीतिश्चान्तरङ्गिकी तत्कृतकार्यानुमेयाऽनुमेयश्च कोपापगमोऽपि स्वकार्येणेति तत्किं रूपमित्यत इदमित्याह ॥ श्रीभगवानिति । यद्वाऽभाषतेत्युक्तं तत्किमाकारमित्यत आह ॥ श्रीभगवानिति । हे भद्र साधो । भद्रो वाच्यवच्छ्रेष्ठसाधुनोरिति विश्वः । प्रल्हाद ते भद्रं मङ्गलं भवतु । भद्रं स्यान्मङ्गल इति स एव । ते त्वदुपर्यहं प्रीतः प्रीतिमान् । सज्जातिजाते पोते मयि दयाकरणं किमद्भुतमित्यत आह ॥ असुरसत्तमेति । एतेन भक्तिर्मुख्या न जातिरिति निरणायि । तेऽभिमतं काङ्क्षितं वरं वरणीयम् । स च वरोऽपि नावर इत्यावृत्त्याऽऽह ॥ वरमिति । उत्तमम् । यद्वक्ष्यति वरैर्लोकप्रलोभनैरिति । अनेन वरमित्येकवचनं जातावित्यप्यसूचि । वृणीष्व । अहं नृणां देवादीनां प्रधानपुरुषाणाम् । शर्मणा नृपत्नीरित्यृग्व्याख्याटीकायाम् । नरो देवाः । प्रधानपुरुषत्वादित्युक्तेः । कामपूरः कामान्काम्यान्पूरयतीति स तथा । अस्मि । ते द्वन्द्वमहं द्वन्द्वं च पृथगन्वयीति सम्भवतीति ॥ ॥ ५२ ॥

मन्दनन्दिनी — नृणां भक्तानामहं कामपूरस्तदपेक्षितकामपूरकोऽस्मि ॥ ५२ ॥

मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे ।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥ ५३ ॥

सत्यधर्मीया — प्रसाद आसादयति दर्शनं मम तेन च तापापनोद इति वदति ॥ मामिति । मां अप्रीणतः । अप्रीणयतोऽसन्तोषयितुः । हे आयुष्मन् । अनेन त्वदायुरर्थमयमवतार इति अर्थं कटाक्षयति । मे दर्शनं दुर्लभं दुष्प्रापम् । यन्महीयस्त्वं तवावलोकनस्य कुत इत्यत आह ॥ दृष्ट्वेति । जन्तुर्जन्मी मां दृष्ट्वा पुनरनन्तरमात्मानं स्वं तप्तुं तापयितुं नार्हति न योग्यो भवति । मामप्रीणतोऽप्रीणयतो हिरण्यकशिपोः सकाशादायुष्मन्नित्यन्वयः ॥ ५३ ॥

मन्दनन्दिनी — प्रसादं विना दर्शनमेव दुर्लभम् । दर्शनानन्तरं च संसारे तत्पुनर्नार्हतीत्याह ॥ मामिति । अप्रीणतोऽप्रीणयतः ॥ ५३ ॥

प्रीणन्ति ह्यथ मां धीराः सर्वभावेन माधवम् ।
श्रेयस्कामा महाभागाः सर्वेषामाशिषां पतिम् ॥ ५४ ॥

सत्यधर्मीया — तव प्रीणनमावश्यकमित्युक्ते लाके ताद्दशाः सन्ति सन्तः किंवा न सन्तीत्यत आद्योऽनवद्य इति तानाह ॥ धीरा इति । धियां रन्तारो हि धीराः । सर्वभावेन सर्वं पूर्णमिहोच्यत इत्युक्तेः सर्वः पूर्णोऽन्यत्राप्रसन्नो ("अन्यत्र असन्" इति खपाठः) भावो भक्तिस्तेन । अथ । अतप्ततावाप्तिहेतुतो माधवं मां प्रीणन्ति प्रीणयन्ति । सम्पत्सम्पन्नताभावेन लक्ष्मीपतिप्रीणनं कारणमित्येवमुक्तिः । अस्ति चेत्कश्चिन्ममापि पतिः स एव भवेत्प्रीणयितव्यः स च नास्तीत्यहमेव तद्योग्य इत्यप्याह ॥ माधवमिति । मा न विद्यते धवः पतिर्यस्य स तमिति । साधवः इति पाठ इति साधवः । तदा धीरविशेषणम् । श्रेयस्कामा मङ्गलाभिलाषा महाभागाः फलवितरणोन्मुखदेवाः । भागो भागधेयैकदेशयोरिति विश्वः । सर्वेषां जनानामाशिषां तदभिलाषाणां पतिं स्वामिनं दातारमिति यावत् । हि यतस्त्वमपि मामप्रीणयस्तस्मादहं कामपूर इति च वरं वरयेत्येकान्वयो वा । हि यत आशिषां पतिरतो धीरा मां प्रीणन्ति प्रीणयन्तीति वाऽन्वयः ॥ ५४ ॥

मन्दनन्दिनी — नानाविधश्रेयस्कामाः प्रीणन्ति प्रीणयन्ति । त्वमपि स्तोत्रेण मामप्रीणयः अतो वरं वृणीष्वेति भावः ॥ ५४ ॥

नारद उवाच–

एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।
एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः ॥ ५५ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे नवमोऽध्यायः ।

सत्यधर्मीया — ननु नरहरिः सर्वविद्वा न वा । नाद्यः । ज्ञातप्रल्हादस्वभावस्य वरं वरयेत्युक्तावपि तेनावरणे वाचोभङ्ग्या भङ्गसम्पादनस्यानौचित्यात् । न द्वितीयः । इयदज्ञानिनः कामपूरकत्वानुपपत्तेरित्यत आद्यः कल्प एवानल्पः । न चोक्तानौचित्यं चित्त आनेयमिति वाच्यम् । ज्ञाततच्चित्तोऽपि तदेकान्तिकतां लोकेशो लोके व्यञ्जयितुमेवैवंविधां काञ्चन लीलां लालयामासेति नानौचितीति त्रिलोक्यभिप्रायमेवमित्यनेन कटाक्षयन्नारद आह ॥ एवमिति । लोकप्रलोभनैः साधारणलोकवञ्चकैर्वरैः प्रलोभ्यमानोऽप्यसुरोत्तमः प्रल्हादस्तान्वरान्नैच्छत् । तत्र तन्त्रं भगवत्येकान्तित्त्वात् । निरुपधभक्तत्वादिति ॥ ५५ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमस्कन्धे नवमोऽध्यायः ॥ ७-९ ॥

मन्दनन्दिनी — एवं प्रलोभितत्वेऽप्येकान्तत्वान्न वरमवृणोदित्याह ।। एवमिति । तान्वरान् ।।५५।।

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे नवमोऽध्यायः ।। ७—९ ।।

।। अथ दशमोऽध्यायः ।।

नारद उवाच–

भक्तियोगस्य तत् सर्वमन्तरायतयाऽर्भकः ।
मन्यमानो हृषीकेशं स्मयमान उवाच ह ।। १ ।।

सत्यधर्मीया — भक्त्यैव हरितोषो नापरथेतरदसुरमतिभ्रंशायेति निरूपयन्नारदः प्रल्हाद एवं आह्लादेन वरं वरयेति वदन्तं प्रति सम्प्रति किमूच इति धर्ममानसीं शङ्कां पराकरोतीतीरयति ।। नारद इति । अर्भको वयसा । भक्तियोगस्य भक्त्युपायस्य तत्सम्बन्धस्येति वा । तत्सर्वं वरवरणादिकं वरणीयमिति वाऽन्तरायतया । विघ्नोऽन्तरायः प्रत्यूह इत्यमरः । विघ्नत्वेन मन्यमानो जानन् हि यत एवं ततः स्मयमानो नो मां वञ्चय हरे त्वमिति हसन् हृषीकेशं सकलेन्द्रियेशनकर्तारम् । हृषीकाणीन्द्रियाण्याहुरित्यादेः । उवाच । इन्द्रियप्रेरकोऽपि त्वमित्थं वदसीत्यतद्विदिवेति हासः । अर्भक इति कथनेनाजनीनभक्तोऽसुरा अपि साधवः सन्तीति व्यवहारगोचरपरिचरमुख्य इति सूचयति । नृसिंहममुं हृषीकेशं मन्यमान इत्यपि योजयन्ति । उवाच ह इति पाङ्क्तः पाठः । तत्र स्मयः स बहिरन्तः ह शोचन्नित्यर्थः ।। १ ।।

मन्दनन्दिनी — भक्तेरेव पुरुषार्थहेतुत्वमिति तात्पर्यद्योतनाय पुनरत्राप्युच्यते । वरैर्लोभितः प्रह्लादः किमित्यतो नेत्याह नारदः ।। भक्तियोगस्येति ।। यत्काम्यं तत्सर्वं भक्तियोगस्यान्तरायतया मन्यमानोऽर्भकः स्मयमानो हृषीकेशमुवाच हेति योजना । अर्भकस्याप्येतादृशं दार्ढ्यमाश्चर्यमिति हेत्यनेनाह । मनसि विद्यमानं जानन् अपि वचसा प्रलोभयतीति स्मयमानत्वम् ।। १ ।।

प्रह्लाद उवाच–

मा मा प्रलोभयोत्पत्त्याऽसक्तं कामेषु तैर्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ।। २ ।।

मन्दनन्दिनी — अधुना न कामुकावित्येतद्विवृणोति ।। आशासान इति ।। स्वामिविषये स्वस्य वेतनादीन् आशासानो भृत्यो न वै । भृत्यतः स्वाम्यं स्वामिने देयं वस्त्विच्छन् । आशिषो वेतनादीन् राति ददाति यः सः न स्वामीति योजना ।। ६ ।।

अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव ।। ७ ।।

सत्यधर्मीया — दशेदृशीश लौकिकसेवकयोर्न तव मम चैवम्भाव इति वदति ।। अहं त्विति । अहं त्विति ततो विशेषे । त्वद्भक्तोऽकामो विषयाभिलाषरहितः । त्वं च स्वाम्यनपाश्रयः सेवकलोक-प्राप्यफलानाश्रयोऽतदिच्छुरिति यावत् । अन्यथाऽनपाश्रयस्वाम्यव्यतिरेकेणाकामत्वव्यतिरेकेणेत्यन्यथा । आवयोस्त्वं चाहं चेत्यावयोरर्थे राजसेवकयोरिव न नास्ति । तयोर्यथा परस्पराकाङ्क्षा तथा न तव मम चेति भावः ।। ७ ।।

मन्दनन्दिनी — अधुना भृत्यस्य स्वस्य स्थितिं स्वामिनो नृसिंहस्य स्थितिं चाह ।। अहं त्विति ।। पूर्वार्धयोजना तु स्पष्टा । अनपाश्रयो भृत्यदेयद्रव्यानुपजीवी इह लोके राजसेवकयोरिव देशाधिपत्यं प्रापितेन सेवकेन दीयमानं द्रव्यं राज्ञो राज्ञा दीयमानं वेतनादिकं सेवकस्य यथार्थस्तथाऽऽवयोरन्यथा । गुणलुब्धत्वं विनार्थो नास्तीति योजना ।। ७ ।।

यदि रासीश मे कामान् वरान् त्वं वरदर्षभ ।
कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ।। ८ ।।

सत्यधर्मीया — साक्षाच्छ्रीलक्ष्मीनृसिंहे कटाक्षयितरि सर्वथा वरावरणेन धटात्कृतिः कृतिसम्मति-मती नेत्यतः स्वस्य स्वामिनश्च यथाऽभिप्रेतकार्यसिद्धिः स्यात्तथाऽऽलोच्याच्युतं विज्ञापयति ।। यदीति । यदि वरदर्षभ वरदातृधात्रादिश्रेष्ठ । हे कामान् कामेन स्वच्छन्दतोऽनिति चेष्टत इति । तज्जलानितिवत्कामान् । अनतेः क्विप् । नलोपाभावः छान्दसः । वरान् रासि ददासि तर्हि कामानां इच्छानां विषयाणां वा हृदि मनस्यसंरोहमपेक्षणीयत्वेन प्रादुर्भावाभावं भवतस्त्वत्तो वरं वृणे काङ्क्षामि । कामानां निर्धारणे षष्ठी । तेषां मध्ये हृद्येन मनोहरेण त्वद्रूपेण संरोहमूर्ध्वगतिरूपं वरं वृणे । भवतः संसारादित्यप्यन्वयः । रादान इति धातुव्याख्यानात् ।। ८ ।।

मन्दनन्दिनी — वरं वृणीष्वेत्याज्ञाऽनुल्लङ्घनीयेत्याशयेनाह ।। यदीति ।। हे वरदर्षभ । ईश स्वामिन् । यदि मे कामान्वरान् रासि ददासि ।। तर्हि कामानां मोक्षविरुद्धविषयेच्छानां हृद्यसंरोहन्तु । अनुत्पत्तिमेव भवतो वरं वृण इति योजना । अत्रासंरोहमित्येतद्भक्त्यादीनामुपलक्षणम् । अहं भोगप्रदो

वत्स मोक्षदस्तु जनार्दन इत्यादिनेश्वरादीनां मोक्षादिवरदानासामर्थ्येऽपि तव सर्ववरदानसामर्थ्यमिति द्योतयितुं वरदर्षभेत्युक्तम् । अस्येतरेच्छाविषयत्वेऽपि मदिच्छाविषयत्वान्मत्कामत्वमस्तीति मे कामानित्युक्तम् । तथा च म इत्यस्य चतुर्थ्यंतस्य रासीत्यनेन षष्ठचन्तस्य कामानित्यनेनान्वय इति सूचितम् ॥ ८ ॥

इन्द्रियाणि मनः प्राणा आत्मा धर्मो धृतिर्मतिः ।
ह्रीः श्रीस्तेजः स्मृतिः सत्यं येषां नश्यन्ति जन्मना ॥ ९ ॥

सत्यधर्मीया — निकामं कामाननाकाङ्क्षन् कमपकारं ततः पश्यसि शिशवित्यतः शंसति ॥ इन्द्रियाणीति । येषां कामानां जन्मनेन्द्रियाणि । तत्त्वेऽपि मनस उत्तम्भने सर्वाणि वशवर्तीनीति मुख्यतया पृथगुक्तिः । प्राणाः पञ्च आत्मा देहो धर्मः सदाचारो धृतिः धैर्यं मतिर्धीः । ह्रीरकार्यकृतौ । श्रीः सम्पत् तेजः प्रभावो ब्रह्मवर्चसं वर्चःसामान्यं वा । स्मृतिः स्मरणं सत्यं भूतहितं वचनमित्येतानि नश्यन्ति नष्टा भवन्त्यतस्तेषां हृद्यसंरोहं वरं वृण इत्यन्वयः ॥ ९ ॥

मन्दनन्दिनी — कामानामनिष्टत्वं कथम् । येन तदसंरोहस्य वरत्वमित्यत आह ॥ इन्द्रियाणीति ॥ एषां दुर्विषयकामानां जन्मनेन्द्रियादीनि नश्यन्ति तेषां कामानामसंरोहो वरमित्यत आह ॥ इन्द्रियाणीति ॥ पूर्वेण योजना । सर्वेन्द्रियाणां जरयन्ति तेज इति श्रुतेः । आत्मा देहः । धर्मः पूर्वार्जितपुण्यम् । धृतिः सर्वथा दुर्विषयांस्त्यजेयमिति धैर्यम् । मतिः शास्त्रजनितज्ञानम् । ह्रीरन्ये न पश्येयुरिति लज्जा । श्रीर्देहकान्तिः । तेजो ब्रह्मवर्चसम् । स्मृतिः शास्त्रानुभवजन्यस्मृतिः । कामात्क्रोधोऽभिजायत इत्यादेः । दुर्विषयलोलुपस्येन्द्रियादीनि नष्टानि दुष्टानि भवन्तीति भावः ॥ ९ ॥

विमुञ्चति यदा कामान् मानवो मनसि श्रितान् ।
तर्ह्येव पुण्डरीकाक्ष न भवायावकल्पते
नारदेनोपदिष्टं मे तव मन्त्रमिमं स्मरे ॥ १० ॥

सत्यधर्मीया — तेन प्रार्थितेन कामासंरोहणेन किमित्यतः सङ्कुच्य सूचितं विविच्यते (विविच्योचे इति खपाठः) ॥ विमुञ्चतीति । यो मानवोऽधिकारी यदा मनसि सङ्कल्पविकल्पात्मके चित्ते श्रितांस्तदाधेयान्कामान्विमुञ्चति । तर्हि हे पुण्डरीकाक्ष स पुनर्भवाय संसाराय न कल्पते । नेदमेव महाफलमित्यतस्तदप्यनेनैव वदति । न पुनर्भवोऽभवोऽपवर्गस्तस्मैचावकल्पत इति । पुण्डरीकाणि कमलानीवाक्षिणी यस्येति । पुण्डरीके तन्नामके भक्तविशेषेऽक्षिः कृपादृष्टिर्यस्येति वा । पक्षद्वयेऽपि बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच् । दैत्यारिः पुण्डरीकाक्ष इत्यमरः । अनेन कोपापगमेन

विकस्वरता तथौपाधिकारुण्यगमनेन कारुण्यशुभ्रता च पुण्डरीकं सिताम्भोजमित्युक्तेर्ध्वनिते भवतः । द्वितीये भक्तदयावत्त्वं च ध्वन्यते तथा सम्बोधनेनेति मन्तव्यम् । इह जन्मनि भूमौ वा । न भवावेहेति पाठः । मदिच्छाभावेऽप्येतन्मात्रेण गात्रमेतत्त्यक्त्वेति मुक्तिं किमर इत्यतो न तथा स्वामिन्निति हरेरन्तरङ्गतः सम्बोधितोऽसि मयेत्यप्याह ॥ नभवायेहेति । भवस्य पुनः पुनः संसृतेरायो मदादेर्लाभस्तस्य तद्विषयिणीहा चेष्टेच्छा वा न विद्यते यस्य स तथा तत्सम्बुद्धिः । नभवायेहकल्पेत्येकं पदं वा । नभवायेहो मुख्यप्राणः स कल्पो यस्मादिति वा तस्मादपि कल्प इति वा तत्सम्बुद्धिः । विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञयेत्यादेः । हरे दयालो नः पाहीत्यादिवत्पुण्डरीकाक्षेति प्राक्तनस्यानविद्यमानत्वात्पदत्वम् । ततस्तत्परत्वात्त इत्यादेशः सम्भवतीति ज्ञेयम् । पूर्वत्र सूत्रोदाहृतिसहितमत्रैव स्कन्धे विवृतमनुसन्धेयम् । ते तव सकाशात्त्वत्प्रसादादिति यावत् । यदा कामान्विमुञ्चति तर्हि ते मनसि श्रितान्कामांस्तदनुकूलान्मानवो वायुर्ददातीति शेषः । तत्पुरुषो मानव इति श्रुतेः । कामेन मे काम आगादित्यादेः । कामानुकूलकामत्वेनैव तदपहतकामत्वमिति ज्ञेयम् । इयती प्रमा सीमातोकस्य तव कथमित्यत एतन्माहात्म्यत इत्याह ॥ नारदेनेति । इममुदाहरिष्यमाणमुपदिष्टं तव मन्त्रम् । तवेत्यस्य नारदेनेत्यनेनाप्यन्वयः । त्वत्सम्बन्धिना नारदेनोपदिष्टं चित्रकेतुना परोक्षितमनन्तं प्रति तावकेन मुनिनेत्यादिना नारदस्य तथोक्तेरिति ज्ञेयम् । मन्त्रं स्मरे स्मरामि । दैवमपि तन्मन्त्र-प्राप्यफललाभानुकूलमेवेति वाऽऽह ॥ उपदिष्टमिति । उप उद्योगवद्दिष्टं दैवं यस्य स तं समीपवर्ति सहकारिति यावत् । शिष्टं पूर्ववत् । उपरमणार्थोद्यमार्थयोरासन्नेऽप्युपकीर्तितमिति विश्वः ॥ १० ॥

मन्दनन्दिनी — कामानामसंरोहस्य फलमाह ॥ विमुञ्चतीति ॥ योजना तु स्पष्टा । तर्ह्येव तदैव । नभवायापुनर्भवाय । मोक्षायेति यावत् । अवकल्पते समर्थो भवति । यदा सर्वे प्रमुच्यन्त इत्यादि श्रुतेश्च ॥ १० ॥

ओं नमो भगवते तुभ्यं पुरुषाय महात्मने ।
हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ ११ ॥

सत्यधर्मीया — तमेव मन्त्रं स्फुटमाह ॥ ओमिति । महात्मने उत्सवरूपाय ब्रह्मणे गुणपूर्णाय । परमात्मनेऽधिकार्यधिकानां परमानामात्मा स्वामी तस्मै । भगवते ऐश्वर्यादिवैराग्यान्तगुणयुक्ताय । हरये भगवदात्मकाय । पुरुषाय सिंहायेति सामानाधिकरण्यम् । नृसिंहाय । हे अद्भुत आश्चर्यचर्य ते नम इत्यन्वयः । अदिभूभ्यां डुतजिति डुतचि भवत्यद्भुतमिति । नवीनास्तु स्वाकरज्ञानदरिद्रा अदिभुवो डुतजिति धातुद्वयोपरि क्वापि न चौमर्ह एकः प्रत्यय इति पठन्तोऽदित्याश्चर्यार्थकमव्ययम् । तस्मिन्नुपपदे भूधातोर्डुतजिति तदर्थं च वर्णयाम्बभूवुः । तत्र किं नामास्माभिरेव धातुद्वयोपरि नैकः प्रत्ययः स्वीकार्य

इति उत सौवैरपि । नाद्यः । विना युक्तिकथनं श्रोतुरजागलस्तनायितत्वे सम्भवेत् । तथात्वे च प्रतिभटीकरणारभटी नाटीकनीया स्यात् । न द्वितीयः । उपलब्धिपराहतेः । तथा हि । प्रथमाष्टकपञ्च-माध्यायपञ्चदशवर्गीयतृतीयदधन्नृतन्धनयन्नस्य धीतिमादिदर्योदिधिष्वो ३ विभृत्रावित्यृग्व्याख्यावेदभाष्ये दिधिष्वो डुधाञ् धारणपोषणयोः षोन्तकर्मणीत्याभ्यां मन्दू दृम्भू जम्बू कपेलुदिधिषूरिति कूटप्रत्ययान्तो निपातित इत्युक्तेः अद्भुतं न तत् । अन्यत्रात्र चाद्भुतेन युक्तमिति मन्दम् । (तत्र तथात्वेन युक्तमिति-मन्दम् । इति मूलकोशपाठः) अदित्याश्चर्यार्थकाव्ययत्वे डुतजन्तभूधातोर्नैरर्थ्योपेक्षणीयतेति चार्थस्या-सम्भवात् । (एकदेशस्यार्थकथनमकथनमेकदेशस्येति हृद्यंभवेत्सयूथ्यानां इत्ययं मूलकोशे अधिकः) न च यौष्माकीणेऽपि पक्षे धातुद्वयार्थाप्रतिभानं चित्रार्थकत्व इति वाच्यम् । अवयवव्युत्पत्ति-प्रदर्शनमात्रनिभृतनिर्भरा वैय्याकरणा इति काऽनुपपत्तिः । मर्यादा चैषा दृष्टचरी घटादिपदेष्विति दिक् ॥ ॥ ११ ॥

मन्दनन्दिनी — कस्य मन्त्रस्य जपसिद्ध्या मद्दर्शनमभूदित्याह ॥ नारदेनेति ॥ ॐ नमः इत्यारभ्य मन्त्रस्त्रयस्त्रिंशदक्षरात्मकोऽनुष्टुप् छन्दस्कः । वराहमन्त्रवत् ॥ ११ ॥

श्रीनृसिंह उवाच–

नैकान्तिनो मे मयि जात्विहाशिष आशासतेऽमुत्र तथा भवादृशाः ।
तथाऽपि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥ १२ ॥

सत्यधर्मीया — अहं त्वकाम इति सत्यमुक्तमत्यर्थमर्थितश्चाहं कामानां हृद्यसंरोहमिति च । तथाऽपि मदाज्ञानवज्ञानार्हा तयाऽनुभवतो भवतो विषयान्न भवतो भीर्भविष्यति स्वतोऽकामत्वा-प्रतिहतेर्भोक्तव्यस्य चावर्जनीयत्वादित्थं वर्तस्वेति शिक्षयति ॥ नेति । इहामुत्र च यथा मय्येकान्तिनो मय्येव निरता मे सकाशाज्जातु कदाचिदप्याशिषो नाशासते तथा भवादृशा इति योजयन्ति । तत्पक्षे एतदादीनामनैकान्तिकतायां सत्यामपि नाशासत इति प्रतीयते । तच्च एकान्तित्वाद्भगवतीति पूर्वग्रन्थः तथाऽपीत्याद्युत्तरग्रन्थाननुगुणमिति विभावनीयम् । वस्तुतस्त्वित्थं योजना । तथा निश्चयस्तथोत्तरं त्वत्पृष्टस्येदमिति वा । तथा स्यान्निश्चये पृष्टप्रतिवाक्ये समुच्चय इति विश्वः । यथेह तथाऽमुत्र परत्र च नाशासत इति वाऽन्वयः । तथाऽप्येकान्तित्वेऽपि दैत्येश्वराणां भोगान्भोग्याननुभुङ्क्ष्व । अवधिमधिकरणं चाभिधत्ते ॥ अत्रैतन्मन्वन्तरमिति । ॥ १२ ॥

मन्दनन्दिनी — एवमुक्तवन्तं प्रह्लादमेकान्तित्वेन प्रकाश्य कामासंरोहादिकं मनसि सिद्धवत्कृत्य तद्योग्यमासुराधिपत्यमपि कुर्वित्याज्ञापयति नृसिंहः ॥ नैकान्तिन इति ॥ यद्यपि भवादृशा मयि एकान्तिनो मे सकाशादिह तथाऽमुत्राशिषो जातु नाशासते । तथाऽपि एतन्मन्वन्तरं दैत्येश्वराणां भोगान् अनुभुंक्ष्वेति योजना । यद्यप्ययं कामो न त्वया वृतः । तथाऽप्यहमेवानुगृह्णामीति भावः ॥ १२ ॥

कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम् ।
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १३ ॥

सत्यधर्मीया — इतरबन्धकोऽपि संसारस्तवैवं चेदबन्धकोऽत इदमवश्यं कुर्विति विशदयति ॥ कथा इति । मदीयाः कथा इति वचनबहुवचनाभ्यामितरेऽवतारा अपि मदभिन्नास्तत्कथा अपि मत्कथा एवेति ध्वनयतीति ज्ञेयम् । प्रियास्तव मम च जुषमाणः सेवमानः सर्वेषु भूतेषु सन्तमेकं तत्तन्निष्ठरूप-स्वरूपमेकम् । आत्मनि स्वस्मिन्नावेश्य ध्यानादिना सन्निहितं कृत्वाऽधियज्ञं यज्ञस्वामिनं यज्ञ इति वा ईशं स्वामिनं योगेन चरुपुरोडाशादिसम्पादिततदुपायेन योगेन भक्त्या च कर्मप्रतिबन्धकं हिन्वन् । हिगतौ वृद्धौ चेति स्मृतेः । अन्तर्णीतण्यन्तोऽयम् । गमयन्नाशयन्निति यावत् । यजस्व यज । हिधातोः श्नुप्रत्यये हिनु इति जाते शतरि यणादेशे नुम्युगित्वात्पित्त्वाद्गुणनिषेधे च हिन्वन्निति रूपम् । भूतेषु प्राणिषु सर्वेषु तदितरपदार्थेषु चरुपुरोडाशादिष्विति व्यधिकरणसप्तम्यौ वा । अयमेवार्थो व्यासस्य सव्यस्य निर्दिशतोऽभिप्रेत इति ज्ञायते । अन्यथा सर्वभूतेष्वित्यवक्ष्यत् । सर्वेष्वित्येवोक्ते सर्वप्रति-पत्तिर्भवति । तथाऽपि सङ्कोचयेयुरसङ्कुचितचेतसोऽतो भूतेष्विति तन्मात्रोक्तौ तन्मात्रव्यापृतिरिति मतिः स्यादिति सर्वेष्वित्युक्तिरिति परस्परोपकार्योपकारकता ज्ञेया । सर्वेत्युक्तौ न तथा भायादिति चेन्न। विनेय स्मरतु भवानत्तृत्त्वाधिकरणसुधायाः । चराचरगोचरे नार्थ आशयं क्लेशाय । यज स्वयोगेनेति छेदो वा । अनौपाधिकतां स्वशब्दो ब्रवीति योगस्येति मन्तव्यम् ॥ १३ ॥

मन्दनन्दिनी — दैत्येश्वराधिपत्यकालेऽपि मुक्तावानन्दातिशयभूतमनुष्ठेयं साधनं शिक्षते ॥ कथा इति ॥ मदीयाः कथा जुषमाणः शृण्वन् प्रियस्तत्रादरवान् सर्वभूतेषु सन्तमेकं माम् । आत्मनि मनस्या-वेश्याधियज्ञं सर्वयज्ञभोक्तारमीशं योगेन ध्यानेन कर्म हिन्वन् उपमर्दयंस्त्वं यजस्व । योगेन पूजयेति योजना । अनेन श्रवणध्यानाकाम्यकर्मादिलक्षणमानन्दातिशयसाधनं शिक्षितमिति ज्ञातव्यम् ॥ १३ ॥

भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।
कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबन्धः ॥ १४ ॥

सत्यधर्मीया — दानवेदानीं न तव मुक्तिः किन्तु विलम्बावलम्बिनीतीयता कर्मणा भाव्यमिति तदाह ॥ भोगेनेति । पुण्यं प्रारब्धमनिष्टम् । पुत्राद्यागमनापात्रम् । भोगेन हित्वा क्षपयित्वा । एवं नपुण्यं पापं तद्रूपं भोगे सत्येव हित्वेत्यस्यावृत्त्या पापसम्पत्तिर्ज्ञेया । कुशलेन प्रायश्चित्ताद्यात्मना कर्मणा पापमप्रारब्धं कुशले पुत्रादिक्षेमविषये नपापं सुहृदः साधुकृत्यामित्याद्याशंसितम् । अनारब्धं पुण्यं हित्वा तान्प्रति गमयित्वा तत्फलभागिनस्तान्कृत्वेति यावत् । कुशलः शिक्षिते क्षेमपर्याप्तसुकृतेष्वपीति विश्वः । भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति

भगवद्वचनभाष्यटीकादितोऽत्र विशेषोऽवसेयः। नैकमात्राधिकारिकं शास्त्रमिति न तु तस्या प्राचीनं शास्त्रमस्ति। न चासाववविद्वानिति वाच्यमिति विशेषविषयपर्यवसानं कैश्चित्कर्तनोपपत्तिमदिति ज्ञेयम्। (मूलकोशे इदं वाक्यद्वयं नास्ति। वाक्यार्थश्च निगूढो भाति) कालजवेन क्लृप्तकालेन कलेवरं शरीरं हित्वा मामेष्यसि। मुक्तबन्धः पूर्वं सुरलोकगीतां तत्र तल्लोकैर्गानयोग्यां विशुद्धां कीर्तिं वितायं विस्तार्य मुक्तैर्बन्धः स्नेहो यस्य सः। अनुबन्धस्तु भक्तिः स्यात्स्नेहो बन्ध इतीरित इति तात्पर्यान्तरात्। भविष्यतीति शेषः। संसारबन्धमुक्त इति वा। प्रल्हादमादीकृत्य सर्वसदुपदेशोऽयमित्यनेकेषामाधिकार्यानन्त्येन समयापर्यवसितिर्दोष इति सन्तोष्टव्यम्। अधिपत्ये भोगादिप्राप्तिरावश्यकीति न चिन्तयितव्यम्। भोगादेरपि प्रारब्धपुण्यक्षयादिसम्पादकतया मत्प्राप्त्युपयोगित्वादित्याह॥ भोगेनेति॥ पुण्यं प्रारब्धं काम्यपुण्यं कुशलेन प्रायश्चित्तादिना। पापं कालजवेन प्रारब्धप्राप्तं कलेवरं हित्वा विनाश्य सुरलोकगीतां विशुद्धां कीर्तिं वितायं विस्तृत्य मुक्तबन्धो मामेष्यति। भवानिति योजना। प्रारब्धपापं प्रति प्रायश्चित्तस्योपमर्दकत्वं ज्ञातव्यम्। अनेनाधिपत्यदानं भोगेन काम्यपुण्यक्षयसम्पादकतया पापोपमर्दककुशलानुष्ठानोपयोगितया प्रारब्धासुरदेहादिनाशकतया कीर्त्यादिसम्पादकतया महाननुग्रह एव प्रह्लादे कृतः॥ १४॥

य एतत् कीर्तयेन्मह्यं त्वया गीतमिदं नरः।
त्वां च मां च स्मरन् काले कर्मबन्धाद् विमुच्यते॥ १५॥

सत्यधर्मीया — यो योगस्त्वां प्रति मयोपदिष्टस्तत्र ये न शक्तास्तेषामयमुपायो नायाससाध्य इति तमुपदिशन्प्रकृतमुपसंहरति हरिः॥ य इति। मह्यं मामुद्दिश्य त्वया गीतं पद्यजातं इदं कामितदमतो नेतरातिरेकः। यो नरः कीर्तयेत्काले योग्ये पर्वादौ त्वां च मां च स्मरंश्च यः स कर्मबन्धात् संसाराद्विमुच्यते॥ १५॥

मन्दनन्दिनी — स्वस्तोत्रकीर्तनस्यापि फलमाह भगवान्॥ य इति। मह्यं मदुद्देशेन। काले प्रातरादिकाले॥ १५॥

प्रह्लाद उवाच–

वरं वरय एतत् ते वरदेशान्महेश्वर।
यदनिन्दत् पिता मे त्वामविद्वांस्तेज ऐश्वरम्॥ १६॥

बद्धामर्षाशयः साक्षात् सर्वलोकगुरुं प्रभुम्।
भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान्॥ १७॥

तस्मात् पिता मे पूयेत दुरन्ताद् दुस्तरादघात् ।
पूतस्तेऽपाङ्गसन्दृष्टस्तदा कृपणवत्सल ॥ १८ ॥

सत्यधर्मीया — कामानां हृद्यसंरोहरूपवरवरणानन्तरमनन्तो दैत्येश्वराणामनुभुङ्क्ष्व भोगानिति गदन्कथा मदीया जुषमाण इत्यादिना मुक्तबन्ध इत्यन्तेन कृतसंसृतिवसतेरपि न बन्ध इति जगाद जगदीश्वर इत्येव न किञ्चाभिमतमित्यूच इति सैश्वरी नाज्ञा ज्ञानिनाऽवसेयेति स्वाभिमतं ययाचेह पितृतृप्तितां तत्पवित्रतां ययाच इत्याह (वाक्याभिप्रायः अस्पष्टः । मूलकोशे तु ''अभिमतं चान्यत् ययाच इत्याह'' इति अवतारिकामात्रं वर्तते) ॥ प्रल्हाद इति । हे महेश्वर एतत्त इत्येकं पदम् । एष चासौ त्वं चेतत्त्वं तस्य । एतत्ते त्वत्सम्बन्धिनं त्वदधीनमिति यावत् । वरदेशात्त्वत्त एव वरं वरये । वरो देश आदेशो वरं वृणीष्वेत्याज्ञा । उपसर्गाणां च धातुलीनार्थद्योतकतामात्रस्य वैय्याकरणोररीकारा-त्सम्भवति । देश आदेश इति । सुधायां गम्यत इत्यादिस्थलेऽव गम्यत इत्याद्यर्थस्वीकारान्नापूर्वता । वरे त्वद्विषये य आदेशस्तस्मादिति वा । वरो देश उत्तमा(मोप)देशः । अत्र दैशिकः । ल्यब्लोपनिमित्ता चैषा पञ्चमी । तं मुक्तबन्ध इत्याद्युपदेशं प्राप्य वरं वरय इति वा । यत् यत ऐश्वरं तेजोऽविद्वानजानानो बद्धामर्षाशयो बद्धोऽमर्षो यस्मिन्स आशयोऽन्तःकरणं यस्य सः । न केवलमज्ञः किन्तु मृषादृष्टिर्मिथ्याज्ञानी । भ्रातृहेति हिरण्याक्षहन्तेति मे पिता त्वामनिन्दन्निनिन्द । त्वद्भक्ते मयि चानघे अघवानिति मृषा दृष्टिरिति वा । तस्मान्मे पिता दुरन्तात् । दुः दुःखं अन्ते भोग्यं यस्मात् । दुरशोभनदुःखयोः, दुर्दुःखमिति संप्रोक्तं खं सुखं चोच्यते बुधैरिति वचनात् दुष्प्रापपारात् त्वत्करुणामन्तरेण अघाद्दुरितात्पूयेत्पूतो भवेदिति वरं वरय इत्यन्वयः ॥ भ्रातृहेति । भ्रातरं चेतनं हन्तीति भ्रातृहेति मृषा मिथ्या दृष्टिर्यस्य सः । देहस्य सर्वथा नाशादनाशाच्चेतनस्य चेत्यादेर्भवतीयं मिथ्यादृष्टिर्मृषादृष्टिर्मोघज्ञान इति वा । यथोक्तं प्रथमतात्पर्ये । न चातृप्तः प्रवर्तते । किन्तु मृषा वृथैव । भित्वा मृषाश्रुरितिवदिति ।

ननु ब्रह्मभ्रूणवृत्रेषु क्विबिति सूत्रवृत्तौ किमर्थमिदमुच्यते । यावता सर्वधातुभ्यः क्विब्विहित एव । ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम् । चतुर्विधश्चात्र नियम इष्यते । ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपद इत्यादेरुक्तत्वेन भ्रातृशब्दोपपदाद्धन्तेः क्विपः प्रापकाभावात्कथमुक्तरूपं रूपमिति चेन्न । पदमञ्जर्यां चतुर्विधश्चात्रेति धातूपपदकालप्रत्ययविषयः । भाष्ये धातूपपदविषयं नियमद्वयं प्रदर्शितम् । तदुपलक्षणं न तु नियमान्तरव्यावृत्त्यर्थमिति गम्यते । ब्रह्मादिष्वेव हन्तेरिति धातुनियमः । अत्रापि नियमे भूत इत्याश्रयणात्कालान्तरे उपपदान्तरे भवत्येव । पुरुषं हन्ति हनिष्यति पुरुषहेति भ्रातृशब्दोपपदाद्भूतार्थे हन्तेः क्विप्प्रत्ययासम्भवेऽपि वर्तमानभविष्यदर्थयोः क्विपः सम्भवात् । शोकातिशयसंवृताशयतयाऽतीत-स्यापि कालस्य वर्तमानतारोपविषयत्वात्क्विप उपपत्तिः । यद्वा बहुलं छन्दसीति वा हन्तेः क्विप् ।

भ्रातृहेतिमृषादृष्टिरिति पदमखण्डम् । भ्रातरि हेतिरायुधं यस्य स इति मृषादृष्टिः । अकार्यकारिणी दृष्टिर्यस्येति । हेतिः स्यादायुध इति विश्वः । विनाऽऽयुधं तृतीयस्कन्धे करेण कर्णमूलेऽहन् । तत्तात्पर्ये च । ब्रह्मजस्तु हिरण्याक्षः प्रथमं दंष्ट्रया हतः । स एव पार्षदाविष्टो द्वितीयं कर्णताडनात् । पूर्वं लयोदधौ मग्नां द्वितीयं तेन माज्ञिताम् । भुवमुद्धरतैवासौ हरिणा क्रोडमूर्तिना इत्याद्युक्तेः । न च द्वितीयस्कंधे एव सुनाभसन्दीपिततीव्रमन्युरित्युक्तिस्तर्हि कथमिति वाच्यम् । स्वरूपमात्रनिरूपकत्वस्योदाहृत-वचनानुरोधेन कल्प्यत्वोपपत्तेः । काऽत्र कथन्ता । तत्रापि स्पष्टं तथा प्रतिपादनाच्च । तलताडनेन कर्णमूले तथा दंष्ट्रयेति श्रवणाद्धेतिहननमिति मृषा दृष्टिर्भविष्यतीति वाऽर्थः । अमरादिनिरीक्षणे स पूत एव तथाऽपि पामरसमाध्यर्थमियं यांञ्चा मम लालनीयेत्याह ॥ पूत इति । यदा तेऽपाङ्गेन नयनप्रान्तेन संदृष्टोऽभूत्तदैव पूतः । हे कृपणवत्सल दीनप्रीत तस्मादपि पामरदृष्टिं तां प्राप्यापि पूयेतेत्यन्वयः । एवमनन्वयेऽनन्वय एवैतदर्थस्येति ज्ञेयम् ॥ १६, १७, १८ ॥

मन्दनन्दिनी — पुत्रेण पितुरुद्धारस्य कर्तव्यत्वात् भगवतो भक्तवत्सलत्वात् पितुर्दैत्यावेशप्रयुक्त-निन्दनादिकारित्वेऽपि वस्तुतो भक्तत्वादुद्धारत्वं वरयते ॥ वरमिति ॥ हे देवेश हे महेश्वर । ते सकाशादेतद्वक्ष्यमाणं वरं वरये प्रार्थये । एतत्किमित्यत उक्तम् । ईश्वरं तेजः सर्वैश्वर्यमविद्वान् भ्रातृहेति हिरण्याक्षमनपराधिनं हन्तेति मृषादृष्टिर्मिथ्याज्ञानवान् तेनैव बद्धामर्षाशयस्त्वद्भक्ते मयि च विषयेऽघवान् अपराधवान्मे पिता सर्वलोकगुरुं प्रभुं त्वां यदनिन्दत्तस्माद्दुरन्ताद्दुस्तरादघान्मे पिता पूयेतेति । पूतत्वमपि सिद्धमेवेत्याह ॥ पूत इति ॥ यदेति शेषः ॥ १६,१७,१८ ॥

श्रीभगवानुवाच—

> **त्रिः सप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।**
> **यत् साधोऽस्य कुले जातो भवान् वै कुलपावनः ॥ १९ ॥**

तात्पर्यम् — जन्मान्तरे पितृभिस्त्रिसप्तभिः ॥ १९ ॥

सत्यधर्मीया — त्रिःसप्तभिः पिता पूत इति श्लोके लोकेशोक्तमसम्भावितमिव भाति । साक्षात्कुक्षिजत्वविवक्षा (पितृशब्दस्य साक्षाज्जनकवाचिता इति मूलकोशपाठः) चेदेक एवैकस्मिञ्ज-न्मन्येतस्य पिता हिरण्यक इत्यनुपपत्तेः । पितामहाद्याश्च पितरो नाम कीर्तिता इत्यैतरेयभाष्यकीर्तनात्तेषां समेषां ग्रहणेऽपि स्वपर्यन्तं कश्यपमरीचिचतुराननपंचास्येति च हिरण्यकश्चेति पञ्चकस्यैव ("कश्यपमरीचिचतुराननेति त्रिकस्यैव" इति मूलकोशपाठः) लाभात्कथंचिदपि त्रिःसप्तसङ्ख्या वक्तुं शक्या नेत्यतः किञ्चिदध्याहृत्य तद्वाक्यं विवृणोति ॥ जन्मान्तर इति । जन्मान्तरे पितृभिर्हिरण्यककश्यपमरीचिसंज्ञकैः पितृपितामहप्रपितामहैः । अनेन पितृशब्दः साक्षाज्जनकवाची तथा

चैकविंशेत्युक्तिर्जन्मान्तराभिप्रायेणैव न त्वेतज्जन्माभिप्रायेणेत्युक्तं भवतीति केषाञ्चिन्निर्बन्धोऽकारणकः । आचार्यैरैतरेयभाष्ये पितृशब्दस्य पितामहादिपरतया सप्रमाणं व्याकरणादत्र कण्ठतोऽनुक्त्युत्कण्ठाकुण्ठनसम्भवात् । किञ्चैकग्रहणे कालविलम्बप्रसक्तिवत्पितामहप्रपितामहयोः पावनानुक्तिप्रसक्तेश्च महामाहात्म्यस्यावश्यवक्तव्यस्यासिद्धेः । त्रिःसप्तभिरेकविंशतिसङ्ख्याकैर्जन्मान्तरे तेषु । क्वचिज्जन्मान्तरपितृभिरिति दृश्यते पाठः । समस्तः । स चातिसुन्दरः । एकवचनबहुवचनार्थतासम्पादनायासानासादकत्वात् । श्रौत इव स्मार्तश्चायमर्थः । तथा हि । स्वादुषं सदः पितरो वयोधाः । येऽबान्धवा ये बान्धवा अन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु मया दत्तेन वारिणा । जन्मान्तरे ये मम सङ्गताश्च तेभ्यः स्वधापिण्डमहं ददामीति । पितृपक्षे सप्त मातृपक्षे सप्त भार्यापक्षे सप्तेत्येकविंशतिरिति केचित् (केचिदिति रवकोषे नास्ति ।) (वस्तुतस्तु जयविजययोर्मानुषा एव देवादयो भवन्तीत्युक्तेर्यदा यदा यत्र यत्र जननं तत्तत्पितृभिः सप्तकं ग्राह्यम् । एकविंशत्यनन्तरं सापिंड्याभिः भावात् । इति वाक्यद्वयम् अधिकं च मूलकोशे ।) ॥ ततश्चायं मूलार्थः ॥ पितृभिः पितामहादिभिस्त्रिभिः सप्तभिरेकविंशतिसङ्ख्यैः सह ते पिता हिरण्यकः पूतः । यद्यपि तदुक्तमपाङ्गसंदष्ट इति मुख्यं तत्पूतताहेतुस्तथाऽपि पोतख्यात्या स्वमहत्त्वमेवं कृपापारावारो हरिरिति विततं भवतीति पुत्रत्वमनौपचारिकं त्वयीति प्रल्हादमाल्हादेन वदति ॥ अनघेति । यद्यस्मादस्य कुले हिरण्यकशिपोः । कुले वंशे । तच्च कुलं न स्वतः सुशीलमित्यप्यालपति ॥ अस्यकुल इति । अस्यं निरस्यं तच्च तत्कुलं च तस्मिन् । निन्दितगोत्र इति वा । कुले देह इति वा । कुलं सजातीयगणे गोत्रे देहेऽपि कलितं कुलमिति विश्वः । कुलपावनः कुलं पावयतीति स तथा । नन्द्यादिल्युः । अनघ साधो सुकृताभिवर्धक । साधुर्वार्धुषिक इति विश्वः । जातस्ततस्त्रिःसप्तभिः पितृभिः पिता पूत इत्यन्वयः ॥ १९ ॥

मन्दनन्दिनी — न केवलमयं पिता । किन्तु जन्मान्तरपितरोऽपि पूता इत्याशयेनाह ॥ त्रिभिरिति । सुजन्तम् । गुणितैरिति शेषः । तथा चैकविंशतीत्यर्थः । त्रिसप्तभिरिति समासे तु स्पष्टम् । एवं च पूर्वजन्मत्रयम् । एकैकस्मिन्सप्त । त्रयः प्राञ्चस्त्रयः प्रत्यंच आत्मा सप्तम एतावन्त एवैनममुष्मिंल्लोके उपजीवन्तीति श्रुतेः । एतदेवाभिप्रेत्य तात्पर्यम् ॥ जन्मान्तरपितृभिः सप्तभिरिति ॥ प्रह्लादादेः पूर्वजन्म प्रतिमन्वन्तरे चैव प्रह्लादाद्या बभूविर इति मानसिद्धम् । अस्य हिरण्यकशिपोः ॥ १९ ॥

यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्तेऽपि कीकटान् ॥ २० ॥

सत्यधर्मीया — त्वया तु पोतेन तातः पूत इति नाद्भुतम् । परेभ्योऽप्यपरेषां पावित्र्यं सम्भवति साधुस्वभाव एतादृश इति प्रशंसति ।। यत्र यत्रेति । समदर्शिनो योग्यतामनुसृत्य । समुदाचारा उदाराचरणा ये यत्र यत्र वर्तन्ते ते कीकटानपि पूयन्ते पावयन्ति । कीकटाश्च देशविशेषाः । तेषां पावनं च तत्स्थद्वारा ज्ञेयम् । कीकटस्तु गिरे निःस्वदेशभेदेमितंपच इति विश्वः । कीटकानिति पाठे कीटकः कृमिजातौ स्यान्निष्ठुर इति विश्वादस्पृश्यान् कृमिविशेषानिति वाऽर्थः । कीकटा इति प्रथमान्तः पाठः क्वचित् । उक्तगुणास्तेऽपि पूयन्त इतरानित्यर्थः ।। २० ।।

मन्दनन्दिनी — कुलपावनस्य साधोः पुत्रजननमेव वंशोद्धारकमित्यन्यत्राप्युपदिशति ।। यत्रेति ।। यत्र कुले कीटा अपि क्षुद्रा अपि । कीटका इति पाठे तत्तद्देशस्य पापसाधनत्वात् । लक्षणया पापिष्ठा अपीत्यर्थः । एतादृशा अपि ते तत्कुलीनाः पितरः पूयन्त इति योजना ।। २० ।।

सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन ।
उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ।। २१ ।।

सत्यधर्मीया — माधव साधवस्ते कुत इति महानुभाव भवान्वदत्वित्यत इति ब्रवीति ।। सर्वात्मनेति । भूतग्रामेषु प्राणिवृन्देषु । किञ्चन किमपि । ग्रामः स्वरे संवसथे वृन्द इति विश्वः । सर्वात्मना मनोवाक्कायवृत्तिभिरिति सर्वात्मना न हिंसन्ति न नाशयन्ति । कुत इत्यत आह उच्चावचेष्विति । उच्चावचेष्वनेकेषु । उच्चावचं नैकभेदमित्यमरः । । मद्भावेन । सर्वत्र मत्सत्तया । ईश्वरो जीवे कलया प्रविष्टः । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादेः । गतस्पृहा गतविषयेच्छाः । तस्या एव हिंसादिसाधनत्वात् । न हिंस्यात्सर्वा भूतानीति श्रुतेः । किञ्चन कृकलासादिकं वा । यथोक्तं बृहदारण्यकोपनिषद्भाष्यटिप्पणेषु । तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादिति । कृकलासस्यैतस्या एव देवता वा अपचित्यै । वायुः प्रजापतिः सोऽसौ चन्द्रसंस्थो विशेषतः । रात्रौ रात्रौ क्षयादस्य पूरणाद्रात्रिनामकाः । कलाः पञ्चदश प्रोक्ताः ध्रुवैवास्य तु षोडशी । अंकलोऽपि स चन्द्रस्य कलाभिः प्रोच्यते तथा । सोऽमावास्यां यतो रात्रौ प्राणभृत्सु व्यवस्थितः । कल्यावेशादल्पदोषः कृकलासवधोऽपि सन् । तस्यां रात्रौ महादोषा देवतावशतो भवेत् । तस्मादमावास्यायां रात्रौ चन्द्रस्थवायोः प्राणभृत्सु स्थितत्वादेतां रात्रिमेतस्यां रात्रौ प्राणभृतो जीवतः प्राणं न विच्छिन्द्यात् । महापापहेतुप्राणिवधो न कर्तव्य इति किमु वक्तव्यम् । कृकलासस्याल्पदोषहेतुवधस्यापि प्राणं न छिन्द्यात्तस्यां रात्रौ कृकलासवधोऽपि महादोषहेतुरित्यर्थ इति । मद्भावे ऐक्ये न गता न प्रविष्टा स्पृहा येषां ते तथा । अनैक्यचिन्तका इति वा ।। २१ ।।

मन्दनन्दिनी — भक्तान्विशिनष्टि ॥ सर्वात्मनेति ॥ उच्चावचेषु तारतम्येन विद्यमानेषु भूतग्रामेषु प्राणिसमूहेषु न हिंसन्ति न क्रुध्यन्ति । मद्भावेन भक्त्या गतस्पृहा विषयापेक्षारहिताः ॥ २१ ॥

भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ।
भवान् मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २२ ॥

तात्पर्यम् — 'ऋते तु तात्त्विकान्देवान्नारदादींस्तथैव च । प्रह्लादादुत्तमः को नु विष्णुभक्तौ जगत्रये' इति स्कान्दे ॥ २२ ॥

सत्यधर्मीया — भवन्ति पुरुषा लोक इति श्लोके बिम्बता प्रल्हादस्य प्रतिबिम्बतेतरसुरादि-भक्तानामित्यन्यथाप्रतीतिं प्रमाणेन श्लथयति ॥ ऋते त्विति । तात्त्विकान् देवानृते तथा नारदादींश्च ऋते जगत्त्रये प्रल्हदादुत्तमो विष्णुभक्तः को नु न कोऽपीति निश्चितम् । तुचावितरेतरसमुच्चये । ऋते देवानित्याद्युपपत्तिस्तु प्रागुपपादिताऽस्माभिरनुसन्धेया । ननु प्रल्हादो नारदाधम इत्युक्तेः कथं नारादादीनित्युक्तिरिति चेन्न । नारदशब्दः प्रह्लादोत्तमोपलक्षक इत्येतेन स्कान्दवचनेन च स्कन्दायुक्ततावच इति सुवचत्वात् ॥ ततश्चायं मूलार्थः ॥ लोके ये मद्भक्ताः पुरुषा भवन्ति सन्ति तेषां भक्तानां सर्वेषां तात्त्विकनारदादिव्यतिरिक्तानां भवान् प्रतिरूपधृक् प्रतिरूपं प्रतिबिम्बं धरतीति स तथा । तद्रूपप्रतिरूपधृक् बिम्ब इति यावत् । अत एव सुलग्रा त्वामनुव्रता इत्युक्तिः । तदननुव्रता उत्तमाश्च तात्त्विकनारदादित्वेन विवृता मानेनेति मननीयम् । प्रतिरूपशब्दश्च रूपं रूपं प्रतिरूपो बभूव । प्रतिदेवतासु देवताप्रतिबिम्बभूतास्विति पूर्वं व्याकृत्य प्रतिरूपशब्दवत्प्रतिदेवताशब्द इत्याथर्वणभाष्योक्तेः प्रतिबिम्बपरो ज्ञेयः । ये त्वामनुव्रता लोके पुरुषास्तेऽपि मद्भक्ता यतो भवन्त्यतो मे सर्वेषां भक्तानां त्वं प्रतिरूपधृक् । प्रल्हादो महाश्रेष्ठो यथेति निदर्शयितुं योग्य इति व्याचक्षते । खलु निषेधन इति विश्वादुत्तमान् भक्तान्निषेध्येतरप्रतिरूपधृक् भवानित्यर्थः । जीवसमुदायः परमेश्वरस्य रूपं रूपं प्रतिरूपो भूत्वा वर्तते । तद्बिम्बरूपमस्य मुक्त्यर्थं साक्षात्कारविषयो भवतीति तत्त्वप्रकाशिकोक्तेः । तत्त्वप्रदीपे च रूपं रूपं प्रतिरूपो बभूव प्रतिबिम्बो बभूवेत्युक्तेश्च ॥ २२ ॥

मन्दनन्दिनी — भक्तेषु श्रैष्ठ्यं प्रह्लादस्य वक्तुमाह ॥ भवन्तीति ॥ लोके मद्भक्ताः पुरुषास्त्वामनुव्रता भवन्ति । त्वमेवमेव भक्तानां प्रतिरूपधृक् दृष्टान्तत्वधृक् ।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

इति वचनात् । भक्तेषु प्रह्लादस्य श्रेष्ठत्वात्तदनुव्रतत्वमन्येषामिति भावः । अत्र प्रह्लादस्य सर्वभक्तेषूत्तमत्वमनुपपन्नम् । नारदाद्यधमत्वात् । अतः कान्विना भक्तेषूत्तमत्वमित्यतस्तात्पर्यम् ॥ ऋते तु तात्विकान्देवान्नारदार्दीस्तथैव च । प्रह्लादादुत्तमः कोऽनु विष्णुभक्तौ जगत्त्रये इति स्कान्दे ॥ तात्विकान् अग्न्यादीन् । नारदादीन्नारदभृगुवसिष्ठादीन् ॥ २२ ॥

कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ।
मदङ्गस्पर्शनेनाङ्ग लोकान् यास्यति सुप्रजाः ॥ २३ ॥

तात्पर्यम् — 'मधुकैटभौ भक्त्यभावादूरौ भगवतो मृतौ । तम एव क्रमादाप्तौ भक्त्या चैद्यौ हरिं ययौ' ॥ २३ ॥

सत्यधर्मीया — कुरु त्वं प्रेतकार्याणीति श्लोके सुश्लोकेन मदङ्गस्पर्शनेन सर्वशः पूतस्येत्युच्यते । नैतत्सम्भवति । विनाऽङ्गसम्बन्धं (मूलकोशे ''विनाऽगसंबन्धं'' इत्यंशो नास्ति ।) मधुकैटभयोरूरावित्युक्त्या मृत्यु(अंगसंगेति रवपाठः)प्रत्यायनात्तेन लोकावाप्तेरभावाद्धिरण्यकस्यैतज्जन्मनि तन्महिमापादकभक्त्यदर्शनात्प्रथमाध्यायान्ते हिरण्यकशिपुरित्यादिमानोदाहरणाद्वैरभावेन तौ हतावित्यत्रैव वक्ष्यमाणत्वाज्जन्मद्वन्द्वप्रापकशापस्य सत्वाच्चेत्यतस्तत्तात्पर्यमाचार्यवर्यः प्रमाणेनाह ॥ मधुकैटभाविति । भक्त्यभावात्स्वाभाविकदानवत्त्वात्तयोर्भगवत ऊरौ उत्सङ्गे । मृतौ मारितौ । क्रमात् कलिना सह स्वोत्तमपापाधिकप्रवेशक्रमात्तम एव प्राप्तौ । चैद्यो भविष्यन्हिरण्यकस्तु तज्जीववत्त्वाद्भक्त्या हरिं ययौ । यास्यति । निश्चितत्वादेवैवमुक्तिः । तेन भक्तिपूर्वकाङ्गस्य स्पर्श एव हर्युक्तो नापरः । स च न मधुकैटभादीनामिति तत्तम एतदुत्तमलोकावाप्तिश्च सम्भवत इति नासम्भव इति भावः । अनन्तिमतयाऽधुना शापापनोदाभावाद्रावणकुम्भकर्णानुक्तिः सम्भावितेति मध्यमवर्तितदनभिधानेनोक्तिः कथं चैद्यस्येति कुचोद्यानवकाश इति ज्ञेयम् । चैद्यत्वावस्थायां शिरः क्षुरान्तचक्रेण जहारापततो रिपोरिति दशमभागवतोक्तेरङ्गस्पर्शाभावात्कथं मदङ्गस्पर्शेनेति चैद्यस्य सद्गतिरित्युक्तिरिति चेन्न । हिरण्यकस्य चैद्यतां मनुषे न तनुषे कुतस्तदङ्गस्पर्शतायां धियम् । निर्भरस्तु भक्तावेव नाङ्गस्पर्शो यत्र स घटितः सोऽप्येकः सुवर्णसौगन्ध्यन्यायेन लाभ इति माने भक्त्या चैद्यो हरिं ययावित्येवोक्तिरिति तदङ्गस्पर्शासंस्पर्शोऽपि न दोषमावहति । चैद्यदेहस्थितं ज्योतिर्वासुदेवमुपाविशदिति भक्तिसहिततदङ्गान्तरङ्गस्पर्शस्य तत्रैव श्रावितत्वाच्च । भारते सभापर्वणि च । ततश्चेदिपतेर्देहात्तेजोऽग्र्यं ददृशुर्नृपाः । उत्पतन्तं महाराज गगनादिव भास्करम् । ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतम् । ववन्दे तत्तदा तेजो विवेश च नराधिपेति स्पष्टमङ्गस्पृष्टचवगतेश्च । तात्पर्ये तर्हि भक्त्येत्येन्मात्रग्रहणं तत्कृत्यवर्णनं च न कर्णाकर्णनीयमिति चेत् । मूल एव मदङ्गस्पर्शनेनेति स्पष्टमुक्तमिति तूष्णीका इत्यप्येतत्पक्षेऽर्थसम्भवात् ॥

ततश्चायं मूलार्थः ।। त्वद्रिपुरिति हिरण्यकशिपुर्मत्तो नोत्तरक्रियार्ह इति न तनुमतिं तनुताम् । स च मदङ्गसङ्गात्पूत इति प्रत्यवेया इत्याह ।। कुरुत्वमिति । हे अङ्ग प्रल्हाद । सर्वशः सर्वप्रकारेण मदङ्गस्पर्शनेनान्तर्निविष्टजयत्वेन सभक्तिगात्रस्पर्शेन पूतस्य (संस्पर्शनपूतस्येति रवपाठः) त्वद्धस्तत उत्तरक्रियायोग्यता व्यक्तिहेतुपावित्र्यवतो मदभिप्रेतानि प्रेतकार्याणि कुरु । सुप्रजाः स हिरण्यको लोकान्सतो यास्यति । सल्लोकयाने मदङ्गस्पर्शवत्त्वं त्वत्पुत्रकत्वं च हेतुरिति सुप्रजा इत्यनेन प्रतिपादयतीति प्रतिपत्तव्यम् । त्वं प्रेतकार्याणि कुर्वित्याद्यनभिदधानोऽभिदधानश्चानयऽऽनुपूर्व्या कृष्णाङ्गसङ्गस्पर्शहीनेषु सर्वथा भक्तिकलाविकलेषु दुर्योधनादिषु श्रौतं स्मार्तं न लङ्घयेदित्युक्तितः कुरुत्वम् । जातिः । यास्यति । अपयशोद्वारा गच्छतीति । सर्वशः सर्वेण तद्धिंसया शं यस्य स धर्मः प्रेतकार्याणि चकारेति शेषः । यश्चाङ्गलोकानङ्गदेशविशेषे विद्यमानाश्च ते लोकाश्च ताननिति चेष्टयतीति स तथा कर्णः । एतस्याप्यङ्गलोकानित्यानुपूर्वी भूमिका ज्ञेया । तस्य पितुः । ज्येष्ठभ्रातृत्वेन तत्समस्य तस्य प्रेतकार्याणि चकारेति न करोमीति न वद प्रेतकार्याणि कुरु । तेभ्योऽपि विशेषकं मदङ्गस्पर्शनेनेत्यादिकमिति मन्तव्यम् । सुप्रज इति पाठे प्राग्व्युत्पादितप्रकारेणोपपत्तिर्ज्ञेया ।। २३ ।।

मन्दनन्दिनी — अवैष्णवाय दातव्यं नोदबिन्दुं न तण्डुलमित्युक्तेः विष्णुद्वेषिणः पितुः कथं कर्म कर्तव्यमिति नाशङ्कनीयम् । स्वभावतो भक्तत्वात् । त्वया पूतत्वस्य प्रार्थितत्वात् । मदपाङ्गसन्दृष्टत्वान्मदङ्गस्पर्शनाच्च तस्य पूतत्वात् इत्याशयेन तत्कर्मकरणे नियुंक्ते ।। कुर्विति । मदङ्गस्पर्शनेन पूतस्येति कथम् । मधुकैटभयोर्हयग्रीवेण मृतत्वेऽपि तदभावादित्यतो भक्तत्वे सतीति विशेषणं देयम् । अतो न व्यभिचार इत्याशयेन तात्पर्यं प्रवृत्तम् ।। मधुकैटभौ भक्त्यभावाद्धरौ भगवतो मृतौ । तम एव क्रमादाप्तौ भक्त्या चैद्यो हरिं ययाविति ।। २३ ।।

पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ।
मय्यावेश्य मनस्तात कुरु कर्माणि तत्परः ।। २४ ।।

सत्यधर्मीया — पितृचरमकर्म कृत्वा (रवपाठे नास्तीदं शब्दद्वयम् ।) पूर्वोक्तं स्मारयन्विस्तार्य किञ्चिद्वदति ।। पित्र्यमिति । पितुः सम्बन्धी । गतम् । (रवकोशे ''पितृसंबन्धि । तत आगत इत्यर्थे पितुर्यच्चेति यत् ।'' इति वर्तते ।) स्थानं सिंहासनमातिष्ठ । तदनुवर्तस्वेत्याह ।। यथोक्तमिति । ब्रह्मवादिभि ब्रह्म वर्तते वयं तद्दासा इति वादिनस्तैर्यथोक्तं तदुक्ति(क्त)मनतिहाय मयि मन आवेश्य । ब्रह्मवादिभि(ब्रह्मादिभिः)र्मया यथोक्तं तथा मयि मन आवेश्येति वा । कर्माणि राज्यरक्षणादीनि मत्पूजालक्षणादीनि वा कुरु । तत्परस्तदासक्तः । तत्परः सः पित्रनुगतो जनः परः शत्रुर्यस्य स तथेति वा । मत्पर इति पाठे मत्परोऽहं परः सर्वोत्तमो यस्य स तथा सन्मन आवेश्य कर्माणि कुर्वित्यन्वयः ।। ।। २४ ।।

मन्दनन्दिनी — ब्रह्मवादिभिरभिषेचनविषये उक्तानुसारेण पित्र्यं स्थानमास्थाय मयि मन आवेश्य मत्परःसन् यज्ञादिकर्माणि कुर्विति नियुंक्ते भगवान्पित्र्यमिति ॥ २४ ॥

नारद उवाच–

प्रह्लादोऽपि तथा चक्रे पितुर्यत् साम्परायिकम् ।
यथाऽऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ।
प्रह्लादस्तु तथाऽकार्षीद् राज्यं निहतकण्टकम् ॥ २५ ॥

सत्यधर्मीया — नृहर्याज्ञोत्तरमुत्तरक्रियां कृत्वा किं प्रव्रजनमुत वनव्रजनं ततान किंवा पित्र्यमित्युक्तं राज्यादिकमकरोदिति धर्ममनःशङ्काशङ्कुमुद्धरति नारद इत्याह ॥ नारद इति । यथा भगवानाह तथा पितुर्यत्साम्परायिकं पारलौकिकं तच्चक्रे । द्विजोत्तमैर्ब्रह्मवादिभिरभिषिक्तः सन् निहताः कण्टकाः क्षुद्रशत्रवो यस्य तत्तथा । निहतकण्टकं यथा भवति तथा राज्यमकार्षीदित्यन्वयः । कण्टकः क्षुद्रशत्रौ चेति विश्वः । तथा भगवदाज्ञामनुसृत्य ॥ २५ ॥

मन्दनन्दिनी — भगवदुक्तप्रकारेण प्रह्लादोऽकार्षीदित्याह नारदः सार्धश्लोकद्वयेन । साम्परायिकमौर्ध्वदैहिकम् ॥ २५ ॥

प्रह्लादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ।
स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २६ ॥

सत्यधर्मीया — दवीयःपदवीमास्थिषन्त ये निमिषास्ते किं तथैव यथागतं तथागताः किं नृहरिमच्छगत्याच्छोद्य गता वेति शङ्कायां द्वितीयमूरीकृत्य पक्षं समाधत्ते ॥ प्रल्हादेति । प्रल्हादसुमुखं तत्स्तुत्यादिना तस्मिन्सौमुख्यं प्राप्तम् । स्वं प्रति तु प्रकृष्टाल्हादेनेतरविशेषतः सुमुखं सदेत्यान्तरङ्गिको भावोऽप्यतीततात्पर्यपर्यालोचनया ज्ञेयः । इदं तु लोकमवलोक्येति मन्तव्यम् । क्वचित् प्रसादसुमुखमिति पाठः स्फुटार्थः सम्भवश्चेति ज्ञेयम् । पवित्राभिर्वाग्भिः स्तुत्वा । स्तुत्वा पवित्राभिः स्तोत्रं कृत्वा प्राप्तपावित्र्याभिर्वाग्भिरिति वाऽन्वयः । देवादिभिर्वृतः स्तुत्वा देवादिभिर्वृतः प्राहेत्यन्वयः । तन्मुख्यत्वादित्थमुक्तिः ॥ २६ ॥

ब्रह्मोवाच–

देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ।
दिष्ट्या ते निहतः पापो लोकसन्तापनोऽसुरः ॥ २७ ॥

सत्यधर्मीया — भूतभावनपूर्वज जगदुत्पादकेभ्यो भूतभावनेभ्यः पूर्वजः प्राक् व्यक्त इति स तथा। भूतभावन जगदुत्पादक। पूर्वज आदिभूतेति वा। ते त्वया। दिष्ट्या सुखेन लोकसन्तापनो लोकं सन्तापयतीति स तथा निहतः ॥ २७ ॥

मन्दनन्दिनी — प्रह्लादेन प्रसाद्य स्वयं स्तौति ब्रह्मेत्याह ॥ प्रसादेति ॥ ब्रह्मा स्तौति श्लोकचतुष्टयेन ॥ देवदेवेति ॥ पूर्वज। धातोरनेकार्थत्वात्पूर्वस्थित। पूर्वमभिव्यक्तेति वा। दिष्ट्या दैवेन। ॥ २७ ॥

योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः।
तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २८ ॥

सत्यधर्मीया — यो मत्तः। लब्धवरः। ममसृष्टिभिर्मम सृष्टिर्निर्माणं येषां ते तथेत्येकपद्ये षष्ट्याऽलुगार्ष इति केचित्। सृष्टं सृष्टिः। क्तो भावे तदेषामस्तीति सृष्टिनो वा। तैर्जनैर्न वध्यः। तपोयोगबलोन्नद्धस्तपश्चान्द्रायणादिकं योगः प्राणधारणादिकं शारीरं बलं च तैरुन्नद्धो दृप्तः। समुन्नद्धः समुद्धूतेमानिदृप्तयोरिति विश्वः। समस्तनिगमान्वेदानहन्। तद्धननं च तदुक्तमार्गप्रतिबन्धकत्वेन ज्ञेयम्। निगमः कटे वेद इति विश्वः। समस्तनिगमान् सत्यलोकरूपमूलनगरेतराणि (''सत्यलोकेत्यादि'' पदं स्थानीयं नास्ति रवकोशे।) नगराण्यमरावत्यादीनि वा। निगमोऽन्यत्तु यन्मूलनगरात्पुरमित्यमरः। हननं चापहारः ॥ २८ ॥

मन्दनन्दिनी — सृष्टिभिः। कर्मणि क्तिन्। भावे क्तान्तादिनिर्वा। मत्सृष्टैरिति यावत्। निगमान्वेदान्। अहन् अध्वंसयत्। वैदिकयज्ञादिलोपकर्तेति यावत् ॥ २८ ॥

दिष्ट्याऽस्य तनयः साधुर्महाभागवतोऽर्भकः।
त्वया विमोचितो मृत्योर्दिष्ट्या त्रातस्त्वयाऽधुना ॥ २९ ॥

सत्यधर्मीया — योऽतनयो गतनीतिः। अतः मृत्योः साधुर्महाभागवतो दिष्ट्यासीति पर्वताद्यधःपातनादितत्साधनात्। दिष्ट्या त्वया विमोचितः। प्रागधुना त्वया त्रातश्चेति वा। अस्य त्वया हतस्य हिरण्यकस्य। तनयोऽर्भको बालस्त्वयैव विमोचितः। विशिष्टा मा ज्ञानं तस्या उचितः। ज्ञानसाधनशास्त्रोपदेशयोग्यः। हे त्रातस्त्वया विमोचित इति वा। अनेनैव प्राणत्राणप्राप्तिरिति न तदनुक्तिदोषः। अतनयो नीतिततोऽसीति वा। स योऽतोऽश्रुत इत्यादेः। दिष्ट्या त्वां समितोऽधुनेति चानधुनातनः पाठः समितः सम्यक् प्राप्त इति तत्रार्थः ॥ २९ ॥

मन्दनन्दिनी — दिष्ट्या दिष्टशब्दो दिष्टापर्यायः। दैवेनेति यावत् ॥ २९ ॥

एतद् वपुस्ते भगवन् ध्यायतः प्रयतात्मनः ।
सर्वतो गोप्तृ सन्त्रासान्मृत्योरपि जिघांसतः ॥ ३० ॥

सत्यधर्मीया — अयमवतारोऽमुमवता रमेश धृतस्त्वयैतदनवरतस्मरणत उत्तारणं सृतेर्भविष्यति । सतां मनसा त्वयि निवसतामिति विज्ञापयति ॥ एतदिति । प्रयतात्मनः सर्वतः खण्डाखण्डप्रकारेण ध्यायतोऽधिकारिणः । जिघांसतो हन्तुमिच्छतो मृत्योर्यमस्य । अपिनेतरदुरापपरिहारतां तस्योपपादयति । सन्त्रसादिति । भयं प्रापय्य गोप्तृ रक्षकम् । सन्त्रासादिति वा मृत्योरिति वाऽलमिति न सन्त्रास इति ध्येयम् ॥ ३० ॥

मन्दनन्दिनी — न केवलमेतद्वपुषो भूतमेव प्रयोजनं किन्तु भविष्यच्चास्तीत्याह ॥ एतदिति ॥ हे भगवन् परमात्मनस्ते एतद्वपुः ध्यायतो भक्तस्य सर्वतः संत्रासाद्गोप्तृ । जिघांसतोर्मृत्योरपि गोप्तृ इति योजना ॥ ३० ॥

श्रीभगवानुवाच–

मैवंविधोऽसुराणां ते प्रदेयः पद्मसम्भव ।
वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३१ ॥

तात्पर्यम् — 'यथा हिरण्यकस्यादादन्तःस्थितहरीरितः । तथा नादात्तदन्यस्य ब्रह्मा दैत्यस्य कस्यचिदि'ति च ॥ ३१ ॥

सत्यधर्मीया — मैवं विधोऽसुराणां त इति श्लोके चतुराननस्य वरवितरणमचतुरताकरमिति पुरत एवं न कुर्विति सर्वथा तत्प्रतिषेधस्तं प्रति क्रियत इदानीं दानवारिणेति प्रतीतिवारणाय प्रमाणेन श्रीनृहरिभावमाविष्करोति ॥ यथेति । यथाऽन्तः स्वान्तःस्थितो हरिस्तेनेरितः प्रेरित इत्यन्तःस्थित-हरीरितः । ब्रह्मा । हिरण्यकस्यैतदाख्यस्य । अदाद्वरमिति शेषः । तथा पृष्टप्रतिवचनमदादिति वा । तथा स्यान्निश्चये पृष्टप्रतिवाक्य इति विश्वः । भगवदिष्टानुसारि प्रवृत्तिमच्छिन्नभक्तं लोकमनुकुर्वता शासनमकारि पद्मासनं प्रति न तु सर्वथा सामान्यवरप्रतिषेध इति । तथा तदन्यस्य हिरण्यकेतरस्य कस्यचिद्दैत्यस्य सुरानाविष्टस्य । अत एव निसर्गपदमेतत्सहकारीति ज्ञेयम् । नादात् । हरिणा हिरण्यकस्येवेतरस्मै न सर्वथेत उत्तरं वितर वरमिति तत्तात्पर्यं मन्तव्यम् ॥ (प्रललितकोशे वाक्यानुपूर्वी किंचिद्व्यत्यस्ता । रवकोशनुपूर्वी एव समीचीनेति भाति) अथ मूलार्थः ॥ एवंविधस्तुतिं कुर्वन्तं चतुर्वक्त्रं किमन्वशासीच्छ्रीश इत्यतः शंसति ॥ मैवमिति । ते त्वया । क्रूरनिसर्गाणामिति दृष्टान्तदार्ष्टान्तिको-भयान्वयि । क्रूरस्वभावानां स्वत एवेत्थम्भूतानामसुराणां हिरण्यकादितरेषाम् । हे पद्मसम्भव । एवंविध

एतादृश वरो न प्रदेयः । एतादृशवरयोग्योऽयमेव नापर इति भावः । (''क्रूरनिसर्गाणां सर्पाणाममृतं क्षीरं यथा न प्रदेयम् । विषपोषणकारणत्वात् । तथा बहुजनव्यथाहेतुत्वान्न प्रदेयो वर इति भावः । ''इत्यधिकं पठ्यते रवकोशे) देवान्ने सलिले क्षीरे त्वमृतं नाविमुक्तिगममित्यभिधानादहीनां हि पयो यथेति सुपाठे यदमृतमित्युक्तं तेनामृतं पीयूषं मोक्षश्च न प्रदेयं न प्रदेयस्तथा मैवंविधो वरो देय इत्यप्यर्थं ध्वनयामासेति मन्तव्यम् । इमं वरमपि न मत्प्रेरणां विहाय दत्तवान्भवान्विध इत्यभ्यधत्त इत्याह ।। प्रद इति । यतस्ते तवान्तस्थे प्रकर्षेण स्वातन्त्र्येण ददातीति प्रदस्तस्मिन्मयि सति यो वरो दत्त इति शेषः । मैवंविधः प्रदेय इत्यावृत्त्याऽन्वयः । एवं चेत्तात्पर्यमूलभूमिकालाभो भवतीति विमत्सरैर्विभावनीयम् । अहीनाम् । बहुवचनमाद्यर्थे । फणां च सप्तानामित्यादिवत् । वृत्रादीनामसुराणामिति सामानाधिकरण्यम् । अहिर्वृत्रासुरे सर्प इति विश्वः । अहीनां संशयविपरीतज्ञानात्मनामप्रसिद्धानाम् । असुराणामिति वा । यथोक्तमृग्भाष्यटीकयोः । अहन्नहिमिति विवरणलवेऽहिं दैत्यं संशयं वा । हीति निश्चयवाची स्यादिति वचनान्निश्चयविरोधिनं संशयमिति ।। ३१ ।।

मन्दनन्दिनी — नृसिंहः पद्मसम्भवं शिक्षते ।। मैवं विध इति ।। ते त्वया क्रूरनिसर्गाणां क्रूरस्वभावानाम् । अत्र मैवं विधो देय इत्यनेन हिरण्यकशिपोरेवं विधो वरो भगवदनभिमत एव दत्तः । एतदाज्ञामुल्लंघ्यैव रावणादिभ्यो पुनर्दास्यत इति न मन्तव्यम् । हिरण्यकशिपुवरदानेऽतःस्थितहरिणा तथैव प्रेरितत्वात् । एवंविध इति विशेषणेन दास्यमानवरस्यैवंविधत्वाभावेनाज्ञाया अप्यनुल्लंघनात् । एतदेवाभिप्रेत्य तात्पर्यम् ।। यथा हिरण्यकस्यादादन्तःस्थितहरीरितः । तथा नादात्तदन्यस्य ब्रह्मा दैत्यस्य कस्यचिदिति च ।। ३१ ।।

नारद उवाच–

इत्युक्त्वा भगवान् राजन् ततश्चान्तर्दधे हरिः ।
अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ।। ३२ ।।

सत्यधर्मीया — ज्ञातवासस्य न ज्ञातवासश्चिरं नृष्विति प्रतिषिद्धत्वादतमिदमतनुत नरहरिरितीरयति ।। इतीति । सर्वभूतानां भूतलालयभूतमात्रस्य । कृत्यानां कर्तरि वेत्युक्तेः । सर्वभूतानामदृश्य इत्युपपन्नम् । तत एतदुक्त्यनन्तरम् । तत्रैव वा । परमेष्ठिना तदादिस्थानविशेषे ।। ३२ ।।

मन्दनन्दिनी — ब्रह्मनियोगानन्तरं वृत्तमाह ।। इत्युक्त्वेत्यादिना ।। सर्वभूतानामदृश्यः सम्यगदृश्यो भगवान् ब्रह्मणा पूजितः । ततश्च तत्रैवान्तर्दधे ।। ३२ ।।

ततः सम्पूज्य विधिवद् ववन्दे परमेष्ठिनम् ।
भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः ।। ३३ ।।

सत्यधर्मीया — नृसिंहान्तर्हिततानन्तरं प्रल्हादः किमकरोदित्यत आह ।। तत इति । विधिवद्यथाविधानं परमेष्ठिनं ब्रह्माणम् । अनेनेशकोशनिवेशेन लक्ष्म्याः पृथक् पूजा नोक्तेति वा पत्यन्तर्धाने तदन्तर्धानाद्वाऽनुक्तिरिति मन्तव्यम् । (अत्र प्रलचितकोशे वाक्यमस्पष्टं अस्ति) सम्पूज्य सत्कृत्य ववन्दे विधिवद्ब्रह्माणमिव भवं विधिवद्वन्द इति वा । वन्दनमात्रे निदर्शनं न तु समञ्चनसमतायाम् । यथा देवे तथा गुरावित्यादिवदिति ध्येयम् । एवं देवान् प्रजापतीनित्यपि ज्ञेयम् । कुतस्तन्नमनमित्यतो हेतुमाह ।। भगवत्कला इति । भगवतः कला भिन्नमंशमात्रकं येषु ते तथेति तान्ववन्द इति वा । भगवत्कला द्वितीयाबहुवचनं सत्परमेष्ठ्यादिविशेषणम् । कला शिल्पादावंशमात्रक इति विश्वः ।। ३३ ।।

मन्दनन्दिनी — ततो भगवदन्तर्धानानन्तरं प्रह्लादो भगवत्कला भगवतः प्रतिबिम्बभूतान् विधिवत्परमेष्ठिनं भवं प्रजापतीन् देवांश्च सम्पूज्य ववन्द इति योजना ।। ३३ ।।

ततः काव्यादिभिः सार्धं मुनिभिः कमलासनः ।
दैत्यानां दानवानां च प्रह्लादमकरोत् पतिम् ।। ३४ ।।

सत्यधर्मीया — यद्यपि पित्र्यं स्थानमातिष्ठ तथाऽपि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् । अभिषिक्तो द्विजोत्तमैरकार्षीद्राज्यं निहतकण्टकमित्याद्युक्त्या ब्रह्मणा न कर्तव्योंऽशः प्रतीयते । तथाऽपि भगवत्पुरतः स्वेन नाज्ञाप्यो यथाविधिनाभिषेच्यश्चेति विधिना तूष्णीं स्थितमधुना स्वस्य कर्तव्यं युवराजत्वात्तथा पूर्वं केवलं ब्रह्मादिभिरेवाभिषिक्त इदानीं तु पुरोहितं पुरतो निधायेति वा विशेषादियमुक्तिर्युक्तिमतीति व्यधत्त विधिरित्यभिधत्ते ।। तत इति । काव्यादिभिः । शुक्रो दैत्यगुरुः काव्य उशनेत्यमरः । काव्यः शुक्र आदिर्येषां ते तथा । मुनिभिः सार्धं सह । कमलासनो विधिः । दैत्यानां दित्यपत्यानां दानवानां दनुतनुजानां प्रल्हादं पतिं स्वामिनमकरोत् ।। ३४ ।।

मन्दनन्दिनी — ततः प्रह्लादवन्दनानन्तरं काव्यादिभिः शुक्राचार्यप्रभृतिभिर्मुनिभिः ।। ३४ ।।

प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः ।
स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ।। ३५ ।।

सत्यधर्मीया — सम्पादितागतिप्रयोजनैः प्रायो जनैर्नैव स्थेयमिति समा (समे इति रवपाठः) निमेषा जग्मुः स्वस्वसद्मानीति शंसति ॥ तत इति । तत अभिषेकानन्तरम् । देवाः प्रतिनन्द्यानुमोद्य । परमाशिषः प्रयुज्य ब्रह्माद्याः प्रतिपूजिताः प्रल्हादसत्कृताः स्वधामानि ययुः । ययू राजन्नित्यत्र रोरीति रेफलोपे ढ्रलोप इति दीर्घः ॥ ३५ ॥

मन्दनन्दिनी — प्रतिनंद्य सन्तोष्य ॥ ३५ ॥

एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ।
हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३६ ॥

सत्यधर्मीया — विष्णोस्तौ पार्षदौ जयविजयात्मानौ दितेः पुत्रत्वं प्रापितौ । हृदि स्थितेन वैरभावेन वैरमनसा निमित्तेन । हृदि स्थितेनेति हरिणेत्यनेनाप्यन्वेति । (पूर्वशापेनेत्यत्रापि कटाक्षणीयमित्यधिकं रवकोशे) वैरभावेन वैरोपसर्जनभक्त्या तौ दानवसहवासहापनेनोत्तरत्र प्राप्यानन्दविषये हतौ । आनन्दं तीति वै वदेदिति तात्पर्यान्तरात् । वैरभावे वैरनिमित्ते वैरत्व इति वा वैरमनसि सति । अनतौ अनघ्नौ दुर्वृत्ताविति यावदिति वा । तावेवं हतावित्यप्यन्वयो वा ॥ ३६ ॥

मन्दनन्दिनी — शापप्राप्तं दैत्यभावं तन्निधनं चोपसंहरति । वैरानुभावेन वैरानुचिन्तया हृदि स्थितेन हरिणा तौ हताविति योजना ॥ ३६ ॥

पुनस्तौ पूर्वशापेन राक्षसौ तौ बभूवतुः ।
कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३७ ॥

शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ।
तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३८ ॥

सत्यधर्मीया — दशग्रीवकुम्भकर्णाविति वर्णनीये हतावित्येतत्पूर्वमव्यवधानेन मुख्योद्देशत्वं तस्यापीति बोधनार्थं कुम्भकर्णदशग्रीवावित्युक्तिरिति चमत्कृतिः कवयितुर्विभाव्या । हननक्रममपेक्ष्यैवमुक्तिरिति वा । युधि हतौ । तत्प्रकारमाह ॥ रामविक्रमैरित्यादिना । रामविक्रमैर्मुख्य-करणैः रामसायकैरवान्तरकरणैः शरैर्विभिन्नहृदयौ शयानौ सन्तौ । यथा प्राक्तनं जन्म जयविजयजन्म तस्मिन् । हिरण्याक्षहिरण्यकशिपुजन्मनीति वा । तथा तच्चित्तौ भगवच्चेतसौ देहं जहतुस्तत्यजतुः । तुरत्वरणे तुतोर्ति इगुपधलक्षणः क इति भानुदीक्षितः । लिङ्गाभट्टीये तुरं वेगं सहत इति व्याख्यातम् । प्रथमपक्षे तुरो हि शीघ्रगन्ता गरुडादिस्तत्सम्बन्धी तौरोऽमो गमनं ततोऽपि विक्रमं शक्तिर्येषां तैरिति

रामसायकविशेषणम् । द्वितीये तुरेणामन्ति गच्छन्ति ते तुरामास्तेषां सम्बन्धी तौरामः । स विक्रमः शक्तिसम्पद्येषां तैरिति वा । विक्रमः क्रान्तिमात्रे स्याद्विक्रमः शक्तिसम्पदीति विश्वः । तुराषाट्प्रभुरिति भक्तिपादभाष्यतत्त्वप्रकाशिकायां तुरेति वैरवेगेति व्याख्यातम् । तुरं वैरिवेगममयति गमयतीति तुरामः । स एव तौरामः । प्रज्ञाद्यण् । स विक्रम एषाम् । तुरं भगस्येति वायौ वा तुरशब्दः । तुरसम्बन्धी तौरोऽमो गतिस्तद्वद्विक्रमो येषां तैः रामसायकैरिति वा । अनेन कृतं रामेत्येकेनेति शङ्काविरामो ज्ञेयः । रामसायकैः रामनामचिन्हितैः सायकैरिति वा । सायकैर्हतौ हे रामेति तच्चित्तौ देहं जहतुरिति वा ॥३८॥

मन्दनन्दिनी — एवं प्रथमजन्मनिधने उक्त्वा द्वितीयजन्मनिधने आह ॥ पुनरिति ॥ प्राक्तनजन्मनि राक्षसभावेन नृसिंहं संचिन्त्य यथा देहं जहतुरेवं राजेति भावेन राममनस्कौ देहं जहतुः ॥ ॥ ३८ ॥

तावेवाद्य पुनर्जातौ शिशुपालकरूशजौ ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३९ ॥

सत्यधर्मीया — तावेव रावणकुम्भकर्णाविव । अद्य शिशुपालकरूशजौ शिशुपालश्च करूशजो दन्तवक्रश्चेति द्वौ पुनः जातौ । यथाकथञ्चिद्भ्रातृत्वं न तु सहोदरत्वम् । विदूरथः साक्षात्सहोदर इति ज्ञेयम् । यथोक्तं दशमे । रुक्मी च शिशुपालश्च भ्रातरौ मे हतौ पुरा । निहतं भ्रातरं दृष्ट्वा दन्तवक्रं विदूरथ इति । शापस्तदा दानवावेशवशतया जनन एव न तु सहोदरत्वे । किञ्च भगवदाज्ञाऽपि मयैव वध्यौ भवतं त्रिजन्मस्विति तद्विषय एवेति मन्तव्यम् । हरौ वैरानुबन्धेन वैरोपसर्जनभक्त्या । ते पश्यतः सतः । ते ज्योतिषी समीययुः प्रापतुः । अन्तर्निविष्टे इति यावत् । राजसूयेऽसूयया धिक्कुर्वतो माधवो वधं व्यधात्तदाऽपि धर्मोऽवर्तत । एवं दन्तवक्रवधकालेऽप्यवर्ततेति ते पश्यत इत्युक्तिः । यथोक्तं दशमे । पाण्डवाश्च महीपाला यज्ञदर्शनमिच्छवः । आहूता वासुदेवेन द्वारकामाययुर्नृप । उद्धापनस्नान-हेतोर्यमुनातीरमागतम् । श्रुत्वा तूर्णं कलिङ्गेशो दन्तवक्र सहानुज इत्यारभ्य ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम् । पश्यतां सर्वभूतानां यथा चैद्यस्य सङ्गर इत्यन्तेनेति भावः । सं सारत्वात्सो भगवांस्तमीयुरिति वा । नित्यं हीनोऽखिलैर्दोषैस्सारस्रूपो यतो हरिः । हंस इत्युच्यत इति काठकभाष्योक्तेः । असं असारं तमश्च तदाविष्टावसुरावपीयतुरित्यर्थो वा । अत एव (अनेनेति रवपाठः) न हरिमिति वा तमिति वा तम इति वा शेषशेषक्लेश इति मन्तव्यम् । वैरं चानुबश्चैषां शाश्वतिको विरोध इत्येकवद्भावः । वैरेणासं तमः । अनुबन्धेन भक्त्या च सं सारमीयतुरिति क्रामिकोऽन्वयो वा । अनुबन्धस्तु भक्तिः स्यादित्यादेः ॥ ३९ ॥

मन्दनन्दिनी — पुनर्जातौ राजरूपेण जातौ शिशुपालकरूशिजौ हरिविषयकवैरयुक्तभक्त्या भगवानिति ज्ञात्वा तौ पश्यतो हरिं समीयतुः ॥ ३९ ॥

एनः पूर्वकृतं यत् तद् राजानः कृष्णवैरिणः ।
जहुस्तेऽन्ते तदात्मानः कीटाः पेशस्कृतो यथा ॥ ४० ॥

तात्पर्यम् — 'पौण्ड्रके नरके चैव साल्वे कंसे च रुग्मिणि । आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमीयिरे । असुरास्तु स्वयं ते तु महातमसि पातिता' इति च । तदात्मानस्तत्राविष्टास्तद्भक्ताः । वैरोपसर्जनेनानुबन्धेनेत्यन्वयः ॥ ४० ॥

सत्यधर्मीया — एनः पूर्वमिति श्लोके हरिवैरिणामपि दूरितदुरिततोच्यत इति भाति । नेदं सम्भवति । तथात्वे तदात्व एव शिशुपालादिवज्ज्योतिरूपेण प्रवेशो वाऽनन्तरं विमुक्तिर्वा स्यान्न तु तमःप्राप्तिरित्यतो मानेनाभिमतमर्थमाह ॥ पौण्ड्रके चेति । तदाविष्टा विष्णुभक्तास्तु त एव तद्भक्त्या हरिमीयिरे । आपिर इत्यपि सरलः पाठः । असुराः पौण्ड्रकादिनामकाः । स्वयमित्येतदमर-सम्पर्कहीनतामभिप्रैति । महत्त्वं चानुत्थित्या मन्तव्यम् । तदात्मान इत्यस्य साक्षात्कृष्णरूपताप्रतीतिं वारयन्व्याकरोति । तदात्मान इति । तदिति तन्त्रम् । तत्र पौण्ड्रकादिषु । आत्मा देहो व्याप्तिर्वा येषां ते । तत्र भगवति चात्मा मनो येषां त इति भावमावेदयितुं तत्राविष्टास्तद्भक्ता इत्युक्तिः । वैरानुबन्धेनेत्य-तीतपद्यस्थस्यात्राप्यन्वेतव्यतामेकप्रकरणतया प्रदर्शयितुमिदानीं तद्व्याख्याति ॥ वैरेति । उत्तरपदलोपी च मूले समास इति सूचयत्युपसर्जनपदनिबन्धेन । वैरमुपसर्जनम् । स्वमहाफलाभोजकत्वेनाप्रधानं यस्मिन्ननुबन्धे भक्तौ स वैरानुबन्धस्तेन ॥

ततश्चायं मूलार्थः ॥ न द्वावेव किन्तु तावित्युक्तिरुपलक्षणाभिप्रायेणेति तान्दर्शयति ॥ एन इति । मानानुयानं राजपदार्थो ज्ञेयः । राजानः पौण्ड्रकादयस्तदात्मानः सः आत्मा स्वरूपं स्वोषामिति मतिमन्तः । तस्मिन्भगवत्यात्मा मनो येषां ते तदात्मानः । असन्तः सन्तश्च कृष्णवैरिणो यदनुजस्य सम्बन्धादाप्तं यदेनस्तज्जहुस्त्यक्तवन्तः । पूर्वेण स्वकर्मादिना कृतं प्राप्यत्वेन क्लृप्तं पूर्वेणाघेन विधिना कृतं विहितं यत्तद्वैरानुबन्धेन वैरोपसर्जनभजनेन जहुर्गतवन्तः । ओहाङ्गताविति स्मरणात् । तदितरेऽसन्तश्च । एनःपूर्वकृतमिति पदमेकम् । एनसः स्वकृतपातकस्य पूर्वमेव कृतं फलं यत्तत्तमो वैरानुबन्धेन वैरसम्बन्धेन जहुरगच्छन् । उभयत्राप्यन्ते मृत्यनन्तरमित्यर्थः । भक्तिद्वेषादि-साधनपूर्त्यनन्तरमिति वा । कृतं युगे च पर्याप्ते विहिते हसिते फल इति विश्वः । कृष्णवैरिणः काकरिपो रामस्य यत्पूर्वकृतमनादिपदं तत् । तदात्मानस्तन्मनस्काः सन्तः सन्तो जहुरिति वा । ये तु तदात्मानस्तत्राविष्टा असन्तश्च कृष्णवैरिणो रामादीञ्जहुर्नरामिणः । तेऽन्ते पूर्वकृतमित्यादि पूर्ववदिति

वा । कृष्णो व्यासेऽर्जुने काके चेति विश्वः । तदात्मान इत्यस्य नाभेदोऽर्थ इति बोधयितुं ग्रन्थकृत्तदननुरूपमनुरूपमुक्तार्थस्य दृष्टान्तमाचष्टे ।। कीटा इति । वस्तुतस्तु कीटः पेशस्कृतो यथेति दृष्टान्तदृष्ट्योत्तरत्र हरेः सौम्यमिति दृष्ट्या च न व्यतारीद्विवरं पराक्रमस्येति नाचार्यैः पराक्रमणीयमिति चेत् । सत्यम् । प्रतीताभेदखण्डनपक्षे न निर्भरो भगवत्पादस्य किन्तु तदात्मान इत्यत्र विग्रहद्वयप्रदर्शनमुखेनाप्रतीतसदधिकारिफलं विविच्य वचने निर्भर इति तदनूद्य प्रमाणमुदाहरति कीटा इति ।। पेशस्कृतो धर्तुः कीटविशेषस्य संरम्भभययोगेनेति पूर्वोक्तेनाथवात्रोक्तेन वैरानुबन्धेन वैरसहितोऽनुबन्धस्तेन किं करिष्यति मामिति वैरं, दास्यत्यन्नमिति स्नेहस्तेन । कीटा जात्यन्तरजन्मानो यथा तदात्मानस्तथैत इति योजना । तदात्मान इत्यस्य तत्सरूपा न तत्स्वरूपा इत्यर्थः । उभयोरपि दर्शनात् ।। ४० ।।

मन्दनन्दिनी — शिशुपालकरूशजावित्युपलक्षणम् । अन्येऽपि वैरिणो बहुराजानः कृष्णेन हताः कृष्णमीयुरित्याह ।। एन इति ।। ये ये कृष्णवैरिणो राजानः पौण्ड्रकनरकादयस्ते ते यत्पूर्वकृतमेनो दैत्यावेशप्रयुक्तनिन्दनादिजन्यपापं तत्तदात्मानः तस्मिन् कृष्णे आत्मान आविष्टाः कृष्णे आत्मा मनो येषां ते तथाभूताः । वैरानुबन्धेनेत्यावर्तते । अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत इति वचनात् । वैरोपसर्जनभक्त्या कीटः पेशस्कृतो वैरानुबन्धेन यथा जहुरिति योजना । अत्र ते कृष्णवैरिणो राजान इत्युक्तेर्वेनादीनामपि भगवत्प्राप्तिः प्रतीयते । तस्या वेनस्तमसि पातित इत्यादिना विरोध इति न मन्तव्यम् । दैत्याविष्टपौंड्रकनरकादीनामेव ग्रहणात् । केवलदैत्यानां वेनादीनामग्रहणात् । तेषामनुबन्धपदोक्तभक्तेरभावाच्च । एतदेवाभिप्रेत्य तात्पर्यम् ।।

पौंड्रके नरके चैव साल्वे कंसे च रुग्मिणि ।
आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमापिरे ।
असुरास्तु स्वयं ते तु महातमसि पातिताः ।।

इति च ।। तदात्मानस्तदाविष्टास्तद्भक्ताः । वैरोपसर्जनेनानुबन्धेनेत्यन्वय इति ।। ४० ।।

यथा यथा भगवतो भक्त्या परमया भिदाम् ।
नृपाश्चैद्यादयः साम्यं हरेस्तच्चिन्तया ययुः ।। ४१ ।।

सत्यधर्मीया — तत्रापि तरतमभावोऽस्तीत्याह ।। यथायथेति । यथायथा स्वस्वयोग्यतामवर्जयित्वा परमया भक्त्या भिदां विशेषम् । भेदो द्वैधे विशेषे स्यादिति विश्वः । भेदभिदाशब्दयोरनर्थान्तरत्वात् । ययुः । चैद्यादयो नृपास्तदावेशिनो जयविजयभृग्वादयः । तच्चिन्तया सा च सा चिन्ता तया हरेः साम्यं चक्रशङ्खचतुर्बाहुत्वादिना सादृश्यं ययुः । भगवतो हरेः परमया भक्त्या यथा यथा भिदां विशेषं ययुस्ते

तथा तथा । तच्चिन्तया । भगवत्कर्तृककर्मस्मरणेन (भगवत्कर्तृस्वकर्मे''ति अमुद्रित कोशपाठः) साम्यं तस्मिन्स्थितिम् । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिता इत्युक्तेः । शाश्वतिकीं ययुरिति वा । ये नृपाश्चैद्याद्याः । यथा यथा परमया अभक्त्या हरेः सकाशाद्भिदां विदारणं यत्तेन साम्यं समता तच्चिन्तया ययुः । ते अभगवतोऽसूर्यसञ्चारानन्धन्तमसभागान्ययुरितीतरपक्षेऽपि भावो बोध्यः ॥ ४१ ॥

मन्दनन्दिनी — अत्र पौंड्रकादिपदेन देहो ग्राह्यः । तत्राविष्टाः प्रविष्टा इत्यर्थः । तेषु भक्तेष्वाविष्टस्त्वित्यर्थः । अनुबन्धस्तु भक्तिःस्यादित्युक्तत्वादनुबन्धेन भक्त्येत्यर्थः । द्वेषिणां चैद्यादीनां कथं मुक्तिरिति शङ्कायास्ते भगवतः पार्षदा अनादितो भक्ताः शापादिप्रयुक्तदैत्यावेशतो भगवद्वैरादिकं कृतवन्तः । भगवांश्च दयालुः । वैरादिकमविगणय्य भक्तिमेव हि निमित्तीकृत्य मोचितवानित्युत्तर-मुक्तम् । तत्संक्षिप्योपसंहरति ॥ यथेति ॥ यथा यथा योग्यता तथा तथा विद्यमानया परमया भगवतो भक्त्या तत्पूर्विकया तच्चिंतया चैद्यादयो नृपाः । भिदां सुखेऽवांतरविशेषयुक्तम् । भेदो विशेषे दलन इत्यभिधानात् । साम्यं हरेर्निर्दुःखत्वादिना चतुर्बाहुत्वादिना साम्यं ययुरिति योजना ॥ ४१ ॥

आख्यातं सर्वमेतत् ते यन्मां त्वं परिपृष्टवान् ।
दमघोषसुतादीनां हरेः साम्यमपि द्विषाम् ॥ ४२ ॥

सत्यधर्मीया — दमघोषसुतः पाप आरभ्य कलभाषणादित्यादीकृत्य शङ्कितस्योत्तरं वितार्योप-संहरति ॥ आख्यातमिति । यत्परिपृष्टवानित्युक्तं किञ्चिद्विविच्योचे ॥ दमघोषेति । तत्साम्यमपिना निनिन्देति ज्ञेयम् ॥ ४२ ॥

मन्दनन्दिनी — द्विषतामपि साम्यमसम्भावितमिति यत्पृष्टवान् तदनादिभक्तत्वेना-सम्भवनिरासेनोपपादितमिति योजना ॥ ४२ ॥

एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ।
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४३ ॥

तात्पर्यम् — भगवान्येन गम्यत इत्यनेन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिनेत्युपसंह्रियते ॥ वृत्तानुकथनं च तदर्थत्वेनैव ॥ ४३ ॥

सत्यधर्मीया — नेयतैवोपसंहृतिरपि तु धर्मो भागवतानां च भगवान्येन गम्यत इत्येतदन्तेनाख्यातमिति प्रमुखेन श्लोकपञ्चकेनेति प्रपञ्चयितुं भावो धर्मो भागवतानां चेति पद्यस्थं भगवान्येन गम्यत इति वाक्यमादावनूद्य विवृणोति ॥ भगवान्येन गम्यत इति । अनेन भागवतधर्मेणैव भगवान्गम्यते । एवकारं स्वयमेव व्याकरोति । नेति ॥ द्वेषादिनोपसंह्रियत इत्यन्वयः । तर्ह्याख्यातमिति

वृत्तकथनं कथमुपपन्नम् । कथनीयस्यार्थस्याधुनाऽपि दृश्यमानत्वादित्यतस्तस्योपसंहारप्रयोजनकत्वमेवेति तदेकवाक्यत्वमेवेत्याह ॥ वृत्तानुक्तकथनं चेति । पूर्ववृत्तस्यानुकथनं कथयतीति कथनं येन तदिति वा । एषा ब्रह्मण्यदेवस्येत्यादिकं चोपसंहारार्थत्वेनैवोक्तमित्यर्थः । उपसंहारे भागवतधर्मेणैवेत्युक्तेरेतेनैवोपक्रमगतवैरानुबन्धेत्यादेरैककण्ठ्यं सम्पादनीयं सावधृतेर्नैरवकाश्यादिवोत्तरत्वेनापि बलवत्त्वादित्यनुसन्धेयम् ॥ अथ मूलार्थः ॥ पारवश्येन स्तौति ॥ एषेति । ब्रह्मण्यदेवस्य ब्राह्मणप्रियश्चासौ देवश्च तस्य । सनकाद्युक्तिरिरक्षयाऽवातारिभगवतेति ब्रह्मण्यता स्फुटाऽभूदिति भावः। वराहनृसिंहरामकृष्णाद्यात्मनः कृष्णस्यान्तिमत्त्वमेव विनिगमकमिति कृष्णस्येति गमनिका युक्ता । अत एवमुवाचेति ज्ञेयम् । यत्रावतारकथायां पुण्यमस्या अस्तीति पुण्या । आदिभ्यां राक्षसाभ्यां सहितौ च तौ दैत्यौ शिशुपालदन्तवक्रौ तयोः । प्रस्तुते त्वादिदैत्यौ आदी प्रथमोत्पन्नौ च तौ दैत्यौ चेति विशेषोऽवसेयः । आदिनो राक्षसाः प्रोक्ता इति तात्पर्यान्तरादाख्यातेति शेषः । आदिदैत्ययोस्तौ अवता भगवता रक्षकेनार प्राप्नोत् । महात्मनो जनान्पुण्याः कथा अवतोपदेशादिना गुरुणाऽऽरेति वा योजना ॥ ४३ ॥

मन्दनन्दिनी — एषोक्ता कथा पुण्या । आदिदैत्ययोर्हिरण्यकशिपुहिरण्याक्षयोर्भगवत्कृतवधलक्षणभगवन्माहात्म्य प्रतिपादकत्वादित्याशयेनोक्तम् ॥ यत्रेति ॥ ४३ ॥

प्रह्लादस्यानुचरितं महाभागवतस्य च ।
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४४ ॥

तात्पर्यम् — ज्ञानस्य विशेषा याथात्म्यादयः । 'भक्तिर्ज्ञानं विरक्तिश्च नवकः श्रवणादिकः । धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नवे'ति तन्त्रसारे ॥ ४४ ॥

सत्यधर्मीया — भक्तिर्ज्ञानं विरक्तिश्चेति श्लोके भक्तिज्ञप्तिविरक्तिसहोक्त्या याथात्म्यमपि पृथक् साधनमिति भ्रमं भ्रंशयति ॥ ज्ञानस्येति । विशेष्यते व्यावर्त्यते ज्ञानं यैर्विषयैस्ते विशेषा याथात्म्यज्ञानादयः प्रकाराः । आदिपदेन सर्गस्थित्यप्ययेशस्येत्यादिना वक्ष्यमाणस्रष्टृत्वादिप्रकारा ग्राह्याः । तद्विषयकं ज्ञानमिति तात्पर्यम् । भक्त्यादित्रिकस्य भागवतधर्मत्वे प्रमाणं वदंस्तेनैव भक्तिपदस्य मूललपितमर्थान्तरं च दर्शयति ॥ भक्तिरिति । भक्तिः स्नेहस्तथा श्रवणादिको नवको भागवतो धर्म इति प्रोक्तः । श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणेति । तद्भक्तेषु हरिदासेषु ब्रह्मादिषु तरतमभावेन नव भक्त्यादित्रिकं तथा श्रवणादीनि च नव धर्म इति प्रोक्त इत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ महाभागवतस्य प्रल्हादस्यानुचरितम् । चशब्देनातीतवधादिसमुच्चयः । भक्तिर्ज्ञानं विरक्तिश्च यथायोग्यं

कथितपदेनान्वयः । यथात्म्यं नायं भक्त्यादिवत् स्वतन्त्रो धर्मः किन्तु स्रष्टृत्वादियथार्थत्वादिज्ञानं अस्य हरेर्भक्तिश्चेत्येवं चशब्दान्वयो ज्ञेयः ॥ ४४ ॥

मन्दनन्दिनी — प्रह्लादचरितमपि पुण्यकरमित्याह ॥ प्रह्लादस्येति ॥ महाभागवतस्य प्रह्लादस्यानुचरितं च । च शब्दात्पुण्येत्यस्य लिङ्गव्यत्ययेनानुषङ्गः । पुण्यम् । महाभागवतस्येत्यनेन पुण्यत्वमुपपादितम् । आख्यानोक्तं सङ्गृह्णाति ॥ भक्तिरिति ॥ आख्यानेऽस्मिन्समाख्यातमित्यस्य लिङ्गविपरिणामेन सर्वत्रान्वयः । याथात्म्यमात्मविषयकयथार्थज्ञानम् ॥ ४४ ॥

सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम् ।
परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४५ ॥

सत्यधर्मीया — सर्गस्थित्यप्ययेशस्य लब्धजन्मनो हि स्थित्यादीति जन्मन आदित उक्तिरित्युक्तेः सर्गः स्ववर्गात्पूर्वं गृहीतस्तेषां तदुपलक्षितसृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडिति स्कन्दोक्ताष्टकस्येशस्तस्य । गुणानां कर्मणां ज्ञानानन्दादीनां दैत्यहिंसनादीनामनुवर्णनं तज्ज्ञानम् । परावरेषां परेषां ब्रह्मादीनामवरेषां तृणजीवानां कालेन प्रलयरूपेण तथा स्थानानां सत्यादीनां व्यत्ययो नाश इति ज्ञानं महान् गुणतो देशतः कालतो हरिर्महानिति ज्ञानम् । महान्व्यत्यय इति वाऽन्वयः । कालेनाव्यत्यय इति पाठे आ सम्यग्व्यत्यय इत्यर्थः। एतस्मिन्महानिति नैतद्विशेषणम् । आङैतल्लभ्यार्थलब्धेः । दुर्घटार्थप्रबोधिन्यां व्यत्ययस्य जगन्निष्ठत्वात् । प्रबोधिन्यां महाव्यत्यासः । निर्णयप्रकाशिकायां व्यत्ययो नाशः । परकीयव्याख्यायां च व्यत्ययो व्यत्यास इत्युक्तेः । कालेन व्यत्यय इति पाङ्क्त पाठः । नोभयस्मिन्नपि पाठेऽव्यत्ययो यथास्थितत्वमिति भवत्यनुगुणोऽर्थ इति ज्ञेयम् (?)। आविरिञ्चात् । नेच्छामि ते विलुलिता गुरुविक्रमेण कालात्मनोपनयेत्यादाविवात्रापि वैलुलित्योक्तेश्च ॥ ४५ ॥

मन्दनन्दिनी — गुणकर्मानुवर्तनं गुणकर्मणि यथा वृत्तेस्तथैवानुवर्तनं कीर्तनम् । वृत्तानुकथनमिति यावत् । परावरेषामुच्चावचानां सत्यलोकादिस्वर्गान्तानामव्यत्ययोऽव्यत्यासः ॥ ४५ ॥

धर्मो भागवतानां च भगवान् येन गम्यते ।
आख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ॥ ४६ ॥

सत्यधर्मीया — येन भगवान्गम्यते स भागवतानां धर्म उक्तरूपः । चोऽवधारणार्थे सन् येनेत्यनेनान्वेति । येनैव धर्मेणैव भक्त्यादिना नान्येन द्वेषादिनेत्यर्थः । इन्द्रियादिस्वरूपं चात्र निरूपितमित्याह ॥ आध्यात्मिकमिति । आध्यात्मिकमात्मानमधिकृत्य वर्तमानमिन्द्रियादिस्वरूपं समाख्यातम् । अशेषतः सामस्त्येन ॥ ४६ ॥

मन्दनन्दिनी — धर्मो भक्त्यादिलक्षणः । येनेति भगवद्भक्तिज्ञानत्वोक्तेः । अत एव तात्पर्यम् ॥ भगवान्येन गम्यत इत्यनेन भागवतधर्मेणैव भगवान् गम्यते । न द्वेषादिनेत्युपसंह्रियते । वृत्तानुकथनं च तदर्थत्वेनैव । ज्ञानस्य विशेषा याथात्म्यादयः ।

भक्तिर्ज्ञानं विरक्तिश्च नवकः श्रवणादिकः ।
धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नव ॥ इति तन्त्रसारे ॥

धर्मो भागवतानां चेत्युक्त्वा येनेत्युक्तेर्भागवतधर्मेण भक्त्यादिनैव गम्यत इत्युपसंह्रियत इत्यर्थः । वृत्तानुकथनस्य भागवतधर्मत्वाभावात्कथं भागवतधर्मेणोपसंहार इत्यत उक्तम् ॥ तदर्थत्वेनेति ॥ भक्त्यादेर्भागवतनिष्ठो धर्मो वृत्तानुकथनं च भक्त्यादिकं जनयतीति भावः । आत्मानं देहं मनो वा । अनतिक्रम्य विद्यमानमिन्द्रियमनस्त्वादिकं यथात्मा तस्य भावः । कथं भागवतधर्म इत्यत उक्तम् ॥ ज्ञानस्येति ॥ तथा चात्मानं परमात्मानमनतिक्रम्य विद्यमानं ज्ञानं याथात्मा । स्वार्थे ष्यञ् । तदेव याथात्म्यम् । तथा च भगवद्विषयकयथार्थज्ञानस्य भागवतधर्मत्वं युक्तम् । तथापि भक्त्यादिरेव भागवतधर्म इत्यत्र किं मानमित्यत उक्तम् ॥ भक्तिरिति ॥ भक्तिरित्यस्यैव विवरणम् ॥ श्रवणादिको नवक इति । भगवद्भक्तेष्वपि नव श्रवणादयो भागवतो धर्मः ॥ ४६ ॥

य एतत् पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ।
कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ ४७ ॥

सत्यधर्मीया — संसारभाजनं जनं ततः प्रच्याव्यैतस्मिन्प्रवर्तयितुं वक्तुः श्रोतुश्च फलमभिलपति ॥ य एतदिति । पुण्यं पुण्यदम् । एतत् प्रागुक्तं पुण्यं यस्मात्तदिति समस्तं वा । पुण्यमाख्यानमिति वा समस्तम् । पुण्यापुण्यप्रापिका मा ज्ञानं यस्मात्तच्च तदाख्यानं तत् । विष्णोर्हरेर्वीर्योपबृंहितम् । वीर्येण तदादिना गुणेनोपबृंहितं पूर्णं यः कीर्तयेद्यश्च शृणुयाच्छ्रुत्वा च स्थितः स च कर्मपाशैस्तद्रूपपाशैर्विमुच्यते । समानकर्तृकयोः पूर्वकाल इति स्मरणात्स्थित इति पूरणेनान्वय इति ज्ञेयम् । यथोक्तं सुधायामानन्दमयाधिकरणे । तमात्मानं विदित्वा साक्षात्पश्यत इति शेषः । तेन समानकर्तृकता । इत्येतज्जातीयके बहुलस्थल एवमेव समानकर्तृकतानयनायासदर्शनात् । यथा मुखं व्यादाय स्वपितीत्यादावुत्तरकालेऽपि क्त्वाप्रत्ययदर्शनात्तस्य व्यभिचारो मणिकृदादीरितो न तथा क्वापि क्त्वाप्रत्ययस्यासमानकर्तृके दर्शनमिति न व्यभिचारः । नचैतच्छेषवाक्यार्थचन्द्रिकायामङ्गीकृत्य चैतदुक्तम् । वस्तुतस्तु समानकर्तृकत्वाभावे क्त्वाप्रत्ययस्य यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत इत्यादौ बहुलमुपलम्भेन तन्नियमस्यानावश्यकत्वादिति द्रष्टव्यमिति प्रोक्तेः । तथैव चाक्षरात्सम्भवतीह विश्वमित्युक्त्वा तस्माच्चाक्षरात्परतः पर इति परः प्रतीयत इति । भाष्यचन्द्रिकायामित्युक्त्वा प्रतीयत

इति भाष्ये क्रिययोः समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत इतिवद्द्रष्टव्य इत्युक्तेश्च कथं कथ्यते तन्नियम इति वाच्यम् । चन्द्रिका तु पङ्कशङ्कुः । व्याख्याता च बहुभिः । तथैतैरपि शेषवाक्यार्थचन्द्रिकाकारैः । श्रवणं प्रति पुरुषस्य मोचनं प्रति तु पापानां कर्तृत्वेन समानकर्तृकत्वाभावेन क्त्वाप्रत्ययानुपपत्तिरिति यदि तत्र श्रुत्वा स्थितश्चेति शेषपूरणेन समानकर्तृकत्वं तर्हि प्रकृतेऽपि विचार्यमाण इति शेषपूरणेन समानकर्तृकत्वमिति द्रष्टव्य इति विवृता । एतदतिलतुलव्यत्यासं श्रीसत्यानन्दश्रीपादैः विवृता एवमेव सतिशब्दमात्रव्यत्यासेनार्थव्यत्यासेन भावदीपभावरत्नकोशकम्भालूररामचन्द्रतीर्थीयसुधापरिमलेषु च क्रमात्सा ज्ञेया । तथाहि । भावदीपे इत्युक्त्वा प्रकृत उत्तरवाक्य इति योजनाच्च क्त्वाश्रुत्युपपत्तिरिति । भावरत्नकोशे यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत इतिवद्द्रष्टव्य इत्यत्र वर्तमान इत्यादिपदाध्याहारेण निर्वाह इवात्रापि वचनादित्यादिपदाध्याहारेण निर्वाहो ज्ञातव्य इति तात्पर्यमवधातव्यमिति ।

एवमेव चन्द्रिका राघवेन्द्रतीर्थीये च कम्भालूटरामचन्द्रतीर्थीये च नन्वित्यारभ्य पश्यत इत्यध्याहृतदर्शनक्रियया वेदनक्रियायाः समानकर्तृकत्वेन क्त्वाप्रत्ययोपपत्तिरित्याहेत्यन्तेनोदाहृतसुधायां तथा परिमले च समानकर्तृकयोः पूर्वकाले क्त्वेति समानकर्तृकक्रियान्तरे सत्येव पूर्वकालवाचिधातोः क्त्वाप्रत्ययविधानात्पश्यत इति क्रियान्तराध्याहारे विदित्वेति क्त्वाप्रत्यययोगस्यासाधुत्वापत्तेरिति उक्त्वेत्यनन्तरमाम्नात इति शेष इति स्वयं व्याकृत्येत्युक्त्वा द्रष्टव्य इत्यन्तं चन्द्रिकावाक्यं धृत्वाऽयमेव तदभिप्राय इति जगदुर्जगन्नाथतीर्थाः । न चेदमाश्चर्यम् । तदनुमतं न भवतामिति वाच्यम् । वयममत्सराः । तत्त्वप्रदीपे तु यत्तदद्रेश्यमग्राह्यमित्युक्त्वोत्तरत्राक्षरात्परतः पर इति वचनात्परः प्रतीयत इत्युक्तेः । न्यायविवरणे चाक्षरात्परतः परस्याप्यक्षरात्परत्ववचनादित्युक्तिश्च भाष्ये तत्पूरणेन क्त्वाप्रयोगोपपत्तिसूचिकेति ज्ञेयम् । एवमादिषु परःशतं समानकर्तृक एव क्त्वाप्रत्ययप्रयोगा इत्युक्तेः शेषवाक्यार्थचन्द्रिका हन्तैकला परप्रासङ्गिकमुखभङ्गभङ्गीतः प्रवृत्तेति लघुकल्पनम् । परैरेवमेवाङ्गीकृतमिति नास्मदुपपादनसापेक्षं तद्वचनम् । तैरेव पररीत्येति पुरुवारमुक्तेः । मुखं व्यादाय स्वपितीत्यत्रापि स्वापस्य व्यादानोत्तरमपि सत्त्वात्पूर्वकाल एव क्त्वाप्रत्ययः । यथोक्तं सिद्धान्तकौमुद्याम् । कथं मुखं व्यादाय स्वपिति । नेत्रे निमील्य हसतीति । व्यादानसम्मीलनोत्तरकालेऽपि स्वापहासयोरनुवृत्तेस्तदंशविवक्षया भविष्यति । एतत्तत्त्वसुबोधिन्याम् । श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यत इत्यादौ तु समानकर्तृकतानिर्वाहार्थं स्थितस्येत्यादि यथासम्भवमध्याहार्यमिति ॥४७॥

मन्दनन्दिनी — एतदाख्यानश्रवणकीर्तनयोः फलमाह ॥ य एतदिति ॥ वीर्योपबृंहितं पराक्रमोपबृंहितम् ॥ ४७ ॥

एतद् य आद्यपुरुषस्य मृगेन्द्रलीलां
दैत्येन्द्रयूथपवधं प्रयतः पठेत ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं
श्रुत्वानुभावमकुतोभयमेति लोकम् ॥ ४८ ॥

सत्यधर्मीया — सामान्यतो (विष्णुवीर्योपबृंहितमिति) कीर्तनीयतां श्रवणीयतां चाख्यानस्याख्याय प्रस्तुतावतारचरितं च चरितव्यं तथेति कथयति ॥ एतदिति । आद्यपुरुषस्येत्यस्य मृगेन्द्रलीलामिति समस्तमृगेन्द्रपदेन योग्यतयाऽन्वयः । पुरुषमृगेन्द्रस्य नृसिंहस्य । मृगेन्द्र इति लुप्तषष्ठीकं पदम् । कथंभूतस्य मृगेन्द्रपदस्य । आद्यपुरुषस्याद्यः पुरुषः पुरुषशब्दः यस्मिंस्तदाद्यपुरुषं तस्य । ततश्च पुरुषमृगेन्द्रलीलेति पदसम्पत्तिर्ज्ञेया । व्यासेन निर्दिशन्व्यासो नेदं कर्माधीनं जन्म किन्तु स्वच्छन्द इति ध्वनयति । नाम्नश्च मन्त्ररूपतयोपसंहारकालश्चेति रहस्यतां ज्ञापयितुं समस्य जग्राहेति तात्पर्यं च ज्ञेयम् । मोनयदासाप्रप्रक्षि, क्षिपस्वाहेत्यादिदर्शनात् । तल्लीलाविलासमालपति ॥ दैत्येति । प्रयतो नियतचेतस्कः पठेत पठेत् । सतां स्वाधस्तात्सतामकुतोभयं लोकं वैकुण्ठम् । अकुतोभयं यथा भवति तथा । लोकं लोरोचमानो यः कः सुखं तमेति प्राप्नोतीति वा । बृहद्भाष्यमादावुदाहृतमनुसन्धेयम् ॥ ४८ ॥

मन्दनन्दिनी — पाठफलमाह ॥ एतद्य इति ॥ एतदिति सामान्यम् । तस्यैव विवरणम् । मृगेन्द्रलीलां सिंहचर्याप्रतिपादकम् । दैत्येन्द्रलक्षणस्य यूथपस्य गजस्य वधप्रतिपादकम् । दैत्यात्मजस्यानुभावं माहात्म्यप्रतिपादकम् । आख्यानं यः श्रुत्वा पठेत । सोऽकुतो भयं मोक्षमेतीति योजना ॥ ४८ ॥

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियान्ति ।
एषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ४९ ॥

सत्यधर्मीया — कृष्णस्य च महात्मनः पश्यतस्ते समीयतुरित्याद्युक्तेः कृष्णचरितं भवदादिचरितं च कीर्तनीयं श्रवणीयमिति धर्मं प्रति नारद ईरयति ॥ यूयमिति । नृलोके मानवजने ज्ञानिजने वा । भूरिभागा भूरिर्भागो भागधेयं येषां ते तथा महाभाग्यशालिनः । भागो भागधेयैकदेशयोरिति विश्वः । ये लोकं पुनानाः पवित्रयन्तो मुनयः ताननतियाथातीत्य वर्तध्वे । लोकं पुनाना इति युष्मत्पदार्थविशेषणं वा । तत्र तन्त्रमाह ॥ येषामिति । मनुष्यलिङ्गं मनुजचिन्हं तत्त्वादेव गूढमप्रकाशितस्वरूपं साक्षाद्ब्रह्म । कृष्णकेशो हि यादव इत्यादेः । साक्षादधोक्षजस्वरूपम् । परं जगद्विलक्षणम् । येषां गृहान्मन्दिरमावसति । गृहाः पुंसि च भूम्न्येवेत्यमरः । उपान्वध्याङ्वस इति गृहानिति द्वितीया । इति हेतोः । बतेति तोषे विस्मये वा ॥ ४९ ॥

मन्दनन्दिनी — एवं प्रह्लादानुभवं वर्णयित्वा ततोऽप्यतिशयेन युधिष्ठिरादीन् स्तौति ॥ यूयमिति ॥ हे युधिष्ठिरादयः । यूयं भूरिभागा बहुभाग्यशालिनः तत्र निमित्तमुक्तम् । लोकं पुनाना मुनयोऽभियांति । एषां गृहानिति । एषां युष्माकम् । ते यूयं भूरिभागा इति पूर्वेणान्वयः । लोकपावनमुन्यभिगमनमेकं निमित्तम् । मुख्यं च निमित्तमाह ॥ साक्षादिति ॥ साक्षात्परब्रह्मकृष्णाख्यं मनुष्यलिङ्गं मनुष्याकारं गूढं सर्वैर्भगवत्वेनाप्रतीयमानम् । एषां गृहानावसतीति योजना ॥ ४९ ॥

स वा अयं ब्रह्म महद् विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृद् वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद् गुरुश्च ॥ ५० ॥

तात्पर्यम् — निर्वाणसुखं अशरीरसुखम् । 'एतद्वाणमवष्टभ्ये'ति श्रुतेः ॥ ५० ॥

सत्यधर्मीया — स वा अयं ब्रह्मेति श्लोके निर्वाणसुखमाधिकारिकवन्मोक्षसुखं तदनुभूतिरित्यन्यथाप्रतीतिं वारयितुं किञ्चिदनूद्य वाणशब्दः शरीरपर इति व्याख्यानस्थेम्ने श्रुतिं च पठति ॥ निर्वाणमिति । निर्गतं वाणाद्घ्राणात् । रलयोर्वबयोश्चैव खषयोर्डलयोस्तथा । वदन्ति केचित्सावर्ण्यमिति वचनात् । यत्तन्निर्वाणमशरीरसुखं स्वभिन्नप्राकृतशरीरभोग्यसुखभिन्नं तदनुभववान् ॥ तत एवं मूलविवृतिः ॥ गृहानावसतीत्युक्तं तदेवमित्याह ॥ स इति । यन्महद्भिर्मृग्यं महद्भिर्ब्रह्मादिभिर्विचार्यम् । महत् विमृग्यं चेति वा । ब्रह्म कैवल्येन स्वातन्त्र्येण यन्निर्वाणसुखमशरीरभोग्यमप्राकृतं सुखं

तस्यानुभूतिरनुभवो यस्य सः । सुखं चानुभूतिश्च यस्य स इति वा । प्रियः सुहृत् व्याख्यातं च प्राक् । मातुलेयो मातुलसुतः । मातुर्डुलजिति डुलचि मातुलस्ततः शुभ्रादिढकि चापत्येऽर्थे तस्येयादेशे मातुलेय इति ज्ञेयम् । आत्मा स्वामी । विधिकृत् आज्ञाधारकः । गुरुर्हितोपदेष्टा । अर्हणीयः पूज्यश्च । योऽयं प्रकारः खलु निषिद्धो लोके, अतुले भगवति तु मा खलु न निषिद्धः । यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्ति । अणोरणीयान्महतो महीयान् । अमध्यमो मध्यमो व्यापकोऽव्यापक इत्यादेर्वैशब्देन ग्रहः । कथं गुरुत्वादिकमेकत्र विरुद्धमित्याशङ्कायां खलु सान्त्वनमित्यप्यर्थः । खलु सान्त्वने निषेधने चेति विश्वः । ये च सवास्त्वयाऽनुष्ठिता इष्टयोऽप्यतुले यद्विषय एव स इत्यावृत्त्याऽन्वयः । विधिकृद्गुरुश्चेत्येकं पदं वा । विधिस्रष्टा विधिगुरुश्च । मा अतुले यः ये इति यथार्थक्रमं पदानीव सः वै सवा इति च पदं ज्ञेयम् । पूर्वमतुलेयोऽतुला ई संपद्रमा वा यस्यसः अतुलेरिति यः प्राप्य इत्यप्यतुलेयः । यातेः कर्मणिकः । अनन्तरमात्मभिर्भवद्भिरर्हणीयः । सभायामग्रसभाजनीयो जात इति गुरुरिति वा । मातुले शकुनौ तद्विषये यो विधिकृत् । यश्च गुरुर्भारायितो भूमेः । य आत्मार्हणी आत्मनाऽर्हणमस्यास्तीति स तथा निन्दितत्वमर्हणस्य द्योत्यते इनिप्रत्ययेन । आत्मसम्भावितः । यस्य सुहृद्धृदयम् । स्वर्थो हृत्पदार्थे न स्वर सम्बन्धः सन्नयःपदार्थे काठिण्यातिशयाधायकोऽयःपदेनान्वेति । स्वयः अत्ययःसारम् । तस्य

सुयोधनस्य खलु निषेधकः । अथवा ब्रह्मेति विशेष्यदृष्ट्या खलु । पूर्वं खलु नातिसुखं छिनत्तीति तदनन्तरमिन्द्रियाणि खानि तदुपलक्षितं शरीरं लुनातीति तत्तथेति नुपंसकतोपपत्तिर्ज्ञेयेति वा ॥ ५० ॥

मन्दनन्दिनी — परं ब्रह्म गृहानावसतां युक्तम् । तत्किमित्यत आह ॥ स वा इति ॥ यो वो युष्माकं प्रियः प्रीतिविषयः सुहृत् अत्यन्तोपकारी । आत्मा स्वामी विधिकृदाज्ञाकृत् । गुरुर्हितोपदेष्टा । स वाऽयं कृष्णः । ब्रह्म पूर्णगुणम् । महद्भिमृग्यं महद्भिर्ब्रह्मादिभिर्विमृग्यम् । अनन्यमसाधारणम् । अशरीरः स्वरूपसुखानुभवरूपमिति योजना । अत्र तात्पर्यम् ॥ निर्वाणसुखमशरीरसुखम् । एतद्बाणमवष्टभ्येति श्रुतेः ॥ एतद्बाणमित्यत्र शरीरम् । बाणशब्दप्रयोगात् । वबयोरभेदान्निर्वाणमित्यस्याशरीरमिति व्याख्यानं युक्तम् ॥ ५० ॥

न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ५१ ॥

सत्यधर्मीया — प्रसादे सति किञ्चिन्निरूपयितुं शक्यमशक्यनिरूपणत्ववादः साकल्येन निरूपणाविषयत्वपरो वा प्रसन्नतादौ तदगोचरत्वपरो वाऽवसेय इति भावमावेदयितुं स्वपरसाधारण्येन प्रसत्तिमाशासनो नारद ईरयति ॥ नेति । यस्य रूपं भवपद्मजादिभिर्भवो रुद्रः पद्मजो ब्रह्मा तावादी येषां तैः । धिया करणेन । वस्तुतया स्वस्थितिमर्यादया साकल्येनेति यावत् । नोपवर्णितम् । तत्कथं सुवर्णगर्भादिवर्णनमित्यतो वर्णयति ॥ साक्षादिति । स्वयोग्यतातौल्येन वर्णितमित्यर्थः । अत्र पद्मभवादपि भवपुरस्कृतिरुत्तरत्र वक्ष्यमाणकथोपयोक्ष्यमाणत्वेनेति मन्तव्यम् । साक्षाद्भवो विराट्शरीरभवः । स्वयम्भूः पद्मभवश्चैक इति तद्रूपद्वन्द्वम् । आदिर्येषां पुरहरादीनामिति तैः । अवतारमात्रमवनौ नास्त्यस्ति तु त्वेवं बाहुरूप्यं विधेरिति वक्ष्यमाणवत्सीभवनासम्भावनापरिहारार्थमुक्तमिति मन्तव्यम् । अवस्तुतयाऽशक्तत्वेन नोपवर्णितं किन्तु वस्तुतया शक्ततया वर्णितमिति । अवस्त्वशक्तमुद्दिष्टं वस्तु शक्तमितीर्यत इति तात्पर्यान्तरात् । मौनेन भक्त्योपशमेनेति गतम् । पूजितः । य एष सात्वतां भक्तानां यादवानां वा पतिर्मूलकृष्णोऽयं कृष्णो वा प्रसीदतां प्रसीदतु ॥ ५१ ॥

मन्दनन्दिनी — एवं युधिष्ठिरादीनुक्त्वा स्वयं कृष्णप्रसादं प्रार्थयते ॥ न यस्येति ॥ यस्य रूपं साक्षाद्धिया साक्षात्कारणविषयीकृत्य भवपद्मजादिभिर्वस्तुतया साकल्येन नोपवर्णितम् । मौनेन मननेन भक्त्योपशमेन ध्यानेन पूजितश्च यः स सात्वतां पतिः कृष्णः प्रसीदतामिति योजना ॥ ५१ ॥

(मन्दनन्दिनीरीत्या अत्रैव दशमाध्यायसमाप्तिः ।)

नारद उवाच–

स एष भगवान् राजन् व्यतनोद् विततं यशः ।
पुरा रुद्रस्य देवस्य मयेनानन्तमायिना ॥ ५२ ॥

तात्पर्यम् — तदधीनं वा सर्वं न वेति संशयं रुद्रस्याहनत् । अल्पकेनैव मयेन रुद्रस्य प्रतीकारं कृत्वा ॥ ५२ ॥

सत्यधर्मीया — क्वचिदेतत्पद्य एवाध्यायसमापनं दृश्यते । न साम्प्रदायिकम् । मूलतात्पर्यकोशेषु न समर्थ इत्युत्तरमेवाध्यायावसित्यध्यवसायात् । तात्पर्यव्याख्यातृभिरिव परकीयेणाप्यपरं वदाम किमिति श्लोकान्त एव विरमितत्वात् । स एष भगवान्राजन्निति श्लोके स एव भगवान् रुद्रस्य विततं यशः । पुरा व्यतनोदित्येतन्मात्रेण पूर्तौ यन्मयेनेत्यादि तदसङ्गतमिव व्यर्थम् । न हि हरिणा रचितकीर्तिविततौ मयो हेतुः । प्रश्नवाक्प्रातिकूल्यादित्यत उपयुक्तमध्याहृत्य सम्भवद्योजनां दर्शयति ॥ तदिति । तदधीनं विष्ण्वधीनं सर्वं वा नवेति रुद्रस्य संशयं व्यहन् हरिरिति शेषः । तत्र निमित्तमाह ॥ अल्पकेनेति । अल्पशब्दादल्पार्थे कप्रत्ययेन रुद्रस्य कर्मणि प्रतीकारमभीप्सितासिद्ध्या मानहानिं कृत्वा कारयित्वा । कृत्वा विवाहं तु कुरुप्रवीरा इत्यादिवदियती शक्तिर्नास्य मयस्य किन्त्वश्विर इतरोऽस्ति नैवाहमवमानित इति संशयनाशो भूतपतेरभूदित्याशयः ॥ ततश्चायं मूलार्थः ॥ भवपद्मजादिभिरिति प्रसक्तोऽपि स्वसंशयनिवृत्तिमेवमाप श्रीपेन पार्वतीपतिरिति कयाचिदाख्यायिकयाऽऽख्याति ॥ स इति । देवस्य रुद्रस्य । पुरा कल्पान्तरे । अनन्तमायिनाऽनन्ता इतराप्रतिबद्धाः (इतराप्रसिद्धाः खपाठः) माया अस्य सन्तीति स तथा तेन मयेन । असुरतक्ष्णा वक्ष्यमाणप्रतीकारं कारयित्वा । वक्ष्यमाणप्रकारेणैतत्स्थाण्वाननेन ता विनाश्यास्य यशो विततमचीकरद्यः स हरिरेष मातुलेय इत्यर्थः । अति अदि बन्धन इति धातुव्याख्यानादन्ताः प्रतिबद्धा न भवन्तीति तास्तथा । अन्यथा मयमायानां सङ्ख्याविशेषाभिधायकसमयविशेषविरोधापत्तेः । बह्वर्थको वाऽनन्तशब्दः । ता अपि हर्यायत्ता इति द्योतयितुमनन्तेत्युदितमिति ज्ञेयम् । अनन्तस्य तत्सम्बन्धिन्यो माया अस्य सन्तीति स तथा तेन ॥ ५२ ॥

मन्दनन्दिनी — अस्मिन्नध्याये प्रह्लादे कृतनृसिंहानुग्रहप्रसङ्गान्महोपासके रुद्रेऽपि तत्कृतोऽनिष्टनिवर्तकत्वत्रिपुरारित्वादिकीर्तिसम्पादकत्वरूपोऽनुग्रहो वर्ण्यते । (अत्र एतद्व्याख्यानरीत्या अध्यायान्तरमेतत् । परं सत्यधर्मीयरीत्या दशमाध्याय एव । तदनुसारितया परिगणितः) अत्रेदं पुरावृत्तमनुसन्धेयम् । भगवदुपोद्बलितैर्देवैर्निर्जितैरसुरैर्मयं शरणमुपेत्य तन्निर्मितपुरत्रयमवष्टभ्य स्थितैर्देवेष्वेको रुद्रो न द्वितीयोऽवतस्थे इत्यादि वाक्यतात्पर्यमजानद्भिर्मन्दजनैरीशानः सर्वविद्यानामीश्वरः सर्वभूतानामित्यादिमन्त्रैः स्तूयमानेऽसुरावेश वशाज्जगद्विष्ण्वधीनं न वेति संशया वै रुद्रे संशयमकर्तुं

त्रिपुरारित्वादिकीर्तिं चाहर्तुं वेदचतुष्टयरूपाश्वपृथिवीरूपरथमेकरूपचापस्वरूप शरादिरूपपरिकरयुक्तं रुद्रं रथिकं कृत्वा रुद्रेण दैत्येषु जितेषु पुनर्मयेन रसहृदेनोज्जीवितेषु किं मया कार्यमिति विषण्णो, मदधीनं न किमपि सर्वं विष्ण्वधीनमेवेति विष्णुं प्रपन्ने ब्रह्मणोऽपि रुद्रादुत्तमत्वं ज्ञापयितुं ब्रह्माणं वत्सं कृत्वा स्वयं गोरूपेण गत्वा रसहृदं वत्सेन सह निस्तुषं पीत्वा रुद्रं स्वयमुपोद्धल्य भूमौ पातितं रथं हरिवंशोक्तरीत्या महावृषभरूपेण विषाणद्वयेनोर्ध्वमुन्नमय्य शरे तेजनरूपेण स्वयमेव स्थित्वा सर्वानसुरानुन्मूल्य त्रिपुरारित्वकीर्तिं रुद्रे सम्पादयामासेति । इदं च तेषामसुराणां तिस्रः पुर आसन्नित्यादि तैत्तरीयश्रुत्यादिभिः प्रमितम् । विशेषजिज्ञासायै सामान्यतः प्रस्तापयति नारदः ॥ स एष इति ॥ अस्मिंल्लोके मयेनानन्तमायिनेत्यनन्वितम् । अतः किंचिदध्याहार्यम् । तच्च तात्पर्ये उक्तम् ॥ तदधीनं वा सर्वं नेति संशयं रुद्रस्याहनत् । अल्पकेनैव मयेन रुद्रस्य प्रतीकारं कृत्वेति ॥ तथा चैवं योजना । हे राजन् । अनन्तमायिना । अनन्तपदं बहुपरम् । एकशतसहस्रमायावताररुद्रस्य प्रतीतमालंब्यानन्तपदम् । वस्तुतस्त्वल्पकेनैव मयेन प्रतीपं कृत्वा कारयित्वा । करणमपि भगवदधीनमिति द्योतनाय णिचोऽप्रयोगः । तदधीनं विष्ण्वधीनं सर्वं न वेति संशयं न्यहनत् । शपो लुगभावः । छान्दसत्वात् । अनन्तरं स एष भगवान् रुद्रस्य विततं यशो व्यतनोदिति ॥ ५२ ॥

राजोवाच–

कस्मिन् कर्मणि देवस्य यशोऽभूज्जगदीशितुः ।
यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ॥ ५३ ॥

तात्पर्यम् —– कस्मिन्कर्मणि मयो विपरीतं चकार ॥ ५३ ॥

सत्यधर्मीया —– कस्मिन्कर्माणीति श्लोके क्रियाद्यप्रतीतेरध्याहृतक्रियाकर्मसम्बन्धं प्रदर्शयति ॥ कस्मिन्निति । कस्मिन्कर्मणि मयो विपरितं चकारेति धर्मप्रश्नः सम्भवतीति नासङ्गतिः । न च साकाङ्क्षस्य वाक्याभासस्याप्रतिपादकत्वादिति सुधोक्तेरस्य तथात्वाच्छेषस्य चाप्रामाणिकत्वादि- त्याशङ्क्याह ॥ सापेक्षमिति । सिद्धं प्रमाणतो यत्रापेक्षितं तत्र सापेक्ष्यं सापेक्षता दोषाय न भवति । केचिद्वत्स आसीत्तदा ब्रह्मेति श्लोके तात्पर्यमेतद्योजयन्ति । तत्तच्छ्लोकव्याकृतिदशायां विशदयामः । यत्रानवसरोऽन्यत्रेत्यादेः । व्यतिहारो विशिंषन्ति हीतरवदिति भगवद्वचनाच्च । शब्दनिर्णय इति शब्दनिर्णयाय प्रवृत्तस्यास्येदमर्थतायामृजुत्वाच्च । उत्तरत्र वाऽत्र वैतदपवदनीयशङ्कायास्तात्पर्य उक्तत्वाच्च ॥ ततश्चायं श्लोकार्थः ॥ देवस्य वामदेवस्य यस्मिन्कर्मणि मयः प्रतीकारं चकार यशश्च कथमह्ना- शयामास । जगदीशितुः सदाशिवस्य कीर्तिरनेन कृष्णेन कथमुपचिताऽभिवृद्धा च तत्कथ्यतां मां प्रति त्वयेति शेषः ॥ ५३ ॥

मन्दनन्दिनी — विशेषतः पृच्छति राजा ।। कस्मिन्निति ।। अत्रापि कर्मणीति सप्तम्यंतपद-मनन्वितमिति । अतः किंचिदध्याहार्यम् । तच्च प्रदर्शितं तात्पर्ये ।। कस्मिन्कर्मणि मयो विपरीतं चकारेति। तथा चैवं योजना । कस्मिन्कर्मणि मयो विपरीतं रुद्रकार्यविरोधि चकार । येन जगदीशितुर्देवस्य महादेवस्य यश उपचितमिति भावः । पुनश्चानेन कृष्णेन नारायणेन यथोपचिता च कीर्तिस्तत्कथ्यतामिति । पूर्वोक्तश्लोके मय इत्यादि न श्रुतमित्यतः सापेक्षत्वदोष इत्यतस्तात्पर्यम् ।। सापेक्षं न तु दोषाय यत्र सिद्धमपेक्षितमिति शब्दनिर्णये ।। सिद्धं प्रमाणेन लोकन्यायेन वा । द्वारमित्यादौ लोकन्यायेनात्र पूर्ववाक्यादिबलेन प्रमाणान्तरेण चेति ज्ञेयम् ।। ५३ ।।

नारद उवाच–

निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ।
मायिनां परमाचार्यं मयं शरणमाययुः ।। ५४ ।।

सत्यधर्मीया — उत्तरत्र नारदः किं चकारेत्यत उत्तरयतीतीरयति ।। नारद इति । अनेन विष्णुना । एतेनेत्याद्यवचनेनैवंवचनेनानेनेनेति प्राणेन चेत्यपि तदर्थं सूचयामासेत्यवसेयम् । युधि युद्धे मायिनां शिखादिः । परमाचार्यं मुख्यगुरुं मयं शरणमाययुरागच्छन् ।। ५४ ।।

मन्दनन्दिनी — पृष्टं स्पष्टमाह ।। निर्जिता इत्यादिना । युधि युद्धेऽनेन भगवतोप-बृंहितैरुपोद्बलितैः । अत्र देवानां विष्णुसापेक्षत्वं न दोषः । तस्य सर्वकार्येष्वपि सिद्धत्वात् । एतदभिप्रायेणापि सापेक्षमित्यादिना तात्पर्यं योजनीयम् । परमाचार्यमुत्तमं तक्षम् ।। ५४ ।।

स निर्ममे पुरस्तिस्रो हैमरौप्यायसीर्विभुः ।
दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ।। ५५ ।।

सत्यधर्मीया — स मयः । हैमी च रौप्यी च आयसी चेति हैमरूप्यायस्यः । तास्तिस्रः पुरो निर्ममे । त्रिपुरं पुरुषव्याघ्रमहद्वायुसमीरितम् । प्रकारेण प्रवृद्धेन काञ्चनेन विराजता । मणिभिश्च प्रकाशद्भिः सर्वरत्नैश्च तोरणैः । वाजिनः पक्षसंयुक्ता वहन्ति बलदर्पिता इत्यादिना हरिवंशे शंसितो विशेषोऽप्यवसेयः । दुर्लक्ष्यापायसंयोगा दुर्लक्ष्यो योऽपायस्याप्ययसाधनस्य संयोगः सम्बन्धो यासां ताः । यद्वा अपायश्च विश्लेषश्च संयोगश्च पुनरेकीभवनं चेति अपायसंयोगौ । दुर्लक्ष्यौ अपायसंयोगौ यासां तास्तथा । दुर्वितर्क्यास्तर्कयितुं दुस्साधाः परिच्छदा यानादिपरिकरा यासां ताः । यो विभुः पूर्वं देवोज्जृम्भकस्तस्मिन्निदानीं निर्ममे । मम निर्गतो हि निर्ममस्तस्मिन्देवेषूदासीनतयाऽऽसीन इति यावदिति चान्वयः । अन्यथा पुरां निर्माणं दुश्शकमिति भावः ।। ५५ ।।

मन्दनन्दिनी — हैमरौप्यायसीः । अत एवोक्तं तैत्तरीयेऽपि । अयस्मय्यवमाथरजताथहरिणीति । दुर्लक्ष्यावपायसंयोगौ यासां ता तत्क्षणादेवागच्छति । अपगच्छति चेति । अगमाविगमौ दुर्लक्ष्या-वित्यर्थः । दुर्वितर्क्या इयन्त इति परिच्छेत्तुमशक्याः परिच्छदा युद्धसामग्र्यो यासु ताः ॥ ५५ ॥

ताभिस्तेऽसुरसेनान्यो लोकान् त्रीन् सेश्वरान् नृप ।
स्मरन्तो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५६ ॥

सत्यधर्मीया — तन्माहात्म्यमाह ॥ ताभिरिति । ताभिः पूर्भिस्तेऽसुरसेनान्यो दैत्यसेनानायकाः । सेना नयन्तीति सेनान्यः । सत्सूद्विषेति क्विप् । एरनेकाच इति यण् । सेनानीः स्यात्पुमान्कार्तिकेये सेनापतौ पुमानिति भानुः । पूर्ववैरं स्मरन्तः । सेश्वरांस्त्रीन् लोकान्नाशयाञ्चक्रुः । पदद्वयं परं त्वनन्तरम् । अत एव तं यातयां प्रथमासेत्याद्युक्त्यपभ्रंशतोक्तिरिति ज्ञेयम् । कृन्मेजन्तः इति सूत्रभाष्यपर्यालोचनया तथाऽवगतेः । अलक्षिता मयमायामाहात्म्यात् (इदं वाक्यं रवकोशे नास्ति) ॥ ५६ ॥

मन्दनन्दिनी — ताभिः पूर्भिः । असुरसेनान्योऽसुरसेनानायकाः पूर्वं वैरं स्मरन्तः । अलक्षिता अदृश्याः सन्तः । त्रीन् लोकान्नाशयांचक्रुरिति योजना ॥ ५६ ॥

ततस्ते सेश्वरा लोका उपासाद्येश्वरं ततः ।
त्राहि नस्तावकान् देव विनष्टान् त्रिपुरालयैः ॥ ५७ ॥

सत्यधर्मीया — सेश्वराः सहेन्द्रा जनाः । ततस्तदनन्तरम् । महेश्वरमिति वा विभो इति पाठौ सरलौ । ततस्तत इति न विततः । स्तावकान्स्तोतॄन् । तावकान् गतम् । त्वत्सम्बन्धिनः । नस्त्रिपुरालयैर्विनष्टांस्तत्प्रायांस्त्राहि त्रायस्व । अथवा मित्रपदनिर्वचनपरे ऋग्भाष्ये मित्वा त्रातीत्युक्तम् । प्रकृत्यन्तरस्येदं रूपमिति टीका । तद्विवृतौ त्रैङ् पालन इत्यस्य ङित्वादनुदात्तङित आत्मने पदमित्यात्मनेपदे शपोकारे च परत अयादेशे च त्रायत इति रूपेण भवितव्यम् । त्रातीति रूपं तु कथमित्यत आह ॥ प्रकृत्यन्तरस्येति । त्रैङः कर्तरि क्विपि कृते आदेच इत्यात्वे च निष्पन्नात् त्राशब्दात्सर्वप्रातिपदिकेभ्यः क्विब्वाचार इति त्रा इवाचरतीत्यर्थे क्विपि सनाद्यन्ता इति धातुसंज्ञायां तस्मात्तिपि कृते सुब्धातुरूपप्रकृत्या इतरस्य त्रातीति रूपमिति भावः । अत एव प्रक्रियाकौमुदीव्याख्याने प्रसादे कृष्णपण्डितीये च चक्रिंस्त्राहीत्येतद्व्याख्यानावसरे त्रायत इति त्रास्तद्वदाचरति सर्वप्रातिपदिकेभ्यः क्विबाचार इति क्विप् । सनाद्यन्त इति धातुत्वाल्लोण्मध्यमैकवचनं हिरित्युक्तम् । त्रा इवाचरतीत्युक्ते यथा लौकिको रक्षकोऽन्नादिकं दत्वा रक्षति तथा भगवानपि रक्षतीति रक्षकत्वस्य लाभादेवं व्याख्याने रक्षकत्वालाभ इति चोद्यं निरस्तम् । अत एव त्रा रक्षण

इत्याकारान्तधात्वन्तरं परिकल्प्य तस्मात्त्रातीत्यादिरूपमिति ये वदन्ति ते परास्ता भवन्ति । भीमसेनधातुपाठे कविकल्पद्रुमे चानुक्तस्य धात्वन्तरस्य कल्पनाया जघन्यत्वात् । धात्वन्तरस्य टीकाकारासम्मतत्वाच्च । ये शुभ्रा घोरवर्पसः सुक्षत्रास इत्येतद्व्याख्यावसरे क्षं क्षेत्रं तस्मिन्नुपपदे त्रायतेरातोनुपसर्गे क इति वाक्यपर्यालोचनया ज्ञायते । धात्वन्तरस्य सम्मतत्वे हि त्रातेरित्येव ब्रूयान्न तु त्रायतेरिति । त्रायतेः खलु कप्रत्ययः । आदेच उपदेशे शितिप्रत्यये विवक्षित आत्वं कृत्वा कर्तव्य इति गौरवात् । त्रातेस्तु तथा नेति लाघवात् । त्रैङपेक्षया सुब्धातोः प्रकृत्यन्तरत्वेन प्रकृत्यन्तरस्येत्युपपत्तेः ।

न च वाच्यं त्रा इति धात्वन्तरस्याकल्पनायां मां त्राहीत्यादिप्रयोगानुपपत्तिः । आचारार्थकक्विबन्तस्याकर्मकत्वादिति स्तम्भति कुम्भतीत्यादौ स्तम्भादिवत्तूष्णीम्भावस्यैव तद्वदाचरणत्वेन विवक्षिततया तस्याकर्मकत्वेऽपि त्राहीत्यत्र रक्षणस्यैवाचारार्थक्विबन्तेन विवक्षिततया त्राहीत्यस्य त्रावद्रक्षयेत्यर्थपरत्वेन सकर्मकतया मां त्राहीत्यादिप्रयोगोपपत्तेः । न हि धातुरेकत्राकर्मक इत्येतावताऽर्थान्तरेऽप्यकर्मको भवति । तथा सति समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य इत्यत्राकर्मकादिति वर्तत इति काशिकोक्तेर्गम्यादेरकर्मकत्वेन ग्रामं गच्छतीत्यादावकर्मकत्वप्रसङ्गात् । वहन्ति नद्य इत्यत्र वहेः स्यन्दनेऽकर्मकत्वेन वहति भारमित्यत्र प्रापणेऽप्यकर्मकत्वप्रसङ्गाच्च । यदि च तत्र तत्तदर्थविवक्षया सकर्मकत्वाकर्मकत्वव्यवस्था तदा प्रकृतेऽपि तुल्यम् । उक्तं चैतत्पदमञ्जर्याम् । धातोरर्थान्तरे वृत्तिरित्यादिना । तदेतत्सर्वमभिप्रेत्य कृष्णपण्डितीये त्राहीत्येत्सुब्धातुरूपमित्युक्त्वा एवं च मां त्राहि संसारभुजङ्गदष्टं त्राहि नः शरणापन्नानित्यादिप्रयोगोपपत्तिरित्याद्युक्तेस्त्रा इवाचरति त्राहीत्यत्रापि तदाचरणं च रक्षणादिप्रयुक्तस्य सुखादेर्लोकरक्षकवदभावाद्वा भगवदायत्तरक्षणादिकर्तृत्वेन वा शिवस्येति ज्ञेयम् । मनोरमायामपि चक्रिंस्त्रायस्वेति । यत्तु प्राचा त्राहीत्युक्तं तत्र परस्मैपदमयुक्तम् । त्रायतेर्ङित्वात् । त्रायत इति त्राः । स इवाचरतीत्यर्थे कर्तरि क्विबन्तादाचारक्विपि वा बोध्यमित्युक्तेः । आचारक्विपि वेति । नामधातौ मूलधात्वादेर्ङित्वाद्याश्रित्यानुदात्तङित इत्यादेः प्रवृत्तिर्नेत्यभिमानः । अत एव त्राहि मां पुण्डरीकाक्षेति सङ्गच्छत इति भाव इति शब्दरत्नोक्तेः ।। ५७ ।।

मन्दनन्दिनी — सेश्वरा रुद्रसहिता ईश्वरं भगवन्तं नोऽस्मान् तावकांस्त्वद्दासान् त्रिपुरालयैरसुरैः ।। ५७ ।।

अथानुगृह्य भगवान् मा भैष्टेति सुरान् विभुः ।
शरं धनुषि सन्धाय पुर्यामस्त्रं व्यमुञ्चत ।। ५८ ।।

सत्यधर्मीया — अनुगृह्यानुग्रहं कृत्वा मा भैष्ट भयं नावाप्नुत । मा भैष्टेति पदद्वयम् । इति सुरान्प्रत्युक्त्वा मा भैष्टेत्यनुगृह्येत्यन्वयः । स चानुग्रहो वचनादिरूपो भवतीति नोक्त्वेत्यध्याहार इति

वा । पुर्यां प्रातिस्विकतयाऽस्त्रमोचनादेकवचनोपपत्तिर्ज्ञेया । यद्वा अखण्डा पूरेका । तत्र हैमेत्याद्युक्ता अवान्तरा पुर इत्येकवचनं सम्भवीति ॥ ५८ ॥

मन्दनन्दिनी — भगवान्विष्णुः शरं सन्धायास्त्रमभिमन्त्रितं शरं व्यमुञ्चत । अत्र सन्धाय व्यमुञ्चतेति अन्तर्णीतण्यन्तम् । सन्धाय व्यमुञ्चयदित्यर्थः ॥ तथा हि तैत्तरीये ॥ त इष समकुर्वत । अग्निमनीकं सोम शल्यं विष्णु ते जनमिति ॥ ५८ ॥

ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् ।
यथा मयूखसन्दोहा नादृश्यन्त पुरो यतः ॥ ५९ ॥

सत्यधर्मीया — सूर्यमण्डलान्मयूखसन्दोहाः किरणसङ्घा उत्पतन्ति तथाऽग्निवर्णा बाणा उत्पेतुर्धनुर्मण्डलात् । यतो बाणसङ्घतः । पुरस्त्रिस्रो नादृश्यन्त । मयूखः करतेजसोरिति विश्वः ॥ ५९ ॥

मन्दनन्दिनी — सूर्यमण्डलात् यथा मयूखसन्दोहास्तथा ततो धनुष उत्पेतुर्यतो यैः शरैः पुरः पुराणि नादृश्यन्तेति योजना ॥ ५९ ॥

तैः सृष्टा व्यसवः सर्वे निपेतुस्त्रिपुरौकसः ।
तानानीय महायोगैर्मयः कूपरसेऽक्षिपत् ॥ ६० ॥

सत्यधर्मीया — तैर्बाणैस्तान्मृतान् । तदक्रमं वक्तुमुपक्रमते ॥ मय इति ॥ ६० ॥

मन्दनन्दिनी — तैः शरैः स्पृष्टाः सम्बद्धाः । व्यसवो गतप्राणास्तान्व्यसून् कूपरसे कूपे परिपूर्णमृतसंजीवनरसे ॥ ६० ॥

सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ।
उत्तस्थुर्मेघदलनाद् वैद्युता इव वह्नयः ॥ ६१ ॥

सत्यधर्मीया — सिद्धामृतरसो मृतसञ्जीवनरसः । मेघदलनात् मेघमण्डलान्तर्भेदं कृत्वा । पटलादिति पाठे समूहादित्यर्थः । वैद्युता विद्युत्सम्बन्धिनो वह्नयो यथा तथोत्तस्थुः: ॥ ६१ ॥

मन्दनन्दिनी — सिद्धामृतरसनस्पृष्टा मृतसंजीवनरसस्नाता वज्रसारा दृढदेहा वैद्युता इव वह्नयोऽशनयः ॥ ६१ ॥

विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् ।
तदाऽयं भगवान् विष्णुस्तत्रोपायमकल्पयत् ॥ ६२ ॥

सत्यधर्मीया — यशोनाश ईशस्यात आसीदिति शंसति ।। भग्नसङ्कल्पमिति । तत्र तद्यशोविषये । तं त्रायत इति तत्रः । स चासावुपायश्च तमिति वा ।। ६२ ।।

मन्दनन्दिनी — इदमेव मयकृतं विपरीतं कृष्णेन कृतमुपचयं वक्तुमाह ।। विलोक्येति ।। विमनस्कमुपायानभिज्ञम् ।। ६२ ।।

वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।
प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ।। ६३ ।।

तात्पर्यम् — 'सापेक्षं न तु दोषाय यत्र सिद्धमपेक्षितमि'ति शब्दनिर्णये ।। ६३ ।।

सत्यधर्मीया — ब्रह्मणो वत्सत्वेन जातस्यैतत्कार्यसहायत्वेनापेक्षण ईश्वरस्य सापेक्षता या सा च न सम्भवति भगवतः स्वतन्त्रस्येत्यत आह ।। सापेक्षमिति । सिद्धं प्रमाणतोऽनुत्तमत्त्वेन तदस्वतन्त्रं वस्त्वपेक्षितं चेददो न सापेक्ष्यं दोषायास्वातन्त्र्यादिदोषाय भवतीत्यर्थ इत्याहुः ।। ततश्चायं मूलार्थः ।। विना तदमृतरसशोषणं तत्प्रमोष एतत्तोषश्च न भविष्यत इति तद्यत्नमचरद्रमेश इत्याह ।। वत्स इति । अयं विष्णुः स्वयं गौः सुरभिरभवत् । ब्रह्मा वत्स आसीत् । यद्यपि विना वत्सं गवैवैकलया पातुं शक्यं तथाप्यन्तरङ्गत्वाद्भवस्य तदुद्भवत्वात् (''अन्तरङ्गत्वात् भवत्वात् तस्य स्वसुतत्वात्'' इति खपाठः) तात्कालिकेन तर्णकेन सहागतेरपि तन्मोहनाङ्गत्वाच्च । गोः सर्वैः सर्वथाऽश्ननीयत्वेन निवारणं न भवेदिति च तथागमनमिति मन्तव्यम् । त्रिपुरम् । ऋक्पुरब्धूरित्यप्रत्ययान्तः शब्दः । काले मध्यान्हे । रसकूपामृतं रसकूपे सदमृतं पपौ पीतवान् ।। ६३ ।।

मन्दनन्दिनी — अयं विष्णुः स्वयं गौरिति योजना । काले मध्यन्दिने ।। ६३ ।।

तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन् विमोहिताः ।
तद् विज्ञाय महायोगी रसपालानिदं जगौ ।
स्मयन् विशोकः शोकार्तान् स्मरन् दैवगतिं च ताम् ।। ६४ ।।

सत्यधर्मीया — किं तदावका वा दौवारिका वा कुतो न न्यवारयन्न च तत्र तदस्थापनं युक्तिमत् । लोकोत्तरत्वाद्रसस्येत्यवश्यमव्यत्वाद्रसपालानिदं जगावित्युत्तरत्र वक्ष्यमाणत्वादित्यतो मयमायातो हरिमाया महतीत्थमभूदित्याह ।। त इति । तेऽसुराः पश्यन्तोऽपि विमोहिताः सन्तो न न्यषेधन् । न पिबेति न घटाच्चक्रुः । तत् दानवहानिहेतुहरिव्यापारं विज्ञाय ज्ञात्वा । ज्ञानासाम्भवित्यं मयस्यावमानयति ।। महायोगीति । तां दैवगतिं दैवविपर्यासं हरिव्यापारं वा स्मरन्नत एव स्वयं विशोकः शोकरहितः ।

(''उभयत्रापि स्मरन्नितिपाठे विमोहिता इति स्मरन् इत्यन्वयेन न वैयर्थ्यं स्मरन्नित्यस्य द्वितीयस्येति ज्ञेयम् ।'' इत्यधिकः पठ्यते रवकोशे ।) ज्ञानहीनत्वेन शोकार्तान् रसपालानिदं वक्ष्यमाणं जगावूचे ॥ ॥ ६४ ॥

मन्दनन्दिनी — भगवता विमोहिताः पश्यंतोऽप्यसुरा न न्यषेधन् । महायोगी मयः । इदं वक्ष्यमाणम् ॥ तदेवाह ॥ स्मरन्निति ॥ शोकार्तानसुरान्स्मरन् पूर्वमसुराणां जयदायिनीमिदानीं विपरीतां दैवगतिम् ॥ ६४ ॥

देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ।
आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ॥ ६५ ॥

तात्पर्यम् — विष्णुनाऽऽदिष्टं व्यपोहितुं देवोऽसुरोऽन्यो वा न समर्थः ॥ ६५ ॥

इति सप्तमतात्पर्ये दशमोऽध्यायः ॥ १० ॥

सत्यधर्मीया — दिष्टं दैवम् । दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यभिधानम् । दैवेन व्यपोहितुं तिरस्कर्तुं कः समर्थ इत्यन्वयार्थभ्रमं भ्रंशयति ॥ विष्णुनेति । दैवेनेत्यर्थो विष्णुनेति । आदिष्टमाज्ञप्तम् । क्लृप्तमिति यावत् । देवोऽसुरो नरो मानवो अन्यो वा रक्षआदिर्व्यपोहितुमन्यथयितुम् । ईश्वर इत्यस्यार्थः समर्थ इति । न समर्थ इत्यर्थः ॥ ततश्चायं मूलार्थः ॥ इह जीवकोटावात्मनः स्वस्यान्यस्येतरस्येति द्वयोर्दैवेन तदुपबर्हकेण हरिणाऽऽदिष्टं क्लृप्तमपोहितुं देवोऽसुरोऽन्यो वा कश्चन नेश्वरो न समर्थः । स्वस्य महायोगित्वाद्विष्णुरयं गोरूपीति ज्ञानित्वेऽपि रसपालादीन्प्रति लौकिकाः सदैव दैवोपरि निहितनैर्भर्या इति बहिरेवमुक्तिरिति मन्तव्यम् । कार्यमतीतं ममोपायोऽपायापयापने नास्तीति जगाविति तात्पर्यम् ॥ ६५ ॥

मन्दनन्दिनी — दैवेन विष्णुना दिष्टं प्रापितं फलं स्वस्य वाऽन्यस्य वेति द्वयोरपि व्यपोहितुं निराकर्तुं देवोऽसुरो नरोऽन्यो वा यक्षादिः कश्चन कोऽपि नेश्वरो न समर्थ इति योजना ॥ अत्र तात्पर्यम् ॥ विष्णुनेत्यादि ॥ ६५ ॥

अथासौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात् ।
धर्मज्ञानविरक्त्यादितपोविद्याक्रियादिभिः ॥ ६६ ॥

सत्यधर्मीया — सौरभेय्या रसास्वादनेन रसनामात्रं मधुरिपुणा मधुरीकृतं न नेशुस्तानि पुराणीव नेशोऽपि यश आपेत्यत आह ॥ अथेति । अथामृतरसपानानन्तरमसौ श्रीहरिः स्वाभिः स्वाधीनाभिः

शक्तिभिः । शम्भो रुद्रस्य प्राधनिकं प्रधनं युद्धम् । प्रधनं दारुणे रण इति विश्वः । प्रधने भवं प्राधनिकमध्यात्मादि ठञ् । प्राधानिकमितिपाठे अनुशतिकादीनां चेति उभयपदवृद्धिः । आयोधनसाधनमायुधादिकं व्यधात् व्यधत्त । ताः शक्तयः किंरूपा इत्यतो वक्ति ॥ धर्मेति । विरक्तिरादिर्यस्य तपसस्तद्धिरक्त्यादि तच्च तत्तपश्च विद्या च क्रिया च ता आदयो यासां तास्ताभिस्तपसो विरक्तिकारणकस्योक्तावर्थाद्धिरक्तिरप्युक्तेति न तदनुक्तिर्न्यूनतेति ज्ञातव्यम् । विरक्तिशब्दस्यावृत्तिमाश्रित्य विरक्तिश्च तदादितपश्चेति वा ॥ ६६ ॥

मन्दनन्दिनी — रसपानानन्तरं भगवत्कृतमाह ॥ अथेति ॥ असौ भगवान् रुद्रकृतैर्धर्मादिभिस्तज्जनितपुण्यैरुपोद्बलिताभिः शक्यन्त इति शक्तिभिः रथधनुरादिभूमिमेर्वादिभिः शम्भोः प्राधानिकं युद्धसाधनं व्यधादिति योजना ॥ ६६ ॥

रथं सूतं ध्वजं वाहं धनुर्वर्म शरादि यत् ।
सन्नद्धो रथमास्थाय सशरं धनुराददे ॥ ६७ ॥

सत्यधर्मीया — प्राधनिकं किमाकारमित्यत ईरयति ॥ रथमिति । ते यूयं मे रथं चैव धनुर्बाणं तथैव च । पश्यध्वं यावदद्यैतान्पातयामि महीतले । मूर्तीः सर्वाः समाधाय त्रैलोक्यस्य ततस्ततः । रथं ते कल्पयिष्याम इत्यारभ्य हसन्निवाब्रवीद्देवान्सारथिः को भविष्यति । तमब्रुवन्देवगणा यं भवान्सन्नियोक्ष्यति । स भविष्यति देवेश सारथिस्ते न संशयः । तानब्रवीत्पुनर्देवो मत्तः श्रेष्ठतरो हि यः । तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य माचिरम् । गत्वा पितामहं देवा इत्यादिगर्भीकृत्य तत्रापि ततः स भगवान्देवो लोकस्रष्टा पितामहः । सारथ्ये कल्पितो देवैरित्याद्यपि गर्भीकृत्य ततो नारायणस्तस्माच्छरभागाद्विनिस्सृता इत्यादिना तद्धननादिकं चोक्त्वा यथैव भगवान्ब्रह्मा लोकधाता पितामहः । सारथ्यमकरोत्तत्र रुद्रस्य परमोऽव्ययः । तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः । संयच्छतु हयानस्य राधेयस्य महात्मन इति दुर्योधनेन शल्यं प्रति समीरिता कथा कर्णपर्वगता सर्वसाधनस्वरूपनिरूपणपराऽनुसन्धेया । यत्तद्विधादित्यनेनान्वयः । सशरमारोपणाय बाणसहितम् । सः शरमिति वा ॥ ६७ ॥

मन्दनन्दिनी — प्राधानिकमित्येतद्विवृणोति ॥ रथमिति । यत्तु भगवता क्लृप्तं तेन संनद्धो रथमास्थाय सशरं धनुरादद इति योजना ॥ ६७ ॥

शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः ।
भगवत्तेजसा गुप्तो ददाह त्रिपुरं नृप ॥ ६८ ॥

सत्यधर्मीया — अभिजिति तन्नामके मुहूर्ते । भगवत्तेजसा भगवत्सामर्थ्येन गुप्तो रक्षितः । शरं धनुषि सन्धाय मुक्त्वा चेति पूरणीयम् । त्रिपुरं ददाह । त्रयाणामपि पुराणामेकीभावस्य पुराणि तानि कालेन जग्मुरेवैकतां तदेत्यादिनोक्तेस्त्रिपुरमित्युक्तिः संभवति ॥ ६८ ॥

मन्दनन्दिनी — भगवत्तेजसा गुप्तस्तात्कालिकभगवदावेशविशेषेण गुप्तः ॥ ६८ ॥

दिवि दुन्दुभयो नेदुर्विमानशतसङ्कुले ।
देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ।
अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरो गणाः ॥ ६९ ॥

सत्यधर्मीया — कीर्तिपूर्तिप्रकारमाह ॥ दिवीति । विमानशतसङ्कुलाः । विमानानां शतान्यनेकानि सङ्कुलानि व्याप्तानि येषां ते । देवर्षिपितृसिद्धेशा देवा वासवाद्या ऋषयो बृहस्पत्याद्याः । (''वसिष्ठाद्याः'' इति रवकोशः) देवर्षिर्नारदश्चेति वा । पितरोऽर्यमाद्याः । सिद्धेशा देवयोनि-भूतनाथाः । जयेति जगुः । अनन्तरं पुष्पैरवाकिरन् । अप्सरोगणा ननृतुः । हृष्टा इति सर्वान्वयि ॥६९॥

मन्दनन्दिनी — विमानशतसङ्कुले अन्तरिक्षे स्थिता इति शेषः ॥ ६९ ॥

एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ।
ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥

सत्यधर्मीया — भगवान्पुरहा गतम् । ब्रह्मादिभिर्वनजभवस्यापि पुत्रस्तवनम् युक्तम् । सारथ्य-करणादिति सारांशः । गुरुणा श्लाघिताः । अहेलमान इत्यृग्भाष्यटीकयोरनिन्दन्नस्मान्नरमात्रबुद्ध्या सम्बोधयेहास्मासु अहेलमानोऽवज्ञामकुर्वन् । नरमात्रमिति बुद्ध्याऽस्मान्ननिन्दन् बोधि बोधय । हे शुनःशेप श्रान्तोऽसीत्युक्तेश्च । यद्वाऽतद्गुणसंविज्ञानबहुव्रीहिः । स्वधाम कैलासं स्वधाम पूर्ववत्स्वतेजश्च । विमनस्कमित्याद्युक्तेरादौ प्रत्यपद्यत प्राप ॥ ७० ॥

मन्दनन्दिनी — पुरहा त्रिपुरसंहर्ता । ब्रह्मादिभिः सनकादिभिः । तद्गुणसंविज्ञानो वा सम्भवति । ब्रह्मणाऽपि समर्थ इति स्तुतिसम्भवात् ॥ ७० ॥

एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः ।
वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान् पुनानान्यपरं वदामि किम् ॥ ७१ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे दशमोऽध्यायः ।

सत्यधर्मीया — शतमप्यन्धानां न पश्यतीतिवच्छर्वस्य सर्वसुपर्वसाहिती साहितनिहतावनुकूलेऽपि तदनुकूल एव हेतुर्नान्यथेति तव तन्मातुलेयकतादिभाग्यमहो इति तत्स्तवनेनोपसंहरति ॥ एवमिति । एवमुक्तरूपाणि विधा प्रकार एषां तानि वीर्याणि स्वमायया स्वेच्छयैव । नृलोकं विडम्बमान-स्यानुकुर्वतः । अस्येति प्रिय इत्यादिप्रोक्तस्मारणार्थम् । जगद्गुरोस्तारकोपदेशेन लोकतारकत्वान्मार-मारकस्य । जगदीशितुरित्युपक्रमस्वारस्यात् । अत्मनः स्वामिनः कीर्तिदानाज्जगद्गुरोरात्मनो हरेरस्येति सामानाधिकरण्यं वा । ऋषिभिरित्यृषिबहुवचनाभ्यां बहूनां बहुज्ञानामेतद्गानाविगानसूचनेन विश्वविश्वसनीयतामस्याचष्टे । लोकान्स्वगानकर्तॄन्पुनानानि पवित्रयन्ति । अपरं किं वदामि पृच्छेति । एतदितरत्किं वदामि न वदामि । तदेव सारं तदु हैव मङ्गलमित्यादेरिति वा ॥ ७१ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ
सप्तमे दशमोऽध्यायः ॥ ७-१० ॥

मन्दनन्दिनी — यशो व्यतनोदित्येतदुपसंहरति ॥ एवमिति ॥ स्वमायया स्वशक्त्यैव नृलोकं विडम्बमानस्य स्वेन स्वकीयैश्च सज्जनरक्षणदुर्जनशिक्षणलक्षणव्यापारं कुर्वतः । एवं विधानि वीर्याणि लोकान्पुनन्ति पवित्रयन्ति ऋषिभिर्गीतानि । अपरमन्यत्किं वदामि । वीर्याणामनन्तत्वाद्वक्तुमशक्त इति भावः ॥ ७१ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे दशमोऽध्यायः ॥ ७—१० ॥

॥ अथ एकादशोऽध्यायः ॥

श्रीशुक उवाच–

श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ।
युधिष्ठिरो दैत्यपतेर्मुदान्वितः पप्रच्छ भूतस्तनयं स्वयम्भुवः ॥ १ ॥

सत्यधर्मीया — भागवत्या भक्त्या यथावत्ययथासमयानामनुवर्णितेन वर्णाश्रमाचारादि-नाऽङ्कूरणमपरोक्षज्ञानस्येति तस्यावश्यकता च मुक्तिहेतुतयेतीममर्थं काशयितुमुत्तरेऽध्यायास्तत्रादौ वर्णाश्रमविचारं सम्पाद्यं मन्वानो ज्ञानिप्रवेकं प्रति तद्विवेकं धर्मः पृच्छतीति श्रीशुकः परीक्षितं प्रत्याह ॥ श्रीशुक इति । साधुसभासभाजितमिति पदमेकम् । साध्विति मात्रं भिन्नमव्ययं वा । साधूनां सभायां

सभाजितं पूजितं तया चायितमिति वा । साधु यथा तथा सभासभाजितम् । महत्तमाग्रण्यो महत्सु महांस्तदग्रणीस्तस्योरुक्रमात्मनो भगवत्युरुक्रमे मन आत्मा यस्य स तथा तस्य । दैत्यपतेः प्रल्हादस्येहितं चेष्टितं श्रुत्वा मुदान्वितः स्वयम्भुवस्तनयं नारदं पप्रच्छ । महत्तमाग्रण्योऽदैत्यपतेः सुरवरस्य ("दैत्यपतेः प्रल्हादस्य" इति रवपाठः) उरुक्रमात्मनो नृहरेः साधुसभाजितमीहितं श्रुत्वा मुदान्वितः सन् भूयः स्वयम्भुवस्तनयं नारदं युधिष्ठिरः पप्रच्छेति वा ॥ १ ॥

मन्दनन्दिनी — भगवद्भक्त्या यथावद्विहितवर्णाश्रमाचारचरणेन निर्मलीकृतान्तःकरणेन श्रवणादिद्वारा समुत्पन्नापरोक्षज्ञानेन प्रसन्नो हरिः स्वयोग्यां मुक्तिं ददातीत्येतदर्थं ज्ञापयितुमुत्तरेषामध्यायानामारम्भः । तत्र वर्णाश्रमधर्मान् श्रोतुकामो युधिष्ठिरो नारदं पृच्छतीत्याह ॥ श्रुत्वेति ॥ महत्तमाग्रण्यो महत्तमानां श्रेष्ठ उरुक्रम आत्मा मनो यस्य तस्योरुक्रमस्वरूपस्य वा । दैत्यपतेः प्रह्लादस्य पत्युर्नृसिंहस्य वा साधुसभासु सभाजितं प्रीतिविषयीभूतं सेवितं च । सभाजन प्रीतिसेवनयोरिति धातोः । ईहितं चरितं श्रुत्वा मुदान्वितः स्वयंभुवस्तनयं नारदं भूयः पपृच्छेति योजना ॥ १ ॥

युधिष्ठिर उवाच–

भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनम् ।
वर्णाश्रमाचारयुतं यत् पुमान् विन्दते परम् ॥ २ ॥

सत्यधर्मीया — धर्मो धर्मं विशिनष्टि ॥ वर्णेति । यद्यस्मात्पुमान्परं परमात्मानं विन्दते प्राप्नोति । वर्णाश्रमाचारयुतं ताभ्यां सहितम् । तत्कुलाचारवर्णानुगुणं सनातनं धर्मं श्रोतुमिच्छामि । नृणां पुमानिति बहुवचनैकवचनाभ्यां श्रोतारो बहुलास्तत्र कश्चिद्विमुच्यत इति द्योतयति । नृणामनुष्ठानयोग्यं श्रोतुमिच्छामीति वा । नृणामिति जात्यभिप्रायम् । पुमानित्यभ्यर्हितात्मादिविवक्षयेति वा विवेकः ॥ २ ॥

मन्दनन्दिनी — वर्णाश्रमे उचितो य आचारः शौचः स्नानादिस्तेन युतमध्ययन यजनादिरूपं धर्मं श्रोतुमिच्छामि । येनानुष्ठितेन धर्मेण परं विन्दत इति योजना ॥ २ ॥

भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः ।
सुतानां सम्मतो ब्रह्मन् तपोज्ञानसमाधिभिः ॥ ३ ॥

सत्यधर्मीया — त्वदुक्तं वक्तुमुचितं तथाऽपि न शक्तिर्ममेति न वदेति तं प्रति समर्थतोपयोगि चैतदादिसर्वं वर्तते त्वयीति वक्ति ॥ भवानिति । प्रजापतेर्न दक्षस्येत्याह ॥ परमेष्ठिन इति । ब्रह्मणः ।

साक्षादित्यनेन वधूव्यवधानसूतिं व्यावर्तयति । आत्मजोऽङ्कजः । सुतानां पूर्वजातानां सनकादीनां सम्मतः । कैरित्यत आह ॥ तप इति । ब्रह्मन् पूर्ण । ब्रह्मणो ब्राह्मणत्वात्तज्जातत्वाद् ब्रह्मन्निति वा ॥३॥

मन्दनन्दिनी — सुतानां दक्षादीनां सम्मतः ॥ ३ ॥

नारायणपरा विप्रा धर्मं गुह्यं यथा विदुः ।
करुणाः साधवः शान्तास्त्वद्विधा न तथा परे ॥ ४ ॥

सत्यधर्मीया — यथा नारायणपरा विप्रा गुह्यं धर्मं विदुः । करुणाः करुणयन्तीति ते तथा । साधवः शान्ता भगवन्निष्ठबुद्धयः । त्वद्विधास्तव विधा प्रकार एषां ते तथा त्वत्सदृशाः । अपरे तदितरे तथा न विदुरिति त्वां प्रति पृच्छामीति तात्पर्यम् ॥ ४ ॥

मन्दनन्दिनी — इतरान्विहाय मामेव कुतः पृच्छसीत्यत आह ॥ नारायणेति ॥ गुह्यं गोप्यम् । तद्विधा उक्तविशेषणविशिष्टाः । यथा विदुस्तथा नापर इति त्वामेव पृच्छामीति भावः ॥ ४ ॥

नारद उवाच—

नत्वा भगवतेऽजाय लोकानां धर्महेतवे ।
वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥

सत्यधर्मीया — महाप्रमेयत्वान्मङ्गलदेवीरमणनमनरूपं मङ्गलमाचरन्वक्ति ॥ नत्वेति । धर्महेतवे सेतवे इति पाठद्वन्द्वमद्वन्द्वम् । कारणाय मर्यादाकर्त्रे इति क्रमात्तदर्थः । नारायणमुखाच्छ्रुतं सनातनं धर्मं वक्ष्ये । नारायणेत्यादिना सम्प्रदायप्राप्ततां वक्ष्यमाणार्थस्य द्योतयामास । पितामहत्वादप्रतारकतां विप्रोऽनेनाहेति वा । च्युतमिति पाठे सनातनत्वादच्युतमुखच्युतमेवेत्यर्थः ॥ ५ ॥

मन्दनन्दिनी — नमनरूपं मङ्गलं कृत्वा स्वगुरोर्नरनारायणस्य मुखाच्युतं धर्मं वक्ष्यत इति योजना । क्रियार्थोपपदस्य कर्मणि स्थानिन इति सूत्रेण भगवते इत्यादौ चतुर्थः ॥ ५ ॥

योऽवतीर्यात्मनोंऽशे दाक्षायण्यां तु धर्मतः ।
लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥

सत्यधर्मीया — स नारायणः कः कस्मात्कस्यां जातो जातस्य तस्य क्व निवास इत्यत आह ॥ य इति । धर्मतो धर्मनाम्नः पितृतः । य आत्मनो मूलरूपिणोंऽशेन दाक्षायिण्यां दक्षापत्यभूतायां मूर्तावावतीर्य । धर्मतो मूर्ताविव्युक्त्या प्रतीतं शुक्रशोणितसम्बन्धं दूरयत्यवतीर्यात्मनोंऽशेनेत्याभ्यामिति मन्तव्यम् । दाक्षायणी दक्षस्यापत्यम् । वा नामधेयस्येति वृद्धसंज्ञायामुदीचां वृद्धादगोत्रादिति ष्फिञ् ।

गौरादित्वात् ङीष् । विस्तृतं चैतत् षष्ठस्कन्धविवृतावस्माभिरनुसन्धेयम् । लोकानां लोकेभ्यः स्वस्तये विवृतं प्राक् । मङ्गलार्थम् । बदरिकाश्रमे तपोऽध्यास्ते । अधिशीङ्स्थासां कर्मेति तप इति द्वितीया । तपस्येवास्त इत्यर्थः । तन्नारायणमुखाच्छ्रुतमित्यतीतेनान्वयः ॥ ६ ॥

मन्दनन्दिनी — स्वगुरुं नारायणं स्तौति ॥ य इति ॥ यच्छब्दस्य तस्मै भगवते इति पूर्वेणान्वयः । आत्मनः परात्मनो दाक्षायण्यां दक्षपुत्र्यां मूर्तिनाम्न्यां धर्मतो यमधर्मतः स्वस्तये मङ्गलाय । बदरिकाश्रमे। अधि शीङ्स्थासामिति कर्मत्वं नाश्रितम् । उप उद्दिश्येति शेषः । मुनीनां तपः शिक्षितुमिति यावत् ॥ ६ ॥

धर्ममूलं हि भगवान् सर्ववेदमयो हरिः ।
स्मृतिश्च तद्विदां राजन् येन चात्मा प्रसीदति ॥ ७ ॥

सत्यधर्मीया — धर्माणां यतो 'धर्मता' तदादौ वदति ॥ धर्मेति । हे धर्मेत्यपि । धर्मस्य मूलं प्रतिष्ठापक इव मुख्यविषयश्च भगवान्ममोपदेष्टा नारायण एव । वेदयन्वेदादिर्दृश्यते कथं तन्मूलत्वं भगवत इत्यत आह ॥ सर्ववेदमय इति । सर्ववेदैर्मय्यते गम्यत इति स तथा । नायं प्रत्ययः किन्तु मयतेर्गत्यर्थस्य स्वतन्त्रः शब्दः । तथाचोक्तं तत्त्वनिर्णयटीकायां मायाशब्दव्याकृत्याकृत्यवसरे । एतेन मयेति स्वतन्त्रप्रातिपदिकमिति । अयवयमयचयतयणयगताविति भ्वादिर्मयधातुः । मयं प्रधानमुद्दिष्टमिति बृहदारण्यकभाष्योक्तेः । सर्ववेदानां मयः प्रधानो मुख्यप्रतिपद्य इति वा । मानव्यादयः सत्स्मृतयश्च मानमित्याह ॥ स्मृतिश्चेति । तद्विदां भगवज्ज्ञानिनां वेदज्ञानां वा । स्मृतिर्गीताभाष्योक्ता । वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचरश्चैव साधूनामात्मनस्तुष्टिरेव चैतज्जातीयका । चशब्दाच्छीलादि लातव्यम् । येनैवं ज्ञातेन धर्मेणात्मनः परमात्मा प्रसीदति । अन्यत्रापि, श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक् सङ्कल्पतः(जः) कामो धर्ममूलमिदं स्मृतमित्युक्तं धर्ममूलं ज्ञेयम् । हे राजन्येनेत्यपि सम्बोधनम् । राज्ञ्यां राज्ञा जाता राजन्यास्तेषामिन स्वामिन् । तव राजन्येनत्वेऽप्येताद्दग्गुणकस्य तद्दोषावहं नेति कटाक्षयति मुनिरनेनेति ज्ञेयम् ॥ ७ ॥

मन्दनन्दिनी — धर्मे प्रमाणमादौ वक्ति ॥ धर्ममूलमिति ॥ धर्मे प्रमाणं मूलमित्यर्थः । सर्ववेदमयः सर्ववेदप्रधानः । अनेन भगवदुपदिष्टः सर्वो वेदः प्रमाणमित्युक्तं भवति । तद्विदां भगवद्विदां वेदविदां वा । स्मृतिश्च । चशब्दाच्छीलं चानेन वेदोऽखिलं धर्ममूलं स्मृतिशीले च तद्विदामिति वचनं संवादयति । प्रमाणमुक्त्वा लक्षणमाह ॥ येन चेति ॥ अनेन भगवत्प्रसादसाधनत्वे सत्यनुष्ठेयत्वं धर्मत्वमिति लक्षणमुक्तं भवति ॥ ७ ॥

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥

सत्यधर्मीया — विषयमुपपाद्य सर्वसाधारणधर्मकारणमाह ॥ सत्यमिति । सत्यं भूतहितम् । दया दीनानुकम्पा । तपश्चान्द्रायणादि । शौचं शरीरशोधनम् । तितिक्षादिकं सत्याद्यङ्गं साधनसाधनमप्यावश्यकमिति तदुक्तिः। तितिक्षा सहनम् । तिजेः क्षमायां सन्यप्रत्ययो टाप् । तिज निशाने तिजेः क्षमायामिति कौमुद्युक्तेः। क्षान्तिस्तितिक्षेत्यमरः । अखण्डः क्षान्तिवाची । ईक्षा युक्तायुक्तविवेकः । इज्येति पाठे यज्ञ इत्यर्थः । ब्रह्मचर्यमुभयविधमप्यधिकारिभेदेन । ग्राम्येहोपरमो विषयभोगेच्छाविरतिः । शनैरिति तस्यासुसाधं बोधयति । शनैः स्वैरं रमणीजनैर्ग्राम्येहोपरम इति वा । शनैः शनैश्चरे स्वैर इति विश्वः । विहितकाले तस्याविहितत्वादिति भावः । नृणां विपर्ययेहेक्षा विपर्यासरूपा चेष्टा तस्या ईक्षा । ममाप्येवमेव भवेदित्यालोचनम् । मौनमसदालापवर्जनम् । आत्मविमर्शनमहमल्प इति वा भगवान्सर्वोत्तम इति वा विचारणम् ॥ ८ ॥ ९ ॥

मन्दनन्दिनी — वर्णाश्रमविशेषधर्मान्वक्तुं साधारणानादौ तावदाह ॥ सत्यमित्यादिना ॥ सत्यं यथार्थवचनम् । दया भूतदया । तपो विहितोपवासादि । शौचं क्षालनम् । तितिक्षा सहनम् । इज्या देवपूजा । ब्रह्मचर्यं स्वपत्नीनियमलक्षणम् । ब्रह्मचर्यं गृहस्थस्याप्यस्तीति ज्ञेयम् । त्यागो निषिद्धस्य । स्वाध्यायः शूद्रादेरपि स्वोचितनामसङ्कीर्तनादिः । समदृक् सर्वत्र भगवतः साम्यदर्शनम् । सेवा महताम् । शनैः क्रमेण ग्राम्येहोपरमो दुर्विषयेच्छापरित्यागः । विपर्ययेहेक्षा विपरीतप्रवृत्तिविमर्शनम् । मौनं प्रलापनवर्जनम् । आत्मविमर्शनमात्मविचारः ॥ ८, ९ ॥

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथाऽर्हतः ।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥ १० ॥

सत्यधर्मीया — भूतेभ्यो यथार्हतोऽन्नादेः संविभागः द्विजभोजनबलिहरणादिभिः । तेषु पश्वादिषु । तत्रापि नृषु । सुतरामात्मा परमात्मैव देवता । गतम् । सन्निहित इति यावत् । इति बुद्धिः ॥ १० ॥

मन्दनन्दिनी — अन्नाद्यादेरत्तुं योग्यान्नतृणादेः । भूतेभ्यो मनुष्यपश्वादिभ्यो यथार्हतो यथायोग्यं संविभागो धर्मः । तत्रेतिकर्तव्यतामाह ॥ तेष्विति ॥ तेष्वात्मदेवताबुद्धिर्भूतेषु परमात्माधिष्ठानबुद्धिः । तत्रापि नृषु विशेषतः ॥ १० ॥

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्याऽवनतिः सख्यं दास्यमात्मसमर्पणम् ॥ ११ ॥

तात्पर्यम् — 'अनाद्यनन्तकालेषु मुक्तौ संसार एव च । मयिस्थश्चोदयत्येको विष्णुर्मां सर्वदैव तु । इति सम्प्रीतिकं ज्ञानं विद्यादात्मसमर्पणम् । बहिस्थेश्वरदासत्वं दास्यमित्युच्यते बुधैरि'ति तन्त्रमालायाम् ॥ ११ ॥

सत्यधर्मीया — सेवेज्याऽवनतिर्दास्यमिति श्लोकार्धे दास्यात्मसमर्पणपदयोरर्थभेदे प्रमाणमाह ॥ अनादीति ॥ संसारे मुक्तौ । मयि तिष्ठतीति मयिस्थः । अकिंचिदुपपादकादपि तिष्ठतेः भिन्नपदतावा । मां एक एव चोदयति प्रेरयतीति सप्रीतिकं प्रीतिर्हि भक्तिः, तत्पूर्वकं यज्ज्ञानं तदात्मसमर्पणं विद्यात् । जानीयात् । बहिस्तिष्ठतीति बहिस्थः कृष्णरामादिस्तस्य दासत्वम् । तदपि न यदाकदाचिदित्याह ॥ सर्वदैवेति ॥ दास्यत्वमित्युच्यते । अविगानार्थमाह ॥ बुधैरिति ॥ संप्रीतिकम् । सम्यक् प्रीतिः संप्रीतिस्तां करोतीति संप्रीतिकं सम्यक् प्रसादसाधनमिति सं सानुस्वारं पठित्वा व्याकुर्वते । अथश्लोकार्थः ॥ महतां ब्रह्मादीनाम् । गतेः प्राप्यस्थानरूपस्यास्य हरेः । श्रवणं कीर्तनम् । स्मरणं सेवा । इज्याऽर्चनम् । अवनतिः प्रावण्यम् । सख्यम् । दास्यं बहिस्थेश्वरदासत्वम् । आत्मसमर्पणम् । मयि तिष्ठन् सः माम् अनाद्यनन्तकालेषु प्रेरयतीति संप्रीतिकं प्रीतिपूर्वकं ज्ञानम् आत्मसमर्पणं विद्यादित्यर्थः (अयं भागः न पठ्यते परं मुद्रितकोशे दृश्यते । आवश्यकश्चायं भागः । यतो हि श्लोकसतात्पर्यव्याकृतिरूपोऽयमिति बिन्दुभिर्विभावनीयम्) ॥ ११ ॥

मन्दनन्दिनी — श्रवणं गुरोः सकाशात् । यथोचितस्य कीर्तनं भगवन्नाम्नः । महतां गतेः सङ्गतेः सेवासम्पादनम् । इज्यावनतिः पूज्येषु नम्रता । दास्यात्मसमर्पणयोर्भेद उक्तस्तात्पर्ये । अनाद्यनन्तकालेष्वित्यादि तन्त्रमालायामिति । अनाद्यनन्तकालेष्वित्यस्य मुक्तौ संसारे चेति विवरणम् । एवकारस्यैक एवेत्यन्वयः । संप्रीतिसंज्ञानं भक्तिपूर्वकसम्यग्ज्ञानम् ॥ ११ ॥

नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।
त्रिंशल्लक्षणसंयुक्तः सर्वात्मा येन तुष्यति ॥ १२ ॥

सत्यधर्मीया — श्रवणादिनवसु सेवेज्यापदयोर्भगवत्सेवाभगवदर्चनार्थत्वान्न समदृक्सेवेज्यापदाभ्यां पुनरुक्तिः । त्रिंशल्लक्षणसंयुक्तः किं हरिरुत धर्मः । नाद्यः । अनन्तलक्षणकस्य सङ्ख्यापरिच्छिन्नलक्षणवत्त्वस्य प्रेक्षावदकटाक्षणीयत्वात् । किञ्चानन्दादीनां स्फुटलक्षणानामेतदन्तरनिभालनाच्च । न द्वितीयः । सत्याद्यात्मनस्तस्य धर्मस्य तद्युक्तत्वानुपपत्तेः । स्वतन्त्राणां

सप्तपादश्चतुर्हस्त इत्याद्याशंसितानां लक्षणानां ग्रहणमित्यनुग्रहणं हन्त यर्हि तर्हि द्वात्रिंशल्लक्षणैर्युक्त इति युक्तोक्तिः स्यात् । न चोपलभ्यते तत्कला पूर्वत्रैवोत्तरत्रापि । न च विप्रस्तुतिरप्रस्तुतैतद्विषयिणीति हृद्यमतो नानवद्यतां पक्षद्वन्द्वस्य पश्याम इति चेन्न । द्वितीय एवाद्वितीयः । न तदात्मकस्य तद्युक्तताऽनुपपत्तिरित्युक्तमिति वक्तव्यम् । लक्षयन्ति ज्ञापयन्तीति लक्षणानि सत्यत्वादिभेदकोपाधयः । त्रिंशत्सङ्ख्याकानि सत्यत्वादीनि तैः । लक्षणशब्दः स्वरूपपरः सत्यादीन्यात्मदेवताबुद्ध्यन्तान्ये-कविंशत्सङ्ख्याकानि नव च श्रवणादीनिति त्रिंशल्लक्षणम् । विशेषबलात्तद्वत्वव्यवहारः । येन ज्ञातेनानुष्ठितेन सर्वात्मा भगवांस्तुष्यति स धर्म इत्यन्वय इति न काऽप्यनुपपत्तिः । परोऽप्येवं त्रिंशल्लक्षणवानिति व्याचक्रे । परः परिवारिश्रवणादिरयं धर्मः । अयं हरिपरिकीर्तनादिस्तु परो धर्मो मुख्यो धर्म इत्यावृत्त्याऽन्वये एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । परिवारतया ग्राह्या अपि हेयाः प्रधानत इत्यादिमानानुकूल्यं ज्ञेयम् । अत एव समुदाहृत इत्युक्तिः समुदावहा ॥ १२ ॥

मन्दनन्दिनी — अयं सत्यमित्यादिनोक्तः । भगवत्तोषसाधनत्वे सत्यनुष्ठेयत्वरूपलक्षणा-क्रान्तत्वात् । अहिंसादीनां धर्मत्वे धर्माङ्गत्वमप्यस्तीति ज्ञातव्यम् । उक्तरीत्या त्रिंशत्संख्याकभेदयुक्तः । सर्वात्मा सर्वस्वामी परमात्मा येनोक्तधर्मेण तुष्यति अयमिति पूर्वेण योजना ॥ १२ ॥

संस्कारा यद्यविच्छिन्ना स द्विजो वैदिकादयः ।
इज्याध्ययनदानानि विहितानि द्विजन्मनाम् ॥ १३ ॥

सत्यधर्मीया — धर्मस्वरूपं निरूप्य तत्राधिकारिण आह ॥ संस्कारा इति । यदि वैदिकादयो वैदिका वेदत एव कर्तव्यतया विदिताः । एत एवादयो येषां ते चादिपदार्था यथाक्रमं पुरुषाणां योषितां च संस्काराः अमन्त्रका इति वैदिकादय इत्युक्तिः । अविच्छिन्नास्तर्हि स द्विजः । निषेकादि-स्माशानान्ताः समन्त्रका द्विजानाम् । योषितां त्वमन्त्रकाः सर्वेऽपि संस्काराः कार्या इति तात्पर्यम् । तथा च स्मृतिः । निषेकादिस्मशानान्तास्तेषां वै मन्त्रतः क्रियाः । गर्भाधानमृतौ पुंसवनं स्यन्दनात्पुरा । षष्ठेऽष्टमे वा सीमन्तो मासयो(तो)र्जातकर्म च । अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासे चूडा कार्या यथाकुलम् । एवमेनःशमं याति गर्भ(र्भे)बीजसमुद्भवम् । तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः । स्त्रीणां प्रदानकर्मैव यथोपनयनं तथेत्यादि । तत्र द्विजन्मनां त्रयाणामिज्याध्ययनदानानि विहितानि श्रुत्याद्युक्तानि । ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः । इज्याध्ययनदानानि विप्रस्य क्षत्रियस्य चेत्यादेः । स द्विजोऽजो जगाद यमित्यपि पाठो दृश्यते क्वचित् । सोऽपि सुमङ्गलः । अजो ब्रह्माऽपौरुषेयत्वात् वेद इति वा । ब्रह्मा यं द्विजं जगाद स द्विजः । शूद्रं तु नैवं सोऽवादीदतो न स द्विज इत्यर्थः । तथा च स्मृतिः । विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा । न

केनचित्समसृजच्छन्दसा तं प्रजापतिरिति च । श्रुतिरपि । गायत्र्या ब्राह्मणमसृजत्त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रमिति । नाग्निर्न यज्ञः शूद्रस्येत्यादेर्न द्विजः शूद्रः । विस्तरस्तु छान्दोग्यादितोऽवसेयः । तत्रापि स द्विजो द्विजन्मनामित्येकवचनबहुवचनाभ्यां तरतमभावं सूचयति ॥ १३ ॥

मन्दनन्दिनी — एवं मनुष्यमात्रसाधारणं धर्मानुक्त्वा तत्तद्वर्णाश्रमोचितविशेषधर्मान्वक्तुं त्रैवर्णिकसाधारणलक्षणं तावदाह ॥ संस्कारा इति ॥ वैदिकादयः श्रौतस्मार्ताः । संस्कारा निषेकादयो यदि यस्याविच्छिन्नाः स द्विजः । स्त्रीषु मन्त्रोच्चारणाभावेऽपि वैदिकसंस्काराणां तन्त्रमात्रसद्भावात् प्रदानादीनामुपनयनादिस्थानापन्नत्वाच्च द्विजत्वं बोध्यम् । स द्विज इति लक्षणम् । विहितान्यग्निहोत्रसोमादीनि बृहस्पतिसवनराजसूयादीनि विशेषविहितानीज्याध्ययनदानानि द्विजन्मनां धर्माः ॥ १३ ॥

जन्मकर्मावदातानां क्रियाश्च निगमोदिताः ।
विप्रस्याध्यापनादीनि ततोऽन्यस्यापरिग्रहः ॥ १४ ॥

सत्यधर्मीया — तमेव तरतमभावं विशिनष्टि ॥ जन्मेति । अवदातानां शुद्धानां निगमोदिताः क्रिया विहिताः । विप्रस्याध्ययनादीनि । ततो विप्रादन्यस्य क्षत्रियस्याप्रतिग्रहोऽध्यापनं याजनादिकं चादिपदार्थः । यथोक्तम् । प्रतिग्रहोऽधिको विप्रे याजनाध्यपने तथेति । सङ्कल्पपूर्वकं द्रविणादानं प्रतिग्रहस्तदभावोऽप्रतिग्रहः । विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रह इति केचित्पेठुः । तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका । यथाऽऽह मनुः । षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति । तत्रार्थः । अप्रतिग्रह इति मुखतो ग्रहाद्राजन्यस्यापदि याजनाध्यापने कर्तव्ये इत्यनुजानातीति ज्ञेयम् । यद्वक्ष्यति ऋते राजन्यमिति । ननु छान्दोग्योपनिषदादौ दीनानुजिघृक्षया नापद्यपि राज्ञामुपदेशकत्वमुक्तम् । तथा हि । स होवाच तवैव राजन्मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव ब्रूहि चेत् । न । तत्रापि कृच्छ्रीबभूवेति श्रवणादापद्येतद्रूपिणीति नानुरूप्यमिति मन्तव्यम् ॥ १४ ॥

मन्दनन्दिनी — निगमोदिताः क्रियाः । न केवलं द्विजन्मनामपि तु जन्मना कर्मणा चावदातानां शुद्धानामिति पूर्वेण योजना । द्विजन्मस्वपि विशेषमाह । विप्रस्याध्ययनादीनि । षडिति यावत् । ततोऽन्यस्य क्षत्रियादेरपरिग्रहः । अपरिग्रह इत्युपलक्षणम् । अध्यापनयाजने न स्त इति बोध्यम् ॥१४॥

राज्ञो वृत्तिः प्रजागोप्तुरविप्राद् वा करादिभिः ।
वैश्यस्तु वार्तावृत्तिः स्यान्नित्यं ब्रह्मकुलानुगः ॥ १५ ॥

सत्यधर्मीया — ततोऽन्यस्याप्रतिग्रह इति प्रसक्तराजादिवर्तनप्रकारमाह ॥ राज्ञ इति । प्रजागोप्तू राज्ञः । अनेन प्रजागोपनमपि राजधर्म इत्यसूचि । किञ्च विना गोपनं करग्रहणेऽनर्थं सूचयति । प्रजाः गोप्ता तस्य । अविप्रात् । विप्रपदेन करादिग्रहणायोग्या देवादय उपलक्षणीयाः । यद्वाऽविप्राद्विद्वद्व्यतिरिक्तात् । यथोक्तम् । आत्वा कण्वा अहूषत गृणन्ति विप्र ते धिय इत्यृकूटीकायां विप्र मेधाविन्निति । तट्टिपणे च विप्रो गृत्सो धीर इत्यादिचतुर्विंशतिसङ्ख्याकेषु मेधाविनामसु विप्रशब्दः पठित इति भाव इति । पराऽप्येतदृग्व्याख्यायां चतुर्विंशतिसङ्ख्याकेषु विप्र इत्यादिषु मेधाविनामसु कण्वऋभुरिति पठित इत्यूचे । विप्रोऽपि विप्रकृतिश्चेत्करादिग्राह्यता दृष्टचरी कथमेवमुक्तिरित्यनेन निरस्तं वेदितव्यम् । ज्ञान्यर्थकत्वाद्विप्रशब्दस्य । करादिभिर्बलिः करः । उत्पन्नषष्ठांशग्रहः । अपीडयित्वा द्रव्यादानम् । यथोक्तं राजधर्मे । यथा क्रमेण पुष्पेभ्यश्चिनोति मधु षट्पदः । तथा द्रव्यमुपादाय राजा कुर्वीत सञ्चयमिति । आदिपदेन न्यायतो दण्डशुल्कादिग्रहः । आकरादिभिः आकराः रत्नसुवर्णस्थानानि तैः सह । वार्तावृत्तिर्वार्ता कृष्यादिस्तया वृत्तिर्जीवनं यस्य सः । ब्रह्मकुलानुगो ब्रह्म च ब्राह्मणाश्च कुलं जनपदस्वामी च क्षत्रियो राजन्यस्तदुभयानुगः । कुलं जनपद इति विश्वः । यथोक्तमुद्योगपर्वणि । वैश्योऽधीत्य ब्राह्मणान् क्षत्रियांश्चेत्यादि । ब्राह्मणमात्रानुग इति वा ॥ १५ ॥

मन्दनन्दिनी — वाशब्दोऽवधारणे । अविप्राद्देवजनात् करादिभिः । आदिपदाद्दण्डेभ्यः प्रसिद्धवित्ताहरणादिकं गृह्यते । वृत्तिर्जीवनोपायः । प्रजागोप्तुरित्यनेन गुप्तिरसाधारणो धर्म इति सूचितम् । वार्ता कुशीदादिवृत्तिर्जीवनोपायो यस्य सः वार्तावृत्तिः । ब्रह्मकुलानुग इत्यनेन विप्रेषु विश्वासादिकं धर्म इति सूचितम् ॥ १५ ॥

शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १६ ॥

सत्यधर्मीया - द्विजेति वर्णत्रिकग्रहणम् । स्वामिनः सकाशाद्वृत्तिरित्यत्राप्यन्वेति जीविका ॥१६॥

मन्दनन्दिनी — द्विजशुश्रूषा धर्मः । वृत्तिश्च स्वामिनस्तत्सम्बन्धिद्रव्यान्नादिना । अध्ययनादीत्यनेन याजनाध्यापनप्रतिग्रहरूपावृत्तिः सूचिता ॥ १६ ॥

वार्ता विचित्रशालीनं यायावर्यं शिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ।
जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ॥ १७ ॥

सत्यधर्मीया — विप्रादीनामनुकल्पं कल्पं च धर्ममापत्कालिकमालपति ॥ वार्तेति । वार्ता कृष्यादिकम् । विचित्रशालीनं नम्रतया नानाधान्यसङ्ग्रहः । खले । विचित्रेति क्वचिट्टाबन्तपाठस्तत्पक्षे

वार्ताविशेषणम् । यायावर्यं प्रत्यहं प्रतिगेहं याञ्चा शिलोञ्छनमिति समाहारो वोत्तरपदलोपी समासो वेति ज्ञेयम् । उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमिति वचनात् । विचित्रशालीनं यायावर्यं शिलमुञ्छनं चेति चतुर्धा । इयं चादित उक्ता वार्ता चेति पञ्चधेति योजना । अथवा विचित्रशालीनमिति यायावर्यविशेषणम् । नानाविधधान्यसम्बन्धि ततश्चतुर्धेत्युपपन्नम् । यद्वोत्तरत्र ऋतमुञ्छशिलं प्रोक्तमिति तद्वन्द्वस्यर्तमिति कीर्तिष्यमाणत्वात्समाहारवृत्तिरेकैवेति चतुर्धेत्यभिधानं ज्ञेयम् । उत्तरोत्तरा श्रेयसी । वार्तातो विचित्रशालीनमित्यादिकोत्तरोत्तरा श्रेयसी वृत्तिरित्यर्थः। यश्च यङो यातेर्यङन्ताद्वरच् । अतो लोपस्तस्य यलोपं प्रति स्थानिवद्भावनिषेधाल्लोपो व्योर्वलीति यलोपः । अल्लोपस्य स्थानिवद्भावमाश्रित्यातो लोपे प्राप्ते वरे लुप्तं न स्थानिवदिति कौमुद्युक्तेर्यायावरस्तस्य स्वभावो यायावर्यम् । विप्राज्ञया क्षत्रियवैश्ययोस्तत्त्वविज्ञापनं धर्म उक्तः । तदभावे शूद्रेणापि तत्त्वज्ञापनं कर्तव्यं किमित्यत आह ।। जघन्य इति । उत्तमां वृत्तिं ब्राह्मणाद्यनुष्ठेयां पालनदिवृत्तिम् । जघन्यो नरो सच्छूद्रः । अनापदि तयोः सत्त्वे न भजेन्न कुर्यात् । आपदि तदभावरूपिण्यां पालनादिवृत्तिं कुर्यादित्यर्थः । श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणमध्ययने जिव्हाच्छेदोऽर्थावधारणे हृदयविदारणम् । वर्णेष्वज्ञेष्ववर्णस्तु न ज्ञानी स्यात्कथञ्चन । नाग्निर्न यज्ञः शूद्रस्य तथैवाध्ययनं कुतः । केवलैव तु शुश्रूषा त्रिवर्णानां विधीयत इत्यादेः ।। १७ ।।

मन्दनन्दिनी — तथाऽपि तदतिरिक्तां वृत्तिं विभज्याह ।। वार्तेति ।। वार्ता कुशीदादिरूपा । एषा चापदि । विचित्रशालीनं नानाक्षेत्रेभ्यो नानाधान्यार्जनम् । यद्वा यायावर्यस्य विशेषणम् । विचित्रधान्यविषयकमिति तदर्थः । एतत्पक्षे शिलोंछनमिति अत्र वृत्तिद्वयं बोध्यम् । यायावर्यं गृहेभ्योधान्ययाचनम् । शिलोंछनमुंछःकणश आदानं कणिशाद्यर्जनं शिलमित्युक्तेर्भेदो बोध्यः ।।

उत्तरोत्तरा श्रेयसी विचित्रशालीनापेक्षया यायावर्यं तदपेक्षया शिलोंछं श्रेय इति ज्ञेयम् । जघन्यो नरः क्षत्रियादिः । अनापद्युत्तमां विप्रादिसम्बन्धिवृत्तिमध्यापनं यायावर्यादि जीवनोपायं न भजेत् । जघन्यः शूद्रो वर्णहीनो वाऽनापदि विप्रसद्भावे वर्णसद्भावे वा । उत्तमां वृत्तिं तत्त्वज्ञानलक्षणामिति टीकारीत्या वाऽर्थो बोध्यः ।। १७ ।।

ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ।
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।। १८ ।।

सत्यधर्मीया — राजन्यं राजानमृते विना सर्वेषां वर्णस्थानां सर्वशः सर्वाभिर्वृत्तिभिरापत्सु जीवनं न दोषायेत्यर्थः । तत्रापि राज्ञः प्रतिग्रहः शूद्रस्याध्ययनादिकमृत इति हृदयम् । अधुनोभयोः कर्तव्याकर्तव्ये आह ।। ऋतामृताभ्यामिति ।। १८ ।।

मन्दनन्दिनी — आपदि वृत्तिमाह ।। ऋत इति ।। राजन्यं विनाऽऽपत्सु सर्वेषां विप्रादीनां सर्वशः सर्वप्रकारेणापि वृत्तिः कर्तव्या । विप्रस्य स्ववृत्त्यसम्भवे क्षत्रिया वृत्त्या जीवनं तस्याप्यसम्भवे वैश्यवृत्त्यैवमेव क्षत्रियस्य प्राप्तौ ऋते राजन्यमित्यपवादः । एष च सामान्यापत्सु विशेषापत्सु तु विप्रवृत्त्या जीवनम् । अत्यापत्सु विप्रक्षत्रशुश्रूषालक्षणशूद्रवृत्त्याऽपि जीवनं ज्ञेयम् । वैश्यस्त्वापदि शूद्रवृत्त्यैव जीवेत् । सर्वेषामिति तूत्सर्गः । शूद्रस्तु वैश्यवृत्त्या कारुकवृत्त्या वा जीवेत् । वैश्यवृत्त्या जीवनेऽपि अध्ययनं न कुर्यादित्यादिकं ज्ञेयम् । एतत्सर्वमापत्सु । विप्रः क्षात्रं तु विशां वा धर्ममाचरेत् । क्षात्रासिद्धौ न शूद्रस्तु विप्रक्षत्रिययोः क्वचित् । क्षत्रियो ब्राह्ममापत्सु तदापत्सु विशामपि । क्षत्रियो विप्रधर्माऽपि नैव भैक्ष्यप्रतिग्रही । वैश्य आपत्सु शौद्रं तु धर्ममेकं न चापरम् । शूद्र आपत्सु विड्धर्मो तदापत्सु च कारुकः । शूद्रस्तु वैश्यधर्मोऽपि नैव वेदाक्षरो भवेत् । अनापदि क्षत्रियोऽपि पादशुश्रूषणं विना । शूद्रधर्मांश्चरन्विप्रः क्षत्रियेषु न दूष्यति । एषु कर्मसु याश्वा स्यात्स्वामिनाऽपि न याचिता ।। शौद्राण्यपि स्वधर्मत्वे क्षत्रियस्यापदो यदि । आत्मनश्चेद्बलाधिक्यं सा तु बन्धादपि प्रभोः । धर्मार्थं सेवतोऽर्थं विप्रधर्मादिकाद्वरः । प्रभुणा याश्ववृत्तिस्तु विशेषेणापि धर्मभाक् । बाहोर्बलाधिको यस्मात्क्षत्रियो विद्ययाऽधिकः । विप्रौ भागवतावेतौ सेशा लोकास्तयोरिमे । इति गीतातात्पर्योदाहृत-व्याससमृतितोऽवगन्तव्यम् ।तथा न्यायदीपिकायाम् । न केवलं क्षत्रियः शूद्रधर्मं चरन्न दूष्यतीत्येव किं तर्हीत्यत आह ।। येष्विति ।। यदि क्षत्रियस्य स्वधर्मवृत्तावापदो भवन्ति तर्हि तस्य सानुबन्धात्स्वामिनो

बलाधिक्येऽपि धर्मार्थमनभिभूयेषु कर्मसु नियुक्तः स्वामिनाऽपि याच्यः स्यात् । न च स्वयं याचिता । तानि शौद्राण्यपि कर्माणि अर्थाद्यर्थं सेवमानस्य विप्रादिधर्मोपजीवनादपि परो धर्मो भवतीत्यर्थः । तत्र स्वाम्यननुभवादपि स्वामिना याच्यत्वं विशेषेण धर्मकारणामित्याह ।। प्रमृतेति ।। विप्रधर्माद्याश्रयेण परोपजीवनाभावाच्छूद्रधर्मे तद्भावात्कथं सानुबन्धात्प्रभोर्बलाधिक्यादौ सत्यपि तस्य वरत्वमित्यत आह ।। बाह्वोरिति ।। सर्वस्य तदीयत्वान्न परोपजीवनमिति भावः ।। १८ ।।

सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथञ्चन ।
ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ।। १९ ।।

सत्यधर्मीया — ग्रन्थकृदेव सामयिक्यः संज्ञा एता इति स्वयमेव ता व्याकरोति ।। ऋतमिति । ऋतमुञ्छशिलम् । यदयाचितमयाश्वालब्धं तदमृतम् ।। १९ ।।

मन्दनन्दिनी — विप्रस्यैव जीवनोपायषट्कमाह ।। ऋतामृताभ्यामित्यादिना ।। निषेधमाह न श्ववृत्त्येति । अर्थाप्रतीतेः ऋतादिपदसप्तकस्यार्थमाह ।। ऋतमित्यादिना ।। सत्यानृतमित्ये-कवद्भावः ।। १९-२० ।।

मृतं तु नित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतम् ।
सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ २० ॥

सत्यधर्मीया — मृतं नित्ययाच्ञा स्यात् प्रमृतं कर्षणं कृषिः । सत्यानृतं वाणिज्यमित्युच्यते । श्ववृत्तिर्नीचसेवनम् ॥ २० ॥

वर्जयेत् तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २१ ॥

सत्यधर्मीया — तां श्ववृत्तिं जुगुप्सितां विप्रो राजन्यः सदा वर्जयेत् । पृथक् पृथगन्वयः । सदेत्यनेनापद्यपि न कुर्यादित्यर्थः सूच्यते । कुतो विप्रप्रजेशवर्जनीयता श्ववृत्तेरित्यत आह ॥ सर्वेति । सर्ववेदमयो मयिर्गत्यर्थ इति ज्ञानार्थः । विप्रः सर्ववेदज्ञ इति । सर्ववेदमयः । सर्वा देवता वेदविदि ब्राह्मणे वसन्तीति श्रुतेः । नृपश्च सर्वदेवमयस्तत्सन्निधानपात्रम् । यथोक्तं प्रथमे शृङ्गिणा । नरदेवनाम्नि रथाङ्गपाणाविति । चतुर्थे वेनवाणी । विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः । पर्जन्यो धनदः सोमः क्षितिरग्निरपां पतिः । एते चान्ये च विबुधाः प्रभवो वरशापयोः । देहे तिष्ठन्ति नृपतेः सर्वदेवमयो नृप इति । नाविष्णुः पृथिवीपतिरित्यादेः । रामायणे वाल्मीकीये उलूकवाक्यम् । सोमाच्छतक्रतोः सूर्यादित्यादि । अतस्ताभ्यां श्ववृत्तिर्वर्जनीयेति भावः ॥ २१ ॥

मन्दनन्दिनी — जुगुप्सितां निन्दितां श्ववृत्तिम् । विप्रराजन्ययोर्वैशिष्ट्यमाह ॥ सर्वेति ॥ वेदमयो वेदप्रधानः । वेदमूलमिदं ब्राह्ममित्युक्तेः । देवमयो देवप्रधानो विष्णोर्लोकपालानां चात्र संनिधानात् ॥ ॥ २१ ॥

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
दानं दयाऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २२ ॥

सत्यधर्मीया — ब्राह्मणा इति कथं ज्ञेया इत्यत इयत्या सामग्र्येत्याह ॥ शम इति । अच्युतात्मत्वं भगवन्मनस्कता ॥ २२ ॥

मन्दनन्दिनी — ब्राह्मणादीनां क्रमेण लक्षणान्याह ॥ शम इत्यादिना ॥ अच्युतात्मत्वमच्युत-मनस्कत्वम् ॥ २२ ॥

शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।
ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥ २३ ॥

सत्यधर्मीया — आत्मजयो मनोजयस्त्यागो वितरणम् । रक्षा वर्णत्रयरक्षणम् । ब्रह्मण्यता ब्रह्मणि ब्राह्मणविषये साधुता । ब्रह्मण्यो ब्रह्मसाधौ स्यादिति विश्वः ॥ २३ ॥

मन्दनन्दिनी — त्याग औदार्यम् । आत्मजयो मनोनिग्रहः । ब्रह्मण्यता ब्रह्मणि साधुता । प्रसादो मुखप्रसादः ॥ २३ ॥

देवगुर्वार्यगोभक्तिस्त्रिवर्गपरितोषणम् ।
आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २४ ॥

सत्यधर्मीया — त्रिवर्गा धर्मार्थकामास्तैर्हरिपरितोषणं नित्यमिति योग्यसर्वान्वयि । नैपुण्यं निपुणता ॥ २४ ॥

मन्दनन्दिनी — त्रिवर्गैर्धर्मार्थकामैः । त्रिवर्गानां ब्रह्मक्षत्रियविशां वा परितोषणम् ॥ २४ ॥

शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ।
अमन्त्रयज्ञो ह्यस्तेयं मौढ्यं गोविप्ररक्षणम् ॥ २५ ॥

सत्यधर्मीया — शौचं सकृत्स्पृष्टाभिरद्भिराचमनलक्षणम् । हृत्कण्ठतालुगाभिस्तु यथासङ्ख्यं द्विजातयः । शुद्धेरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्तत इति वचनात् । असङ्कल्पादिपूर्वकं स्नानं वा । अमन्त्रयज्ञो नमनमुखेनैव पश्चापि यज्ञान्कुर्वीत । यथाऽऽह याज्ञवल्क्यः । नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेदिति । मौढ्यं जानंश्चेदपि ज्ञानिपुरतोऽहं कियानिति मूढताप्रदर्शनम् ॥ २५ ॥

मन्दनन्दिनी — अमाययाऽछद्मना ॥ २५ ॥

स्त्रीणां तु पतिदेवानां तच्छुश्रूषाऽनुकूलता ।
तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २६ ॥

सत्यधर्मीया — मानिनीनां सामान्यलक्षणमाह ॥ स्त्रीणामिति । पतिदेवतानां पतिर्देवः पूज्यो यासां तास्तासाम् । तच्छुश्रूषानुकूलता तत्कर्तृकभगवद्भागवतसेवानुकूलता । यद्वा तस्य शुश्रूषानुकूलत्वं सेवानुकूल्यम् । तद्बन्धुषु पतिभ्रात्रादिषु तद्व्रतधारणं तस्य यद् व्रतं तस्य धारणम् । पातिव्रत्यमिति वा । यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्तते । स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः सनातन इत्युक्तेः ॥ २६ ॥

मन्दनन्दिनी — स्त्रीसामान्यलक्षणमाह ॥ स्त्रीणामिति ॥ अनुकूलतोपकारित्वम् । यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते । स्त्रीभिर्भर्तुर्वचः कार्यं एष धर्मः परस्त्रिय इति वचनात् । तद्बन्धुषु भागिनेयादिषु । तद् व्रतधारणं पातिव्रत्यं ब्रह्मण्यं तस्य यद् व्रतं तदेवास्या व्रतमिति वा ॥ २६ ॥

सम्मार्जनोपलेपाभ्यां गृहमण्डनवर्तनैः ।
स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥ २७ ॥

सत्यधर्मीया — मार्जनं कथितं शुद्धौ । मण्डनं स्यादलङ्कारेऽलङ्करिष्णुनि वाच्यवदिति विश्वः । सम्मार्जनं प्रागवकरेण शुद्धिरुपलेपो गोमयादिना । मण्डनमलङ्करणं वर्तनान्युद्वर्तनानि तैर्नित्यं स्वयं मण्डिता । परिमृष्टपरिच्छदा संशुद्धवस्त्रादिमती ॥ २७ ॥

मन्दनन्दिनी — गृहमण्डनवर्तनैर्गृहालङ्कारकरणैः ॥ २७ ॥

कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ।
वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत् पतिम् ॥ २८ ॥

सत्यधर्मीया — उच्चावचैरनेकप्रकारैः कामैर्विषयैस्तदभिलषितैः । काले काल इति सदा । प्रेम्णा भक्त्या ॥ २८ ॥

मन्दनन्दिनी — कामैर्विषयैः ॥ २८ ॥

सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।
अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥ २९ ॥

सत्यधर्मीया — अलोलुपाऽदुरभिलाषा । प्रियेषु भर्तृप्रियेष्वपि सत्यवाक् । यद्वा प्रियस्य पत्युर्याः सत्य इतरा योषितस्तद्विषयेऽवागनिष्ठुरभाषिणीति वा । एकस्य बह्व्यो जाया भवन्तीति श्रुतेः । अपतितं ब्रह्महत्यादिरहितम् । पतिः स्त्रीभिर्न हातव्यो यदि स्यान्नैव पातकीति वचनात् ॥ २९ ॥

मन्दनन्दिनी — अलोलुपा अयोग्याभिलाषरहिताः । अपतितं ब्रह्महत्यादिभी रहितम् ॥ २९ ॥

या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ ३० ॥

तात्पर्यम् — 'हरिरस्मिंस्थित इति स्त्रीणां भर्तरि भावना ॥ शिष्याणां च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु । भृत्यानां स्वामिनि तथा हरिभाव उदीरित' इति च ॥ ३० ॥

इति सप्तमतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

सत्यधर्मीया — या पतिं हरिभावेनेति श्लोके हरिभावेन तत्तादात्म्येन भजेत्सा हरिलोके मोदत इत्यन्यथाप्रतीतिं प्रमाणेन पराकुर्वन्गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपीति

प्रतत्समानशास्त्रविषयशिष्याणां गुरौ तत्प्रसङ्गसङ्गत्या शूद्रादीनां ब्राह्मणादिषु तं हरिभावं तेनैवाह ।। हरिरिति । अस्मिन्पत्यौ । ब्राह्मणादिषु त्रैवर्णिकादिषु भावना चिन्तनम् । तामुद्दिश्य हरिभाव इति विधानम् ।। ततश्चायं श्लोकार्थः । हरिभावेन हरिरत्र सन्निहित इति भावनया । एतदर्थकरण एवानुरूपं निदर्शनं निरूपयति ।। श्रीरिवेति । तत्परा स एव परो यस्याः सा तदासक्ता । हर्यात्मना तत्सारूप्यादिभाजा । हरिरात्मनि यस्य तेनेति वा । पत्या सह हरेर्लोके श्रीर्हरिणेव मोदत इत्यन्वयः ।। ३० ।।

मन्दनन्दिनी — हरिभावेनास्मिन् पत्यौ हरिः संनिहित इति या बुद्धिः सा हरिभावस्तेन ।। तदुक्तं तात्पर्ये ।। हरिरस्मिन्नित्यादि । हर्यात्मना हरेर्विशेषसंन्निधानवता पत्या सह ।। ३० ।।

वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत् ।
अचोराणामपापानामन्त्यजान्तेऽवसायिनाम् ।। ३१ ।।

सत्यधर्मीया — प्रतिलोमजानां वृत्तिमाह ।। वृत्तिरिति । सङ्करजातीनां क्षत्राद्विप्रस्त्रियां तथैव विप्रात्क्षत्रस्त्रियां क्षत्राद्वैश्ययोषिति वैश्याच्छूद्रवनितायां जातानाम् । केचिद्बीजप्राधान्यकाः केचिच्च योनिप्राधान्यका जनास्ते तत्तत्कुलानुकूल्येनेति तत्तत्कुलकृता वृत्तिर्भवेत् । तत्रापि तैरित्थम्भाव्यमित्याहुः ।। अचोराणामिति । यस्य यस्य यद्यद्विहितं तदकरणं चौर्यं, प्रसिद्धचोरणरहितानामिति वा । तेषां जातिविशेषाश्चाम्बष्टादिसंज्ञा ज्ञेयाः । तथा च स्मृतिः । विप्रान्मूर्धावसिक्तस्त्रीजातोऽम्बष्ट इत्यादिका । रजकादिसप्तकारवस्त्वन्त्यजाः । रजकश्चर्मकारश्च नटो बुरड एव च । कैवर्तमेदभिल्लाश्च सप्तैतेह्यंत्यजाः स्मृता इति स्मृतेः । अन्तेऽवसायिनः पुल्कसादय । एतेषां तत्तत्कुलपरम्पराप्राप्तो धर्म एवानुष्ठेयः । ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा । शूद्राज्जातस्तु चण्डालः सर्ववर्णबहिष्कृत इति च । अन्ते ग्रामान्तेऽवसायो निश्चयो येषामस्तीति ते तथा । शयवासेति सप्तम्या अलुक् ।। ३१ ।।

मन्दनन्दिनी — ब्राह्मणस्य तिस्रोऽनुलोमजातयः । क्षत्रियस्य द्वेऽनुलोमजाती । एका प्रतिलोमजातिर्वैशस्यैकाऽनुलोमजातिः । द्वै प्रतिलोमजाती शूद्रस्य तिस्रः प्रतिलोमजातयः । एवं द्वादश जातयः । एवं तासां परस्परभिन्नजातिषु चतुर्वर्ण्यां च जाता जातयस्ततो जाता अन्तेऽवसायिनः । पुल्कसमतङ्गादयः । एषां वृत्तिस्तत्तत्कुलकृता भवेदित्यन्वयः । ब्राह्मण्यां क्षत्रियाज्जातो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चण्डालः सर्ववर्णविगर्हित इति वचनात् ।। ३१ ।।

प्रायः स्वभावविहितो नृणां धर्मो युगे युगे ।
वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च शर्मकृत् ।। ३२ ।।

सत्यधर्मीया — तत्तद्वर्णस्थैः स्वस्वकर्तव्यतयाऽवधारिणीतधर्मानुष्ठाने तत्फललाभ इति वदति ॥ प्राय इति । स्वभावविहितस्तत्तद्वर्णाश्रमयोग्यतामनुसृत्य विधिप्राप्तः । नृणां ज्ञानिनाम् । न कर्म लिप्यते नर इतीशावास्योपनिषदमुदाहृत्य "तत्त्वप्रकाशिकायां नरे ज्ञानिन्यपीति व्याख्यातत्वात् । युगे युगे प्रतियुगम् । प्रायः साङ्गो धर्मो वेददृग्भिः स्मृतः । स्वभावजेन कौन्तेय संसिद्धिं लभते नरः । स्वे स्वे कर्मण्यभिरत इत्यादिग्रन्थे ग्रथितः । इह च शर्मकृत्सत्सहवासलभ्यसुखकृत् । प्रेत्य स्थितस्य शर्म सुखं तत्कृत् ॥ ३२ ॥

मन्दनन्दिनी — एवं वृत्तिमुक्त्वा धर्ममाह ॥ प्राय इति ॥ स्वभावविहितः स्वस्य भावो जातिः । यज्जातीयत्वमिति यावत् । तज्जातीयस्य यो वेददृग्भिः स्मृतः स्मृतिरूपग्रन्थेनोक्तः । सः युगे युगे प्रतियुगं प्रेत्य मृत्वा स्थितस्येह लोके स्थितस्य शर्मकृत् सुखकृत् । प्राय इत्यनेन रागादिकलुषितत्वे शर्मकृत्वाभावः सूचितः । अनेन स्मृतिषु तत्तज्जातीयधर्माणां विस्तृतत्वादिहानुक्तिरिति सूचितम् ॥३२॥

वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मणि ।
हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३३ ॥

सत्यधर्मीया — तत्सुखं न दुःखसंवलितं किन्तु मुक्तिगमपि भक्तिसचिवेन धर्मेण लभ्यमित्याह ॥ वृत्त्येति । स्वभावकृतया वृत्त्या भक्त्या । स्वकर्मणि वर्तमानोऽस्वभावजमन्तरायातं कर्मानिष्टपुण्य-दुरिष्टसाधकं च शनैर्हित्वा प्रारब्धं भोगेन हित्वा गमयित्वा निर्गुणतां निर्गताः गुणादयः सत्त्वादयो येभ्यस्ते निर्गुणा मुक्तास्तेषां भावं मुक्तिमित्यात्प्राप्नुयात् ॥ ३३ ॥

मन्दनन्दिनी — स्वस्वजातिविहितधर्मानुष्ठानेन न केवलं स्वर्गः किन्तु मोक्षोऽपीत्याशयेनाह ॥ वृत्त्येति ॥ स्वभावकृतया स्वस्वजातिप्रयुक्तया वृत्त्या धर्मानुष्ठानेन स्वकर्मणि वर्तमानः । स्वभावजं भाव इच्छा तज्जं कर्म काम्यं हित्वा शनैर्निर्गुणतां मोक्षमियात् । अनेन सर्वजातिविहितं कर्म अकामेनानुष्ठीयमानं मोक्षसाधनमित्युक्तं भवति ॥ ३३ ॥

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् ।
न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥ ३४ ॥

एवं कामाशयं चित्तं कामानामतिसेवया ।
विरज्येत यथा राजन्नाग्निवत् कामबिन्दुभिः ॥ ३५ ॥

सत्यधर्मीया — वृत्त्या स्वभावकृतयेति मोक्षार्थं स्वधर्मोऽनुष्ठेय इत्युक्तम् । तत्र तदर्थं विरक्तिः सम्पाद्या तदर्थं विषयसेवा त्याज्येति वक्तुं तदतिसेवाऽपि प्रसूते विरक्तिं तदुपरमेण किमित्यतो नातिसेविनश्चित्ततृप्तिर्भवतीति सदृष्टान्तं द्वाभ्यां श्लोकाभ्यां प्रतिपादयति ॥ उप्यमानमिति । हे राजन् धर्म मुहुरुप्यमानं क्षेत्रं भूः स्वयं निर्वीर्यतामुप्तबीजप्ररोहणाहेतुनीरसतामियात् । तदेवोपपादयति ॥ नेति । पुनः सूत्यै अङ्कुरोत्पत्त्यै न कल्पते न समर्थं भवति । न केवलमेतावदपि तूप्तबीजं नश्यति । पुनरन्यत्रानावापोपयोगि सन्नाशं च प्राप्नोति । यथैवं तथा कामाशयं कामेष्वाशेते तत्रैवासक्तमिति यावत् । चित्तं कामानामतिसेवया विषयाणामतिसेवया निर्वीर्यतां विषयौदासीन्यकारणतां नेयादतो विषयेभ्यो विरज्येत । न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धत इति स्थानान्तरस्थवाक्यानुकूल्येन व्यतिरेकमुक्त्वाऽन्वयनिदर्शनं दर्शयति ॥ अग्निवदिति । कामबिन्दुभिः स्वोत्तेजकतया कामविषयघृतबिन्दुभिर्यथाऽग्निरेधते न विरज्येत च तथा चित्तं तदायत्तं सन्न विरज्येत । किन्तु विरज्येत विशेषतो रज्येतानुरक्तमेव भवेदित्यर्थः । एवं कामाशयं चित्तं कामानामतिसेवया यथा पुनः कामानां न नाम प्ररोहणं स्यात्तथाऽतिसेवा ।

यथा सौभरिप्रभृतीनामनेककायोपभोगस्यैकदैव योगप्रभावोपात्तदेह(व्यूहेन)योगेनोपभोगस्तेन च यथाऽग्निर्न कामबिन्दुभिर्घृतपूरैश्शान्तो न भवति तथा विरज्येत । यथा च क्षेत्रं निर्वीर्यतामियात्तथा चित्तं निर्वीर्यतां पुनः सूत्यनापादकतामित्युभयत्रान्वयनिदर्शनमिति वा ज्ञेयम् । एतत्पक्षेऽतिपदं संलग्नम् । न जात्वित्यादिकं तु शनैः शनैः कामोपभोगपरमिति न विरुणद्धि । अधिकारिभेदेन वा तदुक्तिः । राजन्नाग्निवदिति पाठः सुललितः । कामबिन्दुभिर्घृतपूरैः । अनेक बिन्द्वतिरिक्तस्य सङ्घस्य दुरुपपादत्वादिति तत्पक्षेऽर्थो बोध्यः । ननु प्रवृत्ते प्रवृत्तस्तत्फलं लभत इति युक्तम् । निर्गुणपुरुषार्थावाप्तिस्तेन कथमित्यतो यथा वै भैषज्यरोचनमित्यादेः क्रमात्सगुणनिर्वाणच्युतमच्युते भवति नस्तेन महापुरुषार्थावाप्तिरित्याह श्लोकद्वयेनेत्यवतारयन्तो मुहुः क्षेत्रमुप्यमानं स्वयं निर्वीर्यतामियात् । पुनः सूत्यै उत्पत्त्यै अङ्कुरजननाय न कल्पते । नैतावदुप्तबीजं च नश्यति । एवं यत्कामाशयं चित्तं कामानामतिसेवया नश्यति स्वफलानाधायकतयादर्शनं याति । अथ विरज्येत । व्यतिरेकं निदर्शनमाह ॥ नेति । कामबिन्दुभिरग्निवन्नेति व्याचक्षते ॥ ३४,३५ ॥

मन्दनन्दिनी — अकाम्यं कर्म मोक्षहेतुरित्युक्तम् । काम्यं न तद्धेतुरिति सदृष्टान्तमाह ॥ उप्यमानमिति ॥ पुनः पुनरुप्यमानं क्षेत्रं निर्वीर्यं सत् । सूत्यै बहुधान्यलाभाय न कल्प्यते । प्रत्युत बीजमपि नश्यति । यथा काम्यमपि पुनः पुनः कामायानुष्ठीयमानं निर्वीर्यं सत्कामान्न ददाति । स्वयं च व्यर्थं भवतीति भावः । यथोप्यमानं क्षेत्रवत्कामाशयं चित्तं कामानामतिसेवया विरज्येत । अन्तर्णीत णिच् । विरक्तं कुर्यात् । निर्वीर्यत्वादिप्राप्तेः । स्वतस्तु न विरक्तं भवति । किन्तु कामबिन्दुभिरभिवर्धमेव । आज्यबिन्दुभिरग्निवत् ॥ ३४, ३५ ॥

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णादिव्यञ्जकम् ।
यद्यन्यत्रापि दृश्येत तत् तेनैव विनिर्दिशेत् ॥ ३६ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे एकादशोऽध्यायः ।

सत्यधर्मीया — यस्य पुंसो वर्णादिव्यञ्जकं यल्लक्षणं प्रोक्तम् । यदि तदन्यत्र तद्वर्णाश्रमरहितेऽपि दृश्येत तद्वस्तु तेनैव तत्तद्वर्णादिना विनिर्दिशेत् । जातिमात्रं न प्रयोजकमिति भावः । शमादिमानब्राह्मणश्चेदपि प्रायस्तद्व्यवहारादिसाधारणसत्कारयोग्य इति तात्पर्यम् । वर्णादिव्यञ्जकमित्यत्र व्येति वर्णस्य छन्दश्छेदभिया सम्पाद्या लघुता । लक्षणस्य क्वचिदेवावर्तनेन तज्जात्युत्पन्नाद्गौरवं सूचयतीति मन्तव्यम् ॥ ३६ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ
सप्तमे एकादशोऽध्यायः ॥ ७-११ ॥

मन्दनन्दिनी — वर्णाश्रमादिलक्षणोक्त्या भवद्व्यवहारादिलक्षणं प्रयोजनं चाह ॥ यस्येति ॥ प्रोक्तं श्रुत्यादिषु । अन्यत्राप्यदृष्टपूर्वेऽपि वस्तुनि यदि व्यञ्जकं लक्षणं दृश्येत तत्तद्वस्तु तेनैव लक्षणेनेदृशवर्णोऽयमी दृशाश्रमोऽयमिति निर्दिशेत् । व्यवहरेदिति योजना ॥ ३६ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे एकादशोऽध्यायः ॥ ७-११ ॥

॥ अथ द्वादशोऽध्यायः ॥

नारद उवाच–

ब्रह्मचारी गुरुकुले वसेद् दान्तो गुरोर्हितम् ।
आचरेद् दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥

सत्यधर्मीया — तत्तदाश्रमधर्मविशेषानाह ॥ ब्रह्मचारीति । गुरोर्हितमिति षष्ठ्यैतदकरणेऽपि तस्य स्वतः सामर्थ्यं वर्तते तत्सम्पादने तथाऽप्येतत्सुकृतावाप्त्यै तदिति द्योतयति । अन्यथा चतुर्थी तदर्थार्थ बलिहितसुखरक्षितैरति ज्ञापिता । श्रूयेत । नीचोऽन्यभाववान् । भृत्यः नीचस्तु वामने पामरेऽपि चेति

विश्वः । दीर्घो ह्रस्वीभूयगंता स्यादिति वा । दासवत् । स्वार्थे वतिः । गतेरर्थवत्त्वमिति यथा । यद्वा स्वयं दासवांश्चेदपि नीच इत्यैकपद्यम् । दानपात्रवदिति वा । दासःशूरे दानपात्रे भृत्यधीवरयोरपीति विश्वः । त्रिवारं गुरूदीरणा वक्ष्यमाणधर्ममध्ये कस्यचिन्न्यौन्येऽपि नाश्रमधर्मलोप इदं तु न सर्वथा त्याज्यमिति द्योतयितुमिति ज्ञेयम् ॥ १ ॥

मन्दनन्दिनी — वर्णधर्मानुक्त्वाऽऽश्रमधर्मान्विवक्षुराश्रमत्रयधर्मांस्तावदाह ॥ ब्रह्मचारीत्यादिना ॥ दान्तो निगृहीतेन्द्रियः । गुरोर्हितमाचरन् । मनोवाक्कायकर्मभिरिति शेषः । दासवन्नीचो भृत्यवद्गर्भ-दासवद्वा नीचः । सुदृढं सौहृदं स्नेहो यस्य सः ॥ १ ॥

सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ।
सन्ध्ये उभे च यतवाग् जपन् ब्रह्म समाहितः ॥ २ ॥

सत्यधर्मीया — सुरोत्तमान् दिगादिदेवान् । ब्रह्म गायत्रीम् । यतवाक् समाहितो मनसा ॥ २ ॥

मन्दनन्दिनी — गुरूपदेशकम् । अग्निमग्निकार्यार्थमर्कं प्रातः सायं वरुणं चेति ग्राह्यम् । सुरोत्त-मान् प्राच्यादिदिक्स्थितदेवान् । संध्ये संध्यादेवते । ब्रह्म गायत्रीं जपन् ॥ २ ॥

छन्दांस्यधीयेत गुरोराहूतश्च सुयन्त्रितः ।
उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥

सत्यधर्मीया — सुयन्त्रितोऽतिप्रह्वः । गुरोः गुरुणेति वक्तव्ये गुरोरित्येकयोक्त्या चरणपदे-नाप्यन्वयं बोधयति । षष्ठ्या बह्वर्थिकायाः कर्त्रर्थकता नानुपपन्ना ॥ ३ ॥

मन्दनन्दिनी — आहूतो गुरूणा । चरणौ । गुरोरिति शेषः ॥ ३ ॥

मेखलाजिनवासांसि जटादण्डकमण्डलून् ।
बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥

सत्यधर्मीया — मेखला मुञ्जाकाञ्ची । मेखला काञ्ची शैलनितम्बयोरिति विश्वः । अजिनं कृष्णाजिनम् । वास उपरि परिधानीयम् । कमण्डलुः करकः । कमण्डलुस्तु करक इति विश्वः । यथोदितं समित्पाणिरित्यादि श्रुतिशंसितम् । यथा तथा पालाशो ब्राह्मणस्येत्यादिनियममनतिक्रम्य दण्डं बिभृयात् ॥ ४ ॥

मन्दनन्दिनी — वासमुपरिवस्त्रम् । यथोदितं शास्त्रोक्तम् ॥ ४ ॥

सायं प्रातश्चरेद् भैक्ष्यं गुरवे तन्निवेदयेत् ।
भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत् क्वचित् ॥ ५ ॥

सत्यधर्मीया — यद्यनुज्ञातस्तर्हि भुञ्जीत नो चेदननुज्ञाने उपवसेत् । तदपि न बहु लवमित्याह ॥ क्वचिदिति । कुतस्तथेत्यस्यापीदमेवोत्तरं क्वचिदिति । न चैकान्तमनश्नत इत्युक्तेर्बहुतिथमुपोषणे चिज्ज्ञानं क्वेति । ततः क्वचिदेवेत्यर्थः ॥ ५ ॥

मन्दनन्दिनी — नो चेदपराधादिनाऽनुज्ञातो नो चेत् । क्वचित्सायमाशे प्रातराशे वा ॥ ५ ॥

सुशीलो मितभुग् दक्षः श्रद्दधानो जितेन्द्रियः ।
यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥

सत्यधर्मीया — मितभुक् शरीरधारणोपयुक्तभक्तभोक्ता । स्त्रीषु स्त्रीनिर्जितेषु पुरुषेषु च । यावदर्थं यावत्प्रयोजनम् ॥ ६ ॥

मन्दनन्दिनी — यावदर्थं यावत्स्वप्रयोजनं गुरुप्रयोजनं वा । यावत्तावदेवेत्यर्थः । स्त्रीनिर्जितेषु स्त्रीवशेषु ॥ ६ ॥

वर्जयेत् प्रमदागाथामगृहस्थो बृहद्व्रतः ।
इन्द्रियाणि प्रमाथीनि हरन्त्यपि यतेर्मनः ॥ ७ ॥

सत्यधर्मीया — अगृहस्थो ब्रह्मचारी बृहद्व्रतो बृहन्महद्व्रतमाश्रमधर्मो यस्य स तथा । स्त्र्यादिगाथा कुतस्त्याज्याऽनेनेत्यत आह ॥ इन्द्रियाणीति । यतेरपीत्यन्वयः । निर्जितेन्द्रियः । ("निर्जितेन्द्रियस्य" इति पाठः स्यात्) ये निर्जितेन्द्रियग्रामा यतयो यतिनश्च त इत्यमरः ॥ ७ ॥

मन्दनन्दिनी — प्रमदागाथां वनितागीताम् । बृहद्व्रत इन्द्रियनिग्रहवतः । अगृहस्थ इत्यनेनाश्रमत्रयस्याप्ययं निषेधः ॥ ७ ॥

केशप्रसाधनोन्मर्दस्नपनाभ्यञ्जनादिकम् ।
गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥

सत्यधर्मीया — युवा । अष्टवर्षस्योपनयनं तदनन्तरं द्वादशसंवत्सरमध्ययनं तत उत्तरं संवत्सरपर्यन्तं स्नातकव्रतमिति क्रमात्तारुण्यं बोध्यम् । केशप्रसाधनं दान्तकंकतिकया शोधनम् । प्रसाधनी कंकतिकेत्यमरः । अनेन न जटानैय्यत्यमिति सूचयति । उन्मर्दः शरीरमर्दनम् । स्नपनं जलमात्रेण ।

ग्रास्नेति मित्वेणोमिति ह्रस्वे स्नपनम्। अभ्यञ्जनं तैलजलादिना। गुरुस्त्रीभिः सामान्यतो मान्यत्वात्। युवतिभिस्तरुणीभिः। तरुणी युवतिः समेत्यमरः। यौति पत्या मिश्रीभवतीति। यु मिश्रणेऽस्मात्कनिन्। यूनस्तिरिति युवतिरिति ज्ञेयम्। आदिपदेन मध्वादिप्रवादान्तं मानिकं ग्राह्यम्॥ ८॥

मन्दनन्दिनी — विशेषतो निषेधमाह॥ केशेति॥ स्नपनं स्नानकरणम्॥ ८॥

नन्वग्निः प्रमदा नाम घृतकुम्भः पुमान् यतः।
सुतामपि रहो जह्यादन्यदा यावदर्थकृत्॥ ९॥

सत्यधर्मीया — कुत एतन्न कार्यमित्यत आह॥ नन्विति। प्रमदाऽग्निर्घृतकुम्भसमः पुमान्। अतश्चित्तद्रवणं युक्तमिति भावः। तदर्थं सुतामपि रह एकान्ते जह्यात् तया सह न संवसेत्। अन्यदा व्यवहारकरणकाले। यावदर्थकृदुक्तमात्रकृत्। भवेदिति शेषः॥ ९॥

मन्दनन्दिनी — कुत इत्युक्ते मनोद्रवणस्यानिवार्यत्वं रूपकेणाह॥ नन्विति॥ कैमुत्यसिद्ध्यर्थं निषेधांतरमाह॥ सुतामपीति॥ एतच्च गृहस्थविषयमितरस्याप्रसक्तेः। अन्यदा व्यवहारयोग्यसमये॥९॥

कल्पयेदात्मनो यावदाभासमिदमीश्वरः॥
द्वैतं तावन्न विरमेत् ततो ह्यस्य विपर्ययः॥ १०॥

तात्पर्यम् — **'बहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते। अद्वैतज्ञानमित्येतद् द्वैतज्ञानं तदन्यथा। यथाज्ञानं तथा वस्तु यथावस्तु तथा मतिः॥ नैव ज्ञानार्थयोर्भेदस्तत एकत्ववेदनमि'ति च॥ १०॥**

सत्यधर्मीया — कल्पयेदात्मनो यावदिति श्लोके यावद्यावत्पर्यन्तमीश्वरो जीवस्य स्वस्य द्वैतं भेदमाभासं मिथ्या न कल्पयेत्तावत्पर्यन्तं द्वैतं न विरमेन्नोपशमं व्रजेत्। तत्सत्ता यतो जीवस्य विपर्ययो बन्धो द्वैतज्ञानेन तद्विपर्ययविपर्यय इति मोक्षसाधनमद्वैतज्ञानमित्यन्यथाप्रतीतिं प्रच्यावयितुमद्वैत-ज्ञानविपरीतत्वेन द्वैतज्ञानस्य क्रामिकं बोधनं मान इति तन्निरूपणाधीननिरूपणत्वेनादावद्वैतपदार्थं मानेन दर्शयति॥ बहुत्वेनेति। बहुत्वेन स्थितानां नानावस्तूनां यत्तेनैव प्रकारेण ज्ञानमिदमेव तद्वति तत्प्रकारकज्ञानत्वाद्यथार्थज्ञानमित्यद्वैतज्ञानमुच्यते। अन्यथाऽतस्मिंस्तत्प्रकारकज्ञानं विषयाननुरूप्येण द्वैतज्ञानमुच्यते। अद्वैतज्ञानं परिष्कृतं विवरितुमाह॥ यथेति। तत एकत्ववेदनमित्युच्यत इत्यनुकर्षः। इति चेति तन्त्रमालायामुक्तेरित्यर्थः॥ ततश्चायं श्लोकार्थः॥ बन्धदन्धनार्थं किल धर्मोऽनुष्ठातव्य इव भगवत्यर्पणीयश्चेत्यर्थे कुटुम्बनिकरुम्बावलम्बो विना तत्सत्यतां नो युज्यते। तस्य मिथ्यात्वेन स्वत एव विनाश्यत्वान्न तन्निवृत्त्यै तस्यानुष्ठेयतेति दूरवर्ति तदर्पणं चेत्यतो न भागवती सृष्टिरियं सत्येतरा सत्यसृष्टावशक्ताहि मायासृष्टिं वितन्वत इत्यादेरस्य चेश्वरत्वात्सृष्टेर्बन्धः सत्योऽतस्तन्निवृत्तौ

तत्प्रसादासादको धर्मोऽनुष्ठेयः समर्पणीयश्चेति पर्यवसाययितुं तस्येश्वरकल्पितत्वमाह ॥ कल्पयेदिति । ईश्वरः सत्यसृष्टिक्षमो यावद्यावदवसरपर्यन्तमिदमाभासं यथार्थज्ञानवदवभासमानमज्ञानमात्मनो जीव-जातस्य कल्पयेत्तावत्क्रूस्यनुसारं द्वैतमयथार्थज्ञानं न विरमेन्नापगच्छेत् । ततस्तदवस्थितेरस्य जीवस्य विपर्ययो बन्धः सत्योऽतस्तदुच्छित्त्याऽनुष्ठेयो धर्मस्समर्प्यश्च भगवतीति भावः । हिना विश्वं सत्यमित्यादिमानसिद्धतां द्योतयति । आ अभासमिति छेदेनाज्ञानमिदमिति वा ॥ १० ॥

मन्दनन्दिनी — ननु बन्धनिवृत्त्यर्थं किल निवृत्तधर्मानुष्ठानम् । ज्ञानानन्दादि स्वरूपस्य जीवस्य तद्विपरीतदुःखादिलक्षणो बन्ध एव कुतः । न च स्वातन्त्र्यादि भ्रमाद्बन्ध इति वाच्यम् । तस्यापि स्वत एव विरामसम्भवादित्यत आह ॥ कल्पयेदिति ॥ आभास्यत इत्याभासमिदं शरीरादिकं यावदीश्वर आत्मनः स्वस्य कल्पयेत्सम्पादयेत्तावद्द्वैतं स्वातन्त्र्यभ्रमादिकं न विरमेन्न निरस्येत्ततो मिथ्याज्ञानादस्य ज्ञानानन्दादिस्वरूपस्य जीवस्य विपर्ययो दुःखादिलक्षणो बन्धोऽनुवर्तत इति योजना । यथा च भगवदिच्छयैव प्राप्तमिथ्याज्ञानादिनिबन्धनसत्यबन्धनिवृत्तेस्तत्प्रसादसाध्यत्वात्तत्प्रसादाय धर्मोऽनुष्ठेय इति भावः । अत्र द्वैतपदं मिथ्याज्ञानपरम् । द्विशब्दो विरुद्धवाची भावप्रधानश्च । तथा च द्वित्वेन विरुद्धत्वेन इतं युक्तं द्वीतम् । प्रज्ञादित्वात्स्वार्थे णिच् । तदेव द्वैतं विरोधश्चाविद्यमानाकारावगाहित्वेन । एवं सम्यग्ज्ञानमद्वैतमित्येकत्ववेदनमिति चोच्यते । एकत्वेनाविरुद्धत्वेव युक्तं वेदनमेकत्ववेदनमिति मध्यमपदलोपीसमासात् । तथा च द्वैतपदस्योक्तार्थमभिप्रेत्य तात्पर्यं प्रवृत्तम् । बहुत्वेनैव वस्तूनामित्यादि । वस्तूनां वस्तुतो बहूनामिति शेषः । एवमेकस्यैकत्वेनेत्यपि ध्येयम् । तथा च यद्वस्तुतो बहूनां वस्तूनां बहुत्वेनैवैकस्यैकत्वेनैव यथार्थज्ञानं तदैवाद्वैतज्ञानमुच्यते । अद्वैतं च तत्ज्ञानमिति विग्रहः । तदन्यथा बहूनामेकत्वेनैकस्य वा बहुत्वेन ज्ञानं तत् द्वैतज्ञानमुच्यते । यथा ज्ञानं येन प्रकारेण तथा तत्प्रकारवद्वस्तु । यथा यत्प्रकारवद्वस्तु । तथा तत्प्रकारावगाहिनी मतिः । भेदो विरोधः । ततो विरोधाभावादेकत्ववेदनमित्युच्यत इत्यर्थः ॥ १० ॥

एतच्चान्यद् गृहस्थस्य समाम्नातं यतेरपि ।
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥

सत्यधर्मीया — ब्रह्मचारित्वावस्थां विना कस्याप्याश्रमान्तरस्यासम्भावितत्वात्पूर्वमनुभूता एत एतदितरे च तदितरेषामपि गृहस्थादीनां योग्या इत्यतिदिशति ॥ एतदिति । अन्यद्वक्ष्यमाणं गृहस्थस्य यतेरपि समाम्नातं यथासम्भवं तच्च ज्ञेयम् । तद्व्यवच्छेद्यं दर्शयति ॥ गुरुवृत्तिरिति । ऋतुगामिनः प्रतिऋतुभार्यागामिनो गृहस्थस्य गुरुवृत्तिः प्रागुक्तो गुरुकुलवासो ब्रह्मचर्यं भिक्षेत्येतदिका । विकल्पे व्यवस्थिते विकल्पे सत्यङ्गीक्रियमाणे न कर्तव्या नेत्यर्थः । ("विकल्पेनेति भवेदित्यर्थः" इति रवपाठः) ऋतुगामित्वं तद्वृत्त्यपगमकमिति भावः ॥ ११ ॥

मन्दनन्दिनी — ब्रह्मचारिण उक्तधर्मं गृहस्थादिष्वतिदिशति ॥ एतदिति ॥ एतदुक्तं यथा सम्भवं गृहस्थस्येति । तेन भिक्षाचरणाग्निकार्यादेरभावः । तथा च ब्रह्मचारिणो विशिष्यधर्मोक्तिर्युक्ता । अन्यच्चान्यदपि यज्ञप्रजनातिथिभोजनादि । अनेन गृहस्थस्यापि विशिष्यधर्मोक्तिर्युक्तेति । यतेरपीत्यत्रापि यथा सम्भवं बोध्यम् । अग्निकार्यादेरभावात् । अन्यदपीत्यनुवर्तनीयम् । प्रणवजपलयन्यासादेर्विद्यमानत्वात् । गृहस्थस्य गुरुकुलवृत्तिर्विकल्पितेत्याह ॥ गुरुवृत्तिरिति ॥ ऋतुगामिन इत्यनेन तदनिषिद्धमिति सूचितम् ॥ ११ ॥

अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेपामिषं मधु ।
स्रग्गन्धलेपालङ्कारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥

सत्यधर्मीया — गृहस्था अपि व्रतस्थाश्चेद्ब्रह्मचारिवदेव वर्जनीयैतत्का इत्याह ॥ अञ्जनेति । अञ्जनं नयनयोः कज्जलसमासज्जनम् । अभ्यञ्जनं तैलाभ्यङ्गादि । अञ्जनमञ्ज्यतेऽनेनेत्यञ्जनं तैलादि तेनाभ्यञ्जनमिति वा । स्त्रीचावलेपो दर्पश्च । अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि चेति विश्वः । स्त्र्यवलेखेति सुखेन पठन्तु । तत्र स्त्रीप्रतिमा चित्रिता स्त्रीकृतचित्रणं वाऽर्थः । स्त्री चावलेप इतरदूषणं चेति वा । आमिषं मांसं मधु मद्यम् । द्वन्द्वैकवद्भाव उत्तरपदलोपीसमासः । स्रक् माला गन्धलेपो गन्धानां लेपोऽलङ्कारांश्च ये धृतव्रतास्ते त्यजेयुः ॥ १२ ॥

मन्दनन्दिनी — विकल्पश्च व्यवस्थित इत्याह ॥ अञ्जनेति ॥ ये गुरुकुले धृतव्रता ब्रह्मचारिवत्संकल्पित व्रतास्तदांऽजनादींस्त्यजेयुः । यदि न धृतव्रतास्तदा कुर्युर्वा । स्त्र्यवलेपो मदकारी स्त्रीभोगार्थं सेवनीयः पदार्थः । आमिषं फले जम्बीरम् । धान्ये माषादि ॥ १२ ॥

उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च ।
त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ॥ १३ ॥

सत्यधर्मीया — एवमुक्तप्रकारेण गुरुकुले उषित्वा वासं कृत्वा साङ्गाः शिक्षाकल्पादिभिरुपेता उपनिषदस्ताभिः सहितां त्रयीं वेदमधीत्य द्विजो जन्मनोपनयनेनचेति द्विजोऽवबुध्य यावदर्थं स्वाधिकारानुसारमत्यर्थं विचार्य ॥ १३ ॥

मन्दनन्दिनी — गुरुकुलवासानान्तरं कर्तव्यमाह ॥ उषित्वेति ॥ अधीत्याक्षरावाप्तिफलकमध्ययनं कृत्वा यावदर्थं योग्यार्थं यथाबलं यथाबुद्धिबलम् । अवबुध्य विचार्य ॥ १३ ॥

दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ।
गृहं वनं वा प्रविशेत् प्रव्रजेत् तत्र वाऽवसेत् ॥ १४ ॥

तात्पर्यम् — गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेदि'ति च ॥ १४ ॥

सत्यधर्मीया — दत्वा वरमिति श्लोके गुरोरनुज्ञातो ब्रह्मचारी यदि शक्तस्तर्हि कामं स्वेच्छयैव गृहं वा गहनं (गह्वरं) वा प्रविशेदिति तदाज्ञानपेक्षयैव विशेषाश्रमस्वीकार इति भ्रमभ्रंशं काममित्यस्य गुरुपदेनान्वयमर्थाच्छंसन्मानमुदाहृत्यातनोति ॥ गुरोरिति । गुरोराज्ञानुरोधेन तदनुसारेण दूरस्थो कान्तारस्थो गृही गृहस्थो भवेत् । मूले गृहं वनं वेति सति माने दूरस्थो गृहीति विश्वासातिशयं प्रकटयितुं कठिणपुरस्कृतिरनेनैव तत्र वनं वा गृहं वेत्यन्वयकरणीयताऽसूचीति मन्तव्यम् ॥ ततश्चायं श्लोकार्थः ॥ अनुज्ञात इति । पञ्चमी प्रथमा वा । वरं तद्वरं दत्वा गुरोः कामं तदिच्छामनुसृत्य यदीश्वर उक्तवक्ष्यमाणकार्यानुगुणसामर्थ्यवान्वनं गृहं वा प्रविशेत् । तत्र गुरुसमीपे वा वसेत् । प्रव्रजेद्वा । नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वेति गुरुवासोऽपीदृशस्यानुमतोऽन्यस्य वनं वेत्याद्युक्तो वास इति विवेकः ॥ १४ ॥

मन्दनन्दिनी — गुरोः काममपेक्षितं वरं दक्षिणां दातुं यदीश्वरस्तर्हि दत्वा गृहस्थाश्रम् । वनं वानप्रस्थाश्रमं वा प्रविशेत् । प्रव्रजेद्वा । नैष्ठिकः स्यात्तत्रैव गुरुकुल एव वासयेदिति योजना । नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ ।

तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि च ॥ इति वचनात् । नैष्ठिकादन्यस्य तु दूरस्थस्य गुरुकुलादन्यत्रस्थस्य गृहाश्रमादि ज्ञेयम् ॥ तदुक्तं तात्पर्ये ॥ गुरोराज्ञेत्यादि ॥ १४ ॥

अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् ।
भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥

तात्पर्यम् — 'अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् । एवं द्विरूपो भगवान्हरिरेको जनार्दन' इति च ॥ १५ ॥

सत्यधर्मीया — अग्नौ गुरावात्मनि चेति श्लोके लोकेशस्याप्रविष्टत्वं तत्त्वतः प्रविष्टत्वं त्वतत्त्वत इति भाति । तच्च योऽग्नौ तिष्ठन्नग्नेरन्तर इत्यादिमानविमानितमतः कथमित्यतस्तत्तात्पर्यमाचार्यः प्रमाणेनैव दर्शयति ॥ अप्रविष्ट इति । सर्वगतो व्याप्तस्तेन रूपेणाप्रविष्टोऽपरिच्छिन्नत्वात् । अनुरूपवांस्तत्तत्पदार्थरूपसदृशरूपवानन्तर्गतेन रूपेण प्रविष्टः । एवमपरिच्छिन्नपरिच्छिन्नत्वेन द्वे रूपे विशेषवशेन तत्त्वव्यवहारभागिनी यस्य स तथा । एकोऽन्तर्भेदहीनः ॥ अथ मूलार्थः ॥ अग्नौ गुरौ असंशयः संशयच्छिद्गुरुरुक्तो मनीषिभिः । स गुरुर्यः क्रियाः कृत्वा वेदमस्मै ददाति च । उपनीय वदेद्वेदमाचार्यः स उदाहृतः । एकदेश उपाध्याय ऋत्विग्यज्ञकृदुच्यते । एते मान्या यथा पूर्वमेभ्यो माता

गरीयसीत्यादिवचनाद्गुरौ तज्जात्यवच्छिन्ने वन्हौ चेति क्रियावानप्रबुद्धोऽपि । भूतैः । भू च बहौ बहुः पूर्णतायामित्युक्तेर्व्याप्तैः स्वधामभिः स्वाश्रयैरप्रविष्टं भूतैस्तदाद्यैः स्वधामभिः स्वाश्रयभूतैः प्रविष्टवत्प्रविष्टमधोक्षजं पश्येत् । योगी आत्मनि स्वहृदये । पूर्ववदुर्वरितमत्रेवोत्तरत्रापि ज्ञेयम् । सर्वभूतेषु विदितात्मा । अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनामित्यादेः ।। १५ ।।

मन्दनन्दिनी — गुर्वग्न्यर्कसुरोत्तमानुपासीदित्यादौ गुर्वाद्युपासनमुक्तम् । तद्गुर्वादावधोक्षज संनिधानदर्शनपूर्वमेवेत्याह ।। अग्नाविति ।। अप्रविष्टं सर्वगतं भूतैः प्रभूतैः स्वधामभिः स्वसामर्थ्यैः । प्रविष्टवत् । नित्यवच्छ्रवणमित्यादौ इव स्वार्थे वतिः । प्रविष्टमनुरूपवन्तं तत्तद्धृदयान्तर्गतरूपवन्तमधोक्षजं पश्येदिति योजना । अप्रविष्टादि पदार्थस्तु अप्रविष्ट इत्यादि तात्पर्ये द्रष्टव्यः ।। १५ ।।

एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ।
परं विन्दति विज्ञानं परं ब्रह्माधिगच्छति ।। १६ ।।

सत्यधर्मीया — एवंविध इति ब्रह्मचार्यादिचतुष्टयविशेषणम् । स्वस्वयोग्यकर्मकृत् । परं विज्ञानमपरोक्षज्ञानं विन्दति । तदनन्तरं परंब्रह्म परमात्मानमधिगच्छति प्राप्नोति ।। १६ ।।

मन्दनन्दिनी — उक्तधर्मवतां फलमाह ।। एवमिति ।। परं विज्ञानमपरोक्षज्ञानं विन्दन्ति । अनन्तरं परं ब्रह्माधिगच्छतीति योजना ।। १६ ।।

वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसंमतान् ।
यानातिष्ठन् मुनिर्गच्छेद् ऋषिलोकमिहाञ्जसा ।। १७ ।।

सत्यधर्मीया — ब्रह्मचार्याचारवद्दुःखसाध्याचारवत्त्वेन तन्निरूपणानन्तरमवसरप्राप्तवानप्रस्थधर्मानाह ।। वानप्रस्थस्येति । यान् धर्मानिहातिष्ठन्मुनिः । अञ्जसेति ऋषिपदात्पूर्वं योजनीयम् । अञ्जसा ऋषिः सर्वज्ञो हरिस्तल्लोकं वैकुण्ठमञ्जसा ऋषिरुत्तमदेवो ऋषिलोकं प्रकाशमानं लोकमिति । ऋषिर्देवे वसिष्ठादौ दीधितावपि पठ्यत इति विश्वः । ऋषेर्हरेरिति वा । ऋषिर्हरौ तापसे च ज्ञानवत्यपि कीर्तित इति कीर्तयन्ति । त्वमग्ने प्रथमोऽङ्गिरा ऋषिर्देवानामित्यृग्भाष्ये ज्ञानत एव चर्षिरित्युक्तेः । ऋषि गतावित्यस्मादिगुपधात् क्तिचेतीन्प्रत्यये तस्य किद्भद्भावोक्तेर्गुणाभावे च निष्पन्नस्यर्षिशब्दस्य ज्ञानित्वमर्थ इति तट्टिपणोक्तेश्च । असाधारण्येन व्यपदेशन्यायेन भाष्यमिमिति भावः ।। १७ ।।

मन्दनन्दिनी — वानप्रस्थधर्मानाह ।। वानप्रस्थेति ।। ऋषिलोकं सप्तर्षिलोकम् ।। १७ ।।

न कृष्टपच्यमश्नीयादकृष्टं वाऽप्यकालतः ।
अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ।। १८ ।।

सत्यधर्मीया — कृष्टपच्यं कर्षणपक्वं नाश्नीयान्न भक्षयीत । तर्ह्यकृष्टस्य सर्वदाऽभ्यनुज्ञानं किमित्यत आह ।। अकृष्टमपीति । अकालतः कालमुल्लङ्घ्य । आममामलकादिकम् ।। १८ ।।

मन्दनन्दिनी — कृष्टपच्यं कर्षणादिना भूम्यादौ जायमानं धान्यादिकम् । अकृष्टमप्यकालतो जायमानम् । अग्निपक्वं वा नाश्नीयादिति योजना । आमं वाऽर्कपक्वमुत वाऽऽहरेदिति योजना ।। १८ ।।

वन्यैश्चरुपुरोडाशान् निर्वपेन्नित्यचोदितान् ।
लब्धे नवे नवान्नाद्ये पुराणं तु परित्यजेत् ।। १९ ।।

सत्यधर्मीया — वन्यैर्वनभवैर्दीर्घशूकादिकैः । कालचोदितांस्तत्तत्कालोक्तान् । नवे नवान्नाद्ये लब्धे उक्तरूपे पुराणं पूर्वं सङ्गृहीतं परित्यजेत् ।। १९ ।।

मन्दनन्दिनी — वन्यैरारण्यकैर्देवव्रीह्यादिभिः । तदलाभेऽन्येन वा येन केनचिल्लब्धेन कालचोदितान् दर्शपूर्णमासादिकाले विहितान् चरुपुरोडाशादीन्निर्वपेत् । पुराणं जीर्णं तु परित्यजेदिति योजना ।। १९ ।।

अग्न्यर्थमेव शरणमुटजं वाऽद्रिकन्दरम् ।
श्रयेत हिमवाय्वग्निवर्षार्कातपनान् स्वयम् ।। २० ।।

सत्यधर्मीया — अग्न्यर्थमाशुशुक्षणिरक्षार्थम् । शरणं गृहम् । तत्किमात्मकमित्यत आह ।। उटजं वाऽद्रिकन्दरं वाऽऽश्रयेतेति । पर्णशालोटजोऽस्त्रियामित्यमरः । उटजस्तृणपर्णादिरिति देशीकोशादुटजाज्जायते । अन्यत्रापीति डः । आतपनस्तापः । तपनस्तरणौ तापे भल्लाते नरकान्तर इति विश्वः । श्रयेत सहेतेत्यर्थः ।। २० ।।

मन्दनन्दिनी — अग्न्यर्थमेवाग्निरक्षणार्थमेवोटजं पर्णशालामद्रिकन्दरं वाऽऽश्रयेत् । स्वयं तु हिमादींस्तत्सहनवान् भवेदिति योजना ।। २० ।।

केशरोमनखश्मश्रुमलानि जटिलो दधत् ।
कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ।। २१ ।।

सत्यधर्मीया — केशाः शिखाः । रोमाणि उरःस्थितानि । श्मश्रूणि मुखगानि । मलमेषु वा स्वतन्त्रं गात्राप्रक्षालनेन वा तानि दधत् । जटिलो जटावान् । जटिलस्तु जटायुत इति विश्वः । इलजन्तः । वल्कलं चीरवासो वलतेर्बाहुलकात्कलः । वल्को वल्कलमस्त्रियामित्यमरः । वल्कं लातीति वा । अग्निपरिच्छदानरण्यादीन् दधत् ॥ २१ ॥

मन्दनन्दिनी — केशान् शिरसि विद्यमानान् रोमाणि कक्षोपस्थादौ विद्यमानान्नखान् श्मश्रूणि मुखे विद्यमानानि । एतद्रूपाणि मलानि देहसम्पृक्तमृदं वा । एवं कमण्डल्वादीनि वल्कलानि परिधानयोग्यानि वृक्षत्वग्रूपाणि । अग्निपरिच्छदान् दर्भान् दधत् ॥ २१ ॥

चरेद् वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ।
द्वावेकं वा यथाबुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥

सत्यधर्मीया — द्वादशाब्दान् वत्सरान् । यथायथमन्वेत्यब्दपदम् । बुद्धिः कृच्छ्रतो यथा न विपद्येत न भवेन्नष्टा तथाचरेत् ॥ २२ ॥

मन्दनन्दिनी — मुनिर्वनस्थो बुद्धिः कष्टतो यथा न विपद्येत । तथा द्वादशाब्दानष्टौ चतुरो वा द्वावेकं वा वने चरेदिति श्लोकद्वययोजना ॥ २२ ॥

यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाऽथवा ।
आन्विक्षिक्यां च विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥

सत्यधर्मीया — अकल्पोऽदक्ष आन्वीक्षक्यां विद्यायाम् अनु श्रवणोत्तरमीक्षेक्षणमन्वीक्षा सा प्रयोजनमस्याः तदस्य प्रयोजनमिति ठक् । आन्वीक्षकी दण्डनीतिस्तर्कविद्येत्यमरः । निरर्थिकाया आन्वीक्षक्या इतरेयमिति ज्ञेयम् । दण्डश्च भगवांस्तन्नीतिरान्वीक्षकी । यथोक्तं शान्तौ राजधर्मेषु दण्डप्रजागरे भीष्मेण । दण्डो नारायणो विष्णुर्यज्ञो नारायणः प्रभुरिति । दण्डनीतिर्जगद्धात्री दण्डो हि बहुविग्रह इति च ब्रह्ममीमांसायाम् । तदाऽनशनादिकं कुर्यात् । आदिपदेन तत्रासामर्थ्ये मासे पक्षेऽहनि वाऽशनं कुर्यात् । यथोक्तं याज्ञवल्क्येन । पक्षे गते वा प्राश्नीयान्मासे वाऽहनि चागत इति ॥ २३ ॥

मन्दनन्दिनी — उक्तो वनस्थो यदा व्याधिभिर्जरया वा स्वक्रियायामग्निहोत्रेष्ट्यादि क्रियायामान्वीक्षिक्यां ब्रह्मापरोक्षहेतुभूतायां विद्यायां ब्रह्मविद्यायां तदुपदेशेऽकल्पोऽसमर्थस्तदा प्राणांस्त्यक्तुमनशनादिकं कुर्यात् ॥ २३ ॥

आत्मन्यग्नीन् समारोप्य संन्यस्याहं ममात्मताम् ।
कारणेषु न्यसेत् सम्यक् सङ्घातं तु यथार्हतः ।। २४ ।।

तात्पर्यम् —— 'कार्यस्य कारणलयज्ञानमात्रं विलापनमि'ति च ।। २४ ।।

सत्यधर्मीया —— कारणेषु न्यसेत्सम्यगिति श्लोके कारणेषु सङ्घातं न्यसेदित्युक्तम् । न्यसनं किंरूपमित्यतस्तदर्थं कथयन्मानमुदाहरति ।। कार्यस्येति । सङ्घातमित्यस्य कार्यमित्यर्थः । कारणे लयज्ञानमात्रं न्यासशब्दार्थो विलापनमिति ।। ततश्चायं श्लोकार्थः ।। वानप्रस्थस्यानशनादिके कर्तव्ये तत्प्राक्कर्तव्यमाह ।। आत्मनीति । अग्नीन्गार्हपत्यादीनात्मनि स्वस्मिन्नारोप्य देहगेहादावहंममात्मतां सन्न्यस्य त्यक्त्वा कारणेषु सङ्घातं कार्यम् । यथार्हतस्तत्कार्यं तत्तत्कारणेषु सम्यङ्न्यसेल्लापयेत् । तत्र लीयते तदधीनं चेति सम्यक् चिन्तयेत् । कारणे लापयेदिति क्वचित्पाठः । स च विलापनमिति तात्पर्यश्लिष्ट इति श्लाघिष्ठ इति केचित् ।। २४ ।।

मन्दनन्दिनी —— अग्नीनाहवनीयादीन् आत्मनि देहे आरोप्याहं ममात्मतामहं स्वतन्त्रो ममेदं शरीरादिकमित्यहङ्कारममकारौ संन्यस्य संत्यज्य सङ्घातं कार्यम् । यथार्हतो यथायोग्यं कारणेषु सम्यक् न्यसेत् । तत्र लीनं चिन्तयेत् । यद्यपि योगिमृतकाले लयो नास्ति तथाऽपि तदज्ञानमेव विलापनम् । तदुक्तं तात्पर्ये ।। यदज्ञानमित्यादि ।। २४ ।।

खे खानि वायौ निःश्वासान् तेजस्यूष्माणमात्मवान् ।
अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ।। २५ ।।

सत्यधर्मीया —— यथार्हत इत्युक्तं विशदयति ।। ख इति । खे आकाशे खानि शरीराकाशानि । निःश्वासं शारीरं वायुं वायौ बाह्यो ऊष्माणं तेजसि । आत्मवान्मनस्वी । असृक्श्लेष्मपूयान्यप्सु । क्षितौ शेषं गन्धम् । लाघवादीनामाकाशोत्पन्नत्वात्कुतस्तदनुक्तिरित्यत आह । यथोद्भवमाकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं तथा बलम् । वायोस्तु प्रेरणा चेष्टा व्यूहनं सौक्ष्म्यमेव च । अग्नेस्तु दर्शनं शक्तिरौष्ण्यं रूपप्रकाशनम् । रसेभ्यो रसनं शैत्यं स्नेहक्लेदनमार्दवम् । भूमेर्गन्धस्तथा घ्राणं गौरवं मूर्तिरेव चेति वचनादुत्पत्त्यनुसारेण लयश्चिन्तनीय इत्यर्थः ।। २५ ।।

मन्दनन्दिनी —— तदेव विवृणोति ।। ख इति ।। खानि मुखनासिकाश्रोत्रोदरविवराणि । आत्मवान् जितमनस्कः । शेषमुक्तादन्यत्कठिणभागशरीरं यथोद्भवं कार्यकारणभावमनुसृत्य । अनेनान्येषामपि पञ्चभूतकार्याणां लाघवादीनामाकाशादिषु लयसङ्ग्रहो वचनान्तरानुसारात्सूचितः ।

वचनन्तु–

आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं तथा बलम् ।
वायोस्तु प्रेरणा चेष्टा व्यूहनं सौक्ष्म्यमेव च ।
अग्नेस्तु दर्शनं शक्तिरौष्ण्यं रूपप्रकाशनम् ।
रसेभ्यो रसनं शैत्यं स्नेहक्लेदनमार्दवम् ।
भूमेर्गन्धस्तथा घ्राणं गौरवं मूर्तिरेव च ॥

इति टीकायामुदाहृतम् ॥ २५ ॥

वाचमग्नौ सवक्तव्यमिन्द्रे शिल्पं करावपि ।
पदानि गतिभिर्विष्णौ रत्योपस्थं प्रजापतौ ॥ २६ ॥

सत्यधर्मीया –– इदानीं वागादीन्द्रियाणामग्न्यादिदेवताधारत्वमपि चिन्तनीयमित्याह ॥ वाचमिति । सवक्तव्यामिति पाठे क्रियाविशेषणम् । विशेषणं च वाचः सवक्तव्यमिति पाठ इति ज्ञेयम् । इन्द्रे शिल्पं करव्यापारम् । करावपि गतिभिर्गमनादिभिः कार्यैः सह पदानि पादौ अङ्गुल्याद्यवयवविवक्षया पदानीति बहुवचनम् । त्रिपादबहुपादसङ्ग्रहार्थं पदानीति बहुवचनं वा । ज्वरस्त्रिपाद इत्यादेः । विष्णौ यज्ञे । गतिभिः पदानि वयसीत्यपि क्वचित्पाठः । तत्र द्वासुपर्णा द्विखग इत्यादेर्वयोरूपिणि हरावित्येवार्थः । रत्या सहोपस्थं गुह्येन्द्रियं प्रजापतौ दक्षे ॥ २६ ॥

मन्दनन्दिनी –– देहभागानां पञ्चभूतकार्याणां तत्तल्लयमुक्त्वा कर्मेन्द्रियाणां सव्यापाराणामभिमानिदेवतासु अधीनत्वरूपलयचिन्तनमाह ॥ वाचमिति ॥ सवक्तव्यमिति क्रियाविशेषणम् । वाचं वक्तव्यं स्वहितं यथास्थानम् । अधिष्ठातृतया स्वस्थितिमनुसृत्याग्नौ विनिर्दिशेत् । तदधीनत्वरूपलयं चिन्तयेदिति योजना । एवमुत्तरत्रापि दक्षापेक्षयेन्द्रस्य मुख्याभिमानित्वादिन्द्रे शिल्पं करावपीत्युक्तम् । विष्णौ दक्षिणपादाभिमानिनि जयन्ते एकम् । वामपादाभिमानिशम्भावित्यपि ज्ञेयम् । प्रजापतौ दक्षे तत्समे मनौ चेति ग्राह्यम् । तेन न प्रसिद्धिविरोधः ॥ २६ ॥

मित्रे पायुं विसर्गं च यथास्थानं विनिर्दिशेत् ।
दिक्षु श्रोत्रं स नादेन स्पर्शेनाध्यात्मनि त्वचम् ॥ २७ ॥

सत्यधर्मीया –– मित्रे पायुं विसर्गं मेहनं च । यथास्थानमभिमानिष्वभिमन्यमानानां जनकेषु जन्यानां चेति यथास्थानं विनिर्दिशेत् । स वनगो नादेन शब्देन सह श्रोत्रं दिक्षु । स्पर्शेन सह त्वचं त्वगिन्द्रियम् । अध्यात्मनि वायौ ॥ २७ ॥

मन्दनन्दिनी — मित्रे तन्नामके सूर्ये । मृत्याविति पाठे मृत्युपदेन मित्र एवान्यो वा कश्चन देव इति ज्ञातव्यम् । ज्ञानेन्द्रियाणां यथास्थानं देवतासु लयमाह ॥ दिक्ष्विति ॥ सनादेन श्रोतव्येन । अध्यात्मनि प्राणे । तस्यैव त्वगभिमानितयाऽऽत्मशब्दवाच्यसर्वदेहव्यापित्वात् ॥ २७ ॥

रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् ।
अप्सु प्रवेशयेद् जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥
मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ॥ २८ ॥

तात्पर्यम् — परः कविर्बृहस्पतिः ॥ २८ ॥

सत्यधर्मीया — ज्योतिषि सूर्येऽप्सु जिह्वां प्रवेशयेत् । रसेन सहेति ज्ञेयम् । घ्रैयैर्गन्धैः क्षितौ क्ष्मायाम् । मनोरथैरभिलाषैः सह चन्द्रे इति श्लोके कविः किमुशना अथवा कविर्मनीषी कविं पुराणमित्यादेर्हरिः कश्चिद्विपश्चित्काव्यकरो वेति सन्देहं मन्दयन्नत्र विवक्षितमर्थमनूद्याह ॥ परः कविरिति । बृहस्पतिः । कवति कुशब्दे । अच इः कौतीति वा परः कविः शुक्रभिन्नो गुरुत्वेन तत्सदृश इति बृहस्पतिर्ग्राह्य इत्यर्थः । परे कवौ बृहस्पतौ बुद्धिं बोद्धव्यैरर्थैः सह ॥ २८ ॥

मन्दनन्दिनी — ज्योतिषि सूर्येऽभिनिवेशयेदित्येतत्पूर्वत्राप्यन्वेति । जिह्वां रसनीयेन सहेति शेषः । अप्सु वरुणे । घ्रेयैर्घ्रातव्यैः क्षितावश्विनोर्मुख्याभिमानित्वेऽपि धराया अमुख्याभिमानित्वमस्तीत्येवमुक्तिः । मनो बुद्धिरहङ्कारश्चित्तं चेतनेति पञ्चविधमनसोऽभिमानिदेवतासु लयमाह ॥ मन इति ॥ परे कवाविति परशब्देन विशेषणाद्बृहस्पतिरेव ग्राह्यः ॥ तदुक्तं तात्पर्ये ॥ पर इत्यादि ॥ २८ ॥

कर्माण्यध्यात्मना रुद्रे यदहंममताः क्रियाः ।
सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥

तात्पर्यम् — 'चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि । क्षेत्रज्ञाख्ये लापयेच्च ततो नान्यत्स्मरेद्बुध' इति च ॥ २९ ॥

सत्यधर्मीया — सत्त्वेन चित्तं क्षेत्रज्ञ इति श्लोके क्षेत्रज्ञे हरौ चित्तस्य साक्षाल्लयः कथ्यते तदनुपपन्नम् । साक्षादतत्कारणत्वात्तस्येत्यतो मानेनैव तदर्थमाह ॥ चित्तमिति । चित्तं तदभिमानिनं रुद्रं हिरण्यगर्भे तत्कारणे कार्यब्रह्मणि विलाप्यत्वात् । तं परमात्मनि मा चासावात्मा च परोक्षत्वेन च मात्मा च तस्मिन् । प्राणस्तेजसि तेजः परस्यां देवतायमित्यादेः । ततस्तां क्षेत्रज्ञाख्ये परदेवतायां विलापयेत् । स लयोऽपि न शर्वादिसर्ववद्विलनं किन्तु हिरण्यगर्भस्य, प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतम् । प्राणो हिरण्यगर्भ इति तत्त्वप्रकाशिकोक्तेः । हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः

प्रकीर्तित इत्याद्युक्तोऽनुसन्धेयः । ततोऽन्यद्बुधो गृहादि न स्मरेत् । तुनाऽमुं लये विशेषं सूचयामासेति ज्ञेयम् । यद्यङ्गीकार्यो न साक्षात्त्यक्षस्य परमात्मनि लयः । तर्ह्ययमपि लक्ष्मीमतिहाय साक्षाद्भगवति लीयत इत्यङ्गीकर्तुमुचितं तत एव बाधकादिति शङ्कैवमन्वयेऽनन्वयिनीति मन्तव्यम् ॥ ततश्चायं मूलार्थः ॥ अध्यात्मनाऽहन्तत्त्वेन सह । तत्र हेतुमाह ॥ यदिति । यद्यस्मात्क्रियाः सर्वा अहं यत्प्रकृति-परिणामवाचि मकारान्तमव्ययमहंपदमिति सुधोक्तेरहमहङ्कारात् । ममता उत्पन्नास्ततो रुद्रेऽध्यात्मना सह कर्माणि लीयन्त इति चिन्तयेत् । सत्त्वेन साधुगुणेन महत्त्वेन सह चित्तं रुद्रं परे तत्कारणे चतुर्मुखे तं वैकारिकं ब्रह्माणं पर इत्यावर्तते श्रीतत्त्वे गुणैः सह चिन्तयेत् । तं परं क्षेत्रज्ञे भगवति चिन्तयेत् । अथवा क्षेत्रं च रमा तया सहितो ज्ञः सर्वज्ञस्तस्मिन्निति योजना । तात्पर्ये परमात्मनीत्युक्तिर्नातिरिक्ता भूमिकैवं व्याख्यानस्य भवतीति ज्ञेयम् । विकार एव वैकारस्तदस्यास्तीति वैकारी स चासौ कश्च ब्रह्मा चेति तमिति वा । मूले तात्पर्ये च रमाऽग्रहणं गिलनरूपमुख्यामुख्यलयमात्रविवक्षयेति परे क्षेत्रज्ञे परमात्मनि क्षेत्रज्ञ इति सामानाधिकरण्येनान्वय इति वा ॥ २९ ॥

मन्दनन्दिनी — अध्यात्मनाऽहङ्कारात्मकवृत्तियुक्तेन मनसा सह कर्माणि रुद्रे । कर्मणामहंकार-सम्बन्धमुपपादयति ॥ यदिति । अहं करिष्यामीत्यभिमानेन कृतत्वात्क्रियाणामहं संमतत्वम् । सत्वेन साधुपुण्येन सह चित्तं क्षेत्रज्ञे परमात्मनि । यद्यपि चित्तस्य स्वाभिमानिनि हिरण्यगर्भे लयः । तथाऽपि तद्द्वारा परमात्मनीति ज्ञातव्यम् ॥ तदुक्तं तात्पर्ये ॥ चित्तमित्यादि । वैकारिकं चेतनावृत्त्यभिमानिनं वैकारिकं तदाख्यं हिरण्यगर्भं गुणैः सह परे परमात्मनि ॥ २९ ॥

अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ।
कूटस्थे तच्च महति तदव्यक्तेऽक्षरे तु तत् ॥ ३० ॥

सत्यधर्मीया — इदानीमबादीनां लयप्रकारमालपति ॥ अप्स्विति । क्षितिं भूमिमप्सूदके । ता आपो ज्योतिषि वह्नौ अदस्तत् । वायौ । अमुं वायुं नभस्याकाशे । अमुमाकाशं कूटस्थे वैकारिकतैजसतामससमूहरूपेऽहन्तत्त्वे । तच्च महति महत्तत्त्वे । तच्चाव्यक्ते तेजसि रमायाम् । तदव्यक्तमक्षरे नारायणे । तुश्च जडकार्यस्य कारणजडैकताप्रवेशोऽभिमानवतां तत्कार्यगतचेतनानां स्वांशिकारणगतचेतनाद्रूप्यमित्याक्षरावसानं लयविशेषसूचकः ॥ ३० ॥

मन्दनन्दिनी — क्षितिमारभ्याव्यक्तान्तं लयमाह ॥ अप्स्विति ॥ कूटस्थे वैकारिकादिभेदेन समुदायस्थेऽहङ्कारतत्त्वे ॥ ३० ॥

इत्यक्षरतयाऽऽत्मानं चिन्मात्रमवशेषितम् ।
ज्ञात्वाऽद्वयोऽथ विरमेद् दग्धयोनिरिवानिलः ॥ ३१ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे द्वादशोऽध्यायः ।

तात्पर्यम् — आत्मानं परमात्मानम् । अद्वयः । ततोऽन्यस्मृतिवर्जितः । दग्धयोनिर्यथानल इति कृत्याभावमात्रम् । 'न हरिं स्मरतः कृत्यं दग्धेन्धनहुताशवदि'ति च ॥ ३१ ॥

इति सप्तमतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

सत्यधर्मीया — इत्यक्षरतयाऽऽत्मानमिति श्लोके आत्मपदं न जीववाचीति बोधयितुमनूद्य व्याचक्रे ॥ आत्मानमिति । परमात्मानं हरिम् । तत्रैवाद्वय इति द्वितीयवस्तुविकल इत्यर्थमनर्थीकरोति ॥ अद्वय इति । ततः कार्यकारणलयचिन्तनादन्यस्य पुत्रादेः स्मृतिवर्जितः । एतदनुरूपं विवक्षितार्थवर्णनेन दग्धयोनिर्यथाऽनल इति निदर्शनं कृत्वा तत्र मानमान्दोलयच्छिर उदाहरति ॥ इति कृत्याभावमात्रमिति । हरिस्मरणातिरिक्तकरणीयविरहाभिप्रायेण तन्निदर्शनप्रदर्शनमिति भावः । दग्धेन्धनहुताशयस्य यथा दाह्यविरामादनुज्वलनं तथा हरिं स्मरतः कृत्यं न नास्तीत्यर्थः ॥ ततश्चायं पद्यार्थः ॥ इत्येवं प्रकारेणाक्षरतया सर्वलयालयत्वेन स्वयं निर्लय इत्यक्षरत्वेनात्मानं परमात्मानं चिन्मात्रं ज्ञानानन्दात्मकमवशेषितं शिष्टं ज्ञात्वाऽथाद्वयो हरिव्यतिरिक्तस्मरणीयान्तररहितो दग्धयोनिर्दग्धा योनिः काष्ठलक्षणस्वकारणं येन सोऽनलो यथा निर्व्यापारस्तथाऽकृत्यादन्यदा कार्यत्वेन प्रसक्ताद्विरमेत् ॥३१॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमे द्वादशोऽध्यायः ॥ ७-१२ ॥

मन्दनन्दिनी — अक्षरतयाऽक्षरलक्षणलयरहिततया । आत्मानं परमात्मानम् । जडस्यान्तर्लयाच्चिन्मात्रमवशेषितं ज्ञात्वाऽद्वयो भगवतोऽन्यत्स्मृतिवर्जितः । दग्धयोनिरिव दग्धारणिरनल इव कृत्यान्तराभावाद्विरमेत् । उपरतो भवेदिति योजना । अत्रात्मादि पदानां परमात्माद्याधारत्वे तात्पर्यम् ॥ आत्मानमित्यादि ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे द्वादशोऽध्यायः ॥ ७-१२ ॥

॥ अथ त्रयोदशोऽध्यायः ॥

नारद उवाच –

कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ।
ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥

सत्यधर्मीया — क्रमप्राप्तं यमिधर्मनियममाह ॥ कल्प इति । यदि कल्प एवमुक्तं श्रमं सोढुं समर्थः परिव्रज्य सन्न्यासं सम्पाद्य । तर्हि देहमात्रावशेषितः केवलदेहो देहमात्रं तदवशेषितं यस्येति तेनावशेषितः । ग्रामैकरात्रविधिना एकस्मिन्ग्राम एकारात्रिर्यस्येति स चासौ विधिश्च तेन । सङ्ख्यापूर्वकत्वादेकरात्रमित्यजन्तम् । निरपेक्षो विषयाभिलाषशून्यो महीं चरेत् । अमुं नियमं अधीतवेदो जपकृत्पुत्राद्यानन्ददोऽग्निमान् । शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथेति तुना तुदति । यदहरेव विरजेत्तदहरेव प्रव्रजेदित्याद्यपवादाद्ब्रह्मचारिणोऽपि यत्याश्रमग्रहणदर्शनाच्च । उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् । वेदमध्यापयेत्पश्चाच्छौचाचारांश्च शिक्षयेदिति वचनात्पारमहंस्ययोग्यता सम्भवति बटोः ॥ १ ॥

मन्दनन्दिनी — क्रमात्प्राप्तं यतिधर्मं निरूपयति अस्मिन्नध्याये ॥ कल्प इति ॥ यदा कल्पः स्वक्रियायां व्याधिभिरित्यत्र कल्पस्यात्मारोपणेनानशनादिना विराम उक्तः । इदानीं कल्पस्तु वनस्थो विरक्तश्चेत्परिव्रजेदिति संन्यासं विधत्ते । वस्तुतो वैराग्यमात्रं सर्वाश्रमिणोऽपि संन्यासे निमित्तम् । यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतेः । एवमुक्तलयमनुसन्धाय देहातिरिक्तं सर्वं परित्यज्य देहमात्रावशेषितो ग्रामैकरात्रविधिना निरपेक्षो वित्ताद्यनपेक्षो महीं चरेदिति योजना । कल्प इत्युक्त्या महीचरणासमर्थश्चेत्क्षेत्रादौ व्याख्यानादिना वसेदित्यपि ग्राह्यम् ॥ १ ॥

बिभृयाद् यद्यसौ वासः कौपीनाच्छादनं परम् ।
त्यक्तं न लिङ्गदण्डाभ्यामन्यत् किञ्चिदनापदि ॥ २ ॥

सत्यधर्मीया — कुटीचो बहूदो हंसः परमहंसश्चेति चतुर्विधेषु सन्न्यासिषु परमहंसस्य देहमात्रावशेषितत्वमुक्तम् । तस्यापवादमाह ॥ बिभृयादिति । असौ परमहंसो यदि वासो बिभृयात् । अनेन वासोराहित्यमेव मुख्यमभिप्रैति । तर्हि कौपीनाच्छादनं कौपीनं गुह्यं तदाच्छादनं परं केवलं बिभृयात् । तदपि वर्जितस्वार्जितत्वेन कथं प्राप्यमित्यत आह ॥ त्यक्तमिति । दत्तम् । तेन त्यक्तेन भुञ्जीथा इतीशावास्योपनिषद्भाष्ये त्यक्तेन दत्तेनेत्युक्तेः । परकीयैर्दत्तमित्यर्थः । कौपीनेन सहितमाच्छादनं चेति वा । शीतातपनिवारार्थमेकमाच्छादनं यतेः । कौपीनात्परमित्याहुरेकेनान्यद्विना

वपुरिति वचनात् । लिङ्गदण्डाभ्यां लिङ्गं चक्रशङ्खादिकं दण्डो मस्करः । दण्डो वाग्देहचेतसामिति वक्ष्यमाणत्वात् । एवं त्रिदण्डी परमहंसः । त्रिदण्डित्वस्यानेतल्लक्षणत्वात् । सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुरिति वचनं चैतदभिप्रायम् । अन्यथा लिङ्गदण्डैरित्यवक्ष्यत् । अनापद्यन्यत्किञ्चिन्न बिभृयात् । आपदि तु बिभ्रन्न भ्रश्यति यतिनियतित इति ज्ञेयम् । केचित्तु प्रसरद्वसनवासना विना समुच्चायकं कौपीनमेकमेकं चाच्छादनमाच्छादकं परिधानीयं परमन्यच्चोत्तरीयं चेति वर्णयन्ति । कौपीनं स्यादकार्ये च गुह्यचीरप्रभेदयोरिति विश्वः । शालीनकौपीने अधृष्टाकार्ययोरिति स्वयं तत्त्वेन निपातितौ शब्दौ । शालां प्रवेष्टुमर्हति कूपपतनमर्हतीति च । शालीनो धृष्टः कौपीनं पापं तत्साधनत्वाद्गोप्यत्वाद्वा पुरुषलिङ्गं तत्सम्बन्धात्तदाच्छादनमपि वासः खण्ड इत्यर्थः । अन्ये त्वाहुः । अकार्यशब्दे यः करोति स क्रियासामान्यवचनः । तेन लज्जाहेतुत्वेनाद्रष्टव्यत्वात्पुरुषलिङ्गं कौपीनम् । अस्पृश्यत्वात्तदाच्छादन-माहुरिति सिद्धान्तकौमुदीतत्त्वसुबोधिन्यभिधानाद्वस्त्रखण्ड इत्यर्थः ॥ २ ॥

मन्दनन्दिनी — यदीत्यनेन वस्तुतो दिग्वासस्त्वमेवेति ध्वनितम् । यदि वासो बिभृयाद्गुह्यं गूहनार्थं लोकप्रार्थनया वा वासो धर्तुमिच्छेत्कौपीनाच्छादनम् । परं वासो बिभृयादिति योजना । कौपीनं चाच्छादनं च तयोः समाहारः कौपीनाच्छादनम् । सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीत्युक्तेः । न तु कौपीनरूपाच्छादनम् । कूपपतनमर्हतीत्यर्थे कुपशब्दात् खय् प्रत्यये नरकपतनसाधनम् । पापं कौपीनम् । तत्साधनत्वात् लिङ्गमपि कौपीनं तदाच्छादनत्वाद्वस्त्रमपि निरूढलक्षणयोच्यते । तथैव वैयाकरणेषु निरुक्तेः । सत्कौपीनः पीनकृष्णजिनश्रीरित्यादिप्रयोगाच्च । तथा च कौपीनपदेनैवाच्छादनलाभे तदन्यनितम्बाच्छादनमेवाच्छादनपदेनैव ग्राह्यम् । अत एव मध्वविजये —

शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषबाह्यवस्त्रम् ।
ननु कुक्षिगलालिकेषु रेखात्रितयेन प्रकटेन शोभमानम् इति ॥

कौपीनातीरिक्तं नितम्बाच्छादनमुक्तम् । परमुत्तमम् । शीतातपादिनिवारणदक्षमन्यदाच्छादनम् । यथोक्तं मध्वविजये —

मृदुसूक्ष्मघनारुणाविकाच्छः प्रकटप्रावरणेन भासमानम् ।
अतिनूतनतिग्मभानुभासां निकरेणेव सुवर्णसानुमन्तम् ॥ इति ॥

न च शीतातपनिवारणार्थमेकमाच्छादनं यतेः कौपीनात्परमित्याहुः । एकेनान्यद्भिना वपुरिति वचनविरोधः । तत्रैकशब्दस्य शीतातपादिनिवारणदक्षत्वरूपमुख्यत्वपरत्वात् । अन्यथैकत्वपरत्वे कौपीनेन द्वित्वप्राप्त्या विरोधात् । नितम्बाच्छादनप्रापकमध्वविजयविरोधाच्च । न चेदमेव शीतातपनिवाराणार्थं नितम्बाच्छादनमपीति वाच्यम् । बहिर्वाससो नाभेरधो निषिद्धत्वात् । मध्वविजये

नितम्बाच्छादनस्य कौशेयत्वस्य वातातपनिवारार्थस्याविकत्वस्योक्तेश्च । किञ्चैकत्वसंख्यार्थकत्वे करवस्त्रमपि न स्यात् । तथा च मध्वविजयविरोधः । करगपटपिण्डार्थमतिकृदिति तत्रोक्तेः । तस्मादेवमेव ज्ञेयम् । त्यक्तमप्सु त्यक्तं वासो न पुनर्बिभृयात् । देहमात्रावशेषित इत्यस्यापवादान्तरमाह ॥ लिङ्गदण्डाभ्यामिति । लिङ्गं कमण्डल्वादिकम् । अत्र द्विवचनेन दण्ड एक इति सूचितम् । न तु त्रिदण्ड इति ।

त्रिदण्डधारिणं भिक्षुं द्विजं चापि त्रिशूलिनम् ।
गार्दभं यानमारोप्य स्वराष्ट्राद्विप्रवासयेत् इति ॥

बहुवचनविरोधात् । न च चतुर्धा भिक्षवो विप्राः सर्वे चैव त्रिदण्डिन इत्यादि त्रिदण्डविधिविरोध इति वाच्यम् । तस्य दण्डो वाग्देहचेतसामिति वक्ष्यमाणरीत्या दण्डत्रयदण्डनविधिपरत्वात् । तथा च लिङ्गदण्डाभ्यामन्यदनापदि न बिभृयादिति योजना ॥ २ ॥

एक एव चरेद् भिक्षुरात्मारामोऽनपाश्रयः ।
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥

सत्यधर्मीया — भिक्षुः परिव्राडात्माराम आत्मनि बुद्धौ रमत इति स तथा । आत्मा स्वभावधृतिबुद्धिष्विति विश्वः । अनपाश्रयो नगराद्यावासविधुरः । यथाऽऽह याज्ञवल्क्यः । एकारामः परिव्रज्य भैक्ष्यार्थं ग्राममाश्रयेत् । अप्रमत्तश्चरेद्भैक्ष्यं सायान्हेऽनुपलक्षित इति । सर्वभूतसुहृत्सर्वभूतानि सुहृन्दि यस्य सः शान्तो निष्कोपो नारायणपरायणः सदा तदासक्तः ॥ ३ ॥

मन्दनन्दिनी — एक एव पत्न्यादिरहित एव । तेन शिष्यपरिवृतत्वेऽपि न दोषः । आत्मारामः परमात्मालोचनलब्धसुखवान् । अनपाश्रयो ग्रामाद्यावासरहितः । यथाऽऽह याज्ञवल्क्यः ॥

एकारामः परिव्रज्य भैक्षार्थं ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने उपलक्षितः ॥ इति ॥

सर्वभूतेषु सुहृद्धितो नारायण एव मुख्याश्रय इति ज्ञानवान् ॥ ३ ॥

पश्येदात्मन्यदो विश्वं परे सदसतोऽद्वये ।
आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥

तात्पर्यम् — आत्मनि परमात्मनि ॥ ४ ॥

सत्यधर्मीया — पश्येदात्मन्यदो विश्वमित्यत्रात्मपदं स्ववाचकमिति प्रतीतिं वारयितुमनूद्य स्वयं व्याख्याति ॥ आत्मनि परमात्मनीति ॥ ततश्चायं मूलार्थः ॥ अदो विश्वं जगदात्मनि परमात्मनि पश्येत्तदाधारमिति जानीयात् । कुतो हरेरेतदाधाररूपतेत्यतो निरूपयति ॥ सदसतः पर इति । मूर्तामूर्तकार्याकार्योत्कृष्ट इति । अद्वये निरस्तस्वसमानवस्तुनि । सदसन्मये जगति चात्मानं स्वामित्वेन स्थितं परं ब्रह्म च पश्येत् । सदसन्मय इत्यसङ्कोचसूचकं सर्वत्रेति ॥ ४ ॥

मन्दनन्दिनी — नारायणपरायणत्वं विशदयति ॥ पश्येदिति ॥ अद्वये सदृशरहिते । सदसतो मूर्तामूर्तजगतः । परे उत्कृष्टे । उत्कषार्थकत्वादेव न सर्वनामसंज्ञा । आत्मनि यथोक्तविशेषणायोगात् । अत एव परमात्मनीति तात्पर्यम् । अदो विश्वं प्रामाणिकं सर्वजगत् । सदसन्मये मूर्तामूर्तात्मके सर्वत्र जगति परं सर्वोत्कृष्टं ब्रह्म गुणपूर्णमात्मानं परमात्मानं पश्येदिति योजना ॥ ४ ॥

सुप्तप्रबोधयोः सन्धावत्मनो गतिमात्मदृक् ।
पश्यन् बन्धं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥

सत्यधर्मीया — सुप्तं सुप्तिः प्रबोधो जागरणं च तयोः सन्धावुषःप्रदोषरूपकाले । आत्मनो गतिं तदवस्थाप्रदत्वेन गम्यम् । सता सोम्य तदा सम्पन्नो भवति । अतः प्रबोधोऽस्मात् । प्राज्ञेनात्मनेत्यादेः । आत्मदृक् स्वयोग्यतामनुसन्दधद्बन्धं मोक्षं च मायामात्रं भगवदिच्छया मातं त्रातं च । तथा वस्तुतः वस्तु शक्तं स्वतन्त्रत्वेनेति यावत् । न पश्येन्नानुसन्दध्यात् ॥ ५ ॥

मन्दनन्दिनी — सुप्तप्रबोधयोः सन्धौ शयनोत्थानयोः सन्धौ । आत्मदृगात्मज्ञानी । आत्मनः स्वस्य गतिं सत आगम्य न विदुः । सत आगच्छाम इति सति सम्पद्य न विदुः सति सम्पत्स्याम इत्युक्तप्रकारेण पश्यन् बन्धं मोक्षं च वस्तुनः । स्वतन्त्रवस्तुनो भगवतः सकाशात्स्थितं मायामात्रं भगवदिच्छया निर्मितं त्रातं च पश्यन् नाभिनन्देदिति योजना ॥ ५ ॥

नाभिनन्देद् ध्रुवं मृत्युमध्रुवं वा स्वजीवितम् ।
कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥

सत्यधर्मीया — मृत्युं ध्रुवं स्वसामर्थ्येन नियत्या गच्छति स इति नाभिनन्देत् नानुमोदेत । स्वजीवितं स्वत एवाध्रुवमिति नाभिनन्देत् । ध्रुवं निश्चयेन मृत्युं तद्देवतां भगवदितरां नाभिनन्देत् । अन्तर्णीतण्यर्थो नाभिनन्देन्नाराधयेत् । अवर्जनीयत्वात्तस्येति भावः । स्वजीवितमध्रुवं यतोऽतो नाभिनन्देत्तेन न सन्तुष्यात् । मुख्यो वर्तत एकः स क इत्यत आह ॥ कालमिति । भूतानां प्रभवाप्ययमिति षष्ठ्या अलुक् । भूतानां प्रभवश्चाप्ययश्च यस्मात्तं कालं कालोऽस्मि लोक इत्यादेः

कालाख्यं भगवन्तं प्रतीक्षेत । अलुक्फलं तु भूतस्य भूतयोरिति सङ्कोचसङ्कोचनम् । भूतानां प्राणिनां यः प्रः प्रभेदवान्भवः केषाञ्चिद्देहाभिमानपराधीनविशेषावाप्त्यादिरूप एतत्प्रतियोगीति तादृशोऽप्ययश्च यस्मात्तम् । परं कालं भगवन्तं प्रतीक्षेतेति वा । प्रभावयतीति तथाऽऽप्यायतीति स तथा तमिति कालविशेषणं वा । ध्रुवं मृत्युं नाभिनन्देदभि अवज्ञापूर्वकं न नन्देत् । अभिप्रेयस इति काठकखण्डार्थेऽभिरवज्ञानार्थक इति व्याख्यानादिति वा । हर्याज्ञात आगतस्यावज्ञानर्हताबोधकः कालमित्यादिग्रन्थ इति ज्ञेयम् । अथवाऽध्रुवं अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः । जातस्य हि ध्रुवो मृत्युरित्यादेः । ध्रुवं मृत्युमध्रुवं तत्त्वेन ज्ञात्वा नाभिनन्देत् अध्रुवं स्वजीवितं नाभिनन्देदिति व्युत्क्रमेणान्वयः । तदभिनन्दने कारणमाह । कालमित्यादिनेति केचित् । क्षणादिव्यावृत्तये परमिति । ॥ ६ ॥

मन्दनन्दिनी — ध्रुवमवश्यं भाविनं मृत्युं नाभिनन्देत् । नाकाङ्क्षेत् । नाप्यध्रुवं स्वजीवितमभिनन्देत् । अन्यतरकाङ्क्षावान्न स्यादिति यावत् । परं परन्तु । भूतानां प्रभवाप्ययहेतुभूतकालाख्यं परमात्मानं प्रतीक्षेतेति योजना ॥ ६ ॥

नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ।
अतिवादान् त्यजेत् तर्कान् पक्षं कञ्चिन्न संश्रयेत् ॥ ७ ॥

न शिष्याननुबध्नीत ग्रन्थान् नैवाभ्यसेद् बहून् ।
न व्याख्यामुपजीवेत नारम्भानारभेत् क्वचित् ॥ ८ ॥

तात्पर्यम् — अप्रयोजकं पक्षं न संश्रयेत् । 'नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत् । न चोदासीनशास्त्राणि न विरुद्धानि चाभ्यसेत् ॥ 'न व्याख्ययोपजीवेत न निषिद्धान्समाचरेत् । एवं भूतो यतिर्याति तदेकशरणो हरिमि'ति समाचारे ॥ ७,८ ॥

सत्यधर्मीया — नासच्छास्त्रेष्विति श्लोके पक्षं कञ्चन कमपि न संश्रयेदिति सर्वपक्षप्रतिक्षेपः कृत इति प्रतीयते । प्रतीयते चोत्तरत्र छात्रमात्रपरित्याग इव शास्त्रानभ्यासः स इव कर्मत्यागश्चेत्येतदादिः ''ब्रूयादपि च शिष्येभ्यः सत्सिद्धान्तमहापयन् । विष्णोः सर्वोत्तमत्वं तु सर्वदा प्रतिपादयेदित्यादि-प्रमाणबाधित इत्यतः पूर्वत्र किञ्चिदपेक्षितमध्याहृत्य पूर्वोक्तार्थद्रढिम्ने प्रमाणेनोत्तरश्लोकं यथावद्व्याचष्टे ॥ अप्रयोजकमिति । न विद्यते प्रयोजकः प्रवर्तको यस्य स तं पक्षम् । स्वप्रेक्षोत्प्रेक्षितमिति यावत् । न संश्रयेत् । अनेन मानानुयानेन मूले किंशब्दः कुत्सितार्थ इत्यपि कटाक्षयति । एतेन प्रमाणगतप्रयोजनपदं प्रयोजयतीति प्रयोजकवाचीति सूचयति । मान एवमुक्तिस्तु निष्प्रयोजनतयाऽप्यनुपादेयत्वं पक्षस्य कटाक्षयितुमिति मन्तव्यम् । इनिना च तस्य हेयतां बोधयति । न शिष्याननुबध्नीतेत्यभिप्रायमाह ॥ नेति ।

स्वशास्त्राविश्वस्तशिष्यसङ्ग्रहकर्ता न भवेत् । उदासीनशास्त्राणि ज्योतिषादीनि । विरुद्धानि शास्त्राणीत्युत्कृष्यान्वयः । अभ्यसेत् । विकरणान्तरस्थासते रूपम् । नाभ्यसेत् । व्याख्यया नोपजीवेत जीवेत् । वेतनादि गृहीत्वा न पाठयेत् । न निषिद्धानाश्रमाविहितान्कर्मविशेषान्नारभेन्नारभेत । एतेन तदारम्भ एवाश्रमभ्रंशकृदिति ध्वनयति । तदेकशरणः स एकः शरणं रक्षक आश्रयो वा यस्य सः । हरिं यातीति । समाचारे तन्नामग्रन्थे उक्तमिति शेषः ।। ततश्चेयं पद्यविवृतिः ।। असच्छास्त्रेषु नाटकादिषु न सज्जेत नासक्तो भूयात् । जीविकां वेतनादिना नोपजीवेत तया प्राणधारणं न कुर्यात् । आजीवो जीविकामाहुरिति विश्वः। अतिवादानिति वेदवादानिति वादवादानिति च पठन्ति । अतिवादान्वाद-मतीत्य प्रवृत्तांस्तर्कान्कुयुक्तिः । वेदवादानुपक्रमाद्यनालोचनेनापातप्रतीत एव वेदार्थ इति वादान् । वादं प्रति वादा वादवादास्तानिति क्रामिकोऽर्थः । कञ्चित्पक्षमप्रयोजकं कमपि पक्षं न संश्रयेत् । शिष्याननतिविश्वस्तान्नानुबध्नीत न मेलयेत् । बहूनध्यात्मशास्त्रातिरिक्तान्नैवाभ्यसेदुपजीवेत । आरम्भान्कृष्याद्युद्यमान् । आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोरिति विश्वः । परहिंसासाधनानि वा नारभेन्नारभेत ।। ७-८ ।।

मन्दनन्दिनी — असच्छास्त्रेष्वद्वैतादिशास्त्रेषु । कक्कोकादिशास्त्रेषु वा । न सज्जेत् । जीविकां वेतनादिलक्षणां याजनादिलक्षणां वा नोपजीवेत् । अतिवादान्वेदवादमतीत्य वर्तमानान् शुष्कतर्कां-स्त्यजेत् । अप्रयोजकं कञ्चिदपि पक्षं न संश्रयेत् । अत एव तात्पर्यम् ।। अप्रयोजकमित्यादि ।। ७ ।।

शिष्यान्नानुबध्नीयात् । सम्यग्ज्ञानलाभतदुपदेशरूपस्वप्रयोजनाभावे वृथा शिष्यबन्धं न कुर्यात् । बहून् असारानवैष्णवान् । बहून् शृणुष्व वैष्णवं शास्त्रमिति वैष्णवशास्त्रश्रवणस्य विहितत्वात् । न व्याख्यानमुपजीवेत जीवनोपायं न कुर्यात् । नारम्भान् आरब्धुमयोग्यान्कर्षणादीन् ।। ८ ।।

न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ।। ९ ।।

सत्यधर्मीया — कृषीवलादिमुखकारितकृषिबललब्धद्रविणवितरणेन मस्करिणोऽपि यशस्करधर्म-सम्पादनसम्भवेन किं नारम्भानारभेतेति प्रोच्यत इति तत्राह ।। नेति । महात्मनः शान्तस्य समचित्तस्य समे निर्दोषं हि समं ब्रह्मेत्युक्तेनिर्दोषे ब्रह्मणि चित्तं मनो यस्य स तस्य । यतेः सन्यासिन आश्रमो धर्महेतुर्न भवति । प्राय इति शिक्षया गृह्णतो द्रविणं रक्षयतस्तेन जनान्महासंस्थानिकान्व्यावर्तयति । उपासनायां धर्मे चाधिकारेसंस्थानिकानाम् उपासनायामेवान्येषामिति मन्तव्यम् । एवंविधो यतिर्दण्डादिकं बिभृयादुत वा त्यजेत् । न तस्य तदावश्यकतेति तात्पर्यम् । याज्ञवल्क्यश्चाह । नाश्रमः कारणं धर्मे क्रियमाणे भवेद्धि सः । अतो यदात्मनः पथ्यं परस्य न तदाचरेदिति । समचित्तस्य प्रिये तत्त्वेनातस्मिन्नतत्त्वेन समचित्तं यस्येति वा ।। ९ ।।

मन्दनन्दिनी — नारम्भान्नारभोदिति द्रव्यार्जनसाधनकर्षणादेर्निषेधे कथमन्नदानादि धर्मः स्यादित्यत आह ।। न यतेरिति ।। शान्तस्य समे ब्रह्मणि चित्तवतो महात्मनो यतेराश्रमः प्रायोऽन्नदानादिधर्महेतुर्न स्यात् । पूजनेन स्वपरिवाराणां मिष्टमन्नं दीयंते चेत्तदा बहुजनान्नदानलाभो भवतीति प्राय इत्युक्तम् । यद्यनायासेन भरणं तदा बिभृयात् । नो चेत्त्यजेत् । यदाह याज्ञवल्क्यः ।।

नाश्रमः कारणं धर्मे क्रियमाणे भवेद्धि यः ।
अतो यदात्मनः पथ्यं परस्य न तदाचरेत् ।।

इति ।। अनायासेन क्रियमाणश्चेद्भवेत् । आत्मनः पथ्यमाचरेत् न परस्यैव पथ्यमित्यन्वयः ।। ९ ।।

अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् ।
कविर्मूकवदात्मानमदृश्यो दर्शयेन्नृणाम् ।। १० ।।

सत्यधर्मीया — विना वैष्णवादिबाह्यलिङ्गेन कथं स ज्ञातव्य इत्यतोऽतरङ्गिकं लिङ्गमपामरज्ञेयं वर्तत इत्याह ।। अव्यक्तलिङ्ग इति । अव्यक्तं पामराज्ञातं लिङ्गं स्वोद्देश्यं यस्य स तथा । व्यक्तार्थः व्यक्तोऽपरोक्षीकृतोऽर्थो भगवान्येन स तथा । मनीषी मननशीलः । उन्मत्तवद्बालवच्च कविरतिक्रान्तदर्शी मूकवदात्मानं दर्शयेत् । अदृश्यो मूर्खैः । अव्यक्तस्य भगवतः । तदव्यक्तमाह हि । तध्यव्यक्ततामर्हतीत्यादेः । लिङ्गं चिन्हं चक्रादिकं यस्य स इति वा । अव्यक्तो भगवानर्थोऽपेक्षणीयो यस्येति वा ।। १० ।।

मन्दनन्दिनी — अपरोक्षज्ञानिनः संन्यासिनः प्रवृत्तिप्रकारमाह ।। अव्यक्तेति ।। अव्यक्तं बाह्यं लिङ्गं यस्य सः । व्यक्तोऽपरोक्षीकृतार्थो भगवान्यस्य मनीषी मननशीलः । कविर्यथोचितसार्वज्ञवान् संन्यासी अदृश्यो भवेत् । दृश्यश्चेदपि लौकिकव्यवहर्तॄणामुन्मत्तवत्स्त्रीणां बालवत् । शतगोष्ठीवक्तॄणां मूकवदात्मानं दर्शयेत् ।। १० ।।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ।। ११ ।।

सत्यधर्मीया — अत्र समचित्तयत्याचर्यचर्यायामिममितिहासं वक्ष्यमाणम् । पुरावृत्तमुदाहरन्ति ज्ञानिन इति शेषः। बहुवचनेन बहुसम्मतिमसूचयत् । तत्स्वरूपं निरूपयति प्रल्हादस्याजगरस्य । अजगरस्य अयम् आजगरः । तद्वृत्तिमुपात्तवतो मुनेः संवादं तदात्मकमिति । ननु नाजगरस्य राजसमाजव्रजनं न व्रजनं गव्हरं प्रति क्षितिपतेः कथं घटना तयोरभूदित्यत आह ।। पुरातनमिति । चो

यदेत्यर्थ एक एकः समुच्चये । पुरादुग्रामादतनं यदा तदा प्रल्हादस्याजगरस्य च संवादमितिहास-मित्यन्वयो वा । यद्वक्ष्यति लोकान्विचरन्नित्यादि ।। ११ ।।

मन्दनन्दिनी — एतादृशाचारे इतिहासमाह ।। अत्रेति ।। चिरपूर्वत्वदर्शनाय पुरातनमिति । आजगरस्याजगरवृत्तिमाश्रयतः ।। ११ ।।

तं शयानं धरोपस्थे कावेर्यां सिंहसानुनि ।
रजस्वलैस्तनूद्देशैर्निगूढामलतेजसम् ।। १२ ।।

सत्यधर्मीया — कावेर्यां तत्तटे । तत्रापि तदुत्पत्तिस्थल इत्याह ।। सिंहसानुनीति । सिंहस्य सिंहाद्रेः सानुनि मार्गे । अन्यथा भूभुजनिभलनासम्भव इति भावः । सानु शृङ्गे बुधे मार्गे वात्यायां पल्लवेऽवनाविति विश्वः । धरोपस्थे केवलमवनौ शयानं तं मुनिमत एव तनूद्देशैः कायावयवैः रजस्वलैर्धूलिधूसरैः । रजः कृष्येति मत्वर्थे वलच् । निगूढममलं तेजो वर्चो यस्य तम् ।। १२ ।।

मन्दनन्दिनी — कावेर्यां कावेर्युत्पत्तिस्थाने । सैंह्यस्य गिरेः सानुशृङ्गसमीपे । तनूद्देशैः शरीरभागै रजस्वलै रजःकुण्ठितैर्निगूडममलं तेजो यस्य ।। १२ ।।

ददर्श लोकान् विचरन् लोकतत्त्वविवित्सया ।
वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ।। १३ ।।

सत्यधर्मीया — लोकान् । लोकानां जनानां तत्त्वं के कथं कुर्वन्तीति तत्स्वभावज्ञानेच्छया वेदितुमिच्छा विवत्सा । चरन् । कतिपयैः कैश्चिदमात्यैः । अमेहक्वतसित्रेभ्य इत्यव्ययात्यबित्यनुवृत्त-स्त्यप् । मन्त्रिभिः ।। १३ ।।

मन्दनन्दिनी — लोकस्य जनस्य तत्त्वजिज्ञासया ।। १३ ।।

कर्मणाऽऽकृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः ।
नाविन्दत जनोऽयं वै सोऽसाविति न वेति च ।। १४ ।।

तं नत्वाऽभ्यर्च्य विधिवत् पादयोः शिरसा स्पृशन् ।
विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ।। १५ ।।

सत्यधर्मीया — कर्मणा क्रिययाऽऽकृतिभिर्दिने दिने नवताऽकारस्येति आकृतिभिरित्युक्तिः । वाचा व्यवहृत्या लिङ्गैर्बहिश्चिन्हैरेतद्वर्ण एतदाश्रम एतद्धर्मेति वर्णादिभिर्जनो पामरो यं नाविन्दत नाज्ञासीत् ।

तत्प्रकारमाह ।। स इति । सः असौ नासौ वेत्तीति । तमवधूतं नत्वा । एतेन महात्मनस्तस्य सामान्यज्ञानं राज्ञो जातमिति ध्वनितम् । पादयोः पादौ । विवित्सुर्विशेषज्ञानेच्छुः ।। १४, १५ ।।

मन्दनन्दिनी — कथं भूतं तमित्यत आह ।। कर्मणेति ।। जनो मुनिं कर्मणा संध्यावन्दनादिना । आकृतिभिराकारविशेषैर्वाचा व्यवहारेण वर्णाश्रमादिज्ञापकैर्लिङ्गैः सोऽसाविति वा नेति वा नाविन्दत्तमिति योजना ।। १४ ।।

एतादृशमपि पूज्य इति ज्ञात्वाऽपृच्छदित्याह ।। तमिति ।। विधिवदभ्यर्च्यार्घ्यपाद्याद्युपचारं कृत्वा । विवक्षुः संवादं कर्तुमिच्छुः ।। १५ ।।

प्रह्लाद उवाच–

बिभर्षि कायं पीवानं सोद्यमो भोगवान् यथा ।
वित्तं नैवाद्य भवतो भोगो वित्तवतामिह ।।
भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ।। १६ ।।

सत्यधर्मीया — कायं शरीरं पीवानं स्थूलम् । ध्याप्योः सम्प्रसारणं च । चात्कनिप् । हेतुहेतुमद्भावापन्नसर्वविरहात् स्थूलतेयम् । स्थूलदृश्वनामनुपपन्नेवावभासत इति स्वयं जानंस्तन्निदानं दीनानुजिघृक्षया प्रल्हादः शङ्कत इत्याह ।। सोद्यमो भोगवानिति । यथा भोगवांस्तथा त्वं पीवानं कायं बिभर्षीत्यन्वयः । स च भोगः केषामित्यतो भाषते ।। इति वित्तवतामिति । तच्च वित्तमुद्यमवतां कुसीदादिव्यवसायसम्पन्नानां भोगिनां देहः पीवा भवति नान्यथा । न निमित्तान्तरायत्तेयं पीनतेत्यर्थः ।। १६ ।।

मन्दनन्दिनी — प्रश्नप्रकारमाह सार्धश्लोकेन ।। बिभर्षीति ।। सोद्यमो वित्तार्जनोपायवान् । उद्यमादीनां कार्यकारणभावमाह ।। वित्तमिति ।। १६ ।।

न ते शयानस्य निरुद्यमस्य ब्रह्मन्निहार्थो यत एव भोगाः ।
अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद् वद नः क्षमं चेत् ।। १७ ।।

सत्यधर्मीया — तिष्ठतु मयि सर्वमिदं किंकारणकी तव शङ्केति चेत्तत्राह ।। न त इति । यतोऽर्थत एव भोगा हे ब्रह्मन्सोऽर्थस्तवेहैतदवस्थायां न । तत्र तन्त्रं निरुद्यमस्येति । तत्रापि शयानस्येति । अतो भोगासंभवादित्यभोगिनः । हे विप्र । अनेन विनावर्णनां वर्णज्ञानं तस्य जातमिति मूलं ध्वनयति । यतः पीवा तत्तत्कारणं नः श्रोतुं क्षमं योग्यं चेद्वद । इदं पीनत्वं यतः कार्यं ततो नाकारणेनानभाव्यं भाव्यं

कारणेन च । न च तदस्मदादिभिर्दृष्टमूहितं वा । अतस्त्वं त्वत्सदृक्षमात्रप्रमातृवित्तं तच्च क्षमं चेद्वदेति भावः ॥ १७ ॥

मन्दनन्दिनी — शयानत्वं निरुद्यमादीनां प्रयोज्यप्रयोजकभावमुक्त्वा पीवानत्वं कथमित्याह ॥ न त इति ॥ पीवा यतः कारणात्तद्वेदितुं क्षमं चेद्वद ॥ १७ ॥

कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ।
लोकस्य कुर्वतः कर्म शेषे न द्वेष्टि नौषि वा ॥ १८ ॥

सत्यधर्मीया — इतोऽपि त्वय्यस्मदाद्यज्ञातं निमित्तमस्तीत्युत्प्रेक्षयाम इत्याह ॥ कविरिति । कल्पो दक्षो निपुणदृक् सर्वज्ञः । चित्रप्रियकथश्चित्राः प्रियाः कथा यस्य स तथा । न चाकथयदयं न च शुश्राव चेदपि स्वपृष्टप्रतिवचनप्रोत्साहनार्थं स्वभावसिद्धमिति स्वानुभूतमवादीत्प्रल्हाद इति ज्ञेयम् । समः सुखदुःखयोः । तदेव साम्यमुपपादयति ॥ लोकस्येति । कर्म कुर्वतो लोकस्य तं न नौषि स्तौषि न द्वेष्टि किन्तु शेषे स्वपिसि । कर्मशेषे कर्तव्यावशेषे न द्वेष्टीति वा । अकुर्वतो जनान्न द्वेष्टि कर्मकृतं न नौषि किन्तु शेषे । अलौकिकः कश्चनाहं तव किं मयेत्यत आह ॥ लोकसीति । लोकवदाचरसि चातः श्रोतुं क्षमं चेद्वदेत्यन्वयः ॥ १८ ॥

मन्दनन्दिनी — पीनत्वातिरिक्तं भोगकार्यं चाह ॥ कविरिति ॥ अन्नमयं हि सौम्यमन आपोमयः प्राण इत्यादिश्रुतेः मनआदिकरणपाटवस्य भोगसाध्यत्वाद्भोगाभावेऽपि पाटवमस्ति तत्र कारणं किमित्याशयः । कविरिति मनःपाटवम् । कल्प इति देहपाटवम् । निपुणदृगिति नेत्रपाटवम् । चित्रप्रियकथ इति वाक्पाटवम् । सम इत्यनेन साम्यं च ज्ञानिलक्षणं सूचितम् । तस्योपपादनं कुर्वतो लोकस्य यत्कर्म तन्न द्वेष्टि न नौषि वेति ॥ १८ ॥

नारद उवाच –

स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ।
स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥ १९ ॥

सत्यधर्मीया — इयं पीनता वृषाकपीनता ज्ञानामृतस्यन्दितया नान्नादनादिनेति परिहारेण प्रल्हादं प्रल्हादयितुं विद्यमानगुणाभिधानेन तं सुमुखीकर्तुं पीठश्चरतीति नारद ईरयति ॥ नारद इति । स्मयमानो विद्वानप्यविद्वद्धाटीमाटीकतेऽयं दैतेय इति स्मयमानस्तस्य प्रल्हादस्य वागेवामृतं तद्यन्त्रितस्तदधीनोऽभि भयरहितं यथा तथाऽऽह ॥ १९ ॥

मन्दनन्दिनी — नारायणपादारविन्दध्यानलक्षणमकरन्दपानेन पीनत्वमित्याशयेन वक्तीत्याह ।। नारद इति ।। तद्भागमृतयन्त्रितः प्रह्लादप्रश्नवचनरूपामृतेन प्रेरितः ।। १९ ।।

ब्राह्मण उवाच—

वेदेदमसुरश्रेष्ठ भवान् नन्वार्यसम्मतः ।
ईहोपरमयोर्नॄणां पदमध्यात्मचक्षुषा ।। २० ।।

सत्यधर्मीया — हे असुरश्रेष्ठ । भवानार्यसम्मत आर्याणां सम्मत आर्य इति सम्मतो वा ननु निश्चयः । नृणामीहोपरमयोरीहा प्रवृत्तंकर्मोपरमो निवृत्तं कर्म तयोः पदम् । एकमीहाविषयं फलं त्याज्यतया न परमुपरमफलं हरिप्राप्तिरूपमध्यात्मचक्षुषा रमारमणसर्वोत्तम्यप्रतिपादकवेदान्तानु-सेवनरूपेणेदं पीनताहेतुं वेद यत ईहोपरमयोः पदं जिहासोपादित्सागोचरमध्यात्मचक्षुषा परमात्मनो ज्ञानेन वेदविषयीकृतवानत इदं वेदेति वा ।। २० ।।

मन्दनन्दिनी — भगवत्पादारविन्दध्यानानन्द एव पीनताकारीति भवानपि महाज्ञानित्वाद्वेदेत्याह ।। वेदेति ।। अध्यात्मचक्षुषाऽध्यात्मज्ञानेन नृणामीहोपरमयोः प्रवृत्तिनिवृत्तिलक्षणयोर्मार्गयोः पदं निश्चितं विषयं स्थानं वेद ।। २० ।।

यस्य नारायणो देवो भगवान् हृद्गतः सदा ।
भक्त्या केवलया श्लिष्टो धुनोति ध्वान्तमर्कवत् ।। २१ ।।

सत्यधर्मीया — त्वं तु सत्त्वविदग्रिम इति न मदुक्तमसम्भावितमित्याह ।। यस्येति । यस्य तव नारायणो देवः सदा हृद्गतः केवलया भक्त्याऽऽश्लिष्टोऽफललोभित्वं केवलत्वं भक्तेर्ज्ञेयम् । अर्को ध्वान्तमन्धकारं यथा धुनोति तथाज्ञानं धुनोतीति त्वं विवेकिप्रवेक इति वेदेति भावः ।। २१ ।।

मन्दनन्दिनी — इदमित्युक्तमेवाह ।। यस्येति ।। ध्वान्तमज्ञानम् । अन्यत्रांधकारम् ।। २१ ।।

अथापि ब्रूमहे प्रश्नान् तव राजन् यथाश्रुतम् ।
सम्भाषणीयो हि भवानात्मनः शुद्धिमिच्छता ।। २२ ।।

सत्यधर्मीया — पूर्वमिदमिति महाप्रश्नाभिप्रायम् । प्रश्नानिति तु निरुद्यम इति तव स्वापतेयं कथं निर्वित्तस्य भोगः कथमभोगिनश्च पीनतेत्यवान्तरप्रश्नविवक्षया बहुवचनं युक्तम् । प्रश्नमनिति चेष्टते करोतीति यावत् । प्रश्नकर्ता राजन् तव त्वां प्रति । अथाऽपीत्यनेन न नवीनज्ञानप्राप्तिर्मद्वचनेन ज्ञाततत्वस्येति सूचयति । तत्कस्य हेतोर्ब्रूम इत्युक्तिरिति चेन्न । मम महान् लाभोऽस्तीत्याह । आत्मनः

स्वस्य शुद्धिं वाङ्मनसशोधनमिच्छता पुरुषेण मदादिना भवान्सम्भाषणीयः । हि यतस्तस्माद्ब्रूमहे व्यक्तं वक्ष्याम इति । मद्वचनं च न स्वकपोलकल्पितमित्यल्पीकर्तुमुचितमित्यूचे । यथाश्रुतमिति । गुरुमुख-श्रुतमनतिक्रम्येति वचनक्रियाविशेषणम् ॥ २२ ॥

मन्दनन्दिनी — अथाऽपि तव ज्ञाने सत्यपि प्रश्नान् ब्रूमहे प्रतिवच्म: । तत्र निमित्तमाह ॥ सम्भाषणीय इति ॥ सम्भाषणस्यापि प्रयोजनमात्मनः शुद्धिमिति ॥ २२ ॥

तृष्णया भववाहिन्या ग्राम्यकामैरपूर्णया ।
कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥ २३ ॥

सत्यधर्मीया — इहोपरमयोरित्युक्तिमनतिक्रम्य प्रवृत्तिकर्मफललाम्पट्यं न प्रेक्षावता सम्पाद्य-मित्यत्रात्मानमेव निदर्शनीकृत्य वक्ष्यति ॥ तृष्णयेति । अभववाहिन्याऽमङ्गलनद्या । भवः संसारसत्ताऽस्ति श्रेयःशङ्करजन्मस्विति विश्वः । वाहिनी स्यात्तरङ्गिण्यामिति च । संसारप्रापिकया नद्या वा ग्रीष्मादावूष्मणादीना नदी वर्षासु वार्भिरभिवृद्धा भवति । नेयं तथेत्याह । ग्राम्यकामैर्व्य-वायादिविषयैरपूर्णयाऽतृप्तिं गतयेति । कर्माणि कार्यमाणः प्रयोजनयित्र्यैतया करिष्यमाणोऽहं नानायोनिषु तिर्यगादिषु योजितो योगवान्कारितः सैव नानाहीनाहीनयोनिरिति भावः । वेदेदमसुर-श्रेष्ठेत्येतन्नार्थवादमात्रं किन्तु स्वयमादौ तृष्णया भववाहिन्येति यदाह तेन को न्वर्थतृष्णां विजह्यात्प्राणेभ्योऽपि य ईप्सित इत्याद्यादित एव प्रल्हादोदितमनुचक्रे । तेन तद्वास्तवतां बोधितवानिति ध्येयम् । तर्हि सा त्वतन्त्रेति तव तन्त्रं किमित्यत आह ॥ य इति । योऽजितः केनाप्यपराजितः स्वतन्त्रस्तेन हरिणा । योजित इत्यावर्त्य अन्वेतव्यम् । एतेन प्रयोजकतामात्रं तत्तृष्णानिष्ठमिति ध्वनयति । पातित इत्यादिपदं विहाय वक्त्रावक्त्राद्योजित इति प्रामाणिकोऽयमर्थो ममान्तरङ्गिक इति भाव आवेदित इति वेदितव्यम् । णिजप्युचितार्थ एतत्पक्ष इति ज्ञेयम् । अत एवानुपदं प्रतिपाद्यमानं यदृच्छयेति सुलग्नम् ॥ २३ ॥

मन्दनन्दिनी — स्वस्य पूर्ववृत्तमाह ॥ तृष्णयेति ॥ भवं वहति प्रवहतीति भववाहिनी । ग्राम्यकामैर्मुक्तिसाधनेतरविषयकामैरपूर्यया तृष्णया प्रयोजककर्त्र्या कर्माणि कार्यमाणोऽहं नानायोनिषु योजित इति योजना ॥ २३ ॥

यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ।
स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥

सत्यधर्मीया — यदृच्छा तु तदिच्छा स्यादित्युक्तेर्भगवदिच्छया इमं लोकं मानुष्यदेहं कर्मभिर्भ्रमन्प्रापितः । अस्माल्लोकात्प्रेत्येति श्रुतेः । तिरश्चां तज्जन्मनः पुनरस्य मानुषस्य शरीरस्य च द्वारम् । न केवलमेतावत्किन्तु स्वर्गापवर्गयोर्द्वारं तत्तत्साधनसामग्र्या तत्तदनुरूपफलाधायकता कायस्येति भावः ।। २४ ।।

मन्दनन्दिनी — यदृच्छया दैवेच्छयेमं लोकं ब्राह्मणमानुषदेहं स्वर्गापवर्गयोस्तिरश्चां तिर्यग्योनीनामस्य च मनुष्यशरीरान्तरस्य द्वारं कारणभूतं कर्मभिर्भ्रमन् अधुना प्रापित इति योजना ।। २४ ।।

अत्रापि दम्पतीनां च सुखायान्यापनुत्तये ।
कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ।। २५ ।।

सत्यधर्मीया — उद्यमिनां वित्तं तद्वतां च भोग इत्युक्तम् । तत्रोत्तरमीरयति ।। अत्रापीति । मानवतनावपि दम्पतीनां गृहिणां सुखाय तदाप्तयेऽन्यस्य तदितरस्य दुःखस्यापनुत्तये परिहृत्यर्थं च कर्माणि कुर्वतां विपर्ययं सुखसाधनमिति तदनुष्ठितावप्यनिष्टप्राप्तिं दृष्ट्वा । अनेन न परोदीरणेनापि तु स्वसाक्षिणेदमनुभूतमिति द्योत्यते । निवृत्तौ नैतेन निवृत्तिरिति पराङ्मुखोऽस्मीति सम्बन्धः । सुखाय कर्माणि करोति लोको न तैः सुखं वाऽन्यदुपारमं वेत्यादेः ।। २५ ।।

मन्दनन्दिनी — अत्राऽपि मनुष्यलोकेऽपि दम्पतीनां दम्पती च दम्पती चेत्येकशेषः । बहूनां गृहस्थाश्रमिणां सुखायान्यस्य दुःखस्यापनुत्तये कर्म कुर्वतां विपर्ययं सुखाप्राप्तिं दुःखप्राप्तिं च दृष्ट्वा गृहस्थाश्रमान्निवृत्तः ।। २५ ।।

सुखमस्यात्मनो रूपं सर्वेहोपरतेर्हि यत् ।
मनःसंस्पर्शजान् दृष्ट्वा भोगान् शस्तान्न संविशेत् ।। २६ ।।

सत्यधर्मीया — निवृत्तं कर्मापि न स्वतन्त्रं साधनं सुखव्यक्तौ किन्तु हरिरेवेति क्रमात्समुपरमं वदन्नाह ।। सुखमिति । अस्यात्मनो जीवस्य सुखं रूपं स्वरूपभूतम् । तत्किं व्यङ्ग्यमित्यत आवृत्त्या मुख्यममुख्यं च निमित्तमाख्याति ।। सर्वेहोपरतेरिति । सर्वेहाया उपरतिर्यस्य तस्मादनीहाद्धरेः । सर्वेहाया उपरतिस्तस्याः सकाशाद्यदेतीति तत्प्राप्नुयात् । हीति बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोरित्यादिमानप्रसिद्धिं द्योतयति । हियदित्यखण्डपदं वा । हिं वृद्धिमेतीति हियत् । हि गतौ वृद्धौ चेति स्मरणात् । मनःसंस्पर्शजान्मनउपलक्षितेन्द्रियैर्विषयाणां संस्पर्शः सम्बन्धस्तस्माज्जायन्त इति ते तथा । पञ्चम्यामजाताविति डः । भोगान् शस्तान् विशस्तान् साधनाराधानेऽप्यप्राप्तानिति यावत् । दृष्ट्वा तेषु न संविशेत् । बुद्धिमान् संविशेत । अन्तर्णीतण्यर्थः । मनो न संवेशयेदिति वाऽऽवृत्त्याऽन्वयः ।। २६ ।।

मन्दनन्दिनी — प्रायेण विपर्ययदर्शनेऽपि कदाचिद्वैषयिकसुखस्यापि सम्भवाद्गृहाश्रमान्निवृत्तौ तदलाभात्कुतो निवृत्त इत्याशङ्कायामाह ।। सुखमिति ।। अस्यात्मनः सुखं रूपं स्वरूपमेव । बलमानन्देति श्रुतेः । न त्वागन्तुकं सुखमुत्पाद्यं तच्च सर्वेहोपरते सर्वकाम्यकामनाराहित्यात् । तथा सर्वेहे सर्वचेष्टके उप अधिके भगवति रतेर्भक्तेर्यद्यस्मादभिव्यज्यते हि तस्मान्मनः संस्पर्शजान्मनोऽधिष्ठितेन्द्रियाणां विषयसंस्पर्शाज्जातानत एव नश्वरान् दुःखसंमिश्रांश्च शस्तान् प्रशस्ततया प्रतीतान् । भोगान्वनितादिभोगान् दृष्ट्वा विमृश्य गृहस्थाश्रमं न संविशेत् । न प्रविशेदिति योजना । भगवद्भक्त्यादि नित्यस्वरूपसुखव्यक्तौ सत्यां कादाचित्कदुःखसंमिश्रसुखभोगार्थं गृहाश्रमो न संवेशनीय इति भावः । एतच्च स्वरूपतः संन्यासिमनुष्योत्तमादिविषयं ज्ञेयम् ।। २६ ।।

इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ।
विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ।। २७ ।।

सत्यधर्मीया — सर्वेहोपरतेः कंसारेर्विस्मरणतोऽहंममेत्यन्यथामतेश्चायं संसार इति शंसति ।। इतीति । एतदात्मनः पूर्वोक्तानन्दाद्यात्मकस्य स्वस्य । स्वार्थमेव सन्तमन्तरवस्थितं हरिं विस्मृत्य स्थितः स पुमान् । स्वार्थं विषयजातं विशेषतः स्मृत्वा चेति मानप्रमितार्थस्य स्वीकार्यतामाह वैकारः। असत्यमङ्गले द्वैतेऽन्यथाज्ञाने सति । इति घोरामुक्तप्रकारेण सोढुमशक्यां विचित्रां निर्मायां वास्तवीं संसृतिमाप्नोति । चित्रा सुपर्णी गोडुम्बा सुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियामिति भानुदीक्षितीये ।। २७ ।।

मन्दनन्दिनी — तर्हि लोकः कुतः प्रवर्तत इत्यत आह ।। इतीति ।। इत्येतत्पूर्वमुक्तं सन्तं समीचीनं स्वार्थं स्वप्रयोजनं शास्त्रसिद्धं विस्मृत्य । असत्यसमीचीने द्वैते दम्पत्त्याश्रमे स्थितः पुमान् विचित्रां घोरां संसृतिमाप्नोति वै इति योजना । शास्त्रसिद्धस्वप्रयोजनविस्मृत्या लोकः प्रवर्तत इति भावः ।। २७ ।।

जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ।
मृगतृष्णामुपाधावेत् तथाऽन्यत्रार्थदृक् स्वतः ।। २८ ।।

सत्यधर्मीया — अफलोपलम्भिकेयं तृष्णा मृगतृष्णावदिति यथा तद्वानज्ञ एतद्वानपि तथेति च कथयति ।। जलमिति । तदुद्भवैस्तस्माज्जलादेवोद्भवन्तीति ते तथा शैवलादयस्तैश्छन्नमाच्छादितम् । जलकाम्यया जलेच्छयाऽज्ञो मृगतृष्णां सूर्यकिरणसम्पृक्तसलिलं यथोपधावेत्तथा । स्वतः परस्वो हरिरित्यादेर्भगवतोऽन्यत्र सुरनरादौ । अर्थदृगर्थं पश्यतीत्यर्थदृक् एते ममार्थदा इति ज्ञानवानज्ञ इत्यनुवर्तते । अन्यत्र स्वतः स्वातन्त्र्येणार्थदृक् पुरुषार्थदर्शीति वा ।। २८ ।।

मन्दनन्दिनी — वैषयिकसुखाय प्रवर्तमानं दृष्टान्तप्रदर्शनेन निन्दति ॥ जलमिति ॥ तदुद्भवैः शैवलादिभिः छन्नं जलं स्वसमीपस्थितमज्ञो हित्वा जलकाम्यया मृगतृष्णां जलभ्रान्तिविषयीभूताम् । मरुमरीचिकामुपाधावेद्यथा तथाऽज्ञः स्वतः । ल्यब्लोपनिमित्ता पञ्चमी । स्वरूपसुखं विहायान्यत्र विषयेष्वर्थ दृक् पुरुषार्थदृगुपाधावेदिति योजना ॥ २८ ॥

देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ।
दुःखात्ययं वाऽनीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥

सत्यधर्मीया — ननु देहादेः पुमर्थदोहहेतुत्वेन तदनुष्ठिताः क्रियाः क्रियासुरेव फललब्धिमित्यतो यदि समर्पिताः स्युस्ता हरौ तथा । न तथा चेन्न तथेत्याह ॥ देहादिभिरिति । दैवतन्त्रैर्भगवन्नियतैर्देहादिभिरनीशस्य न विद्यत ईशो यस्य सोऽनीशस्तस्यात्मनः सुखं दुःखात्ययं तन्निवृत्तिं वेहत ईहमानस्येच्छत इति यावत् । या याः क्रियाः सुखप्राप्तिदुःखात्ययोपायत्वेन कृताः कृताः । वीप्सया सामस्त्यं बोध्यते । सर्वाः क्रिया मोघा व्यर्थाः । ईशो नास्तीति जानतां तदधीनैर्देहादिभिः कृताः क्रिया निष्फला भवन्तीति भावः ॥ २९ ॥

मन्दनन्दिनी — क्रियायामीषत्स्वातन्त्र्येऽपि फले न सर्वथाऽस्तीति क्रियाणां वैफल्यमाह ॥ देहादिभिरिति ॥ दैवतन्त्रैर्दैवाधीनैर्देहादिभिरात्मनः सुखं दुःखाप्ययं वेहतोऽनीशस्य फलेऽस्वतन्त्रस्य जीवस्य कृताः क्रियाः । मोघाः कृता भवन्तीति योजना । वैफल्याच्च वैषयिकसुखाय क्रिया न कर्तव्येति भावः ॥ २९ ॥

आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ।
मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥

सत्यधर्मीया — स्वापतेयसम्पादने सुखसम्पन्नता दृश्यत इत्येव नापि तु वितुलापिपदिति न तत्रायासः सम्पाद्य (समासाद्य) इत्याह ॥ आध्यात्मिकादिभिरिति । आदिपदेनाधिभौतिकाधिदैविकादेर्ग्रहणम् । तैर्दुःखैरविमुक्तस्यात्यक्ताभिमतेः कर्हिचित्कस्याञ्चिदवस्थायां काले कस्मिंश्चिद्वा । कामैः काम्यन्त इति कामा अपेक्षणीया इति यावत् । तैरर्थैः कृच्छ्रोपनतैर्दातृन्पीडयित्वेति तत्कृच्छ्रं तानपीडयित्वेति स्वकृच्छ्रं वा तेनोपनतैः सम्पादितैः किं क्रियेत न किमपि स्वोपकरणम् । मर्त्यस्यायुरनिर्णयान्मध्ये मरणसम्भवादिति भावः ॥ ३० ॥

मन्दनन्दिनी — आदावन्ते च दुःखोपबद्धत्वाद्वर्तमानदुःखविमुक्तिरहितत्वाच्चार्थानां कामानां च न पुरुषार्थत्वमित्याह ॥ आध्यात्मिकादिभिरिति ॥ मन आदीन्द्रियदेहादिजन्यदुःखैराध्यात्मिकैरनूपदेशादि-

जन्यैराधिभौतिकैर्वर्षातपादिजन्यैराधिदैविकैश्चाविमुक्तस्य मर्त्यस्य मृतिभयजन्यदुःखवतः कृच्छ्रोपनतै-र्बह्वायासागतैरर्थैः कामैश्च किं क्रियेत कार्यं किमिति योजना । बहुदुःखकवलितत्वान्नार्थादीनां प्रयोजनत्वमिति भावः ॥ ३० ॥

पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ।
भयादलब्धनिद्राणां सर्वतोऽपि विशङ्किनाम् ॥ ३१ ॥

सत्यधर्मीया — कस्यचिद्दैववशादाशानुसारि वित्तं लब्धवतो नीरोगशरीरस्यापि लोभाभिभूतस्य न तद्भोगयोग इत्यत्र स्वमेव साक्षिणमेव मानत्वेनाह ॥ पश्यामीति । धनिनां लुब्धानामजितात्मनाम-निगृहीतमानसानाम् । भयादलब्धा निद्रा यैस्ते तेषाम् । सर्वतोऽपि विशङ्किनां व्रीह्यादिः । क्लेशम् । अहं पश्यामीत्युक्तिस्तु नाधुनाऽपि तज्जिहासौत्कट्यं समाप्तमिति द्योतनार्था ॥ ३१ ॥

मन्दनन्दिनी — अर्थकामाद्युत्पत्त्यनन्तरं सुखमेव दुःखं नास्तीत्यतस्तदाऽपि क्लेशोऽनुभव-स्तीत्यात ॥ पश्यामीति ॥ अत्र धनिनां चतुर्भिर्विशेषणैः क्लेश उपपादितः । अनेन त्यागिनो जितात्मनो भयरहितस्य विशंकारहितस्य च नेदृशः क्लेश इत्युक्तं भवति ॥ ३१ ॥

राजतश्चोरतः शत्रोः स्वजनात् पशुपक्षितः ।
अर्थिभ्यः कालतः स्वस्मात् नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥

सत्यधर्मीया — भयप्रयोजनकानाह ॥ राजत इति । राजतो दण्डं बध्नीयादिति । चोरतः स्तेयं तनुयादिति । शत्रोश्शातयित्वा मां नयेद्धनमिति । स्वजनात्तद्भोजनादेः । एवं पशुपक्षितः । अर्थिभ्यो याचकेभ्यः । कालतो बहुतिथं महीगुहानिहितस्य भारन्यौन्येन वा रेखाविमार्जनेन तावदुपयोगायोगेन वेति कालतः । स्वस्मात् स्थापितस्थानविस्मरणादिना वेति । नित्यं प्राणा इवार्था येषां सन्ति ते प्राणार्थवन्तस्तेषां भयं राजादितः पश्यामीत्यन्वयः । अर्था बहिश्चराः प्राणा इत्यादेः । प्राणार्थवत् प्राणनिवृत्तेरिव प्रसक्ताया इति वा । प्राणाश्चार्थाश्चैषां सन्ति ते प्राणार्थवन्तस्तेषां प्राणिनामर्थवतामिति वा । हे प्राणापरोक्षज्ञानिन् अर्थवतां भयमिति । प्रं परमात्मानमणत्यपरोक्षतो जानातीति स तथा तत्सम्बुद्धिः । अकयप्रविसमित्यादेः ॥ ३२ ॥

मन्दनन्दिनी — सर्वत इत्येतद्विवृणोति ॥ राजत इति ॥ पशुपक्षितश्चत्वरादौ गोधूमादेः प्रसारणे महिष्यादिपशुतः कुक्कटादिपक्षितः कालतो वर्षादिकालतः । स्वस्मात्स्वकीयादेव भृत्यात् । प्राणार्थवतः प्राणिति प्रवर्ततेऽनेनेति व्युत्पत्त्या गजतुरगादिलक्षणः कामः प्राणस्तद्वतोऽर्थवतश्च भयमिति योजना ॥ ३२ ॥

शोकमोहभयक्रोधा रागक्लैब्यश्रमादयः ।
यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ।। ३३ ।।

सत्यधर्मीया — तृष्णया भववाहिन्येति पूर्वमुक्तेस्तदुपरम एवैतदाद्यनर्थोपशम इति शंसति ।। शोकेति । रागो रक्तिः क्लैब्यं विह्वलता । द्वेषेति पाठेऽपि तोषः । एते यन्मूला या मूला येषां ते तथा नृणां स्युस्तां स्पृहां प्राणार्थयोः । कैमुत्येनार्थत्यागसौलभ्यसूचनाय प्राणग्रहणम् । प्राणेऽपि स्पृहां जह्यात्का कथाऽर्थत्याग इति । अत एव नैतद्बाधा हे प्राणेत्यादिप्राग्व्याकृताविवाप्रस्तुतप्राणग्रहणं कृत इति शङ्कनबाधाऽपीति ज्ञेयम् ।। ३३ ।।

मन्दनन्दिनी — बहुदोषाणां मूलत्वाच्च कामचित्तयोः स्पृहा न कार्येत्याह ।। शोकेति ।। क्लैब्यमसामर्थ्यम् ।। ३३ ।।

मधुकारमहासर्पौ लोकेऽस्मिन् नो गुरूत्तमौ ।
वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ।। ३४ ।।

सत्यधर्मीया — विरतिरतिरतीव त्वयि वर्वर्ति कथमियं त्वया लब्धेत्यतः प्राग्गुरूपदेशादङ्कूरित-कलिकायास्तस्याः प्ररोह एतत्कृत इति तावाह ।। मधुकारेति । मधु करोतीति स तथा । मधुमक्षिका । मधु च क्षौद्रम् । महासर्पोऽजगरश्च तौ नोऽस्माकं गुरूत्तमौ गुरुश्रेष्ठौ । तच्छ्रैष्ठ्यं स्पष्टयति ।। यच्छिक्षयेति । वयं यच्छिक्षया ययोः शिक्षा तदाचारविलोचनरूपिणी तया वैराग्यं परितोषं चेति क्रमाद्द्वयं प्राप्ताः । अस्मिंल्लोक एतद्देहे । एतेन पूर्वं गुरुभिरुपदिष्टदर्शिताध्वन एवैतद्दर्शनतो विरागपरितोषौ नैतन्मात्रं तत्र कारणमिति ध्वनयति । अन्यथा सर्वेषां द्रष्टृणामविशेषत एतौ स्यातामिति भावः ।। ३४ ।।

मन्दनन्दिनी — स्वस्य वैराग्यपरितोषयोर्गुरू आह ।। मधुकार इति ।। नोऽस्माकम् ।। ३४ ।।

विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ।
कृच्छ्राप्तं मधु तद्वित्तं हत्वाऽप्यन्यो हरेत् पतिम् ।। ३५ ।।

सत्यधर्मीया — क्रमेण यदाचारं विचारणेन यद्यथा सम्पादितं तदाह ।। विराग इति । मधुव्रतात् । ल्यब्लोपनिमित्तेयं पञ्चमी । तं वीक्ष्य मे मया सर्वकामेभ्यो वित्तादिविषयेभ्यो विरागः शिक्षितः । कृच्छ्राप्तम् । इतस्ततोऽटव्यटनेन नानासुमरसपानं तेन वमनं तेन तदुत्पादनमिति कष्टसञ्चितं मधु । यथा मधुव्रतं हत्वाऽटविको नयति तथाऽन्यः प्रागुदीरितराजाद्यन्यतमः पतिं धनस्वामिनं हत्वा वित्तं हरेदिति तदवलोकनं मम निर्ममताघटकमभूदिति भावः ।। ३५ ।।

मन्दनन्दिनी — क्रमेण शिक्षाप्रकारमुपपादयति ॥ विराग इति ॥ गुरुत्वं बुद्धिजनकत्वं मद्बुद्धिजनकत्वं तत्र वित्तं न सम्पाद्यमित्येतद्बुद्धिजनकत्वं मधुकरस्य । वित्तवत्कृच्छ्र-सम्पादितमध्वर्थमन्ये महत्त्वेन दृष्टस्य मधुकरस्य । यदृच्छालाभेन परितोषणीयमित्येतेनैवेष्टतया हृष्टस्य सर्पस्येति विवेचनीयम् । पतिं वित्तपतिम् ॥ ३५ ॥

अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ।
नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥

सत्यधर्मीया — अजगरात्तं जागरणमीरयति ॥ अनीह इति । उदरकुहरीपूरणप्रयत्नविकलः । तर्हि जीवनं कथमित्यतः कथयति ॥ यदृच्छेति । हरीच्छाप्राप्तात् । नो चेद्बह्वहानि गतम् । महाहिरजगरस्तद्वच्छये । तत्र बलमालपति ॥ सत्त्ववानिति । जनयिता विना स्वक्लृप्तकालं न नाशयतीति धैर्यवान् । तेनैव मम पीनतेति भावः । अनयोर्मध्ये सञ्चितं वञ्चयित्वेतरो नयतीति तदसञ्चयधि-यमुपजनयतो मधुकरस्य जनयिता पोषयतीति मनीषामुद्भावयतो महाहेश्च चर्यायां गौरवागौरवे प्रथमाप्रथमनिर्देशे तन्त्रे ज्ञेये ॥ ३६ ॥

मन्दनन्दिनी — यदृच्छयोपनतादनायासेन दैवेच्छयैव लब्धात् । नो चेदलाभे । शये शयनं करोमि । बह्वहानि बहुदिनानि सत्त्ववान् बलवान् ॥ ३६ ॥

क्वचिदल्पं क्वचिद् भूरि भुञ्जेऽन्नं साध्वसाधु वा ।
क्वचिद् भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥

सत्यधर्मीया — यदृच्छयोपनतादित्युक्तं व्यक्तीकृत्य वक्ति ॥ क्वचिदिति । साध्वसाधु वा सदन्नं कदन्नं वा । गुणेन सूदेन उपेतं गुणोपेतम् । भूरिणा सुवर्णरूपदक्षिणया सहितं च तत् गुणोपेतम् । गुणेन सूदेन हीनं कन्दमूलादिकम् । साध्वानः अध्वनीनाः आर्द्रचणकाः । वैद्यके तथोक्तेः । अतो नार्थिकीपुनरुक्तिः । भूरिप्राज्यसुवर्णयोः । गुणः सूदे वृकोदरे । साधुर्वार्धुषि चाराविति विश्वस्मिन्निति विश्वः ॥ ३७ ॥

मन्दनन्दिनी — यदृच्छालाभप्रकारमेव विशदयति ॥ क्वचिदित्यादिना ॥ अल्पं परिमाणतः साधु स्वभावतो गुणोपेतं सहकारिसम्पन्नम् ॥ ३७ ॥

श्रद्धयोपहृतं क्वापि कदाचिन्मानवर्जितम् ।
भुञ्जे भुक्त्वाऽथ कस्मिंश्चिद् दिवा नक्तं यदृच्छया ॥ ३८ ॥

सत्यधर्मीया — दिवा भुक्त्वा पुनर्नक्तं च भुञ्जे ॥ ३८ ॥

मन्दनन्दिनी — श्रद्धया विश्वासपूर्वकमानेन । कस्मिंश्चिद्दिने दिवा कस्मिंश्चिन्नक्तं रात्रौ ॥ ३८ ॥

क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ।
वसेऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ॥ ३९ ॥

सत्यधर्मीया — क्षौमं पीताम्बरं दुकूलं कार्पासिकं चीरमर्कत्वगादिनिर्मितम् । वल्कलं त्वचमेव । अन्यत्पर्णादि । दिष्टभुक् भगवद्दत्तभुक् । तुष्टधीः सदा सन्तुष्टचेतस्कः ॥ ३९ ॥

मन्दनन्दिनी — शयने यदृच्छालाभप्रकारमुक्त्वा वसने आह ॥ क्षौममिति ॥ पीताम्बरम् । दुकूलं कार्पासम् । अजिनं कृष्णमृगादिचर्म । वल्कलं वसनयोग्यवृक्षत्वगादि । चीरं वस्त्रम् । एतच्च विशेष्यम् । अन्यत्कटपर्णादि । वसे आच्छादयामि । वस आच्छादन इति धातुः । दिष्टभुक् दैवप्राप्तभुक् । तुष्टधीस्तुष्टमनस्कः ॥ ३९ ॥

क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ।
क्वचित् प्रासादपर्यङ्के कशिपौ वा परेच्छया ॥ ४० ॥

सत्यधर्मीया — क्वचिद्धरोपस्थे भूपृष्ठे शये । तृणेषु पर्णेषु । अश्मसु पाषाणेषु । भस्मसु भसितेषु । प्रासादे तत्रापि पर्यङ्के तत्रापि कशिपाविति । पृथगेव वा शये ॥ ४० ॥

मन्दनन्दिनी — शयने यदृच्छालाभप्रकारमाह ॥ क्वचिदिति ॥ धरोपस्थे भूमितले पर्यङ्के कशिपौ तल्पे कार्पासादिगर्भतया मृदुशयने ॥ ४० ॥

क्वचित् स्नातोऽनुलिप्ताङ्गः सुवासाः स्रग्लङ्कृतः ।
रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवत् क्वचित् ॥ ४१ ॥

सत्यधर्मीया — अनुलिप्ताङ्गो गन्धादिना । रथेभाश्वैस्तदारुह्य चरे चरामि । ग्रहवत्पिशाचवच्चर इत्यन्वयः । एतादृगृदृतो न जन्मान्तरीयस्मरणमसूपपादमिति क्षौममादीकृत्य दिग्वासा इत्येतदन्तं तत्तद्योग्यजन्मान्यूह्यानि । केषाञ्चित्समाहारो वा विरुद्धानां बोध्यः । आजगर्याश्चर्याया गौरवेण प्रथमं वक्तव्यत्वेऽप्युत्तरत्र बहुना ग्रन्थेन क्रियमाणतदुपपादनाव्यवधानसन्निधानसिद्ध्ये मधुव्रतानन्तरं निबन्ध इति वा मन्तव्यम् ॥ ४१ ॥

मन्दनन्दिनी — देहालङ्कारादौ यदृच्छालाभप्रकारमाह ॥ क्वचित्स्नात इति ॥ चरे चरामि । ग्रहवत्पिशाचवत् ॥ ४१ ॥

**नाहं निन्दे च न स्तौमि स्वभावविषमं जनम् ।
एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥**

सत्यधर्मीया — शेषे न द्वेष्टि नौषि वेत्युत्तरयति ॥ नेति । स्वभावविषमं सात्त्विकादिप्रकृतिविषमं जनं न निन्दे न निन्दामि न च स्तौमि च । स्वस्वभावप्रवर्तमानजननिन्दनं वन्दनं किमाधायकमित्युपेक्ष्यैवं वर्त इत्याह ॥ एतेषामिति । जनानां श्रेयो मङ्गलमाशासे मनसेच्छामि । मुख्यं धर्ममाख्याति ॥ महात्मनीति । भगवत्यैकात्म्यमेक एवात्मा स्वामी तस्य भाव ऐकात्म्यमाशास इत्यन्वेति । तदेकशरणो हरिमित्यनुपदमीरणादैकात्म्यपदमन्यथाप्रतीतेरप्रतीतेर्वा न पदं भवतीति प्रागत्र विवृतत्वाच्च स्थानान्तरे ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणा इत्यभिधानाच्चेदानीं तदव्याकृतिस्तात्पर्यं ज्ञेयम् ॥ ४२ ॥

मन्दनन्दिनी — मनोवृत्तिप्रकारमाह ॥ न निन्द इति । स्वभावविषमं गुणत्रयस्वभावकृतवैषम्योपेतं जनं योग्यम् । अयोग्येषु निन्द्यान् निन्देतेति निधानात् । उतापि तु महात्मनि भगवत्यैकात्म्यं मुख्यस्वामित्वं यैर्ज्ञातमेतेषाम् ॥ ४२ ॥

**विकल्पं जुहुयाच्चित्ते तन्मनस्यर्थविभ्रमे ।
मनो वैकारिके हुत्वा मायायां वै जुहोत्यमुम् ॥ ४३ ॥**

तात्पर्यम् — चित्ते मनोवृत्त्यभिमानिनि । अर्थविभ्रमे अर्थेषु भ्रममाणे । 'चित्ताख्याग्नेरधीनं हि जगदेतद्विचिन्तयेत् । मनोनामेन्द्रवशगमग्निं च प्रविचिन्तयेदि'त्यादि च ॥ ४३ ॥

सत्यधर्मीया — विकल्पं जुहुयाच्चित्त इति श्लोकार्धे विकल्पं चित्ते तच्चित्तं मनसि जुहुयादिति चित्तस्य मनसि होम उच्यते । स चासङ्गतः । स्वस्मिन्स्वलयस्यायोग्यविषयत्वादुत्तमेष्वनुत्तमहोम इति नियतिव्यतिक्रमापत्तिविपत्तेरित्यतोऽनूद्य स्वयं विवृत्य च मानमुदाहरति ॥ चित्त इति । मनोवृत्त्यभिमानिनि । अर्थविभ्रम इत्यस्यार्थविषयकभ्रम इति भ्रमनिरासाय स्वयमनूद्य व्याकरोति । अर्थविभ्रमेऽर्थेषु भ्रममाणे । एतेनार्थेषु भ्रमो भ्रमणं यस्येति तत्पदव्युत्पत्तिं सूचयति । विकल्पमित्यस्यार्थो जगदेतदिति । चित्तमित्याख्या यस्य तस्याग्नेरधीनं चिन्तयेत् । तच्चित्तमग्निं मनसीति मनोनामकेन्द्रवशगं विचिन्तयेत् । वृत्त्यन्तरं जडं जडे मूलमनसि । अग्निमिन्द्रे चेतने चेतनमिति सार्वत्रिको नियमः । इत्यादिचात्ममाचार इत्यत्रोत्तरत्रापि शेषोऽवसेयः ॥ ततश्चायं मूलार्थः ॥ निरीहताहेतुं द्वाभ्यामाह ॥ विकल्पमिति । विकल्पं नानाजातिभेदयुतं जगच्चित्ते तदभिमानिन्यग्नौ तच्चित्तं जडमजडमग्निं च मनसीन्द्रे जडेऽजडे च । अर्थविभ्रम इति यथायथं चित्तमनसोर्विशेषणम् । अर्थेषु

भ्रमति । अर्थेष्विति तात्पर्ये बहुवचनेनोत्तरत्रात्मनीति परमात्मरूपार्थस्याभिधास्यमानत्वादत्रार्थापदेशेन विषया बाह्या एव ग्राह्याः । तन्मन इन्द्रं वैकारिकेऽहन्तत्त्वात्मनि रुद्रे । जडं जडेऽहङ्कारतत्त्वे । अमुं रुद्रं मायायामचित्प्रकृतिविकृते महत्तत्त्वे ब्रह्मणि जुहोति । खादिरो यूपो भवतीत्यादिवल्लिङर्थे लेट् । क्रियाप्रबन्ध इति लिङर्थे लड्वा ॥ ४३ ॥

मन्दनन्दिनी — एवं स्ववृत्तिमुक्त्वा संन्यासी लयचिन्तनेन कृतकृत्यो भवेदिति तात्पर्येण सङ्कोचेन तत्प्रकारमाह ॥ विकल्पमिति ॥ विविधः कल्पः समर्थो देवसमूहः । तं चित्ते चित्ताधीनत्वाद्वाक् चित्तमित्युच्यते । यन्मनसा ध्यायति तद्वाचा वदतीति श्रुतेः । वागभिमानिन्यग्नौ जुहुयादधीनत्वे दद्यात् । द्यु दानादनयोरिति धातुः । दानं च चिन्तनम् । अग्नौ सर्वदेवलयश्च अग्नौ सर्वे देवा विलीयन्त इति श्रुतिसिद्धः । तच्चित्तमग्निमिति यावत् । अर्थानां शब्दादीनां विपरिणामहेतुमनोऽभिमानिनीन्द्रे । मन इन्द्रं वैकारिके तदभिमानिनि गरुडेऽमुं गरुडं मायायां प्रकृतिजन्यत्वान्मायाशब्दवाच्यमहत्तत्त्वाभिमानिनि ब्रह्मणि ॥ ४३ ॥

आत्मानुभूतौ तां मायां जुहुयात् सत्यदृङ् मुनिः ।
ततो निरीहो विरमेत् स्वानुभूत्याऽत्मनि स्थितः ॥ ४४ ॥

सत्यधर्मीया — तां मायां विरिञ्चं चात्मानुभूतौ चित्प्रकृतौ । तद्द्वारत्वेन जुहुयात् । तां चात्मानुभूत्यात्मनि तत्स्वामिनि हरौ । तदत्यन्तसमीपवर्तिनीं चिन्तयेत् । मुनिः वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत इत्युत्पलमालाया वेद्यवेदिता । सत्यदृक् सत्यं साधुगुणं ब्रह्मेत्यादेस्तत्पश्यतीति स तथा । सतीं भार्यां तदुपलक्षितं सर्वमपि न पश्यतीति सत्यदृक् । ततो निरीहः स्थितः विषयवासनयाप्रसरन्विरमेत् । अकर्मण इति शेषः । अनुभूयात्मनि लक्ष्म्यध्यक्षे स्थितः । सत्यदृक् भूतहितमेव पश्यतीति स तथेति वा ॥ ४४ ॥

मन्दनन्दिनी — तां मायां ब्रह्माणमात्मानुभूतावात्मनः परमात्मनोऽनु अनुकूला भूतिर्महालक्ष्मीः । स्वामीयके सप्तमी । तद्द्वारा न तु तत्र देहलयः । विलीनो हि प्रकृतौ संसारमेतीति श्रुतेः । स्वानुभूतेर्लक्ष्म्या आत्मनि विष्णौ जुहुयात् । ततः परमात्मनि स्थितमनस्कः सत्यदृक् परमात्मापरोक्षी मुनिः संन्यासी विरमेत् । बाह्यकृत्यात्कृतकृत्यो भवेदिति यावत् । विस्तरतो लयस्तु सूर्याग्नियुक्त इत्याद्यनुव्याख्यानतोऽवगन्तव्यः । अत्र तात्पर्यम् ॥ चित्ते मनोवृत्त्यभिमिनिनीत्यादि ॥ ४४ ॥

स्वात्मवृत्तं मयेत्थं ते सुगुप्तमनुवर्णितम् ।
व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्प्रियः ॥ ४५ ॥

तात्पर्यम् — **'अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयत' इति च ॥ ४५ ॥**

इति सप्तमतात्पर्ये त्रयोदशोऽध्यायः ॥ १३ ॥

सत्यधर्मीया — स्वात्मवृत्तमिति श्लोके लोकशास्त्राभ्यां व्यपेतं लोकविरुद्धं शास्त्राप्रतिपादितं स्वात्मानुवृत्तं मया वर्णितमिति वर्णितमित्यन्यथामतिमतिवर्तयितुमशास्त्रीयशब्दार्थज्ञानं तत्प्रतियोगिशास्त्रीयपदार्थज्ञानेन सुसाधमिति वाऽन्तरङ्गतः शास्त्रीयत्वं सर्वजनीनं तत्परतयाऽपि व्यपेतेतिपदं व्याकर्तुं शक्यं चेति सूचयितुं वा मानेन तदुभयपदार्थं वक्ति ॥ अशास्त्रीयत्वान्मुखत इति । एतेन मूले मुखत इति शेष इति सूचयति । मुखतो बहिरशास्त्रीयत्वादिदं शास्त्रापेतं विदुर्विदः । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयम् । उपक्रमादिभिर्निर्णयो विचारस्तद्गम्यत्वाच्छास्त्रीयं चाभिधीयत इति च । अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते । य एव लौकिकास्त एव वैदिका इत्यादेः । शास्त्रीयताप्रदर्शनेन प्रदर्शितलौकिकत्वं भविष्यतीति तात्पर्ये तदनुक्तिः । मूले च पामरानुजिघृक्षया विविच्योक्तिरिति ज्ञेयम् ॥ अथ मूलार्थः ॥ हि यतो भवान्भगवत्प्रियस्तस्माल्लोकशास्त्राभ्यां व्यपेतं रहितं बहिरन्तरङ्गतस्ताभ्यां व्यपेतमपेतविरुद्धमुपेतम् । एवमशास्त्रीयशास्त्रीयते ज्ञेये । सुगुप्तमपि स्वात्मेत्यखण्डम् । मम वृत्तं मयेत्थं तेऽनुवर्णितम् । हे स्व हरिदासकूटघटितत्वादिति वा । लौकिकालौकिकत्वे अनेनैव व्याख्याते इति तदनुक्तिः ॥ ४५ ॥

मन्दनन्दिनी — भगवत्प्रियत्वात्प्रह्लादस्यात्यन्तमितरेभ्यो गुप्तमपि स्ववृत्तमानुपूर्व्येण वर्णितमित्याह ॥ स्वात्मवृत्तमिति ॥ वृत्तं चरित्रम् । अत्र वृत्तस्य लोकशास्त्राभ्यामपेतत्वमनुपपन्नम् । अवधूतवृत्तस्य ज्ञानिसंमतस्य शास्त्रादपेतत्वायोगादित्यतस्तात्पर्यं प्रवृत्तम् ॥ अशास्त्रीयत्वादित्यादि ॥ मुखत आपाततः । शास्त्रनिर्णयगम्यत्वादुपक्रमादिना विचार्यमाणे शास्त्रतात्पर्यविषयनिर्णयविषयत्वाद्वस्तुतः शास्त्रीयमित्यर्थः ॥ ४५ ॥

नारद उवाच–

धर्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः ।
पूजयित्वा ततः प्रीतः आमन्त्र्य प्रययौ गृहान् ॥ ४६ ॥

इति श्रीमद्भागवते सप्तमस्कन्धे त्रयोदशोऽध्यायः ।

सत्यधर्मीया — अवधूतोपदेशादवधूतराजमदो राजोत्तरत्राचीकरत्किश्चेति युधिष्ठिरहृदयस्थं संशयं व्यंसयति ॥ नारद इति । परमहंसानां निवृत्तिमार्गप्रवृत्तानामिदं पारमहंस्यं धर्मम् । मुनेः गतम् । श्रुत्वाऽसुरेश्वरस्तं पूजयित्वा तत उत्तरं प्रीत आमन्त्र्य गृहान्मन्दिरं प्रययौ गतवान् ॥ ४६ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ
सप्तमे त्रयोदशोऽध्यायः ॥ ७-१३ ॥

मन्दनन्दिनी — संवादानन्तरं प्रह्लादस्य स्वगृहगमनमाह ॥ नारद इति ॥ पारमहंस्यं परमहंसाश्रमकर्तव्यम् । असुरेश्वरः प्रह्लादः । आमन्त्र्य गच्छामीति स्वगमनं निवेद्य गृहान् । गृहाः पुंसि च भूम्ये वेति कोशात् ॥ ४६ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे त्रयोदशोऽध्यायः ॥ ७—१३ ॥

॥ अथ चतुर्दशोऽध्यायः ॥

युधिष्ठिर उवाच–

गृहस्थ एतां पदवीं विधिना येन चाञ्जसा ।
यायाद् देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥

सत्यधर्मीया — ईहोपरमादिपरमहंसवनस्थादिधर्मं निरूप्याधुना गृहिणां धर्ममेवं चेच्छर्मसाधनमिति निरूपयत्यस्मिन्नध्याये । तत्र नापृष्टः कस्यचिद्ब्रूयादित्यादेर्नारदेन स्वाभीप्सितं वादयितुं युधिष्ठिरः पृच्छतीत्याह ॥ युधिष्ठिर इति । हे देवऋषे नारद । ऋत्यक इति प्रकृतिभावः । मूढधीर्मादृश इति दीनानुजिघृक्षया स्वाहन्ताशान्तिप्रथनम् । आ सर्वनाम्नो दृग्दृशवतिष्वित्याकारे मादृश इति ज्ञेयम् । अनेन लोकानामनुगृह्णतेति पुरोवचनमनुकृतं ज्ञेयम् । मद्विधो गृहस्थो येनाञ्जसाऽनुष्ठितेन विधिनैतां पदवीं परमहंसादिप्राप्यां लोकं यायात्तं विधिं ब्रूहीत्यन्वयः । मादृशो मायां दृग्यस्य तस्य हरेः पदवीमिति । चोऽप्यर्थे । मूढधीरपीत्यन्वेति ॥ १ ॥

मन्दनन्दिनी — वर्णाश्रमधर्माणां सर्वेषां गृहस्थाश्रममूलत्वात्तदाश्रमधर्मान्विवक्षुः प्रश्नागतिप्रकारमाह ॥ युधिष्ठिर इति ॥ एनां पदवीमवधूतादिसाध्यां मोक्षपदवीं येन विधिना गृहस्थाश्रमोचितधर्मेण । तं ब्रूहीति योजना ॥ १ ॥

नारद उवाच–

साधु पृष्टं महाभाग लोकानामनुगृह्णता ।
तत्त्वेन तदहं वक्ष्ये नैष्कर्म्यं येन कर्मणाम् ॥ २ ॥

सत्यधर्मीया — हे महाभाग यूयं नृलोके बत भूतिभागा इत्यादिनोक्तभूरिभाग्य । लोकानां तदुपरि अनुगृह्णताऽनुग्रहं कुर्वता । लोकानां लोकानिति वा । त्वया यत्पृष्टं तत्साधु समीचीनम् । इदं तदनवधानविधूननार्थं नोत्प्रेक्षितप्रमेयं किन्तु साधुभिः प्राक् पृष्टं चेत्यप्यर्थः । येन कर्मणां गृहस्थाचरितानां नैष्कर्म्यं मोक्षसाधनत्वम् । तत् विधानं तत्त्वेन याथार्थ्येन वक्ष्ये । कर्मणां विद्यमानानामपि नैष्कर्म्यं संसारादिदुष्फलप्रापकतापनोदेनाविद्यमानप्रायता तद्वक्ष्य इति वा ॥ २ ॥

मन्दनन्दिनी — लोकानां लोकान् । तत्त्वेन याथार्थ्येन ॥ २ ॥

गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ।
वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ ३ ॥

सत्यधर्मीया — गृहोचिताः क्रियाः पञ्चयज्ञादिकाः । पञ्चयज्ञार्थसिद्ध्यर्थं विद्यामाध्यात्मिकीं जपेत् । बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः । भूतपित्रमरब्रह्ममनुष्याणां महामखा इति याज्ञवल्क्यः । पञ्च वा एते महायज्ञाः सतति प्रलायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति । यदग्निं जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते यत्पितृभ्यः स्वधा करोत्यपस्तत्पितृयज्ञः सन्तिष्ठते यद्भूतेभ्यो बलिं हरति तद्भूतयज्ञः सन्तिष्ठते यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः सन्तिष्ठते यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठत इत्यारणस्वाध्यायब्राह्मणं च । तासां वासुदेवार्पणं कुर्वन्नित्यनुवर्तते । महामुनीन् गतम् । उपासीत सत्कुर्यात् साक्षात्तत्ततोऽल्पेन ॥ ३ ॥

मन्दनन्दिनी — गृहोचितपञ्चमहायज्ञादिरूपाः क्रियाः कुर्वन् साक्षात्काम्यार्थत्वं विना मुख्यतो वासुदेवार्पणम् । कुर्वन्निति शेषः । महामुनीनपरोक्षज्ञानिन उपासीतेति योजना । तथा च काम्यकामतां विना भगवत्प्रीत्यर्थमेव क्रियमाणं गृहाश्रमोचितं कर्म महामुन्युपासनसहितं मोक्षाय भवतीति भावः ॥३ ॥

शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतम् ।
श्रद्दधानो यथाकालमुपशान्तजनादृतम् ॥ ४ ॥

सत्यधर्मीया — उपशान्तजनादृतमुपशान्तजनाः परमहंसास्तैरादृतम् । उपशान्तजनात् भगवन्निष्ठबुद्धिमज्जनात् । ऋतमधिगतम् । उपशान्तजनात्तन्मुखादृतमवगतं यथा भवेत्तथा शृण्वन्निति वा । हे उपशान्त जनादृतं जनैः पामरैरप्यादृतमिति वा ॥ ४ ॥

मन्दनन्दिनी — इत्थंभावान्तरमाह ॥ शृण्वन्निति ॥ भगवतोऽवतारकथामृतम् । अभीक्ष्णं पुनः पुनः । श्रद्दधानोऽतिविश्वासवान्सन् शृण्वन् उपशान्तजनेन स्वोपासितमहाभक्तिमत्संन्यासिजनेनादृतः प्रीतिविषयो यथाकालं विहितकालम् ॥ ४ ॥

तत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ।
विमुञ्चेन्मुञ्चमानेषु स्वयं स्वप्नवदुत्थितः ॥ ५ ॥

सत्यधर्मीया — तत्सङ्गादुपशान्तजनसङ्गाच्छनकैर्मन्दमात्मनि देहे जायायां भार्यायामात्मजादिषु पुत्रादिषु सङ्गं विमुञ्चेत्त्यजेत् । स्वात्यागेऽपि त एव त्यजन्तीत्याह ॥ मुञ्चमानेष्विति । उत्थितः स्वप्नात् । स्वप्नवत्स्वप्ने स्वाप्न इव । तत्रेवेति वतिः । स्वप्नदृष्टे यथा सङ्गं जहाति तथा स्वयं मुञ्चेदित्यर्थः ॥ ५ ॥

मन्दनन्दिनी — सतां सङ्गात्सहवासजनितवैराग्यादात्मजायाऽऽत्मजादिषु । आत्मनि देहे जायादिषु मुञ्चमानेषु दैवात्संत्यजत्सु परस्परं सङ्गम्य वा मुञ्चमानेषूत्थितः स्वप्नवत्स्वान् पुत्रादिष्विव सङ्गं स्नेहं शनकैः क्रमेण स्वयं मुञ्चेदिति श्लोकद्वययोजना । अनेन श्रद्धापूर्वभगवत्कथाश्रवणतद्भक्तप्रीति-सम्पादनस्वकीयजनस्नेहपरित्यागः कर्तव्य इत्युक्तं भवति ॥ ५ ॥

यावदर्थ उपासीनो देहे गेहे च पण्डितः ।
विरक्तो रक्तवत् तत्र नृलोके नरतां न्यसेत् ॥ ६ ॥

सत्यधर्मीया — देहे गेहे गृहिण्यां गृहे च । यावदर्थो यावानर्थो यस्य स यावदर्थः उपासीनोऽवस्थितः । यावदर्थमिति हृदयङ्गमः पाठः । तत्र देहादौ विरक्तोऽन्तो रक्तवद्बहिरिति पण्डितः सन् नृलोके नरतामज्ञतां न्यसेज्जह्यात् । क्रमाज्ज्ञानी स्यादित्यर्थः । नरस्तु रामे कर्पूरे नरोऽज्ञे मानवेऽर्जुन इति विश्वः । नृलोके तन्मध्ये नरतां न्यसेदयमेव पुरुष इति स्वपौरुषमाविष्कुर्यादिति केचित् । पण्डित इति गतम् । नृलोके मनुष्यदेहे नरतामनश्वरतां त्यजेदिति वा । वितानितं प्राचि मनस्यानेयम् । नरतां न्यसेत्पशुप्राया देहाद्यहंममतायुता इति मतिं तनुयादिति वा । नरतां ला परिवर्तनेऽस्मात्कः । रता चञ्चलता सा नेति नरताऽचञ्चलता तां नित्यतां न्यसेत् । ऋग्भाष्य-टीकयोर्धिया नराविति विवृतिसमयेऽचलौ लापरिवर्तने ततो नञ्पूर्वात्क इत्युक्तेः ॥ ६ ॥

मन्दनन्दिनी — इत्थंभावान्तरमाह ॥ यावदिति ॥ यावान् स्वस्य परलोकसाधनीभूत-स्नानध्यानयागादिकमनुष्ठानपाटवं देहेनातिथ्यादिभोजनवासनादिकं च गेहेन । तस्मिन्नेव प्रयोजने तत्रोपासीनो वस्तुतो विरक्तो रक्तवद्दृश्यमानो नृलोके स्थिरतां नरतामायुःपूर्त्यनन्तरं न्यसेत् क्षिपेदिति योजना । अनेन देहगेहादेः पारलौकिकप्रयोजनायैवानुसरणं कर्तव्यमित्युक्तं भवति ॥ ६ ॥

ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ।
यद् वदन्ति यदिच्छन्ति अनुमोदेत निर्ममः ॥ ७ ॥

सत्यधर्मीया — पितरौ मातरपितरौ । मुख्यमातृविवक्षया द्विवचनम् । पुत्राः सुहृदो बान्धवो यद्वदन्ति यदिच्छन्त्यपेक्षन्ते तदनुमोदेत ॐकुर्यात् । तत्र हेतुर्निर्मम इति । गतम् । असन्धिरेतद्धीसन्धि-दौर्घट्यसूचनार्था । यद्यस्मात्ते वदन्ति वदवद्वाग्मिवदाचरन्ति तद्यदिच्छन्ति तदनुमोदेतेति वा ॥ ७ ॥

मन्दनन्दिनी — इत्थंभावान्तरमाह ॥ ज्ञातय इति ॥ अनेन स्वस्य महासाम्राज्यसत्वे ज्ञात्याद्युक्ता-भीष्टदानादिकमपि भगवत्तोषसाधनमित्युक्तं भवति ॥ ७ ॥

दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनिर्मितम् ।
तत्सर्वमुपभुञ्जीरन् न स्वीकुर्यात् स्वतो बुधः ॥ ८ ॥

सत्यधर्मीया — बुधो लोका दिव्यं दिवि भवं भौमं भूमिभवमान्तरिक्षमन्तरिक्षे द्यावापृथिवीमध्ये भवमच्युतनिर्मितं यद्वित्तं तत्सर्वमुपभुञ्जीरन् भुञ्जते तत्स्वतः स्वस्य । स्वकीयमिति यावत् । तत्त्वेन न स्वीकुर्यात् । दिव्यं वृष्ट्या जातमकृष्टपच्यम् । भौमं कन्दमूलादि । अन्तरिक्षमतर्कितायातम् । स्वत एवाच्युतनिर्मितं भगवन्निर्मितमिति यावत् । ''तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः'' इति सरलः पाठो विरलार्थश्च । सर्वमुपभुञ्जान एतत्कर्म स्वाश्रमविहितं कुर्यात् ॥ ८ ॥

मन्दनन्दिनी — इत्थंभावान्तरमाह ॥ दिव्यमिति ॥ दिव्यभौमान्तरिक्षभोगसाधनवित्तं स्वयमेव न स्वीकुर्यात् । किं त्वितरेऽप्युपभुञ्जीरन् । अनेन भोगयागादिकमितरैरपि कारयेदित्युक्तं भवति ॥ ८ ॥

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ९ ॥

सत्यधर्मीया — नात्यश्नतस्तु योगोऽस्तीत्याद्युक्तेस्तदप्युदरपूर्तिर्यावता भवेत्तावदद्यादित्याह ॥ यावदिति । यावत्तावदित्यव्ययम् । यथा संस्वादिलोपः । यावद्यावता जठरमुदरं भ्रियेत पूर्येत तावत्तावति देहिनां स्वत्वं स्वकीयतां कुर्यात् । अधिकं योऽभिमन्येत काङ्क्षेत स स्तेनस्तत्प्रायो दण्डं शिक्षां चार्हति । यावत्तावत्परिच्छेद इत्यव्ययविश्वः ॥ ९ ॥

मन्दनन्दिनी — इत्थंभावान्तरमाह ।। यावदिति ।। अनेन स्वभोगसाधनपरिमितमेव स्वभोगसाधनं करणीयम् । अन्यत्स्वं स्वत्वत्यागेनातिथ्याभ्यागतबन्ध्वादिभिर्भोजनीयम् । नो चेत्स्नेह एवेति भावः । गोशतादपि गोक्षीरं प्रस्थं मानशतादपि । प्रासादादपि खट्वार्धं शेषाः परविभूतयः ।। ९ ।।

नृगोखराश्वमर्कास्तु सरीसृपविमक्षिकान् ।
आत्मनः पुत्रवत् पश्येत् तैरेषामन्तरं कियत् ।। १० ।।

सत्यधर्मीया — नरः पुरुषा गावः सौरभेय्यः श्वानो गृहपाला मर्का मार्जाराः । आखुभुक्वृषदंशश्च मार्जारो मर्क उच्यत इत्यभिधानम् । वयः पक्षिणो मक्षिका मशकान् आत्मनः पुत्रवत्पुत्रानिव पश्येत् । तैर्नरादिभिरेतेषां पुत्राणां चान्तरं विशेषः कियान्न किमपि । भगवन्नियतत्वाविशेषात् ।। १० ।।

मन्दनन्दिनी — न केवलं बन्धुजनादिसंरक्षणं कर्तव्यं किन्तु भृत्यगवादिसंरक्षणमपीत्याह ।। नृगोखरेति ।। मर्को मार्जालः । आखुभुक् पृषदंशश्च मार्जारो मर्क उच्यत इत्यभिधानात् । वयः पक्षिणः । अन्तरं भेदः । अत्र यथायोग्यं लालनीयत्वे पुत्रदृष्टान्तो न तु सर्वथा । तेन भृत्यानां वेतनेन यवसेन गवां खराणां यवसभूमिविसर्जनेन शुनामुच्छिष्टदानेन मर्काणां चलितपयआदिनाऽऽखूनां धान्यशेषादिना पक्षिणां भूमौ न्यस्तान्नादिना मक्षिकानां गुडसम्पर्कादिना पालनं बोध्यम् । अनेनापि भगवत्प्रीतिरिति भावः ।। १० ।।

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ।
यथादेशं यथाकालं यावत् दैवोपपादितम् ।। ११ ।।

सत्यधर्मीया — गृहमेधी सन्नपि त्रिवर्गं धर्मादित्रिकमतिकृच्छ्रेण परं स्वं चातिक्लेशयित्वेत्यतिकृच्छ्रेण न भजेत न सेवेत । तर्हि कथङ्कारं कर्तव्यं तेनेत्यत आह । यथादेशं शास्त्रेण यथा शंसितं तथा । एष आदेश एष उपदेश इत्यादेः । देशानुसारेणेति वा । कालं वसन्तादिकालमनुसृत्येति यथाकालम् । तत्रापि दैवेन हरीच्छयोपपादितं प्राप्तं यावत्तावद्भजेत । अक्लेशयित्वा चात्मानं यदल्पमपि तद्बह्वित्यादेः ।। ११ ।।

मन्दनन्दिनी — विहितं धर्मार्थकामलक्षणत्रिवर्गमपि दुष्प्रतिग्रहादिलक्षणात्यायासेन विनाऽनायासेन प्राप्तेनैव भजेत । तथैव करणे भगवत्तुष्टिरित्याह ।। त्रिवर्गमिति ।। अतिकृच्छ्रेणात्यायासेन न भजेत । किन्तु यथादेशं यथाकालं यावद्दैवोपपादितं भजेतेति योजना ।। ११ ।।

आश्वाघान्तेवसायिभ्यः कामान् संविभजेद् यथा ।
आस्वैतान् महतो दारान् नृणां सत्त्वग्रहो यतः ॥ १२ ॥

सत्यधर्मीया — आश्वाघान्तेवसायिभ्यः श्वानश्चाघा अघमेषामस्ति ते पातकयुताश्चान्तेवासिनः प्राग्विवृतास्ते चेति । एतानभिव्याप्य । यथा तत्तद्योग्यतामनुसृत्य सम्यगिति वा । कामानन्नादिविषयान्संविभजेद्विभज्य बलिहरणादिद्वारा दद्यात् । एतत्प्रागङ्गमङ्गनास्वीकार इतीरयति ॥ आस्वेति । एतान्महतो गुणतो दारान् भार्याम् आस्वा प्राप्य । यतः यया भार्यया । नृणां सत्वग्रहः ज्ञानसंपत् भवति तानाप्त्वा संविभजेदित्यतीतेनान्वयः । महता प्रयत्नेन । उदारान् उद्गता आ अरा दोषा येभ्यस्तान्दारान्महत आस्वेति चान्वयः ॥ १२ ॥

मन्दनन्दिनी — पुत्रवत्पश्येदित्युक्तं पालनं दर्शयति ॥ आश्वभ्य इति ॥ यथा यथायोग्यम् । तान् अन्नादीन् श्वपर्यन्तमन्तेवसायिपर्यन्तं च विभजेत् । उच्छिष्टेन भूमौ निक्षिप्तान्नादिना च यथाऽश्वादीनां प्रीतिस्तथा सम्पादयेदिति भावः । उक्तगृहस्थधर्माद्यनुष्ठानेऽनुकूलया भार्यया भवितव्यम् । तत्प्रातिकूल्ये कथमित्यत आह ॥ आस्वेति ॥ यत एभ्यो दारेभ्यो नृणां सत्त्वग्रहो यावद्बलधैर्यादिनिरासो भवेत् ॥१२॥

जह्याद् यदर्थे स्वान् प्राणान् हन्याद् वा पितरं गुरुम् ।
तस्यां स्वत्वं स्त्रियां जह्याद् यस्तेन ह्यजितो जितः ॥ १३ ॥

सत्यधर्मीया — असती चेत्सा त्याज्येत्याह ॥ जह्यादिति । या यदर्थे यस्याभिलषितस्यार्थे निवृत्तौ तदनुष्ठान इति यावत् । स्वान्प्राणाञ्जह्यात् । पितरं भर्तुः स्वं गुरुमितरं भर्तुराचार्यमिति हन्यान्मारयेत् । पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति हीति षष्ठोक्तेः । नवमेऽपि स्त्रियो ह्यकरुणाः क्रूराः दुर्मुरव्यः प्रियसाहसाः । घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युतेति । तस्यां स्त्रियां यः पतिः स्वत्वं ममतां जह्यात्त्यजेत्तेनाजितः केनाप्यवशीकृतो हरिर्जितस्तद्वद्भवति । अजितोऽप्राप्तः प्राप्तो भवतीति वा । यथोक्तं छान्दोग्यभाष्ये । जिः प्राप्त्यर्थकः स्वर्जित इत्यादिवदित्यादि । हिना पूर्वोत्तरश्लोकार्थे मानसम्मतिमाह । यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते । मृते जीवति वा पत्यौ या नान्यमुपगच्छति । सेह कीर्तिमवाप्नोति मोदते चोमया सह । स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परस्त्रियः । हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् । परिभूतामधश्शयां वासयेद्व्यभिचारिणीमिति च ते मन्तव्ये । अजितो यो विष्णुः । अकयेत्यादेः । तेनेति तच्छब्दश्रवणेन य इति स्वतो लभ्यत एतत्पक्षे इति ज्ञेयम् ॥ १३ ॥

मन्दनन्दिनी — यदर्थं यादृशदाराभीष्टार्थम् । स्वान्प्राणान् जह्यात् । गुरुं पितरं वा हन्यात् । एतानेतादृशान्महतो दोषैर्युक्तान् दारान्कर्मवशादाप्त्वा तस्यां स्त्रियां तेषु दारेषु स्वत्वं स्वकीयाभिमानं

जह्यात्परित्यजेत् । यस्तेन स्वत्वाभिमानेनाजितः स एवाजितो हि । सर्वथा स्त्रीजितो न भवेदिति योजना । एतादृशदुष्टदारान्परित्यजेदिति भावः ।

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वारयेद्व्यभिचारिणीम् ॥ इति वचनात् ।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तस्य वर्धते ।
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ।
सेह कीर्तिमवाप्नोति मोदते ह्युमया सह ।
स्त्रीभिर्भर्तृवचः कार्यं एष धर्मः परः स्त्रियः ॥ इति ।

भगवत्तुष्टेरेव सर्वाश्रमेषु सम्पादनीयतया तत्साधनत्वाभावेन भार्यायां स्वत्वं त्याज्यमभिप्रेतम् ॥१३॥

कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ।
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १४ ॥

तात्पर्यम् — नभश्छदिः नभोव्याप्यस्थितः परमात्मा ॥ १४ ॥

सत्यधर्मीया — क्व तदीयरतिर्भार्येति श्लोके आत्मा जीवो नभच्छिदिर्नभसा विहायसाऽऽच्छाद्यत इति स तथेति वितथां प्रतीतिं नभच्छिदिपदमनूद्य व्याकुर्वन्नात्मपदं परपदेन विशेष्य जीवानवकाशं करोति । नभच्छिदिः नभो व्याप्य स्थितः परमात्मेति । नभश्छाद्यतेऽनेनेति स तथेति निर्वचनं ज्ञेयम् । अणुर्ह्येष आत्माऽणवश्चेत्यादेर्नभश्छदित्वं जीवस्यानुपपन्नमिवोपपन्नं चाकाशशरीरं ब्रह्मेति श्रुतेर्हराविति हृदयम् ॥ अथ मूलार्थः ॥ तदत्यागे नेश्वरावाप्तिर्भवतीत्यतः सा त्याज्येत्याह ॥ कृमीति । कृमय इति विड्विष्टेति भस्मेति निष्ठा निष्पत्तिरन्ते यस्य तत् । निष्ठा निष्पत्तिनाशान्तयाश्चानिर्हरणेषु चेति विश्वः । यथायथमेतद्रूपता ज्ञेया । इदं तुच्छं हीनं कलेवरं शरीरं क्व । तदीयरतिस्तदीया तुच्छैतच्छरीरसम्बन्धिनी रतिरासक्तिर्यस्यां सा भार्या क्व । अत्यागेऽसत्याः सा भार्या क्व । अयं नभश्छदिराकाशं व्याप्य स्थित आत्मा परमात्मा क्व । एतदासक्तस्य स आकाशशरीरः परमात्मा दूरे भवतीति तस्यां स्वत्वं जह्यादित्यर्थः । अनश्वरशरीरेश्वरप्राप्तिः कथमीदृशशरीरसंसर्गनिसर्गसन्मृगदृशी सक्त्या भवेदिति भावः । अयमात्मेति मूले पदं वा । अत एवात्मेत्यननुवादोऽयं परमात्मेत्यन्वयादर्शनं च ऋग्भाष्य इति ज्ञेयम् । अयमेति विवृतिः परपदेन कृतेति केचित् । छद संवरणे चुरादिः पुंसीति घः छदेर्घ इति ह्रस्वः । तृतीयोऽतिशय इत्यादेर्दकारोपरितनेकारः स्वातन्त्र्येणाच्छादकत्वरूपातिशयसूचकः । तेन समनेत्युक्त-रमाव्यावृत्तिरिति ज्ञेयम् ॥ १४ ॥

मन्दनन्दिनी — मा भूद्भगवांस्तुष्टो कलेवरकारणकरत्याधारभार्यास्वत्वं न त्याज्यम् । त्यागे ईदृशसुखालाभादित्यत आह ॥ कृमीति ॥ कृम्यादेर्निष्ठाभावोंऽते यस्य तत् । कुणपस्य तथैव स्थितौ कृमिभावः । श्वसृगालादिभक्षणे विड्वराहः । दाहे भस्मभाव इति बोध्यम् । तुच्छं फल्गु कलेवरं रागादिग्रस्तं परिदृश्यमानं क्व । तदीयेति । एतादृशशरीरकारणकरत्याधारभूता भार्या क्व । नभश्छदिर्नभसि छदिर्व्याप्यस्थितिर्यस्य सः । एतादृगात्मा परमात्मा क्वेति योजना । सर्वदेशकाल-व्यापिपरमसुखावहपरमात्मतोषविरोध्यतितुच्छकलेवरकारणकरत्याधारस्त्रीस्वत्वं सर्वथा त्याज्यमिति भावः । अत्र तात्पर्यम् ॥ नभश्छदिरित्यादि ॥ १४ ॥

सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद् वृत्तिमात्मनः ।
शेषे स्वत्वं त्यजेत् प्राज्ञः पदवीं महतामियात् ॥ १५ ॥

सत्यधर्मीया — यज्ञावशिष्टैरर्थैर्भगवत्पूजोर्वरितैः सिद्धैर्भगवत्प्रीत्याधायकत्वेन निश्चितैरात्मनः स्वस्य वृत्तिं जीवनोपायं कल्पयेत् । आत्मन इत्येकवचनेन परिवारापरिवृतता सूच्यते । शेषे तत्राप्युर्वरिते स्वत्वं यस्त्यजेत्स प्राज्ञः । महतां परमहंसानां पदवीमियात् ॥ १५ ॥

मन्दनन्दिनी — गृहस्थस्यैव पुनरित्थंभावान्तरमाह ॥ सिद्धैरिति ॥ यज्ञावशिष्टार्थैः । यज्ञशब्दस्यावृत्त्यादिः । यज्ञो विष्णुरिति श्रुतेः । यज्ञस्य विष्णोः पूजासाधनीभूतो यज्ञादि-स्तदवशिष्टार्थैः । अन्नवित्तादिभिरात्मनो वृत्तिं देहधारणादिकं कल्पयेत् । शेषे ततोऽपि शिष्टो स्वत्वं परित्यजेत् । बंध्वतिथ्यादिभ्यो दद्यात् । एवंभूतश्चेन्महतां पदवीं संन्यासिनां स्थानं मोक्षमियादिति योजना ॥ १५ ॥

देवानृषींश्च भूतानि पितॄनात्मानमन्वहम् ।
स्ववृत्त्याऽगतवित्तेन यजेत पुरुषं पृथक् ॥ १६ ॥

सत्यधर्मीया — देवर्षिभूतपित्रित्येतानात्मानं तदन्तर्यामिणं भगवन्तमुद्दिश्यैव यजेत स्ववृत्त्याऽऽगतवित्तेन । समस्तमसमस्तपदं च । स्वधर्मलब्धेन । पुरुषं पृथक् अनन्तर्यामिणं स्वबिम्बं च यजेत । पृथगात्मानं तत्तदन्तर्यामिणं पुरुषमन्वहं यजेतेत्येकान्वयो वा ॥ १६ ॥

मन्दनन्दिनी — पुनरित्थंभावान्तरमाह ॥ देवानिति ॥ भूतानि मनुष्यादीन् स्ववृत्त्यागतेन स्ववर्णाश्रमोचितशिलोंछकरस्वीकारादिना । तेन वित्तेन तत्तदन्तर्गतं पुरुषं पूर्णषड्गुणमात्मानं परमात्मानं पृथगधिष्ठानात् स्वस्माच्चात्यन्तभिन्नमुद्दिश्यान्वहं प्रतिदिनं यजेत्पूजयेदिति योजना । पूजनं च यथायोगं यज्ञतर्पणान्नदानादिनेति ध्येयम् ॥ १६ ॥

यर्ह्यात्मनोऽधिकारोऽस्ति सर्वाः स्युर्यज्ञसम्पदः ।
वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १७ ॥

सत्यधर्मीया — यर्हि यदाऽऽत्मनोऽधिकारो जातपुत्र इत्याद्युक्तोऽस्ति वर्तते यज्ञसम्पदः सर्वाः स्युः । वैतानिकः क्रतुकर्मसम्बन्धी । वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणीति विश्वः । विधिना विधानेनाग्निहोत्रादिना यजेदिष्टं भावयेत् ॥ १७ ॥

मन्दनन्दिनी — गृहस्थस्य यज्ञादिकमावश्यकमित्याह ॥ यर्हीति ॥ यर्हि यदाऽऽत्मनोऽधिकारोस्ति अर्थित्वं समर्थत्वं विद्वत्त्वादिकं जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यादिनोक्तं मध्यवयस्त्वम् । सर्वाः स्युर्यज्ञसम्पदो यज्ञसामग्र्यो वैतानिकेन विधिना । वेदोक्तप्रयोगविधिनाऽग्निहोत्रादिना । स एष यज्ञः पञ्चविधः । अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यं पशुः सोम इत्याद्युक्तरीत्या पञ्चविधयज्ञेन यजेत्पूजयेदिति योजना ॥ १७ ॥

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् ।
इज्येत हविषा राजन् यथा विप्रमुखैर्हुतैः ॥ १८ ॥

सत्यधर्मीया — यर्हीत्यनेन सूचितं तदनावश्यकत्वमवश्यकरणीयनिरूपणेन स्पष्टयति ॥ न हीति । अयं सर्वयज्ञभुग्भवानग्निमुखतस्तस्मिन्दत्तेन हविषा यथा नेज्येत न सङ्गममियात्तथा । कथमित्यतः कथयति ॥ यथेति । विप्रमुखे हुतैरिज्यते । नाहं तथाऽद्मि यजमानहविर्विताने इत्यादेः ॥ १८ ॥

मन्दनन्दिनी — अवैश्वदेवमतिथिवर्जितं चेत्यादिना अतिथिरहितयज्ञादेर्निषिद्धया यज्ञाङ्गत्वेन स्वप्राधान्येन चातिथिभोजनमावश्यकमिति ब्राह्मणभोजनं स्तौति ॥ नहीति ॥ यथा हुतैर्दत्तैर्घृतान्नादि-भिरिज्येत पूज्येत तथाऽग्निमुखतो न हीज्येतेति योजना ॥ १८ ॥

तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः ।
तैस्तैः कामैर्यजेच्चैनं क्षेत्रज्ञं ब्राह्मणाननम् ॥ १९ ॥

सत्यधर्मीया — इयत्पर्यन्तं पारोक्ष्येणोक्त्वाऽपरोक्षतो धर्मं प्रति धर्मं विवक्षुस्तदान्तरङ्गिकीं कुतोऽग्नितो विशेषो विप्रस्येति शङ्कामवान्तरोपसंहारमुखेन निराह ॥ तस्मादिति । यस्माद्विप्रमुखे हुतैरिज्यते तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हत एनं क्षेत्रज्ञं ब्राह्मणा आननं मुखं यस्य स तथा तम् । तैस्तैः कामैर्विषयैर्यजस्व पूजय । ब्राह्मणोऽस्य मुखमासीद्यथा ब्रह्मादिकं मुखमित्यादेः ॥ १९ ॥

मन्दनन्दिनी — ब्राह्मणभोजनं देवयजनं च कर्तव्यमित्याह ॥ तस्मादिति ॥ ब्राह्मणेषु देवेषु च मर्त्यादिषु । मर्त्येष्वमर्त्येषु यथार्हतो यथायोगं तैः कामैर्ब्राह्मणाभीष्टैर्देवाभीष्टैश्च ब्राह्मणा आननं यस्येति एनं क्षेत्रज्ञं भगवन्तं यजेदिति योजना ॥ १९ ॥

कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः ।
श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥ २० ॥

सत्यधर्मीया — पित्रादीन्यजेतेत्युक्तं तत्र योग्यं कालमाह ॥ कुर्यादिति । प्रोष्ठपदे भाद्रपदे मासि । स्युर्नभस्येप्रोष्टपदभाद्रभाद्रपदाः समा इत्यमरः । अपरपक्षीयं कृष्णपक्षसम्बन्धि । पित्रोः श्राद्धं यथावित्तं तद्बन्धूनां च पितामहमातामहादीनां च वित्तवान् श्राद्धं कुर्यादित्यन्वयः ॥ २० ॥

मन्दनन्दिनी — देवयज्ञमुक्त्वा पितृयज्ञप्रकारमाह ॥ कुर्यादिति ॥ प्रोष्टपदे भाद्रपदे पित्रोर्मातापित्रोस्तद्बन्धूनां प्रत्यहं तर्पणविषयाणां श्राद्धं कुर्यादिति योजना । पञ्चापरपक्षानां मध्यमस्यात्युत्तमत्वात्प्रोष्टपदे इत्युक्तिः ॥ २० ॥

अयने विषुवे कुह्वां व्यतीपाते दिनक्षये ।
चन्द्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥ २१ ॥

सत्यधर्मीया — अयने दक्षिणोत्तराख्ये । तुलामेषावच्छिन्नकाले । विषुसाम्येऽव्ययं ततो मतुप् । वप्रकरणेऽन्यत्रापीत्युक्तेर्वः । विषुवद्विषुवं च तदित्यमरः । कुह्वाम् । सा नष्टेन्दुकला कुहूरित्यमरः । व्यतीपाते । व्यतीपात इति तु घञमनुष्ये बहुलमिति दीर्घः । व्यतीति पापमुद्दिष्टं तस्य पातो यतो भवेत् । व्यतीपात इति प्रोक्त इत्यादि स्मरन्ति । दिनक्षये क्षीणतिथौ । उपरागो ग्रहणम् । श्रवणेषु मघाभरणीश्रवणेषु ॥ २१ ॥

मन्दनन्दिनी — पितृश्राद्धादौ पुनः कालविशेषमाह ॥ अयने इति ॥ अयने कर्काटकायने मकरायने तयोरेव महाऽयनत्वात् । विषुवे मेषतुलासंक्रमयोः । कुह्वां नष्टेन्दुकलायाममायाम् । पारणयोग्यद्वादश्यां श्रवणेषु श्रवणादिषु ॥ २१ ॥

तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २२ ॥

तात्पर्यम् — **'सप्तम्यादित्रयं चैव तथा चैत्रत्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद्विशेषत' इति च व्याससमृतौ ॥ 'हेमन्ते शिशिरे चैव नित्यश्राद्धं गुणोत्तरमि'ति च ॥ २२ ॥**

सत्यधर्मीया — तृतीयायां शुक्लपक्ष इति श्लोके चतसृष्वष्टकास्वित्युच्यते । तासां च त्रित्वं प्रमितमिति तदनुपपन्नमित्यतो मानेन तच्चतुष्ट्वं दर्शयति ॥ सप्तम्यादीति । सप्तम्यादित्रयमिति-मुनित्रयवत् । विवृतं प्राक् । सप्तम्यष्टमी नवमीति त्रयं तथा त्रयोदशी चेति चतस्रोऽष्टकाः प्रोक्ताः । सर्वपक्षात्सर्वकृष्णपक्षगततिथितो विशेषतो विशेषफलदा इत्यर्थः । विशिष्यन्त इति विशेषा विशिष्टा इति वा । अष्टका पितृदैवत्य इत्युक्तेर्न प्रत्ययेत्वम् । न च त्रयोदश्यष्टका चेदष्टकासु चतुर्दश्यां प्रति-पत्पर्वणोरपि । नाधीयीत द्विजः कश्चिदित्यादिनारदीयवचनादनध्ययनदिनं स्यादिति शङ्क्यम् । अभ्यनुज्ञानं श्राद्धमात्रे नाभ्यनुज्ञानमनध्ययन इत्येतन्मात्रविशेषसम्भवात् । न च विनिगमकाभाव इति वाच्यम् । अपरेषु च पक्षेषु ह्यष्टकासु तिसृष्वपि । हेमन्तशिशिरयोश्चैव नाध्येया वेदसंहितेति तिसृष्विति सङ्ख्याविशेषत एवाष्टका गृह्णन्त्या वसिष्ठस्मृतेस्तत्त्वात् । शिष्टाचारोऽप्येतन्मूलक इति नाप्रामाणिकः । केचन तिस्र एवाष्टकाः प्रायः प्रायोवित्सम्मतास्त्वियं त्रयोदशीरूपिण्यष्टकेति तत्रानधीतिनोऽपि वर्तेरंच्छ्राद्धश्रद्धाः । वासिष्ठवचनं च तन्मात्रपरमेतत्स्यादिति वदन्ति । तत्रैव हेमन्ते शिशिर इत्यष्टकानां तदृतुद्वयसम्बन्धितामात्रं प्रतीयते । न तत्र श्राद्धविधानमित्यतस्तत्तु श्राद्धं कुर्यादिति विहितं मानेन । तत्र हेमन्ते शिशिर इति गुणविधानेन दध्ना जुहोतीतिवदुत्तरतामाह ॥ हेमन्त इति । तदन्यत्र कृतान्नित्यश्राद्धाद्गुणोत्तरं गुणेन श्रेष्ठमुत्तमफलदमिति यावत् ॥ अथ मूलार्थः ॥ तृतीयायां शुक्लपक्षे वैशाखे अक्षयतृतीयायामित्यर्थः । शुक्लपक्ष इत्यत्राप्यन्वेति । कार्तिकेमासि । शुक्लपक्षनवम्याम् । हेमन्ते मार्गशीर्षपुष्यकृष्णपक्षे तथा शिशिरेमाघफाल्गुनकृष्णपक्षे च । एतत्सम्बन्ध्यष्टकासु तिसृषु । अपिः समुच्चायकः संस्त्रयोदश्यष्टकां चतुर्थीं समुच्चिनोति । अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेष्विति पाणिनिस्मरणात् । अपिःसम्भावनाप्रश्नशङ्कागर्हासमुच्चय इति विश्वः । विधौ श्राद्धं कुर्यादित्येकान्वयेन सिद्धे स्वत एव श्राद्धकालः सिद्धस्तत्र हेमन्ते शिशिर इति गुणविधानं मानिकमनुसन्धेयम् ॥ २२ ॥

मन्दनन्दिनी — शुक्लपक्षे तृतीयायामक्षय्यायाम् । कार्तिके नवम्यां महानवम्यां हेमन्ते शिशिरे विद्यमानासु चतसृष्वप्यष्टकासु सप्तम्यादित्रये । त्रयोदश्यां च । तदुक्तं तात्पर्ये ॥ सप्तम्यादीत्यादि ॥ हेमन्ते शिशिरे चैव नित्यश्राद्धं गुणोत्तरमिति । अत्रापि हेमन्तशिशिराधिष्ठानकाष्टकाचतुष्टयमेव ग्राह्यम् । षण्णवत्यनुष्ठातृभिस्तथैवानुष्ठानात् । एवं च सप्तम्यादिदिनत्रयं त्रयोदशी चेति दिनचतुष्टयमार्ग-शीर्षाद्यपरपक्षचतुष्टयं ग्राह्यम् ॥ २२ ॥

माघे च सितसप्तम्यां मघाराकासमागमे ।
राकया वाऽनुमत्या वा मासर्क्षाणि युतान्यपि ॥ २३ ॥

सत्यधर्मीया — राका पौर्णमासी मघा च तयोः समागमे सङ्गमे । सितसप्तमी रथसप्तमी । राकया वा तथाऽनुमत्या । अनुमन्यत इत्यनुमतिः क्तिच् । कलाहीनेत्यनुमतिः पूर्णे राका निशाकर इत्यमरः । राति शुभम् । रा दाने । कृदाधारेति के । राका युतानि युक्तानि मासर्क्षाणि मासनामप्रवृत्तिहेतुभूतानि नक्षत्राणि । नक्षत्रमृक्षं भं तारेत्यमरः । श्रेयसः काल इत्युत्तरेणान्वयः । पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापर इति त्रिकाण्डयमरः ॥ २३ ॥

मन्दनन्दिनी — मघाया राकायाः पूर्णनिशाकरयुक्तया पौर्णमास्यां समागमे । राकयाऽनुमत्या वा कलाहीननिशाकरयुक्तया पौर्णमास्यां वा । युतानि मासर्क्षाण्याश्लेषामघापूर्वफल्गुन्यः । प्रथमा सप्तम्यर्थे ॥ २३ ॥

द्वादश्यामनुराधा स्यात् श्रवणस्तिस्र उत्तराः ।
तिसृष्वेकादशी चासु जन्मर्क्षं सौम्ययोगयुक् ॥ २४ ॥

सत्यधर्मीया — द्वादश्यां यद्यनुराधा स्याच्छ्रवणः । उत्तरास्तिस्रः स्युः । उत्तरा उत्तराषाढा उत्तराभाद्रपदेति । तस्यां श्राद्धं कुर्यात् । तासु तारास्वेकादशी च यथैकादशी स्नानव्याख्याना-सक्तफलबाहुल्यदा तथाऽनुराधादिसहितद्वादशी बहुफलप्रदेति दृष्टान्तदार्ष्टान्तिकभावो ज्ञेयः । श्राद्धं यत्र सम्भवत्तत्र ज्ञेयम् । यद्वक्ष्यति त एते श्रेयसः काला नृणां श्रेयोविवर्धना इत्यादि । अतस्तद्विषये सम्भवतो न चाशङ्का न चोत्तरम् । सौम्ययोगयुक् जन्मर्क्षं मृगशिरसम्बन्धयुक्तम् । एकादशी वास्विति पाङ्क्त पाठः ॥ २४ ॥

मन्दनन्दिनी — यद्यनुराधा स्याच्छ्रवणो वा । उत्तरा उत्तरोत्तराषाढ उत्तरभाद्र-पदास्तद्युक्तद्वादश्याम् । आसु तिसृष्वनुराधाश्रवणोत्तरासु । उत्तरासु वा तिसृष्वेकादशी चेज्जन्मर्क्षं सोत्पत्तिनक्षत्रं सौम्ययोगयुक् मृगशीर्षायोगयुक् च ॥ २४ ॥

त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः ।
कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २५ ॥

सत्यधर्मीया — श्रेयसः सश्रेयांसोऽतिप्रशस्ता । प्रशस्यस्य श्रः । द्विवचनेतीयसुन् । पुण्यश्रेयसी सुकृतमित्यमरः । श्रेयो मुक्तौ शुभे धर्मेतिप्रशस्ते च वाच्यवदिति भानुः । कालानां श्रेयस्त्वेऽधिकारवतः किमायातमित्यत आह ॥ नृणां श्रेयोविवर्धना इति । विवर्धनं याभिस्ता युजन्तो वा । एतेषु कालेषु सर्वात्मना सर्वप्रकारेण श्रेयोधर्मं कुर्यादायुषोऽमोघम् । भावप्रधानो निर्देशः । अमोघत्वं साफल्यमिति यावत् ॥ २५ ॥

मन्दनन्दिनी —— त एते उक्तकालाः श्रेयसो हेतवः । विहितकरणे श्रेयोवर्धनाः । तदेवाह ॥ अमोघं तदायुष इति । अमोघममोघत्वम् । साफल्यमिति यावत् ॥ २५ ॥

येषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ।
पितृदेवनृभूतेभ्यो यद् दत्तं तद्ध्यनश्वरम् ॥ २६ ॥

सत्यधर्मीया —— देवद्विजार्चनं तत्पूजा पितृदेवेत्याद्युक्तार्थम् । यद्दत्तं तदनश्वरमक्षयफलम् । हीति प्रमाणप्रसिद्धिं द्योतयति ॥ २६ ॥

मन्दनन्दिनी —— उक्तकालेषु कर्तव्यमेव विविच्याह ॥ येष्विति ॥ स्नानादीनां मध्ये होमो युक्तदिने कार्यम् । एवं श्राद्धमपि हरिवासरे न जुहुयान्न श्राद्धं कुर्यादिति विशेषनिषेधात् । तत्रैकादशीग्रहणं निरवकाशमिति न वाच्यम् । जपादिविषयत्वेन विद्धैकादशीविषयत्वेन सावकाशत्वात् ॥ २६ ॥

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥ २७ ॥

सत्यधर्मीया —— जायाया भार्यायाः संस्कारकालः षष्ठेऽष्टमे वा सीमन्त इत्याद्यनुशिष्टः । अपत्यस्यैकादशे द्वादशेऽहनि वा पिता नाम कुर्यादित्यादेर्नामकरणादिसमयः । आत्मनो वसन्ते ब्राह्मण इत्यादिसवसेवनसमयः । प्रेतसंस्था मृतदाहादिर्मृताहः सांवत्सरिकं यदा तदा । टजन्तः पुल्लिङ्गप्रथमैकवचनम् । कर्मण्येतदेतस्मिन्नभ्युदये महोदये तदर्थं श्रेयः कुर्यादित्यन्वयः ॥ २७ ॥

मन्दनन्दिनी —— आत्मनो जायाया अपत्यस्य च संस्कारकाले गर्भाधानजातकर्मादौ प्रेतसंस्था मृताहश्चेति । प्रथमा सप्तम्यर्थे । पित्रोः प्रेतसंस्था मृताहकालेऽभ्युदयेऽभ्युदयार्थं क्रियमाणकर्मणि पितृदेव इत्यादि पूर्वेणान्वयः ॥ २७ ॥

अथ देशान् प्रवक्ष्यामि धर्मादिश्रेयआवहान् ।
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २८ ॥

सत्यधर्मीया —— धर्मादिश्रेयआवहानिति पदम् । श्रेयःप्रापकान् यत्र सत्पात्रं साधुजनो लभ्यते मङ्गलदेवताऽप्यत्रैव वर्तत इत्यप्याह ॥ ईति । अस्य स्त्री ई रमाऽत्रास्मिन्देशे लभ्यत इत्यर्थः । स पुण्यतमोऽतिशयेन पुण्यप्रापकः । पूञो णुट्ह्रस्वश्चेति यत् णुट्ह्रस्वश्च । पुणति पुणकर्मणि शुभे इगुपधेति के पुणमर्हतीति वा तत्र साधुरिति वा यत् ॥ २८ ॥

मन्दनन्दिनी — देशे काले पात्रे च तद्दानं सात्त्विकं स्मृतमित्यादिना देशाद्यानुगुण्यस्य दानाद्यङ्गत्वोक्तेर्देशादिकमाह ॥ अथेति ॥ श्रेय आवहान् श्रेयःसम्पादकान् सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देश इत्यनेन देशापेक्षया पात्रस्यैव मुख्याङ्गत्वं स्वाधिष्ठानेन पुण्यदेशत्वापादनात् ॥ २८ ॥

विश्वं भागवतो यत्र जगदेतच्चराचरम् ।
यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥ २९ ॥

सत्यधर्मीया — सत्पात्रमेतदिति कथयति ॥ विश्वमिति । यत्र भागवतो भगवद्भक्तो वर्तते तत्र चराचरं ज्ञान्यज्ञान्यात्मकं विश्वं समस्तमेतज्जगद्वर्तत इति ज्ञातव्यम् । तत् चराचरं विश्वमस्तीति जगदे वेदादिनेति शेषः । जगद्वर्तने को विशेष इत्यत आह ॥ एतदिति । एतत्सन्निहितत्वादित्युक्तेर्हरिस्तत्र वर्तत इति ज्ञेयम् । यद्वा विश्वं विष्णुरित्यादेस्तं तत्रानुसन्दध्यादिति वा ॥ २९ ॥

मन्दनन्दिनी — सत्पात्रं विशिनष्टि ॥ विश्वमिति ॥ भगवत उदरे स्थितं विश्वं सर्वं चराचरात्मकं जगद्यत्र पात्रे तादृशं सत्पात्रं यत्रेति पूर्वेणान्वयः । भगवता धृतस्य पात्रे स्थितत्वं कथमिति न चोदनीयम् । भगवत एव तत्र स्थितत्वात् ।

यतिर्यस्य गृहे भुङ्क्ते तत्र भुङ्क्ते हरिः स्वयम् ।
हरिर्यत्र गृहे भुङ्क्ते तत्र भुङ्क्ते जगत्त्रयम् ॥

इति स्मृतेः । ब्राह्मणानां कुलं समूहो यत्र स देश इत्युत्तरेणान्वयः ॥ २९ ॥

यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ ३० ॥

सत्यधर्मीया — अर्चा प्रतिमा ॥ ३० ॥

मन्दनन्दिनी — अर्चाः प्रतिमा वेंकटेशजगन्नाथादयः । पुराणेष्वष्टादशपुराणोपपुराणेषु ॥ ३० ॥

सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ।
कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ ३१ ॥

सत्यधर्मीया — अर्हाश्रितानि पूज्यागस्त्याद्याश्रितानि । गयशिरो विशिष्टसंज्ञेति ङ्यापोः संज्ञाछन्दसोरिति अजक्षीरमित्यादिवद्ध्रस्व इति । केचित् गयस्य तन्नाम्नोऽसुरस्य शिरो यत्रेति तत्क्षेत्रमिति व्याकुर्वते ॥ आग्नेये गयामाहात्म्यमाख्यास्ये । स्थिता देवा गयायां ते । गयाक्षेत्रम् ।

एतद्गयाशिरः प्रोक्तम् । गयायां पितृरूपेण स्वयमेव जनार्दन इत्यादि तन्माहात्म्योक्तेः । गयाऽस्त्यस्येति गयं तच्च तच्छिरश्चेति च केचित् । क्वचिददन्तः पाठः । शिरोवाची शिरोदन्त पिण्डं दद्याद्गयाशिरे । निचकर्त शिरान् द्रौणिरित्यादेरुपपत्तिर्ज्ञेया । पुलहाश्रमः पुलहनामकर्षेराश्रमः ॥ ३१ ॥

मन्दनन्दिनी — सरांसि मानससरःप्रभृतीनि । अर्हाश्रितान्युत्तमयोगिभिराश्रितान्यपि ॥ ३१ ॥

नैमिषं फल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥ ३२ ॥

सत्यधर्मीया — फल्गुनं स्यानंदूरं कन्यातीर्थं वा । कन्यातीर्थं फल्गुनं स्यात्स्यानंदूरपुरं च तत् । स्यानंदूरे च दैत्यं सपदि विजितवान्फाल्गुनं तीर्थमाप्त इत्यादेः । मधु मधुवनम् । पुरी काञ्ची । मधुपुरीति वा ॥ ३२ ॥

मन्दनन्दिनी — फल्गुनं स्थानं दूरपुरं कन्यातीर्थं वा । कन्यातीर्थं फल्गुनं स्यात्स्थानं दूरपुरं च तदित्यभिधानम् । कुशस्थाली द्वारवती ॥ ३२ ॥

नारायणाश्रमो नन्दा सीतारामाश्रमादयः ।
सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥ ३३ ॥

सत्यधर्मीया — नारायणाश्रमो नरनारायणश्रमः । नन्दा सीता चेति गङ्गाभागौ । यथोक्तं पञ्चमे । सीता तु ब्रह्मसदनादित्यादि । अलकनन्दाया एव नन्देति नामान्तरम् । रामस्याश्रमः । सीतासहितरामाश्रम इति वा । सीताया रामस्य चाश्रम आदिर्येषाम् । द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेणेति व्याकुर्वता प्रायेण स्वबुद्ध्येत्थं विगृह्यानुपपत्त्या बिभ्यता तच्छान्तमिति तन्वता सुराणकाः स्मारिता इति मन्तव्यम् । सर्वे सप्त ॥ ३३ ॥

मन्दनन्दिनी — नन्दा सीतेति भिन्नं पदम् । आश्रमपदेन समस्तं वा ॥ ३३ ॥

एते पुण्यतमा देशा हरेरर्चाश्रिताः पुनः ।
एतान् देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ ३४ ॥

सत्यधर्मीया — केवलं देशा एव पुण्यतमाः पुनः किम्पुनर्हरेरर्चाश्रिता अर्चा आश्रिता यांस्ते पुण्यतमा इति किं वक्तव्यमित्यर्थः । अभीक्ष्णं मुहुरश्रान्तमित्येतत्पर्यायोऽभीक्ष्णशश्शब्दो मुहुरित्यर्थः ॥ ३४ ॥

मन्दनन्दिनी — हरेरर्चाश्रिता इति पुनर्वचनं वैशिष्ट्यद्योतनाय ॥ ३४ ॥

धर्मो ह्यत्रोदितः पुंसां सहस्राधिफलोदयः ।
पात्रं चात्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥ ३५ ॥

सत्यधर्मीया — उदितोऽनुष्ठेयतया वेदाद्युदितो धर्मोऽत्र कृतश्चेत्सहस्राधिफलोदयः सहस्रावध्यधिकफलोदयकरः । इष्टप्राप्तिरिवानिष्टनिवृत्तिरपि भविष्यतीत्यप्याह ॥ सहस्राधिकफलोदय इति । सहस्राणां बहूनामाधीनां मनोव्यथानां फलस्य ञिफला विशरण इति स्मरणात्तस्य विशरणस्योदयो येन स इति । सहस्राधिकफलेति लपनीये केवलं सहस्राधीत्युक्तिर्बलमेतद्व्याकृतेरिति सन्तोष्टव्यम् । तथात्वे नार्थायोगः किन्तु स्वार्थादिककल्पनया क्लेशिष्टो मार्ग इति सौलालित्यं च । पात्रवित्तमैः कविभिः पात्रं निरुक्तम् । वा इत्यविगानमाह ॥ ३५ ॥

मन्दनन्दिनी — देशानुगुण्यप्रयुक्तं धर्मस्य वैशेष्यमाह ॥ धर्म इति ॥ उक्तो धर्मोऽत्रोक्तक्षेत्रेषूदितः । अनुष्ठितश्चेत्साधारण देशानुष्ठित धर्मापेक्षया सहस्राधिकफलोदयो भवति । पात्रेष्वपि तारतम्यमस्ति । तत्र हरिर्मुख्यपात्रमित्याह ॥ पात्रं चेति ॥ पात्रज्ञानिश्रेष्ठैः कविभिः पात्रं निरुक्तं वै ॥ ३५ ॥

हरिरेवैक उर्वीश यन्मयं च चराचरम् ।
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ।
राजन् यदग्रपूजायां मतः पात्रतयाऽच्युतः ॥ ३६ ॥

सत्यधर्मीया — किं तत्पात्रनिरुक्तमित्यत आह ॥ हरिरेवैक इति । त्वत्साक्षिसिद्धमित्याश्वसिहीत्याह ॥ उर्वीशेति । यन्मयं यत्प्रधानकम् । देवाश्च ऋषयश्च तेऽर्हन्तश्च तेष्वग्रसभाजनयोग्येषु । विशेषणस्य कडारादितः परनिपातः । ब्रह्मात्मजादिषु वसिष्ठादिषु । वैशिष्ट्यद्योतनाय प्राप्तानामप्यृषिपदेन पुनरुत्कृष्योक्तिः । देवर्षयो देवश्रेष्ठाश्च तेऽर्हन्तश्च तेषु ब्रह्मादिषु । तथा हि दशम इव सभावपर्वणि च । इन्द्रादयो लोकपाला विरिञ्चभवसंयुताः । आययुः प्रीतमनसो देवा ब्रह्मपुरःसरा इति । द्वैपायन इत्यारभ्यागतानां नाम गृह्णता न सनकादिः गृहीतः तथैव च भारतेऽपि न ग्राह्यं च तेषामिति विरक्ततया सभावेशासम्भवादिति ज्ञेयम् । मदादिष्विति । साक्षान्मदादिष्वित्युक्तौ मदादिः प्रसज्येतेति परोक्षोक्तिरिति वा । सत्सु साधुषु । सत्सु वर्तमानेषु च अपि हे राजन् तत्र त्वद्राजसूये यतोऽग्रपूजायां पात्रतयाऽच्युतो मतः सम्मतस्तद्धरिरेवैकः पात्रमित्यर्थः । अपात्रस्य पात्रतया करणमिति नेत्याह । पात्रतयाऽच्युतः क्वचित्कदाचिदपि तच्च्युतिर्नास्तीति तयाऽच्युत इत्यर्थः ॥ ३६ ॥

मन्दनन्दिनी — पात्रं निरुक्तमित्युक्तं तत्किमित्यत आह ।। हरिरिति ।। हे उर्वशि । चराचरजगत् । यन्मयं यत्प्रधानकं यत्स्वामिकं च स हरिरेक एव पात्रमिति पूर्वेणान्वयः । अतश्च पूज्य इत्याह ।। देवेति ।। देवर्षिलक्षणार्हत्सु पुज्येषु तथा ब्रह्मणि तदात्मजेषु वसिष्ठादिषु तत्सु तत्र राजसूयेऽग्रपूजायामच्युतो भगवान् कृष्ण एव पात्रतया मतः । भीष्मादिभिः संमतः । अतो हरिरेव पात्रमित्यन्वयः ।। ३६ ।।

जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान् ।
तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ।। ३७ ।।

सत्यधर्मीया — हर्यर्चने कृते सर्वसुपर्वसपर्या कृतैव भवति । तेषां तन्मूलकत्वान्न सा पृथक् कार्येति निदर्शनेन दर्शयति ।। आण्डकोशेति । जीवराशिभिर्जीवपुञ्जैः । राशिर्मेषादिपुञ्जयोरिति विश्वः । आकीर्णः पूर्ण आण्डकोशरूपोऽङ्घ्रिपो वृक्षः । स्वार्थेऽण् । अत एव महान् । तन्मूलत्वात्तस्य महतो महीरुहस्य मूलं तस्य भावस्तत्त्वम् । अच्युतेति नलोपः प्रातिपदिकान्तस्येति वा डः सोलोपः । अच्युतस्येज्या तत्पूजा सर्वजीवात्मनां तर्पणं तृप्तिकरी भवति । यथा मूलासेचने तरोः शाखाप्रोक्षनं तद्वदेव देवतृप्तिरिति भावः । ऊर्ध्वमूल इत्याद्यानुकूलसम्पत्त्यर्थं काचिद्विपत्तिः सोढव्या । योग्यतया समासैकदेशान्वयो वा ।। ३७ ।।

मन्दनन्दिनी — तरोर्मूलसेचनवद्भगवत्पूजनस्यैव सर्वजीवराशितृप्तिसाधनत्वाच्च भगवानेव पूज्य इत्याह ।। जीवेति ।। जीवराशिभिर्ब्रह्मादिशाखाभिराकीर्णो व्याप्तो ब्रह्माण्डकोशलक्षणोऽङ्घ्रिपः पादपः । तन्मूलत्वादच्युतस्य तदिज्या सर्वजीवात्मतर्पणं तृप्तिहेतुरिति योजना ।। ३७ ।।

पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ।। ३८ ।।

तात्पर्यम् — जीवेन रूपेण सह ।। ३८ ।।

सत्यधर्मीया — तर्ह्यर्हणीयो मुख्यो भगवांश्चेत्तदलाभे कर्मानुष्ठानलोप एव किमित्यतस्तत्तद्योग्यं पात्रमत्र निरूपयितुं तदुपयुक्तं किञ्चित्सृष्टिप्रकारमाह ।। पुराणीति । अनेन भगवता नृतिर्यगृषिदेवता इति पुराणि शरीराणि सृष्टानि । शेते जीवेन रूपेणेत्यर्धे जीवात्मकत्वं प्रतीयते भगवत इत्यतस्तामपास्तां विधातुं किञ्चिदध्याहृत्य योजयति ।। जीवरूपेण सहेति ।। अथ तदर्थार्थः ।। हि यतोऽसौ भगवान् जीवेन रूपेण । वृद्धो यूना । मयाऽध्यक्षेण प्रकृतिरित्यादेरसहशब्दप्रयोगेऽपि सहेति लभ्यत इत्युक्तेर्जीवरूपेण सह पुरेषु देहेषु शेत इति पुरुषपदाभिधेयः । पुरि शेते यतः सोऽथ पुरुषश्चेति गीयत इत्यनुव्याख्या-व्याख्यावसरे सुधायामथ तस्मात्पुरि शरीरे । अत्रोपपदसप्तम्या अलुक् । तस्य चेकारस्योकारो

धातुशकारस्य षकारो निर्वचनत्वात् । अधिकरणे शेतेरित्याद्युक्तेः पुरुषशब्दनिरुक्तिर्ज्ञेया । श्रुतिश्च स वा अयं पुरिशय इति । मूले पुरेष्विति बहुवचनेन श्रुतिस्थितं पुरीत्येकवचनं जात्यभिप्रायमिति सूचयति । परायत्तपुरुषत्वं जीवानामपि ज्ञेयम् ।। ३८ ।।

मन्दनन्दिनी — ननु भगवत एव पूज्यत्वे साक्षात्तदलाभे पूजाविलोपप्रसङ्ग इत्यतः सर्वशरीरेष्वपि भगवतः सत्वान्न तदनुपपत्तिरित्याशयेन पुरुषशब्दं भगवति निर्वक्ति ।। पुराणीति ।। असौ भगवान् हि यस्मात्पुरेषु देहलक्षणेषु जीवेन रूपेण प्रतिरूपेण प्रतिबिम्बेन सह शेते । अतः पुरुष इत्युच्यते । सर्वासु पूर्षु शेत इति श्रुतिप्रसिद्धिं द्योतयति हिशब्देन । अनेन जीवस्यापि पुरुषत्वे इदमेव निमित्तमिति सूचयति । पुरीति सप्तम्यन्ते उपशेतेर्डप्रत्यये सप्तम्या अलुकि इकारस्योकारे शकारस्य षकारे च रूपम् । पुराण्यपि नान्यनिर्मितानीत्युक्तम् । नृतिर्यगृषिदेवता एतल्लक्षणानि । उपलक्षणमेतत् । यक्षरक्षः पिशाचादीनां सर्वेषां पूज्यत्वाभिप्रायेणैतदुक्तिः । तिर्यंचो गवाश्वादयः पुराणि । अनेन सृष्टानीति योजना । अत्र रूपेण स्वरूपेणेति न मन्तव्यम् । अभेदस्य सर्वमानविरुद्धत्वात् । किन्तूक्तरीत्या सहयोगे तृतीया । अत एव तात्पर्यम् ।। जीवेन रूपेण सहेति ।। ३८ ।।

तेष्वीशो भगवान् राजन् तारतम्येन वर्तते ।
तस्मात् पात्रं हि पुरुषो यावानात्मा यथेयते ।। ३९ ।।

तात्पर्यम् — ब्रह्मादिस्थावरान्तेषु न विशेषो हरेः क्वचित् । व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति चे'ति ।। ३९ ।।

सत्यधर्मीया — तेष्वीशो भगवान्राजन्निति श्लोकार्धे भगवानेषु पुरेषु तारतम्येन वर्तत इति तत्तद्देहस्थितानां हरिरूपाणां तरतमभाव उक्त इति व्यक्तं भवति । स त्वेकमेवाद्वितीयमित्यादिमानबाधित इत्यतः प्रमाणेनैव तत्तात्पर्यमाह ।। ब्रह्मादीति । पद्मभवमारभ्य यवसावसानेषु । वृत्तित्वं सप्तम्यर्थः । स्थितस्य हरेर्विशेषस्तरतमभावः क्वचिदपि न नास्ति । तर्हि तारतम्यवाचो युक्तेः का गतिरित्यत आह । व्यक्तिमात्रविशेषेण । ब्रह्मादिगुणवैशेष्यादित्याद्युक्तेः । अधिष्ठानवैशेष्यात्तदधिष्ठेयभगवदभिव्यक्तिमात्रविशेषेण तारतम्यं वदन्ति न तु तरतमभावेनेति ।। ततश्चायं श्लोकार्थः ।। तेषु पुरेष्वीशो भगवान् तारतम्येन स्वाधिष्ठानगुणादितरतमभावेन वर्तते । यथा यथा गुणाधिक्यमधिष्ठाने तथा तथा सन्निधानाधिक्यं भगवतस्तस्मात्पुरुषो जीवो ब्राह्मणादिः पात्रं पूजायाः । तत्रापि ज्ञात्वेत्थं प्रवर्तनीयमित्याह ।। यावानिति । आत्माऽन्तर्यामी भगवान्यथा येन प्रकारेण सम्यग्वा यावान्यावदेतद्गुणप्रयोजकसन्धान ईयते तथाऽयं पुरुषः पात्रमित्यर्थः । अतो न पात्रालाभप्रयुक्तनिर्विषयता तदश्चनोदश्चकानां वचसामिति भावः ।। ३९ ।।

मन्दनन्दिनी — नन्वेवं भगवतः सर्वशरीरस्थत्वेन पूज्यत्वे तारतम्यं न स्यादित्यत आह ॥ तेष्विति ॥ राजन् । तेषु ब्रह्मादिषु तारतम्येनाधिष्ठानतारतम्येन निमित्तेन स्वयमपि संनिधानतारतम्येन वर्तते हि यस्मात्तस्माद्यावान्सर्वत्राप्येकप्रकारेण सर्वगुणविशिष्टेऽपि । आत्मा परमात्मा यथाऽधिष्ठानतारतम्यानुसारि संनिधानतारतम्येनेयते प्रमाणैर्ज्ञायते । तथा पुरुषो ब्रह्मादिः पात्रं भवतीति योजना । भगवतः सर्वत्रैकप्रकारत्वेपि अधिष्ठानतारतम्यानुसारेण संन्निधानतारतम्यात्पात्रतारतम्यं युक्तमिति भावः । अत एव तात्पर्यम् ॥ ब्रह्मादीत्यादि ॥ व्यक्तिमात्रं विशेषेणाधिष्ठानतारतम्यानु सारिस्वमाहात्म्यप्रकटनमात्रतारतम्येनेत्यर्थः ॥ ३९ ॥

दृष्ट्वा तेषां मिथो नृणामवज्ञामात्मनो नृप ।
त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ४० ॥

ततोऽर्चायां हरिं केचिच्छ्रद्धया च सपर्यया ।
उपासते उपासा हि नार्थदा पुरुषद्विषाम् ॥ ४१ ॥

सत्यधर्मीया — यद्यपि प्रतिमाऽपि प्रतिमानमनार्थं लोके लोकैः कृता तथाऽपि यथा पुरुषपूजा पुरुषार्थप्रदा न तथेति वक्तुं तर्हि तन्निर्माणं व्यर्थमिति शङ्कातङ्कनपूर्वकं तत्कृत्यं पूरुषपूजौन्नत्यं चाह ॥ दृष्ट्वेति । मिथः परस्परं तेषां नृणाम् । नृचेति दीर्घः । आत्मनः पुरुषान्तर्यामिणो भगवतोऽवज्ञां मात्सर्यादिना माननं दृष्ट्वा त्रेतादिषु त्रिष्वर्चाऽर्चाक्रियायै पूजार्थं कविभिः किञ्चित् वाञ्छितं स्यादिति मतिमद्भिः कृता निर्मिता । यतस्ततः श्रद्धया सहितया सपर्यया पूजयाऽर्चायां प्रतिमायां केचिदुपासते । सा हि सोपासा पुरुषद्विषामप्रबुद्धानां नार्थदा परमपुरुषार्थप्रदा स्वातन्त्र्येण न भवति किन्त्वैहिकार्थप्रदा भवति । प्रवृत्तिकर्म वदन्तोऽपि सर्वत्र विदितात्मनामित्याद्युक्तप्रकारेण समालिङ्ग्य पुरुषोपास्तिं महाफलहेतुर्भवतीति तात्पर्यम् ॥ ४०, ४१ ॥

मन्दनन्दिनी — यावानात्मा यथेयत इत्यनेनाधिष्ठानतारतम्यानुसारेण भगवतो व्यक्ति-तारतम्योक्त्याऽधमैरुत्तमपुरुषेषु भगवान् पूज्य इत्यायातम् । एवं चलप्रतिमायां सत्यामचलप्रतिमायां पूजासम्प्रदायः कुत आगत इत्याशङ्कायामाह ॥ दृष्ट्वेति ॥ तेषां नृणां पूज्यपुरुषाणां मिथः परस्परम् । तदपेक्षया मय्येवात्मा विशेषतः संनिहित इत्येकेनोच्यते । एवमपरेणेत्येवमात्मनो हरेरवज्ञामधिष्ठानावज्ञां दृष्ट्वा । कलहं दृष्ट्वेति यावत् । त्रेतादौ युगे क्रियायै सपर्यायै कविभिरर्चा कृतेति योजना । कृते ब्राह्मणानां परस्परतारतम्ये कलहाभावात्तारतम्येन चलप्रतिमासु पूजासम्भवेऽपि त्रेतादौ कलहेन तदसम्भवात् अर्चायां पूजासम्प्रदायः कृत इति भावः ॥ ४० ॥

सम्प्रदायानुसारेणार्चायां पूजा क्रियते । कृताऽप्युत्तमपुरुषद्विषामर्थदा न भवतीत्याह ।। तत इति ।। ततः सम्प्रदायागतेरुत्तमद्वेषासम्पादनेऽर्चायां पूजा तन्त्रसारोक्तरीत्याऽनुष्ठिता पुमर्थचतुष्टयसाधनं भवतीति भावः ।। ४१ ।।

पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः ।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ।। ४२ ।।

सत्यधर्मीया — पूर्णपात्रेषु पुरुषेषु समसमञ्चनरचनमाचरितव्यं किमित्यतस्तत्रापि तरतमभावोऽस्तीति तदनुसरणेनोपसरणं कार्यमित्याह ।। पुरुषेष्वपीति । ब्राह्मणमिति न सामान्यविप्रग्रह इति तत्पदार्थं विवरितुमाह ।। तपसेति । तपसा कृच्छ्रादिना तुष्ट्या विषयालम्बुद्ध्या यस्तु वेदं धत्ते विद्ययाऽपरोक्षज्ञानेन निमित्तेन तं हरेस्तनुं सुपात्रं विदुः । बहुवचनेनास्मिन्नर्थे विगानमाह । ब्रह्माणतीति ब्राह्मण इति तद्व्युत्पत्तिरिति सूचितं भवत्यनेनेति ज्ञेयम् ।। ४२ ।।

मन्दनन्दिनी — पुरुषाणां पात्रत्वमुक्तम् । तत्रापि विशेषमाह ।। पुरुषेष्विति ।। पुरुषेषु मध्ये ब्राह्मणमत्यंतपात्रं विदुः किं वर्णमात्रेणेत्यत उक्तम् ।। तपसेति ।। तपसाऽनशनादितपसा विद्यया ब्रह्मविद्यया । तुष्ट्या विषयालम्बुद्ध्या हरेस्तनुं प्रतिमाभूतमिदं शरीरं धत्ते । चो यत इत्यर्थे । इति योजना । प्राणप्रतिष्ठादिना शिलायाः प्रतिमात्ववद्ब्राह्मणशरीरस्यापि हरेः प्रतिमात्वं तपआदिनेति ज्ञेयम् । अत एव तात्पर्यम् ।। शिलावदित्यादि ।। सन्तस्तपोविद्यादिमन्तः । आद्यपदेन क्षत्रियाद्या अपि स्वाधमवर्णानां पूज्या इत्युक्तं भवति । अत्र स्वोत्तमवर्णे तपआधिक्येऽत्यन्तपूज्यत्वम् । तदभावे पूज्यतामात्रम् । अधमवर्णे विद्याद्याधिक्ये तु मानसिकवाचनिकपूजनं कार्यं न तु शारीरमित्यादिकमवगन्तव्यम् ।। ४२ ।।

तन्वोऽस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः ।
पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ।। ४३ ।।

इति श्रीमद्भागवते सप्तमस्कन्धे चतुर्दशोऽध्यायः ।

तात्पर्यम् — 'शिलावत्प्रतिमाः सन्तो विप्राद्याश्च हरेः स्मृता' इति च ।। ४३ ।।

इति सप्तमतात्पर्ये चतुर्दशोऽध्यायः ।। १४ ।।

सत्यधर्मीया — तन्वोऽस्य ब्राह्मणा इति श्लोके साक्षादधोक्षजशरीरता विप्रमात्रस्येति भाति । तच्च प्रमाणपीडितमित्यतः प्रमाणेन तदर्थमाह ।। शिलावदिति । सन्तो विप्राद्या हरेः शिलावत्प्रतिमा

अधिष्ठानम् । यथा वा वासुदेवादिसालग्रावाण इति व्यवहारस्तथा सद्ब्राह्मणेषु तनुत्वव्यवहारः । राजन्यदग्रपूजायामतः पात्रतयाऽच्युत इति सुपात्रता हरेर्यथा तथा ब्राह्मणं सुपात्रं विदुरिति सुपात्रतासाम्यभ्रमः साक्षादसाक्षात्वाभ्यां शिलावदिति सूचिताभ्यां विभ्रंशित इति ज्ञेयम् । ज्ञानादिहीनो विप्रश्चेत्सप्रतिमाप्रतिम एवेति भावोऽपि तपसेत्यादिना सूचित इति च । इति च व्यासस्मृताविति शेषः ।। ततश्चायं श्लोकार्थः ।। अस्याग्रपूजाभाजनत्वेन त्वत्साक्षिगोचरस्य कृष्णस्य जगदात्मनो ब्राह्मणा अपरोक्षज्ञानिनस्तन्वः शिलावच्छरीराणि पादरजसा त्रिलोकीं पुनन्तो महद्दैवतं तत्सन्निधानपात्रमिति सुपात्रं विदुः । सर्वा देवता वेदविदि ब्राह्मणे वसन्तीत्यादेः । यद्वा यन्महद्दैवतमस्य जगतः कृष्णस्येत्यन्वयः ।। ४३ ।।

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ
सप्तमे चतुर्दशोऽध्यायः ।। ७-१४ ।।

मन्दनन्दिनी — ब्राह्मणान्स्तुत्वोपसंहरति ।। तन्व इति ।। हे राजन् । जगत्स्वामिनः कृष्णस्य प्रतिमास्थानीया ब्राह्मणाः । पादरजसा त्रिलोकीं पुनंतोऽस्य जगतो महद्दैवतं तन्व इति योजना ।।४३।।

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां
सप्तमस्कन्धे चतुर्दशोऽध्यायः ।। ७—१४ ।।

।। अथ पञ्चदशोऽध्यायः ।।

नारद उवाच–

कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे ।
स्वाध्यायेऽन्ये प्रवचने अन्ये च ज्ञानयोगयोः ।। १ ।।

सत्यधर्मीया — ।। हरिः ॐ ।। कर्मज्ञानमार्गलयसाधनप्रपञ्चस्वरूपं निरूपयत्यस्मिन्नध्याये । तत्रोत्तमं पात्रं न विप्रमात्रं किन्तु ज्ञाननिष्ठ इति निष्टङ्कयितुं ब्राह्मणान्विवेचयति ।। कर्मनिष्ठा इति । कर्मनिष्ठा गृहस्थास्तपोनिष्ठा वनगाः स्वाध्याये वर्तिनो ब्रह्मचारिणः । एवमुत्तरत्रापि । अन्ये प्रवचने कुटीचा बहूदकाश्चेति । ज्ञाने परमहंसा योगे हंसा इति विवेकः । स्थूलदृश्याभिप्रायेण सर्वस्य व्याघ्रादेर्यथायथं सुरादिषु दर्शनात् । अत एव योगज्ञानयोरिति वक्तव्ये ज्ञानयोगयोरित्युक्तिः ।। १ ।।

मन्दनन्दिनी — उक्तसर्वधर्मान्ज्ञानादींश्च संगृह्य तत्तारतम्यं फलतारतम्यं चाह ॥ तत्रादौ ब्राह्मणान्विभजते ॥ कर्मेति ॥ कर्माग्निहोत्रादि । तपोऽनशनादि । स्वाध्यायो वेदाध्ययनम् । प्रवचनं शिष्येभ्यो वेदाध्ययनकीर्तनम् । ज्ञानं भगवन्माहात्म्यविषयकम् । योगः समाधिः ॥ १ ॥

ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ।
दैवे च तदलावे स्यादितरेभ्यो यथाऽर्हतः ॥ २ ॥

सत्यधर्मीया — आनन्त्यं सन्ततेरिह परत्र मुक्तिं चेच्छता ज्ञाननिष्ठाय कव्यानि पित्र्यान्नानि देयानि । दैवे कर्मणि । चात्तस्मै हव्यानि देयानि । तदलाभे परमहंसालाभे इतरेभ्यो हंसादिभ्यो देयानि । न साम्येनेत्याह ॥ यथाऽर्हत इति । तत्तद्योग्यतानतिरेकेण ॥ २ ॥

मन्दनन्दिनी — कव्येति पितृभ्यो दीयमानान्यन्नादीनि । पैत्रे इति शेषः । तदुद्देशेन क्रियमाणे कर्मणि । हव्यानीत्यपि शेषः । देवेभ्यो दीयमानानि । दैवे च तदुद्देशेन क्रियमाणे कर्मणि । तस्य कर्मण आनन्त्यमनन्तफलकत्वमिच्छता । ज्ञाननिष्ठाय देयानि । तस्य ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्यो यथार्हतो यथायोग्यं देयानीति योजना ॥ २ ॥

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत् सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥

सत्यधर्मीया — दैवादिस्थान उपवेशनीयनियममाह ॥ द्वाविति । दैवे विश्वेदेवस्थाने द्वौ । पितृकार्ये पितृस्थान उपवेश्य कर्तव्ये कर्मणि त्रीन् । एवमाहत्य पञ्च । एकस्मिन्स्थान इत्युभयत्रैकैकम् । एकं देवस्थाने पितुरेकमिति द्वौ । बहुवित्तेन बहव उपवेश्याः किमित्यतो नेत्याह ॥ सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरमिति । न च विस्तारमिति वक्तव्यं प्रथनस्य प्रस्तुतत्वात्कथं स च शब्दस्य विस्तर इत्युक्तेरिति वाच्यम् । निमन्त्रणानन्तरं किल भोजनं तस्य चागच्छतेत्यादिशब्दरूपत्वेन तत्प्रपञ्च एव नोचित इति वक्तुमेवमुक्तिरिति ज्ञेयम् ॥ ३ ॥

मन्दनन्दिनी — श्राद्धभोक्तृत्वसंख्यानियममाह ॥ द्वाविति ॥ दैवे विश्वेषां देवानां स्थाने ॥ ३ ॥

देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च ।
सम्यग् भवन्ति नैतानि विस्तरात् स्वजनार्पणात् ॥ ४ ॥

सत्यधर्मीया — कुतो न कार्यो विस्तार आनुकूल्ये सतीत्यत आह ।। देशेति । विस्तरान्निमन्त्रणं शब्दप्रपञ्चं निमित्तीकृत्य कृतात्स्वजनार्पणादात्मीयान्नादिदानात् । एतानि देशकालादीनि सम्यङ्न भवन्ति न सम्पद्यन्तेऽतो न श्राद्धे विस्तरं कुर्यादित्यन्वयः ।। ४ ।।

मन्दनन्दिनी — स्वजनः स्वकीयो भोजनीयो जनः । तदीयार्पणाद्विस्तराद्विस्तरेण क्रियमाणात् । एतानि देशादीनि सम्यक् न भवन्ति अविकलानि भवन्ति । बहूनामुद्देश्यत्वे मनोविक्षेपादिना कैवल्यस्याप्राप्तेरिति भावः ।। ४ ।।

देशे काले च सम्प्राप्तमुत्पन्नं हरिदैवतम् ।
श्रद्धया विधिवत् पात्रे न्यस्तं कामधुगक्षयम् ।। ५ ।।

सत्यधर्मीया — तर्हि प्रकृतानानुगुण्यप्रसङ्गात् । केचित्तु भगवदर्पितम् (?) पात्रे विधिवद्यथाविधि दत्तं कामधुक् कामं वाञ्छितं दोग्धीति तत् अक्षयं मोक्षरूपाक्षयफलम् ।। ५ ।।

मन्दनन्दिनी — तद्देशकालादावुत्पन्नं सम्प्राप्तमयाचनादिना प्राप्तं यत्तदेव हरिदैवतं पात्रे भोजनपात्रे न्यस्तं कामधुगक्षयं भवतीति भावः ।। ५ ।।

देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ।
अन्नं संविभजन् पश्येत् सर्वतः पुरुषात्मकम् ।। ६ ।।

सत्यधर्मीया — स्वजनायेष्टैः सह भुज्यतामित्येतदास्पदस्वजनाय । सर्वत एतत्सर्वं पुरुषात्मक-मन्तर्यामिपुरुषस्वामिकं पश्येत् । अत्र सन्निहितो भगवान्प्रीणात्वित्यनुसन्दध्यादिति भावः ।। ६ ।।

मन्दनन्दिनी — देवर्ष्यादिभ्योऽन्नं विभजन्विभागेन समर्पयन्सर्वतः सर्वपुरुषात्मकं परमात्मस्वामिकं पश्येदिति योजना । परमात्मैव सर्वाधिष्ठानेषु भुंक्त इति चिन्तयेदिति भावः ।। ६ ।।

न दद्यादामिषं श्राद्धे न चाद्याद् धर्मतत्त्ववित् ।
मुनीनां स्यात् परा प्रीतिर्यथा न पशुहिंसया ।। ७ ।।

सत्यधर्मीया — यदि यतिर्नियमतो भोज्यस्तर्हि मांसं स्थापनीयं न वास्थापनीयं नोभयं सम्भवति । यतेस्तद्भोजननिषेधात् । अस्थापने च श्राद्धसाद्गुण्यासिद्धेरित्यतो द्वितीयं पक्षमभ्युपेत्य तत्र प्राप्तासाद्गुण्यं चधर्मतत्त्ववित्पदानुगृहीतस्मृत्या परिहरति ।। नेति । आमिषं श्राद्धे न दद्याद्यतये । यजमानः काममोहितश्च कदाचित्पर्यवेषयेत् चेत् किं त्याज्यं किंवा दीक्षाकालत्वाद्भक्षणीयमित्यतः प्रथमपक्ष एवोचित इत्याह ।। नाद्यादिति । नाद्याच्च । स कीदृश इत्यत आह । धर्मतत्त्ववित् । विना मांसेन मधुना

विना दक्षिणयाऽऽशिषा । अक्षयं भवति श्राद्धं यतिषु श्राद्धभोजिषु । ग्रामे वा नगरे रम्ये ज्ञानी भिक्षुर्वसेद्यदि । अमन्त्रणेन यच्छ्राद्धं तदासुरमथो भवेदित्यादि स्मार्तधर्मज्ञ इति । तद्विधायकं शास्त्रमसुरविषयतया वाऽऽमिषप्रतिनिधिमाषविषयतया वा यत्यलाभे गृहस्थ उपविष्टे तद्विषयतया वेति न तद्वैय्यर्थ्यम् । न चासौहित्यं भोजनेनेत्यत आह ॥ मुनीनामिति । मुनीनां सन्न्यासिनाम् । मुनीनां पितृणां देवतानामिति वा । पशुहिंसया तल्लभ्यपललेन न परा प्रीतिः । यज्ञादावेवमेव पशुहिंसायाः साक्षाद्देवानां न परा प्रीतिरित्यावृत्त्याऽर्थो ज्ञेयः । वाचंयमेऽपि सर्वज्ञे मुनिशब्दः पितृष्वपीत्यभिधानात्सर्वज्ञा देवा मुनय इति । गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम् । देवा एव गृहस्था इत्यादिश्रुतिस्मृतिसद्भावान्मुनयोऽनिमिषाः । तेषां न पशुहिंसया परा प्रीतिर्नास्तीत्येव न । किन्तु परेषां यमदूतानां निरयपतीनामप्रीतिः परत्र स्यात् । यथोक्तम् । पञ्चमे दम्भयज्ञेषु पशून्विशसन्ति तानमुष्मिंल्लोके वैशसे नरके पतितान्निरयपतयः पातयित्वा विशसन्तीति । परेषां स्वमारितानां पशूनामप्रीतिः स्यात् । तत्कार्यं खादनादिकं ग्राह्यम् । यथोक्तमेकादशस्कन्धे पञ्चमेऽध्याये । यो घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा । पशून्द्रुह्यन्ति विश्रब्धान्प्रेत्य खादन्ति ते च तानित्यादि । अजसंज्ञानि बीजानि छगं नो हन्तुमर्हथेत्यादिना भारते तथा द्वितीयपञ्चकब्राह्मणाष्टम-नवमखण्डयोः स्फुटं पशुहिंसां निषिध्य पिष्टपशुयागविधानात्पशुहिंसा न कार्येति भावः ॥ ७ ॥

मन्दनन्दिनी — ज्ञाननिष्ठानां परमहंसानां भोक्तृत्वे मांसं निषेधति ॥ न दद्यादिति ॥ धर्मतत्त्वविद्भिरोक्ता मुनिरपि नादद्यात् । यतः पशुहिंसया परा प्रीतिः मुनीनां न स्यात् । अत इति योजना । मांसमधुदक्षिणाशिषामङ्गानां लोपेन न यतिर्भोक्तव्यः । किन्तु तं विहायान्यो ब्राह्मण इति तु न शङ्कनीयम् । विना मांसेन मधुना विना दक्षिणयाऽऽशिषा । अक्षयं भवति श्राद्धं यतिषु श्राद्धभोजिषु ।

ग्रामे वा नगरेऽरण्ये ज्ञानी भिक्षुर्वसेद्यदि ।
तमंतरेण यः श्राद्धं तदासुरमथो भवेत् ।

इत्यादि स्मृतिभिर्मांसाद्यभावेऽप्यक्षयत्वस्य यतिपरित्यागे आसुरस्य चोक्तत्वात् ॥ ७ ॥

नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ।
न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥

सत्यधर्मीया — नियत्या यत्याश्रम्येव भावीति न किन्त्वेतादृशो गृही चेद्ग्रहीतव्य इत्याह ॥ नैतादृश इति । सद्धर्ममिच्छतां नृणां यो भूतेषु मनोवाक्कायजस्य मनोवाक्कायेभ्यो जायत इति स तथा तस्य दण्डस्य द्रोहादेर्न्यासस्त्याग एतादृशः । परो धर्मो न नास्ति । अत एतत्त्यागी गृहस्थोऽपि

विहिताभिहितैत्कर्मयोग्य इति भावः । यद्वक्ष्यति वेणुभिर्न भवेद्यतिरिति । तत्राप्येतदेव मान्यताप्रयोजकं न तत्त्वमात्रमिति तत्त्वम् । न केवलं पश्वालम्भनलक्षणहिंसाभावो मुनीनां प्रीतिजनकोऽपि तु मनआदिना क्रियमाणदण्डलक्षणहिंसाभावोऽपीत्यतो वाऽऽहेत्यवतारयन्ति ॥ ८ ॥

मन्दनन्दिनी — अहिंसाधर्मं स्तौति ॥ नैतादृश इति ॥ मनोवाक्कायजस्य दण्डस्य हिंसाया भूतेषु न्यासः परित्यागो य एतादृशः परो धर्मः सद्धर्ममिच्छतां नृणां नास्तीति योजना ॥ ८ ॥

एके कर्ममयान् यज्ञान् ज्ञानिनो यज्ञवित्तमाः ।
आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥

सत्यधर्मीया — उक्तमिदं सर्वं मध्यमाधमाधिकारिविषयमुत्तमाः परमभागवतास्तु प्रवर्तन्त एवमित्यावेदयन्ति ॥ एक इति । सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमित्यादिशिक्षितैतद्दीक्षितमनसो यज्ञवित्तमास्तत्प्रकारज्ञानिश्रेष्ठाः । कर्ममयान्पूर्वोदीरितश्राद्धादीन्य ज्ञान् देयान्ज्ञानदीपिते आत्मसंयमने मानआदिनिग्रहवह्नौ जुह्वति ददति । अनीहा इति तत्र हेतुमाह । निवृत्तमार्गप्रवृत्ता इत्यर्थः । सर्वं मनस्येव कल्पयित्वा हरिमर्चयन्तीति भावः ॥ ९ ॥

मन्दनन्दिनी — कर्मयज्ञानधिकारिणामपि यज्ञान्तरमाह ॥ एक इति ॥ एके यतयोऽकर्ममयान् यज्ञान्मानसहविरादीन् ज्ञानदीपिते आत्मसंयमने मनोनिग्रहरूपेऽग्नौ जुह्वतीति योजना ॥ ९ ॥

द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ।
एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥ १० ॥

सत्यधर्मीया — ननु ज्योतिष्टोमेन वायव्यं श्वेतमालभेतेत्यादिश्रुत्युक्तो यदि त्यक्तो यागस्तर्हि ते प्रत्यवेयुरित्यतस्ततो भीतास्ततोऽप्युत्तमा नश्वरेश्वरप्रसादरूपफलोपलम्भकत्वान्निवृत्तं कर्मैव ज्याय इति ते कुर्वन्तीत्याह ॥ द्रव्ययज्ञैरिति स्मादिति । द्रव्ययज्ञैः साक्षात्पशुविशसनाद्यात्मकैर्यक्ष्यमाणं पुरुषं दृष्ट्वा भूतानि मेषाश्वादीनि बिभ्यति भीतानि भवन्ति । तदेवोपपादयति ॥ एष इति । मा मामिति पृथक् पृथक् पश्वभिप्रायेण । मा न विद्यते करुणा यस्य स इत्यैकपद्यम् । अत्र भूतान्यस्मादित्यन्वयो ज्ञेयः । विहितमेव करोति स इत्यत आह ॥ अतज्ज्ञस्तत्प्रकारज्ञानहीनः । तर्हि कुतः प्रवर्तत इत्यत आह ॥ असुतृबिति । असून्स्वप्राणान्मांसेन तर्पयतीति स तथा । एतेनासुषु रता असुरा इत्यत्र निरुक्तेस्तत्त्वं कटाक्षयति । कुर्वतामेवं नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीति श्रुतिप्रतीकमसुतृबित्यनेन धृतमिति ज्ञेयम् । अकरुण इति हननध्रौव्ये हेतुः । अथवा हन्यादकरुण इति ध्रुवं बिभ्यतीत्यन्वयः ।

असुन्वन्तं समं जहि दुणाशयो न ते मयः । पराचिच्छीर्षा ववृजुस्त इन्द्रा यज्वानो यज्वभिः स्पर्धमाना इत्यादि हिशब्दगृहीतश्रुत्याऽनर्थः श्रावितः ध्रुवमिति निश्चयतीत्याहुः ॥ १० ॥

मन्दनन्दिनी — मानसयज्ञं स्तोतुं द्रव्ययज्ञं निन्दति ॥ द्रव्येति ॥ द्रव्ययज्ञैः पश्वादिद्रव्यकयज्ञैर्भूतानि पशवोऽतज्ज्ञो भगवदर्पणकर्तृत्वाभिमानत्यागकामनाराहित्यभक्त्यादि साहित्यादिरूपयज्ञाङ्गज्ञानरहितः । हविःशेषमांसादिनाऽसुतृप् स्वप्राणतर्पको माकरुण इत्येकं पदम् । करुणारहित एषोऽस्मात् द्रव्यात् बिभ्यतीति योजना । एतादृशभयहेतुत्वाभावान्मानसो यज्ञः प्रशस्त इति भावः ॥ ॥ १० ॥

तस्माद् दैवोपपन्नेन मुन्यन्नेनैव धर्मवित् ।
सन्तुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकाः क्रियाः ॥ ११ ॥

सत्यधर्मीया — तस्माद्दैवोपपन्नेनायाचनसञ्चितेनेश्वरप्रेरणयाऽऽयातेनेति यावत् । मुन्यन्नेन भिक्षित्वाऽऽनीतेन नीवारादिना वा । धर्मविन्निवृत्तधर्मज्ञोऽहरहः सन्तुष्ट एतत्तृप्तचित्तः । नित्यनैमित्तिकाः श्राद्धादिक्रिया नित्या नैमित्तिकाश्च देवताराधनाद्याः कुर्यात् । नैमित्तिकीरिति पाठे ठञन्तता । एतेन न नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेत्यादिबाधाऽपीति सूचिता ॥ ११ ॥

मन्दनन्दिनी — देशकाले इत्युपसंहरति ॥ तस्मादिति ॥ तस्मात्परपीडादेरकर्तव्यत्वादुत्पन्नेन देशकालादुत्पन्नेनानायासप्राप्तेन तुष्टो धर्मविदहरहः प्रतिदिनं नित्यनैमित्तिकाः क्रिया नित्यं कुर्यादिति योजना ॥ ११ ॥

विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ॥ १२ ॥

सत्यधर्मीया — धर्मवित्त्वं चाधर्ममर्मणि ज्ञाते तद्वर्जनेन तत्परिशुद्धं स्यादित्यतस्तद्भिटपाटोपं कथयति ॥ विधर्म इति । विधर्मादिशाखा अधर्मवत्साक्षात्तद्वत्त्यजेत् ॥ १२ ॥

मन्दनन्दिनी — धर्मज्ञस्याधर्मत्यागवत्तच्छाखात्यागोऽवश्यक इत्याह ॥ विधर्म इति ॥ १२ ॥

धर्मबाधो विधर्मः स्यात् परधर्मोऽन्यचोदितः ।
उपधर्मस्तु पाखण्डो दम्भो वा धर्मभिच्छलः ॥ १३ ॥

सत्यधर्मीया — विधर्मादिपदार्थं स्वयमाह ॥ धर्मबाध इति । स्वधर्मपीडा विधर्मः । अन्यचोदित इतरवर्णाश्रमविहित इतरेण विहितश्चेत्परधर्मः । दम्भेन क्रियमाणो धर्मो दम्भः पाखण्डो वोपधर्म

इत्युच्यते । सच्छास्त्रपरिपन्थीत्यारभ्य पाखण्डमाश्रिता इत्यन्तेन चतुर्थ उक्तः । धर्मभित् । धर्मपदस्यार्थान्तरवर्णनं छल इत्युच्यते ।। १३ ।।

मन्दनन्दिनी — उक्तानां लक्षणमाह ।। धर्मबाध इति ।। धर्मबाधः । धर्मस्य ब्राह्मणैः क्रियमाणस्य धर्मस्य बाधो बाधको विधर्मः स्वगृहे क्रियमाणब्राह्मणभोजनलक्षणतदभीष्टधर्मविरोधी । सर्वब्राह्मण-भोजनादिलक्षण इति यावत् । क्षत्रियस्य चोदितः शत्रुदण्डनादिर्ब्राह्मणस्य परमधर्मः । पाषण्डो वेदाप्रामाण्यवादिभिः क्रियमाणः सप्तघटिकाभ्यन्तरभोजनादिः । दम्भो वा आन्तरभक्तिरहितो भक्तिक्रियमाणेन सदृशो वोपधर्मः स एवोपमेति ज्ञेयम् । धर्मभिद्वैदिकधर्मविरुद्धः सोत्प्रेक्षयैव धर्मत्वेन कल्पितः । राजशिरोभी रुद्राहुत्यादिरूपो जरासन्धकल्पितछलधर्मः ।। १३ ।।

यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमः पृथक् ।
स्वभावविहितो धर्मः कल्प्यतेऽस्योपशान्तये ।। १४ ।।

सत्यधर्मीया — यः पुम्भिरिच्छया स्वेच्छया कृतो धर्मः फलेच्छयेति वा स आभासो धर्मवदवभासमान इत्यर्थः । एतत्पञ्चकमशास्त्रक्रमायातमिति बोधयितुं तृतीयोऽप्याभासो व्युत्क्रमेण प्रान्ते व्याख्यात इति ज्ञेयम् । यद्बोधनार्थं विधर्मादिनिरूपणं तदिदानीमाह ।। आश्रम इति । आ आश्रमो यत्रेति वर्णो गृहस्थाद्याश्रमश्च तन्त्रेण गृह्यते । यस्मिन्वर्णे यदाश्रमे पृथक् स्वभावविहितः शास्त्रतस्तत्तत्स्वभावानुसारेण श्रीहरिरेवानेन प्रीणात्विति तदर्पणबुद्ध्या विहितः कृतश्च यो धर्मः सोऽस्यानुष्ठातुः । अस्योपशान्तय इति पदमेकं वा । अस्यस्य निरस्यस्य संसारस्योपशान्तये मोक्षाय निवृत्तये यथाक्रममन्वयः । कल्प्यते समर्थो भवति । स्वंशब्दवाच्ये हरौ भावो भक्तिर्मनो वा येषां ते सात्त्विकास्तैर्विहितो धर्म उपशान्तये मुक्त्या इति वा । धर्मो भवत्यधर्मोऽपि कृतोभक्तैरित्यादेः । स्वभावः शीलं तेन विहितः शीलमूलक इति वा । यथोक्तं शान्तिपर्वणि शीलप्रल्हादसंवादे । श्रीरुवाच । धर्मः सत्यं तथा वृत्तं बलं चैव तथाऽप्यहम् । शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशय इति ।। १४ ।।

मन्दनन्दिनी — इच्छया काम्येच्छया पुंभिः कृतः स आभासः । तर्हि कीदृशो धर्मो मोक्षायेत्यत आह ।। आश्रमे इति ।। वर्णस्याप्युपलक्षणम् । तत्तद्वर्णे आश्रमे उचितः । स्वस्य परमात्मनो भावेन भक्त्या विहितोऽनुष्ठितो धर्मोऽस्य यजमानस्योपशान्तये मोक्षाय कल्पते हि प्रमाणप्रसिद्धमेतत् ।। १४ ।।

धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् ।
अनीहाऽनीहमानस्य महाहेरिव वृत्तिदा ।। १५ ।।

सत्यधर्मीया — ननु विना धनं न धर्मघटनाऽतस्तदर्थं वार्तादिकर्त्रा भाव्यमित्यत आह ॥ धर्मार्थमिति । धर्मार्थमपि नेहेत न प्रयतेत । अतिहाय देहस्थितिं वर्णाश्रमोचितस्नानादिधर्मानुपपत्तेस्तदर्थमीहनं किं न कार्यमित्यत आह ॥ यात्रार्थं वेति । तर्हि वृत्तिः कथमित्यतोऽनीहामाहात्म्यमाह ॥ अनीहेति । अनीहमानस्याधनस्य धनमनिच्छतो महाहेरजगरस्य यथेश्वरार्पितात्मभारस्य तत्रैव शयानस्य यदृच्छयाऽऽगच्छता गात्रयात्रा तथाऽनीहा वृत्तिदा यात्रामात्रोपयुक्तदात्री ॥ १५ ॥

मन्दनन्दिनी — अयाचितवृत्तिं स्तौति ॥ धर्मार्थमिति ॥ धर्मार्थं यज्ञाद्यर्थम् । यात्रार्थं देहयात्रार्थम् । अधनः परकीयधनं नेहेत न याचेत । स्वतः सिद्धं नीवारादिनाऽयाचितप्राप्तधनादिना वा । धर्मयात्रादिकं कुर्यादिति भावः । लोके याच्ञायामपि न ददाति धनिको धनं कथमयाच्ञायां वृत्तिः स्यादित्यत आह ॥ अनीहेति ॥ अनीहमानस्यायाचकस्यानीहाऽनीहया तुष्टो भगवान् महाहेरजगरस्येव वृत्तिदा वृत्तिप्रदो भवति । एतादृशधर्मसन्तुष्टो भगवानदित्सताऽपि धनादिकं दापयतीति भावः ॥१५॥

सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत् सुखम् ।
कुतस्तत् कामलोभेन धावतोऽर्थेहया दिशः ॥ १६ ॥

सत्यधर्मीया — अस्ति भगवदुपास्तिर्यस्य तस्य सुखसमं सुखं न सुखलभं तदनर्पितभारस्य नरस्येतरस्येतीरयति । सन्तुष्टस्यात्मारामस्य भगवत्क्रीडस्य कामलोभे विषयविषयकगार्ध्ये । न । न संत्यपि यत्सुखं तत्सुखमर्थेहया विषयेच्छया दिशो धावतः पुंसः कुतः कर्मणो भवेन्न भवेदित्यर्थः । कुत इत्यावर्तते । कुतो भूतः । कृष्यादिकृतौ भूमितोऽपि कुतो भवेदित्यर्थ इति वा । कामलोभेन विषयगार्ध्येनार्थेहया धनार्जनव्रजनेनेति वा । तत्कामलोभेन तत्कामा आत्मारामेत्यत्रोक्तात्मा तच्छब्देन परामृश्यते । हरिकामा एकान्तिनस्तत्र लोभस्तद्गार्ध्यं सत्सहवासकाङ्क्षया । आत्मरमत्वमेकमेव नालं तद्दाससहवासोऽप्यपेक्षित इत्येवमुक्तिरिति वा ॥ १६ ॥

मन्दनन्दिनी — निरीहस्य भवत्सुखमर्थं याचमानस्य नास्तीत्याह ॥ सन्तुष्टस्येति ॥ सन्तुष्टादेर्यत्सुखं तत्कामया लोभेन काम्यस्यार्थस्य लोभेन विद्यमानस्यात्यागेच्छयाऽधिकस्य लाभेच्छया दिशो धावतः कुतो भवेदिति योजना । मनस एव सुखसाधनतया तत्संतोषस्यैवाभावात् । देहायासस्याधिकस्य सत्वाच्चेति भावः ॥ १६ ॥

सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः ।
शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥ १७ ॥

सत्यधर्मीया —— दिग्धावने न कृत्यमित्याह ॥ सदेति । सन्तुष्टं मनो यस्य तस्य सर्वा दिशः सुखमयाः सुखं माययन्ति गमयन्ति प्रापयन्तीति तास्तथा मय गताविति स्मरणात् । उपविष्टस्थल एव शिपिविष्टकृपा भवतीति भावः । तत्र निदर्शनमाह ॥ यथेति । शर्कराः क्षुद्रपाषाणाः कण्टको द्रुमांशः । कण्टकः क्षुद्रशत्रौ च द्रुमांशे चेति विश्वः । स आदिर्येषां ते तेभ्यः । उपानट्पदः पुंस उपानहौ पादयोर्यस्य तस्य शिवं भद्रं भवति । प्रथमान्तं वा । शिवमुपैति । उपानट्पदः पादस्य शिवं भद्रं तद्वेति वा । उप पादयोरानह्यते णह बन्धनेऽस्माद्धोढ इति ढे चर्त्वे चोपानडिति रूपम् । पादूरुपानट् स्त्रीत्यमरः । शिवं मोक्षे सुखे भद्र इति विश्वः ॥ १७ ॥

मन्दनन्दिनी —— अर्थेहया धावतः कुतः सुखमित्यनेनानीहया धावतः सुखमित्यायातम् । कथमिदं धावनाऽविशेषादित्यत आह ॥ सदेति ॥ उपानट्पदस्तद्युक्तपदः शर्करकण्टकादिभ्यो वेधाभावाद्दिग्जातं यथा शिवम् । एवं सदा सन्तुष्टमनसो अर्थलाभव्यथाऽभावेन सर्वा दिशः शिवमया इति योजना ॥१७॥

सन्तुष्टः केन वा राजन् न वर्तेतापि वारिणा ।
औपस्थ्यजैह्वयकार्पण्याद् गृहपालायते जनः ॥ १८ ॥

सत्यधर्मीया —— शनैरशनत्यागेऽप्यापोमयः प्राण इति श्रुतेर्न विना जीवनं जीवनं सुशकं धर्तुमिति पानीयमानीयतामिति कश्चित्प्रति वा यत्नेन वक्तव्यमित्येतदपि नेति वदति ॥ सन्तुष्ट इति । केन वेति । येन केन वा वासुदेवेच्छागतेन द्रव्येण नारायणाख्यपीयूषादिना वा सन्तुष्टो वारिणा यत्नतः सम्पादितपाथसा न वर्तेत । वृत्तिं न कुर्यादित्यर्थः । करेणैकेन शिश्नं च जिह्वां चैकेन वै हसन् । प्रगृह्योन्मत्तवत्तत्र ननर्त मुनिपुङ्गवः । तथाऽपि वः प्रवक्ष्यामि दुर्घटं च द्वयं ध्रुवम् । शिश्नस्य निग्रहः पुत्र जिह्वाया अपि नित्यशः । द्वयं यदि गृहीतं स्यात्स एव स्याज्जनार्दन इति वैशाखमाहात्म्ये द्वयोर्निग्रहस्य दुःसाध्यतोक्तेः । पूर्वं वारिणाऽपि न वर्तेति निरसनाकार्यपानीयपानादित्यागप्रसक्त्या तत्सह हेयत्वेनोक्तौपस्थ्यत्यागोऽपि कार्य इति वक्तुमेतद्द्वन्द्वनिरतनरदशां शंसति ॥ औपस्थ्येति । तत्राप्युपोपणेऽपि योषिदासक्तिदर्शनात्प्रधानतयौपस्थ्यप्राथम्यम् । उपस्थो गुह्येन्द्रियं तत्सम्बन्धि व्यवायादि । उपस्थः शेफसि क्रोडे तथा मदनमन्दिर इति मेदिनी । जिव्हासम्बन्धि रसास्वादनादि चेति तयोर्विषये तत्सम्बन्धि वा कार्पण्यं कृपणता दैन्यमिति यावत् । तस्माज्जनो गृहपालायते श्वेवाचरति । तथा हि नीतौ । कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः । क्षुधाक्रान्तो जीर्णो जठरपिठरार्पितगलः शुनीमन्त्येति श्वा हतमपि च हन्त्येव मदन इति । गृहपालायते आचारार्थे क्विप् । गृहपालस्य शुनोऽयो ज्ञानं स्वसंविदापेक्षयाऽधिकमिति सः । हेतुस्तु पूर्वक एव जन इति शेषः(?) ॥ १८ ॥

मन्दनन्दिनी — पुनः सन्तुष्टत्वमेव विधत्ते ॥ सन्तुष्ट इति ॥ केन वा दैवोपनीतेनान्ततो वारिणाऽपि नञ् चार्थे । लब्धेनासन्तुष्ट इत्यनेनान्वयः । असन्तुष्टं निन्दति ॥ औपस्थ्येति ॥ औपस्थ्यजैह्व्यकार्पण्याद्गृह्वरसनेन्द्रिय लौल्याद्गृहपालायते सारमेयवदाचरति । तर्जनभर्त्सनादिविषयो भवतीति भावः ॥ १८ ॥

असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः ।
स्रवतीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ १९ ॥

सत्यधर्मीया — सन्तोषाभाव इयाननर्थो भविष्यतीत्याह ॥ असन्तुष्टस्येति । तेजो वर्चः शापादिशक्तिर्वा । विद्या वेदशास्त्ररूपिणी स्वाभ्यस्ता । तपः कृच्छ्रादिकम् । यशः कीर्तिरिन्द्रियलौल्येनैता निस्रवन्ति अकार्यकारीणि भवन्तीत्यर्थः । ज्ञानं वेदान्तजनितं ज्ञानं चावकीर्यते विक्षिप्तं नष्टं भवतीति यावत् । एवेति विषयानलम्बुद्धेः तेजआदिस्रंसनावकीरणकार्यकारण-भावाव्यभिचारं सूचयति । ज्ञानपर्यन्तं गृहीत्वा स्रंसन्तीत्येकक्रियान्वयः शक्यसम्पादश्चेदपि ज्ञानावकीरणस्य महाहानितां स्फोरयितुं पृथगवकीरणोदीरणमिति मन्तव्यम् । अवकीर्णी क्षतव्रत इत्यभिधानम् । वर्चस्केवस्कर इति निपातितो वस्करशब्दः । मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृदित्यमरोक्तेर्वर्चस्क इत्यस्य कुत्सितं वर्चो वर्चस्कमन्नमलमिति व्याकृत्या तस्मिंस्तुडिति कीर्यत इत्यवस्कारः । वर्चस्केकिमवकर इति व्याचख्यौ भट्टोजिरिति (किरतौ उपात्किरतेर्लवने हिंसायां प्रतेश्चेत्येवोक्तेनः ।) नात्रार्थे स्फुटसाम्भवित्यमित्यनुयुक्तिप्रत्युक्ती कथमिति केचित् ॥ १९ ॥

मन्दनन्दिनी — असन्तुष्टस्य भवदनिष्टमाह ॥ असन्तुष्टस्येति ॥ न केवलं तेज आदिकं चलति । किन्तु ज्ञानं चावकीर्यते विक्षिप्यते । स्मृत्यजनकं भवतीति यावत् । विद्या [illegible]आदिकं ज्ञानं तज्जन्यमिति भावः ॥ १९ ॥

कामस्यान्तं हि क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ।
जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥

सत्यधर्मीया — क्षुत्तृड्भ्यां निगृहीताभ्यां जनः कामस्य भामिनीभोगादेरन्तं याति । विषया विनिवर्तन्ते निराहारस्य देहिन इत्यादेः । क्रोधस्य चान्तं याति । तत्र हेतुः फलोदयात्तत्कार्यहिंसादण्ड-नादिलाभादिति । कोपकार्यसम्पत्त्यनन्तरं कुतः कोप इति भावः । लोभस्यान्तस्तु न सुसाध इति बोधयति ॥ लोभस्येति । दिशो जित्वा भुवो भुक्त्वा च तदन्तं न याति फलोदयात्कामजयफलस्य शान्तेरुदयान्निष्पत्तेः क्रोधस्यान्तं यातीति वा । क्षुत्तृड्भ्यां क्षुत्पारतत्फलोदयात्

अशनपानीयादिपानादिनाऽन्तं याति । क्रोधस्य च तदलाभोत्पन्नकोपस्य चान्तं तत्प्रणाशं याति । पूर्ववदुर्वीरितमिति वा ॥ २० ॥

मन्दनन्दिनी —— कामक्रोधापेक्षया लोभस्य दुर्निरासत्वमाह ॥ कामस्येति ॥ कामो विषयभोगेच्छा क्रोधस्तदपकारकः । जनहननादीच्छाविनाभूतो मनोविकारविशेषभूतः । लोभश्च लब्धद्रव्यराज्यादेः कियन्मात्रस्याप्यपरित्यागेच्छाविनाभूतो वृत्तिविशेषः । तत्र जनः क्षुत्तृड्भ्यां विषयिवाचिनो विषये लक्षणाऽन्नपानाभ्याम् । उपलक्षणमेतत् । लब्धेन काम्येन कामस्यान्तं निरासं याति । एवमेतत्फलस्य क्रोधफलस्यापकारिजनहननादेरुदयात्क्रोधस्यान्तं याति । दिशो जित्वा भुवो भुक्त्वा विद्यमानोऽपि जनो लोभस्यान्तं न यातीति योजना । बहुद्रव्यराज्यादिमतो किंचित्त्यागेच्छाप्रतिबन्धको लोभो नापैतीति भावः ॥ २० ॥

पण्डिता बह्वो राजन् बहुज्ञाः संशयच्छिदः ।
सदसस्पतयोऽप्येके असन्तोषात् पतन्त्यधः ॥ २१ ॥

सत्यधर्मीया —— न केवलं विलयो विद्याद्यानामसन्तोषेण किंनामाधःपतनमपि भवतीत्याह ॥ पण्डिता इति । आगमजज्ञानयुताः । बहुज्ञा अर्थान्बहूनतीतादीन् जानन्तीति ते तथा । नैतन्मात्रनिष्ठं तज्ज्ञानमित्याह ॥ संशयच्छिद इति । परसंशयं व्यंसयन्तोऽपीत्यर्थः । तत्स्वरूपं निरूपयति ॥ सदस इति । पतयः । पातेर्डतिः । सभाप्रभवः । ते चाल्पा इति जल्पति ॥ एक इति । अनेन पण्डिता बहुज्ञाश्च बह्व एके केचन सदसः पतय इत्यन्वयः । असन्तोषादधः पतन्ति । विवक्षाभावान्न सन्धिः । सदसस्पतयः कस्कादिः ॥ २१ ॥

मन्दनन्दिनी —— न केवलमसन्तुष्टस्य विद्यादिनाशः किं त्वधःपातोऽपीत्याह ॥ पण्डिता इति ॥ पण्डिता आगमजन्यज्ञानवन्तो बहुज्ञा युक्त्यादिसिद्धमतिमन्तः सदसस्पतयः सभापतयः । एतादृशानां मध्येऽप्येकेऽसन्तोषान्निमित्तादधः पतन्तीति योजना ॥ २१ ॥

असङ्कल्पाज्जयेत् कामान् क्रोधं कामविवर्जनात् ।
अर्थानर्थेक्षया लोभं भयं तत्वावमर्शनात् ॥ २२ ॥

सत्यधर्मीया —— कामादिजयोपायमाह ॥ असङ्कल्पादिति । अनभिसन्धेः कामान्विषयान्हरी-तराञ्जयेदिति यथापेक्षमन्वेतव्यम् । कामविवर्जनात्त्यागात् । विसर्जनादित्यपि पाठ एकार्थवितौ । क्रोधं कारणाभावादेव कार्याभावः । कामात्क्रोधोऽभिजायत इत्युक्तेः । अर्थान् अर्थेक्षया लोभं जयेत् । अर्थान् रायोऽर्थेक्षया निवृत्तिर्नश्वरता तदीक्षयाऽवलोकनेन । राजचोराद्यपहारादिपरावृत्तिशून्या इति । अलोभं न

विद्यते लोभो यस्मिन्कर्मणि यथा भवति तथा जयेत् । सत्स्वर्थेषु लोभस्तदार्जने स कुतः स्यादिति वा । अर्थानर्थेक्षया अर्थे सञ्चितकाञ्चनादावनर्थेक्षया राजचोरादिकापहारनिरीक्षणेन लोभं तत्त्वावमर्शनात्परापरतत्त्वविचाराद्भयं भीर्तिमितरस्माद्दुश्शास्त्राभ्यासतः सञ्चलनम् ।। २२ ।।

मन्दनन्दिनी — कामादीनां दोषाणां जयोपायमाह कतिपयैः श्लोकैः ।। असङ्कल्पादिति । प्रधानस्वर्गस्वाराज्यादीच्छानिर्भरः सङ्कल्पस्तदभावात्तत्तदुपायकामान् तत्काले च भोगकामान् जयेदभिभवेत् । प्रधानेच्छाभावे तदुपायेच्छा तत्साध्यभोगेच्छाश्च स्वत एव न प्रादुर्भवन्तीति भावः । कामविवर्जनात्क्रोधं जयेदिति । एवं सर्वत्रापि जयेदित्यन्वेति । कामविरोधमूलत्वात्क्रोधस्य तद्विवर्जने स्वत एवानुत्पत्तिः । अर्थेष्वनर्थस्य राजचोरादिनिमित्तकस्येक्षया पर्यालोचनया लोभं जयेदिति । अर्थेष्वनर्थदर्शनेन त्यागेच्छासम्भवेन लोभो नश्यति । तत्त्वावमर्शनात् । सर्वभूतानि भगवदाश्रितानि भगवांश्च सर्वभूतेषु रक्षकत्वेन स्थित इत्येवं ज्ञानाद्भयं जयेत् । एवं जानतो भयं नोत्पद्यते । ततो न विजुगुप्सत इति श्रुतेरिति भावः ।। २२ ।।

आन्वीक्षक्या शोकमोहौ दम्भं महदुपाश्रयात् ।
योगान्तरायान् मौनेन हिंसां कायाद्यनीहया ।। २३ ।।

सत्यधर्मीया — आन्वीक्षिक्या वलीपलिततादिकं यथा कायस्य तथा शोकादिकमन्तःकरणकोशगतमेव यावत्सृत्यात्मनो लिङ्गभङ्गे तु न किञ्चिच्चिदानन्दघनस्येति सत्तर्केण । दम्भं विद्यमानगूहनेनाविद्यमानप्रदर्शनम् । महदुपाश्रयादार्याणां परिचर्याया योगान्तरायान्समाध्यादिविघ्नान् । उपायसामान्यापायान्वा । मौनेनासम्भाष्यासम्भाषणेन हिंसां पिपीलिकादिहिंसां कायाद्यनीहया शरीराद्यचेष्टया मौनेन चक्षुर्निमील्योपवेशे हस्तादिपातेन घातो यथा न स्यात्तथा निश्चेष्ट उपविशेदित्यर्थः। कामाद्यनीहयेति पाठे कामादिच्छानुसारात् । आद्यम् । अदधातोऽर्हहलोर्ण्यदिति ण्यत् । भक्ष्यं तत्रानीहेच्छाभावस्तेन । सर्वेषां कामाऽन्तःप्रवेशेऽपि विशेषतस्तेषां तेषां जेयतया ग्रहणेन सर्वात्मना तत्त्यागावश्यकत्वमभिप्रैतीति प्रथमश्लोक एव क्रोधेन सह हिंसोक्तावभिलषितसिद्धेरत्र पुनः कामाद्यनीहयेत्यतिरिच्यत इति पराकरोति ।। २३ ।।

मन्दनन्दिनी — आन्वीक्षिक्या ब्रह्मतर्काद्युक्तयुक्तिसाध्यनित्यानित्यत्वादिनिश्चयेन शोकमोहौ स्वस्नेहविषयापगमनिमित्तं शोकं तत्र नित्यत्वादिमोहं च जयेत् । नित्यत्वानित्यत्वनिश्चये न तदागमापगमनिमित्तौ मोहशोकौ भवत इति । महतां विनीतानामुपाश्रयात्सेवनात् । दम्भमल्पस्यापि स्वस्य महत्त्वप्रदर्शनं जयेत् । सत्यपि महत्त्वे तन्न प्रदर्शयंत्येते । ममत्वविद्यमानमहत्त्वप्रदर्शनं जुगुप्सितमिति बुद्धिर्भवतीति भावः । मौनेन वागादीन्द्रियनियमेन योगान्तरायान् इन्द्रियाणां

बहिर्व्यापारलक्षणोपासाविघ्नान् । कामाद्यनीहया स्वर्गस्वाराज्याद्यनीहया हिंसां पशुहिंसां जयेदित्यनुवृत्तेन योजना । कामाद्यनीहायां हिंसा दोषाय न भवतीति भावः । तस्मान्नेष्टियाजुकः स्यादिति निषेधात् ॥ २३ ॥

कृपया भूतजं दुःखं दैवं जह्यात् समाधिना ।
आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ॥ २४ ॥

सत्यधर्मीया — भूतजं भौतिकं दुःखं भौतिकधात्वादिविकारजं कृपया सामर्थ्येन । दैवमाधिदैविकं मनःपीडादिकं समाधिना देवताराधनादिनाऽनावृष्ट्यादिकं वा । भूतजं प्राणिभ्यो जातं दुःखं कृपया तत्कृपया तदाधर्म्ये स्वकृपयेति वा । आत्मजं देहजातं योगवीर्येण प्राणायामाद्यष्टाङ्गबलेन सत्त्वनिषेवया ज्ञानमार्गसेवनेन सात्त्विकाहारेणेति वा । निद्रामज्ञानं स्वापमविहितकाले यथा स नागच्छेत्तथा जह्यादिति सर्वान्वयि ॥ २४ ॥

मन्दनन्दिनी — कृपया नृसिंहाद्युपासनासम्पादितदयया जलवाय्वादिशरीरकजलग्रहपिशाचादिजं दुःखम् । समाधिना भगवध्द्यानेन । दैवं नवग्रहादिप्रयुक्तम् । योगवीर्येण श्वासजयेनात्मजं देहजं हिक्कादिकम् । सत्त्वनिषेवया सात्त्विकगोघृतादिद्रव्यनिषेवया निद्रां जह्यादिति योजना । नृसिंहोपासनया पिशाचादेर्भगवदंघ्रिध्यानेन ग्रहचारविपत्तेः श्वासनिरोधेन दैहिकरोगादेः सात्त्विकपदार्थसेवनया तामसनिद्रादेस्त्यागस्य प्रसिद्धत्वादिति भावः ॥ २४ ॥

रजस्तमश्च सत्वेन सत्वं चोपशमेन च ।
एतत् सर्वं गुरौ भक्त्या पुरुषो मनसा जयेत् ॥ २५ ॥

सत्यधर्मीया — रजस्तमश्च सत्त्वेन गुणेन जयेत् । तत्सत्त्वमुपशमेन भगवन्निष्ठया । एकैकेनैकैकजयो नेदमन्तरा भविष्यतीत्याह ॥ एतदिति । गुरौ हरौ भक्त्या मनसा तत्सहकृतमनसा जयेत् ॥ २५ ॥

मन्दनन्दिनी — सत्त्वेन सत्त्वगुणवृध्द्या रजस्तमस्युपशमेन भगवन्निष्ठया सूक्ष्मसत्त्वासादितया सत्त्वं स्थूलं जह्यात् । सर्वमपि जेतव्यम् । हरिगुरुभक्त्यादिना जय्यं भवतीत्याह ॥ एतदिति ॥ २५ ॥

यस्य साक्षाद् भगवति ज्ञानदीपप्रदे गुरौ ।
अभिसन्धिः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥ २६ ॥

सत्यधर्मीया — एतदसत्त्वे सर्वासत्त्वमित्याह ॥ यस्येति । ज्ञानदीपप्रदे ज्ञस्युद्दीपके साक्षाद्भगवति तद्रूपे गुरौ यस्य पुंसोऽनभिसन्धिरवज्ञा तस्य सर्वं श्रुतं कुञ्जरशौचवद्गजमज्जनवद्वृथा यथा तत्तथा श्रुतं वृथेत्यर्थः । मर्त्यासद्धीरित्यपि सद्धीपाठः । मर्त्योऽयमित्यसती च सा धीश्च सा ॥ २६ ॥

मन्दनन्दिनी — हरिगुरुभक्त्यभावे श्रवणादेर्वैयर्थ्यमाह ॥ यस्येति ॥ भगवतीति विषयसप्तमी । यस्य श्रुतं श्रवणादिकं साक्षाद्भगवद्विषयकज्ञानलक्षणदीपप्रदे गुरौचातिसन्धिः सन्धानं हरिगुरु-माहात्म्यानुसन्धानमतिक्रान्तम् । तस्य सर्वं श्रवणादिकं कुञ्जरशौचवव्द्यर्थमिति योजना । कुञ्जरस्नानं यथा पुनर्धूल्युद्वहनकारि तथा श्रवणादिकं संसारावहमिति भावः ॥ २६ ॥

एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोकोयं मन्यते नरम् ॥ २७ ॥

सत्यधर्मीया — लोको यं नरं साधारणमनुष्यं मन्यते । एषः साक्षात्प्रधानं प्रकृतिः पुरुषोऽक्षरपुरुषो रमा तयोरीश्वरो योगेश्वरैर्योगेनोपायेनेश्वराः समर्थास्तैर्विमृग्यौ विचार्यावङ्घ्री यस्य स एष ईदृशः । अर्शआद्यचि योगानां योगिनामीश्वरैरिति वा । यं लोको नरं मन्यते एष श्रीकृष्णो वै इति वाऽन्वयः ॥ २७ ॥

षड्वर्गसंयमैकान्ताः सर्वा निगमचोदनाः ।
तदन्ता यदि नो योगमावहेयुः श्रमावहाः ॥ २८ ॥

सत्यधर्मीया — योगैश्वरैर्विमृग्याङ्घ्रिरिति प्रस्तुतस्तु योग एतद्धेतुक एते यदि तं नोपजनयेयुस्तर्हि गर्हिता भवेयुरित्याह ॥ षड्वर्गेति । षड्वर्गस्य षडिन्द्रियाणां संयमो निग्रह इतरदुर्विषयादाहृत्य हरौ स्थापनम् । तस्मिन्नेकान्तोऽव्यभिचारस्तात्पर्यमिति यावत् । यासां ताः सर्वा निगमचोदना वेदविधयः स च योगान्ते फलत्वेन यासां ते तथा । तादृश्योऽपि यदि योगं नो आवहेयुर्न प्रादुर्भावयेयुः श्रमावहाः केवलं श्रमापादिका एव । फलालाभादिति भावः । योगानिति पाठे धारणाध्यानसमाधीनित्यर्थः । यदि तं वहेयुस्तर्हि नो श्रमावहा इत्यप्यन्वयः ॥ २८ ॥

मन्दनन्दिनी — भक्तिहीनेन श्रुता वेदविधयोऽपि श्रमावहा इत्याह ॥ षडिति ॥ सर्वा निगमचोदनाश्चोदितानुष्ठानेन मनोनैर्मल्यद्वारा षण्णामिन्द्रियाणां वर्गस्य संयमनमितरपरित्यागेन भगवदेकनिष्ठत्वमेकान्त उद्देश्यो यासां तास्तदन्तास्तस्य भगवतोऽतो निर्णयो याभिः । तत्प्रयोजका इति यावत् । एतादृशा अपि यदि योगं मनोयोगं भक्तियोगं च नावहेयुस्तदा केवलं श्रमावहा इति योजना ॥ २८ ॥

यथा वार्तादयो विद्याः पुंसः स्वार्थं न बिभ्रति ।
अनर्थाय भवेयुश्च पूर्तमिष्टं तथाऽसतः ॥ २९ ॥

सत्यधर्मीया — योगायोगे श्रमसमार्जकत्वेन चोदनाननुमोदनं प्रागुदितं तदेवोपपादयति ॥ यथेति । वार्तादयस्तत्प्रतिपादिका विद्या यथा पुंसोऽर्थं न बिभ्रति शाश्वतिककामितदा न भवन्तीत्यर्थः । न केवलं यथाऽऽलपितफललोपः किन्त्वनर्थाय संशयायैव भवेयुः साधिकाः । असतोऽमङ्गलस्य भगवदनु-सन्धानविकलस्य पूर्तमिष्टं चैतेऽर्थं न विदधाते । पूर्तं पूर्णमिष्टं न बिभ्रत इत्यावृत्त्याऽर्थो वा । यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रतीति पाठान्तरम् । वार्तैवादिः कारणं येषां ते वार्तादयोऽर्था योगस्यार्थं मोक्षं न बिभ्रति । इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढा इत्यादेः ॥ २९ ॥

मन्दनन्दिनी — इष्टापूर्तानुष्ठानेन सफला निगमचोदनाः कथं विफला इत्यत आह ॥ यथेति ॥ वार्तादयः क्रयविक्रियादिविषयाः पुंसो यथा विद्या पर्यालोचना वणिजः केवलं स्वार्थमभीष्टवृद्धिं न बिभ्रति । प्रत्युत वृद्धीच्छया दत्ते पदार्थे मूल्यस्यैवादानेऽनर्थाय बभूवुस्तथाऽसतो भगवद्भक्तिहीनस्य पूर्तमिष्टं स्वार्थं स्वर्गादिकं न बिभर्ति । प्रत्युतासतो भगवद्द्वेषवतोऽनर्थाय तमसे भवेच्चेति योजना ॥२९॥

यश्चित्तविजयेच्छुः स्यान्निःसङ्गो निष्परिग्रहः ।
एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥ ३० ॥

सत्यधर्मीया — विना मनोजयं न ध्यानं सम्भवति तदर्थं तदुपायमाह ॥ य इति । चित्तस्य चेतसो विजयमिच्छतीति स तथा । निस्सङ्गः स्त्रीपुत्रादिस्नेहरहितः । एतत्कारणमीरयति ॥ निष्परिग्रह इति । तत्फलं लपति ॥ एक इति । तत्राप्यनेकलोकागतौ कथं चित्ताचाञ्चल्यमित्यत आह ॥ विविक्तशरण इति । विविक्ते रहस्यस्थाने शरणं कुटीरं यस्य सः । सांसारिकस्य कथमिदं घटत इत्यत आह । भिक्षुरिति । न च जठरपिठरीपूरणाय विनेय एकोऽपेक्षित इति कथमेकता लाभः । कथन्तरामुदरभृतिः । कथन्तमां स्वान्तस्वास्थ्यमित्यत आह । भैक्ष्येति । भिक्षया स्वयमेव सम्पादितं भैक्ष्यम् । तददनं बहुलं चेन्न चेतसः स्थैर्यं स्यादित्यत उक्तं मितेति । भैक्ष्यस्य मितमशनं यस्य सः ॥ ३० ॥

मन्दनन्दिनी — मनोजयस्यावश्यकत्वमुक्तम् । तदिच्छोस्तदुपाययोगं साङ्गं विधत्ते श्लोकचतुष्टयेन ॥ य इत्यादिना । चित्तविजयोऽनायासेन भगवद्विषयीकरणं तदिच्छुः स्यात् । तर्हि वक्ष्यमाणाङ्गविशिष्ट आसीत् । प्राणापानौ सन्निरुध्यात् मनः सन्निरुध्यात् इति योजना । निःसङ्गोदुर्विषयसङ्गरहितः । सङ्गात्सञ्जायते काम इत्यनिष्टोक्तेः । निष्परिग्रहोऽसत्यनिग्रहरहितः । असतां च प्रतिग्रहं पुनंत्विति

श्रुतेः। एको जनताप्रवेशरहितः । तस्मान्न जनतामियादिति वचनात् । विविक्तशरणो विविक्तदेशीभिक्षुः। परमहंसो भैक्ष्यमिताशनः । भैक्ष्ये भिक्षालब्धेऽपि मिताशनः । विविक्तदेशी लध्वाशीत्युक्तेः ॥ ३० ॥

शुचौ देशे समे राजन्नास्थाप्यासनमात्मनः ।
स्थिरं सुखं समं तस्मिन्नासीतर्ज्वङ्ग ओमिति ॥ ३१ ॥

सत्यधर्मीया — स्थिरं समं मुखं च यथा तथा। ऋज्वङ्गो ऋजून्यवक्राण्यङ्गान्यवयवानि यस्य स तस्मिंश्चैलाजिनाद्यासने ओमिति प्रैषमुच्चार्यासीत ॥ ३१ ॥

मन्दनन्दिनी — एवं यमनियमादिकमुक्त्वाऽऽसनमुच्यते। ऋज्वङ्गः समं कायशिरोग्रीवः । ॐ इति। अनेन भुवं संमृज्येत्यर्थः। आसनप्रकारश्चासीनः सम्भवादिति सूत्रे समं कायशिरोग्रीवमित्यादिना भाष्ये विवृतः ॥ ३१ ॥

प्राणापानौ सन्निरुन्ध्यात् पूरकुम्भकरेचकैः ।
यावन्मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥

सत्यधर्मीया — पूरककुम्भकरेचकैः श्वासग्रहणोत्सर्जनस्तम्भनरूपैर्यावन्मनः कामांस्त्यजेन्न तेषु विवशेत तावत्स्वनासाग्रस्य निरीक्षणमवलोकनं यस्य सः । प्राणापानौ सन्निरुध्यात्तन्निरोधं कुर्यात् ॥ ३२ ॥

मन्दनन्दिनी — पूरकेति । रेचकपूरककुम्भकानां क्रमेणानुष्ठानं ज्ञेयम् । अनेन प्राणायाम उक्तः ॥ ३२ ॥

यतो यतो निःसरति मनः कामहतं भ्रमत् ।
ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥ ३३ ॥

सत्यधर्मीया — कामहतमिच्छाप्रतिहतं भ्रमद्यतो यतो निस्सरति ततस्तत उपाहृत्य हृदि मूलमनसि शनै रुन्ध्यात्। एतदसम्भावनामाभासयितुं प्रवृत्तं बुध इति ॥ ३३ ॥

मन्दनन्दिनी — ततस्ततस्तस्मादुपाहृत्य प्रत्याहृत्य। अनेन प्रत्याहार उक्तः। संनिरुध्याद्भगवति मनः क्रमेण धारणध्यानसमाधियुक्तं कुर्यात् ॥ ३३ ॥

एवमभ्यसतश्चित्तं कालेनाल्पीयसा मुनेः ।
अविषण्णं च निर्वाणं यात्यनिन्धनवह्निवत् ॥ ३४ ॥

सत्यधर्मीया — मुनेर्यतेरिति द्वावप्यद्वन्द्वार्थौ । एवमभ्यसतः अभ्यस्यतश्चित्तमल्पीयसा कालेन लवलवेनाविषण्णस्य विषादमनासादयतो निर्वाणं प्राङ्निवृत्तिमनन्तरं मुक्तिं याति । प्राकृतं निर्वाणं नाशं याति प्राकृतकार्यरहितं हरिं यातीत्यर्थः । निदर्शनं दर्शयति । अनिन्धनो नष्टकाष्ठो वन्हिर्यथा निर्वाणं नाशं याति तथेति । अविषण्णस्य निर्वाणमिति पदानि । विषण्णस्य विषादवतः । निर्वाणमिति लुप्तोपमम् । कुञ्जरशौचवत् । अ नेत्यर्थो वा । सर्वं कुञ्जरशौचवदित्युक्तोद्धारः कृतो ज्ञेयः । निर्वाणमस्तगमने निवृत्तौ गजमज्जने । अपवर्गे चेति विश्वः ॥ ३४ ॥

मन्दनन्दिनी — एवमनुष्ठाने चित्तविजयाख्यं फलं सिध्यतीत्याह श्लोकद्वयेन ॥ ३४ ॥

कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ।
चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥

सत्यधर्मीया — यत् मनः कामादिभिरनाविद्धं प्रतिहतिरहितं प्रशान्ता अखिला वृत्तयः प्राकृतचित्तभेदा यस्य तत् । तत् चित्तं ब्रह्मसुखस्पृष्टं सुखात्मकं सुखं च तद्ब्रह्म च ब्रह्मसुखं तत्स्पृष्टं येन तत् । सुखपूर्णब्रह्मरतं नैवोत्तिष्ठेत ततोऽन्यत्र कर्हिचिदपि नोत्तिष्ठेन्न गच्छेत् ॥ ३५ ॥

मन्दनन्दिनी — प्रशान्तोऽखिलवृत्तिविषयसंचलनव्यापारवर्जितं यच्चित्तं तद्ब्रह्म सुखस्पृष्टं ब्रह्मसाक्षात्काराभिव्यक्तसुखयुक्तं ब्रह्मणः सकाशात्कर्हिचित्कदाचिदन्यत्र नो तिष्ठेन्न गच्छेदिति योजना ॥ ३५ ॥

यः प्रव्रज्य गृहात् पूर्वं त्रिवर्गावपनात् पुनः ।
यदा सेवेत तान् भिक्षुः स पापो निरपत्रपः ॥ ३६ ॥

सत्यधर्मीया — सन्यस्तस्य पुनः संसाराशाचेत्सोऽपत्रपः पापी चेत्याह ॥ य इति । गृहात् । तल्लक्षणमाचष्टे ॥ त्रिवर्गेति । त्रिवर्गस्य धर्मार्थकामात्मनां बीजानामावपनं यस्मिंस्तस्मात् । पुनस्तान्धर्मादीन्यो यदा सेवेत तर्हि स भिक्षुः पापस्तद्वान् । निरपत्रपो निर्लज्जः । स वै वान्ताश्यपत्रप इति केचित् पेठुः । वान्तं स्वच्छर्दितमेव स्वयमश्नातीति स तथा समार्थमितरत् । ननु सन्यस्य पुनरन्विच्छेद्गृहं यः कोऽपि मन्दधीः । कृच्छ्रत्रयं स कृत्वा तु गृही स्यान्न दोषभागिति धर्मशास्त्रे यतिनोऽपि गृहीताभ्यनुज्ञानात्कथमतिकथनमिति चेन्न । किं तत्रापि महाजनसभाजनीयतोक्तेति तस्य मनुषे किं न तनुषे मन्दधीरित्यत्र धियम् ॥ ३६ ॥

मन्दनन्दिनी — परिव्राजकं पुनस्त्रिवर्गसाधने प्रवृत्तं निन्दति ॥ य इति । तांस्त्रिवर्गावपनान् गृहान् ॥ ३६ ॥

यैः स्वदेहः स्मृतोऽनात्मा मर्त्यो विट्कृमिभस्मवत् ।
तमेव स्वात्मसात् कृत्वा श्लाघयन्ति ह्यसत्तमाः ॥ ३७ ॥

सत्यधर्मीया — इदं नाघटिष्टेति नेत्याचष्टे ॥ यैरिति । यैर्यतिभिः स्वदेहोऽनात्मा शिलादितुलो मर्त्यो मरणशिरस्को विट्कृमिभस्मैव तद्वत्स्मृतः । तमेव स्वात्मसात् स्वाधीनं कृत्वा मत्वैतं देहं श्लाघयन्ति तेऽसत्तमा असुराः । हिशब्दस्तसदत्तमतां द्योतयति ॥ ३७ ॥

मन्दनन्दिनी — देहात्मविवेकेन भाव्यमित्यभिप्रेत्य देहं श्लाघयतो निन्दति ॥ यस्येति । षष्ठी प्रथमार्थे । यो देहो वस्तुतो नात्मा कृमिविड्भस्मवद्भवति । स्वार्थे वतिः । कृम्यादिरूपः स्मृतः । तमेव देहं स्वात्मसात्कृत्य । वत्यर्थे सातिः । स्वात्मानमिव कृत्वा ये श्लाघयन्ति तेऽसत्तमा असुरा इत्यर्थः ॥ ३७ ॥

गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि ।
तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलौल्यता ॥ ३८ ॥

सत्यधर्मीया — यतेरेव स्वाश्रमत्यागो दोषावह इति न किन्तु गृहस्थादीनामपीति तैः सह स्वस्याश्रमत्यागोऽपि तथेति यतिमपि गृहीत्वा पुनः कथयति ॥ गृहस्थस्येति । क्रियात्यागः स्वविहितकर्माकरणम् । बटोर्व्रतत्यागो गुरुकुलवासस्वाध्यायादित्यागस्तपस्विनो वनगस्य पुनर्ग्रामसेवा भिक्षोर्यतेरिन्द्रियलौल्यता । स्वार्थे ष्यञ् । विषयभोगचञ्चलता ॥ ३८ ॥

मन्दनन्दिनी — चतुराश्रमिणो नियमत्यागे उपेक्षेत नाद्रियेतेत्याह ॥ गृहस्थस्येति श्लोकद्वयेन । क्रियात्याग औपासनाग्निहोत्रत्यागः । व्रतत्यागोऽग्निकार्यवेदाध्ययनादित्यागः । तपस्विनो वानप्रस्थस्येन्द्रियाणां लौल्यं विषयलोलुपत्वं तस्य भावः ॥ ३८ ॥

आश्रमापसदा ह्येते खल्वाश्रमविडम्बिनः ।
देवमायाविमूढांस्तानुपेक्षेतानुकम्पया ॥ ३९ ॥

सत्यधर्मीया — एते प्रागुदीरितगुणका गृहस्थादय आश्रमापसदाः । निहीनोऽपसदो जाल्म इत्यमरः । आश्रमाधमास्तद्दूषका इत्यर्थः । खलु । तत्तदाश्रमप्राप्यं खं सुखं लुनन्ति छिन्दन्तीति खलवस्ते च त आश्रमविडम्बनाः । खलु यद्विडम्बनं यथा भवति तथा वाऽऽश्रमविडम्बनाः । आश्रमं

श्रान्तिं सोढ्वाऽपि वृथा प्रथायै विडम्बयन्त्यनुकुर्वन्तीति ते तथा । श्रम एव हि केवलमित्यादि-प्रसिद्धोऽयमर्थ इति हिराह । अनेनाश्रमापसदखल्वाश्रमविडम्बनपदयोरार्थिकपुनर्वचनभीस्त्याजितेति ज्ञेयम् । न तान्गृहमानयेन्मानयेच्चेत्याह ॥ देवमायेति । देवस्य वासुदेवस्य मायया बन्धकशक्त्या विमूढांस्तानाश्रमापसदान् । पूर्वस्मात्खल्विति पदमाकृष्य तस्य चानुकम्पपदेनान्वयः । समस्त-स्याप्याकर्षः शब्दानुशासनपदान्तर्गतशब्दशब्दस्य महाभाष्ये दृष्ट इति नापूर्वता । अनुकम्पया कृपया खलु विना उपेक्षेतोपेक्षां तनुयात् ॥ ३९ ॥

मन्दनन्दिनी — एते आश्रमापसदा आश्रमाभासा आश्रमान्विडम्बयंत्यनुकुर्वन्तीत्याश्रम-विडम्बनाः । वेषधारिण इति यावत् । भगवदिच्छया विमूढांस्तांश्चतुराश्रमापसदान्कृपया वृथा नश्यन्तीति शोकेनावैक्षत् ॥ ३९ ॥

आत्मानं चेद् विजानीयादेवं ज्ञानधृताशयः ।
किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति लम्पटः ॥ ४० ॥

सत्यधर्मीया — उपेक्षेतेति कर्तृत्वेनापेक्षतास्य (कर्तरि षष्ठी) कटाक्षितेन प्रेक्षावतेत्थं शरीरविषये प्रवर्त्यत इत्याह ॥ आत्मानं चेदिति । आत्मानं स्वं परमात्मानं च । एवं हेयत्वेनात्युपादेयत्वेन च जानीयाच्चेत्तर्हि तेन ज्ञानेन धृतः स्थिरोऽचञ्चल इति यावत् । आशयोऽन्तःकरणं यस्य स किमिच्छन् हरीतरमर्थमिच्छन् कस्य वाऽऽपत्यादेर्निमित्तं लम्पटो देहं पुष्णाति पोषयति । लम्पटोऽभिनिवेशी स्यादिति वैजयन्ती । न पोषयतीत्यर्थः ॥ ४० ॥

मन्दनन्दिनी — तमेव स्वात्मसात्कृत्वेति देहपोषकाणामसत्तमत्वमुक्तम् । देहातिरिक्तात्मज्ञानस्य परमात्मज्ञानस्य च सुतरामभावात् । ज्ञानसत्वे तु कथं तं पुष्णीयादित्याह ॥ आत्मानमिति । आत्मानं देहातिरिक्तं जीवम् । परमात्मानं चैवमुक्तध्यानाद्युपायेन गम्यं विजानीयाच्चेत् ज्ञानधृताशयः सम्यग्ज्ञानेन निगृहीतान्तःकरणः किं प्रयोजनमन्विच्छन्नुदिशन् कस्य वा हेतोः केन वा निमित्तेन निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति षष्ठी । विषयलम्पटो देहं पुष्णाति पुष्णीयात्विति योजना । अविवेकिवद्विवेकी देहं न पुष्णातीति भावः ॥ ४० ॥

आहुः शरीरं रथमिन्द्रियाणि हयानभीषुं मन इन्द्रियेशम् ।
वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बन्धुरमीशधाम ॥ ४१ ॥

सत्यधर्मीया — देह एवं चेन्न हेय इत्यावेदयितुमात्मानं रथिनं विद्धि शरीरं रथमेव च । इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव चेत्याद्युक्तरथरूपकतया शरीरं निरूपयति ॥ आहुरिति । आहुरिति बहुवचनेन

बहुसम्मतिमाह । मनोऽभीषुं प्रग्रहम् । मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्यादेः । न साधारणं तदित्याह ॥ इन्द्रियेशमितरेन्द्रियेशनशीलमिति । अभीषुः प्रग्रहे रश्माविति षान्तामरः । अत एवाभीशुरिति लेखकप्रमाद इति । शषयोः शसयोश्चैव लडयो रलयोरपि । वबयोर्नैव भेदः स्यादित्यादेस्तदभेदाश्रयणेन वा समाधिरवधेयः । ईषगतिहिंसादर्शनेष्विति स्मरणादिषत इतीषुः । इषेत्युः आदेरित् अभिगत इषुरभीषुः प्रादिसमासः । मात्राः शब्दाद्या धिषणां सूतं बुद्धिं सारथिम् । सत्त्वमन्तःकरणं बृहत् महत् बन्धुरमुन्नतानतं त्रिवेणुम् । बधबन्धने । मद्गुरादयश्चेति साधुः । बन्धुरं तून्नतानतमित्यमरः । त्रिवेणुः कूबरश्चैव बन्धुरमिति धरणिः । बन्धुरो ये सनीला इति ऋग्भाष्यटिप्पण्याम् । मन्दिवाशीत्युरच् । बाहुलकादस्मादपीत्युक्तत्वेन मन्दिरवाशिमथिचतिचक्यङ्किभ्य उरजिति मन्थादिभ्यो विहित उरचि उणादयो बहुलमिति बहुलग्रहणाद्बधबन्धन इत्यस्मादपि कृत उरचि बन्धुरशब्दो निष्पन्न इत्युक्तेः । कौमुद्यां च मद्गुरादयश्चोरजन्ता निपात्यन्ते । बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोरिति रन्तिदेव इत्युक्तेश्च धातुवृत्तौ बन्धुरो बधिरे हंसे त्रिषु स्याद्रम्यनम्रयोरिति पुल्लिङ्गतयाऽपि वैजयन्त्युक्तेस्तत्पक्षे बृहंश्चासौ बन्धुरश्च तमित्यैकपद्यं ज्ञेयम् । ईशधाम हरिमन्दिररूपम् । ईशसृष्टिमिति च स्फुटार्थः पाठः ॥ ४१ ॥

मन्दनन्दिनी — तर्हि शरीरेन्द्रियादीनामुपयोगो नास्ति किमित्यतः सदसतां मोक्षतमःसम्पादन-प्रकारं रथसाम्येनाह कतिपयैः श्लोकैः ॥ आहुरित्यादिभिः । रथिकसामग्रीं दर्शयति । इन्द्रियश्रेष्ठम् । मनः अभीषुं प्रग्रहम् । मात्रा विषया वर्त्मानि । धिषणां बुद्धिम् । सूतं सारथिम् । आहुरित्यन्वयः । ईशस्य धाम । सत्त्वमन्तःकरणविशेषं गुणविशेषं वा । बृहद्बन्धुरं मन्नीडम् ॥ ४१ ॥

अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम् ।
धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥ ४२ ॥

सत्यधर्मीया — रथपरिकरैः सह रथिकसाहितीं चाह ॥ अक्षमिति । अक्षं दशप्राणम् । दशानां प्रधानप्राणापानव्यानोदानसमानानां दासानां नागकूर्मकृकलदेवदत्तधनञ्जयानां चेति दशानां प्राणानां समाहारो दशप्राणमधर्मधर्मौ पापपुण्ये चक्रे । अधर्मपुर उदीरणं च तद्भूयिष्ठजनभूयिष्ठतावेदनाय । अभिमानमहन्तावन्तं जीवं रथिनं रथाध्यक्षम् । चक्र इत्याख्यातं च । यत्परं ब्रह्म चक्रे पठन्तीति तदन्वयः । तस्य रथाधिपस्य प्रणवमोङ्कारं धनुः पठन्ति । तमेव जीवं शरं पठन्ति । तुना तस्यैकस्यैव प्रवर्त्यवैशेष्याद्वैशेष्यं द्योतयन्ति । परंब्रह्मैव लक्ष्यं प्राप्यस्थानम् । प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमित्यादिश्रुतेः। शरवत्तन्मयो भवेदित्युक्तेस्तल्लग्नचेता भवेदित्यर्थः ॥ ४२ ॥

मन्दनन्दिनी — स्थानीयमधर्मधर्मौ चक्रे । मणीवादित्वात्प्रगृह्यत्वम् । अभिमन्यत इत्यभिमानम् । जीवं रथिनम् । तस्य जीवस्य प्रणवं धनुः । जीवमेव शरम् । लक्ष्यं प्राप्ते निर्मितात् । परं परब्रह्मैव पठन्तीति योजना ॥ ४२ ॥

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ।
मानोऽभिमानोऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥

सत्यधर्मीया — एतज्ज्ञेयानाह ॥ राग इति । रागो रक्तिः । द्वेषः शोकश्च फलालाभादौ । मोहो वैचित्यम् । भयं स्वाधिकारात् । मदः स्वाधमविषयेऽहङ्कृतिः । मानोऽसत्कार्यसत्कारोऽभिमानोऽर्थादिकृतावलेपविशेषः । अपूज्ये पूज्यबुद्धिस्तु मानः सद्भिरुदाहृतः । अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोरित्यभिधानम् । अवमान इत्यपि पठन्ति । असूया ईर्ष्या माया कापट्यं हिंसा चौर्यवधादिः । हिंसा चौर्यादिवधयोरिति विश्वः । मत्सरो न मद्वशोऽसाविति चित्ततोदं मात्सर्यमार्याः समुदाहरन्ति ॥ ॥ ४३ ॥

मन्दनन्दिनी — रथिनः शत्रूनाह ॥ राग इत्यादिना । मानोऽपूज्ये पूज्य बुद्धिस्तु मानः सद्भिरुदाहृत इत्यभिधानम् । अभिमानोऽहङ्कारः ॥ ४३ ॥

रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ।
रजस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ॥ ४४ ॥

सत्यधर्मीया — रजोऽभिनिवेशः । प्रमादोऽनवधानं मानसस्य । आदिपदेन दम्भादयः । मध्येऽध्वैतध्वंसनं विधाय शरः परं लक्ष्यं गच्छतीति तात्पर्यं ज्ञेयम् । रजस्तमःप्रकृतय उभयसमाहृतस्वभावास्तेऽपि शत्रवः । असम्प्रज्ञातसमाधेश्च सत्त्वप्रकृतयः परोपकृत्यादिव्यापारा अपि शत्रवो लब्ध्वावान्तरलक्ष्यत्वादित्यर्थः । ते च दुर्मिला इति द्योतयितुं क्वचिदिति । तेषां चिद्बाह्यार्थविषयिणी चित् क्वेति वा ॥ ४४ ॥

मन्दनन्दिनी — रजोरक्तिर्विद्यमानेषु । रागस्त्वविद्यमानेच्छा । आदिपदेन दम्भादयः । रागादीनां मध्ये क्वचित्केचित् रजस्तमप्रकृतयः केचिच्च सत्त्वप्रकृतयः सत्त्वरजस्तम इत्यारभ्य निबध्नन्तीति सत्त्वस्यापि बन्धकत्वोक्तेः । सूक्ष्मसत्त्वस्यैव मोक्षोपयोगित्वात् ॥ ४४ ॥

यावन्नृकायरथमात्मवशोपकल्पं
धत्ते गरिष्ठचरणार्चनया निशातम् ।
ज्ञानासिमच्युतबलं दधदस्तशत्रुः
स्वाराज्यतुष्ट उपशान्त इदं विजह्यात् ॥ ४५ ॥

सत्यधर्मीया — एवं वर्णनोपयोगं वर्णयति ॥ यावदिति । नृकायरथम् । रथगताविति स्मरणात्कायरथस्य रथ्यते ज्ञायतेऽनेनेति ज्ञानसाधनसाधनताऽपि सूचिता तस्यैतेनेति ज्ञेयम् । आत्मवशोपकल्प्यम् । कल्प्यत इत्युपकल्पः, आत्मवश इति उपकल्प आत्मवशोपकल्पस्तम् । आत्मवशः स्वाधीन उपकल्पः परिकरो यस्मिन्स इति तं वा । यावत् धत्ते धरति । तावत् । अतिशयेन गुरवो गरिष्ठास्तेषां चरणाः पादास्तेषामर्चना पूजनं तया निशातमुत्तेजितं ज्ञानासिं तदात्मकं खड्गमच्युतबलोऽच्युतो बलं यस्येति स तथा । अच्युतं यथा भवति तथा वलते हस्त इति मनसीति च यस्तं ज्ञानासिमिति वा । अच्युतमप्रच्युतं बलं यस्य स वा दधत् । अस्ताः शत्रवो रागाद्या येन स तथा स्वे महिम्न्यराजत इति स्वराट् स एव स्वाराज्यं स्वार्थे ष्यञ् । तेन तुष्टः । स्वाराडिति प्रतीकं धृत्वा स्वः स्वर्गे राजत इति सत्सू द्विषेति क्विपि रोरीति ढ्रलोपदीर्घो जात इति विधाय व्याख्यां स्वेषु स्वेन वाऽऽराजत इति व्यातनोद्भानुः । उपशस्य स्वरूपसुखभिन्नस्य हीनसुखस्यान्तो नाशोऽव्यवहितः सन्निहितो यस्य स तथा । इदं एवम् । इं कामितं ददातीति तं नृकायरथं विजह्यात् । इदमिति प्रागिष्टदानात्तथेन्दव इत्यृग्भाष्याद्युदाहृत्य वितत्योक्तमनुसन्धेयम् । ममतात्याग एव तत्त्याग इत्याशयः । निशामज्ञानमातयतीति निशात् तम् । दिवा ज्ञानं समुदिष्टं निशाऽज्ञानमुदीर्यत इति बृहद्भाष्योक्तेः । क्विबन्तो वाऽऽकारान्तो वा ॥ ४५ ॥

मन्दनन्दिनी — उक्तरीत्या नृदेहादेर्महोपयोगसत्त्वाद्यदा नृदेहोऽस्ति यदा द्विजत्वं यथा च पञ्चीकरणं तदेवं नैजं पदमीक्षितव्यमित्युक्तेर्नृदेहकाल एव मोक्षसाधनं सम्पाद्य संसारं जह्यादित्याह ॥ यावदिति । आत्मवशेन स्वेच्छयोपक्लृप्तं साधनसमर्थं नृकायाख्यं रथं धत्ते तावत्तदैव गरिष्ठचरणानामुत्तमगुरूणामर्चनयोपासत्तिपूर्वकश्रवणादिलब्धयोपासनया निशातं तीक्ष्णीकृतं ज्ञानासिना दधदच्युतबलो भगवद्बलोऽप्रच्युतमननलक्षणबलो निरस्तरागादिश्च स्वाराज्येन निश्चितन मोक्षेण तुष्ट इदं संसारजातं जह्यादिति योजना ॥ ४५ ॥

नो चेत् प्रमत्तमसदिन्द्रियवाजिसूता
नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति ।
ते दस्यवः सहयसूतममुं तमोऽन्धे
संसारकूप उरुमृत्युभये क्षिपन्ति ॥ ४६ ॥

सत्यधर्मीया — विपर्यये गतिविपर्यय एवेत्याह ॥ नो चेदिति । असदिन्द्रियवाजिसूता असन्त इन्द्रियवाजिनो हया उत्पथमुन्मार्गं प्रति नीत्वा । उत्पथरथने निमित्तं प्रमत्तमिति । रथिनं विषयदस्युषु शब्दादिचोरेषु निक्षिपन्ति । ते दस्यवश्च सहयसूतमिन्द्रियबुद्धिसहितम् । वोपसर्जनस्येति सहशब्दस्य सभावः । उरुमृत्युभये उरु नानाविधं मृत्युभयं यस्मिन्संसारकूपे तदाह्वयप्रहौ क्षिपन्ति । तस्य मर्यादा नानार्येण पर्यवलोकीत्याह ॥ तमोऽन्ध इति । तमसाऽज्ञानेनान्धयतीत्यन्धे । प्राक् संसाररूपे तदनन्तरमन्धे तमसि क्षिपन्तीति वा । दस्यवो दस्यन्ति क्षिपन्तीति ते तथा । दस्युतस्करमोषका इत्यमरः । दसु उपक्षय इत्यस्मात् यजिमनिशुंधिदसिभ्यो युरिति युप्रत्यये बहुलवचनाद्योरनादेशाभावे दस्युरिति भवति । ते इव । यथा पान्थान्पोथयित्वा गृहीत्वाऽर्थं गर्ते निक्षिपन्ति तथेति सूचयितुं त इत्यनेन पूर्तावपि ते दस्यव इत्याहेति तात्पर्यम् । त इत्यस्येवार्थकत्वं तद्वै धनुस्त इषव इति भागवततात्पर्यपर्युदीरणेन प्राक्व्याख्यातं ततो मनस्यानेयम् ॥ ४६ ॥

मन्दनन्दिनी — शरीरं रथमिन्द्रियाणीत्युक्तदिशा यावन्नृकायमित्युक्तरीत्या वा । धनुर्ग्रहणेन वा । शत्रुछेदाभावेऽसदिन्द्रियादयस्तमसि संसारकूपे वा पातयन्तीत्याह ॥ नोचेदिति । प्रमत्तं प्रमादशालिनं रथिनमसदिन्द्रियवाजिसूता उत्पथं नीत्वा विषयदस्युषु निक्षिपन्ति । तमोयोग्यं तमोंऽधे नित्यसंसारिणं संसारकूपे ॥ ४६ ॥

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।
आवर्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम् ॥ ४७ ॥

सत्यधर्मीया — ननु वेदविहितसवाद्यनुसवनसेवनेन कथमयमुक्तानर्थयुक्तः स्यात्तथाविधनिवृत्त-प्रवृत्तौ च संसृत्यपसृतिश्च कथमित्यतः प्रवृत्तवन्निवृत्तमपि वैदिकमिति सर्वं सुघटमित्याह ॥ प्रवृत्तं चेति । प्रवृत्तं च निवृत्तं चेति द्विविधं कर्म । इतीत्यनध्याहारे प्रवृत्तं द्विविधं निवृत्तं द्विविधमिति च चतस्रो विधाः प्रसज्येरन् । यथोक्तमेतत्सजातीयस्थले तत्त्वसङ्ख्याव्याख्याने । स्वतन्त्रमस्वतन्त्रं चेतीतिशब्दाध्याहारेण योज्यम् । अन्यथा स्वतन्त्रमस्वतन्त्रं च तत्त्वं प्रत्येकं द्विविधमिति प्रतीतिः स्यादिति । द्वे विधे प्रकारौ यस्य तत् । वैदिकं ज्योतिष्टोमेन स्वर्गकामो यजेत । एकान्तानां न

कस्यचित्। अर्थे नारायणो देवः सर्वमन्यत्तदर्थकम् । नारायणोऽसौ परमो विचिन्त्य इत्यादिवेदविहितमिति वैदिकम्। तद्द्वन्द्वफले लपति ॥ आवर्तत इति। प्रवृत्तेन कर्मणाऽनुष्ठितेनावर्तते पुनः संसरति। निवृत्तेनामृतं हरिम्। अमृ अशब्दवाच्यं ऋतं शाश्वतस्थितिमन्तं ज्ञानात्मकमिति वा। ऋ गताविति धातोस्तु पूर्वावगतवत्सदा। स्थितेर्ब्रह्मर्तमित्युक्तेः। अश्नुते प्राप्नोति ॥ ४७ ॥

मन्दनन्दिनी — संसारमुक्तिकारणकर्माणि विवेचयति ॥ प्रवृत्तमिति । तयोः फलमाह ॥ आवर्तत इति ॥ ४७ ॥

हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् ।
दर्शश्च पूर्णमासश्च चातुर्मास्यः पशुः पुनः ॥ ४८ ॥

सत्यधर्मीया — यत्पुनरावृत्तिहेतुत्वेनोक्तं तत्प्रवृत्तं किंरूपमित्यतो निरूपयति ॥ हिंस्रमिति । द्रव्यमयम्। श्येनादिहिंस्रम्। काम्यं फलोद्देशेन प्रवृत्तम्। सर्वत्र काम्यमिति योग्यविभक्त्यन्तं सदन्वेति। अग्निहोत्रादि। अशान्तिदं न निर्वाणदम्। दर्शोऽमाकर्म। पूर्णमासस्तत्तिथिक्रिया। चातुर्मास्यः पशुश्च यागविशेषौ सुतो ज्योतिष्टोमः ॥ ४८ ॥

मन्दनन्दिनी — इष्टापूर्तिभेदेन प्रवृत्तं द्विविधमित्याह ॥ हिंस्रमिति । द्रव्यमयमजाश्वादिद्रव्य-साध्यम्। हिंस्रं हिंसेति कर्तव्यताकमग्निहोत्रादि दर्शः पूर्णमासश्चातुर्मास्यः पशुर्निरूढपशुः ॥ ४८ ॥

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ।
पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥ ४९ ॥

सत्यधर्मीया — हुतं वैश्वदेवं प्रहुतं बलिहरणमेतदिष्टमित्युच्यते । एतदेवाकाम्यं काम्यं चानभिनिवेशाभिनिवेशाभ्यां भवतीति ज्ञेयम् । पूर्तं च । सुरालयो देवसदननिर्माणम् । आराम उपवनम्। कूपः प्रहिः। आजीव्या मध्येध्वमहीरुहा वा प्रपा वा। एतल्लक्षणं पूर्तमित्युच्यते ॥ ४९ ॥

मन्दनन्दिनी — हुतं वैश्वदेवं प्रहुतं बलिहरणम् । एतदिष्टम् । इदमेव काम्यं चेदिष्टाख्यं प्रवृत्तमुच्यते। तच्चाशान्तिदं मोक्षसाधनं न भवति। आजीव्यं लोकोपकारककुट्टिमादि ॥ ४९ ॥

द्रव्यमूष्मविपाकश्च धूमो रात्रिरपक्षयः ।
अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥

सत्यधर्मीया — केन पथा कथं च यात्यायाति च पुनः संसारमित्यत ईरयति ॥ द्रव्येति। द्रव्यस्य चर्वादेः सूक्ष्मो विपाकः कायारम्भकता द्रव्यम् । इतरदुपयोगिष्मविपाकः तेजोमात्रया

हृदयाग्रप्रद्योतनम् । तथा च श्रुतिः । स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्वक्रामति । तस्य हैतस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामतीत्यादिका । धूमस्तदभिमानी देवः । एवं रात्रिः । अपक्षयः कृष्णपक्षः । सोमश्चन्द्रः । अयनं दक्षिणम् । दर्शो देवताऽत्र । पूर्वत्र तत्तिथिकर्मग्रह इति विवेकः । आगमनेप्रकारमाह ॥ ओषधीति । अन्नं रेत इति पितृयानम् । वृष्ट्यादिद्वारा भूमिमाप्त ओषध्यादिर्भवति । अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः । धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते इत्येतदादि गीताभाष्येऽग्न्यादेरपि वक्ष्यमाणत्वात् । ज्योतिरर्चिः । तेऽर्चिषमभिसम्भवन्तीति हि श्रुतिः । तथा च नारदीय इत्यारभ्य तच्चाह स्कान्दे । सृतीर्ज्ञात्वा तु सोपायेऽनुष्ठाय च साधनम् । न कश्चिन्मोहमाप्नोति न चान्या तत्र वै गतिरित्यन्तेन ग्रन्थेन । तथा कुत इत्यत आह । अग्न्यादेरितीत्यारभ्यान्यभगवत्प्राप्तेरित्यन्तप्रमेयदीपिकया चात्रानुक्ता ग्राह्या इति ज्ञेयम् । यद्यपि मूले धूमसोम इत्याद्युक्तिसंवादार्थं धूमो रात्रिरित्यादितद्गतिप्रतिपादकांश एव गीताभाष्ये टीकोदितो व्याहर्तव्यः । शुक्लेत्याद्यनावृत्तिगतिप्रतिपादकांशोदाहरणमुत्तरोपयोगितया तत्र साङ्कलित्योक्तेः कृतमिति ज्ञेयम् ॥५०॥

मन्दनन्दिनी — उष्मविपाको द्रव्यम् । ऊष्मणा विपच्यमानं ब्राह्मणेभ्यो दीयमानमन्नादि च । पूर्तमेतदपि काम्यं चेत्प्रवृत्तम् । एवमिष्टापूर्ताख्यं प्रवृत्तं संसारावृत्तिदम् । प्रवृत्तकर्मानुष्ठातो मार्गमाह ॥ धूम इति । अपक्षयः कृष्णपक्षो धूमरात्रिकृष्णपक्षदर्शदक्षिणायनाभिमानिनां सोमस्य लोकाः पितृयानम् । अत्राभ्रमेघादिकमपि ग्राह्यम् । ओषधिवीरुधान्नेरतश्च पुनर्भव ओषधिवीरुत्सु वा प्रविशान्नं रेतो द्वारा जायत इति भावः ॥ ५० ॥

अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः ।
एकैकश्येनानुपूर्व्याद् भूत्वा भूत्वेह जायते ॥ ५१ ॥

सत्यधर्मीया — पुनर्भवः पुनर्भावयत्येनमिति स तथा । एकैकश्येनेत्यखण्डमव्ययम् । एकैकशः । एकैकभावप्राप्त्यानुपूर्व्यात् । भूत्वा भूत्वा धूमाद्यात्मना । इह भूमौ जायते । अथ य इमे इष्टापूर्ते दत्तमित्युपासते धूममभिसम्भवन्तीत्युपक्रम्य यो योऽन्नमत्ति यो रेतः सिञ्चति तद्रूप एव भवतीत्यादिना प्रपञ्चितानुपूर्व्यनुसन्धेया । विस्तरस्तु तद्य इत्थं विदुर्ये चेमे इत्यारभ्य छान्दोग्यपञ्चमप्रपाठके तथा तद्भाष्य उक्तोऽनुसन्धेयः ।

निषेकादिस्मशानान्ताः रेतःसेकमारभ्य स्मशानस्थानस्थितिपर्यन्तैः संस्कारैः संस्कृतः सम्पन्न इत्येवार्थः । द्विजः । जायत इति पूर्वेणान्वयः ॥ ५१ ॥

मन्दनन्दिनी — एकैकस्य धूमादेः स्थानमानुपूर्व्याद्भूत्वा पुनः पुनः प्राप्येह मनुष्यलोके जायते। आनुपूर्व्यं च न गतिक्रमानुसारेण गताविति मन्तव्यम्। यथेतमनेवं चेति सूत्राद्धमादभ्रमभ्रादाकाशमिति गतिश्रुतेः। धूमो भूत्वाऽभ्रं भवतीत्यागतिश्रुतेश्च ॥ ५१ ॥

निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः।
इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥

इन्द्रियाणि मनस्येवं वाचि वैकारिकं मनः।
तां तु वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ॥ ५३ ॥

ओङ्कारं बिन्दुनादे तु तं तु प्राणे महत्यमुम्।

तात्पर्यम् — 'यज्ञाभिमानिनो देवान्स्मरन्तीन्द्रियमानिनाम्। वशगांस्तान्मनोमानिसुरेन्द्रस्य वशे स्थितान्। वेदात्मिकायाः पार्वत्यास्तां रुद्रस्य वशे स्थिताम्। वर्णत्रयात्मकं रुद्रं शेषे तु प्रणवात्मके। बिन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत्। मूलस्थानादरूपायां तां वायौ तं जनार्दने। प्रकृतावथवा प्राणं तामेव पुरुषोत्तम' इति ब्रह्मतर्के ॥ ५२ ॥

सत्यधर्मीया — इन्द्रियेषु क्रियायज्ञानित्यादिश्लोकद्विके ज्योतिष्टोमादीनामिन्द्रियेषु होम उच्यते। स दुश्शकः। तथा वागादीनामोङ्कारेषु स्थापनमुच्यते। एतदपि तथेत्यतो होमन्यासपदार्थं मानेनोक्त्वा तच्छङ्कां परिहरन् इन्द्रियादिपदानि न जडपराणीत्याह ॥ यज्ञाभिमानिन इति। इन्द्रियाभिमानिनां तदभिमानवतां वशगांस्तानिन्द्रियाभिमानिनः। मनोमानी यः सुरेन्द्र इन्द्रस्तस्य वशे स्थितान्। वेदात्मिकायाः पार्वत्यास्तमिंद्रं तद्वशे स्थितम्। तामुमां रुद्रवशे स्थिताम्। पृथक् पृथगकारोकारमकाररूपवर्णत्रयात्मकं रुद्रं प्रणवात्मके। एतत्संश्लिष्टोङ्काररूपे शेषे। बिन्दुरूपा या सरस्वती तस्या एव नादात्मकत्वं ज्ञेयम्। मूलरूपेण तिष्ठतीति सा च सा नादरूपा च। तस्यां बिन्द्वन्तर्गतं सरस्वत्यंशं मूलनादान्तर्गततदंशिसरस्वत्यामिति बिन्दुनादयोरेकैवाभिमानिनीति। तस्यां तं शेषम्। अत एव पुनरित्युक्तिः। तां सरस्वतीं वायौ तं वायुं जनार्दने। विशेषमप्याह ॥ प्रकृताविति। प्रकृतौ प्राणं तां प्रकृतिं पुरुषोत्तमे। वायुर्हि ब्रह्मा भारती सरस्वती वायुः स एव सा च सैवेति लयचिन्तनमेवेदम्। उमागिरीशेत्यादिरीत्या प्रतिनामग्रहणं ग्रहणं चेन्द्रियाभिमानिनां मानिकानां तदधीनतामात्रवेदनमन्तर्गतभागवतभगवद्रूपाणामैक्यैकानुसन्धानं ज्ञानेन्द्रियग्रहणाद्रुद्रस्य शेषे लयोक्तेः पार्वतीशर्वावस्थितयोश्च तदसम्भवादिति द्वे दर्शने व्यवस्थाभेदेनानुकूले इति ज्ञेयम्। वायुपक्षे आह ॥ प्रकृताविति। अथवाऽयं पक्षो व्यवस्थितः। विलीनः प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेतीति श्रुतेरिति कुर्वते व्याख्याम् ॥

ततश्च सार्धं सार्धं श्लोकद्विकार्थः ।। प्रवृत्तं च निवृत्तं चेति प्राक् प्रवृत्तं यत्प्राप्यफलं तेन च पुनरावृत्तिं चोक्त्वा निवृत्तं तत्प्राप्यदेवयानापरपर्यायार्चिरादिना तत्प्रथितेरित्याद्युक्तमार्गाभिमति- मद्देवक्रमं वक्तुमुत्कमनस्कः तन्मार्गानर्गलसाधनं बोधयति ।। इन्द्रियेष्विति । क्रियायज्ञान् क्रिया ज्योतिष्टोमादिस्तत्र स्थित्वा इज्यन्त इति ते तदभिमानिनो देवान् इंद्रियेषु जुह्वति तदभिमानिनिघ्नता(?) स्मृतिहवनं तत्कुर्वन्तीत्यर्थः । तत्र तु प्रसिद्धो वीतिहोत्रो होमधामाऽत्रक इत्यतस्तेषामिंद्रियाणामेव तत्कर्मकारितेतीरयति ।। ज्ञानदीपेष्विति । ज्ञानं दीपयंति स्वरूपमुद्दीपयंति यत् वृत्तिरूपमसत् जनयन्तीति तानि तथा तेषु । इंद्रियाणि तदभिमानिनोऽनिमिषान्मनसि तदभिमानिनीन्द्रे । वैकारिकं विविधाकारकल्पकत्वाद्वैकारिकं मन इन्द्रम् । वाचि वेदात्मिकोमायाम् । तां वाचमुमां वर्णसमाम्नाये । त्रयो वर्णा व्यजायन्त । अकारोकारमकार इति श्रुतिशंसितकेवलवर्णत्रये । यथा व्यक्तिपाठः समाम्नायः तस्मिन् रुद्रे । तं रुद्रमोङ्कारेऽविश्लिष्टमोङ्कारे शेषे । तुशब्दस्तु वाग्वर्णसमाम्नायार्थभवानीभव-योर्भार्याभर्तृभावं तथाऽहिभूषणाहिपयोः समतायां मतायामपि तत्त्वेन मुक्तिरिति विशेषं च सूचयति । तमोङ्कारं शेषं बिन्दुनादे । यद्यपि नादो वर्णः पृथगित्यष्टवर्णात्मकतां घटयितुं कर्मनिर्णयटीकायामुक्त-स्तथाऽप्यत्रैकाभिमानिकत्वोपाधिना तात्पर्ये बिन्दुरूपसरस्वत्यां मूलस्थनादरूपतायामिति चोक्तमिति ज्ञेयम् । तन्त्रसारे च विश्वतैजसप्राज्ञतुर्यात्माऽन्तरात्मपरमात्मज्ञानात्मकानां "कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च । परं ज्योतिः परं ब्रह्म वासुदेव इति क्रमात् । अकारादेस्तथा शान्तातिशान्तादेश्च देवता इति प्रणवकल्पे च कृष्णादीनां च मुख्यानभिमानिदेवतात्वोक्तेरत्राभिमानिदेवतोक्तेरिति तु र्विशेषसूचक इति ज्ञेयम् । बिन्दौ सरस्वत्याम् । नादे तद्रूपभारत्यामेकीभूय स्थितिम् । अत एव बिन्दुरूपेत्युक्तिः । तन्नादं तदभिमानिनीं सरस्वतीं भारतीं च स्वरे । सोऽपि स्वरतेः स्वर इति वरुणः स्वर इति तैत्तिरीयोपनिषद्भाष्योक्तेः हरिः स्यान्न स्यादिति वक्तुं प्राण इति । उष्णोऽसौ स्वर इत्याचक्षते । प्राणः स्वर इति छान्दोग्यभाष्ये स्वरतेस्तु स्वरो विष्णुस्तद्रतेर्वायुरुच्यते । वायुं स्वरेश्वरं विष्णुमोमाख्यं समुपासिरे । स्वे विष्णौ रमयत्येनं जीवं तस्मात्स्वरः स्मृत इत्युक्तेः । केशवः स्वः स्वतन्त्रत्वात्तद्रतेर्मारुतः स्वरः । स एनान्ब्रह्म गमयतीति श्रुतेः । मुख्यामृतामृततावत्स्वरसस्वरतास्वरता च हरिसमीरयोर्ज्ञेया । अनेनोत्कृष्य स्वरशब्दस्य प्राणपदसामानाधिकरण्येनान्वयेन पूर्वमोङ्कार इत्यनेनैव प्रकृतपर्यवसितौ स्वर इत्यतिरिच्यत इति शङ्कनं सङ्कोचितमिति ज्ञेयम् । महति परमात्मन्यमुं प्राणमोङ्कारं शेषं बिन्दौ सरस्वत्यां तं नादे भारत्यां तां स्वरे वायावमुं वायुं महति ब्रह्मणि तं महतीत्यावृत्त्याऽक्षरपुरुषे श्रीतत्त्वेऽमुं पुरुषं प्राणे स्वरे वा विष्णौ न्यसेदिति योजयन्ति । तं वायाविति मानिकवायुपदेन न छान्दोग्यभाष्यगवायुपदानुकाररूपेण स्वर इत्यस्यायोजनेन चोत्कृष्य योजनाऽऽचार्यवर्यसम्मतेति सन्तोष्टव्यम् ।। ५२, ५३ ।।

मन्दनन्दिनी — आवर्तते प्रवर्तते इति पुनः पुनरावृत्तिरुक्ता । तस्याः पुनः पुनर्गतिसापेक्षत्वाद्गति-साधनसंस्कारानाह ॥ निषेकेति । निषेको गर्भाधानम् । स्मशानोंऽत्यक्रिया । एवं षोडशसंस्कारैर्युतो द्विजस्त्रिवर्णः प्रवृत्तं कुरुते । तेन पुनर्गच्छति पुनरागच्छतीत्यपर्यवसानं प्रवृत्तकारिण इत्यर्थः । अत एव तद्य इह रमणीयचरणा अभ्यासो ह यते रमणीयां योनिमापद्यन्त इति । पुनः कर्म कुरुते पुनरागच्छतीति च श्रुतिः । निवृत्तेनाश्नुतेऽमृतमित्युक्तम् । तत्रार्चिरादिमार्गस्मृतिसहकारिणीति तन्मार्गं वक्तुं तत्पूर्वभाविलयचिन्तनप्रकारमाह ॥ इन्द्रियेष्विति । क्रिया यज्ञान् क्रियात्मकयज्ञाभिमानिनो देवान् ज्ञानदीपेष्विंद्रियेषु ज्ञानं दीपयन्तीति ज्ञानकरणेन्द्रियाभिमानिषु जुह्वति तद्वशत्वेन स्मरन्ति ॥

एवमिन्द्रियाणि तदभिमानो मनसि तदभिमानिनि सुरेन्द्रे वैकारिकं मनः । वैकारिकत्वोक्त्या तैजसेन्द्रियेभ्यो वैलक्षण्यं सूचितम् । मनस्तदभिमानिनं सुरेन्द्रं वाचि । वेदाभिमानिन्यां पार्वत्याम् । तां वर्णसमाम्नाये अकारोकारमकारलक्षणप्रणवायवाभिमानिनि रुद्रे । ॐकारे स्वरे एकदा सम्भूतोंकाराभिमानि शेषे । अकारोकारमकार इति तानेकधा समभवत्तदेतत्तदोमिति श्रुतेः । न्यसेद्वशगत्वेन चिन्तयेत् । अनेन जुव्हति वशगत्वेन चिन्तयन्ति ज्ञानिनोऽत उत्क्रमिष्यमाणोऽपि न्यसेत् । वशगत्वेन चिन्तयेदिति सर्वत्र पदद्वयमन्वेतीति सूचयति ॥

ॐकारं तदभिमानिनं शेषं बिन्दु । सप्तम्याः सुपां सुलुगिति लुक् । बिन्दौ तदभिमानिना तदभिमानिन्याः सरस्वत्याम् । तां नादे मूलस्थानादभिमानिन्यां सरस्वत्यामेव । अत्र बिन्दुशब्दे विभक्तिलोपो मध्ये तमध्याहारः सरस्वत्या एवोभयमानित्वं तत्रापि नादाभिमानिन्यो जनकत्व-मित्यादिकं वक्ष्यमाणतात्पर्यतो गम्यते । तं च । नादशब्दस्य पुल्लिङ्गत्वात्तमिति निर्देशः । नादाभिमानिनीं सरस्वतीं प्राणे ब्रह्मणि । अमुं ब्रह्माणं महति परमात्मनि । प्राणशब्देन मुख्यवायोर्ग्रहणे तु बिन्दुनादोभयमानिनीरूपयोः । महतीत्यस्यावृत्तिः । आद्यस्य लक्ष्म्यामिति । द्वितीयस्य परब्रह्मणीति अर्थोऽनुसन्धेयः । तदेत्सर्वमभिप्रेत्य तात्पर्यम् ॥ यज्ञाभिमानिन इत्यादि । वायौ ब्रह्मणि मुख्यप्राणस्य ग्रहणपक्षेत्वाह प्रकृताविति । प्रकृतौ लक्ष्म्यां जयाख्यायां तामेव तद्वारेत्यर्थः । पुरुषोत्तमे सङ्कर्षणाख्य इत्यर्थः ॥ ५२, ५३ ॥

अग्निः सूर्यो दिवा वायुः शुक्लो राकोत्तरः स्वराट् ॥ ५४ ॥

तात्पर्यम् — स्वराडिन्द्रः ॥ ५४ ॥

सत्यधर्मीया — अर्चिरादिना गच्छतः प्राप्यान् देवान्प्रतिपादयति । श्लोके स्वराट्शब्दः स्वेनैव राजत इति व्युत्पत्त्या हरिपर इतीन्द्रपरत्वे च स्वराण्णमुचिसूदन इत्यमरामरसुधायां स्वः स्वर्गस्य

राडधिप इति रोरीति दीर्घे स्वाराडिति । स्वेषु देवेष्वाराजत इत्युभयथाऽपि स्वाराडित्युक्तेरत्र तथाऽनुक्तेस्तत्प्रसक्तिरपि नास्तीत्यतस्तदनुवादपूर्वकं व्याकरोति ।। स्वराडिति । स्वराडिन्द्रः । अमरः स्वराडिति सुपाठस्तत्र स्वः स्वर्गे आ अटतीति स्वराट् । क्विबटतेः सम्यक्त्वमाङर्थः । तच्चाधिपत्येनेत्युपपत्तिरिति ज्ञेयम् ।। ततश्चायं मूलार्थः ।। अग्निः सूर्यश्च दिवा दिवसाभिमानी । शुक्लः शुक्लपक्षाभिमानी । राका पूर्णमास्यभिमानी । उत्तरमुत्तरायणाभिमानी । स्वराडिन्द्रः ।। ५४ ।।

मन्दनन्दिनी — अर्चिरादिमार्गमाह ।। अग्निरिति । अग्निर्ज्योतिरिरिति द्वेधाऽर्चिर्ल्लोके सम्प्रतिष्ठितोऽग्निः क्रमेण प्राप्यस्ततो वायुरातिवाहिकस्ततोऽभिजित्ततो दिवा ततः शुक्लस्ततो राका तत उत्तरस्ततः संवत्सरतडिद्वरुण प्रजायाः क्रमेण ग्राह्याः । ततः सूर्यस्ततोऽनन्तरं सोमवैश्वानरौ ततः स्वाराण्णामेन्द्रः । अत्र तात्पर्यम् ।। स्वराडिन्द्र इति ।। ५४ ।।

विश्वोऽथ तैजसः प्राज्ञस्तुर्य आत्मा समन्वयः ।
देवयानमिदं प्राहुर्भूत्वा भूत्वाऽनुपूर्वशः ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ।। ५५ ।।

तात्पर्यम् — 'विश्वाद्या अनिरुद्धाद्यास्ते द्विधा सम्प्रकीर्तिताः । विष्णुरूपास्तदन्ये च तान्सर्वान्याति मोक्षगः । तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः । ते दिवं प्रापयन्त्येनं सा वायुं स हरिं पृथक् । विश्वादिरूपं तुर्यश्च वासुदेवश्च नापर' इति च । अधिको भूत्वा सुखादिभिः ।।५५।।

सत्यधर्मीया — नन्वस्मिन् श्लोके इन्द्रप्राप्यनन्तरं विश्वादिविश्वेशप्राप्तिरुच्यते । सा न साधुः । सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं तथेति ब्रह्मतर्कवाक्ये ध्रुवादिप्राप्तिसमनन्तरं हरिप्राप्तेरुक्तत्वेन तद्विरोधादित्यतो मानेनैव विवक्षितमर्थं दिदर्शयिषुरादौ विरोधं बाधते ।। विश्वाद्या इति । आत्मसमन्वय इत्यस्यार्थोऽनिरुद्धाद्या इति । सम्यगन्वयोऽनिरोधेन सर्वव्यापनम् । अनिरुद्धसमन्वयपदयोरनतिभिन्नार्थत्वात्तदात्मा भगवान्वासुदेवः । सर्वत्र वसतीति वासुः देवो गत्यर्थावगत्यर्थताद्दृष्टेर्ज्ञातेति स चासौ देवश्च । आततत्वादात् । प्रमातृत्वं मनुप्रत्ययार्थः । तथा च समार्थतात्मवासुदेवपदयोरित्यात्मा वासुदेवः । विश्वाद्यास्त्रयोऽनिरुद्धाद्यास्त्रयो द्विधा प्रकारद्वयोपेताः । एतत्सम्भवस्तु प्राचि विकोचितोऽनुसन्धेयः । तद्वैविध्यमेव दर्शयति । विष्णुरूपास्तदन्ये तदितरे चेति । मोक्षगः सन्निहितमुक्तिगामी । अन्ये किं जाता इत्यत आह । दिवस्पुत्रा भारतीसुतास्ते च सर्वे द्युसमीपगाः । पृथगेषां लोकाभावात्सरस्वतीसमीपगत्वं तेषां मार्गपादे पुरान्तराभावस्य निर्णयनात् । तदिदभिमतिमन्त इन्द्रादनन्तरं तठितोभावात् । इन्द्रप्राप्त्यनन्तरं विश्वादिकमनिरुद्धादिकं जीवजातं प्राप्य ततो द्यौर्वायुश्चाप्यौ विद्युत्पतिर्वायुरेव नयेद्ब्रह्म न चापर इत्युक्तेः । ततश्च विश्वादयोऽनिरुद्धाश्चेति भगवान्प्राप्यः । ते

दिवस्पुत्रा दिवं स्वप्रसुवं सरस्वतीं सा द्यौर्वायुं स वायुरेनं आप्तमधिकारिणं हरिं पृथक् प्रापयति । विश्वादिरूपं निजं भगवन्तम् । तर्हि तुर्यो वासुदेवश्च द्विविधौ किं विश्वादिवदिति नेत्याह । तुर्यश्च वासुदेवश्चापरस्तन्नामा जीवौ न नास्तीत्यर्थ इति । केचन तुर्योऽपि जीवो वर्तत इति द्विविधा इत्यत्र सन्निवेश्य तं वासुदेवपक्ष एव न चापर इति योजयन्ति ॥ अथ श्लोकार्थप्रथनम् । इन्द्राप्राप्त्यनन्तरं प्राप्यान्प्राह ॥ विश्व इति । विश्वस्तदाद्या अनिरुद्धाद्याः समन्वयोऽनिरुद्धस्तदादिः । विश्ववद्-भगवद्भगवद्रूपा इति द्विविधाः । तुर्य आत्मा वासुदेवश्च ॥

देवयानमिति श्लोके भूत्वा भूत्वेत्यस्य प्राप्यप्राप्येत्यर्थभ्रमभ्रंशं किञ्चिदध्याहृत्य तनोति ॥ भूत्वा भूत्वेति संसारप्राप्तिः प्रतीयते । सा च न निवर्तत इति बाधितेत्यतः किञ्चिदध्याहृत्य योजयतीति वा ॥ भूत्वेति । भूत्वेत्यव्ययस्याधिक इत्यर्थः । तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुरिति श्रुतेर्भवनमाधिक्यं तद्वान्भूत्वा । कैरित्यतः सुखादिभिरिति सुखादिभिरधिको भूत्वा ॥

ततः पद्यार्थः ॥ इदं देवयानं प्राहुः प्रेक्षावन्तः । आनुपूर्वशः क्रमाद्भूत्वा सुखादिभिरधिको भूत्वा । आत्मयाजी स्वस्मिन्स्वेनैव भगवद्याजी । उपशान्तेष्वात्मा मनो यस्य स विषयवासनाशून्यत्वेनोपशान्त आत्मा मनो यस्य स वा । आत्मस्थो भगवन्निष्ठो न निवर्तते । प्रथमभूत्वेत्यस्यार्थोऽधिक इति प्रथमं तात्पर्य उक्तं यदि तस्याप्यध्याहार्यता तर्ह्युदाहार्यता सुखादिभिरिति पदसमनन्तरं तत्पूर्वमेव वा । न तथोदाजहाराचार्यचरणः । किञ्च न निवर्तत इति न वर्तते चेत्किल धूमादिमार्गवदस्यापि पुनरावृत्तिभीरस्ति किमित्यतोऽभूत्वेति व्याकृतिरावश्यकी स्यान्न चैवम् । किञ्च भूत्वेत्येकमेव धरता भूत्वाऽभूत्वा वेति धृत्वा व्याकुर्वता भूत्वेति भवत्यधिकभूमिकेति ध्वनितं मध्वमुनिनेति ज्ञेयम् । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् । न च पुनरावर्तत इत्यादिप्रसिद्धिं हिराह ॥ ५५ ॥

मन्दनन्दिनी — अथेन्द्रानन्तरं ध्रुवः । अनन्तरं विश्वतैजसप्राज्ञाः । भगवदन्ये ग्राह्याः । ते च देवविशेषाः सम्प्रदयतो ज्ञेयाः । अनन्तरमनिरुद्धप्रद्युम्नसङ्कर्षणाश्च भगवदन्ये ज्ञेयाः । एतच्चैतन्नाम्नैव प्रसिद्धाः । एते षडपि द्युनाम्न्य भारत्याः पुत्राः । ततो द्युलोकाभिमानिनी भारती । ततो मुख्यवायुः । ततो वैकुण्ठः परमात्मा । ततो ब्रह्मणा सह बहिर्गमनानन्तरं नवावरणातिक्रमे विश्वादिरूपप्राप्तिः । विश्वोऽथ तैजस इत्यत्रोक्ता ज्ञेया । ततोऽनिरुद्धप्राप्तिरपि । ततोऽनिरुद्धं देवेशं प्रद्युम्नं च ततः परमित्यादि मानान्तरादवगन्तव्या । ततः समन्वयः सर्वेषामवताराणां सम्यगव्ययाधारः । आततत्वा-दात्मा नारायणः । अत्र ब्रह्माण्डान्तो विश्वादित्रयानिरुद्धादित्रयवत्तुरीयो वासुदेवश्च भगवदन्यो न ज्ञेयः । तन्नामकदेवस्याप्रसिद्धेः । अत्रोत्क्रान्तिस्तु शरीरात्स्वाद्गच्छत्यर्चिषमेव वेत्यादि भाष्योदाहृतं प्रमाणं ज्ञेयम् । अत्र तात्पर्यम् ॥ विश्वाद्या इत्यादि । विश्वाद्या अनिरुद्धाधार इत्यत्र त्रय एव ग्राह्याः ।

तुरीयवासुदेवयोर्विष्णोरन्यत्वनिषेधेऽस्यमानत्वात् । दिवस्पुत्रा द्युनाम्न्या भारत्याः पुत्राः द्युसमीपगाः । भारत्यभिमन्यमानद्युलोकसमीपगाः । विश्वादिरूपं हरिमित्यन्वयः । अनिरुद्धादिरूपमित्यपि ग्राह्यम् । नापरो विष्णोरन्यो नेति । इममुक्तमेव मार्गं देवयानं प्राहुरानुपूर्वशः । क्रमेण पूर्वपूर्वलोकापेक्षयोत्तरोत्त-रलोके सुखादिभिरधिको भूत्वाऽधिक इति सुखादिभिरिति च पदद्वयमध्याहार्यमित्यत्र तात्पर्यम् ॥ अधिक इत्यादि ॥ आत्मयाजी जीवपरमात्मपूजकः । उपशान्तात्मा सर्वोपरितनसुखातिशयस्वरूप आत्मस्थः परमात्मसमीपे वैकुण्ठादिलोके स्थितो न निवर्तत इति योजना ॥ ५५ ॥

य एते पितृदेवानामयने देवनिर्मिते ।
शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥

तात्पर्यम् — 'भक्तिमान्मार्गविन्नैव नीचां गतिमवाप्नुयादि'ति च ॥ ५६ ॥

सत्यधर्मीया — य एते पितृदेवानामयेन इत्यत्र मार्गद्विकज्ञानमात्रमपवर्गसाधनम् । नैते सृती पार्थ जानन्योगी मुह्यति कश्चनेति गीतागीतेश्च प्रतीयते । न चैतत्सम्भवति । अन्यथाज्ञानिनोऽप्येतावन्मति-सम्भवान्मुक्त्यापत्तेरित्यतस्तत्तात्पर्यमाचार्यः प्रमाणेनाह ॥ भक्तिमानिति । भक्तिमत्त्वे सति मार्गवित्त्वं नीचगतिविघटकं सदुच्चगतिघटकं भवतीति भावः ॥ ततः पद्यार्थः ॥ य एते निरूपिते पितृदेवानां पितरश्च देवाश्च तेषामयनमित्युभयान्वयि । देवनिर्मिते भगवत्कृते । शास्त्रेण चक्षुषा तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिशास्त्ररूपेण वेद । स पुमान्हरिभक्तिमांश्चेत् अतस्त्वितरज्ज्यायो लिङ्गाच्च, संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं चेत्यारभ्य त एतान्न पुनरावर्तन्त इत्येष निरोध इति षट्प्रश्नोक्तेः । तस्मान्न जनतामियान्नान्तमियात् । असुरा बहुला यस्मात्तत्मान्न जनतामियादित्यादिमानावमानितजनस्थोऽपि न मुह्यति न मोहं प्राप्नोति । एतेन तत्साध्यां नीचां गतिं नाप्नोतीति सूचितम् । अपिश्च मुक्तिमाप्नोतीति सूचकः । जनस्थो न मुह्यति नजनो जनार्दनस्तत्स्थोऽपि भवतीत्यर्थसूचको वाऽपिः । आत्मस्थ इत्यतीतपद्योक्तेः । गीतायामपि योगीत्युक्तेर्योग उपायो भक्त्यादिसाधनं तद्वानिति तदर्थो ज्ञेयः । गीताभाष्यटीकयोश्च एते सृती सोपाये ज्ञात्वाऽनुष्ठाय न मुह्यति । तच्चाह स्कान्दे । सृती ज्ञात्वा तु सोपायेऽनुष्ठाय च साधनम् । न कश्चिन्मोहमाप्नोति न चान्या तत्र वै गतिरिति । अनुष्ठायोपायमिति शेषः । कुत एतद्योगीत्युक्तत्वादिति ॥ ५६ ॥

मन्दनन्दिनी — उक्तमार्गज्ञानस्य फलमाह ॥ य एते इति । एते देवेन भगवता निर्मिते पितृदेवानामयने याते ये शास्त्रेण चक्षुषा वेद । सो जनस्थोऽपि मर्त्यलोकस्थोऽपि न मुह्यति नीचां गतिं नाप्नोतीति योजना । अत्र तात्पर्यम् ॥ भक्तिमानित्यादि । भक्तिमानिनि विशेषणान्नातिप्रसङ्गः ॥ ५६ ॥

आदावन्तेऽजनानाशं बहिरन्तः परावरम् ।
ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिश्च तत् स्वयम् ॥ ५७ ॥

तात्पर्यम् — ग्लापकत्वात्तमः ॥ ५७ ॥

सत्यधर्मीया — आदावन्ते जनानाशमिति श्लोके तमो ज्योतिरिति विरुद्धधर्मद्वयालिङ्गितत्वं हरेरीरितमिति भाति । न च तदुचितमित्यतस्तमःपदार्थमाह ॥ ग्लापकत्वात्तम इति । तमु ग्लानाविति स्मरणात् । दैत्यादिग्लापकत्वात्तमः । दुर्घटसामानाधिकरण्ययोस्तमोज्योतिषोस्तमःपदार्थवर्णन-सामानाधिकरण्य आदावादावन्त इत्यादिनोक्तानां कैमुत्येनाविरोधः सेत्स्यतीत्येतन्मात्रव्याकृतिरिति ज्ञेयम् ॥ अथ पद्यार्थप्रथनम् ॥ आत्मस्थो न निवर्तत इत्यत्र भगवतो मोक्षदातृत्वमुक्तम् । तदितरत्रासम्भावितं सम्भावितं कथं तस्मिन्नित्याशङ्कापरिहारार्थं तन्महिमानमाह ॥ आदाविति । आदौ सृष्टिकालेऽन्ते संहारकाले न विद्यते जनो जननं यस्य तदजनं तच्च तदनाशं न विद्यते नाशो यस्य तदनाशं च । बहिर्ब्रह्माण्डादन्तस्तदन्तः । परं महदपरं परिच्छिन्नम् । बहीरूपेण परममह-दन्तर्गतरूपेणाणुपरिमाणमिति विवेकः । ज्ञानं तदात्मकम् । ज्ञेयं यच्च वचो वाग्रूपं वाच्यं च तमो दैत्यग्लापकम् । अन्तर्णीतण्यन्तस्तमशब्दः । ज्योतिः प्रकाशरूपं च तत्स्वयं स्वातन्त्र्येणैव तुर्य आत्मा । अन्यदेतदधीनोत्पत्त्यादिमदिति न तदसम्भावितमिति भावः ॥ ५७ ॥

मन्दनन्दिनी — सर्वस्यापि भगवदधीनत्वमुपदिशति ॥ आदाविति । सृष्टौ प्रलये च जनानाशं जायमानं नश्यच्च । जनी प्रादुर्भाव इत्यस्मात्कर्तर्याकार प्रत्ययः । नश्यते च । कर्तरि घञ् द्वन्द्वैकवद्भावः । ब्रह्माण्डस्य बहिरन्तर्विद्यमानं परावरमुच्चावचं ज्ञानं ज्ञेयं वचो वाच्यं तमोऽज्ञानमन्धकारो वा । तमु ग्लानेरखाग्रेपि (?) अन्तर्णीतण्यर्थादसत् । अत एव तात्पर्यम् ॥ ग्लापकत्वात्तम इति ज्योतिः प्रकाशः । तदेतत्सर्वं स्वयं भगवान् सर्वस्वामीत्यर्थः । यदधीना यस्य सत्तेत्यादेः ॥ ५७ ॥

अबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ ५८ ॥

तात्पर्यम् — दुर्घटत्वादर्थत्वेन परमेश्वरेणैव कल्पितम् ॥ ५८ ॥

सत्यधर्मीया — अबाधितोऽपि ह्याभास इति श्लोके यथाऽऽभासः प्रतिबिम्बो जीवश्चिता रूपेण बाधविधुरोऽपि विशिष्टेन रूपेणावस्तुतया मिथ्यात्वेन स्मृतस्तद्वत्तथार्थविकल्पितमर्थः सन्निति विकल्पितं भ्रान्तिविषयीकृतं जगदैन्द्रियकम् दृश्यम् । मिथ्यात्वे हेतूक्तिः । विमतं मिथ्या

ऐन्द्रियकत्वाद्दृश्यत्वाच्छुक्तिरूप्यवदिति दुर्घटत्वात्सच्चेन्न बाध्येतासच्चेन्न प्रतीयेतेति बाधबोधविषयतान्यथाऽनुपपत्याऽवस्तुतया मिथ्यात्वेन स्मृतमिति जीवादिजगन्मिथ्यात्वे कपोणिगुडायितं तद्विमुक्तिदत्वं हरेरेतदुपयोगितया कथितमादावादावन्त इत्यादिनाऽसङ्गतमित्यतः किञ्चिदध्याहृत्य समीकरोति । दुर्घटत्वादर्थत्वेन परमेश्वरेणेति मौलवीत्यस्यार्थः । एवकारेणेतरासामर्थ्यं सूचयति । कल्पितं निर्मितमतो न मिथ्यात्वं जगत इति भावः । सत्यसृष्टावशक्ता हि मायासृष्टिं वितन्वत इत्यादेर्वास्तविकसृष्टिक्षमता परमेश्वरेणेत्युक्तपारमैश्वर्येण साधितेति मन्तव्यम् ॥

अथ मूलार्थः ॥ यथाऽऽभासः प्रतिबिम्बो जीवो वस्तुतया अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यत इत्यादेः कार्यकारितया निमित्तेनाबाधितः सत्यः । स्मृतः जीवो नित्यो धातुरस्य त्वनित्य इत्यादिश्रुतिमूलादच्छेद्योऽयमदाह्योऽयमित्यादिस्मृतिसिद्धः । इदमैन्द्रियकं दृश्यं विश्वं तद्वज्जीववदेवार्थविकल्पितम् । अर्थत्वेति भावप्रधानोऽर्थशब्दः । अर्थत्वेन वास्तवत्वेन विना भगवता कल्पितं कृतम् । नान्यस्यैतत्कल्पकतेत्याह ॥ दुर्घटत्वादिति । अन्य एतत्कल्पनेऽकल्प इति भावः । अचिन्त्यशक्तिं साधयति ॥ अबाधित इति । तत्र सर्वस्याप्यैन्द्रियकस्योपपत्तिर्दुर्घटत्वेनानिर्वाच्यत्वमुच्यत इति प्रतीतिवारणाय व्याचष्टे । दुर्घटत्वादिति । वक्ष्यमाणरीत्या दुर्घटत्वादीश्वरं विना घटयितुमशक्यत्वादर्थत्वेन सत्यत्वेन प्रमितविषयस्यैवार्थत्वात् । परमेश्वरेणैव कल्पितं जातमित्यर्थः ॥ तथा च मूलार्थः ॥ जीवरूप आभासः सत्याभासत्वात्प्रतिमुखादिवत् । अनित्यतया प्रसक्तोऽपीश्वरसामर्थ्येन नित्यो जातः । तथा तद्वदित्याह ॥ अबाधित इति । अबाधितः सत्योऽप्याभासो जीवो यथा वस्तुतया सदा वसनाद्वस्तु नित्यतया स्मृतः । उक्तः शास्त्रेषु तद्वदैन्द्रियकं क्षित्यादि दुर्घटत्वादर्थेनार्थत्वेनार्थोत्तमार्थेन हरिणैव विकल्पितं कृतमिति व्यातन्वन्ति । आदावन्तश्लोकमितरपरं व्याकृत्य तत्सत्ता भगवदधीनेति यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति तत्स्वयमिति तात्पर्यमभिधाय ननु सत्तायास्तदधीनत्वं प्रामाणिकं चेद्ब्रह्मत्वेनोक्तिर्घटेत ततः काऽत्र युक्तिरित्याशङ्क्योपपादयति अबाधित इत्यवतारयन्ति । आभासः प्रतिबिम्बलक्षण इत्येकं पदं योजयद्भिरबाधितपदमावृत्त्य आप आधीयन्तेऽस्मिन्नित्यधिकरणे कौ भवत्यबाधिः समुद्रादिः । सार्वविभक्तिकस्तसिः । तस्मिन्नित्यर्थः । यथा जलधौ बिम्बसूर्यादिसान्निध्ये आभासः प्रतिबिम्बः सूर्यकादिस्तथेति योजयितुं शक्यमिति मन्तव्यम् । किञ्चिदाभासो मुख्यप्रतिबिम्बो बाधितो विध्यादिर्जीवो वस्तुतयेश्वराधीनत्वेन स्मृतः । दुर्घटत्वात्तद्विधातृविधानं भवतु । भगवदधीनं सुघटं घटादिसर्जनं हरिवर्जनेन विध्यादिभ्यो मुखेभ्य एव भवत्वित्यत आह ॥ दुर्घटत्वादिति । ऐन्द्रियकं घटादिकमर्थत्वेन विना भगवतैव कल्पितमित्यादिप्रकारेण व्याकुर्वते । दुर्घटत्वात्सत्त्वासत्त्वादिप्रकारोररीकारस्योक्तबाधितत्वाद्यसम्भवबाधया दौर्घट्य इत्यप्यर्थ इति केऽपि । न केवलो बाधितविकलः किन्तु बाधितो बाधनिवृत्तये तद्वत्प्राप्यः । तन्न स्वयं स्वयम्भुवः सामर्थ्येनेत्याह ॥

अबाधित इति । अनेन भगवतैव बाधित इति अबाधित इति वा । यथोक्तं तत्त्वप्रकाशिकायाम् । ते वायवे मनवे बाधिताय । संसारबाधावद्भिरिताय प्राप्तायेति ॥ ५८ ॥

मन्दनन्दिनी — ननु सत्यस्याधीनत्वं न सम्भवति । प्रपञ्चस्य त्वाभासत्वाददृश्यत्वान्मिथ्यात्वेन कथं तदधीनत्वमित्यत आह ॥ अबाधित इति । प्रपञ्च आभासोऽपि दृश्यमानोऽपि यथावस्तु ब्रह्म । तथेव सत्यत्वेन स्मृतः । अदृश्यत्वहेतोः सर्वदोषदुष्टत्वात् । मिथ्यात्वे बाधस्यैव प्रयोजकत्वात् । अयं चाबाधितः । असम्भावितोत्पत्त्यादिमत्वात्कथं ब्रह्मवत्सत्यं स्यादित्यत उक्तम् ॥ दुर्घटत्वादिति । भगवतो दुर्घटघटनाशक्तिमत्वाद्ब्रह्मवदर्थेनेति भावप्रधानो निर्देशः अर्थत्वेनार्थक्रियाकारित्वेन विविधतया कल्पितमुत्पादितमैन्द्रियकमिति प्रत्यक्षादिप्रमाणप्रसिद्धत्वं सूचयति । अतः सत्यमिति योजना । न हि भगवान्सत्यसर्जनासमर्थः । येन मायया मोहयेदिति भावः । अत्र तात्पर्यम् ॥ दुर्घटत्वादित्यादि । इतरैर्दुर्घटत्वात् । स्वस्य दुर्घटघटनाशक्तिमत्वाद्वा । परमेश्वरेणैव कल्पितमित्यर्थः ॥ ५८ ॥

क्षित्यादीनां पदार्थानां छाया न कतमाऽपि हि ।
न संघातो विकारोऽपि न पृथङ् नान्वितोऽपि वा ॥ ५९ ॥

तात्पर्यम् — 'छाया रीतिः प्रकारश्च भावश्चेत्यभिधीयत' इति शब्दनिर्णये । क्षित्यादीनां पदार्थानां कतमोऽपि प्रकारो न घटते । परमेश्वरकल्पितत्वात्कार्यमित्येव वक्तुं युक्तम् । न हि बह्वपां सङ्घातमात्रं पृथिवी । न च विकारमात्रम् । न हि कालुष्यादि विकारमात्रेण पृथिवी भवति । न चाद्भ्यः पृथक्स्थितिः । न च वस्तुद्वयवत् सहावस्थानमात्रम् ॥ ५९ ॥

सत्यधर्मीया — क्षित्यादीनां पदार्थानामिति श्लोकादिर्दुर्घटतामैन्द्रियकमित्यभिहितमह्यादिसर्जनस्य प्रपञ्चयितुं प्रवृत्तस्तत्र क्षित्यादीनामर्थानां कतमाऽपि छाया प्रतिरूपं न सङ्घातो न च विकारो नाप्यन्वितः सम्बन्धोऽस्तीति सर्वस्वभाववैकल्येन शून्यवादसमर्थनपर इति भ्रमं भ्रंशयितुं छायापदमभिधानाभिधानेन व्याकृत्य स्वयं पूर्वश्लोकसङ्गततयेमं सम्यग्व्याचर्करीति छायेति । योजनां दर्शयति । क्षित्यादीनां पदार्थानां कतमा छाया कतमोऽपि प्रकारो न घटते यतोऽतः परमेश्वरकल्पितत्वात्तत्कर्तृकत्वात्कार्यमित्येव वक्तुं युक्तम् । अद्भ्यः पृथिवीत्यादेस्तत्सङ्घातादि-रूपप्रकारसम्भवे कथं कथनं कतमोऽपि प्रकारो न घटत इति घटत इत्यत आह ॥ न हीति । बव्हपां बह्वचश्चा ता बहवश्च ता वापश्च तासाम् । न च ऋक्पूरब्धूः पथामानक्ष इति सूत्रेणाप्रत्यये बव्हपानामिति कथनीयं तत्कथं बव्हपामिति कथितमिति वाच्यम् । अत्रैव पथामित्यभिधानात्तदनित्यतेति केचित् । समासान्तविधेरनित्यत्वान्नाप्रत्ययः । शुच्यंपि तटाकानीति महाभाष्यप्रयोगादिति वा । विस्तृतं समासान्तविध्यनित्यताविषये शब्दकौस्तुभे वृद्धिरादैजिति वृद्ध्यवसरे । अथवा समाहारद्वन्द्वः । न चैवं

द्वन्द्वाच्चुदेति टच् स्यादिति वाच्यम् । समासान्तविधेरनित्यत्वात् । अत्र ज्ञापकमित्यारभ्य ऋलृक्सूत्रे प्रपञ्चितत्वादिति दिगित्यन्तेन ज्ञेयम् । बहु अपां सङ्घातमात्रमिति पदानि । अपां बहुसङ्घातमात्रमित्यन्वयः । समुदायसमुदायिनोरभेदात्तद्बहुत्वं नीरेषु निरूपयितुं सुशकमिति सुशका शङ्का शान्तिरित्यवेहि । विकारमात्रं साधारणविकारः । कुतस्तन्नेत्यत आह ॥ न हीति । कालुष्यमादिपदाच्छैवालादिग्रहणम् । तन्मात्रेण पृथिवी न हि भवतीत्यन्वयः । न पृथगिति मूलेऽद्भ्य इत्यध्याहार्यमित्याह ॥ अद्भ्य इति । क्रमाद्वैभाषिकवैशेषिकमतद्वयनिरासः कृतः । नान्वितोऽपी-त्यस्यार्थो न च वस्तुद्वयवत्सहावस्थानमात्रमिति । अनेन सन्मात्रकार्यवादिसाङ्ख्यवादिमतं निराकृतं भवति ॥

ततश्चायं श्लोकार्थः ॥ दुर्घटतामेव प्रकटयति ॥ क्षित्यादीनामिति । क्षित्यादीनां पदार्थानामिति क्षित्यादीनामिहार्थानामिति च पठन्ति । द्वितीयेऽर्थानां पदानामित्यर्थः । कतमाऽपि छाया रीतिर्विचारकैर्नापि नाप्ता । प्रकारानाशङ्क्य निराकरोति ॥ नेति । किं क्षितिरपां सङ्घः किंवा तद्विकारः पृथिवी ततः पृथक् स्थितेति वा वृक्षसंयोगवत्संयोगमात्रं वा । नाद्य इत्याह ॥ नेति । नापां सङ्घातः क्षितिर्वर्णतया कठिणतया च तत्त्वानुपपत्तेः । द्वितीयं पराकरोति ॥ अविकार इति । कलुषतादि-विकारमात्रं क्षितिरित्यनुपपत्तेः । तृतीयोऽपि नेत्याह ॥ न पृथगिति । अद्भ्यः क्षितेः पृथगस्थितेः । नापि चतुर्थ इत्याह ॥ नान्वितोऽपीति । सहावस्थितिमात्रस्य तत्कार्यताप्रयोजकत्वात् । एतदनुपपत्त्या परमेश्वरकृतत्वमेव वक्तुं युक्तमिति भावः ॥ ५९ ॥

मन्दनन्दिनी — दुर्घटघटनाशक्त्या जगदुत्पादितमित्युक्तं तदनङ्गीकारे केनापि प्रकारेणोत्पत्तिर्न सम्भवतीत्याह ॥ क्षित्यादीनामिति । इह कार्यप्रपञ्चे क्षित्यादीनामर्थानां कार्याणां कतमा छाया । कः प्रकारः । न । ईश्वरशक्त्यनङ्गीकारेऽपि कोऽपि प्रकारो न सम्भवति । तथा श्रुतिः । किं क्षितिरपां सङ्घातः । आपस्तेजसामित्येवं क्षित्यादिः । माषराश्यादिवत्सङ्घातलक्षणं कार्यम् । यद्वा । चूतफलादेः पीततादिवच्छ्वेतजलस्य कालुष्यलक्षणं कार्यम् । अथवा । समुदायात्पृथग्भूतैकदेशलक्षणं कार्यं प्रस्थात्पृथग्भूतमानवत् । यद्वा । सहावस्थितक्षीरनीरादिवस्तुद्वयवत्कार्यम् । आद्ये जलबुद्बुदेर्द्रवत्वस्य पर्वतादिमज्जनस्यापत्तिरित्यादि दोषः । द्वितीयेऽप्येतद्दोषतादवस्थ्यम् । तृतीयेऽप्येत एव दोषाः । चतुर्थे जलातिरिक्तस्यार्थस्याभावो भावे वा परस्परकार्यकारणभावानुपपत्तिश्चेति दूषणमभिप्रेत्यैतान् प्रतिक्षिपति ॥ न सङ्घात इत्यादिना ॥ विकारोऽपीत्यपिशब्दात् नञनुवर्तते । दुर्घटघटनाशक्त्यनङ्गीकारे तु गन्धतन्मात्रायुक्तं पृथिवीभूतसूक्ष्मान्युपादानीकृत्याब्भूतैकदेशैरुपचित्य काठिण्यं सम्पाद्य पृथिवीलक्षण-भूतं परिणामयतीत्यङ्गीकारे न कोऽपि दोषः । अत्र तात्पर्यम् ॥ छाया रीतिरित्यादि ।क्षित्यादीनां

पदार्थानां कतमोऽपि प्रकारो न घटत । परमेश्वरकल्पितत्वात्कार्यमित्येव वक्तुं युक्तम् । न हि बव्हापां सङ्घातमात्रं पृथिवी । न च विकारमात्रम् । न हि कालुष्यादिविकारमात्रेण पृथिवी भवति । न चाद्भ्यः पृथक् स्थितिः । न च वँस्तुद्वयवत्सहावस्थानमात्रमिति । प्रकारश्छायेति रीतिरिति च भाव इति चाभिधीयत इत्यन्वयः । परमेश्वरे कल्पितत्वादेवेत्यन्वयः । परमेश्वरपदं च दुर्घटघटनाशक्तिमत्परम् । न हीत्यादि पक्षनिषेधे उक्तदोषा हेतवो द्रष्टव्याः ॥ ५९ ॥

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यासन्नावयवा इव ॥ ६० ॥

तात्पर्यम् — **एवमवयवावयविनोरपि ॥ ६० ॥**

सत्यधर्मीया — ननु यथैकैकस्य मदजनकत्वाभावेऽपि मिलितानां चतुर्भागादीनां तज्जनकत्ववदेतेषां संश्लिष्टानां कार्यकारिता स्यादित्याशङ्क्य नारायणमन्तरेणावयवावयविता नोपपद्यत इत्याह ॥ धातव इति । धातवः क्षित्यादयो धारकत्वात्तन्मात्रावयवैर्गन्धादिमात्रारूपावयवैर्विनाऽवयवित्वात् । ल्यब्लोपनिमित्ता पञ्चमी । अवयवित्वं प्राप्य न स्युः सत्तावन्तो न भवेयुः । अवयविनि धर्मिण्यसत्यासन्नावयवा इव । आसन् न अवयवा इति छेदः । अवयवा यथा नासन्नाभूवन् तथेति परस्परं दृष्टान्तदार्ष्टान्तिकता ज्ञेया । न्यसन्नवयवोऽन्तत इति क्वचित्पाठः । अवयविन्यसत्यन्ततोऽवयवी यथाऽऽसंस्तथाऽवयवी इति योजना । एतदुभयघटकेन केनचिद्भाव्यं स चेश्वर इति भावः । हिना यद्धि युक्त्या विरुध्येत तदीशकृतमेव हीत्यादिमानसिद्धतां सूचयति । तन्तूनां सत्त्वे सत्त्वमवयविनः पटस्य सति तस्मिंस्ते तत्र सन्तो निराश्रयाणामवस्थानासम्भवादिति तद्वदिति भावः ॥ ६० ॥

मन्दनन्दिनी — ननु क्षित्यादेः सङ्घातादिप्रकारः कोऽपि मा भूत् । तथाऽप्युक्तरीत्या तन्मात्रलक्षणावयवैः क्षित्यादिलक्षणावयविनोऽभूतोपचयेन कार्यत्वं युक्तमेव । अत्र नेश्वरदुर्घटघटनाशक्तेरपेक्षेति चेन्न । द्रवद्रव्योपचितस्य काठिण्याद्ययोगेनेश्वरशक्तेरवश्योपक्षणीयत्वात् । किं चावयवावयविभावेऽपि ईश्वरशक्त्यपेक्षेति वक्तुं अवयवावयविभावं तावन्निश्चिनोति ॥ धातव इति । धातवः पृथिव्यादिभूतानि तन्मात्रलक्षणावयवैर्विना न स्युः । अवयवित्वादेव । न ह्यवयवं विनाऽवयव्यस्ति । अवयविनि पटेऽसत्यासन्नावयवा व्यतिषङ्गविशेषविशिष्टास्तंतव इव सिद्धे त्ववयवावयविभावेऽवयविनि स्थूलत्वादिविधिः । अवयवेषु तन्निषेधः । एवमवयवेषु सूक्ष्मत्वविधिः । अवयविनि तन्निषेधः । एवं विधितन्निषेधलक्षणो विशेषः । ईश्वरशक्तिं विना नोपपद्यते । तयोरभिन्नत्वात् । न च भेदेनोपपत्तिः । भेदाभेदसमावेशस्यापीश्वरशक्तिं विनाऽयोगात् । न च विशेषेणोपपत्तिः तस्यापीश्वरशक्त्या विहितत्वात् । एवं चाघटितघटकशक्तिर्भगवान्विशेषं

विरोधमाशङ्कीकृत्य क्वचिद्भेदनकार्यविशेषं घटयति । सर्वथाऽपीश्वरशक्तिरङ्गीकार्या । तदेतदभिप्रेत्योक्तं तात्पर्ये ॥ एवमित्यदि । एवं रीत्येश्वरे दुर्घटघटनाशक्तिरङ्गीकार्येति ॥ ६० ॥

स्यात् सादृश्यभ्रमस्तावद् विकल्पे सति वस्तुनः ।
जाग्रत्स्वप्नौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥

तात्पर्यम् — न च सादृश्यमात्रम् । वस्तुभेदे हि तद्युज्यते । तस्मात्स्वप्न एव । जाग्रत्स्वप्नौ यथा विशेषतो दृश्येते तथा पृथिव्यबादिविशेषो दुर्घटोऽपीश्वरकल्पनयैवासौ दृश्यते तथा पृथिव्यबादिविशेषो दुर्घटोऽपीश्वरकल्पनयैवासौ दृश्यते । 'कार्यकारणवस्तूनां विशेषो न निरूपितः । तथा पीशेच्छयैवासौ दृश्यते नियतोऽपि चे'ति च ॥ ६१ ॥

सत्यधर्मीया — स्यात्सादृश्यभ्रमस्तावदिति श्लोके उपादानोपादेयस्थलेऽवयवावयविस्थले च प्रकारान्तरनिषेधः क्रियत इति तात्पर्येणाप्रतीतार्थकं वाक्यं व्याचष्टे ॥ एवमवयवेति । यथा स्वप्ने सत्येव जाग्रत्स्वप्नो जाग्रद्वत्स्वप्नः स्वाप्नो गजादिर्दृश्यते तदवस्थायां निवृत्तायां निवर्तते यथा तथा वस्तुनो जीवेशादेर्विकल्पे भेदे सत्येव तावत्पर्यन्तं सादृश्यभ्रमः स्यात् । स्यात्तथाविधनिषेधता च निवृत्ते भेदे च निवर्तते च सादृश्यादिकमिति जीवेशभेदादेर्मिथ्यात्वमुच्यत इत्यपार्थप्रतीतिनिरासाय तं श्लोकं योजयति ॥ नचेति । यथाऽबादिसङ्घातादिमात्रता दुर्घटैवं सादृश्यमात्रं किञ्चित्सादृश्यं च न घटते । कुतो न घटत इत्यत आह ॥ वस्त्विति ॥ तत्सादृश्यादिकं वस्तुनोर्भेदे सत्येव हि यतो युज्यते तन्मिथ्यात्वे कथं तद्घटेत । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्य तत्त्वादिति तदविनाभावादिति भावः । असति तस्मिन्नवस्तुनः सादृश्यं किन्तु तद्भ्रम एव स्यात् । उपसंहरन्नुत्तरार्धं सम्यग्व्याचष्टे ॥ तस्मादिति ॥ तस्मादुक्तप्रकारासम्भवात् । यथा जाग्रत्स्वप्नो जाग्रत्पदार्थारोपाधिष्ठानभूतस्वाप्नकरितुरगादिर्विशेषतो विशेषोऽवयवावयविव्यवहाररूपश्च । प्रथमार्थे तसिः । भगवत्सादृश्येन दृश्यते तथा विना कार्यत्वेन दुर्घटः पृथिव्यबादिरूपो विशेषः । इतरदुर्घटोऽपीश्वरकल्पनयैव तत्क्लृप्त्यैव दृश्यते । इदमर्थमिदं मानमिति नानादरणीयतेतीरयति ॥ कार्यकारणेति । कार्यत्वस्य साध्यत्वेन मूलानुकूल्याय वा कार्येति पुरस्कृतिः । पृथिव्यबादिपदार्थानां विशेष उक्तसङ्घातत्वादिरूपो न निरूपितः । निरूपयितुं युष्मदादिभिर्न शक्यश्चेदपि निरूपयितारो वर्तेरन्नित्याशङ्कापनुत्तये न निरूपित इत्युक्तिः । तथाऽप्यघटयघटकयेशेच्छयैवासौ विशेषो नियतो दृश्यते । चोऽवधारणे । तथा पृथिव्यवयवादिविशेष इति पठन्ति । अवयवावयविविशेषो दुर्घटो दृश्यत इत्यनेन मानमप्युक्तमिति व्याकुर्वते च ॥

ततश्चायं मूलार्थः ॥ सादृश्यमात्रेण प्रयोजकेन तस्यायमवयव इति व्यवहृतिर्दृश्यते तत्कथं तद्व्यतिरेकेण नास्ति स इत्युच्यत इत्यत आह ॥ स्यादिति । वस्तुनो विकल्पे भेद आत्यन्तिके सति

साद‍ृश्यभ्रमस्तद्भ्रान्तिः स्यात्तावदेव । यावत्तावच्च साकल्येऽवधौ मानेऽवधारण इत्यमरः । अत्यन्तभेदस्यैव साद‍ृश्यप्रयोजकत्वात्तदभावे तद्भ्रम एव स्यान्न वास्तविकं साद‍ृश्यमित्यर्थः । तन्तुभ्योऽन्यः पटः साक्षात्कस्य द‍ृष्टिपथं गत इत्युक्तेः प्रत्येकं तन्तुना भेदाभेदौ तत्समुदायेनात्यन्ताभेद इत्युक्तं युज्यते । ईश्वरेच्छामात्रहेतुकतायां निदर्शनं दर्शयति ॥ जाग्रदिति । यथा स्वप्नेऽयं जाग्रदयं स्वप्न इति विशेषश्चेशेच्छया द‍ृश्यते । य एष स्वप्नान्प्रदर्शयति । न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत इत्यादेः । तथा विधिनिषेधता ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिः ब्राह्मणो न हन्तव्य इति निषेधः । तावस्य स्त इत्यर्श आद्यच् । स्वार्थे वा । तथा विधिमत्त्वं निषेधित्वं चेशकल्पनयैवेति योज्यम् । जाग्रत्त्वमिति हि भ्रम इत्यादेः साद‍ृश्यभ्रमानुकूल्याय जाग्रत्त्वग्रहणम् । स्वप्नस्य स्वमते सत्यत्वादिति ज्ञेयम् । उपलक्षणं च विधिनिषेधतेति । सकलधर्मा अपि सकलेशाधीना इत्यर्थः । तावदित्यप्यर्थे । वस्तुनो वस्तुन इति वस्तुनोर्विकल्पे भेदे सत्येव साद‍ृश्यभ्रमोऽपि सम्भवी यदा तदा किमु वक्तव्यं वास्तविकसाद‍ृश्यं भेदं विना न सम्भवतीति कैमुत्यमुपपादयितुं भ्रमपदमिति वा ॥ ६१ ॥

मन्दनन्दिनी — नन्ववयवावयविनोरभेदे सति कार्यविशेषनिर्वाहायेश्वरशक्त्यपेक्षा । अभेद एव नास्ति । किन्तु साद‍ृश्यमात्रम् । तेनैव परस्परभ्रम इत्यत आह ॥ स्यादिति । वस्तुनो विकल्पेऽवयविनोऽवयवस्य च भेदे साद‍ृश्येनाभेदभ्रमः स्यात् । स एव नास्ति । तंतुभ्योऽन्यः पटः साक्षात्कस्य द‍ृष्टिपथं गत इत्युक्तेः । अस्त्ववयवावयव्यभेदस्तथाऽपि कः कार्यविशेषः । कुत्र वेश्वरशक्त्या निर्वाह्यो द‍ृष्ट इत्यत आह ॥ जाग्रदिति । यथा स्वप्ने स्वप्नविशेषे । जाग्रत्स्वप्नौ जाग्रद्बाह्यशब्दादिः स्वप्नो वासनामयगजादिश्चेत्युभावीश्वराघटितघटकशक्त्या द‍ृश्येते । तथा विधिनिषेधताऽवयवावयविनोः स्थूलसूक्ष्मत्वविधिनिषेधलक्षणो विशेष उक्तशक्त्या निर्वाह्य इति । अत एव तात्पर्यम् ॥ न चेत्यादि । न च साद‍ृश्यमित्यतः परं तेन चाभेदभ्रमोऽवयवावयविनोरिति वाक्यशेषः। तत्साद‍ृश्यं विशेषतः । ईश्वरशक्तिविशेषतः । विशेष उक्तविधिनिषेधलक्षणः । ईश्वरकल्पनया सामर्थ्येन विशेष ईश्वरशक्तिं विनाऽन्येनात्यंतभेदादिना न निर्वाह्यः । ईशेच्छयेशशक्त्या । नियतोऽप्यवयविन्येव कश्चिदवयवे एव कश्चिदिति ॥ ६१ ॥

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथैव च ।
वर्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः ॥ ६२ ॥

सत्यधर्मीया — सकलमपि यदधीनं तत्प्रसत्तिरुपसत्तिं विना न प्रादुष्यादिति भावनाप्रकारमाह ॥ भावाद्वैतमिति । मुनिः सत्समयतत्ववित् । भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं च तथैव शास्त्रशंसितप्रकारेण ।

परस्परसमुच्चायको वा तथैवचशब्दः । वर्तयन्पुनः पुनः सञ्चिन्तयन् स्वानुभूत्या स्वरूपप्रतिपत्त्या इह जगति विद्यमानांस्त्रीन्स्वप्नान् । बहुवचनमाद्यर्थे । स्वप्नजाग्रत्सुषुप्तिनिमित्तकाज्ञानप्राप्यनर्थान्धुनुते निरस्यति ॥ ६२ ॥

मन्दनन्दिनी — एवं भगवतो माहात्म्यमुक्त्वा समर्पणं कार्यमित्याशयेनाह ॥ भावेति । मुनिः स्वानुभूत्याऽऽत्मनः परमात्मनो भावाद्वैतादिकं वर्तयन् पुनः पुनर्विषयीकुर्वन् । त्रीन्स्वप्नान् स्वप्नाद्यवस्थात्रयम् । संसारमिति यावत् । धुनुते जहातीति योजना ॥ ६२ ॥

कार्यकारणवस्त्वैक्यदर्शनं पटतन्तुवत् ।
अवस्तुत्वाद् विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥

सत्यधर्मीया — दुर्गमार्थत्वात्तत्त्रिकं स्वयमेव व्याकरोति ॥ कार्येति ॥ कार्यं च महदादिकारणं च प्रकृत्यादिकारणं च तयोर्वसतीति वस्तु शक्तं च भगवद्रूपं तदैक्यदर्शनं तदभेदज्ञानं यत्तद्भावाद्वैतमुच्यते । तत्र निदर्शनमाह ॥ पटतन्तुवदिति । यथा पटस्य तन्तुसमूहस्याभेददर्शनं तथेत्यर्थः । विश्वस्य विश्वेशैक्यं किं नोच्यते । उच्यते चाशाब्दोऽर्थः कुत इत्यतो वक्ति । विकल्पस्य विविधतया कल्पः कल्पनं तस्य कार्यकारणरूपस्य । अवस्तुत्वादसमर्थत्वात् । तस्य समर्थत्वान्न तयोस्तादात्म्यं सम्भवतीत्युक्त एवार्थ इति । गणं युगपदाविशत् । तत्सृष्ट्वा तदेवानुप्राविशत् । समधिगतोऽस्मि विधूतभेदमोहः । हरिरूपाणां भेददर्श्यधरं तम इत्यादीन्यत्र मानानि भवन्ति । यदि यथाश्रुतोऽर्थः स्याद्धन्त तर्हि कार्यकारण-वस्त्वैक्यदर्शनमिति मृद्धट इति सामानाधिकरण्येन कार्यकारणयोरभेदोक्त्या हरिसम्बन्धाप्रतीतेः प्रकृतासङ्गतं स्यात् । निदर्शनं चैकत्वप्रदर्शनपरमित्युक्त एवार्थ इति भावमावेदयाश्चक्रुः ॥ ६३ ॥

मन्दनन्दिनी — भावाद्वैतादिस्वरूपं विविच्य दर्शयति ॥ कार्येत्यादिना । पटतन्तुवत्तद्गत-रूपभगवद्रूपद्वयवत् । कार्यकारणवस्तुषु । प्रकृतिमहदहंकारादिषु विद्यमानभगवद्रूपैक्यस्य दर्शनं यत् । विकल्पस्य भेदस्यावस्तुत्वात् असत्यत्वात्तदैक्यदर्शनम् । भावाद्वैतमुच्यत इति योजना ॥ ६३ ॥

यद् ब्रह्मणि परे साक्षात् सर्वकर्मसमर्पणम् ।
मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥ ६४ ॥

सत्यधर्मीया — न ऋते त्वत्क्रियते किञ्चनारे । दारान्सुतान्प्रियान्प्राणान्परस्मै सन्निवेदयेदित्यादेः साक्षात्परे ब्रह्मणि मनोवाक्तनुभिः सर्वकर्मसमर्पणं यत्तत्पार्थ क्रियाद्वैतमुच्यते ॥ ६४ ॥

मन्दनन्दिनी — मनोवाकृतनुभिः क्रियमाणेत्यध्याहृतम् । सर्वकर्मेत्यनेन सम्बध्यते । यत्समर्पणं तत्क्रियाद्वैतमुच्यत इति योजना ॥ ६४ ॥

आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ।
यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥

सत्यधर्मीया — क्रमप्राप्तं द्रव्याद्वैतमाह ॥ आत्मेति ॥ आत्मा देहो जाया भार्या सुताः पुत्रा अन्येषां सर्वदेहिनां प्राणिनां यच्च तदीयार्थकामयोरैक्यं भगवद्विषयतादर्शनं तद्द्रव्याद्वैतमुच्यते ॥ ६५ ॥

मन्दनन्दिनी — स्वार्थकामयोस्तद्गतयोर्भगवद्रूपयोरैक्यं तद्द्रव्याद्वैतमुच्यत इति योजना । आत्मजायेत्यादिना स्वार्थकामयोर्विवरणं मन्तव्यम् ॥ ६५ ॥

यद् यस्य वाऽनिषिद्धं स्याद् येन यत्र यतो नृप ।
स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥

सत्यधर्मीया — उपासनाप्रकारं निरूप्यार्चनोचितद्रव्यप्रकारमाह ॥ यद्यस्येति । यस्य पुंसो येन द्रव्येण यत्र देशे काले च यतो यस्मात्सम्पादितम् । वेदादेर्विहितमिति वा । तेन प्राप्तेनानापद्यापदभावे कर्माणि जगन्नाथपूजनादीनि ईहेत । नान्यैरापत्कालोदितैर्नेहेत न कुर्यात् । अन्यैर्निषिद्धैरिति वा ॥ ६६ ॥

मन्दनन्दिनी — अनापदि दैवलब्धेनानिषिद्धेन साधनेनार्चनं कार्यमित्याह ॥ यदिति । यत्तुलस्यादिकं यस्याधिकारिणो येन शिष्यादिना यत्र देशे यतो वनादितो लब्धमनिषिद्धम् । स तेन कर्माणि भगवदर्चनादीनीहेत्कर्तुमिच्छेत् । नान्यैरिति योजना ॥ ६६ ॥

एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ।
गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ् नरः ॥ ६७ ॥

सत्यधर्मीया — एतैरन्यैरापत्कालोदितैर्वेदोक्तैः । वेदाः श्रुतयो वेदयन्तीति वेदाः स्मृतयश्च तदुक्तैः स्वकर्मभिः स्ववर्णाश्रमोचितैर्वर्तमानो भक्तिभाक् चेन्नरो गृहेऽपि सन् अस्य हरेर्गतिं स्थानं ज्ञानं वा यायात्प्राप्नुयादुपैति वा । अस्य गतिं परमहंसस्येति वा । प्रस्तुतत्वात् । गृहेऽपीति पदस्वारस्याच्च । यद्वक्ष्यति च न्यासिनामियादिति । तच्छब्दस्तु परमात्मपरामर्शकः । सा भक्तिः पूर्वोक्ता तद्भागिति वा ॥ ६७ ॥

मन्दनन्दिनी — वेदोक्तैरेतैरुक्तैर्गृहस्थधर्मैः । अन्यैश्च स्वकर्मभिर्गृहे वर्तमानोऽपि । अस्य गतिं भगवतो गतिं तद्भक्तिभाङ्नरः । यायादिति योजना ॥ ६७ ॥

यथा हि यूयं नृपदेवदुस्त्यजादापद्गणादुत्तरिता ननु प्रभो ।
यत्पादपङ्केरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतुः ॥ ६८ ॥

सत्यधर्मीया — हरित एव दुरिततरणमिति त्वदनुभवारूढं मदनुभवारूढं चेति कैश्चित् श्लोकैराह ॥ यथा हीति ॥ हे प्रभो । नृपाश्चेतरे च देवाश्च तैः दुस्त्यजात्त्यक्तुमशक्यादापद्गणाद्यूयं यथा उत्तरतातरत । उत्तरिताः उत्तारिताः । ननु निश्चितम् । यत्पादपङ्केरुहसेवया यस्य कृष्णस्य पादावङ्घ्री एव पङ्केरुहे तयोः सेवया निर्जितदिग्गजो निर्जिता दिशन्ति समसमरमिति दिशः शत्रवस्तेषु श्रेष्ठा येन सः । भवान्क्रतुं यज्ञं आहर्षीत्कृतवान्यथा तथा संसारादतरत् । एष्यन्निश्चयादेवमुक्तिः । तस्य सेवा कर्तव्येति शेषो वा । दिग्गजशब्दस्तत्पालोपलक्षक इति वा ॥ ६८ ॥

मन्दनन्दिनी — गृहस्थाश्रमधर्माचरणे धर्मराजमेवोदाहरति ॥ यथेति । हे प्रभो । यत्पादपङ्केरुहसेवया यूयम् । हे नृपदेव । दुस्त्यजादापद्गणादुत्तारिताः । ननु । यथा भवान्निर्जितदिग्गजः । दिग्गजशब्देन दिगन्तो लक्ष्यते । निर्जितदिगन्तः सन् । क्रतुं राजसूयमहार्षीदकार्षीत् । अस्य गतिं यायादिति पूर्वेण योजना ॥ ६८ ॥

अहं पुराऽभवं कश्चिद् गन्धर्व उपबर्हणः ।
नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६९ ॥

तात्पर्यम् — अतीतमहाकल्पे अतीतब्रह्मकल्पे । 'ब्रह्मकालः परश्चेति महाकल्पश्च कीर्तित' इति च ॥ ६९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचिते श्रीमद्भागवतसप्तमस्कन्धतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

इति श्रीमद्भागवततात्पर्ये सप्तमस्कन्धः समाप्तः ॥ ७ ॥

सत्यधर्मीया — नाम्नातीते महाकल्प इति श्लोके वराहकल्पापेक्षयाऽतीते पाद्मे कल्प इति भ्रान्तिनिरासाय स्वयमनूद्य व्याकृत्य चाभिधानमभिधत्ते । अतीते महाकल्पे अतीतब्रह्मकल्पे (काले) । ब्रह्मकालः परश्चेति महाकल्पश्च कीर्त्यत इति चेति ॥ अथ श्लोकार्थः ॥ पुराऽतीते महाकल्पे ब्रह्मकल्पे नाम्नोपबर्हणो गन्धर्वाणां सुसम्मतः । गान्धर्व्यां विद्यायाम् । कश्चिदिति स्वाहङ्कृतिन्यक्कृत्यै । अन्यथा नाम्नोपबर्हण इतिवद्गन्धर्वाणां सुसम्मत इति चासङ्गतं स्यात् । अहं अभवम् ॥ ६९ ॥

मन्दनन्दिनी — स्वस्य ब्रह्मपुत्रतां वक्तुं स्ववृत्तान्तमाह ॥ अहमिति । नाम्नोपबर्हणः । अतीते महाकल्पे । अत्र तात्पर्यम् ॥ अतीते इत्यादि ॥ ६९ ॥

रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः ।
स्त्रीणां प्रियतमो नित्यं मतस्तत्पुरलम्पटः ॥ ७० ॥

सत्यधर्मीया — तत्पुरलम्पटस्तासां पुराण्यङ्गानि तेषु लम्पटस्तदालिङ्गनाद्यासक्तमनाः । पुरं पुरि शरीरे चेति विश्वः ॥ ७० ॥

मन्दनन्दिनी — पेशलमवयवमार्दवं सौगन्ध्यं तैः प्रियदर्शनं यस्य सः ॥ ७० ॥

एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः ।
उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥

सत्यधर्मीया — विश्वसृग्भिः प्रजापतिभिः ॥ ७१ ॥

मन्दनन्दिनी — विश्वसृग्भिर्दक्षादिभिः प्रजेश्वरैः ॥ ७१ ॥

अगायं तद् विदित्वाऽहं स्त्रीभिः परिवृतो गतः ।
ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥ ७२ ॥

सत्यधर्मीया — तत् आव्हानम् । स्त्रीभिः परिवृतो गतः सन्नगायम् । विश्वसृजो मे मम तद्धेलनं स्वपुरतस्तरुणीभिः सम्भूय गानरूपम् । ओजसा तपःसापर्थ्येन शेपुः ॥ ७२ ॥

मन्दनन्दिनी — तद्विदित्वाऽहमगायम् । तच्च गानं मदादिपूर्वकमिति ज्ञेयम् । तच्च हेलनं ज्ञात्वांऽजसा शेपुरिति योजना ॥ ७२ ॥

याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ।
तावद् दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्
शुश्रूषयाऽनुसङ्गेन प्राप्तोऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥

सत्यधर्मीया — तं शापमुपपादयति ॥ याहीति ॥ इति शेपुरित्यन्वयः । तावदुक्त्युत्तरक्षण एव दास्याम् । साऽपि न यादृशतादृशीति शंसति ॥ तत्रापि ब्रह्मवादिनामिति । अहं जज्ञे शुश्रूषया मातुर्ब्रह्मवादिनां सेवया । अनुषङ्गेण मम तीव्रभक्त्या । शुश्रूषया ममैव सेवयाऽनुषङ्गेण तीव्रस्नेहोऽनुषङ्गोऽथ नैरन्तर्यानुसेवनमित्यभिधानात् । यथा स(त)त्पादपङ्केरुहसेवया भवांस्तथाऽहं ब्रह्मपुत्रतां प्राप्त इति योजना ॥ ७३ ॥

मन्दनन्दिनी — शापप्रकारमाह ॥ याहीति । तत्रापि शूद्रजन्मन्यपि । अनुषङ्गेन भक्त्या । तीव्रस्नेहोऽनुषङ्गोऽथ नैरन्तर्यानुवेशनमित्यभिधानात् ॥ ७३ ॥

धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः ।
गृहस्थो येन पदवीमञ्जसा न्यासिनामियात् ॥ ७४ ॥

सत्यधर्मीया — न्यासिनां परमहंसानाम् । निवृत्तिमार्गस्थानामिति वा । गतिं वैकुण्ठं भगवदवगमं वा ॥ ७४ ॥

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियान्ति ।
येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ७५ ॥

सत्यधर्मीया — यूयमित्यादिश्लोकत्रयं प्राग्विवृतम् ॥ ७५, ७६, ७७ ॥

मन्दनन्दिनी — यूयमिति । येषां गृहान् मुनयोऽभियान्ति । तथा साक्षाद्गूढं मनुष्यलिङ्गं परं ब्रह्म आवसत इति । तस्माद्यूयं नृलोके भूरिभागा बत ॥ ७५ ॥

स वा अयं ब्रह्म महद् विमृग्यं
कैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृद् वः खलु मातुलेय
आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥

मन्दनन्दिनी — भगवन्तं कृष्णमेव साक्षात्परब्रह्मत्वेनोपदिश्य तत्सम्बन्धबाहुविध्यात्पार्थान् स्तौति ॥ स वाऽयमिति । कैवल्येन जडामिश्रतया निर्वाणसुखानुभूतिः स्वरूपसुखानुभवो यस्य स तथा । एतादृशः सोऽयं महद्भिमृग्यं परं ब्रह्म । एतादृशः कृष्णो वः प्रियसुहृन्मातुलेय आत्मा स्वामी । अन्तर्यामी । अर्हणीयो विविधकृदाज्ञाकारी गुरुश्चेति योजना ॥ ७६ ॥

न यस्य साक्षाद् भवपद्मजादिभी
रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः
प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥

मन्दनन्दिनी — स्वस्य भगवत्प्रीतिं प्रार्थयते नारदः ॥ नेति । यस्य रूपं वस्तुतया साकल्येन भवादिभिर्धिया मनसोपवर्णितम् । स एष सात्वतां पतिः । मौनेन मननेन भक्त्योपशमेन विषयालम्बुध्द्या पूजितः प्रसीदतामिति योजना ॥ ७७ ॥

श्रीशुक उवाच–

इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ।
पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥

सत्यधर्मीया — कृष्णम् । चात् मुनिं च ॥ ७८ ॥

मन्दनन्दिनी — अनन्तरं वृत्तमाह शुकः ॥ इतीति । सुप्रीतो भक्त्युद्रेकयुक्तः प्रेमविह्वलः प्रेम्णा विगतविषयस्मरणः ॥ ७८ ॥

कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः ।
श्रुत्वा कृष्णं परं ब्रह्म पार्थाः परमविस्मिताः ॥ ७९ ॥

सत्यधर्मीया — उपामन्त्र्य गत्वा गच्छमीत्युक्त्वा । श्रुत्वा नारदादिति शेषः । पार्थाः पञ्च ॥७९॥

मन्दनन्दिनी — उपामन्त्र्य स्वाश्रमं गच्छामीत्युक्त्वा ॥ ७९ ॥

इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ।
देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥

इति श्रीमद्भागवते सप्तमस्कन्धे पञ्चदशोऽध्यायः ।

सत्यधर्मीया — वंशाः शाखोपशाखाभेदाद्बहुवचनम् । यत्र वंशेषु स्थावरा अपि सन्तीत्यचरा इत्युक्तिः । प्रकीर्तिताः । प्रेणकीर्तनमस्य मङ्गलप्रकर्षहेतुतामभिप्रैतीत्यशेषमतिमङ्गलम् ॥ ८० ॥

सप्तमस्कन्धकन्धौ च विहारं गुरुसत्तरिः ।
कृतवान्सत्यधर्माव्हः कोऽपि कौपीनभाग्यभाक् ॥ १ ॥
अनेनानेनसां नाथो दययेदुदयेषणः ।
रामो रामारमोऽस्मासु व्यासो व्यासां दृशं दिशन् ॥ २ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीमद्भागवतविवृतौ सप्तमे पञ्चदशोऽध्यायः ॥ ७-१५ ॥

मन्दनन्दिनी — पूर्वं पृष्ठा दाक्षायणीवंशा उपवर्णिता इति सूचयति शुकः ॥ इतीति । यत्र वंशेषु देवासुरमनुष्याद्या लोका जनाः । एषां वंशाश्चराचराश्च त इमे वंशा इत्युक्ताः प्रकारेण पृथक् प्रकीर्तिताः । इति योजना ॥ ८० ॥

हिरण्यकशिपोर्वक्षोविदारिनरकेसरी ।
शरण्यः सर्वभक्तानां मुदामाप्तिं तनोति मे ॥ १ ॥
नभःकृष्णभवाष्टम्यां दृष्ट्वेमां मन्दनन्दिनीम् ।
स्मयन्नानन्दसान्द्रोऽयं नन्दयेन्नन्दनन्दनः ॥ २ ॥
व्यासप्रोक्तं भागवतं पूर्णप्रज्ञप्रकाशितम् ।
अत्र टीका मदीयाऽपि तुष्ट्यै दूर्वेव मापतौ ॥ ३ ॥
प्रमादबहुले ग्रन्थे गुणानेवान्ववेषयेत् ।
ग्रावग्रामयुतेह्यद्रावन्वेषयति हीरकम् ॥ ४ ॥
यो तनोत्प्रभया विष्णुतत्त्वकर्मविनिर्णयौ ।
तमोनिरासाच्च तमाचार्यसूर्यमहं भजे ॥ ५ ॥
सृतिकूपे निपतितं द्विजमुद्धृत्य मापतेः ।
पदाम्बुजे जहसन्तं भुवनेन्द्रमहं भजे ॥ ६ ॥

इति श्रीभागवतटिप्पण्यां व्यासतत्वज्ञकृतायां मन्दनन्दिन्यां सप्तमस्कन्धे पञ्चदशोऽध्यायः ॥ ७—१५ ॥

॥ समाप्तश्चायं स्कन्धः ॥

श्री सत्याभिनवतीर्थविरचिता

दुर्घटभावदीपिका

अथ प्रथमोऽध्यायः

प्रियः सुहृदित्यस्य प्रियः प्रियकृत्पित्रादिस्थितः । सुहृत् प्रत्युपकारमनपेक्ष्योपकारकृदित्यर्थः । एतेन भगवति सर्वभूतकर्तृकप्रीतिविषयत्वस्य बाधितत्वात् । प्रियकृत्प्रिय इति वचनात् । प्रिय इत्यस्य प्रियकृदित्यर्थो वक्तव्यः । सुहृदित्यनेन पुनरुक्तमिति दूषणं परिहृतम् । पित्रादीनामपि सुहृत्त्वात् । यद्भगवत एव सुहृत्त्वमुक्तं तदनुपपन्नमिति शङ्कां परिहर्तुं प्रियशब्देन प्रियकृत्पित्रादिस्थितत्वं लक्षणया गृहीत्वा प्रिय इत्यस्य भगवानेव प्रियेषु पित्रादिषु स्थित्वा प्रत्युपकारमनपेक्ष्योपकारं करोति । अतो भगवानेव सुहृदिति यदुक्तं तत्सम्यगुक्तमिति तात्पर्यार्थो वक्तव्य इत्यभ्युपगमात् ।। १ ।।

अत्रेयं योजना । स भगवान् तत्र तत्रेंद्रवृत्रादौ । तान्निमित्तीकृत्येति शेषः । इन्द्रवृत्रादिनिष्ठ-सत्त्वरजस्तमोगुणान्निमित्तीकृत्योभयसिद्धिं बाध्यबाधकतालक्षणोभयनिष्पत्तिमाप्नुयात्कुर्यात् । अयं भावः । भगवानिन्द्रादिनिष्ठसत्त्वगुणं निमित्तीकृत्य वृत्रादीनिन्द्रादिबाध्यतावच्छिन्नान्करोति । एवं गुणानुसारीप्रवृत्तिमत्वान्न भगवान्विषम इति । नन्विन्द्रवृत्रादौ सत्त्वादिगुणाः कथमागता इत्यत आह ।। लिङ्गात्मन इति । लिङ्गात्मनो लिङ्गशरीरसम्पन्नस्येन्द्रवृत्रादेर्लिङ्गगुणा लिङ्गशरीरगुणाः सत्त्वादयः सन्ति च । चशब्द एवार्थे । संत्येवेति । लिङ्गशरीरसम्बन्धादिन्द्रवृत्रादीनां सत्त्वरजस्तमोगुणा भवन्तीति भावः ।। ११ ।।

हे राजन्! कलेवरं शरीरं प्रधानपरयोर्लक्ष्मीनारायणयोः सकाशात्तदविवेकेन स्वस्वकीयाभेदेन । स्वस्वकीयातयेति यावत् । कल्पितं ज्ञातम् सत् निन्दनस्तवसत्कारन्यक्कारार्थं निन्दनस्तव-सत्कारन्यक्काराणामर्थः प्रयोजनं कार्यमिति यावत् । यस्मात्तव निन्दनस्तवसत्कारन्यक्कारार्थम् । निन्दनादिभिः दुःखसुखजनकमिति यावत् । हे पार्थिव! भूतानमिह देहे ममाहमिति तदभिमानेन तेन भगवदुत्पादितेनाभिमानेन हिंसा हिंसया दण्डपारुष्ययोः सकाशादपि । वैषम्यमित्यनेन वैषम्यकार्यं दुःखं गृह्यते । वैषम्यं दुःखं भवति । यद्यस्मात्कारणादस्वकीये देहे ममाहमित्यभिमान ईश्वरेण निबद्धः तत्तस्मात्कारणाद् वधात् देहस्य वधात् । भूतैः प्राणिनां देहवधः कर्तृ । प्राणिनां वधः क्रियते । यस्य परमेश्वरस्य कैवल्यात्केवलत्वात् । तथाशब्द एवार्थे । अस्वकीयदेहाद्यभावादेवाभिमानो ममाहमिति भ्रमो नास्ति । तस्यास्य सर्वप्रमाणप्रमितस्याखिलात्मनो रमाब्रह्माद्यखिलनियामकस्याकर्तुः न विद्यते कर्ता यस्य सोऽकर्ता यस्य । स्वतन्त्रस्येति यावत् । परस्य परमेश्वरस्येदमेषा हिंसा ।

हिंसाशब्देन हिंसाकार्यं दुःखं गृह्यते । इदं दुःखम् । उपलक्षणमेतत् । सुखं च केन कल्प्यत इति । अयं भावः । नारायणो लक्ष्मीं निमित्तीकृत्यास्वकीयदेहेऽहंममतालक्षणं भ्रममुत्पाद्य स्तवसत्काराभ्यां सुखं निन्दनन्यक्कारहिंसादिभिर्दुःखं जनयति । भगवतो देहगुणादीनां स्वात्मकत्वाज्जगतः स्वकीयत्वान्ममाहमिति ज्ञानस्य प्रमात्वेन ममाहमिति भ्रमस्याभावात्स्वातन्त्र्याच्च स्तवसत्काराभ्यां सुखं निन्दनादिभिर्दुःखं न भवतीति ॥ २४-२८ ॥

हिरण्यकशिपुर्भगवत्प्रियं नारायणप्रियं पुत्रं प्रह्लादं जिघांसुः हंतुमिच्छुः सन् मृत्युहेतवे मृत्युहेतुभिर्मृत्युहेतुभिर्गजसर्पविषादिभिर्नानायातना अकरोदिति । तेन मृत्युहेतव इत्येतज्जिघांसुरित्यनेन पुनरुक्तमिति दूषणस्यानवकाशः । मृत्युहेतव इति चतुर्थ्यैकवचनं तृतीयाबहुवचनादेश इत्यङ्गीकृत्य मृत्युहेतव इत्यस्य हेतुभिर्गजसर्पविषादिभिरित्यर्थ इत्युक्तत्वात् ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ ७-१ ॥

अथ द्वितीयोऽध्यायः

भो दानवदैतेया! मम वचः शृणुत । हे द्विमूर्धन्मम वचः शृणुत शृणु । हे त्र्यक्ष मम वचः शृणु । हे शम्बर मम वचः शृणु । हे शतबाहो मम वचः शृणु । हे हयग्रीव मम वचः शृणु । हे नमुचे मम वचः शृणु । हे इल्वल मम वचः शृणु । हे पुलोमन्मम वचः शृणु । हे शकुनादयो मम वचः शृणुत । अनन्तरं मद्वाक्यश्रवणानन्तरं मदुक्तं सर्वैराशु क्रियताम् । चिरं विलम्बो मेति । एतेन द्विमूर्धन्नित्यादिसम्बुद्ध्येकवचनांतानां शृणुतेति बहुवचनांतेनानन्वय इति दूषणं परास्तम् । शृणुतेत्यर्थवशादेकवचनान्तं सत् द्विमूर्धन्नित्यद्येकवचनान्तैः सम्बध्यत इत्यङ्गीकारात् । एतेनैव दानवदैतेया इत्यनेन सर्वदानवदैतेयानां सम्बोधनं कृत्वा शृणुतेत्युक्तत्वात् द्विमूर्धन्नित्यदिकं व्यर्थमिति दूषणं निरस्तम् । दानवदैतेया इत्यनेन सर्वान्दानवदैतेयान्सामान्यतः सम्बोध्य शृणुतेत्युक्त्वा सन्तोषार्थं प्रधानान् द्विमूर्ध्यादिपुलोमान्तान्नामग्रहणपूर्वकं पुनः सम्बोध्य शृण्वित्युक्त्वा शकुनादय इत्यनेन शकुनप्रधानावशिष्टांश्च पुनः संबोध्य शृणुतेत्युक्तमित्यभ्युपगमात् ॥ ४-५ ॥

अत्रोपधावनैरित्यस्योप सम्यक् धावनं पलायनं येषां त उपधावनास्तैरित्यर्थः । तेनोपधावनैरित्यस्य पूजनैरित्यर्थो वक्तव्यः । तथा च भजन्तं भजमानस्येत्यनेन पुनरुक्तिरिति दूषणं प्रत्युक्तम् । उपधावनैरित्यस्य पूजनैरित्यर्थमनुक्त्वा सम्यक् पलायनं कुर्वाणैरित्यर्थ इत्युक्तत्वात् ॥ ६,७ ॥

अत्रेयं योजना । यथा प्रचलता प्रचलनं कुर्वताऽम्भसा निमित्तेन तरवः प्रतिबिम्बतरवश्चलाश्च न विशिष्टा भवन्ति । प्रतिबिम्बचलनेनाचलाः । अबुधेनानुमीयन्त इति शेषः । तरवश्चला इत्यस्यावृत्तिः ।

प्रतिबिम्बचलनेनाचला अपि तरवस्तटस्था बिम्बतरवश्चला इव चलनविशिष्टा इवाबुधेनानुमीयन्ते । बिम्बतरुषु चलनस्याभावेऽपि चलनमस्तीत्यानुमानिकभ्रमो भवतीति यावत् । यथेत्यस्यैवमुत्तरेणान्वय इति । तेन तरवोऽपि चला इवेत्यनेन किं प्रतिबिम्बचलनप्रतीतिवेलायां प्रतिबिम्बचलनेन बिम्बानां चलनमबुधेनानुमीयत इत्यङ्गीकृत्यानुमानिकबिम्बचलनप्रतीतेर्भ्रमत्वमुच्यत इत्यङ्गीकारात् । अत्र तात्पर्ये प्रमाणमुदाहृतम् ॥ २३ ॥

अत्र हे प्रभो भगवानकरुणेन विधात्राऽकरुणेन नोऽस्माकं दृशां चक्षुषामगोचरमगोचरत्वं प्रणीतः प्राप्त इत्येतदहो आश्चर्यम् । धिक् अस्मज्जन्म धिगित्यर्थः । तेन दृशामगोचरत्वं प्रणीत इति वक्तव्ये दृशामगोचरं प्रणीत इति कथनमनुपपन्नमिति चोद्यं परिहृतम् । अगोचरमिति निर्देशो भावप्रधान इत्यभ्युपगमात् ॥ ३३ ॥

यत्रोद्भवस्तत्र गतमित्यस्येयं योजना । यत्र यस्मिन्देशे उद्भव उत्पत्तिः । तत्रेत्यनन्तरं पूर्वोत्तरकालयोरदर्शनमिति शेषः । तत्र देशे पूर्वोत्तरकालयोरदर्शनं गतमित्युत्पत्त्यनन्तरमेव दर्शनमुत्पत्तेः पूर्वदर्शनमेव । एवं पश्चादप्यदर्शनं गत इति भावः ॥ ता० अर्थः ॥ यत्रोद्भवस्तत्र गतमिति प्रतीकधारणम् । तत्रेत्यतः परमध्याहार्यं प्रदर्श्यान्वयं दर्शयति ॥ अदर्शनं गतमिति । इहेत्यतः परमुत्पाददर्शनमिति शेषः ॥ अदर्शनादिति ल्यब्लोपनिमित्ता पञ्चमी । अदर्शनाददर्शनं प्राप्येहास्मिन्देशे उत्पत्त्या दर्शनमायातः प्राप्तः पुनश्च केवलं पूर्वमनन्तरं चादर्शनं गत इति ॥ ३७ ॥

अन्यतमोऽन्यो जीवाद्विरुद्धस्वरूपतमो जीवादतिशयित आत्मा चेतनो नारायणस्तत्र तस्यां प्रकृतौ स्थितोऽपि तस्याः प्रकृतेर्गुणैः सत्त्वादिभिर्न बद्ध्यत इत्यर्थः । एतेन यथा जीवादीश्वरस्य विरुद्धस्वरूपत्वं तथा जीवस्यापीश्वराद्विरुद्धस्वरूपत्वादन्यतमशब्देन नारायणग्रहणमनुपपन्नम् । तमप् प्रत्ययो व्यर्थश्चेति दूषणं निरस्तम् । अन्यतम इत्ययं न तमप् प्रत्ययः किंत्वतिशयार्थकस्तमशब्दः इत्यङ्गीकृत्य तमशब्देन परमेश्वरस्य जीवादतिशयितत्वमुक्त्वा परमेश्वराज्जीवेऽतिशयितत्वाभावेन जीवव्यावृत्तिः क्रियत इत्यङ्गीकारात् ॥ ता० अर्थः ॥ अन्यतम आत्मेति पदद्वयानुवादस्तम-शब्दस्यार्थमन्वयं चाह ॥ परमात्मेति । अत्र प्रमाणमाह ॥ सुविरुद्धस्वरूपत्वादिति । हरिर्जीवात्सु-विरुद्धस्वरूपस्तस्य भावः सुविरुद्धस्वरूपत्त्वं तस्मादन्यतम इत्युच्यत इति ॥ ४१ ॥

अत्र स्वभावो नित्यत्वादिस्वभावः । शोचतां शोचद्भिः शोककर्तृ । शोक इति यावत् । अन्यथा कर्तुं न शक्यत इत्यर्थः । एतेन शोकत्यागार्थं स्वभावः शोकैरन्यथा कर्तुं न शक्यत इति वक्तव्ये शोचतामिति कथनमयुक्तमिति चोद्यं परिहृतम् । शोचतामिति षष्ठी शोचद्भिरिति तृतीयादेशो

इत्यङ्गीकृत्य शोचतामित्यस्य किंवद्भिरित्यर्थमुक्त्वा शोकैरिति तात्पर्यार्थ इत्युक्तत्वात् । अत एवाचार्यैर्न शोकेन प्रयोजनमिति फलितार्थ इत्युक्तम् ॥ ४९ ॥

इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ ७-२ ॥

अथ तृतीयोऽध्यायः

अन्यथा परमेष्ठ्यासनसम्पादनस्याशक्यत्वेऽहमोजसा सामर्थ्येनेदं परमेष्ठ्यासनं पूर्वं पूर्वमप्ययथाऽयथावस्थितम् । अविद्यमानमिति यावत् । क्रियाविशेषणमेतत् । अविद्यमानं यथा भवति तथा विधास्ये करिष्य इत्यर्थः । अयं भावः । परमेष्ठ्यासनं निःशेषं नाशयित्वा पूर्वमप्यविद्यमान-मिदमिति बुद्धिमुत्पादयामीति । अनेनेदमविद्यमानं विधास्य इति वक्तव्येऽयथापूर्वं विधास्य इति कथनमनुपपन्नमिति दूषणस्यानवकाशः । अयथापूर्वं विधास्य इत्यनेन कारणनाशेन निःशेषनाशं करिष्य इत्युच्यत इत्यङ्गीकारात् ॥ १२ ॥

इति निश्चित्य निर्बन्धं निर्बन्धविशिष्टम् । क्रूरमिति यावत् । परमं तप आस्थित इति शुश्रुमेत्यर्थः। हिरण्यकशिपुनाऽयोग्यं कर्म कथं कृतमित्याशङ्का ''जानतामपि कर्तव्यं कर्मात्मसदृशं सदा'' इत्यादि नारदीयप्रमाणोदाहरणेनाचार्यैरेवापहृता । तस्यार्थः ॥ तत्र तेषु जीवेषु मध्ये केचन सदाऽऽत्म-सदृशमात्मयोग्यं कर्म कर्तव्यमिति जानतामपि जानन्तोऽप्यात्मसदृशाज्ञानादिदमात्मयोग्यमिति भ्रमादसदृशमात्मायोग्यं कर्म कुर्युः । केचनेदं कर्मासदृशमात्मायोग्यमिति जानन्तोऽपि रागाद्यै-र्विमोहिता वा विमोहिता एवासदृशं कर्मात्मायोग्यं कुर्युरित्येतत् हि प्रमाणप्रसिद्धम् । उक्तस्यापवाद-माह ॥ ऋते विभुमिति । विभुं चतुरास्यमृतेऽसदृशं कर्म कुर्युरिति पूर्वेण सम्बन्धः । चतुर्मुखः प्रायोऽयोग्यं कर्म न करोति । कदाचिन्निमित्तवशात्करोतीति भ्रमं वारयितुमुक्तं विवृणोति ॥ स इति । चतुर्मुखोऽयोग्यं कर्म कथंचन केनापि निमित्तेन न कुर्यादिति । एतेन जानन्तोऽपीति वक्तव्ये जानतामपीति कथनमनुपपन्नमिति दूषणं निरस्तम् । आत्मसदृशाज्ञानशब्देन भ्रमरूपज्ञानस्य ग्रहणात् ॥ १३ ॥

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ७-३ ॥

अथ चतुर्थोऽध्यायः

महामरकता भुव इत्यस्य, यत्र भुवो भूमयो महामरकता महामरकतानीत्यर्थः । एतेन भुव इति किं षष्ठ्येकवचनं किं वा प्रथमाबहुवचनम् । नाद्यः । मरकतशब्दात् भावे तल् प्रत्यये मरकततेति वक्तव्यत्वात् । न द्वितीयः । गारुत्मन्तं मरकतमित्यभिधाने मरकतशब्दस्य नपुंसकत्वस्योक्तत्वेन मरकतानीति वक्तव्यत्वादिति दूषणं परिहृतम् । भुव इति प्रथमाबहुवचनमित्यङ्गीकृत्य मरकतानीत्यत्र सुपां सुलुगिति जसो डादेशमङ्गीकृत्य मरकतेत्युक्तमित्यभ्युपगमात् ॥ ९ ॥

वाण्यरूपा मेघनिःस्वनेत्यस्यारूपा प्राकृतरूपरहितभगवत्सम्बन्धिनी मेघनिःस्वना मेघशब्द-वद्गंभीरशब्दत्वावच्छिन्ना वाणीत्यर्थः । एतेन वाण्या रूपप्रसक्तेरेवाभावादरूपेति रूपनिषेधोऽनुपपन्न इति दूषणं निरस्तम् । प्राकृतरूपराहित्ये भगवद्वाचकादरूपशब्दात् मत्वर्थेऽचमङ्गीकृत्यारूपेत्यनेन वाण्या भगवत्कर्तृत्वमुच्यत इत्यभ्युपगमात् । एतेनैव वाण्याः शब्दविशिष्टत्वाभावात् मेघनिः-स्वनेत्यनुपपन्नमिति दूषणं निरस्तम् । निःस्वनशब्दस्य भावप्रधानत्वमङ्गीकृत्य मेघशब्दवन्निःस्वनत्वं यस्याः सेति बहुव्रीहिसमासं चाङ्गीकृत्य मेघनिःस्वनेत्यस्य मेघशब्दवद्गंभीरशब्दत्वविशिष्टेत्यर्थ इत्युक्तत्वात् ॥ २५ ॥

मद्दर्शनं मदपरोक्षज्ञानं यदा भवति तदारभ्य भूतानां मद्दर्शनं सर्वश्रेयोपपत्तये सर्वश्रेयःप्राप्तये । भवतामपि मद्दर्शनं जातमस्ति । अतो मा भैष्टेति भावः । एतेन वर्तमानकाले भगवद्दर्शनाभावात् मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तय इत्यनुपपन्नमिति दूषणं परास्तम् । भूतकालीनदर्शनाभिप्रायेण मद्दर्शनं हि सर्वभूतानां सर्वश्रेयोपपत्तय इत्यस्य प्रवृत्तत्वात् ॥ २६ ॥

प्रह्लादः, सर्वभूतानां सर्वजीवानां मध्ये एक एवात्मवत्परमात्मवत्प्रियाणां भगवत्प्रियाणां सुहृत्तमोऽतिशयेनोपकारकृन्निरपेक्षोपकारकृदित्यर्थः । एतेन प्रह्लादस्य दैत्यान्प्रति सुहृत्वाभावात्सर्व-भूतानां सुहृत्तम इत्यनुपपन्नमिति दूषणं परास्तम् । एतेनैव प्रह्लादस्य सर्वभूतप्रीतिविषयत्वस्य बाधितत्वात् प्रिय इत्यस्य प्रियकृदित्यर्थो वक्तव्यः। ततश्च प्रियेत्येतत्सुहृदित्यनेन पुनरुक्तमिति दूषणमपहस्तितम् । प्रह्लादस्य भगवत्साम्यं कथमित्याशङ्काऽऽचार्यैस्तात्पर्ये परिहृता ॥ ३२ ॥

अवस्तुदृगित्यस्यानित्या इति पश्यतीत्यर्थः । एतेन गुणानां मिथ्यात्वाभावादवस्तुदृगिति कथन-मनुपपन्नमिति दूषणं परास्तम् । निवासार्थकाद्वसेः कर्तरि तुन् प्रत्यये वस्त्विति रूपं निष्पन्न-मित्यङ्गीकृत्य सङ्कोचे कारणाभावात्सर्वदा वसतीति व्युत्पत्त्या वस्तुशब्दस्य नित्यार्थकत्वमङ्गीकृत्या-वस्तुशब्दस्यानित्यार्थकत्वस्योक्तत्वात् ॥ ३४ ॥

इति श्रीभागवतटिप्पण्यां चतुर्थोध्यायः ॥ ७-४ ॥

अथ पञ्चमोऽध्यायः

जहासेत्यनन्तरं भृत्यान्प्रोवाचेति शेषो द्रष्टव्यः । एतेन बुद्धिर्बालानामित्यादिकमनन्वितमिति दूषणं परास्तम् । उवाचेति शेषमङ्गीकृत्य तेनान्वय इत्यङ्गीकारात् ॥ ६ ॥

गृहमानीतमाहूयेत्यतः पूर्वं दैत्यभृत्यैरिति शेषो ज्ञातव्यः ॥ ८ ॥

आत्मनिवेदनमित्येतत्स्वात्मवाचकशब्दः स्वात्मान्तःस्थत्वस्वात्मनियामकत्वयोर्लक्षकः इत्यङ्गीकृत्य स्वात्मान्तःस्थत्वं स्वात्मनियामकत्वं च सङ्कोचे कारणाभावात्सार्वकालिकं विवक्षितमिति चाङ्गीकृत्य संसारे मुक्तौ च स्वात्मान्तःस्थत्वस्वात्मनियामकत्वाभ्यां निवेदनं सम्यग्ज्ञानम् । निर्णयात्मकं ज्ञानमिति यावदिति व्याख्येयम् । ता० योजना । आत्मस्थत्वेनेत्यात्मशब्दः स्वात्मस्थत्वेनेत्युपलक्षणम् । आत्मनियामकत्वेनेत्यपि द्रष्टव्यम् । आत्मस्थत्वमात्मनियामकत्वं च सङ्कोचे कारणाभावात्सार्वकालिकं विवक्षितम् । वेदनमिति वेदन शब्देन मुख्यामुख्यन्यायेन निर्णयात्मकं ज्ञानं विवक्षितम् । तथा चात्मस्थत्वेन निवेदनमित्यनेन संसारे मुक्तौ च स्वात्मस्थत्वस्वात्मनियामकत्वाभ्यां निर्णयात्मकं ज्ञानमित्यर्थ उक्तो भवति । उक्तार्थे प्रमाणमाह ॥ मुक्तस्यापीति । आत्मनिवेदनमित्यत्रात्मशब्दः स्वात्मवाचीति भावेन ममेत्युक्तम् । निवेदनमिति निशब्दार्थः सम्यगिति । ज्ञानस्य सम्यक्त्वं निर्णयात्मकत्वेनेति द्रष्टव्यमिति । तेनात्मनिवेदनमित्यनेन मुक्तस्यापि ममान्तःस्थ इति प्रमाणानुसारेणार्थस्यास्माभिरुक्तत्वात् । एतेनैवाचार्यैरात्मनिवेदनमित्यस्योदाहरिष्यमाण''मुक्तस्यापि ममान्तःस्थ'' इति प्रमाणानुसारेणार्थे वक्तव्ये आत्मस्थत्वेन वेदनमात्मनिवेदनमिति स्ववाक्ये व्याख्यानमनुपपन्नमिति दूषणं परिहृतम् । स्ववाक्यमपि प्रमाणानुसारीत्यस्यार्थस्योपपादितत्वात् ॥ २३ ॥

क्व तदात्ममान इत्यस्य प्रह्लादोक्तिनिमित्तस्वात्मापमानः कुत इत्यर्थः । एतेन हिरण्यकशिपुनाऽपमानस्य कृतत्वात् मम प्रह्लादोक्तिनिमित्तकापमानः कुत इति वक्तव्ये क्व तदात्ममान इति कथनमनुपपन्नमिति दूषणं परिहृतम् । स्वात्मवाचकात्मशब्दस्य ममेत्यर्थे तात्पर्यमङ्गीकृत्योपसर्गाणां द्योतकत्वादपमानादिशब्दवन्मानशब्दस्याप्यपमानार्थकत्वमिति चाङ्गीकृत्य केतिशब्दस्य कुत इत्यर्थकत्वं चाङ्गीकृत्य क्व तदात्ममान इत्यनेन मम प्रह्लादसम्बन्धिविष्णुसर्वोत्तमत्वाद्युक्तिनिमित्तकापमानः कुत इत्यर्थ उच्यत इत्यङ्गीकारात् ॥ ता० । क्व तदात्ममान इत्यत्रात्मनो मान इति विग्रहमभिप्रेत्यात्मन इत्यस्यार्थमाह ॥ ममेति ॥ २८ ॥

छान्दसं शयो लुगभावं तिङा च तिङ इति झेस्तिपादेशं चाश्रित्याहनदिति प्रयुक्तम् । एतेन हन्तेर्लङि हननकर्तृणां बहुत्वात् लङो झीत्यादेशे हन्तेर्लुग्विकरणत्वाच्छपो लुकि अघ्नन्निति प्रयोक्तव्यं न त्वहनदितीति दूषणं परास्तम् ।। ४० ।।

हिरण्यकशिपुर्दीर्घतमामतिशयेन दीर्घां चिन्तां प्रह्लादहननोपायचिन्तां प्राप्तः सन् ततः प्रह्लादहननं कर्तुमुपायं नाभ्यपद्यत । अनन्तरं पुनश्चिन्तां प्राप्त इत्यर्थः । तेन तत्कर्तुं नाभ्यपद्यतेत्यत्र कर्म नास्तीति दोषानवकाशः । उपायमित्यस्य शेषेणोपायस्य कर्मत्वमित्युक्तत्वात् । एतेनैव चिन्तां प्राप्त इत्यस्य किमेष मे बह्वसाधूक्त इत्यादि वक्ष्यमाणचिन्तां प्राप्त इत्यर्थः किं वोपायचिन्तां प्राप्तः इत्यर्थः । नाद्यः । तत्कर्तुं नाभ्यपद्यतेत्यस्यासङ्गतत्वप्रसङ्गात् । न द्वितीयः । एष मे बह्वसाधूक्तः इत्यादेर-सङ्गतत्वप्रसङ्गादिति चोद्यं परिहृतम् । चिन्तां प्राप्तः इत्यस्यावृत्तिमङ्गीकृत्य चिन्तां प्राप्तः इत्यनेनैव प्रह्लादहननोपायचिन्तां प्राप्त इत्यर्थः । एष मे बह्वसाधूक्त इत्यादि वक्ष्यमाणचिन्तां प्राप्तः इत्यर्थो नोच्यत इत्यभ्युपगमात् ।। ४४ ।।

अयं प्रह्लादोऽप्रमेयानुभावोऽप्रमेयसामर्थ्योऽकुतश्चिद्भयः कुतोऽपि भयरहितोऽमरो मरणरहितः इत्येतन्नूनं निश्चितम् । एतद्विरोधेनैतस्य प्रह्लादस्य विरोधेन मे मृत्युः किं न भविता भवितैवेति । एतेन मृत्युर्भवितेत्यर्थसाधकानामप्रमेयानुभावत्वादिहेतूनामुक्तत्वात् मृत्युर्मे भवितैवेति वक्तव्यम् । मृत्युर्मे भविता न वेति कथनमनुपपन्नमिति दूषणमलग्नकं वेदितव्यम् । मत्युर्मे भविता न वेत्यत्र किंशब्दस्य शेषमङ्गीकृत्य वाशब्दस्यैवार्थकत्वं चाङ्गीकृत्य मृत्युर्मे भविता न वेत्यनेन मे मृत्युः किं न भविता किन्तु भवितैवेत्यर्थ उच्यत इत्युररीकरणात् । एतेनैवैवार्थकवाशब्देनैव मृत्युर्भवितैवेत्यवधारणस्य कृतत्वान्नूनमित्येतद्व्यर्थमिति दूषणं परास्तम् । नूनमित्यस्याप्रमेयानुभाव इत्यादिनाऽन्वयस्योक्तत्वात् ।। ४६,४७ ।।

अत्रेयं योजना । तथावन्निधेहीति पूर्वेण सम्बन्धः । इति पूर्वोक्तरीत्या गुरुपुत्रोक्तं पक्षमनुज्ञाय सम्यग्ज्ञात्वा । विचार्येति यावत् । गुरुपुत्रोक्तं पक्षं परित्यज्येदं वक्ष्यमाणं पक्षान्तरमब्रवीदिति । एतेनेदमब्रवीदिति पक्षान्तरस्य वक्ष्यमाणत्वेन गुरुपुत्रोक्तपक्षत्यागस्याभिप्रेतत्वात् । तथेति गुरुपुत्रोक्तमनुज्ञायेत्यनेन तथास्त्विति गुरुपुत्रोक्तमङ्गीकृत्येति कथनमनुपपन्नमिति दूषणं परास्तम् । तथेतिशब्दस्याध्याहृतेतिशब्देनान्वयमङ्गीकृत्य तथेतिशब्दस्य तावदित्यर्थकत्वं ''यावद्भार्गवः आगमिष्यति तावदिमं प्रह्लादं वरुणस्य पाशैर्बध्वा निधेहीति'' पूर्वोणान्वयं चाङ्गीकृत्येति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीदित्यनेन गुरुपुत्रोक्तं पक्षं परित्यज्येति शेषपूरणेनेति गुरुपुत्रोक्तं पक्षं विचार्य गुरुपुत्रोक्तं पक्षं परित्यज्य पक्षान्तरमब्रवीदित्यर्थ इत्यभ्युपगमात् ।। ५० ।।

इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ।। ७-५ ।।

षष्ठोऽध्यायः

कुशलः पुरषस्ततो मुकुन्दचरणाम्बुजभजनस्य क्षेमप्रदत्वाद्यं विष्णुम् । चशब्द एवार्थे । विष्णुमेवाश्रितः सन् क्षेमाय यतेतेत्यर्थः । एतेन विष्णुमाश्रित इति वक्तव्ये यमाश्रित इति कथनमनुपपन्नमिति दूषणं परास्तम् । अकयप्रविसम्भूमसखाहा विष्णुवाचका इति वचनात् यमितिशब्दस्य विष्ण्वर्थकत्वमङ्गीकृत्य यं विष्णुमित्यर्थस्योक्तत्वात् ।। १० ।।

अस्येयं योजना । योऽर्थः प्राणेभ्योऽप्यतिशयेनेप्सितोऽपेक्षितस्तदर्थतृष्णां को विसृजेत् । न कोऽपीत्येतत् नु निश्चितम् । अर्थस्य प्राणेभ्योऽतिशयेनेप्सितत्वमुपपादयति ।। यमिति । तस्करो यमर्थमुद्दिश्य प्रेष्ठैः प्रेष्ठानतिशयेन प्रियान् असुभिरसून्प्राणान् क्रीणाति त्यजति तथा सेवकस्तमर्थमुद्दिश्य प्रेष्ठान्प्राणांस्त्यजति । तथा वणिक् यमर्थमुद्दिश्य प्रेष्ठान्प्राणांस्त्यजति । तदर्थतृष्णां को विसृजेदिति पूर्वेण सम्बन्धः । एतेन प्राणेभ्योऽतिशयेनेप्सित इति वक्तव्ये प्राणेभ्योऽपीप्सित इति वचनमनुपपन्नमिति चोद्यस्यानवकाशः । अर्थतृष्णामित्यतः पूर्वं तदिति समस्तपदस्य शेष इत्यभ्युपगमात् । एतेनैव तस्कर इति पदस्य यमित्यादिपदैरन्वितत्वात्सेवको वणिगिति पदद्वयमनन्वितमिति चोद्यं परिहृतम् । यमित्यादिपदानामावृत्तिमङ्गीकृत्य सेवको वणिगिति पदयोः प्रत्येकमन्वय इत्यङ्गीकारात् । एतेनैवासून्प्रेष्टानिति वक्तव्यमिति दूषणं परिहृतम् । असुभिः प्रेष्ठैरिति तृतीया द्वितीयादेश इत्यङ्गीकारात् ।। १६ ।।

पितरौ च दीनावित्यत्र पितरावित्येवोक्तेः सत्पित्रोरपि त्यागो विहित इत्यतो दीनावित्युक्तम् । तस्यार्थः । स्त्रीपुत्राद्यासक्तिरूपदैन्यसम्पादकाविति । तेन स्त्रीपुत्रादित्यागवत्खिन्नपित्रोस्त्यागस्याविहितत्वात् दीनौ पितरौ कथं त्यजेतेति कथनमनुपपन्नमिति चोद्यस्यानवकाशः । दीनावित्यस्य खिन्नावित्यर्थमनङ्गीकृत्य दीनशब्दात्प्रातिपदिकाद्धात्वर्थे बहुलमिष्टत्वाच्चेत्यनेन दीनावित्यस्य स्त्रीपुत्राद्यासक्तिरूपदैन्यसम्पादकाविति तात्पर्यार्थस्योक्तत्वात् ।। १८ ।।

सर्वभूतानामात्मीयाः स्त्रीपुत्रादयोऽच्युतप्रतिमास्तेषां पोषणं सर्वप्रकारेण सर्वदा क्रियते । तदेव पोषणमात्मात्मीयस्त्रीपुत्राद्यंतर्याम्यच्युतपूजाबुद्ध्या कृतं चेदच्युतप्रीतिर्भवति । अतोऽच्युतं प्रीणयतो बह्वायासो नास्तीति ।। २५ ।।

हे सौम्य प्रह्लाद । यतः संशयोऽविस्रम्भकारणमविश्वासकारणं चेद्भवत्येवातो नः संशयं छिंधीत्यर्थः । एतेन संशयच्छेदनस्यावश्यकत्वोपपादनाय संशयस्याविश्वासकारणत्वं वक्तव्यम् ।

संशयस्य विश्वासकारणत्वस्य बाधितत्वात् । विस्रम्भकारणमिति विश्वासकारणत्वाभिधान-मनुपपन्नमिति चोद्यं परिहृतम् । उपसर्गाणां द्योतकत्वेन विस्रम्भशब्दवत्स्रम्भ शब्दस्यापि विश्वासार्थ-कत्वमङ्गीकृत्य विशब्दस्यानर्थत्वं च स्वीकृत्य विस्रम्भकारणत्वमित्यस्याविश्वासकारणत्वमित्यर्थ इत्युक्तत्वात् ॥ ३६ ॥

इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ७-६ ॥

अथ सप्तमोऽध्यायः

अस्या हिरण्यकशिपुभार्याया जठरे उदरे सुरद्विषो दैत्यस्य हिरण्यकशिपोः । देवानामिति शेषः । देवानामविषह्यं सविशेषेण सर्वथा सोढुमशक्यं वीर्यमास्ते । अतो हिरण्यकशिपुभार्या । मत्समीप एवेति शेषः । अतो हिरण्यकशिपुभार्या मत्समीपे एवास्यतां तिष्ठतु । यावद्यदा प्रसवो भविष्यति तदा । अयं जीव इति शेषः । तदाऽयं जीवोऽर्थपदवीं निवृत्तिमार्गं मरणं गतः प्राप्तो भविष्यति । तदैवं जीवं हन्मीति यावत् । एतज्जीवहननांतरमेनाम् । हिरण्यकशिपुभार्यामिति शेषः । एतज्जीव-हननानन्तरं हिरण्यकशिपुभार्यां मोक्ष्य इति । एतेन मरणं गत इति वक्तव्येऽर्थपदवीं गत इति वचन-मनुपपन्नमिति चोद्यं परास्तम् । अर्थोऽभिधेये रैवस्तुप्रयोजननिवृत्तिष्वित्यभिधानादर्थशब्दस्य निवृत्त्यर्थकत्वमङ्गीकृत्यार्थपदवीमित्यस्य निवृत्तिमार्गार्थत्वमभ्युपगम्य मरणमिति तात्पर्यार्थस्योक्तत्वात् ॥ ९ ॥

सर्वार्थाः सर्वे धनादिरूपार्था मनोमयत्वान्मनोजन्यत्वात्स्वप्नजागरयोः स्वप्नावस्थायां जागरणावस्थायां चानित्यत्वेन समाः स्वप्नावस्थायामिव जागरणावस्थायामप्यनित्यत्वेन दुःखप्रदाः इति यावत् । न केवलं नाशेन दुःखप्रदाः किन्तु स्वप्नतादशायामपि दृष्टानर्थान् धनादिभिर्दृष्टाः अनुभूताश्च तेऽनर्थाः क्लेशाश्च तान् ध्यातुरपि स्मरतोऽपि शोकमोहभयप्रदा वियोगेन शोकप्रदाः, संयोगेन मोहप्रदाः, वियोगशङ्कया भयप्रदा इति धनादिनिमित्तक्लेशानुभवानन्तरं क्लेशानां स्मरणाभावे वियोगादिना शोकादिप्रदा इति भावः ॥ २८ ॥

तद्भावभावानुकृताशयाकृतिरित्यस्य तस्य परमेश्वरस्य भावे यथावस्थितस्वरूपे भावेन भक्त्याऽनुकृते समर्पिते आशयाकृती अंतःकरणदेहौ येन स तद्भावभावानुकृताशयाकृतिरित्यर्थः । एतेन तद्भावानुकृताशयाकृतिरित्यनेन पूर्णत्वादेको भावशब्दो व्यर्थ इति दूषणं परिहृतम् । परमेश्वरस्य यथावस्थिते भिन्ने रूपे भक्तिः कर्तव्येति मायावादिमतनिरासार्थं स्वरूपवाचकेन भावशब्देन

मुख्यामुख्यन्यायमाश्रित्य यथावस्थितस्वरूपं गृहीत्वा यथावस्थितस्वरूप एव भक्तिः कर्तव्या न त्वयथावस्थितभिन्नरूप इति सूचयितुं भावशब्दप्रयोगः सार्थक इत्यङ्गीकारात् ॥ ता० अर्थः ॥ तद्भावभाव इति प्रतीकग्रहणम् । तद्यथा स्वरूपे तस्य परमेश्वरस्य यथावस्थितस्वरूप एव भक्तिर्न तु मायावादिरीत्याऽयथावस्थितभिन्नरूप इति ॥ ३७-३८ ॥

ननु 'यदर्थमिह कर्माणि विध्यंगान्यसकृन्नरः । करोत्यतो विपर्यासममोघं विंदते फलम्' इति पूर्वश्लोकेन नर इह संसारे यदर्थं यदिष्टप्राप्त्यर्थमसकृद्बहुवारं यानि विध्यङ्गानि विधिवाक्यसहकारीणि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविधिवाक्यप्राप्तानीति यावत् । कर्माणि ज्योतिष्टोमादीनि करोति तैरत इष्टान्विपर्यासं विपरीतममोघमपरिहार्यं फलं विंदत इति कर्मणामनिष्टसाधनत्वमुक्तम् । तदयुक्तम् । कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवतीत्यादिश्रुतिविरोधादित्याशङ्कां परिहर्तुं यदर्थमिह कर्माणीत्युक्तं विवृणोति ॥ सुखायेति । इह संसारे सुखाय दुःखमोक्षाय कर्मणो ज्योतिष्टोमादिकर्मणः सङ्कल्पो ज्योतिष्टोमादिकर्म करिष्य इति सङ्कल्पः । उपलक्षणमेतत् । ज्योतिष्टोमादिकर्मणामनुष्ठानं च, यस्य स नर ईहया स्वर्गसुखादिकामनया सदा सुखमाप्नोति । अनीहायाम् । निमित्तसप्तमी । स्वर्गसुखादिकामनापरित्यागेन मोक्षं प्राप्य सुखोन्नतिं प्राप्नोतीति । अयं भावः । स्वर्गादिकामनया कृतैर्ज्योतिष्टोमादिकर्मभिर्दुःखं भवति । स्वर्गादिकामनां परित्यज्य भगवत्प्रीत्यर्थं कृतैर्ज्योतिष्टोमादि-कर्मभिर्ज्ञानं प्राप्य मुक्तिसुखमाप्नोतीति ॥ ४३ ॥

अनीहमित्यस्याप्रयासेन सर्वकर्तारमित्यर्थः । अनीहा शब्दस्याप्रयासेन करणमित्यर्थः । तस्मात् अर्श आदिभ्योऽजिति सूत्रेण मत्वर्थेऽच्प्रत्यये कृते यस्येति चेत्याकारलोपे द्वितीयैकवचनेऽ-नीहमितिरूपं निष्पन्नमित्यङ्गीकारात् । तात्पर्येऽनीहाशब्दस्याप्रयासेन करणमर्थ इत्यत्र ''अप्रयासेन करणमनीहा प्रोच्यते बुधैः'' इति प्रमाणमुदाहृतम् ॥ ४९ ॥

हे दानवा! यूयं ततो भक्तेः प्रीतिसाधनत्वात् भगवति ज्ञानादिगुणसम्पन्ने ईश्वरे जगदीश्वरे हरौ मूलरूपहरौ भक्तिं कुरुत । न केवलं मूलरूपहरौ किन्तु सर्वत्रावताररूपमत्स्यादिसर्वेषु सर्वभूतात्मनि ब्रह्मादिसर्वभूतानामन्तर्यामिणि हरौ चात्मौपम्येन मूलरूपनारायणसादृश्येन भक्तिं कुरुतेति । एतेन माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्तेरात्मौपम्येनेति स्वसाम्येन कर्तव्यताऽभिधानं विरुद्धमिति शङ्का निरस्ता । आत्मशब्दस्य स्वात्मपरत्वमित्यङ्गीकारात् ॥ ५४ ॥

इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ७-७ ॥

अथ अष्टमोऽध्यायः

अतिबलो हिरण्यकशिपुः प्रह्लादभयार्थं स्वमुष्टिना स्तम्भं तताडेत्यर्थः । एतेन प्रयोजनाभावात् स्तम्भताडनमनुपपन्नमिति दूषणं परास्तम् । प्रह्लादभयार्थमिति शेषेण प्रह्लादभयरूपप्रयोजनस्योक्तेः ॥ ॥ १९ ॥

हे आदिपुरुष शरण्यपाल नरसिंह! यदात्मगतमस्मद्गतं तेजः सामर्थ्यं तत्त्वं नोऽस्मान्प्रति यत्तपस्त्वद्विषयकालोचनात्मकं तपः परमं परमपुरुषार्थमोक्षसाधनमित्यात्थेत्क्तवानसि । येन त्वद्विषयकालोचनात्मकतपसाऽऽत्मारामं सोदरगतमिदं जगद्भवान्ससर्ज । तच्च तद्विषयकालोचनात्मकं तपश्चामुना हिरण्यकशिपुना विप्रलुप्तम् । अद्य रक्षागृहीतवपुषाऽस्मद्रक्षार्थं गृहीतं नरसिंहवपुर्येन तेन त्वया विलुप्तत्वद्विषयकालोचनात्मकं तपः पुनरस्मास्वन्वमंस्थाः स्थापितवानिति । यद्यपि ऋष्यादिनिष्ठं मोक्षसाधनं भगवद्विषयमालोचनं भगवन्निष्ठं सृष्टिहेतूभूतं भगवद्विषयकमालोचनं भिन्नमेव लोपोऽपि ऋष्यादिनिष्ठालोचनस्यैव न तु भगवन्निष्ठस्य तथाऽपि तद्विप्रलुप्तमित्यनेन, भगवन्निष्ठालोचनस्य विप्रलुप्तऋष्यादिनिष्ठालोचनेन सादृश्यरूपगौणाभेद एवोक्तो न तु मुख्याभेदोऽतस्तद्विप्रलुप्तमिति वचनमुपपन्नमिति द्रष्टव्यम् ॥ ता० अर्थः ॥ तद्विप्रलुप्तमिति भगवन्निष्ठतपसो ऋष्यादिनिष्ठतपसाऽभेदवचनं सादृश्यरूपगौण्याभेदवचनं न तु मुख्याभेदवचनम् । तपःशब्देनात्र कृच्छ्रचान्द्रायणादिरूपं तपो न विवक्षितं किं त्वालोचनात्मकं तपो विवक्षितमिति भावेनोक्तम् ॥ आलोचनमेव तप इति । तपःशब्दस्य ज्ञानार्थत्वे श्रुतिं प्रमाणयति ॥ यस्येति ॥ ४४ ॥

यो हिरण्यकशिपुस्तीर्थसमयेषु गङ्गादितीर्थेषु समयेषु संवत्सरश्राद्धादिकालेषु नोऽस्माकं तनूजैः पुत्रैर्दत्तानि श्राद्धान्यद्भिः सह दत्तांस्तिलांश्च प्रसभं बलात्कारेणाधिबुभुजे सम्यग्बुभुजे । तस्य हिरण्यकशिपोरुदरान् । प्रदेशाभिप्रायं बहुवचनं पुल्लिङ्गं च छान्दसम् । नखविदीर्णवपात्कृत्वा यः पुत्रदत्तानि श्राद्धान्यद्भिः सहितांस्तिलांश्चास्मान् आर्च्छत् । अन्तर्णीतण्यर्थोऽयम् । प्रापयामास तस्मा अखिलधर्मगोप्त्रे भगवते नरसिंहाय नम इति । एतेनोदरान्नखविदीर्णवपादिति पञ्चम्यंत शब्दद्वयमनन्वितमिमति दूषणं निरस्तम् । उदरादिति द्वितीयाबहुवचनस्य नखविदीर्णवपादिति ल्यब्लोपनिमित्ता पञ्चमीत्यङ्गीकृत्याऽन्वयस्योक्तत्वात् ॥ ४५ ॥

नटनाट्यगायका इत्यस्य नटानां कथाबन्धवचनानां नाट्यानां सार्वज्ञादिगुणप्रतिपादकानां वचनानां गायका इत्यर्थः ॥ ता० अर्थः ॥ कथाबन्धविशिष्टं वचनं नटनमित्युच्यते । भावदर्शनं भावानां सार्वज्ञादिसाधर्म्याणां दर्शनं प्रदर्शनं यस्मात्तद्भावदर्शनम् । तुशब्द एवार्थे । भावप्रदर्शकं वचनमिव ।

कथां विना भावप्रदर्शकं वचनमिति यावत् नाट्यकमित्युच्यत इति । एतेन कथाबन्ध-भावदर्शनयोर्गानकर्मत्वायोगात् । नटनं तु कथाबन्धं नाट्यकं भावदर्शनमिति प्रमाणोदाहरणेन कथाबन्धभावदर्शनयोर्नटनाट्यशब्दार्थत्वकथनमनुपपन्नमिति दूषणमपास्तम् । प्रमाणेन वचनमिति विशेषेण कथाबन्धभावप्रदर्शनवचनयोर्नटनाट्य- शब्दार्थत्वमुच्यत इत्यभ्युपगमात् ॥ ५१ ॥

इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ ७-८ ॥

अथ नवमोऽध्यायः

अदृष्टाश्रुतेत्यस्य महालक्ष्मीर्लोकमोहायान्यैः । साधारणजनैरिति शेषः । लोकमोहायान्यैः साधारणजनैर्नरसिंहरूपस्यादृष्टाश्रुतरूपत्वनिमित्ताच्छङ्किता शङ्कायुक्तेव । शङ्काभावेऽपि यथा नरसिंहरूपदर्शनानन्तरमदृष्टाश्रुतपूर्वत्वनिमित्तकशङ्काऽन्येषां तथा ममापीति लोकमोहाय । प्रदर्श्येति यावत् । नोपेयायेत्यर्थः । एतेनादृष्टाश्रुतपूर्वत्वादित्यनेन किं महालक्ष्म्या अदृष्टाश्रुतपूर्वत्वमुच्यते किं वाऽन्यैः साधारणैर्जनैः । नाद्यः । अनादिकालमारभ्य महालक्ष्म्याः नृसिंहरूपस्य दृष्टत्वात् श्रुतत्वाच्च । न द्वितीयः । हेतोरप्रयोजकत्वात् । महालक्ष्म्या नित्यत्वेन कदाऽपि शङ्काया अभावाच्छङ्कितेति चानुपपन्नमिति चोद्यं परिहृतम् । अतस्तात्पर्यम् ॥ २ ॥

अविदुष इत्यस्य भगवत्ज्ञानिन इत्यर्थः । एतेन भगवदज्ञानिन इति वक्तव्येऽविदुष इत्यनेन भगवज्ज्ञानिन इति कथनमनुपपन्नमिति दूषणं परास्तम् । अविदुष इति अशब्देन भगवन्तं गृहीत्वा भगवत्ज्ञानिन इत्यर्थस्योक्तत्वात् ॥ ११ ॥

ईश्वरस्येत्यस्येश्वरमित्यर्थः । तेन स्तुतिक्रियां प्रतीश्वरस्य कर्मत्वादीश्वरमिति वक्तव्यमिति दूषणस्यानवकाशः । ईश्वरस्येति षष्ठी द्वितीयादेश इत्यभ्युपगमात् ॥ १२ ॥

हे नृसिंह! तत्तस्माल्लोकक्षेमाद्यर्थं त्वयाऽवतीर्णत्वात् । चशब्दोऽनुक्तहेतुसमुच्चये । कोपकारणा-भावाच्च । मन्युं कोपं यच्छ त्यज । असुर एव कोपकारणमित्यत आह ॥ असुर इति । अद्य त्वयाऽसुरो हतः । कारुणिक । लोकानामसुरहननेन विषादो जात इति मय्येव तव कोप इत्यतः आह ॥ मोदेतेति । साधुरपि कारुणिकोऽपि वृश्चिकसर्पहत्या । तृतीयैकवचनमेतत् । वृश्चिकसर्पहत्या यथा मोदेत तथाऽसुरहत्या मोदेत । न केवलमसुरहत्यया मोदः शास्त्रविहितः किन्तु लोकाः कारुणिकलोका निर्वृतिं सन्तोषमिताः प्राप्ताश्च । कोपत्यागस्य फलमाह ॥ प्रतियांत्विति । नृसिंहरूपस्य क्षेमादि-प्रदत्वमुपपादयति ॥ रूपमिति । जनाः । विभवायेति । विभवशब्दः क्षेमादीनामुपलक्षकः । विभवाय

विभवक्षेमादिलाभाय ते रूपं नृसिंहरूपं स्मरन्ति । अतः क्षेमादिप्रदत्वं सिद्धमिति । एतेन मोदेत साधुरपि वृश्चिकसर्पहत्येत्येतदनुचितमिति दूषणं निरस्तम् । यथा तथाऽसुरहत्येति शेषमङ्गीकृत्य मोदेतेत्यस्यावृत्तिं चाङ्गीकृत्यान्वयस्योक्तत्वात् ॥ १४ ॥

निर्ह्रादभीतदिग्गिभादित्यस्य भीता दिग्गिभा दिग्गजा यस्मात्स भीतदिग्गिभः । भीतदिग्गिभश्चासौ निर्ह्रादश्च निर्ह्रादभीतदिग्गिभस्तस्मादित्यर्थः । तेन भीतदिग्गिभनिर्ह्रादादिति वक्तव्यमिति चोद्यानवकाशः । विशेषणस्य परनिपात इत्यभ्युपगमात् ॥ १५ ॥

अतितरेदित्यस्यातितारयेदित्यर्थः । एतेन परमेश्वरस्य संसाराभावत्वादन्यः कः संसारचक्रमतितरेदिति वचनमनुपपन्नमिति दूषणं परिहृतम् । अतितरेदित्यस्यान्तर्णीतण्यर्थत्वमङ्गीकृत्यातितारयेदित्यर्थस्योक्तत्वात् ॥ २१ ॥

हे विभो नृसिंह । अखिलधिष्ण्यपानामखिललोकपालानामायुः श्रियो विभव इत्येते ये दिवि स्वर्गे मया दृष्टाः । अयं जनो यानायुरादीनिच्छति त आयुरादयोऽस्मत्पितुर्हिरण्यकशिपोः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः । सोऽपि हिरण्यकशिपुरपि त्वया निरस्त इति । एतेन यान् जन इच्छति, ये विभवादयो मया लुलिता दृष्टा इति यच्छब्दद्वयमनन्वितमिति दूषणं निरस्तम् ॥ २३ ॥

मेऽर्पितः शिरसि पद्मकरप्रसाद इत्यस्य मे शिरसि पद्मकरप्रसादः पद्मसमानकरप्रसरणमर्पितं कृतमित्यर्थः । तेन पद्मकरप्रसरणमिति वक्तव्यमिति दूषणस्यानवकाशः । साद इति हि गत्यर्थकस्य सदेः रूपम् । अतः प्रेत्युपसर्गबलात्प्रसादशब्देन प्रसरणं लभ्यत इत्यभ्युपेत्य प्रसाद इत्यस्य प्रसरणमित्यर्थस्योक्तत्वात् ॥ २६ ॥

हे अनन्त । स्वभृत्यऋषिवाक्यमापत्काल ईश्वरो रक्षक इति स्वभृत्यनारदर्षिवाक्यं ऋतं सत्यं विधातुमसन्मरणं विधित्सुः कर्तुमिच्छुः हिरण्यकशिपुः, खड्गं प्रगृह्याहं तव कं शिरो हरामि । मदपरो मदन्य ईश्वरोऽस्ति चेत्त्वामवतु रक्षत्विति यदवोचत्तद्वचनं च सत्यं कर्तुं मत्प्राणरक्षणं कृतम् । मत्पितुर्वधं वधश्च कृत इति मन्य इति । एतेन मदन्य ईश्वरोऽस्ति चेद्रक्षणं कुर्यान्न च रक्षणं करिष्यतिह। अत ईश्वरो नास्तीति हिरण्यकशिपुवचनस्य प्रह्लादरक्षणेन हिरण्यकशिपुवधेन च मिथ्याभावस्य कृतत्वात् । हिरण्यकशिपुवचनमसत्यं विधातुमिति वक्तव्यं ऋतं विधातुमिति कथनमनुपपन्नमिति दूषणं प्रत्युक्तम् । यदवोचदित्यस्य ऋतमित्यनेनानन्वयमङ्गीकृत्याध्याहृतेनासत्यमित्यनेनान्वस्योक्तत्वात् ॥ २९ ॥

कर्मशक्तिरित्यस्य कर्मेन्द्रियैः सहिता शक्तिरित्यर्थः । एतेन कर्मेन्द्रियाणां ग्रहणार्थं कर्माणीति वक्तव्ये शक्तिरिति पदं व्यर्थमित्याशङ्का परिहृता । न केवलं कर्मेन्द्रियाणि किन्तु शक्तिश्चेति वक्तुं कर्मशक्तिरित्युक्तमिति स्वीकरणात् । एतेनैव कर्माणि च शक्तिश्चेति द्वन्द्वसमासे कर्मशक्तय इति वक्तव्यमिति दूषणस्यानवकाशः । कर्मभिः सहिता शक्तिरिति समासस्याङ्गीकृतत्वात् । कर्मेन्द्रियाणां मध्ये शिश्नस्य प्राधान्याच्छिश्न इति पृथग्ग्रहणम् ॥ ४० ॥

हन्तेतीत्यस्य हन्त कष्टमिति वदन्तमित्यर्थः । एतेन हन्तेतीत्येतदनन्वितमिति दूषणं परास्तम् । वदन्तमिति शेषेणान्वयस्योक्तत्वात् ॥ ४१ ॥

प्रायेण देवमुनयो देवा मुनयश्च स्वमुक्तिकामाः स्वोपासकमुक्तिकामाः सन्तो विजने एकान्तस्थले मौनमिति मौनशब्दो व्रतादेरुपलक्षकः । मौनं मौनव्रतादिकं स्वोपासकैश्चरन्ति । अन्तर्णीतण्यर्थोऽयम् । चारयन्ति कारयन्ति । न परार्थनिष्ठाः स्वानुपासकमोक्षरूपार्थसाधका न भवन्ति । केषाञ्चिद्देवानां मुनीनां च परार्थनिष्ठत्वं ज्ञापयितुं प्रायेणेत्युक्तम् । कृपणान्संसारे क्लिश्यमानान् । एतान्मुक्तियोग्यान् जीवान्विहायाहमेको न विमुमुक्षे मुक्तिं नेच्छामि । स्वविमुक्तकामदेवतादिव्यावृत्त्यर्थमेक इत्युक्तम् । स्वव्यतिरिक्तानिति । परार्थनिष्ठानां बहूनां सद्भावात् कृपणमोक्षार्थं मत्प्रार्थनं कुतः क्रियत इत्यत आह ॥ नान्यमिति । भ्रमतः संसारे भ्रमतः । अस्य कृपणजनस्य त्वदन्यं त्वत्तोऽन्यं शरणं रक्षकं न पश्य इत्येतन्नु निश्चितमिति । आश्रितेषु कृपा कार्या विशेषात्तात्त्विकैः सुरैः । मुनिभिश्च तथेत्यादि तात्पर्यम् । तस्यार्थः । प्रायेणेत्यस्य देवमुनयः इत्यव्यवहितेनान्वयः । न तु व्यवहितेन स्वमुक्तिकामा इत्यनेनेत्युक्तं भवति । कैश्चित्सुरैराश्रितेषु स्वोपासकेषु मोक्षार्थं कृपा कार्या । तात्त्विकैः सुरैराश्रितेषु विशेषात्कृपा कार्या । कैश्चिन्मुनिभिश्चाश्रितेषु कृपा कार्या । केषाञ्चित्तात्त्विकदेवानुग्रहं विनैव मोक्ष इति भ्रमं परिहरति ॥ तथाऽपीति । यद्यपि तात्त्विका देवाः स्वोपासकेष्वेव कृपाकारिणस्तथाऽपि ये उपासनेन तात्त्विकसुरकृपाविषयतां गताः प्राप्तास्त एव मुच्यन्ते । तदन्ये तेभ्यस्तात्त्विक-देवोपासकेभ्योऽन्ये कथञ्चन न मुच्यन्ते ॥ ४४ ॥

वेददृष्टे वेदजन्यज्ञानविषयनरसिंह ! इमे प्रमाणप्रमिते सदसतीति कार्यकारणरूपेऽरूपकस्य प्रकृत्याद्यात्मकरूपरहितस्य तव रूप इत्युच्येते । त्वद्वशत्वात्त्वत्संनिधानविशिष्टत्वात्त्वद्भोग्यत्वाच्च । सदसती रूपे साक्षाद्रूपे न च नैव । अत्र हेतुमाह ॥ अन्यदिति । यतः कार्यकारणात्मकं जगत्त्वत्स्वरूपादन्यदतः स्वरूपरूपं न । कार्यकारणयोरुभयोर्भगवद्वशत्वे भगवद्भोग्यत्वे दृष्टान्तमाह ॥ बीजाङ्कुराविवेति । बीजाङ्कुरौ यथा कृषीवलाधीनौ कृषीवलभोग्यौ तथा कार्यकारणे त्वद्वशे त्वद्भोग्ये

इत्यर्थः । एतेन सर्वस्यापि कार्यकारणात्मकजगत ईश्वराधीनत्वादिमे इति पुरोवर्तिकार्यकारणयोर्ग्रहणमनुपपन्नमिति दूषणं निरस्तम् । इमे इत्यस्य पुरोवर्तिनीत्यर्थमनङ्गीकृत्य प्रमाणप्रमिते इत्यर्थस्योक्तत्वात् । एतेनैव इमे इत्यनेनैव वेदादिप्रमाणप्रमितत्वस्योक्तत्वात् वेददृष्टे इत्येतद्व्यर्थमिति चोद्यमपास्तम् । वेददृष्टे इत्यस्य वेदप्रमिते इत्यर्थमनभ्युपेत्य वेदानां दृष्टिर्यस्येति विग्रहमभ्युपगम्य वेदजन्यज्ञानविषय इत्यर्थं चाङ्गीकृत्य नृसिंहस्य प्रमितत्वमुच्यत इत्यभ्युपगमात् । एतेनैव सदसती तव रूपे इत्युक्त्वा तव रूपे नेत्युक्तिर्व्याहतमिति दूषणमपास्तम् । कार्यकारणयोरधीनत्वादिना भगवद्द्वयरूपत्वमङ्गीकृत्य साक्षाद्रूपत्वस्य निषिद्धत्वात् ॥

ता० अर्थः ॥ सदसतीत्यस्यार्थमाह ॥ कार्यकारणे इति । प्रकृत्याद्यात्मकरूपरहितस्य । कार्यकारणरूपे इत्येतद्व्याहतमिति शङ्कां परिहरति ॥ रूपे इति । तद्वशत्वापेक्षयेत्युपलक्षणम् । तत्संनिधानापेक्षया तद्भोग्यत्वापेक्षयेत्यपि द्रष्टव्यम् । कार्यकारणात्मकं जगद्रूपं नेत्युक्तेरभिप्रायमाह ॥ साक्षादिति । अत्र स्वरूपशब्दो रूपपरः । कार्यकारणात्मकं जगत्साक्षात्स्वरूपापेक्षया भगवतो रूपं न स्वरूपरूपम् नेति यावत् । कुतो भगवतः स्वरूपरूपं नेत्याशङ्कापरिहारार्थं मूलेऽन्यदित्युक्तम् । तद्व्याचष्टे ॥ स्वरूपादिति । यतः कार्यकारणात्मकं जगत्स्वरूपाद्भगवत्स्वरूपादन्यदतः स्वरूपरूपं नेति । एतेन कार्यकारणात्मकजगतस्तद्वशत्वापेक्षयेत्यनेन भगवद्भिन्नरूपत्वमुक्त्वा स्वरूपादन्यद्रूपं नेत्यनेन भगवदभिन्नरूपत्वाभिधानं व्याहतम् । साक्षात्स्वरूपापेक्षयेति चानन्वितमिति चोद्यमपहसितम् । स्वरूपादन्यद्रूपं नेत्यत्र स्वरूपादन्यदिति हेतुप्रतिपादकं रूपं नेत्यर्थस्योक्तत्वात् ॥ ४७ ॥

हे उरुगायोत्कृष्ट ब्रह्मादिस्तुत्य नृसिंह । सुधियः सम्यग्ज्ञानिनो गुणादयः शब्दा इत्येतदर्थवशात् षष्ठ्यन्तं सम्बध्यते । शब्दाच्छब्दस्य वेदस्याद्यन्तवन्त उपक्रमोपसंहारविचारवन्तोऽपि त्वं यथा वर्तसे एवं तथा । साकल्येनेति यावत् । त्वा न विदन्ति । किन्तु शब्दाद्वेदाद्योग्यतानुसारेण किञ्चित्त्वां विमृश्य विरमन्ति मुक्ता भवन्तीति । एतेन ब्रह्मादिदेवानामाद्यन्तवन्तः इत्युत्पत्तिविनाशवत्कथनमसङ्गतमिति दूषणमपास्तम् । आद्यन्तशब्दस्य तद्विचारलक्षकत्वमङ्गीकृत्याद्यन्तवन्त इत्यस्योपक्रमोपसंहारविचारवन्त इत्यर्थस्योक्तत्वात् ॥ ४९ ॥

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ ७-९ ॥

अथ दशमोऽध्यायः

यो गुणलुब्धौ । गुणलुब्धो भृत्यगुणेन विनयादिना स्वामिनि स्नेहसम्पन्नः कामुको धनादिकामुको न स वै स एव भृत्य इत्यर्थः । एतेन गुणलुब्धौ कामुकाविति द्विवचनान्तपदद्वयं स स्वामी स भृत्यः इत्येकवचनान्तशब्दैरनन्वितमिति दूषणं परिहृतम् । य इत्यस्य शेषमङ्गीकृत्य गुणलुब्धावित्यादि-द्विवचनस्यैकवचनादेशत्वमङ्गीकृत्य गुणलुब्धौ कामुकाविति शब्दद्वयस्यावृत्तिं चाङ्गीकृत्यान्वय-स्योक्तत्वात् ॥ ५ ॥

अहं तु सर्वथाऽकामः फलकामनारहितस्त्वद्भक्तस्त्वं चानपाश्रय आश्रयनिरपेक्षः । पूर्णकाम इति यावत् । स्वामी । अत इव स्वामिभृत्यवर्गमध्ये आवयोः प्रवृत्तिरर्थः अर्थाय प्रयोजनसम्पादनाय न भवतीत्येतदन्यथा न । अत्र व्यतिरेकदृष्टान्तमाह ॥ राजसेवकयोरिवेति । राजसेवकयोः प्रवृत्तिर्यथा प्रयोजनसम्पादनाय तथाऽऽवयोः प्रवृत्तिर्नेति । एतेन भवदनुग्रहसाध्यमोक्षादिप्रयोजनस्य विद्यमान-त्वादावयोरर्थो नास्तीत्येतदनुपपन्नमिति दूषणस्यानवकाशः । आवयोरित्यतः परं प्रवृत्तिरिति पदमध्याहृत्यार्थ इति प्रथमा तादर्थ्यार्थकचतुर्थ्यादेश इत्यङ्गीकृत्यावयोः प्रवृत्तिरर्थसम्पादनाय न भवतीति व्याख्यानस्य कृतत्वात् ॥ ७ ॥

ऐश्वरं तेजोऽविद्वान्मिथ्यादृष्टिरहमेवेश्वर इत्यादिमिथ्याज्ञानवान् मे पिता साक्षान्मुख्यतः सर्वलोक-गुरुं स्वामिनं त्वां प्रति भातृहेति बुद्ध्या बद्धामर्षाशयः सन्ननिन्ददिति यत्त्वद्विषयकं निन्दनं त्वद्भक्ते मयि चाघवान् हननाद्यघवानिति यन्मद्विषयकं हननादिकं तस्मान्निन्दनादिरूपाद्दुरन्तादन्तरहितादत एव दुस्तरात्तर्तुमशक्यादघान्मे पिता पूयेतेति । एतेनानिन्ददित्यादिना निन्दनाद्यघकर्तुः प्रकृतत्वात् तस्मादघादिति सामानाधिकरण्यमनुपपन्नमिति दूषणं परास्तम् । तस्मादिति तच्छब्देन निन्दनादि-कर्तृपरामर्श इत्यनङ्गीकृत्य कर्तृनिष्ठनिन्दनादिपरामर्शः इत्यङ्गीकारात् ॥ १६, १८ ॥

लोके ये मद्भक्ताः पुरुषास्ते त्वामनुवृतास्त्वत्सेवका भवन्ति । भवान्मे सर्वेषां भक्तानां प्रतिरूपधृक् शिक्षारूपधृक् । स्वामीति यावत् । इत्येतत्खलु निश्चितमिति । एतेन मद्भक्तास्त्वामनुवृता इत्यनेन भगवद्भक्तानां प्रह्लादसेवकत्वस्योक्तत्वेन तेषां स्वामीति वक्तव्यम् । तेषां प्रतिरूपधृगिति प्रह्लादस्य भगवद्भक्तप्रतिबिम्बत्वाभिधानं व्याहतम् । प्रतिबिम्बत्वस्य तदधीनत्वात्तत्सादृश्यरूपत्वादिति दूषणमपास्तम् । प्रतिरूपशब्दस्य प्रतिकूलरूपार्थत्वेन शिक्षारूपार्थत्वमङ्गीकृत्य प्रतिरूपधृगित्यस्य स्वामीति महातात्पर्यार्थस्योक्तत्वात् ॥ २२ ॥

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ ७-१० ॥

अथ एकादशोऽध्यायः

सर्वात्मा सर्वस्वामी नारायणो येन तुष्यति सोऽयं त्रिंशल्लक्षणसंयुक्तः परो मुख्यो धर्मः सर्वेषां नृणां समुदाहृत इति । एतेन त्रिंशल्लक्षणसंयुक्त इति किं परमात्मनो विशेषणं किं वा धर्मस्य विशेषणम् । नाद्यः । परमात्मनोऽनन्तलक्षणसंयुक्तत्वेन त्रिंशल्लक्षणसंयुक्तत्वोक्तेरयोगात् । न द्वितीयः । सत्यं दया तपः शौचमित्यादिनोक्तानां सत्यादित्रिंशद्धर्माणां त्रिंशल्लक्षणात्मकत्वेन त्रिंशल्लक्षणसंयुक्तत्वाभावादिति दूषणं परिहृतम् । सत्यादिधर्माणामनन्तत्वेन त्रिंशत्वायोगात् । त्रिंशत्वघटनार्थं त्रिंशल्लक्षणशब्देन सत्यत्वादित्रिंशद्विभाजकोपाधीनां ग्रहणात् ॥ १२ ॥

विप्रस्याध्ययनादीनीत्यत्राध्ययनयाजनमन्त्रोपदेशादयः विप्रस्यासाधारणधर्मा इत्युक्तम् । अत्र विप्रस्य जीवनोपयुक्ता धर्मा उच्यन्ते । वार्ता बहुभ्यः सुवर्णादिप्रतिग्रहः । विचित्रशालीनं शालीशब्दो धान्यपरः । विचित्रधान्यसम्बन्धियायावर्यं बहुप्रतिग्रहः । शिलोंछनं शिला क्षेत्रपतितकणिशोपा-दानमुञ्छनमुलूखलादिसमीपपतितकणोपादानं चेतीयं चतुर्धा वृत्तिर्विप्रवृत्तिः । उत्तरोत्तरा श्रेयसी चेति। एतेन वार्ताया वैश्यजीवनोपयुक्त धर्मत्वाद्विप्रजीवनोपयुक्तधर्मत्वाभिमानमयुक्तमिति दूषणं परास्तम् । अत्र वार्ताशब्देन कृषिवाणिज्यादिरूपा वार्तोच्यते इत्यनङ्गीकारात् । एतेनैव वार्ता विचित्रशालीनं यायावर्यं शीलोंछनमिति पञ्चधेति वक्तव्यं चतुर्धेति कथनमनुपपन्नमिति दूषणं निरस्तम्। यायावर्यशब्दस्य बहुप्रतिग्रहमात्रपरत्वमङ्गीकृत्य विचित्रशालीनमित्येतद्विशेषणत्व-मित्युक्तत्वात् ॥ १४-१६ ॥

पतिदेवानामिति हेतुगर्भविशेषणम् । एतेन पतिशुश्रूषादीनां स्त्रीमात्रधर्मत्वात् पतिदेवानां स्त्रीणां पतिशुश्रूषादिकं धर्म इति वचनमयुक्तमिति शङ्का निरस्ता । देवताशुश्रूषादिकं विना पतिशुश्रूषादिकं कथं धर्म इत्याशङ्कापरिहारार्थं पतिशुश्रूषादेरेव कर्तव्यत्वे पतिदेवानामित्यनेन पतिदेवत्वरूपहेतुरुक्तः इत्यभ्युपगमात् ॥ २६ ॥

हित्वा स्वभावजमित्यत्रास्वभावजमिति पदच्छेदः । तेन पूर्वार्धे स्वभावजकर्मणामनुष्ठेय-स्योक्तत्वात् । स्वभावजं कर्म हित्वेति कथनं व्याहतमिति चोद्यं परास्तम् । पूर्वार्धे स्वधर्मानु-ष्ठेयत्वमुक्तम् । अस्वभावजं कर्म हित्वेत्यनेन परधर्मस्य त्याग उच्यत इत्यूरीकरणात् ॥ ३३ ॥

वृत्त्या स्वभावकृतयेति पूर्वश्लोके मोक्षार्थं स्वधर्मानुष्ठानं कर्तव्यमित्युक्तम् । अत्र मोक्षार्थं विषयवैराग्यं च सम्पादनीयम् । विषयवैराग्यार्थं विषयसेवा त्याज्येति वक्तुं विषयाणामतिसेवया

वैराग्यं भविष्यति किं विषयत्यागेनेत्याशङ्कां परिहर्तुं विषयाणामतिसेवया मनसस्तृप्तिर्न भवतीत्ये-तद्दृष्टान्तेनोपपादयति । उप्यमानमिति । हे राजन् । यथा मुहुः पुनरुप्यमानं क्षेत्रं स्वयं निमित्तान्तरं विना निर्वीर्यतामियात् । निर्वीर्यतामियादित्युक्तमेव विवृणोति ।। न कल्पत इति । पुनरुप्यमानं क्षेत्रं सूत्यै अङ्कुरोत्पादनाय न कल्पते समर्थं न भवति । उप्तं बीजं च नश्यति । एवं तथा कामाशयं विषयासक्तं चित्तं कामानां विषयाणामतिसेवया निर्वीर्यतां विषयरागोत्पादनासामर्थ्यं नेयात् नाप्नुयात् । तस्माद्विषयेभ्य इति शेषः । विरज्येत । विषयसेवा त्याज्येति यावत् । एतेन विषयाणां यथेष्टसेवया मनसो विषयरागोत्पादनसामर्थ्यं गच्छतीत्यस्य न जातु काम इत्यादि भागवतवाक्येनैव विरुद्धत्वात् । उप्यमानक्षेत्रदृष्टान्तेन कामानामतिसेवया कामातिशयं चित्तं विरज्येत विषयरागोत्पादनासमर्थं भविष्यतीति कथनमनुपपन्नमिति दूषणं परिहृतम् । उप्यमानमिति दृष्टान्तो व्यतिरेकदृष्टान्त इत्यङ्गीकृत्य कामानामतिसेवया कामाशयं चित्तं निर्वीर्यतां नेयादित्यर्थस्योक्तत्वात् । विषयाणां यथेष्टसेवया मनसो रागोत्पादनसामर्थ्यं न गच्छतीत्यत्रान्वयदृष्टान्तमाह ।। अग्निवदिति । कामबिन्दुभिर्यथेष्टघृतबिन्दुभिरग्निर्यथा निर्वीर्यतां नाप्नोति तथेति ।। ३४, ३५ ।।

इति श्रीभागवतटिप्पण्यां एकादशोऽध्यायः ।। ७-११ ।।

अथ द्वादशोऽध्यायः

नन्वहंममेत्यादिमिथ्याज्ञानेन किल संसारो बाधकप्रत्ययः । मिथ्याज्ञाने निवृत्ते संसारो निवृत्तो भविष्यति । अतो मिथ्याज्ञाननिरासार्थं नारायणप्रसादोऽनपेक्षितः । न हीदं रजतमित्यादिभ्रमनिरासार्थं राजादिप्रसादोऽपेक्षितः । तथा च नारायणप्रसादार्थं निवृत्तधर्मानुष्ठानं न कर्तव्यम् । तदुपदेशश्च न कर्तव्य इत्याशङ्काऽत्र परिह्रियते । ईश्वरो नारायणो यावदात्मनो जीवस्य द्वैतं वस्तु यथा वर्तते तदन्यथाविषयकमाभासज्ञानम् । मिथ्याज्ञानमिति यावत् । कल्पयेदुत्पादयेत् तावदिदं मिथ्याज्ञानं न विरमेन्निवृत्तं न भवेत् । नारायणप्रसादातिरिक्तोपायान्तरेण बाधकप्रत्ययो न भवेदिति यावत् । ततो निवृत्तधर्मानुष्ठानजनितनारायणप्रसादादस्य जीवस्य विपर्ययो बाधकप्रत्ययो भवेत् । इत्येतद्धि प्रमाण-प्रसिद्धमतो निवृत्तधर्मोपदेशः सार्थक इति । एतेन भेदज्ञानस्य मोक्षहेतुत्वात् यावद्द्वैतं भेदविषयका-भासं ज्ञानं कल्पयेत्तावदिदं भेदज्ञानं न विरमेत् । उपलक्षणमेतत् । अभेदज्ञानं च न भवेदित्येवं भेदज्ञानस्य हेयत्वकथनमभेदज्ञानस्य मोक्षहेतुत्वकथनमयुक्तमिति शङ्का परास्ता । द्वैतमाभासमित्यस्य भेदविषयकं ज्ञानमित्यर्थ इत्यनभ्युपगमात् । वस्तु यथा वर्तते तदन्यथाविषयकं ज्ञानं द्वैतं ज्ञानम् । वस्तु यथा वर्तते तथैव ज्ञानमद्वैतज्ञानमित्येतत्साधनार्थं तात्पर्ये उक्तम् । तस्यार्थः । वस्तूना-मीश्वरादिवस्तूनां बहुत्वेनैव ज्ञानं यथार्थज्ञानं तदैवाद्वैतज्ञानमित्युच्यते । ईश्वरादिवस्तूनां तदन्यथा

तस्माद्बहुत्वादन्यप्रकारकज्ञानम् । एकत्वज्ञानमिति यावत् । द्वैतज्ञानमित्युच्यते । नन्वर्थाभिन्नं ज्ञानमद्वैतज्ञानम् । बहुत्वावच्छिन्नेश्वरादिरूपार्थस्य बहुत्वेनेश्वरादिज्ञानस्य च भेदात्कथं बहुत्वेनेश्वरादि-ज्ञानमद्वैतज्ञानमित्युक्तमित्वतो ज्ञानार्थयोर्मुख्यभेदे विद्यमानेऽपि विसदृशत्वरूपभेदाभावाद्बहुत्वे-नेश्वरादिज्ञानमद्वैतज्ञानमिति वक्तुं शक्यत इत्याह ।। यथा ज्ञानमिति । ज्ञानमीश्वरादिज्ञानं यथा यद्बहुत्वरूपप्रकारविषयकं, वस्त्वीश्वरादिरूपं वस्तु तथा बहुत्वरूपप्रकारावच्छिन्नम् । वस्त्वीश्वरादि-रूपं वस्तु यथा यद्बहुरूपप्रकारावच्छिन्नं मतिरीश्वरादिज्ञानं तथा बहुत्वरूपप्रकारविषयका । इत्येवं ज्ञानार्थयोर्बहुत्वेनेश्वरादिज्ञानस्य बहुत्वावच्छिन्नेश्वरादिरूपार्थस्य च भेदो विसदृशत्वरूपभेदो नैव किंत्वेकत्वं सादृश्यैकत्वं प्रामाणिकैरिष्यते । अतो बहुत्वावच्छिन्ने ईश्वरादिरूपार्थेन बहुत्वेनेश्वरादिज्ञाने सादृश्याभेदस्य विद्यमानत्वाद्बहुत्वेनेश्वरादिज्ञानमद्वैतज्ञान- मित्येतदुपपन्नमिति ।। १० ।।

द्विज एवंभूतो धृतव्रतः सन् यावदर्थं वेदाध्ययनोपक्रमहेतुभूतगुरुप्रसादरूपार्थसिद्धिपर्यन्तं गुरुकुल उषित्वा यथाबलं यथाशक्ति साङ्गोपनिषदं त्रयीमधीत्यावबुद्ध्य च गृहं प्रविशेदिति योजना । एतेन यथाबलं त्रयीमधीत्येत्यादिनाऽर्थाद्गुरुकुलवासस्य वासावधेश्च प्राप्तत्वाद्यावदर्थमुषित्वेत्येतद्व्यर्थमिति दूषणस्यानवकाशः । अध्ययनोपक्रमात्पूर्वमध्ययनोप क्रमहेतुभूतगुरुप्रसादरूपार्थसिद्धिपर्यन्तमुषित्वे-त्यर्थस्योक्तत्वात् ।। १३ ।।

अग्नौ गुरावात्मनि स्वस्मिंश्च सर्वभूतेषु ब्रह्मादिसर्वभूतेषु स्वधामभिः स्वधाम सुखस्य स्वतन्त्रस्य नारायणस्य धाम येषां तानि स्वधामानि तेषु भूतैर्भूतेषु ब्रह्मादिसर्वभूतेषु प्रविष्टवत्प्रवेशानुकूलरूपेण प्रवेशवन्तमप्रविष्टं व्याप्तरूपेण सर्वत्र स्थितेरप्रविष्टमधोक्षजं पश्येदिति । एतेन भूतैः स्वधामभिरित्य-तदनन्वितमिति दूषणं परास्तम् । भूतैः स्वधामभिरिति तृतीया सप्तम्यादेशे इत्यङ्गीकारात् । एतेनैव सर्वभूतेष्वित्यनेन ब्रह्मादीनामुक्तत्वात् भूतैरित्येतत्पुनरुक्तमिति दूषणं निरस्तम् । सर्वभूतेष्वित्यनेना-मुक्तब्रह्मादीनां ग्रहणम् । भूतैरित्यनेन स्वधामभिरिति विशेषणान्मुक्तब्रह्मादीनां ग्रहणमित्यभ्युप-गमात् । एतेनैव विष्णोर्मुख्यप्रवेशस्य विद्यमानत्वात्प्रविष्टवदिति प्रविष्टस्य सादृश्यत्वकथनमनु-पपन्नमिति चोद्यं परिहृतम् । भावार्थकक्तप्रत्ययान्तप्रविष्टशब्दान्मतुप्प्रत्यये प्रविष्टवदिति रूपं जातमित्यङ्गीकृत्य छान्दसं नपुंसकलिङ्गत्वं चाश्रित्य प्रविष्टवदित्यस्य प्रवेशवंतमित्यर्थस्योक्तत्वात् । अतस्तात्पर्यम् ।। १५ ।।

परं परस्य विज्ञानमपरोक्षज्ञानं विन्दति प्राप्नोति तदनन्तरं परं ब्रह्माधिगच्छति प्राप्नोतीत्यर्थः । एतेन परमित्येतदनन्वितमिति दूषणस्यानवकाशः । परमित्येतत्परस्येत्यर्थे वर्तते इत्यभ्युप-गम्यान्वयस्योक्तत्वात् ।। १६ ।।

हिमवाय्वग्निवर्षार्कातपनानित्यस्य हिमवाय्वग्निवृष्ट्यार्काणामुपद्रवाणीत्यर्थः । एतेन हिमवाय्वग्नि-वर्षार्कोपद्रवानिति वक्तव्यमिति दूषणस्यानवकाशः । आतपनशब्द उपद्रवार्थकः इत्यङ्गीकारात् ॥२०॥

स्पर्शेनाध्यात्मनि त्वचमित्यस्याध्यात्मन्यधिकश्चासावात्मा जीवश्च तस्मिन् । जीवोत्तम इति यावत् । वायौ स्पर्शेन सह त्वचं त्वगिन्द्रियं न्यसेदिति ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ ७-१२ ॥

त्रयोदशोऽध्यायः

ध्रुवं निश्चयेन मृत्युं मृत्युप्रदां देवतां मृत्युपरिहारार्थं नाभिनन्देत् । अन्तर्णीतण्यर्थोऽयम् । अभिनन्दयेत् । अध्रुवमल्पकालं स्वजीवितं वा स्वजीवनप्रदां देवतां च बहुकालजीवनार्थं नाभिनन्दयेत् । एतेन ध्रुवं मृत्युध्रुवं जीवनाभ्यां सन्तोषस्याप्रसक्तत्वात् नाभिनन्देदिति वचनमनु-पपन्नमिति दूषणं परिहृतम् । परं सर्वोत्तमं भूतानां प्रभवाप्ययहेतुं कालं सर्वाभीष्टप्रदानात्कालनामकं नारायणं प्रतीक्षेतोपासीतेत्यर्थस्योक्तत्वात् ॥ ६ ॥

मनःसंस्पर्शजान् इन्द्रियाधिष्ठितमनसो विषयाणां संस्पर्शेन जातान् शस्तान् आपाततः शस्तान् भोगान्दृष्ट्वाऽप्यनायासेन प्राप्तानपि न संविशेन्न स्वीकुर्यादित्यर्थः । एतेन शस्तानां त्यागोऽनुपपन्नमिति दूषणं परास्तम् । आपातत इति शेषपूरणेनापाततः शस्तानित्युक्तत्वात् । एतेनैव दृष्ट्वेत्येतद्व्यर्थमिति दूषणमपास्तम् । दृष्ट्वेत्यतः परमपीति शेषपूरणेनानायासेन प्राप्तमपीति तात्पर्यार्थस्योक्तत्वात् ॥ २६ ॥

पुमानिति सुखमस्यात्मनो रूपमित्यनेनोक्तम् । अत एवैतदेवं पूर्वप्रकृतमात्मनः परमात्मनो निमित्तात्सन्तं सर्वदा सन्तं स्वार्थं स्वरूपसुखार्थं च पुरुषार्थं विस्मृत्याज्ञात्वाऽसति सर्वदाऽसति । विषयभोग इति शेषः । विषयभोगविषये द्वैते, निमित्ता सप्तमीयम् । सर्वदाऽस्तीति मिथ्याज्ञाना-न्निमित्ताद्विषयभोगान् । स्वीकृत्येति शेषः । विषयभोगान्स्वीकृत्य विचित्रां नानाप्रकारां घोरां भयङ्करां संसृतिं प्राप्नोतीत्येतद्वै प्रमाणप्रसिद्धमिति । एतेनैतदित्यनेनैव स्वरूपसुखस्य पूर्वप्रकृतत्वस्योक्त-त्वादितिशब्दो व्यर्थोऽनन्वितश्चेति दूषणं परास्तम् । इति शब्दात्परमनेनोक्तमित्यस्याध्याहारः, इति-शब्दात्पूर्वं सुखमस्यात्मनो रूपमित्यस्याध्याहार इति चाङ्गीकृत्य सुखमस्यात्मनो रूपमित्यनेनोक्त-मित्यन्वयं चाभ्युपेत्यैतदित्यनेनोक्तं स्वरूपसुखस्य पूर्वप्रकृतत्वमुपपद्यत इत्यभ्युपगमात् । एतेनैव स्वार्थमित्यस्य पुल्लिङ्गत्वात् एतमिति वक्तव्यमिति दूषणस्यानवकाशः । लिङ्गव्यत्ययेनैतदिति

नपुंसकलिङ्गप्रयोग इत्यङ्गीकारात् । एतेनैव स्वार्थमिति स्वशब्देन पुरुषार्थस्य स्वसम्बन्धित्वस्योक्तत्वादात्मन इत्येतद्व्यर्थमिति दूषणं निरस्तम् । आत्मशब्दस्य परमात्मपरत्वमङ्गीकृत्य स्वरूपसुखस्य सर्वदा सत्वे परमात्मनिमित्तमिति वक्तुमात्मन इत्युक्तमिति स्वीकारात् । एतेनैव पूर्वरूपसुखस्याननुभूतत्वेन स्मरणप्रसक्तेरेवाभावात् विस्मृत्येत्यनुपपन्नमिति चोद्यं परिहृतम् । विस्मृत्येत्यस्याज्ञात्वेत्यर्थस्योक्तत्वात् । एतेनैवासति द्वैत इत्येतद्व्यर्थमनन्वितं चेति दूषणमपास्तम् । विषयभोग इत्याद्यध्याहृतेनान्वयस्य संसारप्राप्तिहेतुप्रतिपादकत्वेन सार्थक्यस्य चोक्तत्वात् ॥ २७ ॥

प्राणार्थवदित्यस्य प्रसक्तप्राणनिवृत्तेरित्यर्थः । एतेन प्राणार्थवदित्येतद्व्यर्थमिति दूषणं परिहृतम् । अर्थशब्दो निवृत्तवाची, प्रसक्तेति योग्यतया सम्बध्यत इति चाङ्गीकृत्य प्रसक्तमरणादिव राजादिभ्यो भयमिति व्याख्यानात् ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ ७-१३ ॥

चतुर्दशोऽध्यायः

पुरुषः श्रद्दधानः सन् भगवतो नारायणस्योपशांतजनादृतमवतारकथामृतमभीक्ष्णं सर्वदा यथाकालं वा शृण्वन्महामुनीनुपासीतेति । एतेनाभीक्ष्णमित्यनेन कालनियमो नास्तीत्युक्त्वा यथाकालमिति कालनियमाभिधानं विरुद्धमिति चोद्यमपास्तम् । अभीक्ष्णमित्यनेन मुख्यमुक्त्वाऽध्याहृतवाशब्दसहितयथाकालमित्यनेन शक्त्यभावेऽमुख्यपक्षान्तरमुच्यत इत्यभ्युपगमात् ॥ ४ ॥

स्वप्नवत्स्वप्नार्थं सङ्गं यथा त्यजतीति दृष्टान्तोऽनुपपन्न इति दूषणस्यानवकाशः । सङ्गमित्यस्य स्नेहमित्यर्थमङ्गीकृत्यात्मजायादिषु स्नेहत्यागो दार्ष्टान्तिकवाक्येनोच्यत इत्यभ्युपगम्य तत्र स्वप्नवदुत्थितः इत्यनेन स्वप्नादुत्थितपुरुषः स्वाप्नार्थेषु यथा स्नेहं त्यजतीति दृष्टान्त उच्यत इत्यङ्गीकारात् ॥ ५ ॥

पण्डितो देहे गेहे च । चशब्दादन्यत्र विरक्तः आसक्तिरहितः सन् देहं गेहमन्यच्च यावद्यावतोपासनेनार्थो देहयात्रासिद्धिरूपप्रयोजनं भवति तावदुपासीनस्तत्र नृलोकमध्ये रक्तवद्रक्तवति देहादावासक्तिमतिर्नृलोके नरतां बुद्धिं न्यसेत्त्यजेत् । किन्तु पशुताबुद्धिं कुर्यादिति । एतेन देहगेहयोरुपासनक्रियां प्रति कर्मत्वात्कर्मणि द्वितीयेति द्वितीयायां देहं गेहमिति वक्तव्यम् । देहगेहे इत्यनुपपन्नमिति दूषणस्यानवकाशः । देहे गेह इत्येतदर्थवशात् द्वितीयान्तमित्यङ्गीकृत्य देहे गेहे इत्यस्य देहं गेहमित्यर्थस्योक्तत्वात् । एतेनैव रक्तवदित्येतद्व्यर्थमनन्वितं चेति शङ्का परास्ता । भावे क्तप्रत्यये छान्दसे ङेर्लोपे रक्तवदिति रूपमङ्गीकृत्य रक्तवदित्यस्यासक्तमतिरित्यर्थमुक्त्वा नृलोक इत्यनेनान्वयस्योक्तत्वात् । एतेनैव नृलोके नरतात्यागस्याशक्यत्वान्नरताबुद्धित्यागस्योक्तत्वात् ॥ ६ ॥

पूर्वे ज्ञानिनो यद्दिव्यं यच्च भौमं यच्चान्तरिक्षं तत्सर्वं वित्तं स्वत आयासेन विनाऽच्युत-निर्मितमच्युतेन दत्तं चेदुपभुंजीरन् । अतोऽधुनातनोऽपि बुधो ज्ञान्यायासेन वित्तं न स्वीकुर्यात् । किन्तु स्वत आयासेन विनाऽच्युतदत्तं चेत्स्वीकुर्यादिति । एतेनाच्युतदत्तं वित्तमुपभुञ्जीरन्नित्यत्राज्ञानिनां कर्तृत्वायोगात् ज्ञानिनामेव कर्तृत्वं वक्तव्यम् । तथा च ज्ञानिनः प्रति ज्ञान्याचारकथनमनुपपन्नमिति दूषणमपास्तम् । अधुनातनज्ञानिनः प्रति प्रतिज्ञापूर्वं ज्ञानिनामाचारः उच्यत इत्यभ्युपगमात् ॥ ८ ॥

यतो येभ्यो दारेभ्यो नृणां सत्त्वगृहो ज्ञानसम्पादनं भवति तानेतान्महतो गुणतो महतो दारानाप्तकामान्संविभजेदिति पूर्वेणान्वयः । यदर्थे यस्याः स्त्रियोऽर्थे स्वान्प्राणान् जह्यात् । पितरं गुरुं हन्याद्वा तस्यां स्वत्वं स्वकीयताबुद्धिं जह्यात् । तत्कामपूर्तिर्न कर्तव्येति यावत् । तेन दुष्टस्त्रीत्यागिना पुरुषेण जितो यो विष्णुः । अकयप्रविसम्भूमसखाहा विष्णुवाचका इति वचनात् । जितो वशीकृतो भवतीत्येतद्धि प्रमाणप्रसिद्धमिति ॥ १२-१३ ॥

त ऐते काला यतो नृणां श्रेयोविवर्धना अल्पपुण्यानां बहुफलप्रदा अतः श्रेयसः काला इत्युच्यन्ते। एतेषु कालेषु सर्वात्मना श्रेयः कुर्यात्तदाऽऽयुषोऽमोघं भवतीति । एतेन श्रेयसः काला इत्यस्यार्थान्तरायोगात् श्रेयसो विवर्धनाः काला इत्यर्थो वक्तव्यः । तथा च श्रेयोविवर्धना इत्यनेन तत्पुनरुक्तमिति चोद्यं निराकृतम् । पूर्वोक्तकालानां श्रेयःकालशब्दवाच्यश्रेयोविवर्धना इत्यनेन प्रवृत्ति-निमित्तत्वमुच्यत इत्यङ्गीकारात् । एतेनैवायुरमोघमिति वक्तव्यमायुष इति षष्ठीप्रयोगोऽनुपपन्न इति दूषणस्यानवकाशः । आयुष इति षष्ठी प्रथमादेश इत्युररीकरणात् ॥ २५ ॥

जीवराशिभिर्ब्रह्मादितृणान्तसर्वजीवराशिभिराकीर्ण आण्डकोशः । स्वार्थेऽण् । महानङ्घ्रिपो भवति। अतोऽच्युतस्य तन्मूलत्वात् । अण्डकोशलक्षणमाह ॥ वृक्षमूलत्वादिति । अच्युतेज्याऽच्युतपूजा सर्वजीवात्मतर्पणं शाखादिस्थानीयब्रह्मादिजीवानां तदन्तर्यामिणां च तर्पणं तर्पणहेतुरिति । अत्रायं विवेकः । यत्र क्वाप्यच्युतपूजा कृता चेद्ब्रह्माद्युत्तमजीवानां तदन्तर्यामिणां च तृप्तिर्भवति । एतेनाण्डकोश इत्यनूद्य महानंघ्रिपो भवतीति मत्वांऽघ्रिपत्वं विधेयमाण्डकोशांघ्रिप इति समस्तप्रयोगोऽनुपपन्न इति शङ्का परिहृता । सुपां सुलुगिति सुलोपे आण्डकोशेत्यविभक्तिको निर्देशः इत्यङ्गीकारात् । एतेन ब्रह्मादिवत्सर्वज्ञत्वाभावेन ब्रह्मादिभ्योऽधमजीवानां पूजाज्ञानस्याभावेन यत्र क्वाप्यच्युतपूजया सर्व-जीवानां तर्पणमित्यनुपपन्नम् । सर्वजीवानामित्यनेनैव पूर्णत्वादात्मशब्दश्च व्यर्थ इति दूषणं निरस्तम् । सर्वजीवशब्देन ब्रह्माद्युत्तमजीवानां ग्रहणमात्मशब्देनोत्तमाधमसर्वजीवान्तर्यामिग्रहण-मित्यभ्युपगमात् ॥ ३७ ॥

इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ ७-१४ ॥

अथ पञ्चदशोऽध्यायः

स्वजनार्पणादित्यस्य ब्राह्मणपूजार्थं स्वजनस्थापनप्रसङ्गाच्चेत्यर्थः । अयं भावः । श्राद्धब्राह्मणानां पूजा हस्तेनैव कर्तव्या । यदि श्राद्धे विस्तरं कुर्यात्तर्ह्येकस्य बहूनां पूजायाः कर्तुमशक्यत्वाच्छ्राद्ध-ब्राह्मणपूजार्थं स्वजनाः स्थापनीयाः स्युरतश्च विस्तरं न कुर्यादिति । एतेन स्वजनार्पणादित्ये-तद्व्यर्थमिति दूषणं परिहृतम् । ब्राह्मणपूजार्थमित्यस्य शेषं चशब्दस्य स्वजनार्पणादित्यनेनान्वयं च स्वीकृत्य श्राद्धे कुर्यान्न विस्तरमित्यत्र हेत्वन्तरमुच्यत इत्यभ्युपगमात् ॥ ४ ॥

देशे स्वदेशे काले दानकाले उत्पन्नं, देशान्तरे कालान्तरे उत्पन्नं चोत्पन्नमपि सम्प्राप्तमनायासेन प्राप्तम् । हरिदैवतं हरिर्दैवतं यस्य तद्धरिदैवतम् । हरिसमर्पितमिति यावत् । विधिवच्छ्रद्धया पात्रे न्यस्तं कामधुगक्षयं च भवतीति । एतेन देशे काले उत्पन्नमित्यनेन पूर्णत्वात्संप्राप्तमित्येतद्व्यर्थमिति चोद्यं परिहृतम् । न केवलं देशकाले उत्पन्नं सम्पाद्य देयं देशान्तरे कालान्तरे उत्पन्नमप्यायासं विना प्राप्तं चेद्देयमित्यभिप्रायात् ॥ ५ ॥

धर्मबाधो विधर्मः स्यादित्यस्य येन धर्मेण स्वस्य परस्योपद्रवः स विधर्मः स्यादित्यर्थः । एतेन धर्मबाधो धर्मभिदित्यनयोरेकार्थत्वमिति दूषणस्यानवकाशः । धर्मबाध इत्यनेन धर्मेण स्वस्य परस्योपद्रव इत्यर्थ उच्यते । धर्मभिदित्यनेन धर्मान्तरभिदित्यर्थ उच्यते इत्यभ्युपगमात् । एतेनैव धर्मबाध इत्यत्र धर्मेण बाध इति विग्रहाङ्गीकारे यो धर्मेण बाधः स विधर्मः स्यादित्येवं धर्मेण बाधस्यैव विधर्मत्वं प्राप्नोतीति चोद्यं निरस्तम् । धर्मबाध इत्यत्र शब्दात्पूर्वं समस्तस्य यदित्यस्य शेषमङ्गीकृत्य येन धर्मेण बाध इति विग्रहस्योक्तत्वात् ॥ १३ ॥

हे राजन् । केन वा केनचिद्यदृच्छालब्धेन । शाकादिनाऽपीति यावत् । सन्तुष्टो भवेत् । शाकादेरप्यलाभे वारिणाऽपि किं न वर्तेत किंतु वर्तेतैवेत्यर्थः । एतेन वारिणाऽपि वर्तेतेति वक्तव्ये न वर्तेतेति निषेधोऽनुपपन्न इति चोद्यं परिहृतम् । वारिणाऽपि किं न वर्तेत किन्तु वर्तेतैवेत्यतिशयेन प्रकृतार्थलाभार्थं काकुस्वरमङ्गीकृत्य न वर्तेतेत्युक्तमित्यङ्गीकारात् ॥ १८ ॥

यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुराविति पूर्ववाक्ये साक्षाद्भगवति नारायणे विषये ज्ञानदीपप्रदे ज्ञानाख्यदीपप्रद इत्येवं गुरोर्मिथ्याज्ञानलक्षणान्धकारनिवर्तकत्वं सम्यग्ज्ञानप्रदातृत्वं चोक्तम् । तत्र मिथ्याज्ञाननिरासार्थकत्वं वक्तुं न शक्यते । भगवद्विषये मिथ्याज्ञानप्रसक्तेरभावादित्याशङ्काऽत्र परिह्रियते । एषः प्रत्यक्षसिद्धः कृष्णो यतः प्रधानपुरुषेश्वरो योगेश्वरैर्विमृग्यांघ्रिश्चातः साक्षाद्भगवा-ननुपचारेण भगवान् । एतं भगवन्तमयं लोको नरं मन्यते । एवमादिभगवद्विषयकमिथ्याज्ञानस्य

विद्यमानत्वाद्गुरोर्भगवद्विषयकमिथ्याज्ञाननिरासकत्वं युक्तमिति । तेनेदं यद्यसङ्गतमिति दूषणस्यानवकाशः ॥ २७ ॥

यस्त्रिवर्गाविपनाद्गृहात्पूर्वं प्रव्रज्य वैराग्यं प्रकर्षेण गत्वा तान्धर्मार्थकामान्पुनः सेवेत भिक्षुः पापो निरपत्रपश्चेति । एतेन पूर्वमित्येतद्व्यर्थमिति दूषणं निरस्तम् । धर्मार्थकामानां त्यागे निमित्तान्तराभावाद्वैराग्यमेव निमित्तं तथा च पुनस्तान्सेवेतेत्यनुपपन्नमित्याशङ्कापरिहारार्थं त्यागकाल एव वैराग्यमनन्तरं वैराग्यं नास्तीति वक्तुं पूर्वमित्युक्तमित्यभ्युपगमात् ॥ ३६ ॥

यैर्यः स्वदेहोऽनात्मा स्वात्मानधीनो मर्त्यो मरणशीलो विट् कृमिभस्मवद्व्यवस्थया विट् कृमित्वभस्मत्ववानिति स्मृतिः । तमेव देहं स्वात्मसात्कृत्वा स्वात्माधीनां ज्ञात्वा ये श्लाघयन्ति तेऽसत्तमा इत्येतद्धि प्रसिद्धमिति । एतेन यो देहस्तमित्यन्वयलाभार्थं य इति वक्तव्यं यैरिति कथनमनुपपन्नमिति चोद्यं परिहृतम् । य इति प्रथमैकवचनस्य यैरिति तृतीयाबहुवचनादेश इत्यङ्गीकारात् । एतेनैव स्वात्मसात्कृत्वेत्यनुसारेण स्वात्माधीन इति वक्तव्यमनात्मेति वचनमयुक्तमिति शङ्काऽपास्ता । अनात्मेत्यस्य न विद्यते आत्मा स्वामी नियामकतया यस्येति विग्रहमाश्रित्य स्वात्मानधीन इत्यर्थस्योक्तत्वात् । अनेनैव देहस्य विडादिभावस्य विद्यमानत्वात् विट्कृमिभस्मवदिति सादृश्याभिधानमनुपपन्नमिति शङ्का परिहृता । भावप्रधानाद्विट्कृमिभस्मशब्दान्मतुप्प्रत्यये छान्दसे नपुंसकलिङ्गे विट्कृमिभस्मवदिति रूपं निष्पन्नमित्यभ्युपेत्य विट्कृमिभस्मवदित्यस्य व्रीह्यादिमानित्यर्थस्योक्तत्वात् । एतेनैव स्वात्मसात्ज्ञात्वेति वक्तव्यं कृत्वेति कथनमनुपपन्नमिति दूषणं परिहृतम् । यस्ता विजानात्स पितुः पिता सदित्यादौ भगवत्ज्ञातरि पितेति कर्तृवाचकशब्दोक्तत्वात्कृत्वेत्यस्य ज्ञात्वेत्यर्थ इत्यभ्युपगमात् ॥ ३७ ॥

एते क्रियात्यागादय आश्रमापसदा गृहस्थाद्याः प्रमाणाभासत्वसम्पादका अत एवाश्रमविडम्बना आश्रमान् गृहस्थाद्याश्रमान् विडम्बयन्ति निष्फलीकुर्वन्तीत्याश्रमविडम्बना इत्येतद्धि खल्विति प्रसिद्धमित्यर्थः । एतेनाश्रमविडम्बना इत्येतदाश्रमापसदा इत्यनेन पुनरुक्तमिति चोद्यस्यानवकाशः । विडम्बनशब्दस्य लक्षणया विडम्बननिष्ठनिष्फलार्थकत्वमङ्गीकृत्याश्रमविडम्बनेत्यस्याश्रमाणां निष्फलत्व सम्पादका इत्यर्थस्योक्तत्वात् ॥ ३९ ॥

समन्वय इत्यस्य सम्यगन्वीयते प्राप्यते इति समन्वयः । सम्प्राप्य इत्यर्थः । तेनाग्निरित्यारभ्य तुर्यआत्मेत्यन्तानि पदान्यनन्वितानि, समन्वय इति च व्यर्थमिति दूषणस्यानवकाशः । अग्निरित्यादिपदानां सम्प्राप्यार्थकेन समन्वयेत्यनेनान्वय इत्यभ्युपगमात् ॥ ५५ ॥

शास्त्रेण चक्षुषा वेदेत्यस्य चक्षुषा स्पष्टज्ञानजनकत्वाच्चक्षुःसदृशेन शास्त्रेण वेदेनेत्यर्थः । एतेन चक्षुषेत्यनेन शास्त्रस्य किं चक्षुरैक्यमुच्यते किं वा चक्षुःसादृश्यमुच्यते । नाद्यः । चक्षुरैक्यस्य बाधितत्वात् । न द्वितीयः । सादृश्याभिधानस्य व्यर्थत्वादिति दूषणं निरस्तम् । यथा चक्षुषा स्पष्टं ज्ञानं भवति तथा शास्त्रेण स्पष्टं भवतीति वक्तुं चक्षुषेत्यनेन शास्त्रस्य चक्षुःसादृश्यमुच्यत इत्युररीकरणात् ॥ ५६ ॥

आत्मस्थो न निवर्तत इत्यत्र भगवतो मोक्षदातृत्वमभिप्रेतम् । ब्रह्मादिष्वविद्यमानं मोक्षदातृत्वं भगवतः कुत इत्याशङ्कापरिहारार्थं भगवन्महिमा चोच्यते । आदावादिकालेऽन्तेऽन्तकाले जायमानं यज्जनानाशं जननं नाशश्च यद्ब्रह्माण्डाद्बहिर्यच्च ब्रह्माण्डस्यांतर्यच्च परावरं परमवरं च यच्च ज्ञानं ज्ञेयं च यच्च वचो यच्च वाच्यं यच्च तमो ग्लापकत्वात्तमः प्रकृतिर्यच्च ज्योतिः सूर्यादिज्योतिस्तत्सर्वं स्वयं नारायणो नारायणाधीनसत्ताकम् । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति वचनादिति । एतेन जनननाशाविति वक्तव्यं जनानाशमित्यनुपपन्नमिति दूषणं परिहृतम् । जनानाशमित्यस्य जननं च नाशश्चेति समासेन छान्दसे जननेति द्वितीया नकारलोपे सवर्णदीर्घे द्वन्द्वे विभाषयैकवद्भ-वतीत्येकवद्भावे स नपुंसकं यस्यैकवद्भावः स नपुंसकं स्यादिति नपुंसकत्वेन जनानाशमिति रूपं जातमित्यङ्गीकारात् । एतेनैवादावन्ते जनानाशमित्यादिकं तच्छब्देनानन्वितमिति दूषणं परास्तम् । प्रत्येकं यच्छब्दमध्याहृत्य तदित्यनेनान्वयस्योक्तत्वात् ॥ ५७ ॥

जीवस्वरूपस्य नित्यत्वाज्जीवस्वरूपमीश्वराधीनं न भवतीति भ्रमोऽत्र परिह्रियते । अबाधितो नाशरहितोऽप्याभासो जीवो वस्तुतया वस्तुशब्देन मुख्यामुख्यन्यायेन नारायणो गृह्यते मुख्यवस्तु-नारायणतया नारायणाधीनतया स्मृतः । स्मृत्युपलक्षितवेदादिप्रमाणप्रसिद्धमित्येतद्धि प्रसिद्धम् । आदिकाले जायमानं चतुर्मुखादिसर्जनं दुर्घटत्वादीश्वरेण कृतम् । अनन्तरं जायमानमैन्द्रियक-मित्यादिसर्जनं सुघटत्वादीश्वरेण कृतं न भवति किन्तु चतुर्मुखादिभिरेव कृतमित्याशङ्कां परिहरति ॥ दुर्घटत्वादीति । पूर्वार्धे विद्यमानं यथेतिपदमत्र सम्बध्यते । यथा दुर्घटत्वाच्चतुर्मुखादिकमीश्वरेण कृतं तद्वद्यथा दुर्घटत्वात्क्षित्यादिनिष्ठकार्यत्वादेर्दुर्घटत्वादैन्द्रियकं क्षित्यादिकमीश्वरेणैवार्थविकल्पितम् । अर्थेति भावप्रधानो निर्देशः । अर्थत्वेन कार्यादिरूपार्थत्वेन कृतमिति ॥ ५८ ॥

क्षित्यादीनामिति पूर्वश्लोके क्षित्यादीनामबादिकार्यत्वमबादीनां क्षित्यादिकारणत्वं चेश्वरं विना दुर्घटमित्युक्तम् । अत्र तु क्षित्यादीनां गन्धतन्मात्राद्यवयवित्वं गन्धतन्मात्रादीनां क्षित्याद्यवयवत्वमीश्वरं विना दुर्घटमित्युच्यते । धातवः क्षित्यादयः । धारकत्वाद्भिन्नैरिति शेषः । भिन्नैस्तन्मात्रा-वयवैर्गंधादितन्मात्रावयवैर्विनाऽवयवित्वादवयवित्वेन युक्ता इति शेषः । चशब्द एवार्थे । युक्ता नैव

स्युः । इवशब्दश्चशब्दार्थे । अवयवा इव गन्धतन्मात्रावयवश्च । भिन्ना इति शेषः । भिन्नेऽवयविनि क्षित्यादिरूपावयविन्यसति नासन्न स्युः । अवयवावयविनोर्भेदाभावादवयवावयविभावो दुर्घटः । अत ईश्वरेणैव कृत इति भावः ।

नन्ववयवावयविनोर्भेदाभावेऽपि सादृश्यस्य विद्यमानत्वाद्वयवावयविभावः सुघट इत्यत आह ॥ स्यादिति । तावच्छब्दोऽप्यर्थे । सादृश्यभ्रमस्तावत्सादृश्यभ्रमोऽपि । न केवलं सादृश्यं, सादृश्यभ्रमोऽपि वस्तुनो विकल्पे भेदे सति युज्यते । अवयवावयविनोर्भेदाभावात्सादृश्यमपि दुर्घटम् । एतेन सादृश्यमिति वक्तव्यं सादृश्यभ्रम इति भ्रमशब्दो व्यर्थ इति शङ्का परास्ता । सादृश्यभ्रमोऽपि भेदसापेक्षः किमु वक्तव्यं सादृश्यं भेदसापेक्षमिति कैमुत्यन्यायसूचनार्थं भ्रमशब्दः प्रयुक्त इत्यभ्युपगमात् । अभिन्नयोरप्यवयवावयविनोरवयवावयविरूपो विशेष ईश्वरशक्त्या सुघट इत्येतद्दृष्टान्तेनोपपादयति ॥ जाग्रदिति । यथा स्वप्ने स्वप्नावस्थायां कदाचिज्जाग्रत्स्वप्नौ । भावप्रधानोऽयं निर्देशः । जाग्रदवस्थात्वस्वप्नावस्थात्वरूपविशेषावीश्वरशक्त्याऽवयवावयवित्वरूपविशेषो दृश्यते । एतेन जाग्रत्वस्य मिथ्यात्वात् जाग्रत्वं यथा दृश्यत इति दृष्टान्तकथनमनुपपन्नमिति दूषणं परास्तम् । जाग्रच्छब्देन बाह्यत्वरूपं जाग्रत्वमुच्यते इत्यनङ्गीकृत्य जाग्रच्छब्देन जाग्रदवस्थात्वमुच्यत इत्यङ्गीकृतत्वात् । तस्य चैतावन्तं कालं जाग्रदवस्थां स्वप्नावस्थां चान्वभवमित्युत्तरकालीनपरामर्शसिद्धत्वेन सत्यत्वात् ।

न केवलं सर्वे पदार्थाः, क्षित्यादिनिष्ठाः कार्यत्वादिधर्माश्चेश्वराधीनाः किन्तु सर्वपदार्थनिष्ठाः सर्वे धर्मा अपीश्वराधीना इत्याह ॥ विधीति । विधिनिष्ठा विधिता निषेधनिष्ठा निषेधतेश्वराधीने: । उपलक्षणमेतत् । तत्तत्पदार्थनिष्ठसर्वधर्मा ईश्वराधीना इति । एतेन सर्वधर्माणामीश्वराधीनत्वे वक्तव्ये विधित्वनिषेधत्वरूपधर्मयोरेवेश्वराधीनत्वकथनमनुपपन्नमिति दूषणं परिहृतमिति ॥ ता० अर्थः ॥ यथेश्वरं विना कार्यकारणभावो दुर्घट एवमवयवावयविनोरपि भेदाभावादवयवावयविभावः दुर्घट इति शेषः । स्यात्सादृश्यभ्रम इत्येतद्व्याचष्टे ॥ न चेति । सादृश्यमात्रमवयवावयविभावघटकमिति न वस्तुभेदे तत्सादृश्यं युज्यत इत्येतद्धि प्रसिद्धम् । अतोऽवयवावयविनोर्भेदाभावात्सादृश्यं वक्तुं न शक्यते । जाग्रत्स्वप्नौ यथा स्वप्ने तथेत्येतद्व्याचष्टे ॥ तस्मादिति । तस्मादीश्वरं विना घटकं नास्ति । तस्माद्यथा स्वप्न एवेश्वरकल्पनया । जाग्रत्स्वप्न इति भावप्रधानो निर्देशः । द्वन्द्वैकवद्भावश्च । जाग्रत्स्वप्नस्वरूप इति यावत् । (विशेषो दृश्यते) तथा पृथिव्यवयवत्वादिविशेषः पृथिव्यवयवेति भावप्रधानो निर्देशः । गन्धतन्मात्रादौ पृथिव्यवयवत्वादिर्विशेषः । पृथिव्यादौ गन्धतन्मात्राद्यवयवत्वादिविशेषो दुर्घट ईश्वरकल्पनयैव दृश्यते । क्षित्यादिवस्तूनां कार्यादिकमबादिवस्तूनां

कारणत्वादिकमीश्वरं विना दुर्घटमित्यत्र प्रमाणमाह ।। कार्येति । यद्यपि कार्यकारणवस्तूनां विशेषः कार्यकारणत्वादिविशेष ईश्वरादन्येन । केनचिदिति शेषः । ईश्वरादन्येन केनचिन्निरूपितः कृतो न तथाऽपि । अपिचशब्दौ परस्परसमुच्चयौ । असौ कार्यकारणविशेष ईश्वरेच्छयैव नियतोऽपि कृतश्च दृश्यते च । अनेन न केवलं कार्यकारणविशेषः ईश्वराधीनस्तद्दर्शनमपीश्वराधीनमित्युक्तं भवतीति ।। ६१ ।।

कैवल्यनिर्वाणसुखानुभूतिरित्यस्य कैवल्यं केवलं दुःखामिश्रं निर्वाणसुखं शरीरजन्यं सुखम् । स्वरूपसुखमिति यावत् । तदनुभूतिरित्यर्थः । तेन केवलमिति वक्तव्यमिति दूषणस्यानवकाशः ।।७६।।

इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ।। ७-१५ ।।

इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाऽभिनवताण्डवाभिनव गदाऽभिनवामृतादिबहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीपादानां शिष्येण सत्याभिनवयतिना 'त्वया भागवतटिप्पणं कारयिष्यामीति' तदीयामोघसङ्कल्पमात्रमवलम्ब्य कृतायां श्रीभगवतटिप्पण्यां दुर्घटभावदीपिकायां सप्तमः स्कन्धः समाप्तः ।। ७ ।।

श्रीकृष्णार्पणमस्तु ।।

श्रीपांधरी श्रीनिवासाचार्यकृत

विरोधोद्धारः

अथ प्रथमोऽध्यायः

अस्य स्कन्धस्य विजयध्वजीयव्याख्याने मङ्गलद्वितीयपद्यचतुर्थचरणव्याख्यानम् । नित्यं (नित्यां) नित्यानित्याभ्यस्तादिति जांघ्रितनुनख (वर) तीर्थसुतीर्थे इति व्याख्येयम् । कीदृशे मयि । **नित्याभ्यस्तेत्यादि** । अत्र केचित् । नित्यं नित्याभ्यस्तेति पाठमाहुः । तत्पक्षे नित्यमिति पूर्वपदांत्यांशास्तदन्वयः । नित्यं दयां कुर्वंत्विति । नित्यां नित्येति पाठे । नित्यामिति दयाविशेषणम् । नित्यानित्येति पाठे । नित्यं पारायणेन । अनित्यं अनध्यायादित्यागेन । शिष्येभ्यः प्रवचनादिनेति योजना द्रष्टव्या । अन्वयस्तु । अभ्यस्तेत्यत्र अदितिजः । यद्यप्यस्य पद्यस्य सप्तदशाक्षरचरणत्वात्पूर्व चरणांश एव युक्तः । तथापि कथंचिदेकाक्षरन्यूनत्वेन वा ''एकेनाक्षरेण छन्दासि वियंती''ति श्रुतेरदोषः । न भवति, न विनश्यतीति यावत् । दितिजो हिरण्यकशिपुर्येनेति नृसिंहः । तस्याङ्घ्रिहस्तस्थानीयौ पूर्वपादौ सिंहस्य चतुष्पादत्वप्रसिद्धेरंघ्रीत्युक्तम् । तस्य तनुनखानि अतिसूक्ष्माग्रत्वात्तीक्ष्णनखानि तद्वत्तीर्थादपि गङ्गादिसकाशादपि । अनिष्टशत्रपापदुर्मतिविदारकत्वेन समम् । सुतीर्थं वेदान्तशास्त्रं तन्नित्यमभ्यस्तं येन तस्मिन्निति ।

यद्वा अदितिजो वामनः । तदंघ्रितनुनखतीर्थं गङ्गा तत्सकाशादपि सुष्टु अतिपावनं श्रीमध्वशास्त्रं तं नित्यमभ्यस्तं येनेति । अथवा, आ अदिति जः इन्द्रः । तच्छब्दस्यातिशयार्थकत्वेन आशब्देन विशेषिते महेन्द्रः इति सिध्यति । तथा च आदितिजः महेन्द्रनामा तस्यांघ्रिः पादः । महेंद्रपूज्यपाद इत्यर्थः । तस्य तनुनखतीर्थं पादप्रक्षालनोदकम् । तेन सुतीर्थे अतिपवित्रे मयीति । विजयध्वजतीर्थानां महेन्द्रपूज्यपादशिष्यत्वादिति भावः । उत वा । अदितिजः सूर्यः । तदंघ्रितनुनखानि चरणकोमलनखानि यस्य स व्यासः । ''तरुणादित्यसवर्णकचरणाब्जामलकीर्ते'' इत्युक्तेः । नारायणो वा । सः तीर्थं गुरुः क्षेत्रं वा यस्य स श्रीमदाचार्यः । तस्य सुतीर्थं सच्छास्त्रम् । नित्यमभ्यस्तं अदितिजाङ्घ्रितनुनखतीर्थं येन तस्मिन् । यद्वा । न भवति नश्यतीति यावत् । दितिजो हिरण्यकशिपुः । यस्मात्सोऽदितिजः । अङ्घ्र्योरेव । तनूनि कोमलानि । नखानि यस्य स तथा । अरिदृढो रविदारकत्वान्न करयोः । तादृशं तीर्थं अवतारः । नृसिंहरूपो यस्य तस्य विष्णोः । किं वा । अङ्घ्रिवत्तनूनि कोमलानि च तानि नखानि च । न दितिजे हिरण्यकशिपुविषयेऽघ्रितनुनखानि यस्य स तथेति वा । तादृशं तीर्थं अवतारो नृसिंहरूपः । तस्य विष्णोः । सुतीर्थं

तत्सर्वोत्तमत्वप्रतिपादिकं शास्त्रम् । ''नरसिंहोऽखिलाज्ञानमतध्वांतदिवाकर'' इत्युक्तेः । नित्याभ्यस्तेति पूर्ववत् । नित्येति पाठे । अनध्यायाशुचित्ववर्जनादिरूपन्यायेनेत्यर्थः । तादृशे मयि सन्तो दयां कुर्वंत्वित्यन्वयः । यद्वा । अदित्यां देवमातरि । जायते आविर्भवति स तथा । तस्य वामनस्य अङ्घ्रिं स्वरूपं ''महतां वै स्वरूपं तु पादशब्देन भण्यत'' इत्युक्तेः । अंघ्रिशब्दस्य पादापरपर्यायस्य तु ''पादः पदङ्घ्रिश्चरणौ स्त्रियाम्'' इति कोशप्रसिद्धम् । तत्तन्वन्ति विस्तारयन्ति । तनु विस्तार इति धातोः । योग्यस्वापकृष्टेभ्य उपदेशद्वारेत्यर्थः । तेषां रुद्रादीनाम् । वरः श्रेष्ठः । स चासौ सुखतीर्थश्च । सुखस्य सुखरूपस्य हरेः । तीर्थं क्षेत्रमावासस्थानमित्यर्थः । ''तीर्थं शास्त्राध्वरे क्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टांबुपात्रोपाध्यायमन्त्रिष्वि''ति मेदिनी । एतादृशः श्रीमदाचार्य इत्यर्थः । तस्य सु शोभनं तीर्थं शास्त्रमित्यर्थः । नित्यं सर्वदाऽभ्यस्तं अभ्यासलब्धम् । अदितिजांघ्रितनुवर(नरव)सुखतीर्थं येन तस्मिन्मयि सन्तो दयां कुर्वंत्वित्यन्वयः ॥ इति मङ्गलपद्यम् ॥

अत्रोत्तरार्धमवतारयति ॥ **नन्विति । वि० टी०** ॥ ननु सुरगणैः क्रियामाणस्य स्वप्रयोजनस्य सम्भवादवधीदिति किं न स्यादिति तत्राह ॥ **न हीति ॥ न ह्यस्यार्थः सुरगणैरिति** । पूर्वं तृतीयोक्तावसुरेभ्य इत्यत्रापि साम्यात्तृतीयया भवितव्यं पञ्चमी किमर्थमित्यत आह ॥ **विद्वेषश्चेति ।** विद्वेषश्च तत्तत्स्वरूपद्योतनाया सुरेभ्य इति पञ्चमीति । विद्वेषस्य । विः पक्षिपरमात्मनोरिति कोशात् । विष्णुविषयकद्वेषस्येत्यर्थः । तत्तत्स्वरूपद्योतनाय । तेषां तत्स्वरूपत्वं द्वेषस्वरूपत्वं तस्य द्योतनाय प्रकाशनाय असुरेभ्यः इति पञ्चमीति । ननु पञ्चम्याः स्वरूपद्योतकत्वं क्व दृष्टमित्यतोऽत्र दृष्टान्तमाह । **वृक्षात्पर्णं पततीतिवदिति** । पर्णवृक्षयोर्यथांऽगांगित्वेन तादात्म्यं पञ्चम्या ज्ञापितम् । एवमसुरद्वेषयोरपीत्यर्थः । एवमसुरेभ्य इति पञ्चमीविधाने प्रयोजनमुक्त्वाऽवतारिकायामुक्तशङ्कोत्तरमाह ॥ **नन्वित्यादिना** । कादाचित्काभावान्नित्यद्वेषे वधानुपपत्तिरिति । स्वरूपाभेदेन कादाचित्काभावान्नित्यद्वेषे सिद्धे वधानुपपत्तिः चेतन्यवद्वधानर्हत्वं द्वेषिणीत्यपीत्यर्थः । विपक्षे बाधकांतरमाह । **अन्यथेति ।** अन्यथा वधस्यापि संततानुवृत्तिः स्यात् । अतो नोपपत्तिः स्यादिति भाव इति । नित्यद्वेषिणोऽपि वधयोग्यत्वाङ्गीकारे द्वेषस्य सन्ततत्वसिध्या वधस्यापि संततत्वप्राप्तिः स्यादिति भावप्रदर्शनम् ॥ २ ॥

श्रीमद्भागवतमङ्गलरूपे जन्माद्यस्येत्याद्यपद्ये ''मुह्यंति यं सूरय'' इति वाक्यप्रतिपादितार्थस्य विस्तारकोऽयं सप्तमस्कन्धः । तथा हि । यमित्यनेन भगवल्लक्षितम् । तत्प्रसादं विनेति शेषः । मुह्यतेरकर्मकत्वेन यमित्यस्यानन्वयात् । तथा पूर्ववाक्ये आदिकवित्वेनोपदेशस्याग्राह्यत्वेऽपि स्नेहापरपर्यायप्रसादार्थकत्वेन हृदेत्यनेन तदर्थं ग्राह्यत्वं सूचितम् । विपक्षे बाधकं

वक्तुमुत्तरवाक्यप्रवृत्तिरिति संगत्यभावप्रसङ्गाच्च यमित्यस्यावृत्तिः कार्या । तथा च यं विना यदनुग्रहमन्तरेण यं प्रति भगवन्तमुद्दिश्य सूरयो मुह्यन्ति किं पुनश्चान्य इत्यर्थः । अतो ब्रह्मणा आदिकवित्वेऽप्यनुग्रहार्थमेवोपदेशोंऽगीकृत इति पूर्ववाक्यभिप्रायः । तत्रानुग्रहयोग्या अपि द्विविधाः । प्राप्तानुग्रहप्राप्स्यमानानुग्रहभेदात् । आद्याः शुकनारदादयः । अपरे परीक्षिद्युधिष्ठिरादयः । ज्ञानित्वं तूभयत्रापि यथायोग्यं स्थितमेव । तत्र परीक्षित्यपि ज्ञानित्वं , सिद्धमेव । बुध (अभिमन्युर्बुधस्यावतारः) पुत्रत्वात् । गर्भे भगवत्परीक्षणात् । धर्मराजेन संस्कृतत्वात् । शुकशिष्यत्वाच्च । अत एव राज्ञः स्वस्य सूरित्वेऽपि सर्वसंशयच्छेदनाभावाच्छुकगुरुद्वारक भगवत्प्रसादस्यापूर्णत्वसिध्या मोहापरपर्यायसंशयप्राप्तिः । तथा श्रीनारदद्वारकतदनुग्रहा-पूर्णत्वाद्धर्मराजस्य सूरित्वेऽपि भगवत्तत्त्वे मोहः । अत्र मोहस्यैव प्राधान्यप्रदर्शनापेक्षया सूरिणामपि रमाब्रह्मादीनां भगवदनुग्रहस्य पूर्णताया अनधिकारिजनमोहन साध्यत्वज्ञानेनैव स्वस्य शङ्कितत्व-प्रदर्शनेन लोकमोहनरूपो मोह इत्यादिविस्तरस्यात्र निरूपणमिति । सङ्गतिस्तु षष्ठे हतपुत्रादितिः । शक्रपार्ष्णिग्रहेण विष्णुनेति ।

लब्ध्वा तदन्तरं शक्रो निद्रोपहतचेतसः ।
दितेः प्रविष्ट उदरं योगेशो योगमायया ।
चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।

इति चैतद्द्वयं सन्देहबीजम् । तत एव द्रष्टव्या । तेनैव जातसंशयो राजा पृच्छति ॥ **सम इति ।** अत्र सम इत्यनेनैवालं प्रिय इत्यादीनां तु व्यर्थत्वमिति चेन्न । विवक्षांतरसद्भावात् । तथाहि । भगवति समत्वाभावप्रसंजनार्थं प्रथमं समत्वमेवानुमानेन साधयितुं तदङ्गानि सूचयति । अत्र सम इति साध्यम् । प्रिय इति हेतुः । सुहृदिति दृष्टान्तः । भगवानिति पक्षः । स्वयमिति प्रसङ्गसमर्थनार्थम् । विषम इति विपक्षः । तथा च भगवान्समः प्रियत्वात् । सुहृद्वदित्यनेन समत्वं प्रसाध्य तदभावापादनं अज्ञानेन संशयेन विपर्ययेण च करोति । तदित्थम् । इन्द्रार्थं दैत्यहननात्प्रत्यक्षेण वैषम्यसिद्धिः । तदेतत्प्रेय इति श्रुत्यनुकूलप्रियत्वहेतुना देवानां दानवानां च सामान्यमधिदैवतमित्यागमेन च समत्वसिद्धिः । तदुभयोरेकत्रानवस्थानलक्षणविरोधकथनेन कथमेतदुभयं प्रामाणिकमित्यजानतः । भगवतः सर्वप्रियत्वेन समत्वं, दैत्यवधेन विषमत्वं वेति संशयात् । भगवान्यथा यथावद्विषमः । इन्द्रस्यार्थे देत्यानवधीदिति हेत्वर्थे । अतः समः प्रियः सुहृच्च कथं किन्तु नेति विपर्ययात् ।

दैत्यवधे कारणानि निराचिकीर्षुस्तद्विरुद्धैर्विशेषणैर्विशिनष्टि । तच्चेत्थम् । भगवानिंद्रस्यार्थे कथं दैत्यानवधीदित्यस्योत्तरं विषमत्वादिति चेन्न । यतः समः कर्मानुरूपफलदानेन । न वैषम्यनैघृण्ये

इत्यादिसूत्रे वैषम्यस्य निरस्तत्वात् । भोग्यत्वेन समत्वेऽपि अप्रियाः स्वभर्तारं हंत्येवेत्यत उक्तम् ॥ **प्रिय इति ।** तदेतत्प्रेय इति श्रुतेः । उपकारशीलत्वाद्धन्तेत्यत उक्तम् ॥ **सुहृदिति ।** उपकारीत्यर्थः ।

द्रव्यं कर्म च कालश्च स्वभावोजीव एव च ।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥

इत्युक्त्या सत्त्वान्यथाऽनुपपत्तेः । भूतानामिति तु समत्वादौ सर्वत्र योज्यम् । सार्थघ्ना चोरवदनीश्वरत्वेन हंतृत्वं किं न स्यादित्यत उक्तम् ॥ **भगवानिति ।** ऐश्वर्यवानित्यर्थः । ऐश्वर्यस्य समग्रस्येत्यादेः । स्वस्वामिघ्नमन्त्रिवत्पारतन्त्र्यनिरासार्थं हन्तृत्वमस्त्वित्यत उक्तम् ॥ **स्वयमिति ।** स्वतन्त्र इत्यर्थः । इन्द्रस्य दुर्बलत्वदर्शनाय कृपया दैत्यवध इत्यत उक्तम् ॥ **इन्द्रस्येति ।** परमैश्वर्येण प्रबलस्येत्यर्थः । इदि परमैश्वर्य इति धातोः । तस्मात्कारणाभावात्कथं दैत्यवध इति प्रश्नः । यद्वा । समः सलक्ष्मीको भगवानिति पक्षः । प्रियत्वं साध्यम् । सुहृदत्वं हेतुः । न च ''द्रव्यं कर्म च कालश्चे''त्यनेन भगवत उपकारित्वे सिद्धेऽपि रमायास्तदभावाद्भागासिद्धिः । अहं रुद्रेभिर्वसुभिश्च-रामीत्यादि श्रुतौ भरणोक्तेः । स्वयं विषम एकः सन् विपर्ययेण समः । अलक्ष्मीक इति वा । एतत्पक्षे यथेत्युत्प्रेक्षार्थे । इन्द्रस्यार्थे कथं दैत्यानवधीत्तस्मादेतत् यथा विश्वासानर्हमित्यर्थः । अथवा । भगवान्भूतानामित्यस्य सुहृत् शोभनं हृदयं येन स तथा इन्द्रम् । तस्य इत्यर्थः। इन्द्रस्येत्यावर्तनीयम् । तस्यार्थे पुरुषार्थे सत्यपि स्वयं दैत्यान्यथावत्कथमवधीत् । तेनैव हन्तव्या इति भावः ।

ननु भगवतोऽसुराद्यन्तःस्थत्वात्तत्पक्षपातित्वेन सुरान्किं नावधीदित्यतोऽतःस्थत्वं न तत्र निमित्तं किन्तु प्रियत्वमेवेत्यत उक्तम् ॥ **प्रिय इति ।** एकत्र प्रियत्वेन वैषम्यं स्यादित्यत उक्तम् ॥ **सम इति ।** तं यथा यथोपासते, ''ये यथा मां प्रपद्यन्त'' इति श्रुतिस्मृतिभ्यां उपासनसदृशफलदातृत्वमेव समत्वमित्यर्थः । देवानां प्रियत्वेनोपासकत्वात् । असुराणां त्वप्रियत्वेनोपासनात्तत्सदृशफलदातृत्वान्न वैषम्यम् । तं भूतिरिति देवा उपासांचक्रिरे ते बभुवुस्तस्माद्धाप्ये तर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभुरित्यसुरास्तेह पराबभुवुरिति श्रुतेरिति भावः ।

ननु दैत्यानवधीदित्युक्तम् । तत्र दितिपुत्रयोरेव हननात्प्रायस्तद्वंश्यानामपि वधाभावात्कथं बहुवचनमिति चेन्न । बहुवचनस्य दानवराक्षसादिग्राहकाद्यर्थकत्वात् । अतो न कश्चिद्विरोधः । अस्य प्रश्नस्योत्तरमप्यनेनैव सम्पद्यते । तदित्थम् । स्वयं भगवानिन्द्रस्यार्थे दैत्यानवधीदिति अयथा अनुचितमित्युक्ते उक्तप्रमाणविरोधेन समत्वादिकं कथं स्यात् । किन्तु विषम एव सिध्येदित्युत्तरम् । सलक्ष्मीकस्यापि हरेः सुरकार्यकारित्वेऽप्येक एव कथं दैत्यानवधीदित्यत्राप्येतदेवोत्तरम् ।

भगवान्विषमोऽसाधारणोऽत एव समः सन् । अत्रायमाशयः । त्रिजन्मस्वाद्यजन्मनः कृतकालिकत्वेन बलाधिक्याद्रमाभिमन्यमानाया जडरूपाया धरानाम्न्या भार्यायाः । हिरण्याक्षेण हरणे कृते पार्थक्येन तद्धंतृवराहरूपस्य वधकाले भार्यासंनिधानाभावात् । हिरण्यकशिपुवधकालेऽपि सा नोपेयाय शङ्कितेति सूचनेन रमासंनिकर्षाभावात् । तथा द्वितीयजन्मनस्त्रेताकालिकत्वेन पूर्वापेक्षया हीनबलत्वाद्रमा-रूपसीतायाः प्रतिकृतिरूपाया एव हरणकृद्रावणवधकालैकावताररामस्य भार्याया असंनिधानात् । तृतीयजन्मनो द्वापरकालिकत्वेन तदपेक्षया हीनबलत्वाद्रमारूपाया रुक्मिण्या हरणार्थं विवाहरूपोद्योग एव कृते तन्निमित्तेन युद्धं विनाऽपि राजसूयसभायां वधकाले रुक्मिण्या अन्तःपुरस्थत्वेना-संनिधानादसमत्वे सिद्धेऽपि हिरण्यकशिपोर्वधकाले लक्ष्म्यसंनिधाननिमित्ताभावेऽपि तत्साहित्येऽयं विष्णुरिति ज्ञानसम्भवेन शापप्राप्यपुनर्जन्मा प्राप्तिप्रसङ्गात् । नित्यावियोगिन्या अपि लक्ष्म्या बाह्यतो रहितः सन् दैत्यानवधीदित्यर्थः । तथा । अयथा प्रियः अप्रिय इत्यर्थः । प्रायेण मेयं हरिणौरसारिणावधस्मृत इत्युक्तेः । अतस्तथैवासुहृत् । असुहृदित्यर्थः । हरिष्येऽपि वरोर्जितमिति प्रतिज्ञातत्वात् । निर्दयहृदिति यावत् । अत इन्द्रस्यार्थे । कथमित्याक्षेपे । नेत्यर्थः । किन्तु स्वयमेवावधीदिति । अनेन तृतीयप्रश्नोत्तरमपि दत्तप्रायम् । अत एव साधु प्रष्टमित्यादि वक्ष्यति । प्रश्नोत्तरत्वादेव साधुत्वमिति भावः ॥ १ ॥

पूर्वश्लोके निर्गुणत्वाङ्गीकारेण भगवतो भयविद्वेषाभावः समर्थितः । अत्र तु नारायणगुणान्प्रति संशय इत्युच्यते । न हि निरधिष्ठानः संशयो भवति । अतोऽर्थान्तरम् ॥ **नारायणगुणान्प्रति ।** कर्तृत्वादिगुणविषये ॥ **जातस्तम्भवान् ।** जातेन गुणत्वजात्या स्तम्भः स्तम्भनं स्थैर्यं तद्वान् ॥ **संशयोऽस्ति ।** भगवति गुणत्वजातिसद्गुणानामभावो वा केषाञ्चिदभावो वेति संशये आद्यकोटेरन्यथा ज्ञानिभ्यः सकाशाच्छ्रुतत्वेन । द्वितीयकोटेः स्वतःसिद्धत्वेन स्थैर्यासिद्धिरिति भावः । **स त्वद्वाक्येन करणेन ॥** छेत्तुम् । छेदविषयी कर्तुमर्हति । **सुमहानिति ।** न इत्यस्य विशेषणमपि । शोभनो मह उत्सवः श्रवणोत्कण्ठा येषां तान्न इत्यर्थः । यद्वा । नारायणगुणानां विशेषणं महोत्सवानित्यर्थः । अथवा । नारायणगुणानिति न इत्यस्य विशेषणम् । नारायणाद्गुणाः श्रवणेच्छादयो येषां तानिति विग्रहः ॥ ३ ॥

निर्गुणोपीति । श्लोकोपरि प्रवृत्तं तात्पर्यवाक्यम् । **बाध्यादिस्थ इति ।** तत्र बाध्यतादिगतेत्यत्र आदिगतेत्यसङ्गतमेव । अनन्वयात् । अतस्तद्दीपिकायां तु हे बाध्यतादिगतेति सम्बुध्यत इति लिखितम् । तथा सति हरेरिति परोक्षकर्ता गीयत इति प्रथमपुरुषोऽसङ्गत इति केचिद्वदन्ति । तादृश लेखनाशयस्तु नैव ज्ञायते हि । अन्येतु । आद्यद्वितीयचरणयोरेकार्थसद्भावाद्विरुक्तिं कथयन्ति । अपरे

तु गतेत्यत्र छन्दोभङ्गभयादनुस्वारलोप इति च भाषन्ते । तथाप्युक्तद्विरुक्तिपरिहारो न दृश्यते अतोऽस्यार्थो लिख्यते । बाध्यादिस्थो हरिर्नित्यमित्यनेन हरेर्बाध्यबाधकस्थत्वमुक्तम् । सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः । भूतानि भगवान्यात्मन्निेतिवत् । बाध्यताऽपि हरिस्थितेति वक्तुम् । **बाध्यतादिगतेत्यपीति ।** बाध्यता । आदिगता आदौ पुरुषे हरौ गता विद्यमाना इतीत्यपि गीयते । तथापि सा हरेर्बाध्यत्वान्न । किन्तु । ''तु शब्दस्तु विशेषे स्यात्स्वसिद्धान्तेऽवधारणे'' इति शब्दनिर्णयात् बाध्यशब्दप्रवृत्तिनिमित्तविशेषान्न साधारणबाध्यशब्दप्रवृत्तिनिमित्तरूपबाधार्हत्वात् । विशेषस्त्वित्थं बोध्यः । बाधार्हो बाध्यो जीवः सोऽस्यास्तीति बाध्यः । अर्शाद्यच् । अधीनो जीव इत्यर्थः । गोमानित्यादिषु दृष्टत्वात् । बाधार्हजीवनियंतृत्वेन बाध्यादिस्थत्वरूपप्रवृत्तिनिमित्तलक्षणविशेषेण बाध्यता गीयते इति भावः । ''यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयत'' इति भाष्यस्थस्कान्दोक्तेः । यद्वा । अद भक्षण इति धातोः । तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेश्च । आदिनो जीवाः तद्गता बाध्यता बाधार्हता गीयते । हरेः सर्वशब्दवाच्यत्वात् । सर्वविशेषेण तुशब्दवाच्ये हरौ न । तत्र हेतुः । ''नित्यादोषयुतत्वत'' इति ॥ ६ ॥

अत्र कालं सृजतीत्युक्ते कालस्यानादिनित्यत्वेन विरोधोऽत उच्यते । यदा सिसृक्षुरिति पूर्वश्लोकस्थेन यदापदेन सिसृक्षायाः कालाधीनत्वं सूचितम् । स्वतन्त्रस्य तन्नोपपद्यत इत्यत इदं पद्यम् । हे नरदेव राजन् । ईशो रमानाथः । न केवलं कालमेव सृजति किन्तु प्रधानपुंभ्यां सह सहितम् ॥ **चरन्तम् ।** अतीतानागतवर्तमानरूपेण प्रवर्तमानं कालम् । एवं त्रीनपि सृजतीत्यर्थः । न चानादिनित्यत्वेन त्रयाणामपि सर्जनं दुर्घटमिति शङ्क्यम् ।

जीवानां देहसंयोगः प्रादुर्भावो हरेर्जनिः ।
विकारता जडानां च जनिरित्युच्यते सदा ॥

इत्युक्त्या तेषामनादिनित्यत्वेऽप्युक्तरीत्या जनिसम्भवात् । तत्र कालस्य सृष्टिकालादीनामविशेषरूपविकारार्पणमेव सर्जनम् । सृष्ट्याद्यभावे सृष्टिकालादिनाम्नामप्य सम्भवात्तत्सृष्ट्यादिकं भगवदाश्रितम् । अत आश्रय इत्युक्तम् । तत्रापि हेतुरीश इति ।

ननु सृष्ट्यादेरेव मिथ्यात्वेन तदाश्रयस्याप्यनुपपत्त्या तद्धेतुकृतेशत्वस्याप्यनुपपत्तेरित्यत उक्तम् ॥ **सत्यकृदिति ।** सत्यस्यैव सृष्ट्यादेः कर्तेत्यर्थः । किंचारोपितस्यैव मिथ्यात्वम् । आरोपस्त्वेकत्र सत्यत्वेनैव । स्थितस्यैवान्यत्र सम्भवति । नान्यथा । तस्मात्सृष्ट्यादेः सत्यत्वं काङ्गीकृतम् । यत्र कचिद्दृष्टान्तस्यैव सत्यत्वसिध्या सर्वोक्तोपपत्तिः । यदि कुत्रापि वदसि तदा आरोपासिध्या मिथ्यात्वासम्भवेन सत्यत्वस्यैव सिध्या युक्तमुक्तम् । अनेन कालादिनिदर्शनेन यावत्सृज्यं तावत्सर्वं

सत्यमेव सिध्यति । नेदं कालादि किंत्वित्यस्योत्तराभावेन बाधासम्भवात् । अत्र कालस्य प्रधानपुंभ्यां साहित्यकथनेन तत्सृष्टौ तत्कालस्य सृष्टिकालत्वं सेत्स्यति । न केवलं कालसृष्टिकथनेन । आत्माश्रयत्वप्रसङ्गात् । अतः प्रधानपुंभ्यामित्युक्तम् । अनेन तत्तत्संज्ञार्पणरूपकालसृष्टि-कथनेनाधीनकालो विष्णुर्यदा देवादीन्भजते तदा सत्त्वाद्युत्कर्षकालविषये प्रवर्तत इति भावः । किञ्च स कालादिस्रष्टा तत्र तत्र सत्त्वाद्युत्कर्षकाले प्रवृत्तः सन्निति शेषः ॥ **उभयसिद्धमिति** । देवदैत्यानामुत्कर्षानुत्कर्षकत्वमाप्नुयात् । चो हेत्वर्थे । यतः ॥ **लिङ्गात्मनः** । देवदैत्यलिङ्गान्तःस्थस्य ॥ **लिङ्गगुणाः** । लिङ्गस्य स्वाभाविकदेवदैत्यत्वचिह्नस्य बाध्यबाधकत्वादयो गुणाश्च सन्ति । अतो न सत्त्वविरोधः ॥ ११ ॥

शपतोरिति । अत्र विविशतुरिति लिट्-द्विवचनेन विद्यमानदन्तवक्रमृत्यूक्त्या प्राप्तविरोध-निरासार्थमित्यर्थः । यत् अव्ययं नाशादिसर्वदोषरहितम् ॥ परं गुणपूर्णं ब्रह्म । तं विष्णुमसकृच्छपतोश्चेदिकारूषयोर्जिव्हायाम् ॥ श्वित्रः कुष्टः । न जातः । तौ ॥ अन्धं न पुनरुत्थानम्। तमश्च न विविशतुः । भूतार्थकलिटा पूर्वमेवोभयोस्तमः प्राप्त्या भवितव्यम् । तथाऽप्यद्यपर्यंतं नासीदिति भावः सूचितः । यद्वा । यद्ब्रह्मपरमित्येकं पदम् । यान्ति गच्छन्ति जानन्ति वेति यान्ति । तानि च तानि ब्रह्माणि च जीवा इत्यर्थः । ब्रह्माणि जीवाः सर्वेपीत्युक्तेः । तेभ्यः । परं भिन्नम् । अव्ययं व्येति विकारं प्राप्नोतीति व्ययं जडं तद्विलीणमव्ययं विष्णुं सन्मानशपनकर्मणोर्मध्ये एकस्य चैद्यस्य भगवत्प्राप्तिदर्शनेन तत्साद्दश्यादन्यस्यापि सा भविष्यतीति भाविन्याऽपि प्राप्तेर्निश्चयेन भूतार्थकलिटा न विविशतुरित्युक्तिः । छत्रिन्यायाद्वा ।

ननु नात्र विरोधः ॥ शिशुपालमृतेः प्रागेव दन्तवक्रमृत्यङ्गीकारात् । न च भागवतेऽनन्तरकथनेन विरोधः । ''पूर्वाः कथाः परं ब्रुयुः परां पूर्वं तथैव च'' इति शब्दनिर्णयवचनेन पूर्वापरव्यत्यय-संभवादिति चेन्न । पूर्वश्लोकस्थसंप्रतिशब्दस्य संगत्यनुपपत्तेः । तत्र हि दमघोषसुतः कलभाषणादारभ्य पापः निन्दनादिना पापवान् । अर्श आद्यच् । आसीदिति शेषः । दुर्मति र्दन्तवक्रश्च ॥ संप्रति अधुना । गोविंदे अमर्षी आस्त इत्यन्वयः । न च संप्रतिशब्दः शिशुपालेऽन्वेति । मृतत्वात् । अथवा । विष्णुमसकृच्छपतोश्चेदिकारूपयोर्जिव्हायां श्वित्रो न जातस्तथा ब्रह्मशब्दलक्षितवाचं प्रति तमो ग्लानिः । तमुग्लानाविति धातोः । परं तयोश्चेतनं प्रति । अन्धं अन्धयतीत्यंध अज्ञानलक्षणं कश्मलम् । एते द्वे । यत् किम् । यच्छब्दस्य किमर्थकत्वात् । न विविशतुः । शपतोर्जिव्हायां कुष्टः वाचि ग्लानिः, चैतन्येऽज्ञानं च किं न जातमित्यर्थः । किं वा स्वयमेव शङ्किते श्वित्राभावब्रह्मप्राप्ती संभावयति । यद्यस्मात् शपतः सनकादीन्प्रति दमघोषकरूषजौ ।

अन्धंतमः गाढं कोपं न विविशतुः न प्रापुः । तस्माज्जिव्हायां न श्वित्रो जातः । अव्ययं अपुनरावृत्तिम् । परं ब्रह्माख्यं विष्णुम् । विविशतुश्चेति । संभावयामीति शेषः । रंसकृदिति अपृथग्विष्णुविशेषणम् । रसशब्द इति धातोः । त्रिभिर्लोकाय कल्पतामिति सनकाद्युक्तकर्तारमित्यर्थः ॥ २० ॥

अनयैव प्रनाड्योत्तरश्लोकस्थं ईयतुरिति पदं च व्याख्येयम् । तथा चायं श्लोकार्थः ॥ **कथं तस्मिन्निति ।** पूर्वश्लोके यद्यतोऽधमज्ञाने तमोगुलापको मधुनामा दैत्यश्चैतौ विविशतुः । अतो विष्णुं शपतोश्चैद्यकारूपयोर्जिव्हायाम् । यद्यतश्च । अव्ययं स्वाभाविकं परं ब्रह्मासकृन्निरन्तरमस्ति । अतश्च । अनजातः अजा अविद्या तद्विरुद्धा अनजा विद्या तयेति । तृतीयार्थे तसिः । श्वित्रः कुष्ठो नासीदित्यर्थविवक्षामाशंक्याह ॥ **कथमिति ॥ तस्मिन् ।** विषयेऽपि । एको जयः । भगवति लयमियाय । अन्यो मधुः ॥ **दुरवग्राह्यधामनि ।** दुःखस्वरूपेण ग्राह्ये धामनि । स्थानरूपेऽधे तमसीत्यर्थः । लयमियायेति । एतावज्ञानदैत्यौ तस्मिन्जयांशे शिशुपाले ॥ अंजसा । साकल्येन ॥ कथम् । कस्मान्निमित्तात् ॥ लयम् । प्रवेशम् । ईयतुः । यद्वा । तस्मिन्जयांशे ॥ पश्यताम् । जानतामपि । सर्वलोकानाम् ॥ दुरवग्राह्यधामनि । दुर्ज्ञेयस्वरूपे । भगवति स्थिते सति । अज्ञानदैत्यौ अंजसा कथं केन कारणेन लयं नाशं ईयतुः । उक्तं च तात्पर्ये । मधुकैटभौ भक्त्यभावाद्धतौ भगवता मृतौ । तम एव क्रमादाप्तौ भक्त्या चैद्यो हरिं ययाविति । पूर्वोक्तं वा द्विवचनसाधनम् ॥ २१ ॥

यथेति । अस्वबुद्धिनिश्चयेन येन तन्मयतायां भक्तियोगापेक्षया वैरानुबन्धस्य महासाधनत्वोक्तिः । तानहं द्विषतः क्रूरानित्यारभ्य ततो यांत्यधमां गतिमित्यंतेन विरुध्येतात उच्यते । **मर्त्य इति ।** मर्त्याधमः ॥ वैरानुबन्धेन वैरस्मरणेन । तन्मयतां तत्र मनसोऽभिनिवेशम् । आग्रहमिति यावत् । यथेयात् प्राप्नुयात् तथा भक्तियोगेन नेयादिति मे मतिर्निश्चिताऽनुभवोऽत्र प्रमाणम् । अनेन मनस एकाग्रीकरणे वैरानुबन्धस्य महत्वं सूचितम् ।

मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ ।
न तथाऽऽग्रहिणो भक्त्या ऋते ब्रह्माणमव्ययम् ॥

इत्युक्तेः । न तु तत्प्राप्तौ । ''वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु । भक्ता नैव निपात्यन्ते'' इत्युक्तेः । एतदर्थमेव पूर्वश्लोके युञ्ज्यादिति न विधिकथनम् । किन्तु य इति कर्त्रध्याहारेण प्रवृत्तिमुक्त्वा सा इति कर्त्रध्याहारेण पृथगनीक्षणरूपं फलमुच्यते ॥ २८ ॥

उत्तरश्लोकेऽपि दृष्टान्तप्रदर्शने संरंभभयेनेत्युक्तम् ।। सरंभः, दुःखदस्य प्रतिदुःखदानाय मनसो विकारः । पुनर्मां न दंशेदिति भयम् । अयं मे क्षुन्निवर्तकत्वेन पोषक इति स्नेहयोगः । ''प्रीतिः स्नेहस्तथा योगः प्रेमाबन्ध इतीर्यत'' इति शब्दनिर्णयोक्तेः । एतेषु त्रिषु पूर्वयोर्द्वयोरपगमे केवलस्नेहेनैव समानरूपताप्राप्तिः ।

स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपि च ।
विद्यमानेऽप्यल्पकोपे सङ्गतिः स्नेहतस्तथा ।।
पेशस्कृद्रूपता कीटो यथा याति तथैव तु ।
चेद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि ।
निजस्वभावया भक्त्या नीता हरिसरूपताम् ।।

इति वचनात् । न तु तदैक्यम् । भृङ्गरूपप्राप्तात् श्यामनामककृमेः सकाशात्पूर्वं भृङ्गस्य भिन्नत्वदर्शनात् । अत एव तदुत्तरश्लोके वैरेण धूतपाप्मानस्तमापुरनुचिन्तयेत्युक्तम् । वैरयुक्तयाऽप्यनुचिन्तया भक्तिपूर्वकस्मृत्या अनुचिन्तितेति । तामाहुर्भक्तिपूर्वा तु या स्मृतिरित्युक्तेस्तात्पर्ये । धूतपाप्मानः संतस्तं कृष्णमापुरिति हि तदर्थः । अतो वैरादिना मुक्त्यभावात् न तानहमित्यादि गीतावाक्येन विरोधः ।। २९,३० ।।

कतम इति । पूर्वत्र षण्णां मुक्तियोगानां मुक्तौ सत्यामत्र पञ्चानामित्युक्त्या विरोधोऽत उच्यते ।

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात्कामेन वा युञ्ज्यात्कथञ्चिन्नेक्षते पृथक् ।
कामात्स्नेहाद्भयाद्वेषाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ।।
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बद्धृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ।।

इत्युक्तत्रिषु पूर्वोभयोः सम्बन्धस्यैककुलायत्तत्वात्सर्वत्रासंभवेनानुक्तेः । तद्व्यतिरिक्तानां पञ्चानां मध्ये । यद्वा । मुख्यस्यानिर्विशेषेण शब्दोऽन्येषां विशेषत इति स्कान्दोक्तेः । अस्मदादि-विहितनिर्विशेषितभक्तेर्मुख्यत्वात्तदभावेऽपि गोप्याद्याचरितानां कामादिविशेषयुक्तभक्तियोगानां पञ्चानां मध्ये पुरुषं कृष्णमुद्दिश्य कतमोऽपि कश्चनापि विशेषेण भक्तियोगो नास्त्यतो द्विजैस्तमसि पातित इति युक्तमिति भावः । तस्माद्वेनकृतनिन्दायुक्तस्वभक्तियुक्तस्याश्रवणात्केनापि उक्तेष्वेकतमेनापि ।

यद्वा । क शब्दः कुत्सने इत्युक्ते उक्तेष्वधमेनापि उभयभूतेन भक्तियोगेन कृष्णे मनो निवेशयेदित्यविरोधः । केचित्पुरुषे पुरुषस्य कामासंभवात्पुरुषे वेने कामस्यानुपपत्त्या पञ्चानां भयादीनां मध्ये इत्याहुः । तच्चिंत्यम् ।

पुत्रा अग्नेः पूर्वमासंश्च तेऽथ स्त्रीत्वप्राप्त्यै चक्रुरुग्रं तपश्च ।
भार्यात्वार्थे वासुदेवस्य योषित्तनुं तासामिच्छतीनां समीरः ॥

इति तात्पर्यनिर्णयोक्तेः । पुरुषाणामग्नीनां कृष्णे कामसंभूत्या तपसा कृष्णभार्यात्वप्राप्तेर्दर्शनात् ॥ ३३ ॥

देहेति । अस्य प्रश्नस्याग्रे उत्तराभावाद्ग्रन्थन्यूनतेति नाशंक्यम् । द्वाःस्थौ तान्प्रत्यषेधतामित्यत्राग्रे उत्तरसंभवात् । तथाहि । वैकुण्ठेऽधिकारस्था मुक्ताश्चेति द्विविधा जनाः सन्ति । तत्र द्वाःस्थावित्यनेन जयविजययोरधिकारस्थत्वं सूच्यते । अधिकारस्थितानां तु देहादियोग्यत्वेन वरशापयोग्यत्वम् । एवं मुक्तानामप्ययोग्यत्वम् । तदुक्तम् ।

अधिकारस्थिताश्चैव विमुक्ताश्च द्विविधा जनाः ।
विष्णुलोकस्थितास्तेषां वरशापादियोगिनः ॥
अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च ।
विमुक्त्यनन्तरं तेषां वरशापादयो न तु ।
देहेन्द्रियादियुक्ताश्च पूर्वं पश्चान्न तैर्युताः ।
अप्यभिमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युताः'' ॥ इति तात्पर्ये ।

तस्माद्वैकुण्ठे मुक्तामुक्तस्थानद्वयसंभवादमुक्तस्थाने जयविजयोर्देहादियोगित्वेन स्थित्या शापसंभव इति द्वाःस्थपदेन प्रश्नपरिहारसूचनान्न ग्रन्थन्यूनतेति ज्ञेयम् ॥ ३६ ॥

अशपन्नित्यत्र रजस्तमोभ्यां रहिते इत्यनेन जयविजययोर्मुक्तस्थानस्थितत्वप्रतीत्या नैवमिति चेन्न । रजस्तमसोरुभयोरेव राहित्यकथनात्तृतीयसत्त्वात्मकसिध्या गुणयोगेन तत्स्थितिस्थलस्य मुक्त-स्थानत्वाभावात् । न हि मुक्तस्थानस्य गुणसंबन्धः । सगुणान्समतीत्येतान्ब्रह्मभूयाय कल्पत इत्युक्तेः ॥ ३९ ॥

पापिष्ठामिति ॥ आसुरीम् । सुरविरोधिनोऽसुरा भगवद्वेषिणस्तेषामियमासुरी तां योनिम् । युवाम् ॥ यातम् । अधमगतिं गच्छन्तमित्यर्थः ।

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥

इत्युक्तेः । न तु दैत्ययोनिमित्यर्थः । येन रक्षः क्षत्रिययोन्योः प्राप्त्योक्तिविरोधः स्यात् । शापस्यैकविध्ये जातिभेदे किं कारणमिति चेत् ।

यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौंतेय सदा तद्भावभावित ॥

इत्युक्तेः । हिरण्यकशिपुजन्मनि ब्रह्मासृष्टाद्भुतं नृसिंहरूपं दृष्ट्वाऽयं पश्चान आननः कश्चन यातुधानो महान्तीति भावनयाऽग्रे दशाननो रावणः पुण्यजन आस । तत्र मृतिकाले स्वहंतारं धनुर्धरं रामं दृष्ट्वा मद्धंताऽयं कश्चन क्षत्रिय इति भावनया अग्रे शिशुपालः क्षत्रिय आस । तत्रापि मृतावयं चक्रधरः साक्षाद्वैकुण्ठपतिरित्यनुसन्धानेन वैकुण्ठद्वारपालकत्वं प्रापेति न कश्चन विरोधः । तदस्य प्रियमभिपाथो अश्यां नरो यत्रेति श्रुतौ केवलाभ्युपसर्गस्याभिषिक्तमित्यर्थवत् आङुपसर्गस्यापि आक्रीयमाणार्थकत्वमङ्गीकार्यम् । तथा च आक्रीयमाणा असूर्यः । अस्य वाराहरामकृष्णरूपस्य विष्णोः सुरमण्यः धरासीतारुक्मिण्यो यस्यां तां योनिमिति वा ॥ कृपालुभिः कृपापूर्णकलशैरित्यर्थः । आलुजुपपदीभूतदयादिगणे कृपाशब्दस्य पाठान्नात्रालुच् विधानम् । किन्तु आलु शब्दस्य कलशवाचकत्वमेव । कृपालवः पङ्कजनाभतीर्था इत्यस्य व्याख्याने कोशेऽपि द्रष्टव्यः ॥ ४० ॥

जज्ञात इति । अत्र यं हिरण्याक्षमसूत साग्रत इत्युक्तेर्विरोध इत्यतोऽर्थांतरम् । समानलोप इति सूत्रेण तत इत्यत्र तत इत्युपमेयम् । सप्तसु प्रथमेति सूत्रेण तत इति प्रथमा पञ्चम्यर्थे वा । ततात् पितृतो हिरण्यकशिपोर्ज्येष्ठत्वम् । एतद्विवक्षयैवोक्तिरिति न विरोध इति वेदितव्यम् ॥ ४१ ॥

हत इति । अत्र पूर्वं हिरण्यकशिपुमृत्यूक्त्या ।

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ।
हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा ॥

इत्यनेन विरोधः । तथा हिरण्याक्षो धरोद्धारे वराहेण हत इति चोक्तम् । एतदपि दुर्घटम् । तद्वधांते । उद्धृत्य विस्तृतायां धरायां स्वायंभुवकन्याप्रसूतिजायां हिरण्याक्षजन्मश्रवणाद्विरोधांतरं चेत् । उच्यते । पूर्वं हिरण्याक्षवधेऽप्यत्र हिरण्यकशिपोः पूर्वं मृत्युक्तिस्तु ज्येष्ठादिक्रममपेक्ष्य ज्ञेया । ''हिरण्यकशिपुर्ज्येष्ठौ हिरण्याक्षोऽनुजस्तत'' इति पूर्वमुक्तेः । न तु कालिकक्रममपेक्ष्य । अथवा ।

शिशुपालस्य प्रकृतत्वात्तदभिन्नचेतनत्वेन हिरण्यकशिपोः प्रस्तावार्हत्वादादौ तद्वधोक्तिस्तस्मान्न विरोधः । तथैवान्योऽपि न । स यथा । हिरण्याक्षावेव द्वौ । ब्रह्मजः कश्यपजश्चेति । तत्र ब्रह्मप्रलयोदकमग्नधरोद्धारे- तस्यादिदैत्योक्त्या ब्रह्मजत्वसिद्धेः । ब्रह्मण आदिसृष्टिदिने आदिवाराहेण दंष्ट्र्या तस्य हतत्वात्तदुत्तरमेव दक्षकन्यादित्यात्मजे द्वितीये हिरण्याक्षे ब्रह्मजादिहिरण्याक्षाविष्टे सति ब्रह्मदैनन्दिनलयाब्धौ कश्यपजहिरण्याक्षमज्जितधरोद्धारे पुनर्दशावतारगतवाराहेण तस्यैव कर्णताडनेन हतत्वात् । तदुक्तम्–

ब्रह्मजस्तु हिरण्याक्षः प्रथमं दंष्ट्रया हतः ।
स एव पार्षदाविष्टो द्वितीयं कर्णताडनात् ॥
पूर्वं लयोदके मग्नां द्वितीयं तेन मज्जिताम् ।
भुवमुद्धरता चासौ हरिणा क्रोडमूर्तिना ॥

इति ब्रह्माण्डे । न च दैत्यनामानुपपत्तिः । तथाहि । अदितिशब्दो अद् भक्षण धातोरत्तरि प्रसिद्धः । तथा दोऽवखण्डनधातोर्दित्याख्यसंहारावसानकाले जातत्वात् । दैप् शोधन इति धातोः स्वमूलशोधकत्वाद्दितिर्ब्रह्मा तत्पुत्राद्वा ।

ननु वाराहादिवाराहयोः को विशेष इति चेत् । नराकृतिवराहाननत्वं द्वितीये । केवलवराहरूपत्वमाद्ये । विपरीतं किं न स्यादिति चेन्न । करेण करणमूलेऽहन्निति वचनेन द्वितीयस्य करादिसद्भावात् । आद्यस्य तं दंष्ट्रयाऽद्रिमिव वज्रधरो ददारेत्युक्त्या कराभावसिद्धेश्च । अस्तु तथा । तथाऽप्यादिदैत्यवधकाले ''दत्वा स्तनाद्यासृक्प्रसुवे'' इत्यादिवचसां का गतिरिति चेत् । तत्रापि कश्यपजदैत्यस्यैव प्रवृत्तत्वात् । कुत एतदुपलभ्यत इति चेत् । करेणैव वधदर्शनात् । तत्रादिदैत्येत्युक्तेः कथं योजनेति चेत् । दितेः प्रथमापत्यत्वात् । तथाऽपि ततः प्रसूत्यादेरनन्तरत्व-कथनेन विरोध इति चेत् ।

व्यत्यासेनापि चोच्यत न विवेकेन कुत्रचित् ।
दुष्टानां मोहनार्थाय तत्र तत्र कथाः क्वचित् ॥

इति स्कांदोक्त्या निर्वाहः कर्तव्यः । इमावेव श्वेतवाराहवाराहाख्यौ ब्रह्मकश्यपजहंतारौ क्रमात् । अतोऽत्र न कश्चिच्छंकावकाशः ॥ ४२ ॥

तावद्येति । तावद्य क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव । अत्र राजसूयाग्रपूजायामेकस्मिन् शिशुपाले हते निर्मुक्तावित्यादिद्विवचनप्रयोगोऽसाधुरिति ततोऽर्थांतरम् ॥ तौ रावणकुंभकर्णौ ॥ अद्य । अस्मिंस्तृतीये जन्मनि । हे युधिष्ठिर तव ॥ मातृष्वस्रोः श्रुतदेवाश्रुतवसोः । आत्मजौ सुतौ । अत एव क्षत्रियौ । चैद्यकारूषौ जातौ । नात्र द्विवचनानुपपत्तिः । उभयोरपि जातत्वात् ॥ अधुना सांप्रतमग्रपूजाकाले । शापस्य ॥ निर्मुक्तौ निर्मुक्तिविषये ॥ कृष्णचक्रहतांहसौ कृष्णस्य चक्रे सुदर्शनगदे ताभ्यां हतं विनष्टं अंहः शापरूपं पापं ययोस्तौ ।

ननु चक्रशब्देन गदा कथमुच्यत इति चेत् । शिशुपालस्य चक्रेण दन्तवक्रस्य गदया हतत्वोक्तेः । न चाश्रुतकल्पनेयम् ।

''जुगोप कुक्षिंगत आत्तचक्र'' इत्यत्र चक्र शब्दस्य चक्रदीप्ताविति धातोर्दीप्तगदया भ्रामणेनालातचक्राकारेण चक्रवद्दर्शनात् । अन्यथा परीक्षिदुक्तेरपि विरुद्धत्वापातात् । गर्भे परिभ्रमंतीमुल्काभां भ्रामयन्तं गदां मुहुरित्यादि दृष्टत्वोक्तेः । तस्माद्युक्तमुक्तम् । तथा दन्तवक्रमृत्यभावसिद्धद्विवचनानुपपत्तिः कथं परिहृतेति चेत् । छत्रिणो यांतीतिवदजहल्लक्षणयाऽहतस्यापि दन्तवक्रस्याछत्रिणोऽपि छत्रित्ववद्धतव्यपदेशात्ज्ञेया । यद्वा । अधुनाऽग्रपूजायामेकः कृष्णचक्रहतांहा जातः । शापनिर्मुक्तौ शापप्राप्तदेहविसर्जनेऽन्यः कृष्णगदाहतांहाः स्यात् । एवं विवेकेनोभौ कृष्णचक्रहतांहसौ वेदितव्यौ ॥ ४७ ॥

विद्वेष इति ॥ अच्युतात्मनि, अच्युतो विष्णुरात्मनि स्वस्मिन्यस्य तस्मिन्हिरण्यकशिपावधिकरणे । प्रवेक्ष्येऽहं पराग्दृश इति वामनोक्तेः ॥ विद्वेषः । विः पक्षिः परमात्मनोरित्यभिधानात् । वेः विष्णोर्द्वेषः कथमासीदित्येकः प्रश्नः । तस्योत्तरं ''भ्रातर्येवं विनिहत इत्यादिना ज्ञेयम् ॥ महात्मनि, श्रीनारदशिष्यत्वात्पूज्यबुद्धौ ॥ दयिते परमपुत्रत्वात्प्रिये ॥ पुत्रे । पुन्नाम्नो नरकात् त्रातृत्वाद्युपकारिणि च प्रल्हादविषये । विशेषेण द्वेषः कथमासीदिति द्वेषस्य स्वरूपविषयो द्वितीयः प्रश्नः । तदुत्तरम् । वध्यतामाश्वयं वध्य इत्यादिना । विद्वेष आसीदिति निमित्तविषयस्तृतीयप्रश्नः । तदुत्तरम् । तत्साधुमन्ये इत्यादिना । अपिशब्दः प्रश्नसमुच्चये । विष्णुद्वेषनिमित्तं प्रल्हादद्वेषस्वरूपं तद्द्वेषनिमित्तं च मे ब्रूहीत्यन्वयः ॥ ४९ ॥

इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ ७-१ ॥ ॥

अथ द्वितीयोऽध्यायः

।। हरिः ॐ ।। **आह चेति ।** अष्टपादात्मकेऽस्मिन् श्लोके आहाब्रवीदित्येताभ्यां न पुनरुक्तिशंक्या। तयोर्भिन्नार्थकत्वात् । अव्यवधानेनाग्रे ''भो भो दानव दैतेया'' इत्युक्तिसद्भावेन तानभिमुखीकर्तुमाहेत्यनेन संबोधयतीत्यर्थोपगमात् । आभाष्याहाशरीरवागितिवत् अध्वर्युः पुष्टिं करोति संयतीत्यादौ लटो विध्यर्थकत्वेन ल्यबंतार्थकत्वासंबोध्याब्रवीदित्यर्थः । अब्रवीदित्यस्य तु पुरतः श्रुणुतानन्तरं सर्वैरित्यादेः सत्त्वादनन्वितम् । इदं रुषेत्यङ्गीकारात् । अस्य विष्णो रुषेत्यर्थः । यद्वा । इयं चासौ रुट् चेति तया प्रकृतरोषेणेत्यर्थः । अथवा पृथक् पदम् । इदं बंधुमुद्दिश्येति शेषः । किं वा । ''इ विचित्रे स्मरे पुमान्'' इति यादवकोशात् । आश्चर्यप्रदमित्यर्थकं क्रियविशेषणमिदं संबोधनस्याश्चर्यप्रदत्वं तु ''नमुचे पाक इल्वले''त्यत्र संध्यभावात् । इदं विश्वं कोपोज्ज्वलाभ्यां निरीक्ष्यन्निति वा । तत्पक्षे करालदंष्ट्रोग्रदृष्ट्या धूम्रमंबरं कुर्वन्निति शेषः । निरीक्ष्यन्निति वा । अत एव दुष्प्रेक्ष्यभ्रुकुटीमुख इति योजनाद्रष्टव्या ।। २ ।।

रुदंत्य इति । अत्रांघ्रिपंकजमित्यस्य सोत्सङ्गस्थमिति विशेषणमध्याहार्यम् । अन्यथा तस्य दूरस्थत्वे प्रव्हीभूतानां योषितां कुचकुंकुमारुणत्वमश्रूणां न स्यात् । प्रव्हीभूतत्वाभावेंऽघ्रिपंकजेऽस्रपतनासंभवात् । नात्र रुदंत्यो विलेपिर इत्येताभ्यामर्थतः पुनरुक्तिः । उभयोर्भिन्नार्थकत्वात् । तत्राद्यस्यांवर्णत्वे सति दुःखजन्यशब्दोच्चारणार्थकत्वम् । द्वितीयस्य वियोगखेदगुणवर्णनयुक्तदुःखजन्यशब्दोच्चारणार्थकत्वमिति ।। आक्रंदनया रोदनस्वरविशेषापरपर्यायेणाक्रोशेनेत्यर्थः ।। ३२ ।।

इति दैत्येति । दितिर्वाक्यश्रवणपुत्रशोकत्यागांते सस्नुषा सती ।। तत्त्वे विष्णौ । ''स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान्विष्णु'' इत्युक्तेः । उभयोर्मध्ये स्वातन्त्र्यस्यैव प्राधान्येन ग्राह्यत्वात् । चित्तमधारयदित्यन्वयः । आदावेव स्नुषात्वाङ्गीकारे कर्तरि स्नुषाप्रवेशाद्यवक्रियाणामुभयनिष्ठत्वप्राप्त्या पुत्रपदस्यायोगः । यद्वा । पुत्रशोकत्यागः केवलं दितिपरः । श्रवणधारणे उभयनिष्ठ इति योगविभागः । अथवा । ''समाने लोप'' इति सूत्रेण ससस्नुषा इति स्थिते स्नानेच्छासहितेत्यर्थः । किं वा । पुत्रशः पुत्रस्य दैत्यपतेर्वाक्यमाकर्ण्य अकं दुःखं क्षणात्त्यक्त्वा तत्त्वे तद्भावे ज्येष्ठपुत्रास्तिक्ये तद्धर्मे वा तदभिप्राये वा चित्तमधारयदिति ।। ६१ ।।

इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ।। ७-२ ।।

अथ तृतीयोऽध्यायः

अन्यथेति । अत्र परमेष्ठीनिजासनमिति प्रकृतत्वादन्यैरित्यनेन पदानि गृह्यन्ते । कल्पांते वैष्णवादिभिरित्येताभ्यां विष्णुपदानां कल्पान्तत्वं प्रतीयते । विष्णुपदस्य तु । ''न यत्र माया न रजस्तमश्च । न यत्र कालः प्रभवेत्'' इत्यादिना नित्यत्वमुक्तम् । अतो विरोधस्तस्मादुच्यते । विष्णोरपत्यं भक्तो वा ब्रह्मा । ब्रह्मा स्वयंभूद्रुहिणो वैष्णवः शतधृत्तथेति शब्दनिर्णयोक्तेः । स आदिः कर्ता येषां तैर्ब्रह्मनिर्मितैरित्यर्थः । तेषामेव कल्पान्तत्वं न विष्णुपदस्येति न विरोधः । अहम् ।। इदम् । दृश्ये विश्वम् ।। ओजसा । तपःसामर्थ्येन ।। अन्यथा । अन्यप्रकारकम् ।। अयथापूर्वं ब्रह्मकृतविलक्षणम् ।। विधास्ये उत्पादयिष्यामि । इदमुत्पादनं पारमेष्ठ्यपदप्राप्तावेव घठेत नान्यपदलाभेन । तस्मात्तदेव साधयिष्ये इति भावः । एतत्पदस्थ एतत्किं न कुरुषे इत्यत आह ।। किमिति । वैष्णवादिभिर्ब्रह्मनिर्मितैः ।। कल्पान्तैः ब्रह्मदिनपर्यन्तस्थायिभिः । अत एव ।। कालनिर्धूतैः । अनित्यैः ।। अन्यैः । इंद्रादिपदैः । किं फलम् । न तत्रस्थेनेदमुत्पादनं सुशकमित्यर्थः।। ।।१२ ।।

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ।। ७-३ ।।

अथ चतुर्थोऽध्यायः

जगुरिति । अत्र नारदोक्त्याऽस्मच्छब्दगृहीतेस्तस्य च प्रल्हादोपदेशेन दैत्यस्यानिष्टकामत्वप्रतीतेः। अस्मदादयो जगुरित्यनेन विरोध इति चेन्न । अस्मदादय इत्यत्रातद्गुणसंविज्ञानबहुव्रीहेरङ्गीकारात् । येषामादिर्नारदस्ते जगुः । न तु नारदः । न हि नारदस्य नारद एवादिर्भवति । अतो न विरोधः ।। १४ ।।

एवमिति । अत्र कालस्य महत्वं न सङ्गच्छते । सौहृदं दुस्त्यजं पित्रोरत्यजत्पञ्चहायन इत्युक्त्या पञ्चवर्षात्मककालस्योपलब्धेः । न च शापजन्मप्रभृतिकः काल इति वाच्यम् । ऐश्वर्यमत्तस्येत्यादिविशेषणायोगात् । ऐश्वर्यस्य शापोत्तरसंभवात् । नापि वरानन्तरमपि बहुकालेन प्रल्हादजन्माङ्गीकारो युक्तः । तपसः पूर्वमेव तज्जन्मोक्तेः । निरंबु धारयेत्प्राणान् को वैः दिव्यसमाः शतमिति ब्रह्मोक्त्या बहुकालापत्यां सत्यामपि अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतय इत्युक्तेः । स्वभर्तुर्गृहागमनपर्यन्तं इन्द्रादिभयशङ्कायाः सत्त्वेन गर्भधारणोत्तरं तु गर्भधारणे कारणाभावात्तज्जन्मोपगमे तत एव प्रल्हादे पञ्चहायने सिद्धे महाकालातिक्रमणमनुचितम् । अत्रोच्यते ।

कालस्य महत्वं नाम मनुष्यमानेनाष्टादशशतवर्षात्मकत्वम् । न च पञ्चहायनत्वोक्तिविरोधः । हिरण्यकशिपोर्महेन्द्रसदनस्थत्वाद्देवमानेन पञ्चवर्षाणामेवोपपत्तेः । यद्वा । महा उद्धव उत्सव इत्यभिधानात् । बहुवचनस्य त्रित्वे पर्यवसानाच्च । तस्य कालः महान् । एतद् द्वितीयाबहुवचनम् । प्रल्हादस्य जातकर्मनामकर्माक्षरविधिरूपांस्त्रीनुत्सवानित्यर्थः ॥ व्यतीयाय । अत्यक्रामत् ॥ २० ॥

मा भैष्टेति । अत्र विबुधश्रेष्ठा इति बहुवचनसंबुध्या व इत्यनेन चरितार्थे सर्वेषामिति व्यर्थमिति न शंक्यम् । प्रयोजनसद्भावात् । तथाहि । पूर्वत्र सर्वे लोकाः सपालका इत्यादिना सपालकसर्वलोकशरणागत्युक्त्या विबुधश्रेष्ठा इत्यनेन पालकमात्रग्रहणेऽपि लोकग्रहणासंभवात् । सर्वेषामित्यनेन तद्ग्रहणोपपत्तिः । ननु मद्दर्शनमित्ययुक्तम् । पूर्वत्र ''तेषामाविरभूद्वाणी ह्यरूपा मेघनिःस्वने''त्युक्त्याऽरूपस्य दर्शनायोगात् । मैवम् । यतो मम दर्शनं येन तदुपस्थानमित्यर्थः । उपतस्थुर्हृषीकेशमित्युक्तेः । ध्यानं वा । ध्यानेनात्मनि पश्यंतीत्युक्तेः । नात्रासन् प्रत्ययांतस्य श्रेयः शब्दस्य अदंतत्वेन विरोधः । ''पिण्डं दद्याद्गयाशिरे'' इत्यादौ दृष्टत्वात् । यद्वा । मद्दर्शनपदस्य विशेषणं सर्वश्रेय इति । सर्वं श्रेयो यस्मादिति विग्रहः ॥ अपपत्तये । नास्त्यन्यः पः पालको यस्य स, पः अहं तस्य मम पतिः प्राप्तिस्तस्यै हि । सर्वश्रेयस्करं मद्ध्यानम् ॥ भूतानां देहिनाम् । मत्प्राप्तये भवतीत्यर्थः । अतो न कश्चित्क्षुद्रशंकावकाशः ॥ २६ ॥

गुणैरिति । अत्र यस्य नैसर्गिकी रतिरित्यस्य ''अनादिद्वेषिणो दैत्या विष्णौ द्वेषो विवर्धितः । तमस्यंधे पातयति दैत्यानन्ते विनिश्चयादि''ति परमश्रुतिवाक्येन विरोध इत्यत उच्यते । ॥ यस्य नरस्य । भगवति वासुदेवे ॥ नैसर्गिकी स्वाभाविकी । एकवचनेनैका ॥ रतिः भक्तिः । तयेति शेषः । तस्य नरस्य ॥ महात्म्यम् । महात्मानः पूज्यचेतना देवा इति यावत् । तेषामिदं महात्म्यं देवत्वं सूच्यते । तर्हि दैत्यकुलोद्भवादिकं कथं तत्र युज्यत इत्यत आह ॥ **गुणैरिति** ॥ असंख्येयैः । सम्यक् ख्यातुं योग्याः संख्येयाः । सुष्टुवर्णनीया इत्यर्थः । तद्विरुद्धा असंख्येया अवर्णनीया इति यावत् । तैर्गुणैः गौणीवृत्तिनिमित्तभूतैर्दैत्यकुलोद्भवादिदोषैः । बहुवचनाद्बहुभिरपि । ॥ अलम् । तद्वर्णनेऽलंभाव एव युक्त इति भावः । । ॥ तस्य प्रल्हादस्य । रहितासुरोसुर इत्युक्तेः । दैत्यकुलजत्वं शापजम् । स्वाभाविकं तु देवत्वमेव । ''देवाः शापाभिभूतत्वात्प्रल्हादाद्या बभूविरे'' इति भाष्योक्तेश्च ॥ ३७ ॥

इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ७-४ ॥

अथ पञ्चमोऽध्यायः

गृहमिति । अत्र दैत्ययाजका इति बहुवचनस्य । ''पौरोहित्याय भगवन्वृतः काव्यः किलासुरैः । शण्डामर्कौ सुतौ तस्ये''त्यादिना द्विवचनसद्भावाद्विरोध इति चेन्न । बहुवचनस्याद्यर्थकत्वात् । शण्डामर्कादयः शालस्था इत्यर्थः । निहत्य धार्तराष्ट्रान्न इत्यत्राद्यर्थकत्वोपलंभात् । न च तत्र केवलधृतराष्ट्रपुत्रार्थकत्वम् । आचार्याः पितरः पुत्रा इत्यादिना सर्वसंबंधिनां प्रकृतत्वात् ॥ ८ ॥

भण्यतामिति । अष्टमश्लोके दैत्ययाजका इत्यत्राद्यर्थकत्वेन विरोधपरिहारेऽपि गुरूणामित्यत्र विरोध एव । सर्वशालास्थानां गुरुत्वाभावादिति चेन्न । गुरूणामित्यत्रापि गुर्वादीनामित्यर्थांगीकारात् । गुरावात्मनि च बहुवचनमित्युक्त्या सोपपत्तिकत्वात् ॥ १० ॥

एतावदिति । अस्तु पूर्वोक्तबहुवचनविरोधपरिहारः । अत्रोक्तस्य कुपितः सुदीन इत्याद्येकवचनस्य का गतिरिति चेत् । उच्यते ॥ एता । इण् गताविति धातोर्गत्यर्थानां ज्ञानार्थकत्वात् । ज्ञाता प्रल्हादः ॥ अव ब्राह्मणाय, जानते ब्राह्मणाय । अव गत्यादाविति धातोः । इत्युक्त्वा । अनेनाविद्वद्ब्राह्मणस्य संभाषणीयत्वमपि नास्तीति सूचितम् । अत एव पूर्वं यथा भ्राम्यत्ययो ब्रह्मन्नित्यत्र ब्रह्मन्नित्येकवचनप्रयोगः । बहुभिः पृष्टेऽप्येकस्मा एवोत्तरं दत्तमिति भावः ॥ विरराम । तूष्णीं स्थितोऽभूत् । अत्र विररामेत्यस्यावृत्तिः कार्या ॥ महामतिः । उभयोर्मध्ये यो ज्ञानवान् एकः स विरराम । अथान्यो राजसेवकत्वात्सुदीनः सन् तं प्रल्हादं निर्भर्त्स्य कुपितोऽभूदिति योजना ॥ १५ ॥

धर्मा इति । अत्र केवलधर्मोपदेशप्रार्थनायां सत्यां धर्ममर्थं कामं चेति त्रयाणामुपदेशाद्विरोध इति न शंक्यम् । धर्मा इति बहुवचनस्याद्यर्थकत्वात् । तेन धर्मादय इति स्थिते धर्मार्थकामा इत्यर्थः । अतो न विरोध इति भावः ॥ ५१ ॥

धर्ममिति श्लोकद्वयम् । उपशिक्षितं तच्छिक्षामित्येताभ्यां पुनरुक्तिर्नाशंक्या । शण्डामर्कौ गुरुभिः गुरावात्मनि बहुवचमित्यतः शुक्राचार्येणेत्यर्थः । आत्मने प्रातिस्विकत्वेन स्वस्मै इत्यर्थ द्योतनायैव संधिव्यत्ययः । व्यत्ययोऽतिशयकुत्सनाभेदेष्विति सूत्रात् ॥

यथा त्रिवर्गम् ॥ आद्यपुरुषार्थत्रयं यथा । उपशिक्षितं तथा ॥ आनुपूर्वशः पूर्वमनुसृत्य स्थितम् । नीत्यादिधर्मस्य । पितृप्राप्यत्वात् । स्तन्याद्यर्थस्य मातृप्राप्यत्वात् । रत्यादिकामस्य दारप्राप्यत्वात् । तत्तत्कारणकं धर्मार्थकामं च प्रल्हादाय नितरामूचतुः । अन्यबालेभ्यः किंचिदनेन ज्ञायते । तत्र

हेतुगर्भविशेषणं प्रश्रयेणेति । ।। प्रश्रयेण भगवन्निष्ठया नम्रायेत्यर्थः । प्रल्हाद इति कर्ताऽध्याहार्यः ।। द्वन्द्वारामोपवर्णिताम् । द्वन्द्वेषु रागद्वेषादिषु । आरामः रत्यातिशयः । तदर्थमुपवर्णितां तच्छिक्षितां यो गुर्वोरध्यापितं साधु सम्यक् न जाने इत्यर्थसंभवान्नानेकविरोधदर्शनम् ।। ५२,५३ ।।

इति श्रीभागवतटिप्पण्यां पञ्चमोध्यायः ।। ७-५ ।।

अथ षष्ठोऽध्यायः

पुंस इति । अत्र हिशब्दः पूर्णायुश्चेदित्यर्थे ।। पुंसः पुरुषस्य । मनुष्यस्येति यावत् । आयुर्वर्षशतं स्यात् । शतायुर्वै पुरुष इति श्रुतेः । अन्यथा तावत्परिमितं न स्यादित्यर्थसूचकश्चशब्दः । ''प्रायेणाल्पायुषो मर्त्याः कलावस्मिन्युगे जना'' इत्युक्तेः । अजितात्मन इत्यस्यावृत्त्यर्थे वा । तथा च । अजिते हरौ । आत्मा मनो यस्य । तस्य पुंसो वर्षशतम् । आयुर्हि ।

आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ।
तस्यर्ते यः क्षणो नीत उत्तमश्लोकवार्तया ।।

इत्युक्तेः ।। अजितात्मनः । अवशीकृतमनसः ।। तदर्धं शतार्धम् ।। निष्फलं व्यर्थं भवति । व्यर्थं भस्त्रेव निश्वसन्नित्युक्तेः । तत्र हेतुर्यदिति ।। यत् यस्मात् । अजितात्मा ।। रात्र्यां दिनसमानकालिक्याम् । अजितेन मनसा । कर्त्रा ।।। अन्धन्तमः । गाढमज्ञानम् । प्रापितः सन् ।। शेते स्वपिति । आत्मैव रिपुरात्मन इत्युक्तेः ।। ११ ।।

एवमर्धायुषो व्यर्थत्वमुक्त्वा दिनकालिकस्याप्यर्धस्य वैयर्थ्यं दर्शयति ।। **मुग्धस्येति ।** अत्रायं विशेषः । शतवर्षमितायुषि एता अवस्थाः । चातुर्वर्ण्यं मया सृष्टमित्यत्र गीताभाष्ये सात्विको ब्राह्मणः । सात्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्र इति विभाग इत्युक्तिवत् । तथा शुद्धसात्विकादिभेदेन जीवविभागोक्तिवच्च । बाल्यकौमार कौमारतारुण्य तारुण्यवार्धिक्य वार्धिक्यभेदात् षट् । तत्र बाल्यकौमारयोर्ग्रहणेन मुग्धस्य क्रीडतश्चेत्युभयग्रहणेनायमर्थः ।। **मुग्धस्य** अज्ञानस्य बालस्येत्यर्थः । बाल्ये दशवर्षाणि गच्छन्ति । दशवर्षमितं बाल्यम् । तत्र ज्ञानाभावान्निष्फलत्वमायुष इति भावः । वैद्यशार्ङ्धरेणापि दशवर्षान्ते बाल्यनाश इत्युक्तम् । तदूर्ध्वं ।। क्रीडतः । गुरुसेवाविद्याभ्यासादिकं विसृज्य निलायनसेतुबन्धादिकौमार क्रीडाभिर्विहरतः । दशवर्षाण्यपयान्ति । एवं विंशतिर्यातीत्यायुषो निष्फलत्वमिति भावः । अत्राप्ययं विशेषः । अष्टवर्ष ब्राह्मणमुपनयीतेति श्रुतेरष्टमे वर्षे उपनयनम् । ततो द्वादशवर्षं गुरुसेवया विद्यासंपादनार्थं ब्रह्मचर्यम् ।

एवं विंशतिवर्षाणि विहितं त्यक्त्वा य एवं विहारैः कौमारैरित्यादिनोक्तनिलायनादिक्रीडाभिर्नयन्ति तेषां विंशतिर्निष्फला स्यादिति । अथ तारुण्यस्य वक्तव्येऽपि बाल्यकौमारसमकालत्वान्मण्डूकप्लुतिन्यायेना वार्धक्यमेवादौ वदति ॥ **जरयेति** । अत्रापि षष्ठीद्वयग्रहणेनायं विशेषः सूच्यते । सोऽयम् । वार्धक्यमपि द्वेधा । शक्तियुक्तं तद्रहितं चेति । तत्र ॥ जरया ग्रस्तदेहस्य । किञ्चिच्छक्तियुक्तस्य । जरयेति पृथक् पदात्तदावृत्तिः सूच्यते । जरया लक्षणया जरान्यविषादेन दशवर्षाणि निष्फलानि यान्ति ॥ अकल्पस्य अशक्तस्य । अशक्त्या दशवर्षाणि वृथा यान्ति । एवं विंशतिर्निष्फला याति । अत एवाशीतिर्न हि पूर्यत इत्यनेनोपवासाद्यनर्हत्वमुक्तम् ॥ १२ ॥

अथ शिष्टस्य तारुण्यकालस्य निष्फलत्वं ब्रवीति ॥ दूरापूरेणेति । अत्रापि तारुण्यं त्रेधा । कौमारमिश्रम् । केवलतारुण्यम् । वार्धक्यमिश्रं चेति । गृहेषुसक्तस्येत्येकं पदम् । अत्रापि विशेषः । गृहिणी गृहमुच्यत इत्युक्तेः । इष इच्छायामिति धातोश्च । गृहं स्त्रियं इषति इच्छति स गृहेषुः स चासौ सक्तश्चेति कर्मधारयः । तत्र दारेच्छादेः ॥ दूरापूरेण कामेन । कामस्य दुष्पूरत्वात्तद्विषयकयत्नेन दाराणां ऋतुप्रतीक्षादिना तारुण्यस्याद्यविंशतिर्याति । तथा ॥ सक्तस्य दारसंगयुक्तस्य । ॥ मोहेन सामान्यतो देशकालाभिज्ञत्वेन । द्वितीया विंशतिर्याति ॥ प्रमत्तस्य । स्त्रीपुत्रादिलालनपोषणादिना नष्टावधानस्य । बलीयसा । चशब्दानुकृष्टमोहेन तृतीया विंशतिर्याति । एवं शेषं षष्ठिवर्षात्मक-मायुरपयाति । शार्ङ्गधरेणापि दशमासात्मकसप्ततिवर्षान्ते शुक्रनाश इत्युक्तम् । तादृशसप्ततिवर्षाणां द्वादशमासात्मकानि चतुर्मासोत्तराष्टपञ्चाशद्वर्षाणि भवन्ति । तदंते शुक्रनाशो नाम शुद्धतारुण्यनाशः । अष्टमासोत्तरैकवर्षस्याल्पत्वान्न गणनायामूनतेत्येकवाक्यतया संवादो द्रष्टव्यः । तस्मात्सर्वायुषि भगवद्धर्माचरणेऽनवकाशात्कौमार आचरेत्प्राज्ञो धर्मान् भागवतानिहेति युक्तम् ।

यस्य तद्ब्रह्मसंसिद्धं पूर्वं तेनाप्येतऽग्रतः ।
मध्ये वयसि चेत्सिद्धं मुक्तौ मध्यं प्रपश्यति ॥
तेजोमण्डलमेवान्यदङ्गं विष्णोः प्रपश्यति ।
पूर्वे वयसि बोद्धव्यमामुखात्सर्वदृष्टये ॥

इति तैत्तरीयभाष्योक्तेः । यद्वा । तृतीयं भागमायुष इति भागवतैकादशस्कंधे वानप्रस्थधर्म-प्रस्तावोक्त्या चतुराश्रमाणामायुषश्चत्वारो भाग इति गम्यते । तत्राद्यपञ्चविंशत्यब्दात्मकबाल्यवयसि ब्रह्मचर्यम् ॥ द्वितीयतावदात्मकबाल्यतारुण्यवयसि गार्हस्थ्यम् । तृतीयतावदात्मकतारुण्यवार्धक्ये वयसि वनवासित्वम् । तावच्चतुर्थे वयसि संन्यासः । तत्राशक्तत्वात्स एवातुरसंन्यास इत्युच्यते । एवं बाल्यादिनिर्णयः ॥ १३ ॥

इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ७-६ ॥

अथाष्टमोऽध्यायः

तदैवेति । अत्र येन ब्रह्माण्डकटाहमस्फुटदित्युक्तम् । ब्रह्माण्डकटाहभेदे बाह्योदकगमनप्रसङ्गः स्यात् । तथा ब्रह्मादिभिः स्वधामाप्ययमाने प्रत्यहं दशावतारदर्शनात्तदसंभवेन च विरोधद्वयप्राप्तिरित्यत उच्यते । अस्फुटदित्यस्य प्रत्यगर्जदित्यर्थः । नाभिद्यतेत्यर्थः । आस्फोटच गाढाशनौ व्यपतदित्यत्र स्फोटशब्दस्य शब्दार्थकेन दृष्टत्वात् । अन्यथा तत्र भेदार्थकत्वेऽनुपयोगात् । तथैवाजादय इत्यत्र समासस्यातद्गुणसंविज्ञानबहुव्रीहित्वाङ्गीकारात् । ब्रह्मेतरैः स्वधामाप्ययमानेऽपि ब्रह्माज्ञानासंभवाच्च न विरोधद्वयमिति ।। १६ ।।

सत्यं विधातुमिति ।। निजभृत्यभाषितं निजेन स्वेन । भृत्यविषये । भाषितं उक्तम् । न मे भक्तः प्रणश्यतीति । अथवा । निजभृत्यो ब्रह्मा तद्भाषितम् । तथाऽपि वितराम्यंग वरान्यदपि दुर्लभानिति । अस्यार्थः । न पः पालको विष्णुर्यस्मिंस्तन्मतं अपं तदस्यास्तीति अपी हिरण्यकशिपुः । यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वर इति तदुक्तेः । तस्य तव दुर्लभोऽप्राप्यो यो अः विष्णुः याति प्राप्नोतीति यन् लभ्यः अपि दुर्लभाः येषु तान्वरान्वितरामीति । अन्यथा । ततो मे दुर्लभाः पुंसो यान्वृणीषे वरान्ममेति पूर्वार्धोक्त्या पुनरुक्तिप्रसङ्गः । यद्वा ।

स्त्रीपुंमलाभियोगात्मदेहो विष्णुर्न जायते ।
किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् ।
प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ।।

इति । निजस्य स्वस्य भृत्यः शिष्यत्वेन सेवकत्वेन पुत्रत्वेन च पोष्यो मुख्यप्राण-तृतीयावतारस्तस्य भाषितं विष्णुतत्त्वनिर्णयगतब्रह्माण्डानुवादिवाक्यम् । अपि वा । निजः स्वभक्तः सुखतीर्थस्तस्य भृत्यो जयतीर्थाख्यः शिष्यस्तेन भाषितम् । शुद्धानन्दोरुसंविद्युति-बलबहुलौदार्यवीर्यादिदेहमिति । उत वा । निर्निश्चयनिषेधयोरित्यभिधानात् । निजोऽपौरुषेयो भृत्यः । असुरशूद्रादिभ्यो रक्ष्यो वेदः परमोपनिषद्रूपस्तद्भाषितम् । गुणसर्वस्वमूर्तिमानिति । किं वा । हतोऽयमसुरोऽल्पकः । तत्सुतं पाह्यनुसृतमिति निजभृत्यरुद्रभाषितं इत्थमेव रुद्रस्य कल्पकल्पाविर्भूत-प्रतिनृसिंहस्तोत्रत्वान्न पौर्वापर्यशङ्कावकाशः । निजः स्वभक्तरक्षणरूपो धर्मस्तस्य भृतिः पालनं तद्विषये । अकारो वासुदेवः स्यादित्युक्तेः । अशब्दवाच्येन कृष्णेन भाषितम् । ''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृज्याम्यहमि''ति वा । अहोस्वित् । निजभृत्याः सनकादयस्तद्भाषितम् । त्रिभिर्लोकाय कल्पतामिति । यद्वा । निजभृत्यभाषितम् । इन्द्राय नारदोक्तम् । त्वया न प्राप्यते संस्थामनन्तानुचरो बलीति ।

अथवा । निजभृत्येन जयांशेन हिरण्यकशिपुना प्रल्हादायोक्तम् । गोपायेत हरिस्त्वाऽद्येति । अपि वा । स रक्षिता रक्षति यो हि गर्भे इति निजभृत्यभाषितम् । उत वा । हरिः सर्वभूतेषु भगवानास्त ईश्वर इति दैत्यबालेभ्यो निजभृत्यप्रल्हादभाषितम् । किं वा । निजेन स्वेन भृत्येभ्यो देवेभ्यो भाषितम् । प्रल्हादाय यदाद्रुह्येद्धनिष्येऽपि वरोर्जितमिति ।

निजेन स्वेन भृत्याभ्यां जयविजयाभ्यां भाषितम् ।
प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥ इति ।

तत्सर्ववाक्यजातम् ॥ सत्यं यथार्थम् ॥ विधातुं कर्तुम् ॥ आत्मनः स्वस्य ॥ अखिलेषु भूतेषु स्थावरजङ्गमात्मकेषु ॥ व्याप्तिं स्थिततां च । सत्यं विधातुम् ॥ न मृगम् । केवलमृगाकाररहितम् ॥ न मानुषम् । केवलनराकाररहितम् । अत एवात्यद्भूतरूपं उद्वहन्सन् ॥ सभायां सुधर्माख्यायाम् ॥ स्तंभे यूपे ॥ अदृश्यत दृष्टिगोचरोऽभूत् । यद्वा । निजानां ब्रह्मपैलादीनां भृतिः पोषणं यस्मात्स निजभृतिः स चासौ अः व्यासः । अ आ अं अः पुराणर्षिर्व्यासः शाखासहस्रकृदिति गीताभाष्यटीकोक्तेः । तेन भाषितं कथितम् । सत्यं पूर्णानन्दज्ञानात्मकम् ।

सच्छब्द उत्तमं ब्रूयादानन्दंतीति वै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्ददृशिस्तत ॥

इति दशमतात्पर्योक्तेः । विधातुं त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातव इत्युक्तत्वगादिरहितम् । निश्चेतनात्मकशरीरगुणैश्च हीन इत्युक्तेः । अखिलेषु भूतेषु भूम्यादिषु सत्सु । जडावरणे सतीति यावत् । व्याप्तिं विगता आप्तिः प्राप्तिर्यस्य तम् । अप्राप्यमित्यर्थः । न मृगं श्वापदभिन्नम् । न मानुषम् । नरभिन्नम् ।

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षड्विधा मताः ॥

इत्युक्तेः। नञस्य भेदार्थकत्वात् । अत एव अत्यद्भुतमाश्चर्यम् । रूपं आकारो यस्य तं देहम् । उद्वहन् धारयन् सभ्यायाम् । सप्तमीवशात्स्थिते इति शेषः । स्तंभेऽदृश्यतेति । अथवा । निजभृत्याय अर्जुनाय । भाषितम् । असक्तं सर्वभृच्चैवेति । तत्सत्यम् । विधातुं कर्तुम् । आत्मनः स्वस्य । भूतेष्वखिलेष्वित्येकं पदम् । भूतानि इषति इच्छतीति भूतेषुः ब्रह्मा तत्सृष्टाखिलेषु । मध्यमपदलोपीसमासोऽयं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भूदिति याचितवररक्षणार्थं

ब्रह्मसृष्टसर्वभूतेष्वित्यर्थः । व्याप्तिं आप्तिं च सत्यं विधातुं स्तंभे स्तंभस्थाने । अदृश्यत अद्भुतरूपमदृश्यतय । अत्यद्भुतं महाश्चर्यम् । एकं रूपं न मृगं न मानुषं उभयाकारमन्यच्च रूपं उद्वहन्सन् विष्णुर्भायात् बभासे । लकारव्यत्ययोऽत्रार्षः । अनेन स्तंभभेदे सभापतनं कथं नासीदिति शङ्काऽपि निरस्ता ।

अथवा । निजा स्वरूपभूता भृतिर्भरणशक्तिर्यस्याः सा अंभृणी रूपा श्रीः । तया अभाषितं अनुक्तम् । मनसा सङ्कल्पितमिति यावत् । आय विष्णवे उक्तं वा । शापम् । सत्यं सत् अवसानं समाप्तिमित्यर्थः । षद्लृ विशरणगत्यवसादनेष्विति धातोः । तत् याति प्राप्नोतीति । तथा विधं विधातुं समाप्तिगं कर्तुमित्यर्थः । अखिलेषु त्रिष्वपि जन्मसु अधिकरणेषु भूतेषु । आद्यर्थे बहुवचनम् । भूतक्षत्रियचक्रपाणिरूपेषु । आत्मनः स्वस्य । व्याप्तिं विविधत्वेनाप्तिं सत्यां विधातुम् । इत्यनुकर्षणार्थश्चः । सत् साधुभावम् । जयत्वमिति यावत् । सद्भावे साधुभावे च सदित्येतत्प्रयुज्यत इत्युक्तेः । तत् यापयतीति जयप्रापिकामित्यर्थः । विधातुं कर्तुम् । उक्तं हि तात्पर्ये–

हिरण्यकशिपुभूतममन्यत मृतौ हरिम् ।
अतो भयानको जातस्तत्र राजानमेव च ॥
मत्वा राजैव संजातः कृष्णं चक्रादिलक्षणैः ।
मृतिकाले हरिं चैव मत्वा भक्त्येव केवलम् ।
द्वाःस्थत्वं हरिमाविश्य प्रापैव मनुजोऽपि तु ॥

इति । स्तंभे उन्मत्तायां सभायां भया ज्ञानेन सहितां भक्तिं याति जानातीति तथा सन् । गत्यर्थानां ज्ञानार्थकत्वात् । अमृगं न मृगं वा । मृग मार्गान्वेषण इति धातोः । अन्वेषणीयमित्यर्थः । न मानुषं नृविलक्षणं न मृगं न मानुषं सिंहसदृशं चेत्यर्थो वा । सिंधुं ननावेत्यत्र नावेव सिंधुमिति संवादेन नकारस्य सदृशार्थकत्वात् । "मृगाणां च मृगेन्द्रोऽहं नराणां च नराधिप" इत्युक्तिभ्याम् । मुख्यामुख्ययोर्मुख्यस्यैव ग्राह्यत्वात् । अनेन सिंहाकारानुक्तिः परास्ता । तदाकारमपि रूपम् । अत्यद्भुतरूपमुत् । रूपं ज्ञानं उत् आनन्दः । अत्यद्भुते रूपमुदौ यस्मिंस्तत् । वहन् गृह्णन् । यद्वा । वह प्रापण इति धातोः । अत्यद्भुतरूपमुदौ प्रापयन् । सुखस्यैव शोध्यत्वेन मृगाकारस्य सुखप्रापकत्वात् । मनु ज्ञान इति धातोः। मानुषाकारस्य ज्ञानप्रापकत्वात् । अदृश्यत दृष्टोऽभूत् ॥१८॥

सुरानका इति । अत्र गन्धर्वाप्सरसां गाननृत्ययोः क्रमात्सहजधर्मत्वेऽपि विपर्ययेण कथनात् । अग्निना सिंचति वारिणा दहतीतिवद्विरोध इति न शङ्क्यम् । स्त्रीणां भीरुस्वभावत्वादिति भयानक

श्रीनृसिंहदर्शनेऽशक्तत्वेन पुंगधर्वैर्व्यवधाने कृते व्यवहितनृत्यस्य दर्शनायोगात्स्वाभाविकमपि तद्विहाय व्यवहितस्यापि गानशब्दस्य श्रवणार्हत्वात् । ता दूरतो जगुरेव । साधारणगन्धर्वाणां नैसर्गिक-गानगुणत्वेऽपि मुख्यशब्देन नृत्यगानरूपगुणद्वयवैशारद्यसिध्या ताभिर्गाने कृते नृत्योपचार-समर्पणाभावो मा भूदिति स्वयं ननृतुरित्यभिप्रायसद्भावात् ।

यद्वा । गन्धर्वा मुख्याः प्रधाना यासु ताः स्त्रियो ननृतुर्जुगुश्च । उभयोः कर्त्रोर्मध्ये द्वयोरपि क्रिययोः सत्त्वात् । ताभ्यामपि कृतम् ॥ ३७ ॥

मनव इति । अत्राप्सरसःशब्दस्य सान्तत्वाभावेऽपि न विरोधः । व्यत्ययोऽतिशय-कृत्सनाभेदेष्विति सूत्रेणोभयेषां समगुणद्वयत्वेनाभेदसिध्यै असुन् प्रत्ययान्ताभावरूपव्यत्ययस्य सार्थकत्वात् । अथवा । अत्राप्सरःशब्दसत्त्वेऽपि उत्तरत्राप्सरः कृतस्तोत्राभावरूपवैलक्षण्यद्योतनार्थं प्रत्ययवैलक्षण्यम् । उभयोर्गुणयोरप्युभयनिष्ठत्वेन गन्धर्वाणां मुख्यत्वकथनेन चाग्रे गन्धर्वा ऊचुरित्यत्र गन्धर्वा इति बहुवचनस्याद्यर्थकत्वाङ्गीकारेण गन्धर्वाप्सरसामुभयेषामपि सिध्यैकस्यैव स्तोत्रस्योभय-कृतत्वज्ञापनार्थं वा सकारान्तत्वलोपो ज्ञेयः ॥ ३९ ॥

इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ ७-८ ॥

अथ नवमोऽध्यायः

साक्षादिति । अत्रादृष्टाश्रुतपूर्वत्वेन शङ्कया भगवत्समीपे न गमनमयुक्तम् । ब्रह्मणः प्रतिकल्पे श्रीनृसिंहावतारसंभवेन नित्यावियोगिन्या तया बहुशो दृष्टत्वेन शङ्काऽनुद्भावात् । अत उच्यते ॥ देवैः । आद्यर्थे बहुवचनात् । देवादिजनैः ॥ अदृष्टाश्रुतपूर्वत्वात् । पूर्वमदृष्टं पूर्वमश्रुतं चेत्यदृष्टाश्रुतपूर्वं तस्य भावस्तत्त्वं तस्माद्धेतोः । महदित्यस्य गर्भविशेषणत्वेन महत्वाच्चेत्यर्थः । काश्चयार्कमतीत्य तस्थतुरित्यनेन महच्छरीरस्यात्यन्तवरोर्जितस्यापि हिरण्यकस्याप्यल्पीकरणाय केवलनखैर्हंतुं स्वोत्संगे धृतत्वादिति भावः । तद्धेतुद्वयेनाद्भुतं तन्नारसिंहरूपम् ॥ साक्षात् प्रत्यक्षं दृष्ट्वा प्रेषिता प्रशमितुं प्रार्थिता सती श्रीः शङ्कितेति । लुप्तोत्प्रेक्षम् । शङ्कितेव नोपेयाय । न तु शङ्किता । कृष्णस्य रामरूपत्वे रुक्मिण्या अपि सीतारूपत्वदर्शनेन भगवतो नृसिंहरूपत्वे श्रियोऽपि तद्रूपत्वसिद्धेः । तस्माद्देवादिभिरेव नृसिंहरूपमदृष्टाश्रुतपूर्वं न श्रियेति ।

अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः ।
नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नाययौ ॥

इति तात्पर्योक्तेः । साधारणैस्तानि धर्माणि प्रथमान्यासन्निति श्रुतेः । आधारणैः सर्वलोकधारकैर्देवैः सहितैर्जनैरित्यर्थः ॥ २ ॥

प्रल्हादमिति । अत्र ब्रह्मणोऽपि तादृग्रूपस्य बहुशोऽदृष्टत्वाद्भगवत्कोपोपशमार्थं प्रल्हादप्रेषणं सूचितभीतप्रतीत्या विरोध इत्यत उच्यते ॥ अवस्थितम् । वा गतिगन्धनयोरिति धातोः । अः विष्णुः वीयते प्राप्यते अनेनेति अवः प्रसादः । यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणेति श्रुतेः तस्य प्रसादस्य । स्थितं स्थितिर्यस्मिंस्तं प्रल्हादम् ॥ अन्तिके । अन्तो निर्णयोऽयं प्रल्हाद एव प्रसादकाल इति निर्णयः । अवसानं वा । प्रल्हादाद्यवरभक्तानां रमाब्रह्माद्यजस्रप्रसन्नभगवत्प्रसादस्य कादाचित्कत्वेनानित्यत्वात् । सोंऽतो यस्यास्तीति अन्ति स चासौ कः कालश्च । नामैकदेशे नामग्रहणमिति न्यायात् । तस्मिन्काले ब्रह्मा उक्तार्थमवस्थितम् ॥ स्वपित्रे हिरण्यकाय ॥ अकुपितम् । भगवद्वेषित्वात्कोपविषयोऽपि पितृत्वादकुपितम् । शोचन्तमिति यावत् । प्रल्हादं प्रेषयामास । यद्वा । अकुपितं स्वस्मिन्कदाऽप्यरुष्टं तथाऽपि प्रभुं स्वामिनम् । स्वामीराजगुरुभर्तारः कदाऽपि न विश्वसनीयाः किन्तु तदिङ्गिताचरणेन तोष्टव्या एवेत्यनेन सूचितम् । तं मत्वेति शेषः । संप्राप्तप्रसादकालं प्रल्हादं स्वपित्रे स्वजनकाय विष्णवे तं प्रशमयितुं तोषयितुं वेति भावात् ।

अथवा । हे अपितामह । अकारस्तु पितामह इत्युक्तेः । त्वं मां कुपितं ऐहि ईहि वा जानीहि । इण् गताविति धातोर्गत्यर्थानां ज्ञानार्थत्वाच्च । अतः तात । वात्सल्यस्थानभूतार्थकतातशब्दस्य संबोधनरूपप्रथमात्वात् । सप्तसु प्रथमेति सूत्रेण तस्य तृतीयार्थकत्वात् । प्रल्हादेनेत्यर्थः । उपप्रशमय शान्तं कुरु । इतीङ्गितज्ञ इति शेषः । ब्रह्मा । अन्तिके । पूर्वोक्तरीत्या निर्णीतेऽनित्यत्वाद्वर्तमानकाले । अवस्थितं अस्य विष्णोः वं वानं प्राप्तिर्यस्मात्तादृशानुग्रहस्य स्थितं स्थितिर्यस्मिंस्तम् । अत एव । प्रभुं कोपोपशमनसमर्थं प्रल्हादम् । स्वपित्रे स्वदत्तवरपालकाय नृसिंहाय । प्रेषयामास । प्रल्हादप्रेषणादिङ्गितज्ञानेन ब्रह्मणोऽतिप्रसादप्राप्तिरेवावसीयते न भीतिरिति भावः । अपि वा । हे तात वत्स प्रल्हाद । स्वपित्रे त्वत्कृते त्वत्पित्रे । कुपितम् । प्रभुं नृसिंहम् । उपेहि उपेत्य । एककर्तृककर्मके क्रियाद्वये प्रायः पूर्वक्रियायाः ल्यबन्तार्थकत्वनियमात् । प्रशमयेति ज्ञापयन् प्रल्हादं प्रेषयामास । उक्तं च तात्पर्ये ।

प्रल्हादे चैव वात्सल्यदर्शनाय हरेरपि ।
ज्ञात्वा मनस्तदा ब्रह्मा प्रल्हादं प्रैरयत्तदा इति ॥ ३ ॥

स तत्करेति । अत्राभिव्यक्तपरमात्मदर्शन इत्यनेन फलप्राप्त्युक्तौ तत्साधनध्यानस्यानुपयोगात् । न हि पारगस्य नौकाश्रयणं युज्यते । अतो विरोधोऽत उच्यते । अत्र हि यत्तच्छब्दाध्याहारेण योजना ।

तथा हि । यतः पादपद्मं हृदि । दधौ इति लिटा पूर्वं दधारेत्यर्थः । ततः सपद्यभिव्यक्तपरमात्मदर्शनोऽभूत् । अतो न फलप्राप्त्यंते साधनाङ्गीकार इत्यर्थः । यद्वा । अपूर्वरूपसाधनस्य क्षये स्वर्गभोगरूपफलस्यापि क्षयदर्शनात् । ध्यानरूपसाधनक्षये दर्शनस्यापि क्षयप्रसङ्गात् । ध्यानस्याक्षयत्वावश्यकतया जातेऽपि परमात्मदर्शने तत्त्यागायोगात्तथोक्तिः । न च नौको दृष्टान्ततोऽत्र युज्यते । न हि तस्या निर्गमस्थलादारभ्य गम्यस्थलपर्यंतं गमनसाधनत्वं दृश्यते । किं तु नदीरूपगमनप्रतिबन्धकस्योत्तारकत्वेन निवर्तकमात्ररूपत्वम् । अतो मुख्यसाधनत्वा-भावान्नौकाश्रयणयोगोऽपि । व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छतीत्युक्तविधया पादव्यापारस्य गमनमुख्यसाधनत्वात् । तस्य त्यागे गमनस्याप्यसिद्धेस्तदाश्रयणं यथावश्यकं तथाऽपरोक्षस्य मुख्यसाधनध्यानस्याप्याश्रयणीयत्वमावश्यकम् । न च मनःसहायस्यैवेन्द्रियस्य विषयग्राहित्वान्मनसो ध्याननिष्ठायां तदनानुकूल्येन चक्षुषो बहिर्दर्शनासंभवः । प्राप्तपूर्णध्यानयोगस्योभयग्रहणशक्तत्वात् । अत एव क्लिन्नहृदश्रुलोचन इत्यक्तम् । ध्यानेन क्लिन्न हृद्दर्शनेनाश्रुलोचन इति तत्राभिप्रायः ॥ ६ ॥

अस्तौषीदिति । अत्रैकाग्रमनसा सुसमाहितस्तन्न्यस्तहृदयेक्षण इत्येतैः पुनरुक्तिप्रसङ्गः । त्रयाणामप्येकाशयत्वादिति चेन्न । भिन्नार्थकत्वात् । तथाहि ॥ सुसमाहितः । मया ज्ञानेन सहितः समः । मा ज्ञान इति धातोः । सुतरां समेन नारदेन आहितः शिष्यत्वे स्थापितः । यद्वा । सुतरां समाः आहिताः शत्रवः कामादयः इन्द्रादयो वा यस्य स तथा । अथवा । समाः उदासीनाः अहिताः शत्रवश्च । शोभनाः समाहिताः यस्य सः । अनेन किं पुनः सखाय इति ध्वनितम् । असुसमाहिता इति पदम् । असुना प्राणेन समो ब्रह्मा । अथ विधिप्राणनाथावित्युक्तेः । तेन आय विष्णवे आहितः प्रहितः । तेन विष्णुपुरतः स्थापितो वा । अयं शोभनोऽयमुदासीनोऽयमहित इति यस्य दृष्टिर्नास्ति सोऽसुसमाहितः कः शत्रुः क उदासीनः किं मित्रं चेहात्मन इति प्रल्हादोक्ताक्षेपाणां विपर्यये पर्यवसानात् ॥ तन्यस्तहृदयेक्षणः । तस्मिन्स्वकर्तव्यस्तवने न्यस्तं हृदयं मनो येन तं नृसिंहमीक्षयतीति स तथा । प्रल्हादः ॥ हरिं नृहरिम् ॥ एकाग्रमनसा । एके मुख्यान्यकेवला इत्युक्तेः । मुख्यः सर्वोत्तमः । अन्यः सर्वविलक्षणः । केवलः जडामिश्रः । अद्वितीयो हरिरग्रे सन्मुखे यस्य तादृशं मनो यस्यां तया । पृथक् तादृश मनसा वा ॥ प्रेमगद्गदया । आल्हादपूरेणाविस्पष्टाक्षरया वाचा ॥ अस्तौषीत् तुष्टाव । एवमर्थसद्भावान्न पुनरुक्तिः ॥ ७ ॥

विप्रादिति । अत्र ब्राह्मणापेक्षया चाण्डालवरिष्ठत्वमुक्तम् । तच्च । न ब्राह्मणैस्तुलयेभूतमन्यत् । वर्णानां ब्राह्मणो यथेत्यादिभिर्विरुध्यतोत उच्यते । अत्र ब्राह्मणापेक्षया श्वपचस्य न वरिष्ठत्वमभिप्रेतम् । अभक्तस्य चाण्डालादपि नीचत्वसूचनायैवमुक्तिः । अन्यथा ।

वरं स्वमात्रगमनं वरं गोमांसभक्षणम् ।
वरं हत्यासुरापानमेकादश्यन्नभक्षणात् ॥

इत्यत्रोक्तस्वमातृगमनादेरपि वरिष्ठत्वप्रसङ्गात् । न हि स्वमातृगाम्यान्नादयोः पांक्तत्वापांक्तत्वे दृष्टे । तद्वद्ब्राह्मणश्वपचयोः पूज्यत्वापूज्यत्वे च । तस्मादन्नादस्य स्वमातृगाम्यादि-सकाशाद्यथाऽतिनिंदितत्वम् । एवमभक्तस्य श्वपचादप्यतिनिन्दितत्वमेवोच्यते । न तस्य वरिष्ठत्वम् । अतो न कश्चिद्विरोधः । यद्वा ॥ विप्रात् । सामान्यब्राह्मणात् ॥ द्विषड्गुणयुतात् । अत्रोत्तरत्र च भावप्रधानो निर्देशः । ततो– ज्ञानं च सत्यं च दमः शमश्चामात्सर्यं ह्रीस्तितिक्षाऽनसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रतानि द्वादश ब्राह्मणस्य ॥ इत्युक्तत्वात् । द्वादशगुणवत्त्वेनेत्यर्थः । वरिष्ठमपि ब्राह्मणं पादारविन्दविमुखत्वेन श्वपचम् । लुप्तोत्प्रेक्षितत्वात् । चाण्डालमिव मन्ये । तु शब्दो हेत्वर्थे ॥ यतोऽतदर्पितवचनात्मगेहप्राणः । हर्यनर्पितमन आदिः । स्वपचतुल्यो ब्राह्मणः ॥ सकलं पञ्चदशकलाभिः सहितम् । शरीरं न पुनाति किमुतान्यानित्यर्थः । तत्र हेतुगर्भविशेषणम् ॥ **भूरिमान इति** । पण्डितमानीत्यर्थः । अतस्त्वद्भक्तिरेव महत्वे प्रयोजनकेति भावः ।

विप्रादिति श्लोकोक्तद्वादशगुणानां तात्पर्यस्थसनत्सुजातीयवाक्येन पृथक् प्रदर्शने शमस्य ग्रहणेन । शमो मन्निष्ठता बुद्धिरिति भगवद्वचसा बुद्धेर्भगवन्निष्ठताया एव सदर्पितमनस्कत्वादि-सिध्याऽरविन्दनाभपादारविन्दवैमुख्याभावात्कथं विप्रतः श्वपचवरिष्ठत्ववर्णनमतो विरोधः । तत्रोच्यते । कुरुपाण्डवन्यायेन यत्र विरोधस्तत्र शमशब्दस्य सौम्यत्वार्थकताऽभ्युपगम्यते । यत्राविरोधस्तत्र बुद्धेर्भगवन्निष्ठार्थकत्वम् । अते विप्रस्य केवलसौम्यता सिद्धावपि भगवत्पादारविन्दवैमुख्यसद्भावे सति श्वपचान्नीचत्वसिद्धिः । ननु जात्यैव ब्राह्मणः पूज्यो न तत्र गुणचिन्तनमित्युक्त्या कथं ब्राह्मणस्य श्वपचनीचत्वम् । नात्र श्वपचशब्देन जातिचाण्डालो गृह्यते किंत्वेकादश्यन्नभोजी तु चाण्डालो, नात्र संशय इति पाद्मवचनात्कर्मचाण्डाल एव । तदपेक्षया ब्राह्मणस्य नीचत्वे जातिभेदत्वाभावान्न पूज्यत्वहानिः । एतदपि पूजनविषय एव न भगवत्प्रीतिविषये । यस्यास्तु गुणहेतुकत्वमेव । ज्ञानेनैव परं पदमित्युक्तेरतोऽपि न कश्चन विरोधः ॥ १० ॥

तत्संभव इति । अत्र कविरित्युक्त्वा कथमिहोपलभेत बीजमित्याक्षेपेणाज्ञाने पर्यवसानमिति विरोधोऽत उच्यते ॥ ना पुरुषः । बीजादङ्कुरे जाते सति ॥ इह । अङ्कुरे ॥ बीजम् । वृक्षव्यञ्जकत्वाद्बीजसंज्ञां देवताम् । कथमुपलभेत । यदा बीजस्था देवताङ्कुरस्था जाता तदा बीजस्थित्यभावाद्बीजसंज्ञाऽपि गता । अङ्कुरस्थत्वादङ्कुरसंज्ञां च प्राप्ता । ततोऽकुरसंज्ञकां देवतां कथमुपलभेत । किन्तु नैव लभेतेत्यर्थः । अतोऽब्दशतं ममायुःपर्यन्तं ॥ अप्सु । जन्ममरणलक्षणासु

।। अब्दशतम् । स्वायुःपर्यन्तं । अब्दशब्दस्य कर्मनामसुपाठात् । अप्सु कर्मसु वा । निमज्जमानःसन् नकारस्यावृत्त्या ।। नाविन्दत् । वीजसंज्ञां देवतां न विंदेत । लकारव्यत्ययस्त्वार्षः ।। इति विचिन्वत् । विचारं कुर्वन् ।। तत्संभवः । तस्मात्प्रकृत्यात्मकात् पद्मात्संभवो यस्य सः ।। कविः ज्ञानी ब्रह्मा । अतः स्वाधितिष्ठितपद्मादन्यद् द्वितीयमपश्यमानः ।। बीजम् । बीजसंज्ञकदेवतावत् कार्यस्थितं त्वां ।। आत्मनि । स्वात्मान्तः बहिश्च ।। ततं व्याप्तम् । ददर्शेत्युत्तरेणान्वयः । यद्वा । शतं स्वायुः पर्यन्तम् । अप्सु कर्मसु । निमज्जमानो निष्णातः । अनेन कर्मण्येव प्रवृत्त्या भगवत्ज्ञानशून्योपलक्ष्यते । तादृशः पुमान् । अङ्कुरे जाते सति बीजं विचिन्वन्सन् । इह अङ्कुरे । कथं बीजमुपलभेत किन्तु नाविन्दत् । इति कविः ज्ञानी । शेषं पूर्ववत् । अथवा । अविंददब्दशतमित्येकं पदम् । पूर्तिमलभमानमब्दशतम् । परार्धमिति यावत् । पूर्तौ परमपूर्तौ परार्धमिति द्वयोरेव प्रसिद्धेः । ''तस्वा पूर्वपरार्धे तु द्वितीये ससृजे प्रजा'' इत्युक्तेः । अन्यथा अब्दशतमिति किं ब्रह्ममानेन वा नृमानेन वा । नाद्यः । सृष्ट्यर्थं ब्रह्मायुषो द्विपरार्धाधिक्यप्रसङ्गात् । नापरौ अल्पत्वेन कथनायोगात् । तस्मात्तत्पर्यन्तमेवाप्सु निमज्जमानो निमग्नो भूत्वा । निर्निश्चयनिषेधयोरिति कोशात् । निवातवत् अमज्जमानो जलोपरि तिष्ठन्वा । अथवा । अप्सुनिमज्जमान इत्येकं पदम् । आप । आ पालनाद्विष्णुरित्यनुव्याख्यानोक्तेः । अप्शब्दवाच्यो विष्णुस्तस्मिन् सु सम्यक् नितरां मज्जमानः तद्विषये तपः कुर्वन्निति यावत् । जातेऽङ्कुरे कथमिहोपलभेत बीजमिति । विचिन्वन् विनिश्चयं कुर्वन् । आत्मनि स्वात्मान्तः । तदुपलक्षितस्वात्मान्तस्थभूतेषु च वहिः स्वदिक्षु तथा कालाकाशपद्मलयोदयेषु च । ततं व्याप्तम् । बीजं स्वव्यञ्जकम् । विष्णुं ददर्शेति । अथवा । उक्तप्रकारेण । कविः ज्ञानी । तत्संभवः पद्मभवो ब्रह्मा त्वाम् । आत्मनि स्वविषये । बीजं उपादानम् । अपश्यमानः सन् । अत उपादानादन्यद्भिनम् । तसेः सार्वविभक्तिकत्वात् । अं । अः ब्रह्मेति श्रुतेः । विष्णुम् । अन्यद्भिन्नं निमित्तरूपम् । व्यञ्जकं व्यञ्जकत्वात्तत्स्थं संज्ञं च देवतारूपम् । ततं खजनकम् । ददर्श । अविन्ददिति पृथक् पदपक्षे अविन्दद्वा । तदुक्तम् ।

स्थावराणां च सर्वेषां देवता याभिमानिनी ।
विशेषाद्वटबीजे चाश्वत्थे च व्यवस्थिता ।।
अदृश्याकणिका नाम सा वृक्षान्व्यञ्जयंत्यपि ।
अतो बीजमिति प्रोक्ता साजातेप्यंकुरस्थिता ।।

एवं हरिः कारणेषु स्थितः कार्यजनेरनुकार्याण्यनुप्रविष्टः सन्प्रथमं दृश्यत इति तात्पर्यं । तस्माज्जातेऽङ्कुरे इत्यादिविचारस्य ब्रह्मकृतत्वान्न विरोधगन्धोऽपि ।। ३४ ।।

इत्थमिति । अत्र कलाववतारो नास्तीत्युक्तम् । तदयुक्तम् ।

आसन्वर्णास्त्रयो ह्यस्य गृण्हतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गत ॥

इत्युक्त्या कृष्णतनुग्रहणस्य कलिप्राप्तत्वात् । मैवम् । द्वापरांत्यभाग एव कृष्णावतारग्रहणात् । कृष्णस्य मर्त्यलोकत्यागकाल एव कलिप्रवृत्तेरुक्तत्वाद्वादशे । न चेदानीं कृष्णतां गत इत्यस्य का गतिरिति वाच्यम् । इदानींशब्देन केवलकलिकालानङ्गीकारात् । किन्तु युगसंध्युक्तकल्यंशसहितद्वापरांत्यभागस्यैवाङ्गीकारात् । तथाहि । महायुगं द्वादशाब्दसहस्रवर्षात्मकम् । तत्र विवेकः ।

चत्वारित्रीणि द्वेचैकं द्विगुणैश्च शतैर्युतम् ।
वर्षाणां दिव्यसाहस्रं कृतादिषु यथा क्रमम् ॥
शतानि युगसंधौ स्युः सहस्राणि यथा युगम् ॥

इत्युक्त्या कलियुगस्य द्वेशते संधिस्थिते । तत्रांत्यमेकशतं कृते प्रविशति । आद्यमेकशतं द्वापरे । तत्र नृमानेन चतुःषष्ठिसहस्रोत्तराष्टलक्षाब्दमितद्वापरे षट्त्रिंशत्सहस्राब्दोने सति कलिप्रवेशः । तथा द्वात्रिंशत्सहस्रोत्तरचतुर्लक्षाब्दात्मककल्याद्यभागे द्विसप्ततिसहस्रवर्षपर्यन्तं द्वापरांशस्थितिः । कलेरंत्यभागे चतुश्चत्वारिंशत्सहस्रोत्तरैकलक्षाब्दोने कृतप्रवेशः । आष्टाविंशतिसहस्रोत्तरसप्तदशलक्षाब्दके कृते षट्त्रिंशत्सहस्राब्दपर्यन्तं कल्यंशस्थितिः । एवं सति कल्यंशसहिते द्वापरे कृष्णप्रादुर्भावात्कृष्णवर्णत्वसिध्या इदानींशब्दस्य युक्तैव गतिः । तथा केवलकलाववताराभावात्त्रियुगोक्तिरपि । न च कलौ बुद्धावतारेण विरोधः । तस्मिन्नपि । द्वापरांशसहित एव तदङ्गीकारात् । नापि कल्क्यवतारेण विरोधः । तस्यापि कृतांशसहित एव कालावभ्युपगमात् । अत एव सत्वं यद्यस्माच्छन्नोऽवताराभावादाच्छादितोऽभवः अभूः । यद्वा । अभवः अनवतारः । अतः छन्नः । अथ एतद्धेतोस्त्रियुगः । त्रिष्वेन युगेषु अवतारैर्युज्यते स तथा । तस्मात्त्रियुगेति नामान्वर्थकमिति भावः ॥ ३८ ॥

तत्व इति । अत्र षडङ्गयेत्यनेन सेवायाः षडङ्गत्वमुक्तम् । तत्त्वे मन इत्यादिना पञ्चाङ्गानामेव लाभाद्विरोधोऽत उच्यते । अपि शब्देन ऋतेऽपीत्यत्र दशमग्रहणमिव पादौ त्वत्क्षेत्र सर्पणे इति ग्राह्यम् । तेन षडङ्गसिद्धिः । ननु निर्माल्यगन्धादिषु घ्राणादेरपि योग्यत्वादपिशब्दग्राह्यस्यानियतत्वाच्च पादग्रहण एव नियामकाभावान्न षडङ्गसिद्धिरिति चेन्न । एकादशेन्द्रियाणां मध्ये षण्णां ज्ञानकारणत्वात्पञ्चानां कर्मेन्द्रियत्वात्ज्ञानेन्द्रियेषु मनोदृक्श्रवणानां त्रयाणां गृहीतेः । कर्मेन्द्रियेषु तु

वाक्करयोर्द्वयोरेव ग्रहणात्ज्ञानसमवर्तिषु त्रयाणामेव ग्रहणौचित्ये विजयध्वजाचार्यादिभिश्च तस्यैव स्वीकारेण पादग्रहणस्यैव युक्तत्वात्तेन षडङ्गसिध्या न विरोधापत्तिः ॥ ५० ॥

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ ७-९ ॥

अथ दशमोऽध्यायः

ॐ नम इति । अस्य मन्त्रस्य नृसिंहप्रादुर्भावात्पूर्वमेव नारदेन प्रल्हादायोपदिष्टत्वाद्रूपाभावेऽप्युपासना कथमिति चेत् । भविष्यज्ञेन नारदेन कृतोपदेशाद्युक्तमेव । राजसिंहवदद्भुतसिंहाय । आश्चर्यश्रेष्ठायेत्यर्थाद्वा ॥ ११ ॥

भोगेनेति । अत्र पुण्येन पुण्यलोकं जयतीति श्रुतेः । केन मे पूर्वपुण्येन दृष्टोऽसि भगवान्मयेत्यादिस्मृतेश्च । भगवत्प्राप्तौ पुण्यस्यावश्यकत्वे पुण्यहानं कथमुक्तमित्यत कथ्यते । अत्र कामस्यैव हेयत्वं न निष्कामस्य ।

प्रवृत्तं च निवृत्तं च द्विविधं कर्मवैदिकम् ।
आवर्तते प्रवृत्तेन निवृत्ते नाश्नुतेऽमृतम् ॥ इति ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमिहोच्यते ।
निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥ इत्युक्तेश्च ॥ १४ ॥

त्रिरिति । अत्र कश्यपमरीचिविरिञ्चानां त्रयाणामेव पितृणां सत्त्वात् । त्रिसप्तभिरित्यनेन सूचितानामेकविंशानामुपलब्धेर्विरोधोऽत उच्यते । त्रिरित्यव्ययम् । त्रिभिरित्यर्थः । ॥ पितृभिः कश्यपमरीचिविरिंचिभिः । सप्तभिर्गोत्रैः पितृमातृपितृष्वसृ मातृष्वसृस्वस्वसृदुहितृदारपितृगोत्रैः सहोति ॥ पिता हिरण्यकशिपुः । पूतः । त्रिषु जन्मसु वा । तत्पक्षे दैत्यजयतत्पूर्वजन्मस्वित्यर्थः । काश्यपपौलस्त्यचैद्यजन्मसु वा । सप्तगोत्रैः सह पूतः । तत्र हेतुः ॥ यदित्यादिना । यद्वा । हे साधो । यत् यस्मात् । ते पिता । अस्य स्वस्य । कुले जातः जातं त्वाम् । सप्तसु प्रथमेति सूत्रात् । न च नैव । सहते क्षमते । अतः अपूतः अपवित्रः । यदित्यावर्त्यम् । अस्य विष्णोः । भवान् ज्ञानवान् । कुले जातः सन् । त्रिः त्रिभिः । स्वपूर्वोत्तरपुरुषैः । सप्तभिर्गोत्रैः । पितृभिः पितृपितामहप्रपितामहैः । पितृमातृमातामहादिभिर्वा । इत्थम्भूतलक्षणे तृतीया । सहेत्यर्थः । कुलपावनो वै । किमु वक्तव्यं तं पवित्रीकुर्यादिति । इदानीमसहनं समाप्तम् । अतः पूतोऽपि जात

इति भावः । किं वा । हे साधो भवान् । त्रिः त्रिष्वपि जन्मसु मध्ये । अस्य हिरण्यकशिपोः । कुले अभवान् विष्णुज्ञानवान् । त्वं पुत्ररूपेण प्रजातोऽसि । अतस्ते पिता सप्तगोत्रैः पूतः द्वितीयजन्मनि । अभवान्विष्णुज्ञानि । विभीषणाख्यबन्धुरूपेण जातो भविता । निश्चयेन भवितव्ये भूतवद्व्यपदेशः । अतः पितृभिः पूतः । तृतीये जन्मन्यपि अभवान् दमघोषाख्यपितृरूपेण जातो भविता । अकारेण प्रश्लिष्टे तस्य नञर्थकत्वेन भूतार्थविरुद्धार्थकत्वाद्वा । दमघोषं प्रकृत्योक्तं तात्पर्यनिर्णये । ''गन्धर्वोऽसौ दनुनामा नरोऽभूत्तस्मात्कृष्णे भक्तिमांश्चास राजा'' इति । पितृभिर्गोत्रैः सहघ सहैव तेन शप्तजयरूपत्वेन पूतः स्यात् । इदानीं सांपरायिककर्मविषये पूतो न पुनः शापत इति भावः । यद्वा । हे साधो भवान् । अस्य हिरण्यकस्य । कुले जातोऽप्यजातः । यत् यस्मात् । ते पिता । त्रिः त्रिभिर्वसुरुद्रादित्यैः । ''आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः । मरुतश्चैव विश्वे च तद्गताः'' । अतस्त्रय इति प्रोक्ता इत्युक्तेः । उपासतोपायनपाणिभिर्विना त्रिभिरिति चात्रोक्तेः । देवैरित्यर्थः । सप्तभि ऋषिभिः पितृभिश्च सहितमिति देवर्षिपितृसहितं त्वाम् । न च नैव सहते । अतस्त्वमस्य कुलपावनोऽसि । न पुनस्तन्मात्रपावन इति भावः । तर्ह्यस्य पूतता कदा भवेदस्याप्येतदेवोत्तरं । तथाहि । हे प्रल्हाद । यत् यस्मात् । अस्य विष्णोः । अधः नीचैः साऽविद्याऽस्ति । अतोऽजातः । तसेः सार्वविभक्तिकत्वात् । अजापरपर्यायाविद्ययेत्यर्थः । पितृभिः शापजनकैः । सप्तभिः सनकादिभिश्चतुर्भिः । मम संकल्पेनैकेन पूर्वकर्मणाचैकेन । एतेषां षण्णां प्रेरकेण मया चैकेनेति सप्तभिः । अपूतः अपवित्रीकृतो यः । पिता त्वत्पिता । स त्रिः त्रिवारम् । हतेन हननेनैव पूतः स्यात्तदा त्वमस्य तृतीयजन्मनः कुले । अजात इत्यावर्त्यम् । अजातोऽपि कुलपावनः । कुलपस्य मुख्यस्य हिरण्यकशिपोः । अवनः रक्षकः । वै निश्चयेन स्याः । अथवा । उक्तरीत्या पूर्वार्धार्थमङ्गीकृत्योत्तराधार्थोऽन्य उच्यते । हे साधो । यत् यतः । लोकपावनस्त्वं कुले जातोऽसि । अतोऽस्य भवान् शापजातिरिक्तजन्मा निरस्य समापय । षोंतकर्मणीति धातोः । त्रिःसप्तभिरिति पाठे तु मध्यमपदलोपीसमासः । न्यूनसप्तभिः चतुर्भिः सनकादिभिः । अपूतः शापादपवित्रीकृतः । ते पिता । यतोऽस्य कुले भवांस्त्वं कुलपावनो जातः । अतः पितृभिः पूतः सह स्वयं न च नैव पूतः । प्राघान्वस्येत्यत्र घशब्दस्य एवार्थकत्वदृष्टेः । शापसमाप्तेरिति भावः ॥ १९ ॥

प्रह्लादोपीति । नन्वत्र न पितुः सांपरायिककरणे प्रल्हादस्याधिकारः । संह्लादं प्रागनुह्लादं प्रल्हादमेवचेति हिरण्यकपुत्रक्रमोक्त्या वयसोनं गुणाधिकमिति प्रल्हादस्य विशेषितत्त्वाच्च । तज्ज्येष्ठत्वाभावादिति चेन्न । दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवमित्युक्त्या संह्लादादिषु विद्रुतत्वेन समये निकटवर्तिषु कनीयसोऽप्यधिकारसद्भावात् । यद्वा ।

कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ।
मदङ्गस्पर्शनेनाङ्ग लोकान्यास्यति सुप्रजः ॥

इत्युक्त्या मदङ्गस्पर्शनेन पितुः पूतत्वेऽपि परलोकावाप्तौ सुप्रजत्वमेव कारणमतः सर्वशः सर्वपुत्रेषु मध्ये त्वं पितुः प्रेतकार्याणि कुर्विति भगवता आज्ञप्तत्वात् । अत एव यथाहेत्याद्युक्तम् । तत्काले ज्येष्ठनामसंन्निहितत्वादस्यैवाज्ञप्तत्वात्सुप्रजात्वाच्चाधिकार इति भावः । अभिषिक्त इति विशेषणं उत्तरस्थप्रल्हाद इत्यनेन योज्यम् ॥

किञ्च प्रल्हादस्य ज्येष्ठत्वाभावेन कथं पितृराज्याधिकार इति चेन्न । परंपरागतराज्यस्यैवाधिकारो हि ज्येष्ठस्य नृपत्वं हि तस्य । अत्र तु । तं हत्वा राज्यस्य नृसिंहेन हृतस्य प्रल्हादाय दत्तत्वाच्च न ज्येष्ठस्याधिकारः । किन्तु । पित्र्यं च स्थानमातिष्ठेति भगवदाज्ञया तस्यैवाधिकारौचित्यात् । न हि कनीयसा नवार्जिताधिपत्यं ज्येष्ठस्य क्वापि दृश्यते । अपि च प्रल्हादक्रियमाणराज्यस्य निहतकण्टकमिति विशेषणं युज्यते । प्रल्हादस्य दैत्ययोनित्वेन तद्विरोधिनां देवानामेव कण्टकरूपत्वात्तेषां चेह हननाभावादिति चेत् । मैवम् । तस्यार्थान्तरसद्भावात् । तथाहि ॥ निहतकण्टकं निहतः कण्टकः प्रल्हादस्य द्वेष्टत्वेन तद्रूपो हिरण्यकशिपुर्यस्मिंस्तद्राज्यमिति । यद्वा । निवातेत्यादौ निशब्दस्य निषेधार्थत्वदृष्टेः । निहताः अहताः कण्टकराज्यापेक्षया विरोधित्वेन कण्टकरूपाः संह्लादादयो यस्मिन् विद्यमान ज्येष्ठभातृकमपि राज्यं भगवदाज्ञया द्विजोत्तमाभिषिक्तत्वाच्चक्र इत्यभिप्रायः । अथवा । निःश्वासनिपातादौ निशब्दस्य नीचार्थकत्वदृष्टेः । हन हिंसागत्योरिति धातोश्च । निहता नीचत्वं गताः । कण्टकाः लोकपीडका महादैत्या यस्मिंस्तत् । किं वा । उत्तरार्धस्य हरिविशेषणत्वेन निहतकण्टकमिति पदं योज्यम् ॥ २५,२६ ॥

मैवमिति । अत्र ब्रह्मणः स्वस्य प्रतिदिन एव भगवदाज्ञायां सत्यायामपि पुनर्वरप्रदानेन भगवदाज्ञाभङ्गप्राप्तिरिति चेत् । उच्यते ॥ असुराणाम् । हिरण्यकशिपुव्यतिरिक्तानामेवं वरो न देय इत्यसुरशब्देनैव सूचितम् । न सुरः जयांशः येषु इति विग्रहात् ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ ७-१० ॥

अथ चतुर्दशोऽध्यायः

सुप्तबोधयोरिति । अत्र बन्धमोक्षयोर्मायामात्रत्वमुक्तम् । तद्याथातथ्यतोऽर्थान्व्यदधादिति । विश्वं सत्यं मघवानित्यादिश्रुतिभिः । विश्वं सत्यं वशे हरेरित्यादिश्रुतिभिर्विरुध्येत । अत्रोच्यते । बन्धं मोक्ष्यं च मायामात्रं न पश्यन् किन्तु वस्तुतः पश्यन्सन् । यद्वा । माया हरीच्छा । मायेतीच्छा समुद्दिष्टेति वचनात् ।

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छानंत कथ्यत ।।

इति तत्त्वनिर्णयोक्तेश्च । तया निर्मितम् । तया मित्वा त्रातं मायामात्रं वा । मायेति भगवत्प्रज्ञा सैव मानत्राणकर्त्री च यस्य तन्मायामात्रम् । परमेश्वरेण ज्ञातत्वाद्रक्षितत्वाच्चेति तत्त्वनिर्णये व्याख्यातत्वात् । द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ।

मतं हि ज्ञानिनामेतन्मितं त्रातं च विष्णुना ।
तस्मात्सत्यमिति प्रोक्तं परमो हरिरेव हि ।।

इति परमश्रुतेश्च ।। न वस्तुतः । न स्वतन्त्रम् । स्वतन्त्रं वस्तुशब्दोक्तं अस्वतन्त्रमवस्तु यदिति शब्दनिर्णयोक्तेः । बन्धमोक्षविषयं सर्वजीवजातं न स्वतन्त्रमिति भावः । किञ्च मायामात्रमिति विशेषणं केवलबन्धस्य वा मोक्षस्यापि । नाद्यः । नियामकाभावात् । न द्वितीयः । मोक्षस्य मिथ्यात्वापातेन सिद्धान्तविरोधात् । तस्माद्भगवत्कृतत्वेनास्य सत्यत्वमेव । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडिति स्कांदे । ''यः सत्यरूपं जगदेतदीदृक् सृष्ट्वा त्वभूत्सत्यकर्मा महात्मे''ति श्रुतेश्च ।। ५ ।।

स्वात्मवृत्तमिति । अत्राजगरवृत्तस्य शास्त्रीयत्वेऽपि लोकशास्त्राभ्यां व्यपेतमिति कथमुक्तमिति चेत् । उच्यते । लोकस्तदनुवृत्तिः । शास्त्रं प्रमाणान्तराबोध्यार्थबोधकं वाक्यम् । तदुभाभ्याम् ।। व्यपेतं रहितम् । लोकानुवृत्तिसहितशास्त्रसहितमित्यर्थः । न तु केवलाशास्त्रीयम् । स्वप्रौढ्याभिमानपरिहारायाशास्त्रीयमिति वक्तव्यमात्रं प्राप्तम् । आंतरस्तु शास्त्रीयमेवेति यावत् । तदुक्तम् ।

अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः ।
शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयते ।। इति ।। ४६ ।।

इति श्रीमद्भागवतटिप्पण्यां चतुर्दशोऽध्यायः

अथ पञ्चदशोऽध्यायः

द्वादश्यामिति । अत्र श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवानिति पूर्वं श्राद्धविधिरुक्तः । अयने विषुवे कुव्हामित्यादिना जन्मर्क्षे सौम्ययोगयुक् इत्यन्तेन कालविशेषाश्च तदर्थमुक्ताः । तन्मध्ये एकादश्यपि प्राप्ता । तथा च ।

एकादश्यां पञ्चयज्ञान्प्रयत्नेन विवर्जयेत् ।
न होतव्यं न भोक्तव्यं पितृभ्योऽन्नं न दीयते ॥

इत्यादिवाक्यैस्तन्निषेधोऽपि दृश्यते । अतो विरोधस्तदर्थमुच्यते । श्राद्धविधिकालकथनं तु । ''अयने विषुव'' इत्यारभ्य मासर्क्षाणि युतान्यपीत्यन्तमेव नत्वग्रे । द्वादश्याद्युक्तकाले श्राद्धविधेरदर्शनात् । प्रत्युत तत्रोपवासादिकमेव दृश्यते ।

आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
सङ्गमे न हि भोक्तव्यं द्वादशद्वादशीं हरेत् ॥ इत्युक्तेः ।
मैत्राद्यपादे स्वपतीह विष्णुः श्रुतेश्च मध्ये परिवर्तमेति ।
पौष्यांत्यपादे पुनरुत्थितः स्यात्सुप्तिप्रबोधपरिवर्तनमेव वर्जम् ॥

इति विष्णुधर्मोत्तरोक्तेश्च । तर्ह्यत्र द्वादश्यामनुराधा स्यादित्यादेः कथनं किमर्थमिति चेत् । त एते श्रेयसः काला इत्यादिना तेषां पुण्यकालकथनार्थमेव । अन्यथा तदेतच्छब्दाभ्यां सूचितभेदस्यानुपपत्तेः । उभयोरेकविषयत्वे एतच्छब्देनैकपरामर्शसिध्या तच्छब्दस्य वैयर्थ्यापातात् । तस्मात्तच्छब्दगृहीताः श्राद्धविषयाः । व्यवहितत्वात् । एतच्छब्दगृहीता उपवासविषयाः । संनिकृष्टत्वात् । एते द्विविधा अपि कालाः श्रेयसः पुण्यसाधका इत्यर्थपरताया एवौचित्यात् ।

नन्वेतदग्र एव ''येषु स्नानं जपो होमं व्रतं देवद्विजार्चनम् । पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरमि''ति श्लोके होमश्राद्धादिविधौ तेष्विति तच्छब्देनोक्तसर्वकालपरामर्शादेकादश्यां श्राद्धादिविधिकथनाभावः कथमिति चेन्न । तेषु स्नानमित्यादिश्लोकाग्रश्लोक एव परामर्शविषयस्य दर्शितत्वात् । तथाहि । तदग्रिमश्लोकोऽयम् ।

संस्कारकाले जायाथा अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥

इति । तेषु जायासंस्कारादिकालेषु मध्ये जायाया भार्यायाः संस्कारे विवाहरूपे गर्भाधानलक्षणे वा । स्नानं समावर्तनं जलमज्जनं वा । समावर्तनं विना विवाहायोगात् । गर्भाधानान्ते मज्जनस्यान्हिकादावुक्तत्वात् । अपत्यस्य पुत्रस्य संस्कारकाले उपनयनसमये जपः । तदधिकारसिध्यर्थं द्वादशसहस्रगायत्रीमन्त्रजपविधेर्दर्शनात् । आत्मनः स्वस्य संस्कारे वैष्णवदीक्षालक्षणे मुद्राधारणात्मके वा । अष्टाक्षरादिहोमः सुदर्शनहोमो वा । प्रेतसंस्थाकाले व्रतं मधुरपदार्थत्यागरूपो नियमः । ब्रह्मचर्यं वा । मृताहः क्षयाहश्राद्धे देवद्विजार्चनम् । देवस्थाने तदुपलक्षितपितृस्थाने च द्विजार्चनं ब्राह्मणपूजनम् । चशब्दान्न संस्काररूपे कर्मणि वैश्वदेवाख्यपितृदेवनृभूतेभ्यो दत्तं दानं चतुर्णां यजनात्मकं कर्मेत्यर्थः । तस्य चतुर्यज्ञसाधकत्वात् । अभ्युदये नान्दीश्राद्धे यद्दत्तं द्राक्षामलकादिदक्षिणादानं तत्सर्वमनश्वरम् । अविनाशि हि । तस्मान्नेकादश्यां श्राद्धमुच्यते । ''एतस्मिन्ब्रह्मदिवसे नाग्निं जुहयान्न श्राद्धं कुर्यान्न देवार्दीस्तर्पयेद्यदि वा तर्पयेत्स चाण्डालः स ब्रह्महा स गोघ्नः स पितृहा स सर्वहा भवती''ति माध्यंदिनश्रुतेः । ततश्चायमक्षरार्थः ।। द्वादश्याम् आषाढशुक्लद्वादश्याम् । ।। अनुराधा । तदाख्यं नक्षत्रं चेच्छ्रेयः कालः । यद्वा । अनुराधा पश्चात्सादृश्ययोरनु इत्यभिधानात् । अनुवृत्तायाः पश्चात्तनायाः । दशम्याः । राधा । राधसाधसंसिद्धाविति धातोः । सिद्धवेध इति यावत् । स्याच्चेत् । द्वादश्यामुपवासार्हतारूपः कालः ।

षट् पञ्चाशद्धटीपूर्णा पादोना च यदा भवेत् ।
उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ।।

इत्युक्तेः ।। श्रवणः । तन्नामकनक्षत्रम् । अत्र ल्युडंतत्वेऽपि पुल्लिङ्गत्वं तद्देवताविष्णुलिङ्गविवक्षयेति बोध्यम् । यद्वा । श्रवणे श्रवणेन णः सुखं यस्य सः । अथवा । श्रूयते णः सुखरूपो विष्णुर्दैवतत्वेन यस्मिन्निति । णश्च निर्वृतिवाचक इति कृष्णशब्दनिरुक्तौ । द्वादश्यां चेत् भाद्रपदशुक्लद्वादशां यदीत्यर्थः । तथा माघफाल्गुणकृष्णद्वादश्यामपीति । ''द्वादशीं श्रवणोपेतां यो नोपोष्यात्स मन्दधीरि''त्यादिना निन्दनात् । अनुपवस्तुः न च शुक्ल एव तदिति वाच्यम् । अत्रान्यत्र च तदुल्लेखादर्शनात् । आभासितपक्षेष्वित्यत्र तन्निर्देशस्तु मैत्र्यादिसाहचर्यात् । न केवलश्रवणविधाने ।। त्रिस्र उत्तराः । उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदाः । एतद्युक्तपौर्णिमाः । आषाढी चातुर्मास्यारंभदिनत्वात् । अथवा । तिस्रः सानुराधाद्या आषाढादिद्वादश्यो याभ्यः सकाशादुत्तराः परदिनस्थास्ता एकादश्यः पुण्याः ।

ननु मैत्रश्रवणरेवतीनां सहपाठेऽपि रेवत्या एवानुक्तिः कथमिति चेन्न । द्वितीयपादेनैव तस्या अप्युक्तेः । तथाहि । उत्तराः सर्वर्क्षात्यस्था रेवतीत्यर्थः । न च बहुवचनानुपपत्तिः । अनुराधान्हविषा

वर्धयन्तः । ''चेन्न वर्षन्ति कृत्तिका'' इत्यादिष्विव तदङ्गभूततारणां बाहुल्येनोपगमात् । एवं तिस्र इति तु अनुराधाश्रवणरेवत्यो द्वादश्यां द्वादश्यधिकरणाश्चेत्पुण्यां इत्यर्थः ॥ आसु । अनुराधादिषु । एकादशी चेत्सोऽपि श्रेयः कालः ॥ जन्मंर्क्षं स्वजन्मर्क्षम् ॥ सौम्ययोगयुक् । सौम्यश्चांद्रबुधगुरुशुक्राः तेषां संयोगः संबंधः तेन युज्यते तत्तथा । जन्मनक्षत्रे चन्द्रादयश्चत्वारो राश्यंतरं प्राप्ताश्चेत्स कालः श्रेयस्कर इति वा । यद्वा । जन्मर्क्षं कृष्णाष्टम्यां रोहिणीनक्षत्रं सौम्यो बुधवासरस्तद्योगयुक् चेत् श्रेयान् । तद्वासरे कृष्णावतारोक्त्या विशेषफलदायकत्वात् । अथवा । जन्मर्क्षं स्वजन्मनक्षत्रं श्रेयः । सौम्ययोः मृगर्क्षेंदुवासरयोः । योगयुक् दिनं श्रेयः । सोमे च सौम्ये इत्युक्त्याऽमृतसिद्धियोगाख्यात्वात् । अपि वा । अप्सुजन्मर्क्षमित्येकं पदम् । असोर्मुख्यप्राणजन्म यस्य सोऽसुजन्मा कोणपो वा मरीचिनामा वा, वायुस्तस्यर्क्षं स्वातीनक्षत्रं, नृसिंहजयन्तीनक्षत्रम् । सौम्ययोगयुक् बुधयोगयुक्तं चेच्छ्रेयः । नृसिंहस्यापि बुधेऽवतीर्णत्वात् । तेऽयनादयः श्राद्धयोग्याः कालाः । एते ''आषाढीद्वादश्यादयश्चोपवासयोग्या'' इति द्विविधाः कालाः । श्रेयःकालाः शेषं सुगमम् ॥ २३,२४ ॥

इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ॥ ७-१५ ॥ ॥

॥ इति श्रीभागवते पांघरी श्रीनिवासाचार्यविरचिते विरोधोद्धारे सप्तमस्कन्धः समाप्तः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

अष्टमस्कन्धः

अथ प्रथमोऽध्यायः

राजोवाच–

स्वायम्भुवस्येह मनोर्वंशोऽयं विस्तराच्छ्रुतः ।
यत्र विश्वसृजां सर्गो मनूनन्यान् वदस्व नः ॥ १ ॥

॥ अथ श्रीभागवतटिप्पणी सत्यधर्मयतिकृता प्रारभ्यते ॥

अष्टमस्कन्धतात्पर्यतात्पर्यस्पष्टने यते ।
पारयेत्तन्मम गुरोः पदोरुन्नतिदा नतिः ॥

श्रीमच्छ्रुतिपतिसुतेन मया श्रुतमश्रुतप्रायमिति विजिज्ञापयिषतः किञ्चिदनुविविच्योक्त्वोत्तरत उत्तारणकारणहरिचरितश्रवणेच्छुः परीक्षित्परीक्ष्यान्तर्निर्भृततत्कमनुचरितवर्णनं कुर्विति सर्वमतिं सार्वभौमोऽर्थयत इति वक्ति ॥ राजेति । इह कथाकथनप्रस्तावे । द्वितीयस्कन्धमारभ्या-सप्तमस्कन्धमिति वा । विश्वसृजां प्रजापतीनां मरीच्यादीनाम् । सर्गः सृष्टिः । अन्यान्स्वायम्भुवव्यति-रिक्तान्मनून् । विस्तराच्छब्दवैशद्यात् । इदमपि श्रुतपदान्वयीव वदेत्यनेनाप्यन्वेति । मनोरिति मनोहरः पाठः । गुरोरिति पाठे सर्वमूलस्येत्यर्थः । गुरो इति सम्बुध्यन्तः क्वाचित्कः पाठः । सोऽपि सरलः । वदस्व वद । भासनोपसम्भाषेत्यादिना भासमानः सन्वदेत्यर्थ आत्मनेपदता वा । अनेन मच्छङ्काशङ्कूत्कर्तनं न मुनेरसुसाधमिति भाव आविष्कृतो राज्ञेति ज्ञेयम् । विस्तरस्त्वित्यूदे पैङ्गिनां श्रुतिरित्यनुव्याख्यानव्याख्यासुधाटिप्पण्यादितोऽवसेयः । वद इति वाग्मीति स्वनो ध्वनिः प्रसिद्धिरिति यावत् । यस्य स त्वं वदेति शेष इति वा । हे स्व नः वदेति वा । स्वे स्वकीयाश्चते वयं चेति वा स्ववयम् । तेषां तान् । स्वनः प्रति वदेति योजना ॥ १ ॥

॥ अथ श्रीमद्भगवतटिप्पणी छलारी शेषाचार्यविरचिता प्रारभ्यते ॥

स्वायंभुवाद्रिपातारं सुरानमृतपायिनम् ।
इन्द्रस्य राज्यदं विष्णुं वन्दे यज्ञादिरूपिणम् ॥ १ ॥
दुर्मताख्यपलाशानि विधूयामृतवर्त्म तु ।
स्पष्टं कृतं भजे येन मध्वाख्यं तं महानिलम् ॥ २ ॥
अभेद्यमध्ववाक्यानि व्याख्यातानि सतां धिये ।
येन तं जयतीर्थार्यं लोकोपकृतिकारणम् ॥ ३ ॥
विद्यापत्यादिसंपत्तीर्यद्वृन्दावनसेवया ।
लभते मद्गुरुं मर्त्यो तं श्रीसत्यनिधिं भजे ॥ ४ ॥
श्रीमध्वदर्शनाचार्यं ममानुग्रहपूर्वकम् ।
छलारीनरसिंहार्यं वन्देऽहं श्रेयसे मम ॥ ५ ॥
श्रीभागवतटीकायाः कर्तॄनपि पुरातनान् ।
प्रणम्य ज्ञानसिद्ध्यर्थं विजयध्वजपूर्वकान् ॥ ६ ॥
छलारिनरसिंहार्यशिष्यः शेषाभिधो बुधः ।
अष्टमस्कन्धविवृतिं कुरुते मन्दबोधिनीम् ॥ ७ ॥

अथास्मिन्नष्टमस्कन्धे चतुर्दशमन्वन्तराणि निरूप्यन्ते । तत्र तावत्प्रथमाध्याये स्वायंभुवस्वारोचिषोत्तमतापसाख्यमनुचतुष्टयं निरूप्यते । तत्रादौ परीक्षिद्राजा वृत्तानुपूर्वकं शुकाचार्यं श्रोतव्यकथां प्रार्थयते ॥ राजेति । श्रुतश्चतुर्थस्कन्धोपक्रमे । यत्र स्वायंभुवमन्वन्तरे विश्वसृजां मरीच्यादिप्रजेश्वराणां सकाशात् । आकूत्यादिस्वायंभुवकन्यासु । सर्गः पुत्रपौत्रादिसर्गोऽभूत् । अन्यान् स्वायंभुवव्यतिरिक्तान् ॥ १ ॥

अथ श्रीमद्भागवतटिप्पणी लिङ्गेरी श्रीनिवासाचार्यविरचिता प्रारभ्यते

प्रणम्य मध्वहृत्कञ्जसंस्थं व्यासं तथा गुरून् ।
पूर्वटीकाकृतश्चाथ विजयध्वजपूर्वकान् ॥ १ ॥
अष्टमस्कन्धसद्व्याख्या क्रियते हरितुष्टये ।
लिङ्गेरीश्रीनिवासेन रुग्मिणीशार्यसूनुना ॥ २ ॥

अस्मिन् स्कन्धेऽपि भगवति श्रीनारायणेऽतिशयितभक्त्युदयाय स्वायम्भुवमनुस्तुत्या प्रसन्नाद्धरेस्तत्संरक्षणादिरूपं माहात्म्यं भगवतो निरूप्यते । अत्राप्यादौप्रवृत्तकथनानुवादपूर्वकं परीक्षिद्राजा स्वाभिलषितकथाकथनं शुकं प्रति प्रार्थयत इत्याह सूतः शौनकादीन् ॥ राजेत्यादिना ॥ अवश्यं मया श्रोतव्येषु चतुर्दशसु मनुषु स्वायम्भुवस्य मनोरयं प्रमाणप्रसिद्धो वंशो विस्तराच्छ्रुतः । अवश्यं श्रोतव्यत्वे निमित्तमाह स्वायम्भुववंशस्य ॥ यत्रेत्यादिना । यत्र स्वायम्भुवस्य वंशे विश्वसृजां स्वयोग्यजगदुत्पादकानां सर्गः सृष्टिः । अभूदिति शेषः । अन्यान्स्वायम्भुवाद्भिन्नान्मनून् । नोऽस्माकं वदस्व ॥ १ ॥

यत्र धर्मा हि विविधाश्चतुर्वर्णाश्रिताः शुभाः ।
मन्वन्तरे हरेर्जन्म कर्माणि च महीयसः ॥ २ ॥

सत्यधर्मीया — चतुर्वर्णाश्रिता इत्यत्र पञ्चस्कन्धेभ्य इत्यादिवच्चत्वारश्च ते वर्णाश्चेति विशेषणसमासः । यद्वा । वर्णानाश्रिता वर्णाश्रिताः । चत्वारश्च ते वर्णाश्रिताश्चेति विग्रहः । सामर्थ्यादितरत्रान्वयायोगाच्च चतुष्ट्वस्य वर्णपदार्थेऽन्वयः । एतच्चर्चः प्राचीनस्कन्धद्वन्द्वविवृतावस्माभिः सप्तघटिकाभोजनं, त्रिलोकनाथः, दीप्तानलार्कद्युतिमप्रमेयमिति प्रमेयदीपिकाद्युदाहरणपुरःसरं प्रपञ्चितोऽनुसुन्धेयः । महीयसो महन्महतो हरेः । यत्र यत्रेति वीप्सया हरिकर्माणि मनुचरिताव्यभिचरितानीति सूचयति ॥ २ ॥

छलारी — तद्वर्णने आवश्यकत्वमाह ॥ तत्रेति । हि यस्मात् ॥ तत्र तेषु मन्वन्तरेषु धर्माः प्रवर्तिताः । तस्माद्वदस्वेत्यन्वयः । अन्यच्च प्रार्थयते । यत्रेति । यत्र यत्र मन्वन्तरे महीयसः सर्वोत्तमस्य हरेर्जन्मान्यवतारान्कर्माणि चरितानि गृणन्ति कीर्तयन्ति ॥ २ ॥

लिङ्गेरी — अन्यमनुकथाश्रवणादेरवश्यतानिमित्तमाह ॥ यत्र धर्म इत्यादिना । यत्र मन्वन्तरे स्वायम्भुवातिरिक्तमन्वन्तरे विविधाः शुभाश्चतुर्वर्णाश्रिता धर्माः । उक्ता इति शेषः । हरेर्भक्तसर्वानिष्टनिवर्तकस्य महीयसः सर्वोत्तमस्य नारायणस्य जन्म प्रादुर्भावः कर्माणि चरितानि ॥ २ ॥

गृणन्ति कवयो ब्रह्मन् तानि नो वद शृण्वताम् ।
यदस्मिन्नन्तरे ब्रह्मन् भगवान् विश्वभावनः
कृतवान् कुरुते कर्ता ह्यतीतेऽनागतेऽथ वा ॥ ३ ॥

सत्यधर्मीया — न सरणिरियमनुसरणीया कैरपि विवेकिप्रवेकैरननुसृतत्वादित्यत आह ॥ गृणन्तीति । तत्रापि गृणन्तीत्यादावुदीरणेन किं न गृणाति वा न गृणीत इति न गृणन्तीति मन्दसन्देहं मन्दीचकार । कवय इत्यनेन शतमप्यन्धानामिति नीतिभाजनतां त्याजयामासेत्यवसेयम् । तानि । नः । अस्मदो द्वयोश्चेति बहुवचनम् । मदुपलक्षितानामुपलक्षितान्प्रतीति वा । वद । ब्रह्मन् योग्यतानुसारेण पूर्ण । अस्मिन्नन्तरे वैवस्वतमन्वन्तरे । विश्वं जगद्भावयत्युत्पादयतीति स तथा । विश्वो वायुरुदाहृत इत्यादेर्जगज्जनकमातरिश्वतात इति वा । अतीते काले यत्कृतवान् । अनागते एष्यति वा कर्ता करिष्यति । अथ वर्तमाने च यत्कुरुते । तानि नो वदेत्यन्वयः । अव्ययानामनेकार्थत्वादथेति समुच्चयार्थे । तथा हि सुधादौ चाथशब्दः समुच्चय इति वा । इवार्थेऽपि समुच्चय इति विश्वः । अद्येति पाठोऽप्यनवद्यः ॥ ३ ॥

छलारी — तदेव विशेषतः प्रार्थयते ॥ यदिति । विश्वेषु चतुर्दशमन्वन्तरेषु भावयति । स्वार्थे णिच् । प्रादुर्भाव इति विश्वभावनः । मन्वन्तरेषु प्रादुर्भावः सन्नित्यर्थः । यस्मिन्नतीते मन्वन्तरे यत्कर्म कृतवान् । यस्मिन्ननागते भविष्यन्मन्वन्तरे यत्कर्मकर्ता करिष्यति । अथवा । वर्तमानमन्वन्तरे यत्कर्म कुरुते तानि वदस्वेत्यन्वयः ॥ ३ ॥

लिङ्गेरी — कवयो गृणंत्युपदिशन्ति तानि वदस्वेति । सत्संप्रदायसद्भावात् । तवापि मत्पृष्टार्थज्ञानपूर्णत्वाच्च तवैतत्कथनमावश्यकमित्याह ॥ ब्रह्मन्निति । शृण्वतामिति स्वस्य श्रवणादरं सूचयति । अस्मिन्नन्तरे वैवस्वतमन्वन्तरे विश्वभावनो जगदुत्पादको भगवान्नारारणो यत्कर्मादिकं कुरुते । अतीतेऽन्तरे कृतवान् । अनागते कर्ता करिष्यति ॥ ३ ॥

ऋषिरुवाच—

मनवोऽस्मिन् व्यतीताः षट् कल्पे स्वायम्भुवादयः ।
आद्यस्ते कथितो यत्र देवादीनां च सम्भवः ॥ ४ ॥

सत्यधर्मीया — किं शुकस्तूष्णीक उत क्षितिपतिप्रश्नस्योत्तरमवादीदित्यत आह ॥ ऋषिरिति । अस्मिन्कल्पे मनवः षट् स्वायम्भुवादयः स्वायंभुव एवादिर्येषां ते तथा । व्यतीताः । यत्र देवादीनां च सम्भव उत्पत्तिः स आद्यः स्वायम्भुवः ते कथितस्त्वां प्रति निरूपितः । अत्रेति पाठेऽपि स्वायम्भुवेन्तर इत्येवार्थः । तु विशेषेण कथित इत्यर्थः ॥ ४ ॥

छलारी — अतीतानागतेऽथवेत्यनेन मन्वन्तराणामतीतत्वादिकमुक्तम् । तत्रातीतमन्वन्तरकथां वक्तुमतीतमन्वन्तरसंख्यां तावदाह ।। मनव इति । अस्मिन् ब्रह्मदिनकल्पे स्वायंभुवादयः स्वायंभुवस्वारोचिषोत्तमतापसरैवतचाक्षुषाख्याः षण्मनवो व्यतीताः । वैवस्वतश्च सत्यधर्मोऽव्यतीतः । तर्हि प्रथममन्वन्तरकथा वक्तव्येत्यत आह ।। आद्य इति । आद्यः स्वायभुवः कथितः । चथुर्थोपक्रमे । यत्र स्वायम्भुवमन्वन्तरे । देवादीनाम् । आदिपदेन मनुपुत्रसप्तर्षीन्द्रहरेर्वराहाद्यवतारा ग्राह्याः । तेषां संभव उत्पत्तिः । अभूदिति शेषः ।। ४ ।।

लिङ्गेरी — स्वायम्भुवातिरिक्तमनुस्थितिं वदस्वेति परीक्षिता प्रार्थितो भगवान् शुकः तामुक्तवान्न वेति शौनकादीनां मानसीं शङ्कां परिहरति ।। शुक उवाचेत्यादिना । अस्मिन्कल्पे वैवस्वतमन्वन्तरे वर्तमाने स्वायम्भुवादयः षण्मनवो व्यतीताः । षट्स्वाद्यः स्वायम्भुवो यः स ते कथितः ।। ४ ।।

आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ।
धर्मज्ञानोपदेशार्थं भगवान् पुत्रतां गतः ।। ५ ।।

सत्यधर्मीया — मनोः स्वायम्भुवस्याकूत्यां देवहूत्यां चेति दुहित्रोः पुत्र्योः । धर्मज्ञानोपदेशार्थम् । भगवान्पुत्रतां गतो यज्ञः कपिलश्चेति नामवान्पुत्रत्वं प्राप्तः । अधिकरणमात्रतार्थकसप्तम्या पुत्रतां गत इत्यनयाऽनेन चैच्छिकं तयोस्तयोर्भवनं तयोरैक्यं चैकवचनेनासूचीति मन्तव्यम् । यो भगवान् तस्य अङ्गतः शरीरग्रहणमात्रेण पुत्रतेति वा । तत्कृत्यमाह ।। धर्मेति । धर्मश्च ज्ञानं च तद्व्यतिरिक्तं ज्ञानसाधनं च येन स चासावुपदेशश्च तस्मै प्रयोजनाय । धारकत्वाद्धर्मो भगवांस्तस्य ज्ञानं येन स चासावुपदेशश्च तस्मा इति वा । केचिदाकूत्यां देवहूत्यामिति सुपां सुलुगिति सु इत्यस्याङ्यादेशोऽध्याहृते चेतिशब्दे आकूतिरिति देवहूतिरिति दुहित्रोः षष्ठीद्विवचनमिति व्याकुर्वते । केचित्सर्वविदः षष्ठ्येकवचनस्य दुहितुरित्यस्यौसादेशे ङसश्च ङ्यादेश आकूत्या देवहूत्याश्चेति दुहितुरिति च व्याकुर्वते । तस्य च निरूपितत्वं सप्तम्यर्थत्वेन मार्गणीयमित्ययं मार्ग आश्रित इति भावमाविर्भावयन्ति ।। ५ ।।

छलारी — ननु तर्हि स्वायंभुवमन्वन्तरस्थं यज्ञनामकहरिकथावर्णनं कुतः क्रियत इत्यतः स्वायंभुवमन्वन्तरेऽवतीर्णस्य यज्ञानाम्नो हरेस्तन्मनुरक्षणादिरूपावतारप्रयोजनस्य पूर्वमनिरूपितत्वात् ।

तद्वक्तुमाह ॥ आकूत्यामिति । तस्य स्वायंभुवस्य मनोर्दुहित्रोराकूत्यां यज्ञनामकत्वेन देवहूत्यां कपिलनाम्ना पुत्रतां गतः प्राप्तः ॥ ५ ॥

लिङ्गेरी — तस्य स्वायम्भुवस्य मनोः । आकूतिदेवहूतीति सञ्ज्ञयोर्दुहित्रोः । भगवन्नारायणो धर्मज्ञानोपदेशार्थम्, आकूत्यां यज्ञनामा सन्, देवहूत्यां कपिलनामा सन् पुत्रतां गत इत्यन्वयः । भगवानित्यनेन भगशब्दार्थान्तर्गतसमग्रज्ञानवत्वोक्त्या धर्मज्ञानोपदेशे सामर्थ्यं सूचितम् ॥ तदुक्तम् ॥

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणेति ।

ज्ञानवैराग्ययोश्चैवेत्यपि केचित्पठन्ति ॥ ५ ॥

कृतं पुरा भगवतः कपिलस्यानुवर्णितम् ।
आख्यास्ये भगवान् यज्ञो यच्चकार कुरूद्वह ॥ ६ ॥

सत्यधर्मीया — आकूतिसुतचरितं वक्तुमुत्कमानसो वैयासकिस्तृतीयोक्तं स्मारयन्वक्तव्यं प्रतिजानीत इत्याह ॥ कृतमिति । भगवतः कपिलस्य कृतं कर्म पुराऽनुवर्णितम् । भगवान्यज्ञस्तन्नामाऽऽकूतिसुतः । यत्कर्म चकार तदाख्यास्ये कथयिष्ये । त्वां प्रतीति शेषः ॥ ६ ॥

छलारी — तत्र कपिलनाकमस्य भगवतः कृतं चरितम् । पुरा तृतीयस्कन्धे ॥ ६ ॥

लिङ्गेरी — हे कुरुद्वह! कुरुकुलोद्धारकेति स्तुत्या सम्बोधनं परीक्षितः प्रोच्यमाने मनःप्रणिधानार्थं शुकेन । कृतं भगवतः कपिलस्य कृतं चरितं कर्मणो भावे क्तः । पुरा तृतीयस्कन्धेऽनुवर्णितम् । भगवान्यज्ञो यच्चरितं चकार तदहं ते आख्यास्ये प्रवक्ष्यामि ॥ ६ ॥

विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ।
विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥

सत्यधर्मीया — शतरूपायास्तन्नाम्न्या योषितः । सभार्य इत्यनेन साऽपि कामोपभोगविरतिमतीति सूचयति । विसृज्य राज्यमिति भाववैराग्यभाग्यं सूचयति । सभास्तारा उदासत इत्यौदासीन्यं प्राज्ये राज्ये स्वायम्भुवस्य नापि तु स तत्सत्क्रियोऽपि क्रियामिमामतनोदित्यप्याह ॥ सभार्य इति । सभानामर्यः । अर्यः स्वामिवैश्ययोरिति स्मरणात्स्वामीत्यर्थः । आर्यः श्रेष्ठ इति वा ।

वनं गन्तव्यं हेति क्लेशेनावर्चस्को गत इति नेत्यप्याह ॥ सभार्य इति । सभाः प्रकाशसहितास्तेषां तेषु वाऽर्यः स्वामी । आर्य इति वा । वनते वनं मनःपूर्वकमस्येत्यनेन ध्वनयति । दुर्विषये वैराग्यवत्सद्विषयेऽपि तथा किमित्यतो नेत्यप्याह ॥ विरक्त इति । विः पक्षिपरमात्मनोरित्यभिधानाद्वौ भगवति परमविषये रक्त इति स तथा । तपसे तपोऽर्थम् ॥ ७ ॥

छलारी — शतरूपानामिकायाः पतिर्भर्ता स्वायंभुवः ॥ ७ ॥

लिङ्गेरी — यज्ञमूर्तिचरितं तदुपयुक्ततामाह ॥ विरक्त इत्यादिना । प्रभुर्विषयानुभवादिपरित्यागे समर्थः । शतरूपापतिः स्वायम्भुवः । काम्यन्त इति कामा विषयाः । तेषां भोगेष्वनुभवेषु विरक्तो हेयबुद्धिः सन् राज्यं विसृज्य तपसे तपःकरणार्थं वनमाविशत् । सभार्य इत्यनेन शतरूपायाः पातिव्रत्यसूचनेन यच्छतरूपापतिरिति शतरूपायाः प्रसिद्धत्वं ध्वनितं तदुपपादितं भवति ॥ ७ ॥

सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन् ।
तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥

सत्यधर्मीया — सुनन्दायां सीताऽलकनन्दाचक्षुर्भद्रेति पञ्चमोक्तचतुर्धाभिन्नायामलकनन्दाख्यायाम् गङ्गायाम् । तस्या एव सुनन्देति नामान्तरम् । एकेन पदा भुवं स्पृशन् उत्तानीकृतैकचरण इत्यर्थः । वर्षशतं शतसंवत्सरात्मकं कालं घोरमितरासाध्यं तपस्तप्यमानः कुर्वाण इदमुपनिषद्वचनमन्वाह आह ॥ ८ ॥

छलारी — सुनन्दायां तन्नामकविष्णुपद्यां घोरं दुष्करं तपः तप्यमानः समाधिस्थितः सन् इदमन्वाह स्तुतिरूपं स्तवनमाह । स्वायंभुवो मनुः । स्वदौहित्रं यज्ञनामानं विष्णुं वक्ष्यमाणमन्त्रोपनिषदा तुष्टावेति भावः । स्वायंभुवः स्वदौहित्रं विष्णुं यज्ञाभिधं मनुः । ईशावास्यादिभिर्मन्त्रैस्तुष्टावावहितात्मनेत्युक्तेः ॥ ८ ॥

लिङ्गेरी — तपःकरणप्रकारमाह ॥ सुनन्दायामिति । हे भारत । स्वायम्भुवो मनुः सुनन्दायां स्रोतसि भागीरथ्यां वर्षशतं शतवर्षपरिमितिकाले । कालाध्वनोरत्यन्तसंयोगे द्वितीयेति सूत्रितसप्तम्यर्थे द्वितीयया शतवर्षे वक्ष्यमाणतपसो विच्छेदाभावं सूचयति । एकेन पदा पादेन भुवं स्पृशन् घोरमविरक्तजनभयङ्करं तपस्तप्यमानः सन् । इदं य आदित्यमन्तरो यमयतीत्यादिश्रुतिस्मृतिजातं अनु अनुसृत्येदं वक्ष्यमाण्णं स्तोत्रमाह ॥ ८ ॥

मनुरुवाच–

येनायं तपते विश्वं विश्ववीर्यं यतस्तपः ।
यो जागर्ति शयानेऽस्मिन् नायं तं वेद वेद सः ॥ ९ ॥

सत्यधर्मीया — अर्थतस्तत्प्रतीकं धृत्वाऽऽह ॥ येनेति । ध्येयः सदा सवितृमण्डल-मध्यवर्तीत्यादेरादित्यान्तर्गतं भगवंतमभिष्टौतीति वा । अयमादित्यो येन भीषोदेति सूर्यो भयात्तपति । यस्य भासा सर्वमिदं विभातीत्यादेः । भगवता प्रेरितो विश्वम् । सूर्य आत्मा जगतस्तस्थुषश्चेत्यादेर्जगत्तपते तपति । विश्ववीर्यं विश्वस्य जगतो वीर्यं सामर्थ्यं येन तत् । विश्वं समस्तं वीर्यं प्रकाशनादिशक्तिर्यस्मादिति वा । तपो यतो यस्माद्भवति । तपतीति वक्तव्ये यदवादीत्तपत इति तेन त्वं तप, ते तव तपो यतो मत्त एव भवतीत्यान्तरङ्गिकं भावं बोधयामासेति बोध्यम् । अस्मिन्सवितरि शयाने कार्यानुन्मुखे सति यो जागर्ति । अयं सूर्यस्तं हरिं न वेद । सोऽप्येनं न वेद चेत्समः समाधिरित्यतोऽभिधत्ते ॥ वेद स इति । स हरिर्वेद तमिति कण्ठतो वचनानुत्कण्ठा पुनः स सर्वं वेदेत्यभिप्रायद्योतिकेति ज्ञेयम् । तमित्यावर्तते । तदुपलक्षितं सर्वं वेदेति वा ।

अयं जीवसङ्घो येन ज्ञानरूपेण येन हरिणा प्रेरितो विश्वं सुखं वा दुःखं वा तपते आलोचयति । अनुभवतीति यावत् । यतः एतीति यंस्तस्य । नानायोनिमभिगच्छतोऽस्य तपोऽनुभवो विश्ववीर्यं विश्वस्य भगवतो वीर्यं वीर्यकारणकम् । येन भगवताऽयं जीवस्तपते आनन्दाद्यनुभवति । तदसम्भावनामवमानयति । यतो विश्वं जगद्विश्ववीर्यम् । विश्वं विष्णुरित्यादेः विष्णुना विविध-प्रकारेणेर्यम् । तदन्तर्गतस्य जीवसङ्घस्य तप आनन्दाद्यनुभवस्तत्प्रेर्य इतीति । वैभवात्पुनर्हेतूनाह ॥ य इति । अस्मिन् जीवजाते शयाने सति यो तुर्यात्मा जागर्ति । यथोक्तं माण्डूकोपनिषद्भाष्ययोः । बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते । स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया । न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः । सर्वं तु दर्शयेन्मुक्तौ तुरीयः परमेश्वर इति प्रत्यये । सर्वप्रदर्शके चैव तुरीये सर्वदर्शनमिति ब्रह्मतर्के । निद्रायुतास्तु विश्वाद्यास्तदधीना यतो हि सेत्यादि । अयं जीवस्तं न वेद । स हरिस्तं जीवं वेद जानाति । न तत्र चक्षुर्गच्छतीत्यादेः । यः सर्वज्ञ इत्यादेः ।

येन अयं स्वशुभावहदैवमनुसृत्यायमादित्यस्तपते । सूर्याप्रकाशो देशो नास्ति किमित्यत आह ॥ अविश्वं स्वप्रकाश्यमसमस्तमिति । कुतः सञ्चुकोच सवितुः शक्तिरित्यत आह । यतस्तपः । तपो ब्रह्मेति श्रुतेः । ब्रह्म विश्ववीर्यं समस्तशक्तियुक्तमिति । पूर्ववदुर्वरितम् ॥ ९ ॥

छलारी — तमेवोपनिषदर्थमनुवदति ॥ येनेत्याद्यष्टभिः श्लोकैः । अयमादित्येन हरिणा प्रेरितः सन्विश्वं तपते प्रकाशयति । यदादित्यस्तपति तेजसा चेति श्रुतिः । विश्वस्य जगतः सृष्टौ वीर्यं सामर्थ्यप्रदं तपो यतो हरेः सकाशाच्चतुर्मुखस्य भवति । अस्मिन् जीवे शयाने निद्रिते सति यो हरिर्जागर्ति । य एषु सुप्तेषु जागर्तीति श्रुतेः । तं चतुर्मुखनियामकेत्यादिनिरतिशयमाहात्म्योपेतं हरिमयं जीवो न वेद साकल्येन न जानाति । सः हरिः सर्वं चेतनाचेतनात्मकं विश्वं सम्यग्वेद । यः सर्वज्ञः सर्वविदिति श्रुतेः ॥ ९ ॥

लिङ्गेरी — येन श्रीनारायणेन प्ररितोऽयं सूर्यो विश्वं जगत्तपते प्रकाशयति । धातूनामनेकार्थत्वात् । य आदित्यमन्तरो यमयतीति । यस्य भासा सर्वमिदं विभाति । यदादित्यगतं तेज इत्यादि श्रुतिस्मृतिभ्यः । विश्ववीर्यं चेतनजगतो मोक्षादिप्राप्तौ सामर्थ्यप्रदं तपो ज्ञानं यतो यस्माद्धरेर्भवति । अज्ञानां ज्ञानदो विष्णुरित्यादेः । अस्मिन्सूर्ये शयाने यो नारायणो जागर्ति निद्राभावं प्राप्नोति । सूर्यस्य जीवेष्वेकत्वात् । तुरीयस्य भगवद्रूपत्वादेतेषां च स्वपितीत्याचक्षते । न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिता इत्यादिश्रुतिभ्यः निद्रातदभावावगतेः । अयं सूर्यस्तं स्वनियामकं नारायणं न वेद न जानाति । यमादित्यो न वेदेति श्रुतेः । स सूर्यनियामको नारायण आदित्यं वेद । यः सर्वज्ञः सर्ववित् । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता इत्यादिश्रुतेः । येन नारायणेन प्रेरितोऽयं जीवराशिर्विश्वं समस्तं सुखदुःखादिकं तपतेऽनुभवति । य आत्मानमन्तरो यमयतीति । एष ह्येवानन्दयाति । सुखं दुःखं भव इत्यादिश्रुतिस्मृतिभ्यः । विश्वस्य समस्तजीवानां वीर्यं सामर्थ्यप्रदं तपो ज्ञानं यतो हरेर्भवति । यो हरिरस्मिन् जीवे शयाने निद्रां प्राप्ते जागर्ति । अयं जीवराशिस्तं नारायणं न वेद । यमात्मानं न वेदेति श्रुतेः । स हरिर्जीवं वेद ॥ ९ ॥

आत्मावास्यमिदं विश्वं यज्जगत्यां जगन्मनः ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद् धनम् ॥ १० ॥

सत्यधर्मीया — (अत्र प्रासङ्गिकी कथा । ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमिति याज्ञीयोपनिषन्मन्त्रं स्वायम्भुवोक्तानुवादमिषेणार्थविशेषलाभलोभेनेशावास्यमिति पदभेदमवधार्य सुधीर्यथावद्व्याख्यान्नादित्यादिनियामकता राजादिवद्बहिष्ठतया चेद्बरिष्ठतावहेति अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतिसमाख्यया च केवलं तदाच्छाद्यत्वस्य महामाहात्म्याप्रयोजकत्ववदुदाहृतश्रुतिविरुद्धत्वाच्च तदुपेक्षितमित्यैकपद्येन

तत्राप्यात्मावास्यमिति साङ्निर्देशेन च सूचयन्कं प्रतीत्थं सम्बोधनमिति शङ्कां मन्त्रेऽध्याहार्यं दर्शयन्पराकरोति ।। आत्मावास्यमिति । इदमेव ग्रन्थकृद्भावमवेत्य भगवान् भाषिष्ट भाष्यकृत् । स्वायम्भुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव । स्वायम्भुवः स्वदौहित्रं विष्णुं यज्ञाभिधं मनुः ईशावास्यादिभिर्मन्त्रैस्तुष्टावावहितात्मना । रक्षोभिरुग्रैः सम्प्राप्तः खादितुं मोचितस्तदा। स्तोत्रं श्रुत्वैव यज्ञेन तान्हत्वाऽवध्यतां गतान् । प्रादाद्धि भगवांस्तेषामवध्यत्वं हरः प्रभुः । तैर्वध्यत्वं तथाऽन्येषामतः कोऽन्यो हरेः प्रभुरिति ब्रह्माण्डे । भागवते चायमर्थ एवोक्तः । ईशस्यावासयोग्यमीशावास्यं जगत्यां प्रकृतौ तेनेशेन त्यक्तेन दत्तेन भुञ्जीथाः । स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदं जगत् । प्रवृत्तये प्रकृतिगं यस्मात्स प्रकृतीश्वरस्तदधीनप्रवृत्तित्वात्तदीयं सर्वमेव यत् । तद्दत्तेनैव भुंजीथा अतो नान्यं प्रयाचयेदिति ब्राह्म इति । नन्वेतन्मानभाष्यटीकायां तान्हत्वेत्युपपत्तये तान् राक्षसानित्यध्याहरेण पुल्लिङ्गोपपत्तिरिति न गदनीयम् । विनाऽध्याहारमुक्त-लिङ्गोपपत्तिर्भवति । तथाहि । रक्षोभिरुग्रैरिति पदमेकम् । रक्षःसु रक्षसां वा । निर्धारणे इमे सप्तमीषष्ठ्यौ । अभितो रुजं भङ्गं जगतो राति ददातीति ते तथा तैरिति विग्रहग्रहणादिष्टसिद्धिरिति चेन्न । अशितेऽपि लशुने न शान्तो व्याधिरितिवदेतद्विशेषणानुरूप्येण दानवैर्यातुधानैरित्यादे-रध्याहर्तव्यत्वात् त्वयाऽपीति । किञ्च गुरुकल्पना च त्वत्पक्ष इति चमदकृतचेतस्तव विवरणमिति ऋजुर्जयतीर्थीविवरणसरणिरिति सन्तोषं सन्तो वहंत्विति प्रासङ्गिकी चिन्ता ।)

न राजादिवत्सूर्यप्रेरकत्वं हरेः । किन्तु तदन्तःस्थितत्वेनापीत्याहेत्यवतारयन्ति । जगत्यां प्रकृतौ यज्जगज्जङ्गमं नित्यमनित्यं च तत्सर्वं स्थावरं च । आत्मावास्यमात्मन आततगुणस्य हरेः आवासयोग्यम् । हे मनः । त्वं तेनात्मना त्यक्तेन दत्तेन दत्तं भुञ्जीथा भुङ्क्ष्व । केचित्पालय शरीरमिति व्याख्यातवन्तः । भुञ्जीथा इत्यस्य पालनार्थतायामात्मनेपदविरोधः । भुजोऽनवन इति निषेधादि-त्यभिप्रायकेशावास्यटीकया सम्पाद्योऽविरोधः । इदं धनं चिदपि कस्य तद्व्यतिरेकेण न कस्यापि । अतो मा गृधो माभिकाङ्क्षीः । यद्वा । कस्य सुखात्मकस्य हरेर्धनं सौभाग्यं मा गृधः । साम्यं वा नैव चिन्तयेदित्यादेः । कस्यचिद्ब्रह्मादेर्वा धनं मा गृध इति वा । तत्कामानुकूलकामो भवेति तात्पर्यम् । कामेन मे काम आगादित्यादेः । स्वार्थं कस्यचित्कस्यापि धनं मा गृधस्तेन त्यक्तेन दत्तेन दत्तं भुञ्जीथा इति विवृण्वन्ति । इदं सर्वं कस्य सुखरूपस्य मागृधो लक्ष्म्याकाङ्क्षावतः । चिदेव धनम् । अतस्तद्दत्तं भुञ्जीथा इत्यपि वर्णयन्ति ।। १० ।।

छलारी — उपदिष्टमपि तत्त्वं वैराग्यवत एव हृदयेऽवतिष्ठते । नान्यस्येति तत्त्वं विवक्षुः प्रथमं तावद्वैराग्यं विधत्ते ॥ आत्मेति । यदि तत्सर्वं विश्वम् आत्मन ईशस्यावास्यमावासयोग्यं स्वप्रवृत्यर्थमीशानुप्रविष्टमित्यर्थः । तदेवानुप्राविशदित्यादेः । अतोऽस्वतन्त्रमिति भावः । किञ्च जगत्यामीश्वराधीनप्रकृतौ । जगत्स्थावरजङ्गमात्मकं सर्वम् । आश्रितमिति शेषः । अतोऽपि सर्वमस्वतन्त्रमिति भावः । ततः किमित्यत आह ॥ मन इति । हे मनः । यत ईश्वर एव स्वतन्त्रस्तेन कारणेन तेनेशेन त्यक्तेन दत्तेन धनेन । यदृच्छया लब्धेनेति यावत् । भुंजीथा भोजनादिकं कुर्याः । यतश्चेश्वरादन्यत्सर्वमस्वतन्त्रं तेन कारणेन । तस्य दाने सामर्थ्याभावात् । कस्यचित्कस्मादपि राजादेः सकाशाद्धनं मा गृधो माकाङ्क्षीः । अनेनेशावास्यमिदं सर्वमिति श्रुतिर्गृहीता ॥ १० ॥

लिङ्गेरी — न बहीराजादिवत्सूर्यादिप्रेरकत्वं नारायणस्यापि तु तं नियामकतयाऽन्तःस्थत्वेनापीत्याह ॥ आत्मावास्यमिति । आत्मनः सर्वेशस्य हरेरावासयोग्यम् । हे मनः । जगत्यां प्रकृतौ यज्जगदवस्थितमिदं विश्वं जगदात्मावास्यं विद्धि । तेन कारणेन तेन परमात्मना त्यक्तेन त्वन्निमित्तं विसृष्टेन दत्तेन द्रव्येण भुंजीथाः शरीरपालनं कुरु । कस्यचिदन्यस्य धनं द्रव्यं कस्यचित्सुखपूर्णस्य हरेर्धनं स्वातन्त्र्यादिरूपं हरिणैक्यमिति यावत् । मा गृध्रो मा काङ्क्षीरिति स्वायम्भुवो मनुः स्वान्तःकरणं स्वाभिमुखजीवराशिं च शिक्षयति । मननान्मन उद्दिष्ट इति जीवेऽपि मनःशब्दप्रवृत्तेः ॥ १० ॥

यं न पश्यन्ति पश्यन्तं चक्षुर्यस्य न रिष्यति ।
तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥

सत्यधर्मीया — ननु यर्हि स सर्वत्र तर्हि कुतो न दृश्यत इत्यतस्तस्यैवंलक्षणकत्वादित्याह ॥ यमिति । यं पश्यन्तं योगिनोऽपि तदनुग्रहं विहाय तं न पश्यन्ति । यस्य हरेर्ज्ञानात्मकस्य वा । चक्षुर्ज्ञानं न रिष्यति प्रतिहतं न भवति । तं भूतनिलयं भूतानि निलय आवासस्थानं यस्येति भूतानां निलय इति वा । तं सुपर्णं सुष्टु परमानन्दम् । यथोक्तं विसुपर्ण इत्यृग्भाष्यटीकयोः । सुपर्णः परमानन्दात् । सु अतिशयेन परो ण आनन्दोऽस्येतीति । णो हि निर्वृतिवाचक इत्यादेर्णकारः सुखवाची । उपधावत । स्वमनोवृत्तिविवक्षया बहुवचनम् । अभ्यर्हितत्वादीनजनानुकम्पयोक्तिर्वा । अदृश्येऽनात्म्येऽनिलयने । यच्चक्षुर्न पश्यति । येन चक्षूंषि पश्यन्ति । तद्दूरे तद्वन्तिके । चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमित्यादेः । यद्वा । द्वा सुपर्णेत्यादेस्तत्त्वं हरेः । देवं क्रीडादिगुणम् । हे मनः । सुपर्णं देवं हंसं भगवन्तम् । उपधौ व्याजे । फलाद्यभिलाषरूपे निमित्ते सति । उपधिर्व्याजचक्रयोरिति

विश्वः । नेत्यनुवर्तते । न अत न गच्छ । निरौपधं म इत्यादेः । सु शोभनं पर्णं वटपत्रं शय्यात्वेन यस्य तमिति वा । सुपर्णोऽस्ति वाहनत्वेनास्य तमिति वा ।। ११ ।।

छलारी — एवं वैराग्यमुपदिश्येदानीं हरिं भजस्वेत्युपदिशति ।। यमिति । जनः पश्यन्तं सर्वं प्रत्यक्षत एव जानन्तं यं विष्णुं न पश्यति । तत्प्रसादाभावे नापरोक्षीकरोति । न चक्षुषा पश्यति कश्चिदेनमिति श्रुतेः । ननु तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि तद्विषयकं ज्ञानं नश्येदित्यत आह ।। चक्षुरिति । यस्य हरेः पश्यतो चक्षुर्ज्ञानं न रिष्यति न नश्यति । रीङ् क्षये लट् । विषयनाशेऽपि यन्न नश्यति । स्वरूपभूतत्वात् ज्ञानस्य । न हि सवितृप्रकाशः प्रकाशे नश्यति । विषयनाशस्तु वृत्तिज्ञानस्यैव । वृत्तिज्ञानं त्वीश्वरस्य नास्त्येवेति भावः । भूतानि निलयो यस्य तम् । तत्सर्वान्तर्यामिणम् । भूतानां निलयं वा । सुपर्णं शोभनपरमानन्दरूपं तं देवमुपधावत भजध्वम् । हे जनाः ।। ११ ।।

लिङ्गेरी — लक्षणं विना वस्त्वसिद्धेर्भगवतो लक्षणमाह ।। यन्नेति । हे मनांसि । यूयं कवयः स्वान्पश्यन्तं यद्यं तत्प्रसादेन विना तत्प्रसादेऽपि साकल्येन च न पश्यन्ति न जानन्ति । साक्षी चेता । न विद्म न विजानीमः । यमेवैष वृणुते तेन लभ्य इत्यादेः । यस्य चक्षुर्न रिष्यति कदाचित्क्षीणं न भवति । न हि द्रष्टुर्दृष्टेर्विपरिलोपः । तुरीयं तत्सर्वदृक् सदेत्यादेः । भूतनिलयं सर्वप्राण्यावासं सुपर्णं सुखपूर्णं शरीरलक्षणवृक्षे गरुत्मत्पक्षिरूपं देवं क्रीडादिगुणविशिष्टं नारायणमुपधावत स्मरत भजत चेति । मनुना स्वान्तःकरणं मोक्षयोग्यजीवांश्च प्रत्युच्यते । सर्वप्राणिषु च स्थितौ, भूतावासो वासुदेवो, यो वेद निहितं गुहायां, कं ब्रह्म, द्वा सुपर्णा इत्यादिश्रुतिस्मृतिभ्यः । एतेन स्वप्रसादेन विना साकल्येन च ब्रह्माद्यज्ञेयत्वसर्वदासर्वसाक्षिकत्वसर्वभूताश्रयत्वपूर्णसुखत्वादिलक्षणैः परमात्म-लक्षणवस्तुसिद्धेः स्थावरजङ्गमात्मकसमस्तजगतस्तदावास्यत्वं निष्कण्टकं स्थितमित्यसूचीति ज्ञातव्यम् । ईशावास्यमित्युपनिषन्मन्त्रभागस्यात्मावास्यमिति किञ्चिद्विवरणेन 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न सम्भवतीत्यादिप्रमाणैर्विष्णावेव मुख्यात्मशब्देनेशशब्दव्याख्याना-दीशावास्यमित्यादेः रुद्रपरत्वं प्रत्याख्यातम् ।। ११ ।।

यस्याद्यन्तौ न मध्यं च न परो नान्तरं बहिः ।
विश्वस्यामूनि यद् यस्माद् विश्वं च तद् ऋतं महत् ।। १२ ।।

सत्यधर्मीया — जनवज्जननादिमान्स चेन्न भजनीयताऽस्य स्यादित्यत आह ॥ यस्येति । आन्द्यन्तावादिरुत्पत्तिरन्तो नाशश्च तौ न न स्तो मध्यं स्थितिरपि न । सर्वमन्याधीनं नेत्यर्थः । न परः स्वतन्त्रो न परोऽपरश्च न नान्तरं न बहिश्च । यद्यतो यस्मादेवं विश्वस्यामून्याद्याद्यानि भवन्ति । तद्विश्वं तत्स्वामित्वात्तथोच्यते । व्याप्तं वा । ऋतं सत्यशब्दाभिधेयं महद्ब्रह्म । तदेवर्तं तदु सत्यमाहुः । ऋगताविति धातोस्तु पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमित्यादेर्ज्ञातव्यम् । सदा स्थितमिति वा । अतो नासम्भावितमात्मावास्येत्यादिकमिति । नेतर इत्यनुदीरयन्नीरयंश्च न पर इति परोऽरि परमात्मनोरित्यादेः शत्रुरपि नास्तीति ध्वनयति । न जगाद जगत इति जगाद च विश्वस्येति यत्तेन तद्दतं महदिति विश्वस्य विश्वासं कृत्वोपधावतेत्यन्वयं सूचितवानिति ज्ञेयम् ॥ १२ ॥

छलारी — ईश्वरस्य परिच्छेदशून्यत्वादिमहिमान्तरमाह ॥ यस्येति । यस्य हरेराद्यन्तावादिः पूर्वावधिरन्तश्चरमावधिर्न । अत एव न मध्यमं च । परः विप्रकृष्टो न दूरो न व्याप्तत्वादिति भावः । विश्वस्यामून्याद्यन्तादीनि यस्माद्भवन्ति विश्वं च यद्यदधीनसत्ताकम् । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति वचनात् । तद्ब्रह्म ऋतं सत्यं महद्गुणपूर्णम् । तदेवर्तं तत्सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतेः ॥ १२ ॥

लिङ्गेरी — तस्य परमात्मनो वैभवाल्लक्षणान्तराण्याह ॥ यस्येत्यादिना । यस्य परवस्तुनः आद्यन्तावुत्पत्तिविनाशावस्थे न स्तः । मध्यं चोत्पत्त्यनन्तरं विनाशात्पूर्वं स्थित्यवस्थाऽपि नास्ति । यस्य सकाशात्पर उत्तमो नास्ति । आन्तरं बहिश्च नास्ति । सर्वव्याप्तत्वात् । यद्वस्तु विश्वस्य समस्तस्य जगतो मूलमुत्पादकम् । यस्माद्वस्तुनो विश्वमवतिष्ठते संह्रीयते च । तन्महत्परम-महत्परिमाणं ऋतं पूर्वावगतवत्सदास्थितेर्ऋतशब्दवाच्यं परं ब्रह्म । अनादिनिधनं विष्णुम् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्मेति । तदेवर्तमित्यादेः ॥ १२ ॥

स विश्वकालः पुरुहूत ईशः सत्यं परंज्योतिरजः पुराणः ।
धत्तेऽस्य जन्माद्यजयाऽऽत्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥

सत्यधर्मीया — अव्यभिचारिसद्गुणो रमारमण एव मदुपास्य इदानीमिति शंसति ॥ स इति । विश्वकायो व्याप्तशरीरः पुरुहूतो विश्वं काले लयकाले यस्य सः । अनेन न पुरुहूतः शचीश इति

सूचयति । पुरूणि हूतानि नामानि । यो देवानां नामधा । सर्वनामा सर्वकर्मेति श्रुतेः । यस्य स तथा। स ईशः सोऽसपत्नः । सत्यं ज्ञानं परं ज्योतिरूपम् । अजमनिद्रम् । पुरुषः पुराण इत्यादिश्रुतिप्रतीकग्रहणमीश इत्यादिना करोति । ईशनशील इतीशः । याः शमनेनेति वा । अस्य स्त्री ई रमा । सत्यं साधुगुणम् । परंज्योतिरिति पदैक्यपक्षे परमिति मान्तमव्ययम् । तद्भेदपक्षेऽपि परमित्यपरव्यावर्तकमिति ज्ञेयम् । अजो न जायते कर्मवशत इत्यजः । पुराण आदिपुरुषः । पुरं देहमणतीति पुराण इति वा । तद्व्यापारमाह ॥ धत्त इति । अजया प्रकृत्या शक्त्या मुख्यकारणरूपिण्या । अस्य जगतो विध्यादेर्जन्मादि तदष्टकं धत्ते विधत्ते । अयं तत्सृष्टो ब्रह्मादिरधिकारी । यस्य विद्यया ज्ञानेन तामजां बन्धकाविद्याहेतुमुदस्य निरस्य निरीहो हरीतरविषया-भिलाषविकल आस्ते । तं सुपर्णमुपधावत । विद्यायाऽमृतमश्नुत इत्यादेर्भिन्नविषयतया योजनमर्थ-विशेषदमिति मन्तव्यम् । आत्मशक्त्या । शक्यत्वाच्छक्तयो भार्या इत्यादेः । स्वभार्याभूतयाऽजया प्रकृत्याऽस्य जन्मादि धत्ते । यश्च तां स्वभार्यां तदभिमन्यमानामचित्प्रकृतिं च । विद्यया स्वज्ञानेनोदस्य कार्याभिमुखीं विधाय निरीहः सर्जनादिक्रियावर्जितो लयलवे आस्ते तमिति वा । निरस्येति निरस्य विन्यस्य चोदस्येति उदस्योदकस्य । मध्य इत्यध्याहारः । निरीह आस्ते । क्षीरसमुद्रमध्ये तं सुपर्णं वटपत्रशायिनमुपधावतेति भावमाविश्चक्र इति ज्ञेयम् । अथवा उत् अस्येति च्छेदः । अस्य यस्य नाम उत् तमुपधावतेत्यन्वयः । अस्योदिति नामेति श्रुतेः ॥ १३ ॥

छलारी — ब्रह्मणो जन्मादिकर्तृत्वरूपमहिमानमाह ॥ स इति । स सृष्टावात्मनः शक्त्या शक्तिविषययाऽजया प्रकृत्यास्य जगतो जन्मादि धत्ते करोति । स एव प्रलये तां प्रकृतिं विद्यया स्वस्योदस्य निर्व्यापारीकृत्य निरीहः सृष्ट्यादिव्यापारशून्य आस्ते । कीदृशः । प्रलये विश्वं काये यस्य सो विश्वकायः । उदरान्तर्गतप्रपञ्च इत्यर्थः । सृष्टौ विश्वमेव कायः शरीरं यस्य स तथा प्रतिमास्थानीयः प्रपञ्च इत्यर्थः । स्वसृष्टजगति भगवतः प्रविष्टत्वादिति भावः । पुरुहूतः पुरूणि बहूनि हूतानि नामानि यस्य स तथा । सर्वनामा सर्वकर्मेति श्रुतेः । सर्वनामवाच्यत्वे हेतुः ॥ ईश इति। तच्छब्दप्रवृत्तिनिवृत्तिसामर्थ्योपेत इत्यर्थः । अत एव सत्यं साधुगुणपूर्णः परंज्योतिर्मुक्त-प्राप्यपरंज्योतिशब्दवाच्यः । परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पध्यत इति श्रुतेः । अज उत्पत्तिशून्यः पुराणः पुरातनः । अजो नित्यः शाश्वतोऽयं पुराण इति श्रुतेः ॥ १३ ॥

लिङ्गेरी — यद्विश्वस्य मूलमित्युक्तं जगज्जन्मादिकर्तृत्वं विवृण्वन्नाह ॥ स विश्वकाय इति । विश्वकायो नियम्यतासाम्येन । जगल्लक्षणशरीरवान् पुरुहूता(तः) बहुनामा बव्हाव्हानवांश्चेशोऽघटि-

तद्घटनैश्वर्यवान् । सत्यं परंज्योतिरित्यादिशब्दवाच्योऽजः उत्पत्तिरहितः पुराणः पुरातनः स आत्मा, आत्मशक्त्या स्वशक्तिविषयया लक्ष्म्या प्रेरितयाऽजया जडप्रकृत्याऽस्य चतुर्मुखादिजीवराशेः सत्त्वगुणादिजडस्य च जन्मादि उत्पत्त्याद्यष्टकं धत्ते करोति । तां जडप्रकृतिं विद्यया सार्वज्ञादिस्व-शक्त्योदस्य निराकृत्य तदबद्धो भूत्वा निरीहः सृष्ट्यादि व्यापाररहितः सन्नास्ते । यः पृथिव्यां तिष्ठन्सर्वनामा सर्वकर्मा । उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृत्तिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडिति स्कांदादेः ॥ १३ ॥

अथाग्र ऋषयः कर्माणीहन्ते कर्महन्तवे ।
ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ १४ ॥

सत्यधर्मीया — प्रवृत्तमपि कर्म मर्मज्ञानुष्ठितं निवृत्तौपयिकं सत्ज्ञानसाधनं भवतीतीत-राञ्छिक्षयतो भगवतश्चरितमनुसरन्तः प्रेक्षावन्त एवमाचरन्तीतीरयति ॥ अथेति । अथ भगवदवगमसम्पादनप्रारम्भदशायाम् । ऋषयो ज्ञानिनः सामान्यतोऽग्रे प्राक् कर्माणि ज्योतिरादीनीहन्ते कुर्वंति । किमर्थमित्यत आह ॥ कर्महन्तव इति । ज्ञानोत्पत्तिप्रतिबन्धकदुष्कर्माणि हन्तुम् । तुमर्थे तवेन्प्रत्ययः । ईहन्ते कर्महेतवे इति पठित्वाऽकर्म मोक्षस्तद्धेतव इति व्याख्या तु कर्मणा कर्मनिर्हारः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्ट इति मानाननुगुणेति वाऽनीहां प्रपद्यत इत्युत्तरग्रन्थाननुसारिणी चेति ज्ञेयम् । हन्तवै इत्यपि पठन्ति । तत्र तवैन्प्रत्यय इति ज्ञेयम् । मध्यमव्यावृत्तये प्राय इति । अनेन कुर्वन्नेवेह कर्माणि न कर्म लिप्यते नर इति मानमनुकरोति । पुरुष ईहमानः फलमभिलषन्ननुष्ठाता क्रमादनीहां फलानिच्छाम् । निवृत्तिमार्गमिति यावत् । प्रपद्यते प्राप्नोति । न हि निवृत्तिसम्पत्तिरेव फलमित्यतस्तया निवृत्तं सेवमानस्तु ब्रह्माभ्येतीत्याद्युक्ते-र्हरिप्राप्तिर्भवतीति हिना सूचयति ॥ १४ ॥

छलारी — एवं परमात्मस्वरूपं निरूप्येदानीं तत्प्राप्तिसाधनज्ञानादिकर्माणि कुर्यादित्याशयेनाह ॥ अथेति । यतो ज्ञानप्रतिबन्धके दुष्कर्मणि सति सर्वं दुःसाधनं स्यादथ तस्माल्लोकसंग्रहार्थं ऋषयोऽग्रे प्रथमं कर्महन्तवे कर्मणां दुष्कर्मणां हन्तवे परिहाराय योगादिकर्माणीहन्ते कुर्वन्ति । यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैरिति श्रुतेः । एवं ज्ञात्वा ज्ञानार्थी पुरुष ईहमानः कर्म कुर्वाणोऽनीहां मुक्तिसाधनीभूतज्ञानपदवीं प्रपद्यते । कश्चित्फलार्थ्यन्यथाऽपि भवतीति प्राय इत्युक्तम् । अनेन कुर्वन्नेवेह कर्माणीति श्रुतिर्गृहीता ॥ १४ ॥

लिङ्गेरी — इत्थं लक्षणैः परब्रह्मवस्तुनि सिद्धे तत्प्रसादेन तत्प्राप्त्यादिरूपमोक्षसिध्यै दुष्कर्मनिर्हरणद्वाराऽन्तःकरणशुद्धिवैराग्यभक्त्युपासनाऽपरोक्षभगवत्प्रसादहेतुभूतस्ववर्णाश्रमोचितकर्म-करणे पूर्वाचारमाह ॥ अथाग्र इत्यादिना । अग्रे पूर्वकाले ऋषयस्त्रिकालज्ञानिनो मुनयोऽथ स्वविहितकर्मकरणेनोक्तरीत्या मोक्षलक्षणफलसद्भावात्कर्महन्तवे दुष्कर्मविनाशादिफलाय कर्माणि स्वविहितानीहन्ते कुर्वन्ति । अहरहः सन्ध्यामुपासीतेति विहितसन्ध्यादिना सूर्यश्च मामन्युश्च मन्युपतयश्च पापेभ्यो रक्षन्तामिति श्रुत्यादिना दुष्कर्मनाशावगतेः । एवं कर्माणीहमानः कुर्वाणः पुरुषोऽधिकारी प्रायः सर्वात्मनाऽनीहां विधिनिषेधबद्धतया कर्तव्यकर्मशून्यां मुक्तिम् । न तु सर्वात्मना चलनादिकर्मशून्यत्वादनीहात्वं मुक्तेः । मुक्तावपि जक्षन्क्रीडन्नित्यादिश्रुत्योक्तकर्मप्रतीतेः । प्रपद्यते प्राप्नोति । अनेन कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समा इति द्वितीयमन्त्रोपनिषद्भागो विवृतः । ''आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्माणि रतिविशेषेण समावृत्य । कुटुम्बी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् । सर्वभूतान्यत्र तीर्थेभ्यः स खल्वेवं विदेवं वर्तयन् यावदायुषम्'' इत्यादिश्रुतिर्हिशब्दसूचिता ॥ १४ ॥

ईहते भगवानीशो न हि तत्र विषज्जते ।
आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु तम् ॥ १५ ॥

सत्यधर्मीया — मुनय एवं कुर्वन्तीति नाद्भुतम् । जनार्दनोऽपि जनमनुकरोतीति मनुराह ॥ ईहत इति । आत्मलाभेन पूर्णार्थो भगवानीश इति संगाभावे हेतूनाह । ये मुन्यादयस्तमनुवर्तंते तेऽपि नावसीदन्ति । स नावसीदेदिति किं गदनीयमित्यर्थः । आत्मा स्वरूपभूतो लाभ आनन्दादेर्येषां तेषामिनाः विध्यादयस्तेभ्योऽपि पूर्णोऽर्थो यस्य सः । आत्मलाभेनेति तृतीयान्तम् वा ॥ १५ ॥

छलारी — नन्वीहमानः कर्मभिरवकुण्ठितः केशकार इव बद्ध्यते इत्यत आह ॥ ईहत इति । हि यस्माद्भगवान् रामकृष्णादिरूपो लोकसंग्रहार्थमीहते वेदोक्तं कर्म करोति तत्र न विषज्जते । अतस्तैर्येऽनुवर्तमानास्ते कर्म कुर्वाणा अप्यात्मलाभेन भगवल्लाभेन पूर्णार्थाः सन्तो नावसीदन्ति न बध्यन्ते ॥ १५ ॥

लिङ्गेरी — ननु परमात्मनोऽपि स्वफलाय कर्मप्रवृत्तिदर्शनात्कथं तत्प्रसादेन मोक्षाद्युक्तिः । तस्यान्यापेक्षायां स्वातन्त्र्येण मुक्तिप्रदानाद्ययोगादित्याशङ्कां परिहरति ॥ ईहत इत्यादिना । भगवान्समग्रैश्वर्यादिमानीशः परमात्माऽपि कर्माणीहते । तथाऽपि तत्र कर्मफले न विषज्जते आसक्तो

न भवति । यत आत्मलाभेन स्वरूपानन्दाद्यनुभवलाभेन पूर्णार्थः अवाप्तसर्वप्रयोजनः । ननु परमात्मनो दुष्कर्मबद्धत्वात् अत एव तादृशपुत्रत्वापादककर्मणोऽनिवृत्त्या पुत्रलक्षणफलप्राप्त्यै यादवकृष्णस्य कैलासगमनं, रुद्रस्तुत्यादिकर्मणि प्रवृत्तिदर्शनात्कथं तस्यान्येभ्यो मुक्तिदातृत्वं युज्यत इत्यस्यापि कुचोद्यस्येदेमेवोत्तरम् । भगवानीशः कर्माणीहते । कैलासगमनादि कर्म कुरुते यद्यपि तथाऽपि तव तत्कर्मविषये न विषज्जते स्वपुत्रापादकदुष्कर्मनिवर्तकं भवत्वेतदिति सङ्कटं नानुभवति । स्वबन्धकदुष्कर्माभावात् । न मां कर्माणि लिम्पन्तीत्यादिस्मृतेः । कुमारश्चित्पितरं वन्दमानं प्रति नानात्म रुद्रोपयन्तं भूरेर्दातारं सत्पतिं गृणिषे स्तुतस्त्वं भेषजा रास्यस्मा इत्यादि प्रत्यक्षश्रुतेश्च भगवतः कृष्णस्य दुष्कर्माबद्धत्वफलापेक्षाशून्यत्वेऽपि मोक्षयोग्यजनशिक्षणाय कर्मणि प्रवृत्तेः प्रमितत्वादिति । एतच्छ्रुतिस्मृत्यर्थो विस्तरादस्मृत्कृततत्त्ववादिकण्ठाभरणादौ द्रष्टव्यः । अत्र कैमुत्यमाह । येऽधिकारिणस्तमनुवर्तन्ते तेऽपि नावसीदन्ति । तेषामवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादि प्रमाणेनात्यन्तमवर्जनीयतया भोक्तव्य-प्रारब्धकर्मणोऽपि उपमर्दं चेत्यादि ब्रह्मसूत्रादिभिः कालाद्युपमर्दप्रमापनात् । किम्वीश्वरः स्वफलाय नावसीदतीति वक्तव्यमिति । हे रुद्र । अनेन कृष्णेन भेषजा मृषैव स्तुतः सन् अस्मै कृष्णाय पुत्रादिरूपफलं भेषजा रासि ददासीति सङ्कोचेनैतच्छ्रुत्यर्थोऽत्र ज्ञातव्यः ॥ १५ ॥

तमीहमानं निरहङ्कृतं बुधैर्निराशिषं पूर्णमनन्यचोदितम् ।
तच्छिक्षयन्तं निजवर्त्ममूढान् प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥ १६ ॥

सत्यधर्मीया — परोक्षतः प्रेक्षावन्तः कुर्वन्त एवं नावसीदन्तीत्युक्तौ तव किमित्यतस्त-त्त्वेनोपास्तौ ममापि निरीहता भविष्यतीति तथा स्तौति ॥ तमिति । ईहमानं तथाऽपि निरहङ्कृतं निर्गतोऽहङ्कृतादहङ्कारात् । अभिमानत इति यावत् । निराशिषमभिलाषशून्यमनन्यचोदितमनितर-प्रेरितम् । तन्निजवर्त्मनीह मार्गे मूढान् जनान्प्रति । निजवर्त्ममूढानिति समस्तं वा । तन्निजवर्त्म शिक्षयन्तं स्वयं बुधैः स्वेतरैरपि तच्छिक्षयन्तम् । अखिलधर्मभावनं सकलधर्मोत्पादकं प्रभुं प्रपद्ये । बुधैरीहमानं यन्निजवर्त्म तन्मूढांस्तदविदुषस्तच्छिक्षयन्तमिति वा । बुधमित्यपि पठंति ॥ १६ ॥

छलारी — एवं हरिं स्तुत्वा स्वाभीष्टमाशास्ते ॥ तमिति । अहं तं पूर्वोक्तमहिमोपेतं यज्ञनामकं हरिं प्रपद्ये शरणं प्राप्नुयामित्यन्वयः । कथंभूतम् । ईहमानं कर्माचरन्तम् । तर्हि जीवसाम्यं स्यादित्यतो जीववैलक्षण्यमाह । निरहंकृतं निराशिषम् अनन्यचोदितमिति विशेषणत्रयेण । निरहंकारे हेतुः ॥ बुधं

ज्ञानिनमिति । निराशिषं फलापेक्षारहितम् । तत्र हेतुः ॥ पूर्णमवाप्तसमस्तकाममिति । आप्तकामस्य का स्पृहेति श्रुतेः । अनन्यचोदितम् अन्येन नियुक्तो न भवतीत्यनन्यचोदितस्तम् । अनियम्यमित्यर्थः । तत्र हेतुः ॥ प्रभुः स्वतन्त्रमिति । एतादृशस्यापि कर्मानुष्ठानहेतुर्निजवर्त्ममूढान्मुक्तिमार्गानभिज्ञान्नृन्स्वभक्तान्स्वावरेण शिक्षयन्तमिति । तदपि किमर्थं तत्राह ॥ अखिलेति । अखिलान्धर्मान्भावयतीति प्रवर्तयतीतित्यखिलधर्मभावनम् ॥ १६ ॥

लिङ्गेरी — एवं परमात्मकर्मवैफल्ये परमात्मनो मौढ्यमाशङ्क्य परमात्मनः स्वप्रयोजनाभावेऽपि परप्रयोजनसिध्यर्थं सम्यग्ज्ञानयोग्यानां शिक्षणाय कर्मकरणप्रवृत्तेर्न वैफल्यमिति सूचयंस्तस्यान्यनियम्यत्वाभावमाह ॥ तमीहमानमिति । अहं बुधैर्ज्ञानयोग्यनिमित्तैर्निरहङ्कृतं अस्वतन्त्रकर्तर्यहं कर्तेति गर्वाभावेन कर्माणीहमानम् । स्वस्य स्वतन्त्रकर्तृत्वात् । निराशिषं फलाकाङ्क्षारहितं पूर्णमवाप्तसर्वकामम् । अनन्यचोदितमन्याप्रेरितं प्रभुं सर्वस्वामिनम् । अखिलधर्मभावनं निःशेषधर्मप्रवर्तकम् । निजवर्त्ममूढान्स्वकीयमोक्षमार्गाज्ञानिनो नृन्मनुष्यान् शिक्षयन्तमहङ्कारफलापेक्षाभावेन कर्म कर्तव्यमिति दर्शयन्तं परमात्मानं प्रपद्ये शरणं गतोऽस्मि । यदि ह्ययं न वर्तेयमित्यादेः ॥ १६ ॥

श्रीशुक उवाच–

इति मन्त्रोपनिषदं व्याहरन्तं समाहितम् ।
दृष्ट्वाऽसुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा ॥ १७ ॥

सत्यधर्मीया — मन्त्रोपनिषदं मन्त्ररहस्यम् । यथोक्तं मोक्षधर्मे । वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दम इत्यादि । मन्त्रवर्णोपेतामुपनिषदं वा । व्याहरन्तमुच्चारयन्तम् । दृष्ट्वाऽसुरा यातुधानाश्च जग्धुमत्तुमभ्यद्रवन् । कुत इत्यत आह ॥ क्षुधेति । क्रुधेति पाठे हरिचरिताश्रवणोत्सुकत्वात्कोपस्तेषामुचित इति ज्ञेयम् । सोऽपि जगतीशासितेति रणं कुर्यादिवेत्यत आह ॥ समाहितमिति । यद्वा तन्मध्ये कोऽपि कोपी न चेत् एनं न मारयतेतीरयेदित्यतो नेत्यप्याह ॥ समाहितमिति ॥ समे सर्वेऽप्याहिताः यस्य तम् । हरिचरणार्पितमानसं जग्धुमत्तुम् । अकि त्वल्यस्वाददो जग्ध्यादेशच्छांदस इत्यवसेयम् ॥ १७ ॥

छलारी — समाहितं समाधिस्थमेव सन्ततमिति । पूर्वोक्तमन्त्रोपनिषदं व्याहरन्तं स्वायंभुवं दृष्ट्वा । तत्कृतं स्तोत्रं श्रुत्वैवेति यावत् । असुरा असुभिः परप्राणैरेव स्वप्राणान् रमयन्तीत्यसुराः । नरभक्षका इत्यर्थः । यातुधाना राक्षसाः क्षुधानिमित्तेन जग्धुं भक्षितुमभ्यद्रवन् अभिदुद्रुवुः ॥ १७ ॥

लिङ्गेरी — मन्त्रोपनिषदं संहितासहितोपनिषदं व्याहरन्तमुच्चरन्तं समाहितं स्वस्थान्तःकरणं स्वायम्भुवं दृष्ट्वा । असुराः सुरविरोधिनो यातुधाना राक्षसाः क्रुधा कोपेन जग्धुं भक्षितुमभ्याभिमुखेनाद्रवन् शीघ्रमागतवन्तः ॥ १७ ॥

तांस्तथावसितान् वीक्ष्य यज्ञः सर्वगतो हरिः ।
यामैः परिवृतो देवैर्हत्वाऽशासत् त्रिविष्टपम् ॥ १८ ॥

सत्यधर्मीया — तान् तथाऽवसितान् । पदमेकम् । तथा वधो विधातव्य इति प्रकारेणावसितं निश्चयो येषां ते तथा । तान्वीक्ष्य । तत्र हेतुः ॥ सर्वगत इति । स्तोत्रं च श्रुत्वेति शेषः । तान्हत्वा । हरवरादमृत्यूनपि । हरिर्यज्ञो यामैस्तन्नामकैर्देवैः परिवृतस्त्रिविष्टपं स्वर्गमशासत् । स्वयमिंद्रः सन् शशास स्वर्गमिति भावः । न यामसाहिती यातुधानवध इति ज्ञेयम् । मन्वन्तरस्वरूपं तु द्वादशे स्कन्धे षष्ठेऽध्याये, मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः । ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यत इति षड्विधं वक्ष्यति सूतः । तथाऽपि क्वचिद्धर्यवतार एव यदेंद्रस्तदा पञ्चविधं तदिति मन्तव्यम् । तदुक्तं चतुर्थे प्रथमेऽध्याये । स्वायम्भुवेऽन्तरे । मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः । प्रियव्रतोत्तानपादावित्यादि । पञ्चमे सतात्पर्ये च । यस्य हीन्द्रः स्पर्धमानो भगवान्वर्षे न ववर्ष । तदुक्तम् । दुष्टानां मोहनार्थाय यज्ञ इन्द्रपदे स्थितः । पस्पर्ध ऋषभेणेव स्वरूपेण हरिः स्वयमिति । तथा च स्वायम्भुवमन्वन्तरे । स्वायम्भुवो मनुस्तत्पुत्रौ प्रियव्रतोत्तानपादौ ऋषयश्च मरीचिमुख्याः सत्यो यज्ञश्च हर्यवतारः । पुत्रिकापुत्रन्यायेन मनुगृहीतः । स एव हरिहयश्च । यामादयो देवा इति पाञ्चविध्यमवसेयम् । द्वादशोक्तिस्त्वेतदतिरिक्तविषयेति न विरोधः ।

अत्र प्रासंगिकी कथा । त्रिविष्टपं तृतीयं विष्टपं स्थानं त्रिविष्टपम् । त्रिशब्दस्यापूरणप्रत्य-यान्तस्यापि तदर्थकता त्रिदशपदव्याख्यावसरे तत्त्वसुबोधिन्यां त्रिभाग इत्युदाहृत्योक्ता । तथाऽमरसुधायां चोक्तानुसन्धेया । विशन्ति सुकृतिनोऽस्मिन्निति विष्टपं विटपविष्टपेत्यादिना विशेः कम्पन्प्रत्ययस्तस्य च तुट्त्रश्चेति षत्वं ष्टुत्वं च । यद्यपि क्लीबे त्रिविष्टपमित्यमरस्तथाऽपि विष्टपोऽप्यस्त्री नभो विष्टपो गौरित्याद्यमरमाला रत्नमालोक्तेः पुल्लिङ्गताऽपि तस्य ज्ञेयेति प्रासङ्गिक्युक्तिरिति ज्ञेयम् । आग्नीध्रश्चाग्निबाहुश्च ऋभूः सवन एव च । ज्योतिष्मान्द्युतिमान्हव्यो मेधा मेधातिथिर्वसुः । स्वयम्भुवस्यास्य मनोर्दशैते वंशवर्धनाः । प्रतिसर्गममी कृत्वा जग्मुस्ते परमं पदम् । एतत्स्वायम्भुवं प्रोक्तमित्यादि मात्स्योक्ता अनुक्ताः सुता अत्रेति । तथोत्तरत्र स्वारोचिषस्य तनयाश्चत्वारो नभो

नभस्य: प्रसृतिर्भानव इत्यादिपुत्रर्षिनामव्यत्यस्योक्तिश्च कथमिति चेत् । प्रसिद्धमात्रकथनं भागवते । नान्यनिषेधे तात्पर्यमिति न च तृतीयांशविष्णुपुराणविष्णुरहस्यादिविरोधोऽपीति ज्ञेयम् । कल्पभेदेन वा समाधिरिति केचित् ॥ १८ ॥

छलारी —— सर्वगत: सर्वत्र व्याप्त: । हेतुगर्भमेतत् । यज्ञो यज्ञनामा हरिस्तथाऽत्तुमवसिता-न्निश्चितमनस्कान् राक्षसान्निरीक्ष्य हत्वा । मनुममोचयदिति शेष: । रक्षोभिरुग्रै: संप्राप्त: खादितुं मोचितस्तदा । स्तोत्रं श्रुत्वैव यज्ञेन तान् हत्वाऽवध्यतां गतानित्युक्ते: । तत: स्वयमेवेन्द्रो भूत्वा यामैर्यामाख्यैर्देवै: परिवृतस्त्रिविष्टपमशासदपालयत् । तत्र प्रतिमन्वन्तरं मन्वादय: षट् प्रत्येकं भवन्ति । तथा हि वक्ष्यति द्वादशस्कन्धे मन्वन्तरं मनुर्देवा: प्रियव्रतोत्तानपादौ मनुपुत्रौ मरीचिमुखा: सप्तर्षयो यज्ञो हरेरवतार: । इन्द्रश्च स एव न पुनरन्य इन्द्र इति । एवंविधमेवेदं चतुर्थस्कन्धोपक्रमे वर्णितम् ॥ १८ ॥

लिङ्गेरी —— सर्वगतो हरि: सर्वानिष्टानिवर्तको नाम्ना यज्ञ: परमात्मा तथाऽवसितान्पूर्वोक्त-निश्चयवतस्तान् राक्षसान्वीक्ष्य हत्वा, नाम्ना यामैर्देवैर्वृत: सन् । त्रिविष्टपं स्वर्गमशासच्छिक्षयामास । इन्द्रपदवीं चकारेत्यर्थ: ॥ १८ ॥

स्वारोचिषो द्वितीयस्तु मनुरग्ने: सुतोऽभवत् ।
द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजा: ॥ १९ ॥

सत्यधर्मीया —— द्वितीयादिमन्वन्तरेषु मन्वादिषट्कमाह ॥ स्वारोचिषो द्वितीय इति । तस्य स्वारोचिषस्य ॥ १९ ॥

छलारी —— द्वितीयादिषु मन्वन्तरेषु क्रमेण मन्वादिषट्कमाह ॥ स्वारोचिष इत्यादिना । तस्य स्वारोचिषस्तस्य मनो: ॥ १९ ॥

लिङ्गेरी —— तदेवं परीक्षिता स्वायम्भुवमनुवंशो विस्तराच्छ्रुत: अन्यान्वदस्वेत्युक्तेऽपि स्वायम्भुवमन्वन्तरे वक्तव्यमवशिष्टं यज्ञमूर्तिचरितं परीक्षिते निरूप्यैतत्स्कन्धादौ परीक्षित्पृष्ट: स्वायम्भुवमनुव्यतिरिक्तकथां कथयति ॥ स्वारोचिषो द्वितीय इत्यादिना । अग्ने: सुतो नाम्ना स्वारोचिषो द्वितीयो मनुरभवत् । तुशब्द: प्रकृतत्वानुसन्धानार्थ: । द्वितीय इत्यनेन सम्बध्यते । तस्य स्वारोचिषस्य च द्युमत्सुषेणरोचिष्मन्नामकप्रधाना: । आत्मजा: पुत्रा: ॥ १९ ॥

तत्रेन्द्रो रोचनस्त्वासीत् देवाश्च तुषितादयः ।
ऊर्जस्तम्भादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥

सत्यधर्मीया — तत्र स्वारोचिषान्तरे इन्द्रो नाम्ना रोचनः । तुषितादयस्तदादयो देवाः । ऊर्जस्तम्भस्तथा प्राणो दन्तोग्निर्ऋषभस्तथा । निश्चरश्चार्वरीवांश्च तत्र सप्तर्षयोऽभवन्नित्यादिविष्णुपुराणे तृतीयेंऽशे शंसिता ऋषयः सप्त ज्ञेयाः ॥ २० ॥

छलारी — तत्र स्वायंभुवादिवैवस्वतान्तेषु सप्तसु मन्वन्तरेषु विष्णुवायुयमा अश्विनौ पुरंदरश्चैते क्रमेणेन्द्रा भवन्ति । तत्र पुरन्दर एव मन्वन्तरद्वये इन्द्रो भवति ॥ तदुक्तं श्रीमन्महाभारततात्पर्यनिर्णये द्वादशेऽध्याये ॥ अतीतेन्द्रा एव ते विष्णुषष्ठाः पूर्वेन्द्रोऽसौ यज्ञनामा रमेशः । सवै कृष्णो वायुरथ द्वितीयः स भीमसेनो धर्म आसीत्तृतीयः । युधिष्ठिरोऽसावथ नासत्यदस्रौ क्रमात्तावेतौ माद्रवतीसुतौ च । पुरन्दरः षष्ठ उतात्र सप्तमः स एवैकः फल्गुनो ह्येत इन्द्रा इति । तथा चाद्ये हरिर्यज्ञनामेन्द्र उक्तः । द्वितीये इन्द्रमाह ॥ तत्रेति । तत्र स्वारोचिषमन्वन्तरे वायू रोचनस्तन्नामेन्द्र आसीत् । तुषितादयस्तन्नामकदेवविशेषाः । आदिशब्देन देवविशेषा ग्राह्याः । ऊर्जस्तंभादयस्तन्नामकाः ॥२०॥

लिङ्गेरी — तत्र स्वारोचिषेऽन्तरे । ईशः स्वयोग्यसामर्थ्यवान्नाम्ना रोचन इन्द्रोऽभूत् । देवाश्च तुषितप्रभृतयोऽभवन् । परब्रह्मवादिन ऊर्जस्तम्भनामप्रभृतयः सप्तर्षयो बभूवुः ॥ २० ॥

ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ।
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥

सत्यधर्मीया — नाम नाम्ना नामप्रसिद्धिरिति वा । तस्यां तुषितायाम् । विभुरंशावतारः ॥ २१ ॥

छलारी — तत्र हरेरवतारमाह ॥ ऋषेस्त्विति । वेदशिरसस्तन्नामकस्य । तस्यां तुषितायाम् । ततो वेदशिरसो देवो विष्णुर्नाम्ना विभुरित्युक्तः ॥ २१ ॥

लिङ्गेरी — वेदशिरोनामकस्य ऋषेस्तु तुषिताख्या भार्याऽऽसीत् । तस्यां तुषितायां देवो क्रीडादिगुणविशिष्टो विष्णुर्विभुरिति नाम्नाऽभिविश्रुतोऽतिप्रसिद्धः सन् जज्ञे प्रादुरभूत् ॥ २१ ॥

अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ।
अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचारिणः ॥ २२ ॥

सत्यधर्मीया — तच्चरितमितरविलक्षणमित्याह ।। अष्टाशीतिसहस्राणीति । कौमारब्रह्मचारिणः । तस्य विभोः सकाशादिति वा ।। २२ ।।

छलारी — अवतारप्रयोजनमाह ।। अष्टाशीतीति । ये धृतव्रता धृतनियमास्ते मुनयः कौमार-ब्रह्मचारिणो बालब्रह्मचारिणस्तस्य विभुनामकस्य हरेः सकाशाद्व्रतं मुक्तिसाधनभूतमनुशिक्षितवन्तो विभूपदेशात्तत्त्वज्ञानं संपादयामासुरिति भावः ।। २२ ।।

लिङ्गेरी — अष्टाशीतिसहस्रसङ्ख्याका धृतव्रता ये मुनयस्ते कौमारब्रह्मचारिणः कुमारावस्था-मारभ्य ब्रह्मचर्यव्रतवतस्तस्य विभुनामकहरेरिदं व्रतं कौमारब्रह्मचर्यं स्वेष्वन्वशिक्षन्स्वीकृतवन्तः । स्वयमन्वनुसृत्य स्वशिष्यानप्यशिक्षन्निति वा ।। २२ ।।

तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ।। २३ ।।

सत्यधर्मीया — प्रियव्रतस्य सुतः सृञ्जयश्चेत्येतौ यज्ञहोताऽऽद्यश्चैषां स्वानन्तरजातानाम् । ते यज्ञहोत्राद्याः । पवनः प्राथमिकः सृञ्जयो द्वितीयस्तृतीयो यज्ञहोता । एतदाद्यास्तत्सुताः उत्तमसुताः । पवनः सृञ्जयश्चेत्येकवचनान्तत्वेऽपि पदयोर्यज्ञहोत्राद्यास्तत्सुता इत्यनेनान्वयस्तु, ब्रह्मा शिवः सुरेशाद्याःशरीरक्षरणात्क्षरा इति व्याख्यायां क्षरा उच्यन्त इत्यन्वयवद्यादवान् बलभद्रं च प्रद्युम्ना-दींस्तथैव च । सचिवीकृत्य भूभारमिति विष्णुरहस्योक्तेश्चान्वयो ज्ञेयः ।। २३ ।।

लिङ्गेरी — प्रियव्रतसुतः स्वायम्भुवपुत्रप्रियव्रततनयो नाम्नोत्तमस्तृतीयो मनुरभवत् । पवनः सृञ्जयो यज्ञहोत्रप्रभृतयस्तत्सुता उत्तममनुसुता आसन् । शुकः स्वोच्यमानप्रमेये मनःस्थापनाय नृपेति परीक्षितं सम्बोधयति । एवमुत्तरत्रापि सम्बोधनकृत्यं ज्ञातव्यम् ।। २३ ।।

वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ।। २४ ।।

सत्यधर्मीया — सत्याद्या देवाः ।। २४ ।।

छलारी — तृतीयमन्वन्तरस्थमन्वादिषट्कमाह ।। तृतीय इति । प्रियव्रतस्य स्वायंभुवमनुपुत्रस्य सुतः । तत्सुता उत्तमनाममनुसुताः । अत्र यमधर्मो नाम्ना सत्यजिदिन्द्र आसीत् ।। २४ ।।

लिङ्गेरी — उत्तमाख्यतृतीयमन्वन्तरे वसिष्ठतनयाः प्रमदादयः सप्तर्षयोऽभवन् । सत्या, वेदश्रुता, भद्रा इत्येवं नामका देवा आसन् । इन्द्रस्तु सत्यजिन्नामकोऽभवत् ॥ २४ ॥

धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः ।
सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥ २५ ॥

सत्यधर्मीया — सत्यव्रतैस्तन्नामकैर्देवैः ॥ २५ ॥

छलारी — हरेरवतारमाह ॥ धर्मस्येति । सूनृताख्यायां सत्यसेन इति ख्यातः प्रसिद्धः सत्यव्रतैस्तन्नामकैः सोदरैः ॥ २५ ॥

लिङ्गेरी — धर्मस्य सूनृताख्यायां भार्यायां भगवान्पुरुषोत्तमः सत्यसेननामासन् सत्यव्रताख्यैर्देवैः सह जातः ॥ २५ ॥

सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ।
भूतद्रुहो भूतगणांस्त्ववधीत् सत्यजित्स्तुतः ॥ २६ ॥

सत्यधर्मीया — सत्यजित्स्तुतः सत्यजितेन्द्रेण स्तुतो यक्षरक्षोहननार्थम् ॥ २६ ॥

छलारी — अवतारप्रयोजनमाह ॥ स इति । सत्यसेननामको विष्णुरनृतवादिरूपं व्रतम् । दुराचारश्च येषां तान्भूतद्रुहः प्राणहिंसकान्भूतगणान्पिशाचादीन् । सत्यजित्स्तुतः सत्यजितेनेन्द्रेण स्तुतः सन् ॥ २६ ॥

लिङ्गेरी — स सत्यसेनाख्यो हरिः सत्यजिन्नामकेन्द्रेण स्तुतः सन् । अनृतव्रतदुःशीलान्नियमेनायथार्थवादिनो दुष्टस्वभावान् । असतो नीचान्, यक्षराक्षसान्, भूतद्रुहः सर्वप्राणिद्रोहकारिणो भूतगणांश्चावधीद्धतवान् ॥ २६ ॥

चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः ।
वृषख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥

सत्यधर्मीया — नाम्ना च तापसः । यथोक्तं मात्स्ये । हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगद्भिरिति । एतस्यैव विष्णुरहस्ये

जातस्तमसीत्याद्युक्तेस्तामसेति नामान्तरं च । अत एव विष्णुपुराणे बहुस्थले तामस इत्युक्तिः सम्भवतीति ज्ञेयम् । मार्काण्डेयपुराणे मन्वन्तरप्रस्तावे । अवेक्ष्य भाविनीमृद्धिं नाम चक्रुर्महात्मनः । तामसीं भजमानायां योनिं मातर्यजायत । तमसा चावृते लोके तामसोऽयं भविष्यति । ततः स तामसस्तेन पित्रा संवर्धितो वन इत्युक्तेः । सा च तन्माता मृगी हरिणीति तत्रैवोक्तेर्ज्ञेयम् । आचार्यवर्यैर्द्वितीयतात्पर्ये मात्स्यवचनमुदाहृत्यैकनिर्वचनप्रदर्शनं तु तथोपासनाभावपरम् । गुणैरपि न तूपास्यो ये पूर्णत्वविरोधिन इत्यादेः । न तु द्वितीयपुराणान्तरोक्तनामाभावपरमिति तात्पर्यकं ज्ञेयम् । तत्सुतास्तापससुताः । उत्तमस्तृतीयतापसस्तद्भ्राता चतुर्थ इत्यर्थः ॥ २७ ॥

छलारी — चतुर्थमन्वन्तरगतमन्वादिषट्कमाह ॥ चतुर्थ इति । उत्तमस्य प्रियव्रतपुत्रस्य तृतीयमनोर्भ्राता चतुर्थमनुः । स च हरिरित्याहुतः । स हरिनाम्नैव प्रियव्रतेन तपसि क्रियमाणे सति । जातत्वान्नाम्ना तापसश्चोक्तः । तत्कार्यमाह ॥ येनेति । येन तापसेन मनुना गजेन्द्रो ग्रहाज्जलजन्तुविशेषान्मोचितः । ननु पुस्तकेष्वेवं पाठादर्शनक्रमात्कथमेवं व्याख्यानमिति चेन्न । तापसस्य भगवदवतारत्वादनुक्तिः तच्च भागवते प्रसिद्धमिति दशमाध्यायगीताभाष्यटीकायां (जयतीर्थाचार्यैः) चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः । हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहादित्येवं पाठक्रमस्य श्रवणात्तदनुसारेणैवं व्याख्यातम् । तथा (यादुपत्याचार्यो) द्वितीयस्कन्ध-तात्पर्यटिप्पण्यां सप्तमाध्याये एवमेव पाठक्रमस्य श्रवणाच्च । अनेन गजेन्द्रमोचकत्वलिङ्गेन तापसस्य मनोर्हर्यवतारत्वमुक्तं भवति ॥ तदुक्तं द्वितीयस्कन्धतात्पर्ये ॥ हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगत्प्रभुरिति ॥ २७ ॥

लिङ्गेरी — उत्तमभ्राता तृतीयमनूत्तमसहोदरो नाम्ना तापसश्चतुर्थश्च मनुः प्रकृतचतुर्थमनुरभवत् । वृषः ख्यातिर्नरः केतुरित्याद्या दशतत्सुतास्तापसमनुसुताः ॥ २७ ॥

सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ।
ज्योतिर्धामादयः सप्त ऋषयस्तापसेऽन्तरे ॥ २८ ॥

सत्यधर्मीया — सत्यकहरिवीरादयो देवाः । त्रिशिखस्तन्नामेश्वर इंद्रः । ज्योतिर्धामादयश्च ऋषयः ॥ २८ ॥

छलारी — तत्सुतास्तापसमनुसुताः । अश्विनोर्मध्ये नासत्यो नाम्ना त्रिशिख इतीश्वर इन्द्रो बभूव। तापसमन्वन्तरमपि स्वायंभुवमन्वन्तरवत्पञ्चविधमेव । तापसस्यैव मनोरीश्वरावतारत्वान्न पुनरीश्वरावतार इति ज्ञेयम् ॥ २८ ॥

लिङ्गेरी — तापसेऽन्तरे सत्यका हरयो वीरा इत्येतन्नामका देवाः । त्रिशिखाख्यो देवानामीश्वरः । ज्योतिर्धर्मादयः सप्त ऋषयोऽभवन् ॥ २८ ॥

देवा वैधृतयो नाम विधृतेस्तनया नृप ।
नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥ २९ ॥

सत्यधर्मीया — देवतान्तरोत्पत्तिं तेषां नाम तत्प्रवृतिनिमित्तं चाह ॥ देवा इति । केचित्तु सत्यकादीनां मातुर्विधृतिरिति नाम तेषामेव वेदसमञ्जसीकरणमिति नामान्तरमिति वर्णयन्ति । तत्र पुनर्देवपदं निरालम्बमिति ज्ञेयम् । कालेन नष्टा वेदाः स्वेन तेजसा स्वतपःसामर्थ्येन विधृता अतोऽपि वैधृता इत्यर्थः ॥ २९ ॥

लिङ्गेरी — हे नृप । तापसान्तरे एव कालेन कालशक्त्या नष्टा अपपाठादिना यथास्वरूपमदृश्या वेदाः । स्वेन तेजसा स्वसामर्थ्येन यैर्विधृता यथास्वरूपमुद्धृताः । विधृतेस्तनया अत एव वैधृतिनामानो देवा अभवन् ॥ २९ ॥

तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः ।
हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहात् ॥ ३० ॥

सत्यधर्मीया — (अत्राधिकविचारः ॥ ॥ तत्रापि जज्ञ इत्यर्धस्तु न पठनीयः । स च कल्पित इति वदन्ति । न चार्थतः । तामसस्यान्तरे चैव सम्प्राप्ते पुनरेव ह । हरिण्यां हरिभिः सार्धं हरिरेव बभूव हेति विष्णुपुराणे तृतीयेंऽशे प्रथमेऽध्याय उक्तेस्तदवतारान्तरं भविष्यतीति कथं कल्पिततेति वाच्यम् । तत्रापि लेखकहस्तदोषसम्भवात् । तथा चालीलिखन्सम्प्रदायज्ञा गीताभाष्यप्रमेयदीपिका-व्याख्यावसरे । मनुर्नाम्ना च तापसः । हरिरित्याहुत इत्येवं वाक्यस्योदाहरणेन मध्ये तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधस इत्यर्धस्य कल्पितत्वं ज्ञायते । तथात्वे हरिनामकरूपस्यैव गजेंद्रमोचकत्वप्राप्त्या हरिस्तापसनामाऽसौ जातस्तपसि वै मनोः । गजेन्द्रं मोचयामास ससर्ज च जगद्विभुरिति मात्स्य इति द्वितीयस्कन्धतात्पर्येण त्वां तापसं मोचितहस्तिमल्लमिति सङ्क्षहरामायणेन च

विरोधापत्तेः । नन्वितरमन्वन्तर इव तापसमन्वन्तरेऽपि भगवदवतारस्य वक्तव्यत्वात्तदर्थं तत्रापीत्यर्ध आवश्यक इति चेन्न । इतरमनूनां भगवद्भिन्नत्वेनासमर्थतया तत्र प्राप्तोपद्रवपरिहाराय तत्र भगवदवतारस्यावश्यं वाच्यत्वात् । अत्र पुनर्भगवत एव मनुत्वेन तद्भिन्नस्वतन्त्रावतारस्यावक्त-व्यत्वादित्याद्यालोचनीयमिति सम्प्रदायविद इति । केचितु हरिरिति जातो भगवान् गजममूमुचत् तापसस्तु जगद्भूषख्यात्यादिकं ससर्जेति द्वितीयतात्पर्यं व्याकुर्वन्तो रूपद्वयमुपयन्तः पूर्वोक्तयुक्तिपारं गता इव ससर्ज चेति तात्पर्ये समुच्चायकचशब्दवैयर्थ्यं च नालोचितवन्त इव । हरिस्तापसरूपेणेति हरिनाम्नः पृथगवतारत्वभ्रमभ्रंशकं तात्पर्ये तापसनामाऽसाविति च न च चेतस्यानीतवन्त इति ज्ञेयम् ।

ननु चत्वारो मनवस्तथेति गीताव्याकृत्यवसरे भाष्ये गौतमखिलेषु चोक्तम् । स्वायम्भुवं रोचिषं च तथोत्तमम् । वेद यः स प्रजावानियुक्तेश्चतुर्थ उत्तमः कथितः । कथं चतुर्थस्तापस इत्युच्यत इति चेन्न। उत्तरभाष्यतट्टीकाभ्यां गतेरुक्तत्वात् । तथाहि । तापसस्य भगवदवतारत्वादनुक्तिः । तच्च भागवते प्रसिद्धम् । मानसत्वं च सर्वेषां मनूनामुक्तं भागवते । ततो मनून्ससर्जान्ते मनसा लोकभावनानिति । चतुर्थस्तापसो गीताऽभिप्रेततया कुतो न व्याख्यायत इत्यत आह ।। तापसस्येति । अनुक्तिरव्याख्यानम् । भगवति च मद्भावा मानसा जाता इति विशेषणासम्भवादिति भावः । तापसस्य भगवदवतारत्वं कुत इत्यत आह ।। तच्चेति । चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः । हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहादित्यादिनेति । मानसजातत्वं च भगवदवतारस्य तापसस्यानुपपन्नमिति चतुर्थस्य तापसस्य स्थाने पञ्चमस्योत्तमस्य ग्रहणम् । नात्र तथा बाधकं किञ्चिदिति तापसस्य चतुर्थतया ग्रह इति ध्येयम् । केचिद्विष्णुपुराणपद्यमेतत्पद्यार्धं प्रियव्रतस्यैव हरिमेधा इत्यभिधान्तरम् । हरिणीति तद्भार्याया हरय इति च देवानां पुनरिति सत्यैर्देवैः सह सत्यनामकभगवदवतारानन्तरमिति तापस एव गृह्यत इत्येकविषयतया व्याचक्षते ।) ।। ग्रहान्नक्राकारात् । आहुत आहूतः । येन स तत्र नाम्ना हरिमेधसोऽपि प्रियव्रताज्जज्ञ इत्यन्वयः । अत्र तृतीय उत्तमो नामा प्रियव्रतसुतो मनुरित्युक्त एव क्रमः । गौतमखिले तु नानुपूर्व्या क्रम इति बहवः । प्रमेयदीपिकाटिप्पणीकारा अलीलिखन्निति ततोऽनुसन्धेयो विस्तरः ।। ३० ।।

लिङ्गेरी — तत्रापि तापसान्तरे हरिमेधोनामकऋषेः सकाशात् । हरिणीनामिकायां तद्भार्यायां भगवान्विष्णुर्हरिर्नामकः सन् जज्ञे प्रादुरभूत् । प्रादुर्भावो हरेर्जनिरिति वचनात् । येन हरिणा गजेन्द्रो ग्रहात् । नेगलीति कन्नडभाषाभाषितात् जलचरविशेषान्नक्राख्यान्मोचितः मुक्त इति साम्प्रदायकाः । ग्राहो वराहो नक्रास्त्वित्यमराभिमानिनस्तु ग्राहान्नक्रोऽभिन्न इत्याहुः ।। ३० ।।

राजोवाच–

बादरायण एतत्ते श्रोतुमिच्छामहे वयम् ।
हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥ ३१ ॥

सत्यधर्मीया — सामान्यत उक्तं तद्विवक्षामूलमिति मत्वा तच्छ्रवणकौतुको राजा पृच्छतीत्याह ॥ राजेति । हे बादरायण इत्यन्वयः । हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचन्मोचयामास । तथैतत्ते सकाशाद्वयं श्रोतुमिच्छामेत्यन्वयः । इच्छामह इत्यखण्डान्वयेन व्याकुर्वद्भिः आकाङ्क्षन्नपि देवोऽसौ नेच्छते लोकवत्पर इति गीताभाष्यप्रमेयदीपिकायां व्यत्ययो बहुलमित्युक्तेर्व्यत्यय इत्युक्तरीत्याऽऽत्मनेपदोप पत्तिश्चान्द्रादिरीत्या वा कर्तव्येति क्लेशिष्टो मार्ग इति ज्ञेयम् ॥ ३१ ॥

छलारी — हे बादरायण । एतद्गजेन्द्रमोचनं ते तव सकाशाद्धरिर्नामा विष्णुर्गजपतिं गजेन्द्रं यथा येन प्रकारेणामूमुचन्मोचयामास ॥ ३१ ॥

लिङ्गेरी — हे बादरायण व्याससूनो शुक । वयं, हरिर्ग्राहगृस्तं नक्रग्रहीतं गजपतिं गजेन्द्रं यथा येन प्रकारेणामूमुचन्मोचयामास तथा तेन प्रकारेणैतद्गजेन्द्रमोक्षणं ते तव सकाशाच्छ्रोतुमिच्छामहे ॥ ३१ ॥

तत् कथासु महापुण्यं धन्यं स्वस्त्ययनं शुभम् ।
यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ॥ ३२ ॥

सत्यधर्मीया — कुतस्तवावनीश शुश्रूषाङ्कुरितेत्यत आह ॥ तदिति । यत्र यत्रोत्तमश्लोको ब्रह्मादिकीर्तनीयो भगवान्हरिर्गीयते । तत्तद्ग्रन्थप्रस्थानम् । कथासु कथासङ्घे । महापुण्यं बहुपुण्याधायकम् । महदिति पाठे श्रेष्ठं पुण्याधायकं चेत्यर्थः । धन्यं स्वस्त्ययनं शुभमिति तत्पदार्थविशेषणानि । धन्यः पुण्यवति स्मृत इति विश्वाद्धन्याः श्रोतारोऽस्य सन्तीति तत्तथा । अनेन न महापुण्यपदैकार्थ्यम् । धन्यं धनप्रापकमिति वा । स्वत्ययनं क्षेमाश्रयो मुक्तिदमिति वा । अत एव शुभमिति श्रोतुमिच्छामेत्यन्वयः ॥ ३२ ॥

छलारी — श्रवणेच्छायां हेतुमाह ॥ तत्कथास्विति । यत्र यत्र यासु यासु कथासूत्तमैर्निर्दोषैर्देवैर्ब्रह्मादिभिर्वा श्लोक्यते कीत्यर्त इत्युत्तमश्लोको भगवान्गीयते । तासु कथासु श्रुतासु धन्यत्वप्रदं स्वस्त्ययनं क्षेमप्रदं शुभमिष्टरूपं महत्पुण्यं भवति । अतः श्रोतुमिच्छामह इत्यन्वयः ॥ ३२ ॥

लिङ्गेरी — तस्यावश्यं श्रोतव्यत्वे हरिकथात्वं निमित्तमाह परीक्षिच्छुकं प्रति ।। तत्कथास्विति । उत्तमैर्ब्रह्मादिभिः श्लोकः स्तुत्या कीर्तिर्यस्य स उत्तमश्लोको ब्रह्मादिस्तुत्यो भगवान्हरिर्नारायणो यत्र यत्र प्रकरणे गीयते पठ्यते स्तूयते च तत्तत्प्रकरणं कथासु सर्वकथामध्ये महत्पूज्यं पुण्यं वक्तृश्रोतॄणां पुण्यप्रापकं स्वस्त्ययनं क्षेमकरं शुभं मङ्गलप्रदमिति ।। ३२ ।।

सूत उवाच–

परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ।
उवाच विप्राः प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ।।३३।।

इति श्रीमद्भागवते अष्टमस्कन्धे प्रथमोऽध्यायः ।

सत्यधर्मीया — परीक्ष्य परीक्षित्प्रश्न उत्तरितः किं शुकेन किं वा दन्धनीकृत इति शौनकादिमनः शङ्कां स्वयं सूत आतङ्कयतीत्याह ।। परीक्षितेति । प्रायश्चानशने मृताविति विश्वादकारान्तोऽपि प्रायःशब्दपर्यायः प्रायशब्द इति ज्ञेयम् । चोदितनोदितावेकार्थौ पाठौ । हे विप्रा इति शौनकादीन् सम्बोध्य तान्प्रति परीक्षितं बादरायणिर्मुदोवाचेति सूत उवाचेत्यन्वयः ।। ३३ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां प्रथमोऽध्यायः।

छलारी — प्रायोपविष्टेनानशनव्रतकारिणा कथासु विषये चोदितः प्रार्थितः । हे विप्रा इति शौनकादीन्संबोधयते श्रीसूतः । पार्थिवं राजानं प्रतिनन्द्य साधु पृष्टमिति बहुमानं कृत्वा ।। ३३ ।।

इति श्रीछलारी शेषाचार्य कृतायां श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ।। ८-१ ।।

लिङ्गेरी — एवं परीक्षिता पृष्टः शुकः प्रत्युत्तरं परीक्षितेऽदान्न वेति शौनकादिमानसशङ्कां परिहरति ।। परीक्षितैवमिति । हे विप्राः शौनकादयः । प्रायोपविष्टेन परिक्षिता । एवमुक्तप्रकारेण । तु विशेषाकारेण कथासु करिकथाविषये चोदितः प्रेरितः सन् । सदसि सभायां मुनीनां शृण्वतां सतां पार्थिवं परीक्षिद्राजं प्रतिनन्द्य तद्गुणोत्कीर्तनादिना तोषयित्वा गजेन्द्रमोक्षणप्रकारं मुदा सन्तोषेणोवाचेत्यर्थः । एवमुत्तरत्र ।। ३३ ।।

इति श्री लिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ।। ८-१ ।।

॥ अथ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच–

आसीद् गिरिवरो राजंस्त्रिकूट इति विश्रुतः ।
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥ १ ॥

सत्यधर्मीया — मन्ये धनेत्यादिना भक्त्या तुतोष भगवान्नु यूथपायेत्यन्तेन सप्तमे न जन्म नूनं महतो न सौभगं न चाङ्ग बुद्धिर्नाकृतिस्तोषहेतुः । तिर्यग्विसृष्टानपि नो वनौकसश्चकार सख्ये च स लक्ष्मणाग्रज इति जातिरप्रयोजिकेति पञ्चमे प्रपञ्चितमितोऽपि साऽप्रयोजिका । प्रयोजिका तु भक्तिरेव वासुदेवप्रसादन इति गजेन्द्रमोचनेतिहासमुखेन शंसति । तत्रादौ गजीभिर्गजराजक्रीडां तत्साधनं च क्रोडीकृत्य वदति ॥ त्रिकूट इति । विश्रुतः प्रसिद्धो गिरिवर आसीदिति । आसीदस्ति । क्षीरोदेन क्षीरसमुद्रेण । क्षीरवद्ध्रियमानोदकवता सरोवरेणेत्यत्रोत्तरत्र च पयोनिधिं जलाशयमिति व्याकुर्वते । योजनायुतं योजनानां चतुःक्रोश्यात्मनामयुतं दशसहस्रमुच्छ्रितस्तत्परिमाणोन्नतिमान् ॥ १ ॥

छलारी — गजेन्द्रमोक्षप्रकारं वक्तुमुपोद्धातमाह ॥ आसीदिति । आसीदस्ति । क्षीरोदेन क्षीरसमुद्रेणावृतः परिवृतः ॥ १ ॥

लिङ्गेरी — अत्र द्वितीयेऽध्याये गजेन्द्रस्तुतभगवत्प्रसादेन गजेन्द्रस्य ग्रहान्मोक्षणवत्संसार-लक्षणग्रहग्रस्तानामपि हरिचरणशरणानां भगवत्स्तुत्यादिरूपाराधनेन भगवत्प्रसादेन संसारग्रहा-न्मुक्तिर्भविष्यतीति प्रदर्शनाय गजेन्द्रमोक्षप्रकार उपोद्धातेन शुकः परीक्षितं प्रति वक्तीत्याह, सूतः शौनकादीन् वा ॥ श्रीशुक उवाचेत्यादिना । हे राजन् । क्षीरोदेन क्षीररूपोदकवता क्षीरसमुद्रेणावृतो वेष्टितः । श्रीमान् सम्पदुपेतो योजनायुतं दशसहस्रयोजनमुच्छ्रित उन्नतस्त्रिकूट इति विश्रुतः प्रसिद्धो गिरिवरः पर्वतश्रेष्ठ आसीत् । उदकस्योदः सञ्ज्ञायामिति उदकशब्दस्योदादेशः ॥ १ ॥

तावता विस्तृतः पर्यक् त्रिभिः शृङ्गैः पयोनिधिम् ।
दिशश्च रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ २ ॥

सत्यधर्मीया — तावता योजनायुतेन पर्यक् परितो विस्तृतः । रौप्यायसहिरण्मयैः रौप्यं रूप्यं रजतं तदात्मकम् । आयसमय आत्मकं हिरण्मयं सुवर्णात्मकं चेति तैस्त्रिभिः शृङ्गैः ककुभो दिशः

पयोनिधिं च रोचयन्प्रकाशयन्नास्त इत्यन्वयः । अनेन त्रीणि कूटानि शृङ्गाणि यस्य स इति नामनिरुक्तिर्दर्शितेति ज्ञेयम् । दाण्डिनायनेत्यादिनिपातनाद्धिरण्मयेति साधु ॥ २ ॥

छलारी — तावता योजनायुतेन पर्यक् परितः । त्रिकूट इति समाख्याबीजमाह ॥ त्रिभिरिति । रौप्यायसहिरण्मयै रजतलोहसुवर्णमयैस्त्रिभिः शृङ्गैः प्राधान्यैः । पयोनिधिं दिशश्च रोचयन् उद्योतयन् ॥ ॥ २ ॥

लिङ्गेरी — तावता दशसहस्रयोजनैः पर्यक् परितो विस्तृतस्त्रिकूटपर्वतो रौप्यायसहिरण्मयै रजतायःसुवर्णविकृतैस्त्रिभिः शृङ्गैः पयोनिधिं क्षीरसमुद्रं दिशश्च रोचयन्प्रकाशयन् । आस्ते विद्यते । ॥ २ ॥

अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ।
नानाद्रुमलतागुल्मैः निर्घोषैर्निर्झराम्भसाम् ॥ ३ ॥

सत्यधर्मीया — रत्नधातुविचित्रितै रत्नानि धातवो गैरिकाद्यास्तैर्विचित्रितैरन्यैः शृङ्गैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणान्वयः इव । नानाद्रुमलतागुल्मैः । नानेति सर्वविशेषणम् । नानाद्रुमैर्नानालताभिर्नानागुल्मैः । तथा निर्झराम्भसां झरनीराणाम् । प्रवाहो निर्झरो झर इत्यमरः । झृष् वयो हानौ । ऋदोरबित्यप् । निर्घोषैः शब्दैः ककुभो रोचयन्नास्त इत्यन्वयः ॥ ३ ॥

छलारी — रत्नैर्धातुभिश्च विचित्रितैर्नानाविधानां द्रुमाणां लतानां गुल्मो येषु तैरन्यैश्च शृङ्गैर्निर्झरांभसां प्रवाहोदकानां निर्घोषैश्च सर्वाः ककुभो दिशो रोचयन्नास्त इति पूर्वेणान्वयः ॥ ३ ॥

लिङ्गेरी — रत्नैर्मणिभिर्धातुभिर्गैरिकाद्यैश्च विचित्रितैराश्चर्यकरैरन्यैः शृङ्गैः सर्वाः ककुभो दिशः । दिशस्तु ककुभः काष्टा इत्यमरः । रोचयन्नास्त इति पूर्वेणान्वयः । नानाप्रकारा द्रुमा वृक्षाः लता वल्यो गुल्मास्तृणादिपुञ्जास्तैः । वल्ली तु व्रततिर्लता, अप्रकाण्डस्तम्बगुल्माविति चामरः । निर्झराम्भसां शैलात्प्रस्रवद्वारिप्रवाहोदकानां निर्घोषैर्ध्वनिभिश्च त्रिकूटः शोभत इति शेषः । वारिप्रवाहो निर्झरो झरः अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् । स्वाननिर्घोषनिर्ह्रादित्यमरः ॥ ३ ॥

सदा निर्णिज्यमानाङ्घ्रिः समन्तात् पयऊर्मिभिः ।
करोति श्यामलां भूमिं शुभैर्मरकतादिभिः ॥ ४ ॥

सत्यधर्मीया — समन्ताच्चतुरस्रं पय ऊर्मिभिः पयसां तरङ्गैः सदा निर्णिज्यमानाः प्रक्षालनेन शुद्ध्यन्तोऽङ्घ्रयः । अङ्घ्रिशब्देन पादपदं लक्ष्यते । पादाः प्रत्यन्तपर्वता इत्यभिधानात् । प्रत्यन्तपर्वता यस्य स गिरिवरः शुंभैस्त्रासादिदोषविहीनैर्मरकताश्मभिरिन्द्रनीलरूपपाषाणैः । अनेन तत्र तत्समृद्धिर्द्योत्यते । भूमिं श्यामलां श्यामां करोति । कालश्यामलमेचका इत्यमरः । श्यामेति भावप्रधानम् । श्यामत्वमस्यास्तीति सिध्मादीति लचि श्यामल इति ज्ञेयम् ॥ ४ ॥

छलारी — पय ऊर्मिभिरुदकतरङ्गैः समन्तादवनिज्यमानाः प्रक्षाल्यमाना अंघ्रयः पादा मूलप्रान्ता यस्य स तथा । सः पर्वतः शुभैरन्याश्मामिश्रितैर्मरकताश्मभिरिन्द्रनीलरत्नैर्भूमिं श्यामलां नीलकान्तिं करोति ॥ ४ ॥

लिङ्गेरी — समन्तात्परितः पयऊर्मिभिः क्षीरोदतरङ्गैः सदा सर्वकालं निर्णिज्यमानाङ्घ्रिः पुनःप्रक्षाल्यमानोपपर्वतस्त्रिकूटः । भङ्गस्तरङ्ग ऊर्मिर्वा पादाः प्रत्यन्तपर्वता इत्यमरः । शुभैः स्फोटाल्पप्रभादिदोषशून्यैर्मरकताश्मभिः पच्चेत्यपभ्रष्टसञ्ज्ञपाषाणैः स्वस्थितां भूमिं श्यामलां दूर्वावर्णोपेतां करोति । पाषाणप्रस्तरग्रावोपलाश्मान इत्यमरः ॥ ४ ॥

सिद्धचारणगन्धर्वविद्याधरमहोरगैः ।
किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकन्दरः ॥ ५ ॥

सत्यधर्मीया — जुष्टं जुष्टो वा कन्दरं कन्दरो वा दरी येन सः । कं जलं दीर्यतेऽनेनेति कन्दरम् । दरी तु कन्दरो वा स्त्रीत्यमरः ॥ ५ ॥

छलारी — पुनः कथम्भूतो गिरिः । क्रीडद्भिः सिद्धादिभिर्जुष्टकन्दरो नित्यसेविता गुहा यस्मिन्सः ॥ ५ ॥

लिङ्गेरी — क्रीडद्भिः क्रीडां कुर्वद्भिः । सिद्धैश्चारणैर्जयवादिभिर्गन्धर्वैर्गायकैर्विद्याधरैर्नर्तकैः महोरगैः पूज्यश्रेष्ठसर्पैः । किन्नरैर्गायकैर्जुष्टकन्दरः सेवितदरिः । अप्सरोभिश्च नर्तकीस्त्रीभिर्जुष्ट-कन्दरः । उरगः पन्नगो भोगी । स्त्रियां बहुष्वप्सरसः स्वर्वेश्याः । दरी तु कन्दर इति चामरः ॥ ५ ॥

यत्र सङ्गीतसन्नादैर्नदद्गुहममर्षया ।
अभि गर्जन्ति हरयः श्लाघिनः परशङ्कया ॥ ६ ॥

सत्यधर्मीया — यत्र यत्स्थलं किंनरादिसङ्गीतसन्नादैर्नदन्त्यः प्रतिध्वनिं तन्वन्त्यो गुहा यस्मिंस्तत् । अभि उद्दिश्यामर्षया न विद्यते मर्षो मर्षणं सहनं यस्याः सा तथा । परशङ्कया स्ववैरिकरिशङ्कया । शङ्कापि यदामर्षणदा तदा निश्चयस्तु तथेति किं वक्तव्यमिति भावः । श्लाघिनोऽस्माकं धुरि करिणः कियन्त इति तद्वन्त इव दृश्यन्त इत्यर्थः । हरयः सिंहा गर्जन्ति श्लाघिन इति । शिखादिर्वा छन्दस्त्वेन विश्लिष्टस्य संशब्दस्य श्लाघावदेनान्वये णिनिर्वेति ज्ञेयम् । यत्र गिराविति वा । स्थलमिति शेष इति केऽपि ॥ ६ ॥

छलारी — यत्र पर्वते किन्नरादीनां संगीतसन्नादैर्गायनध्वनिभिर्नदन्त्यः प्रतिध्वनन्तो गुहा यस्मिन् प्रदेशे तम् । अभि उद्दिश्य परशङ्कया शत्रुशङ्कयाऽमर्षयाऽसहनेन श्लाघिनो मत्समः कोऽस्तीति मन्यमाना हरयः सिंहा गर्जन्ति । यत्रेत्यस्य स चेति पूर्वेणान्वयः ॥ ६ ॥

लिङ्गेरी — यत्र त्रिकूटे श्लाघिनः स्वेषामेवातिप्रबलतया प्राशस्त्यमानिनो हरयः सिंहाः । सङ्गीतसन्नादैर्गायमानां निर्दुष्टध्वनिभिर्नदद्गुहं ध्वनिकारिगुहावस्थलमभि प्रति परिशङ्कया स्वान्य-सिंहादयो गर्जन्तीति भिययाऽऽमर्षयाऽसहिष्णुतया कोपेन च गर्जन्ति गर्जनं कुर्वन्ति । सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिरित्यमरः ॥ ६ ॥

नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः ।
चित्रद्रुमसुरोद्यानकलकण्ठविहङ्गमः ॥ ७ ॥

सत्यधर्मीया — द्रौणी पाषाणमयगवादिनी । गोदिनीत्यपभ्रष्टभाषया । द्रोणी काष्टाम्बुवाहिनीत्यमरसुधायाम् । द्रु गतौ । वहिश्रीति निः । कृदिकारादिति ङीष् । द्रोणी काष्टाम्बुवाहिनी द्रुणिश्चेति रूपरत्नाकराद्द्रुणिरपि । द्रुण हिंसागत्योः । इगुपधात्कः । द्रोणी काष्टाम्बुवाहिन्यां गवादिन्यामपीष्यते । पुनः पुनरम्बु वहतीति बहुलमाभीक्ष्ण्ये इति णिनिः । द्वे काष्टपाषाणकृतनौकाकारम्बुसेचिन्या-वित्युक्तेः । अत्र तु स्वत एव तदाकारेति विशेषः । ताभिरलङ्कृतो भूषितः । चित्रद्रुमं यत्सुरोद्यानं देववनं यस्मिन् स चासौ कलकण्ठाः मधुरस्वनाः विहङ्गमाः पक्षिणो यस्मिन् स च ॥ ७ ॥

छलारी — नाना येऽरण्या अरण्यसंबन्धिनः पशवस्तेषां व्रातैर्गणैः संकुलाभिर्द्रोणीभिर्निम्न-भूमिभिरलंकृतश्चित्रिता द्रुमा येषु तेषु सुरोद्यानेषु कलकण्ठा मधुरस्वना विहंगमाः पक्षिणो यस्मिन्सः ॥ ७ ॥

लिङ्गेरी — त्रिकूट इति वर्तते । नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतो नानाविधवनगतपशुसमुदायसन्दटितनिम्नभूमिभूषितः । चित्रा आश्चर्यकरा द्रुमा वृक्षा येषु सुरोद्यानेषु तानि चित्रद्रुमसुरोद्यानानि तेषु स्थिताः कलकण्ठा अव्यक्तमधुरध्वनियुक्तगला ये विहङ्गमाः पक्षिणस्तैर्वृत इत्युत्तरेण, द्रोण्यलङ्कृत इत्यत्रत्यालङ्कृत इत्यनेन, बुद्ध्या विवेकेन वाऽन्वयः । व्रातवारसङ्घातसञ्चय इत्यमरः । सङ्कुलं ह्यवकाशेन हीने सत्कुल इति नानार्थरत्नमाला । द्रोणिकाष्ठाम्बुवाहिन्यां निम्नभूमौ च सा स्त्रियामिति च । आलेख्याश्चर्ययोश्चित्रमित्यमरः । पलासिद्रुद्रुमागमा इत्यमरः । पुमानाक्रीड उद्यानमिति च । ध्वनौ तु मधुरास्फुटे कल इति च । करो गल इति च । खगे विहङ्गविहगविहङ्गमविहायस इत्यमरः ॥ ७ ॥

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ।
देवस्त्रीमज्जनामोदसौरभाक्तानिलैर्युतः ॥ ८ ॥

सत्यधर्मीया — सरितो मध्य आगच्छन्तो नद्यश्च सरांसीतराणि च तैरच्छोदैः अच्छानि निर्मलान्युदानि जलानि यासां येषां च तास्तानि । तथा चाच्छोदाश्चाच्छोदानीति नपुंसकमनपुंसकेनेत्येकशेषे क्रमात्सरित्सरोविशेषणता ज्ञेया । पुलिनैः । तोयोत्थितं तत्पुलिनमित्यमरः । तलिपुलिभ्यां चेति पुलमहत्व इति पुलेरिनन् । द्वीपं वा । यथोक्तं त्रिकाण्डशेषे । पुलिनं द्वीपमुच्यत इति । तोयोत्थितैर्द्वीपैर्वा । मणिवालुकैर्मण्यात्मकसिकताभिः । तद्वद्विद्यमानवालुकैरिति वा । मणिमय्यो वालुका येषु तानीति पुलिनविशेषणं वा । वालुका सिकतायां स्याद्वालुकं त्वेलवालुक इति विश्वान्मणिसदृशशैलवालकविशेषैः । तद्वाचकशब्दनपुंसकताऽनुशासनात् । देवस्त्रियः सुरनार्यस्तासां यन्मज्जनं स्नानं तज्जनितो य आमोदः प्रधानसौगन्ध्यं तन्निसृतं यत्सौरभं तेनाक्ताः सम्मिश्राश्च तेऽनिला वायवश्च तैर्युतः । आ सम्यङ्मोद आघ्रातवतां येन तच्च तत्सौरभमिति वा ॥ ८ ॥

छलारी — किञ्चाच्छोदैः सुनिर्मलजलैः सरित्सरोभिश्च मणय एव वालुकाः सिकता येषु तैः पुलिनैर्जलमध्यसरिद्द्वीपैश्च युतो, देवस्त्रीणां मज्जनेन स्नानेनात्यन्तो य आमोदो विमर्दस्तस्मादुद्भूतं यत्सौरभं परिमलस्तेनाक्तैर्युक्तैरनिलैश्च युतो गिरिरास्ते । विमर्दः स्यात्परिमल इत्यमरः ॥ ८ ॥

लिङ्गेरी — सरिद्भिर्नदीभिः सहितैः सरोभिः सरोवरैरच्छोदैर्विमलजलैः । एतत्सरोवरविशेषणम् । मणयो रत्नानि वालुकाः क्रमुकपरिमाणाः पाषाणा इव येषु तैः पुलिनैः शर्करासञ्ज्ञितसूक्ष्मपाषाणसमुदायैः । देवस्त्रीणां मज्जनेन स्नानेन प्राप्तो य आमोदः कुङ्कुमकेसरादि-

परिमलाशयद्रव्यसूक्ष्मभागः सरिदादिस्थितस्तस्य सौरभ्येन परिमलेनाक्ता लिप्ता अनिला वायवस्तैर्युतस्त्रिकूट आसीदित्यन्वयः । तोयोत्थितं तत्पुलिनमित्यमरः ॥ ८ ॥

तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ।
उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ ९ ॥

सत्यधर्मीया — ऋतुमत्सर्वदा सर्वर्तुकार्ययुतत्वात् । आक्रीडं क्रीडास्थानम् । नाम आक्रीडमिति विवक्षाभावात्सन्ध्यभावः । स च मनुष्याद्यगम्यतासूचकः ॥ ९ ॥

छलारी — तस्य गिरेः आक्रीडं क्रीडास्थानम् ॥ ९ ॥

लिङ्गेरी — तस्य त्रिकूटपर्वतस्य द्रोण्यां निम्नभूमौ भगवतः स्वयोग्यैश्वर्यादिगुणवतो महात्मनः प्रशस्तमनसो वरुणस्य देवस्य सुरयोषितां देवस्त्रीणामाक्रीडं क्रीडोचितस्थलं सर्वर्तूचितपुष्पफलादिमत्वेन ऋतुमन्नामकमुद्यानमासीत् । स्त्री योषिदबला योषेत्यमरः ॥ ९ ॥

सर्वतोऽलङ्कृतं दिव्यैर्नित्यपुष्पफलद्रुमैः ।
मन्दारैः पारिजातैश्च पाटलाशोकचम्पकैः ॥ १० ॥

सत्यधर्मीया — मन्दारैः । ज्ञेयं प्रायः प्रतिपदं विवृतावमरस्य तु । यत्रान्यदीयं तन्नाम गृह्यतेऽत्रेति च स्थितिः । अर्कपर्णैः । पारिजातैः पारिणः समुद्राज्जातैः । पाटलैः पाटलिभिः । अशोकैर्बकुलैश्चम्पकैर्हेमपुष्पकैः ॥ १० ॥

छलारी — नित्यं पुष्पफलवद्भिर्द्रुमैः सर्वतोऽलङ्कृतं वरुणस्योद्यानमिवास्ते । गिरिमुपवर्ण्य वनं वर्णयति ॥ मन्दारैरित्यादि चतुर्भिः । उद्यानं मन्दरादिभिर्विशेषैः । लिङ्गविपरिणामेनावृतमित्यन्वयः ॥ ॥ १० ॥

लिङ्गेरी — तत्सरो वर्णयति ॥ सर्वत इति । दिव्यैरलौकिकैर्निरन्तरं फुष्फफलोपेतवृक्षैः सर्वतः समन्तात् । सार्वविभक्तिकस्तसिः । अलङ्कृतं भूषितमिति । तद्वृक्षनामान्याह । मन्दारैः हालिवालेति कन्नडभाषितैः पारिजातैः प्रसिद्धैः । पाटलाशोकचम्पकैः हादरिमुल्लमुत्तसम्पिगीति कन्नडभाषितैः ॥ ॥ १० ॥

चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ।
क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ॥ ११ ॥

सत्यधर्मीया — चूतै रसालैः प्रियालै राजादनैः पनसैः कण्टकिफलैराम्रैश्चूतविशेषैः । अम गत्यादौ । अम्यते । अमितभ्यो दीर्घश्चेति रुग्दीर्घश्च । चूतः । च्युतिर् क्षरणे । अच् । च्योतति रसमिति चूतः । एतेन निर्वचनेन कश्चन विशेषोऽवसेयः । आम्रातकैः । आम्रं रलयोरभेदादाम्लं तदततीति । कृञादिवुनि युवोरनाकावित्यक आम्रातकः । कपीतनः । क्रमुकैः पूगैः । क्रामतीति क्रमेर्बाहुलकादुः संज्ञायां कन् । नारिकेलैर्लांगलिभिः । नलति नल्यते वा । णल गन्धेऽस्माद्बाहुलकादिण् । केन वायुना ईल्यते ईर्यत इति । ईर प्रेरणे घञि नारिश्चासौ केलश्च स तथा। खर्जूरैः केतकीभिः । खर्ज व्यथनेऽस्मात्खर्जपिञ्जेत्यादिना उरुप्रत्ययः । बीजपूरकैर्मातुलिङ्गकैः ॥ ११ ॥

लिङ्गेरी — चूतैः प्रसिद्धैः । प्रियालैः चारिवालेति कन्नडभाषितैः । पनसैः हलसु इति कन्नडभाषितैः । आम्रैः प्रशस्तरसोपेतेनातिस्थूलफलचूतविशेषैः । आम्रातकैः अमटीति कन्नडभाषितैः । क्रमुकैः पूगैर्नालिकेलैः । बीजपूरकैः दालिम्बेति कन्नडभाषितैः । माधवलेति केचित् । राजादनं प्रियालुः स्यादित्यमरः । पनसं कण्टकिफलमित्यमरः । आम्रचूतो रसालश्चेत्यमरः । द्वौपीतनकपीतनौ । आम्रातक इति च । तूदस्तु पूगक्रमुक इति च । फलपूरो बीजपूरो रुचको मातुलङ्गक इति च ॥ ११ ॥

मधुकैः सालतालैश्च तमालै रसनार्जुनैः ।
अरिष्टोदुम्बरप्लक्षैर्वटैः किंशुकचन्दनैः ॥ १२ ॥

सत्यधर्मीया — मधुकैर्मधूकैः । मधूनीव मधुकाः । इवार्थे कन् । सालैः । सालः पादपमात्रे स्यात्प्रकारे शङ्कुद्रुम इति विश्वात् । शङ्कुद्रुमैः । तालैस्तृणराजनामभिर्हरितालकैर्वा । तालं तु हरितालक इति विश्वः । तमालैस्तिलकैः । तमालस्तिलक इति विश्वः । असनैः सर्जकैः । अर्जुनैः इन्द्रद्रुभिः । अरिष्टैः सर्वतोभद्रैः । उदम्बरैर्जन्तुफलैः । उल्लङ्घितमम्बरं यैस्तानि । उदतिशयेनाम्बते वा । अबि शब्दे बाहुलकादरन् । पृषोदरादिः । केचित् ''उडम्बरो जन्तुफल'' इति स लेखकप्रमादमेदिनीं दृष्ट्वा डम्बर इति पेठुः । तन्न । तन्नियमस्त्वाद्यन्तवर्णाश्रयो न तु मध्यमवर्णाश्रय इति । उदम्बरस्तु देहल्यां वृक्षजातौ तु पण्डके । उदम्बरं स्मृतं ताम्रे कुष्ठभेदोऽप्युदम्बर इति विश्वेऽपि तवर्गतृतीयमध्यम एव पाठः। प्लक्षैर्जटिभिः। वटैर्न्यग्रोधैः। किंशुकैः पलाशैः। चन्दनैर्मलयजैः ॥ १२ ॥

लिङ्गेरी — मधुकैः इप्पीति कन्नडभाषितैः । मधूके तु गुडपुष्पमधुद्रुमो वानप्रस्थो मधुष्ठीलाविति च । सालैः कंसन्तीति कन्नडभाषितैः । साले तु सर्जकार्शश्च कर्णिकासस्य संवर इति च । तालैः प्रसिद्धैः । तालस्तु तृजाणरे स्यात् कांस्यवाद्यविशेषक इति नानार्थरत्नमाला । तमालैः तमाल इति कन्नडभाषितैः । कालस्कन्धस्तमालः स्यात् तापिच्छ इत्यमरः । रसनार्जुनैः तदुक्तमत्तीति कन्नड-भाषितैः । अरिष्टौदुम्बरप्लक्षैः क्रमेण अरटाल, अत्ति, बसरीति कन्नडभाषितैः । वटैः आल इति प्रसिद्धैः । किंशुकचन्दनैः मुत्तल श्रीगन्धेति प्रसिद्धैः । अरिष्टः फेनिलः । उदुम्बरो जन्तुफलो यज्ञांगो हेमदुग्धकः । प्लक्षो जटी कर्पटी स्यान्न्यग्रोधो बहुपाद्वटः । पलाशो किंशुकः पर्ण इत्यमरः ॥ १२ ॥

पिचुमन्दैः कोविदारैः सरलैः सुरदारुभिः ।
द्राक्षेक्षुरम्भाजम्बूभिर्बदर्यक्षाभयामलैः ॥ १३ ॥

सत्यधर्मीया — पिचुमन्दैर्निम्बतरुभिः । कोविदारैश्चमरकैः । कुं भूमिं विदृणाति । द्रु विदारणे कर्मण्यण् । पृषोदरादिनोकारः । सरलैः पूतिकाष्ठैः । सुरदारुभिर्मालूरैः । देवदारुतरुभिः । द्राक्षाभि-र्गोस्तनीभिः । इक्षुभिः रसालैः । रम्भाभिः कदलीभिः । जम्बूभिर्जम्बुभिः । बदरीभिः कोलीभिः । अक्षैर्भूतावासैः । अभयैरव्यथाभिः । अमलैरमलाभिरामलकीभिः । जटामला झटेत्यमरात्स्त्रीलिङ्ग-ताबोधनात् । अमलाः सन्ति येषां तान्यमलानि । बदर्यक्षाभयानि च तान्यमलानि चेति विग्रहे न चाशङ्का न चोत्तरम् ॥ १३ ॥

लिङ्गेरी — पिचुमन्दैः बेवु इति कन्नडभाषितैः । कोविदारैः कञ्चालेति कन्नडभाषितैः । सरलैः एवमेव कन्नडभाषितैः । सुरदारुभिर्देवदारुभिः । द्राक्षेक्षुरम्भाजम्बूभिः द्राक्षि, कब्बु, बाळि, नीरल, इति प्रसिद्धैः । बदर्यक्षाभयामलैः बोरि, तारि, अरळि, नेल्लीति प्रसिद्धैः । अरिष्टः सर्वतो भद्रा हिंगुनिर्यासमालकाः । पिचुमन्दश्च निम्ब इत्यमरः । कोविदारे चमरिकः कुद्दालो युगपत्रक इति च । पीतद्रुः सरलः पूति काष्टमिति च । जम्बू स्त्रीति च । कर्कन्धूर्बदरी कोली घोटेति च । अक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः । अभया त्वव्यथापथ्याक्यस्थापूतनामृतेति च ॥ १३ ॥

बिल्वैः कपित्थैर्जम्बीरैर्वृतो भल्लातकादिभिः ।
तस्मिन् सरः सुविपुलं लसत्काञ्चनपङ्कजम् ॥ १४ ॥

सत्यधर्मीया — बिल्वैः शाण्डिल्यैः । कपित्थैर्मन्मथैः । जम्बीरैर्दन्तशटैः । जम्बु अदने गम्भीरादयश्चेति साधुः । भल्लातकादिभिर्वीरवृक्षादिभिः । तस्मिन् गिरौ लसत्काञ्चनपङ्कजं लसन्ति प्रकाशमानानि काञ्चनमयानि पङ्कजानि यस्मिंस्तत् सुविपुलमतिमहत् ॥ १४ ॥

छलारी — तस्मिन्नुद्याने वने सरः पद्माकर आस्ते । तद्वर्णयति ॥ सुविपुलमित्यादिभिः सार्धैः पञ्चभिः श्लोकैः । सुविपुलमत्यन्तविशालं लसन्ति काञ्चनपङ्कजानि यस्मिंस्तत् ॥ १४ ॥

लिङ्गेरी — बिल्वैः ब्यलवन्त्येति प्रसिद्धैः । बिल्वे शाण्डिल्यशैलूषौ मालूर श्रीफलावपीत्यमरः । कपित्थैः ब्यळलु इति प्रसिद्धैः । कपित्थे स्युर्दधित्थग्राहिमन्मथा । तस्मिन्दधिफले पुष्पफलदन्त-शठावपीति च । जम्बीरैः निम्बीति प्रसिद्धैः । स्युर्जंबीरे दन्तशठजम्बजम्बीरजम्बला इति च । भल्लातकादिभिः केरु इति प्रसिद्धवृक्षप्रभृतिवृक्षैः वृतस्त्रिकूट आसीदित्यन्वयः । तस्मिंस्त्रिकूटस्थ-ऋतुमन्नामकवरुणोद्याने सुविपुलमतिविस्तृतम् । विस्तीर्णं विपुलं पृथ्वीत्युत्पलमाला । लसत्काञ्च-नपङ्कजं प्रकाशमानसुवर्णसदृशकमलोपेतं सर आसीत् ॥ १४ ॥

कुमुदोत्पलकल्हारशतपत्रश्रियोर्जितम् ।
मत्तषट्पदनिर्जुष्टं शकुन्तैः कलनिःस्वनैः ॥ १५ ॥

सत्यधर्मीया — कुमदोत्पलकल्हारशतपत्रश्रिया कुमदानि कैरवाणि कुवलयानि कल्हाराणि हल्लकानि शतपत्राणि कुशेशयानि तेषां श्रीः शोभा तया । ऊर्जितमुत्कृष्टम् । आवृत्त्या सरःसु सरोवरेषु विपुलमित्यप्यन्वेति । मत्ता रसास्वादनेन षट्पदा भ्रमरास्तैर्निर्जुष्टं सेवितम् । निर्घुष्टमिति पाठे भ्रमरभ्रमणेन वेणीवत्त्रिगुणिततरङ्गमित्यर्थः । शब्देन प्रकाशितस्वसत्तत्कमिति वाऽर्थः । अत्रागमशासनस्यानित्यतयेडभावः । घुषिर विशब्दन इति वेण्निषेध इति ज्ञेयम् । कलनिस्व-नैर्मधुरस्वनैः शकुन्तैः शकुनैः । षट्पदसमस्तस्य निर्घुष्टमित्यस्योत्कृष्यात्राप्यन्वयो ज्ञेयः ॥ १५ ॥

छलारी — कुमुदादीनां पुष्पाणां श्रिया कान्त्योर्जितम् । मत्तषट्पदैर्भ्रमरैर्निर्जुष्टं कूजितं कलं मधुरस्वनो येषां तैः शकुन्तैः पक्षिभिश्च निर्जुष्टम् ॥ १५ ॥

लिङ्गेरी — एतत्सरो वर्णयति ॥ कुमुदेत्यादिना । कुमुदोत्पलकल्हारशतपत्रश्रिया बिळेनेदलु, नेदलु , कल्हार, शतदळकमलेति प्रसिद्धपुष्पाणां कान्त्योत्कृष्टम् । मत्तषट्पदनिर्घुष्टं पुष्परसपानादिना मदवद्भ्रमरझङ्कारोपेतम् । षट्पदभ्रमरालय इत्यमरः । कलनिःस्वनैरव्यक्तमधुरध्वनियुक्तैः । शकुंतैः

पक्षिभिः । शकुन्तपक्षिशकुनेति च । ऊर्जितमिति स्वतो विविक्तेन निर्घुष्टमिति बुद्ध्या विविक्तेन वा शकुन्तैरित्यस्यान्वयः ॥ १५ ॥

हंसकारण्डवाकीर्णं चक्राह्वैः सारसैरपि ।
जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् ॥ १६ ॥

सत्यधर्मीया — हंसाः श्वेतगरुतः कारण्डवा मद्गवस्तैराकीर्णम् । चक्राह्वैः कोकैः सारसैः पुष्कराह्वैः जलकुक्कुटैर्नीरताम्रचूडैः कोयष्टयः टिट्टिभिका दात्यूहाः कालकण्ठकास्तेषां कुलं तेन कूजितम् ॥ १६ ॥

छलारी — चक्राह्वैरप्याकीर्णं सङ्कुलम् । जलकुक्कुटादीनां कुलेन कूजितम् ॥ १६ ॥

लिङ्गेरी — हंसकारंडवाकीर्णम् । हंसैः प्रसिद्धैः । कारण्डवेति कन्नडभाषितैः पक्षिभिराकीर्णं पूर्णम् । चक्राह्वैः चक्रवाकेति प्रसिद्धैः सारसेति प्रसिद्धैः पक्षिभिराकीर्णम् । जलकुक्कुटकोयष्टि दात्यूह-कलकूजितं नीरकोळि, कण्णकाणदबक, करिगोरल, विषपक्षीति प्रसिद्धपक्षीणामव्यक्तमधुरध्वनिमत् । हंसास्तु श्वेतगरुतः। कोकश्चक्रवाक इति च । कुक्कुटश्चरणायुधः। दात्यूहः कालकण्टक इत्यमरः॥१६ ॥

मत्स्यकच्छपसञ्चारचलत्पद्मरजः पयः ।
कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ॥ १७ ॥

सत्यधर्मीया — मत्स्याः झषाः कच्छपाः कूर्मास्तेषां सञ्चारेण चलन्ति पद्मानि तेषां रजोभिः परागैर्युतं पयस्तोयं यस्मिंस्तत् । कदम्बा हलिप्रियाः । सुराया अधिवासनादिति भानुः । वेतसाः शतवेधिनो नलाः पोटगलाः । नलः पोटगल इति विश्वः । नलादयस्तृणमित्यमरात्तृणविशेषो वा । नीपा नीलाशोकाः । नीपः कदम्बबन्धूकनीलाशोकद्रुमेषु चेति भानुः । वञ्जुलका बकुलास्तैः ॥ १७ ॥

छलारी — मत्स्यानां कच्छपानां कूर्माणां जलजन्तूनां सञ्चारेण चलतां पद्मानां रजसा परागेण युक्तं पयो यस्मिंस्तत् । जलजान्द्रुमानुक्त्वा स्थलजानाह ॥ कदंबेत्यादिना ॥ १७ ॥

लिङ्गेरी — मत्स्यकच्छपसंचारचलत्पद्मरजःपयः । मत्स्यानां मीनानां कच्छपानां कूर्माणां संचारेण चलतां पद्मानां कमलानां रजसा परागेण युक्तं पयो जलं यस्मिंस्तत्तथा । कदंबवेतसनलनीपवंजुलकैः कडवु, ह्यब्बि, देवनाल, कडविनविशेषः ह्यब्बिविशेषेति प्रसिद्धैर्वृक्षैर्वृतम् । तूलं च नीपपियककदंबाश्च हरिप्रिय इत्यमरः ॥ १७ ॥

कुन्दैः कुरबकाशोकैः शिरीषैः कुटजेङ्गुदैः ।
कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥ १८ ॥

सत्यधर्मीया — कुन्दानि माघ्यानि कुरबकाः शोणाम्लाना अशोका मानद्रुमाः कटुरोहिण्यो वा । अशोको वञ्जुले मानद्रुमे । अशोकः कटुरोहिण्यामिति विश्वः । अशोकोऽलिपादप इति मेदिनीतोऽलिपादपा वा । शिरीषाः कपीतनाः । कुटजैर्गिरिमल्लिकाभिरिङ्गुदैस्तापसतरुभिः कुब्जकैर्भ्रमरीभिर्वृक्षैः । स्वर्णयूथिभिः सुवर्णमयाम्बष्टाभिः । नागैर्नागकेसरैः । नागो नागकेसरपुन्नागनागदन्तकमस्तक इति विश्वः । पुन्नागैर्देववल्लभैर्जातिभिर्मालतीभिः ॥ १८ ॥

छलारी — कुन्दादिभिः पुष्पवृक्षैः च शोभितम् ॥ १८ ॥

लिङ्गेरी — वेतकुंदैः मोल्ये इति प्रसिद्धैः पुष्पैः, कुरबकाशोकैः केंपुगोर्टि, अशोकेति प्रसिद्धैः पुष्पैः । शिरीषैः शिरस इति प्रसिद्धपुष्पैः । कुटजेंगुदैः गिरिमल्लिका, यिंगलेति प्रसिद्धपुष्पैः । कुब्जकैः भद्रकरणीति प्रसिद्धैः । स्वर्णयूथिभिः सुवर्णवर्णशावन्तीति प्रसिद्धपुष्पैः । नागपुन्नागजातिभिः नागकेसर, सुरगि, जातिमालतीति च प्रसिद्धपुष्पैः । माघ्यं कुंदमित्यमरः । तत्र शोणे कुरबक इति च । शिरीषसिरसावित्युत्पलमाला । कुटजो गिरिमल्लिकेति च । इंगुदी तापसतरुरिति च। कुब्जकं भद्रकरणी चेत्युत्पलमाल । यूथिकांबष्टि इति च । नागस्तु केशरे नागे सर्पे वारणलोहयोरिति नानार्थरत्नमाला । पुन्नागः पुरुषस्तुंगः केसरो देववल्लभ इत्यमरः । सुमना मालतीजातिरिति च ॥ १८ ॥

मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ।
शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ॥ १९ ॥

सत्यधर्मीया — मल्लिकास्तृणशूल्यानि शतपत्रैर्माधव्यो वासन्त्यो जालकानि कोरकाणि मोचनफलानि वाऽऽदयो येषां ते तैः । जालकं कोरकं नपुंसि मोचनफले इति मेदिनी । तीरजैस्तीरे तीराद्वा जातैरन्यैर्द्रुमैरलं शोभितम् । तामेवालं शोभामाह । नित्यर्तुभिः । नित्यम् ऋतवः सर्वेऽपि स्वस्वकार्यकारितया येषां ते तथा तैरिति । अन्यैर्वृक्षैरिति शेषः । अलन्द्रुमा नित्यपुष्पफलद्रुमास्तैरिति वा । अलन्द्रुमः स विज्ञेयो नित्यपुष्पफलद्रुम इत्यभिधानात् ॥ १९ ॥

छलारी — अन्यैरुक्तेभ्यः नित्यं ऋतवः फलपुष्पादिसंपत्तिहेतवो वसन्तादयो येषां तैर्द्रुमैरलं शोभितम्। अलं द्रुमः स विज्ञेयो नित्यपुष्पफलो द्रुम इत्यभिधानात्। तन्नामकवृक्षविशेषैर्वा ॥ १९ ॥

लिङ्गेरी — मल्लिकाशतपत्रैः मल्लिगि शतदलकमलेति प्रसिद्धैः । माधवीजालकादिभिः वासन्तिकलता, जालकेति प्रसिद्धपुष्पप्रभृतिभिः । तीरोत्पन्नैः नित्यर्तुभिः सर्वर्तुयोग्यपुष्पफलवद्भिरन्यैश्च द्रुमैर्वृक्षैरलं शोभितं सर आसीदित्यन्वयः । तृणशाल्यं तु मल्लिका, भूपदीशीतभीरुश्चेत्यमरः । शतपत्रं कुशेशयमिति च । वासन्ती माधवी लतेति च ॥ १९ ॥

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ।
सकण्टकं कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन् वनस्पतीन् ॥ २० ॥

सत्यधर्मीया — यदर्थमियदत्यर्थवर्णनं तदाह ॥ तत्रेति । तत्रोद्याने तद्गिरिकाननाश्रयः स चासौ गिरिश्च तस्य यत्काननं तदेवाश्रयो यस्य सः । करेणुभिः । करेणवश्चेभ्यश्च करेणवश्चेभाश्च । पुमांस्त्रियेत्येकशेषेण द्वयं ग्राह्यम् । तैः । करेणुरिभ्यां स्त्रीनेभ इत्यमरः । सह वारणयूथपः । यद्यपीभस्तम्बेरमः पद्मी यूथनाथस्तु यूथप इत्यमराद्यूथपदेनैव द्विपबोधस्तथाऽपि वारणशब्दनिवारितार्थं नाथमात्रमुपस्थापयति विशिष्टवाचकनीत्येति ज्ञेयम् । यद्वा । वाः उदकं तदर्थमणतीति वारणः स चासौ यूथपश्चेति । यूथं वृन्दमात्रेऽपीत्युक्तेर्वारणानां यूथं पातीति स वा चरन् यूथनाथः । यद्यपि तेनैवैतद्वचने स्थिता इति नेत्यप्याह ॥ तद्गिरीति । सा च सा गीश्च तद्गीस्तस्याम् । स्थितैरिति शेषः । काननाश्रयः सकण्टकं कण्टकैर्द्रुमांशैः । कण्टको द्रुमांशे चेति विश्वः । सहितम् । कीचकाः । कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः । कीचकाश्च वेणवश्च मस्कराश्च वेत्रा वेतसविशेषाश्च सन्त्यस्मिन् स चासौ विशालो गुल्मस्तम्बश्च तम् । तथा वनस्पतीन् । सफलान् पुष्पान् वृक्षान् । पारस्करप्रभृतीनीति सुटू । तैरपुष्पाद्वनस्पतिरित्यमरः । वृक्षमात्रं वा । वनस्पतिर्ना द्रुमात्रे विना पुष्पं फलद्रुम इति भानुः । प्ररुजन् भञ्जयन् । यद्वा । एकदा गिरिकाननाश्रयो गिरिकाया अननं सकलचेष्टा तस्याश्रयस्तु । वसुरुपरिचरस्तद्वदेकदा चरन् । उपर्येव चरन्नित्यर्थः । उक्तं चादिपर्वणि । चकार पत्नीं कन्यां तु दयितां गिरिकां नृपः । वसोः पत्नीति गिरिकेति ॥ २० ॥

छलारी — तद्गिरिकाननाश्रयस्तत्पर्वतवनाश्रयो वारणयूथपो गजेन्द्रः करेणुभिर्गजादिभिश्चरन् एकदा तत्रोद्याने । प्रविवेशेति शेषः । किं कुर्वन् । सकण्टकं कीचकवेणुवेत्रवन्तं विशालं गुल्मं लतादिसन्दर्भं वनस्पतीन्वृक्षांश्च प्ररुजन्प्रभंजयन् ॥ २० ॥

लिङ्गेरी — तत्रोक्तगुणवति सरोवरे तत्समीपे । वटे गाव इतिवत्सामीप्याधिकरणे सप्तमी । तत्रोक्तोद्यान इति वा । एकदैकस्मिन्काले । सर्वैकान्यकिं यत्तत्काले देति एकशब्दात्सप्तमी समर्थात्काले दा प्रत्ययः । तस्य त्रिकूटस्य गिरेः काननानि वनान्येवाश्रयो यस्य स तद्गिरिकाननाश्रयः । वीरयूथपो गजसमुदायरक्षको गजेन्द्रः करेणुभिर्गजस्त्रीभिः संचरन् । कण्टकवृक्षसहितं पोळ्ळबिदरु, घट्टिबिदरु, ब्यत्तेति प्रसिद्धैर्युक्तं, विस्तृतस्तृणलतादिपुंजं पुष्पफलशून्यवृक्षांश्च प्ररुजन् प्रभंजयन् आसीत् । करेणुकरिभ्यां स्त्रीत्यमरः । तैरपुष्पाद्वनस्पतिरित्यमरः । वेणवः कीचकास्ते स्युः ये स्वनन्त्यनिलोद्धता इति च ॥ २० ॥

यद्गन्धमात्राद्धरयो गजेन्द्रा व्याघ्रादयो व्यालमृगाः सखड्गाः ।
महोरगाश्चपि भयाद् द्रवन्ति सगौरकृष्णाः शलभाश्चमर्यः ॥ २१ ॥

सत्यधर्मीया — सिंहसंहतिरपि हिंसिका । द्रवति यद्बलमीदृक्किं गतिका इतर इतीरयति ॥ यद्गन्धेति । दूरत आघ्रातायद्गन्धमात्रात्केवलगन्धात् । हरयः सिंहाः करिमारकाणां सिंहानां तद्भीतिः कथमिति चेत्सत्यं, स्वाभाविकगजमारकत्वं सिंहानां स्वभावः । अयं तु शापप्रयुक्तगजदेहवानिति राजत्वात् तद्भीषकत्वमुपपन्नम् । किं दुश्शकं हर्यर्चनानुभावस्य । गजेन्द्रा अन्ये । व्याघ्राः शार्दूला आदयो येषां ते तथा । व्यालाश्चतुष्पादाः । व्यालो ज्ञेयश्चतुष्पादा इत्यनेकार्थध्वनिमञ्जरी । मृगाः कुरंगाः । मृगः पशौ कुरंगे चेति विश्वः । खड्गा गण्डकाः । गण्डके खड्गखड्गिनावित्यमरः । तैः सहिताः । महोरगाः । उरगः पन्नगो भोगीत्यमरः । सगौरकृष्णा गौराः पीता अरुणाः श्वेतवर्णाः कृष्णाश्च तैः सहिताः सगौरकृष्णाः । शरभा गन्धर्वाः । गौरो न तृषितः पिबेत्यृग्भाष्यटीकायां मृगविशेष इत्युक्तेर्मृगविशेषाश्च कृष्णास्तैः सहिताः शरभा इति वा । गौरः पीतेऽरुणे श्वेत इति विश्वः । चमर्यो गोकर्णाः ॥ २१ ॥

छलारी — पर्वताश्रयेण सञ्चरन्तं गजेन्द्रं वर्णयति ॥ यद्गंधेति । यद्गन्धमात्राद्यस्य गजेन्द्रस्य मदगन्धादेव जाताद्भयाद्धरयः सिंहास्तदादयो वनजन्तवो द्रवन्ति पलायन्ते । व्यालमृगाः सर्पाकारमृगाः सखड्गास्तन्नामका मृगाः सगौरकृष्णाः सहिताः कृष्णसाराः ॥ २१ ॥

लिङ्गेरी — यस्य गजेन्द्रस्य गन्धमात्रात्केवलं वासनाद्धरयः सिंहा गजेन्द्रा वारणश्रेष्ठाः, व्याघ्रादयः शार्दूलप्रभृतयो, व्यालाः क्षुद्रसर्पा, मृगाः कृष्णसाराः खड्गमृगसहिता महोरगाश्च महासर्पा अपि गौरकृष्णमृगसहिता अष्टपादमृगाश्चमर्यः स्त्रीचामरमृगा अपि भयाद्द्रवन्ति ।

तद्वासनाघ्राणजनितभीतेः स्वस्वस्थलं विहायाशु गच्छन्ति । गन्धो गन्धकआमोदमोदलेशस्मयेषु चेति नानार्थरत्नमाला । सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिरित्यमरः । शार्दूलद्वीपिनौ व्याघ्र इति च । व्यालो दुष्टगजे सर्प इति नानार्थरत्नमाला । मृगे कुरंग इति च । शरभो राम इति च ॥ २१ ॥

वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च ।
अन्ये च क्षुद्रा हरिणाः शशादयश्चरन्त्यभीता यदनुग्रहेण ॥ २२ ॥

सत्यधर्मीया — वृका ईहामृगाः । वराहाः सूकराः । महिषाः लुलायाः । ऋक्षा भल्लूकाः । शल्याः श्वाविधाः । गोपुच्छा गोलांगूलाः । सालावृकाः सृगालाः सारमेया वा । सालवृकः सृगाले स्यात्सारमेय इति मेदिनी । मर्कटो वानरः । अन्ये उक्तेभ्यः । क्षुद्राः कृपणाः । हरिणा अजिनयोनयः। शशः सृमर आदिर्येषां ते तथा । एतेषां क्षुद्रता सर्वथेति ध्वनयितुं चकारस्य गौरवानापादकता वृत्तविच्छित्तिभीत्या क्षाक्षरस्येति ज्ञेयम् । यदनुग्रहेण यस्य गजराजस्यानुग्रहो दयाविशेषस्तेनाभीताः स्वस्वघातकभीतिरहिताश्चरन्ति ॥ २२ ॥

छलारी — वृकादयः क्षुद्रा अल्पबलाः । यस्य गजेन्द्रस्यानुग्रहेणाभीताः सन्तोऽन्यत्र दृष्टिपथं त्यक्त्वा चरन्ति । सिंहादिभयाभावात् ॥ २२ ॥

लिङ्गेरी — वृकाः तोळा इति प्रसिद्धाः । वराहाः सूकराः । महिषाः प्रसिद्धाः । ऋक्षाः करडीति प्रसिद्धाः । शल्याः येत्तु इति प्रसिद्धाः । गवां पुच्छं वालमिव पुच्छं येषां ते गोपुच्छाः । गवया वानरविशेषाश्च । सालावृकाः नरीति प्रसिद्धाः अरण्यशुनश्च । मर्कटा वानराः । हरिणाः यरळी प्रसिद्धाः । शशादयः मोल इति प्रसिद्धमृगमुख्याः । अन्ये क्षुद्रा मृगाश्च । यदनुग्रहेण यस्य गजेन्द्रस्य प्रसादेनाभीता भयरहिताश्चरंति । कोका ईहामृगो वृकः । वराहः सूकरो घृष्टिः । अथ भल्लूको ऋक्षाश्च भल्लभल्लूकाः सालावृकाः । कपिक्रोष्टुश्वानः । मर्कटो वानरः । चमरुश्चेति हरिणा अमी अजिनयोनयः ॥ २२ ॥

स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ।
गिरिं गरिम्णा परितः प्रकम्पयन् निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ २३ ॥

सत्यधर्मीया — स घर्मतप्तो घर्मेणातपेन । घर्मः स्यादातपे ग्रीष्म इति विश्वः । तप्तः सन्तप्तः करिभिर्गजैः करेणुभिरिभीभिर्मदच्युन्मदं दानोदकं च्योतयतीति स तथा । मदो हर्षेभदानयोरिति

विश्वः । कलभैः करिपोतैः । मदच्युतश्च ते कलभाश्चेत्येकं पदं वा । गरिम्णा । पृथ्वादीमनजन्तो गरिमशब्दः । भारेण । मदाशनैर्दानोदकं मद एवाशनं येषां तैरलिकुलैर्भ्रमरनिकुरम्बैर्निषेव्यमाणः सेव्यमानः । अभितः परितः इति परितो योगाद्गिरिमिति द्वितीया । प्रकंपयन् । गामिति शेषः ॥२३॥

छलारी — उद्यानं प्रविष्टस्य गजेन्द्रस्य सरोवराभ्याशगमने निमित्तमाह ॥ स घर्मतप्त इति । घर्मेणातपेन तप्तः । मदच्युतैर्मदस्राविकरिभिर्गजैः करेणवैश्च वृतः । कलभैः कपोतैः । गरिम्णा गुरुत्वेन निमित्तेन गिरिं प्रकंपयन्मदमश्नन्तीति तथा तैरलिकुलैर्भ्रमरगणैः ॥ २३ ॥

लिङ्गेरी — स गजेन्द्रः करिभिर्गजैः करेणुभिर्गजस्त्रीभिर्मदच्युत्कलभैर्मदस्राविबाल-गजैर्वृतोऽनुद्रुतश्च पृष्ठतोऽनुधावितश्च । करिभिः करेणुभिर्वृतः कलभैरनुद्रुत इति वा । गरिम्णा सपरिवारस्य स्वस्य गुरुत्वेन दुर्भरभारेण गिरिं त्रिकूटं परितः समंतात्प्रकंपयन् अत्यन्तं चलयन् । मदाशनैर्मदभोजनैरलिकुलैर्भ्रमरसमूहैर्निषेव्यमाणः सेव्यमानः सन् । घर्मेण निदाघेन तप्तः सन् । तत्सरोवराभ्याशं द्रुतमगमदित्युत्तरेणान्वयः । घर्मो निदाघः । कुंजरो वारणः करी । कलभः करिपोतः स्यादिति चामरः ॥ २३ ॥

सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन्नदूरान्मदविह्वलेक्षणः ।
वृतःस्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद् द्रुतम् ॥ २४ ॥

सत्यधर्मीया — सरोऽनिलं तत्सबन्धिगन्धवहम् । पङ्कजानां कमलानां रेणवः परागास्तै रूषितमलङ्कृतम् । सम्बद्धमिति यावत् । रूषभूष अलङ्कार इति स्मृतिः । अदूरात्समीपत एव । विदूरादिति पाठे परिमलवैपुल्यमिलितताऽनिलस्य ज्ञेया । स्वयूथेन स्वगजसमाजेन । यूथं तिर्यक् समूहे स्याद्वृन्दमात्रेऽपि भाषितमिति विश्वः । तृषया पिपासयाऽर्दितं पीडितम् । अनेनातीतश्लोके स घर्मतप्त इत्यत्रावृत्त्या घर्मतप्तैः सहितः सघर्मतप्त इति वृत्त्यन्तरस्य मूलमालापीति ज्ञेयम् । तत्सरोवराभ्याशं स चासौ सरोवरश्च तस्य समीपं द्रुतमगमदगच्छत् । आगमदागच्छदिति वा ॥२४॥

छलारी — पङ्कजपरागेण वासितं सरोनिलं सरःसम्बन्धिवायुं दूराज्जिघ्रन्मदेन विह्वलिते-क्षणश्चश्चलनेत्रः ॥ २४ ॥

लिङ्गेरी — अथ घर्मजसंतापप्राप्त्यनन्तरं स गजेन्द्रो मदविह्वलेक्षणः सन् । पङ्कजरेणुरूषितं कमलपरागलिप्तं सरोनिलं पूर्वोक्तसरोवरसंबन्धिवायुं विदूरादतिदूरादागतं जिघ्रन् घ्राणेनानुभवन्सन् ।

तृषार्दितेन जलपानेच्छापीडितेन स्वयूथेन स्वकीयगजसमुदायेन वृतः सन् । तत्सरोवराभ्याशं पूर्वोक्तसरोवरसमीपं द्रुतं शीघ्रमाद्रवदगमत् । विह्वलं चंचलं चलमिति मालतीमाला । ईक्षणं चक्षुरक्षिणीत्यमरः ।। २४ ।।

विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविन्दोत्पलरेणुवासितम् ।
पपौ निकामं निजपुष्करोद्धृतं स्वात्मानमद्भिः स्नपयन् गतक्लमः ।। २५ ।।

सत्यधर्मीया — विगाह्यावगाह्यामृताम्बु तद्भिद्यमानं नीरम् । हेमपदमरविन्दोत्पलोभयान्वयि । निजं च तत्पुष्करं कराग्रम् । पुष्करं पयः करिकराग्रयोरिति विश्वः । तेनोद्धृतं पयः स्वात्मानं स्वदेहमद्भिः स्नपयन् । ग्रास्नावनुवमां चेति वैकल्पिके मित्त्वे णौ मितामिति ह्रस्वतायां स्नपयन् पक्षे स्नापयन्नित्यपि भवतीति ज्ञेयम् । गतक्लमो गततापक्लान्तिरभूत् । स सन्पुनर्निकामं पपाविति वा ।।२५।।

छलारी — तस्मिन्सरसि विगाह्य प्रविश्य हेमारविन्दानामुत्पलानां च परागेण परिमलीकृतम् ।। निजपुष्करेण तुण्डाग्रेणोद्धृताद्भिरात्मानं स्नपयन् सिंचन् गतक्लमोऽपगतश्रमः सन् अमृतांबु स्वादूदकं निकामं पपौ ।। २५ ।।

लिङ्गेरी — स गजेन्द्रस्तस्मिन्सरोवरे विगाह्य प्रविश्य निमज्य च । हेमारविंदोत्पलरेणुवासितं सुवर्णवर्णकमलनेदलीति प्रसिद्धपुष्पपरागपरिमलितम् । निर्मलं मृत्कालुष्यादिदोषरहितं निजपुष्करोद्धृतं स्वकीय सोंडिलु इति प्रसिद्धहस्तेनोर्ध्वं गृहीतम् । अमृतांब्वमृतसदृशजलं निकामं यथेच्छं पपौ पीतवान् । अद्भिर्जलैरात्मानं स्वदेहं स्नपयन् प्रक्षालयन् । पपावित्यनेन स्वस्याप्यतितृषितत्वं सूचितम् । ताभ्यां स्नानपानाभ्यां गतक्लमो गत बळलिकीतिप्रसिद्धश्रमवानभूदिति शेषः ।। २५ ।।

स्वपुष्करेणोद्धृतशीकाराम्बुभिर्निपाययत् संस्नपयन् यथा गृही ।
घूर्णन् करेणून् कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ।। २६ ।।

सत्यधर्मीया — शीकरोऽम्बुकणाः स्मृता इत्यमराद्वातप्रसृतकणीभूताम्बुभिः । शीकृ सेचने । तालव्यादिः । शम्बशूकरपांशव इति तालव्यप्रकरण ऊष्मविवेकात् । दन्त्यादिरयमिति धनपालादयः । ऋच्छेरन्निति बाहुलको रन् । तालव्याश्चैव दन्त्याश्चेत्यादेर्द्वन्द्वमप्रतिद्वन्द्वम् । शीकरोऽम्बुकणाः इति पाठस्तु व्याख्यानानवलोकनमूलो लेखकहस्तदोषपतित इति ज्ञेयम् । सृता वायुनेतस्ततः प्रसृता इति

भानुः । गृही गृहस्थाश्रमी । अजमायया हरीच्छया दुर्मदः कृपणः क्षुद्रजातिजत्वात्क्षुद्रः । कदर्ये कृपणः क्षुद्रेत्यमरः । घूर्णन् भ्रमन् । रमन्निति पाठे रमयन्नित्यर्थः । कृच्छ्रमेष्यत्कष्टं नाचष्ट नापश्यत् । न ज्ञातवानिति यावत् । कृन्तति । कृती छेदने । कृतेश्चक्रचेतिरकछश्च । कृच्छ्रमम्भसि । कष्टं सन्तापने स्यात्कष्टं कृच्छ्रमाभीलमिति च हैमामरौ ॥ २६ ॥

लिङ्गेरी — अजमायया हरेर्बन्धकशक्त्या । कृपणः संसारे लुब्धो गृही गृहस्थो यथा तथा स्वस्त्रियादिषु, घृणी कृपावान् करेणूः कलभांश्च स्वपुष्करेण स्वहस्तेनोद्धृताभिः सीकराभिः शीतलाभिरम्बुभिरद्भिर्निपाययन् पानं कारयन् संस्नपयन् सम्यक् स्नानं कारयन् दुर्मदो दुष्टमदोपेतः स गजेन्द्रोऽजमायया हरेर्मोहकेच्छया मोहितः कृच्छ्रं भविष्यत्कष्टं नाचष्ट न ज्ञातवान् । पुष्करं गजशुंडे स्यात्कमले क्षेत्रभेदके इति नानार्थरत्नमाला । तुषारः सीकरः शीतो हिम इत्यमरः । करुणा घृणेति च । स्यात्कष्टं कृच्छ्रमिति च । अजा विष्णुहरच्छागाः इत्यमरः । माया भगवदिच्छायां शक्तो बंधनमोहयोः । प्रकृतौ कपटे लक्ष्म्यामिति नानार्थमुक्तमाला ॥ २६ ॥

तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ।
यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥ २७ ॥

सत्यधर्मीया — हे नृप । दैवचोदितो यन्माययाऽयं दुर्मदस्तेन दैवेन श्रीहरिणा चोदितः प्रेरितो ग्राहोऽवहारः । ग्राहो ग्रहेवराहे चेति विश्वाज्जलजन्तुविशेषः । स च नक्रः । केचित्तु ग्राहोवराहो नक्रस्तु कुम्भीलोऽथ महीलतेत्यमरान्नक्र इति विवृतवन्तो न त्वन्थातादीति तत्सङ्केतस्मृतिमन्त इति स्मरणीयम् । कुम्भीलनक्रपदयोरेव पर्यायतायास्तेन स्फोरणात् । स च न दुर्बल इत्याह ॥ बलीयानिति । पदाघातो जातः स्वस्य । तत् ग्रहो ''यस्यापराधः खलु तस्य दण्ड'' इति नीत्या युक्त इति तथा चकारेत्याह । रुषा स्वहतिजकोपेन । चरणे पादेऽगृहीद्गृहीतवानिति । चरण इत्युदीर्यानुदीर्याङ्घ्रिपादादिपदं तदुपरि सञ्चरण इति झडिति प्रकटीचकारेवोत्तरत्र चरणं पवित्रं विततं पुराणमित्यादिमानप्रमितचक्रत एव तन्मोक्षणं भवतीति चरण आगामिनि सतीति भावं ध्वनयामास व्यास इति ध्येयम् । यदृच्छया हरीच्छया । यदृच्छा तु तदिच्छा स्यादित्यर्थः । एवं व्यसनं दुःखं गतः प्राप्तो गजः । यथाबलं स्वबलानुकूल्येन । तन्न नास्तीत्याह ॥ अतिबल इति । विचक्रमे विः पादविहरण इति विपूर्वकस्य क्रमेरात्मनेपदताऽभिधानात्पादविहरणं कृतवानित्यर्थः । यथा तमबलं

निर्बलं कलयामीति तथाऽतिबलो विचक्रम इति वा । रुषा च कोपेनैव रणे युद्धविषयेऽगृहीदिति चासूचयदिति ज्ञेयम् । यद्वक्ष्यति नियुद्ध्यतोरिति ॥ २७ ॥

छलारी — हे नृप । दैवचोदितोऽदृष्टप्रेरकेश्वरेण प्रेरितः कश्चिद्ग्राहो नक्रनामकजलजन्तुश्चरणे पादे रुषा पादाक्रान्तनिमित्तकोपेन यदृच्छयाऽदृष्टप्रेरकेश्वरेच्छया । एवं व्यसनं कष्टम् । यथाशक्ति विचक्रमे पराक्रमं कृतवान् ॥ २७ ॥

लिङ्गेरी — हे नृप परीक्षिद्राज । तत्र सरोवरे बलीयानतिबलः कश्चिद्ग्राहो नक्रो दैवचोदितः स्वादृष्टप्रेरकेश्वरप्रेरितः सन् । रुषा कोपेन तं गजेन्द्रं चरणे पादेऽग्रहीज्जग्राह । अतिबलोऽत्यन्त-शक्तिमान् स गजो गजेन्द्रो यदृच्छया हरीच्छयैवमुक्तरीत्या व्यसनं क्लेशं गतः सन् । यथाबलं स्वशक्त्यनुसारेण विचक्रमे सरोवराद्बहिः पादविक्षेपमुपक्रमे पराक्रमं चकारेति च । दैवं दिष्टं भागधेयमित्यमरः । कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधः स्त्रियामिति च । यदृच्छा तु तदिच्छा स्यादिति वचनम् । व्यसनं क्लेशमित्युत्पलमाला ॥ २७ ॥

तथाऽऽतुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ।
विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहाः पारयितुं न चाशकन् ॥ २८ ॥

सत्यधर्मीया — तथा तरसा बलेन वेगेन च । तरो बले च वेगे चेति विश्वान्नपुंसकलिङ्गस्तरः शब्दः । बलीयसा ग्राहेण विकृष्यमाणमातुरमार्तं करेणव इभ्योऽपरे गजाश्च पार्ष्णिग्रहाः । गृह्णंतीति ग्रहाः पार्ष्णेर्ग्रहो याभिर्यैश्चेति ते तथा । पार्ष्णिग्राहस्तु पृष्ठग इत्यमरः । सहकारिण इति यावत् । पारयितुं तारयितुं चेत्येकार्थौ पाठौ । न च नैवाशकन् शेकुरिति दीनधियो विचुक्रुशूरुरुदुरित्यन्वयः ॥ २८ ॥

छलारी — तथाऽऽतुरमेवं व्यसनं प्राप्तं बलीयसा ग्राहेण तरसा वेगेन जलान्ते विकृष्यमाणं यूथपतिं गजेन्द्रं दीनधियः खिन्नचित्ताः करेणवः केवलं विचुक्रुशुः । पार्ष्णिग्रहाः पृष्ठतः सहायकारिणोऽपरे गजाश्च तारयितुं नाशकन् । शक्लृ शक्तौ इत्यस्माद्धातोः कर्तरि । अशाकत् अशाकतां अशाकन् लङ् ॥ २८ ॥

लिङ्गेरी — करेणवोऽपरे गजाश्च तथा पूर्वोक्तप्रकारेणातुरं भ्रान्तं बलीयसाऽतिबलेन ग्राहेण तरसाऽतिवेगेन विकृष्यमाणं यूथपतिं स्वसमुदायपालकं गजेन्द्रं दृष्ट्वा । तस्य पार्ष्णिग्रहाः

पृष्ठभागग्राहिणोऽपि गजेन्द्रं तारयितुं तीरं गमयितुं नाशकन् शक्ता न बभूवुः । अत एव दीनधियो दैन्योपेतबुद्धयः सन्तो विचुक्रुशुश्चार्तध्वनिं चक्रुरपि । आतुरश्चकितो भ्रान्तः इत्युत्पलमाला ॥ २८ ॥

नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः ।
समाः सहस्रं व्यगमन् महीपते सप्राणयोश्चित्रममंसतामराः ॥ २९ ॥

सत्यधर्मीया — एवं बहिरन्तरतोऽन्तर्मिथः परस्परं विकर्षतोर्नियुद्ध्यतोर्नियुद्धं कुर्वतोः सप्राणयोरिभेन्द्रनक्रयोः । यद्यपीभेन्द्रनक्रयोरित्येतदानुकूल्येन बहिरन्तरत इति वक्तव्यमेवमुक्तिस्तु नक्रक्रियायाः साक्षादेतत्प्रतिक्रियायोग्यत्वसूचनायेति ज्ञेयम् । सहस्रं समा विंशत्याद्याः सदैकत्वे । हायनोऽस्त्री शरत्समा इत्युभयतश्चामरः । व्यगमन् गताः । सहस्रसंवत्सरपर्यन्तमनशनयोर्युद्ध्यतोः सप्राणत्वममरा अपि चित्रमद्भुतममंसत व्यजानन् । वयं पीयुषपानप्राप्तामरत्वाः अमू तु न तथाऽथाऽपि जीवन्तौ वर्तेते इति विचित्रितामननं सुमनसां युक्तमिति भावः । इदं युद्धं चित्रममंसत मेनिर इति योजयन्ति । तत्पक्षेऽमरपदमस्वरसार्थमित्युपर्येव ज्ञायत इति ज्ञेयम् । सप्राणयोः सहस्रसंवत्सरगमनं चित्रममंसतेति योजना त्वेतदध्वनी नैवेति युक्ता ॥ २९ ॥

छलारी — नियुध्यतोर्द्वन्द्वयुद्धं कुर्वतोरिभेन्द्रनक्रयोर्गजेन्द्रग्राहयोः । समा वत्सराः । युद्धं चित्रममंसत मेनिरे ॥ २९ ॥

लिङ्गेरी — हे महीपते! मिथः परस्परमन्तः सरसोऽतः सरोवराद्बहिश्च विकर्षतोः कर्षणं कुर्वतोः सप्राणयोः शरीरबलवतोरिभेन्द्रनक्रयोः । गजेन्द्रन्यगळु इति प्रसिद्धजलचरयोरेवमुक्तप्रकारेण नियुध्यतोर्द्वन्द्वयोधिनोः सतोः । सहस्रसंख्याकाः समाः संवत्सरा व्यगमन् गतवन्तः । अमराश्चित्रमाश्चर्यकरमिदं युद्धममंसत ज्ञातवन्तः । इभस्तंबेरमः पद्मीकुंजर इत्यमरः । ग्राहो वराहो नक्र इति च । संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा इति चामरः ॥ २९ ॥

ततो गजेन्द्रस्य सहोबलौजसां कालेन दीर्घेण महानभूद् व्ययः ।
विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत् सकलं जलौकसः ॥ ३० ॥

सत्यधर्मीया — सहो बलं स्थितस्थानमोजो दीप्तिः सहो बले । बलं गन्धरसे रूपे स्थाने निःस्थौल्यसैन्ययोः । ओजो बले च दीप्तौ चेति सर्वत्र विश्वः । सहः सहनशक्तिर्बलमितस्ततः सञ्चलनमोज इन्द्रियसामर्थ्यमिति वा । तेषाम् । जलेऽवसीदतः क्लिष्टस्य गजेन्द्रस्य । ततः

सार्वविभक्तिकस्तसिः । तेन ग्राहेण विकृष्यमाणस्य दीर्घेण महता कालेन महान्विपर्ययो विपर्यासः । ह्रास इति यावत् । अभूत् । जलौकसो ग्राहस्य जलमोको निवसनं यस्य स तस्य । धिष्ण्यमोको निवसनमित्यमरः । सकलं षोडशकलाकलितम् । कलेवरमिति यावत् । व्ययो विशिष्टमयः कालायसम् । कालायसायसीत्यमरः । तद्वत्कठिनमभूत् । गजेन्द्रस्य तेषां सहआदीनां व्ययो हानिरभूत् । जलौकसः सकलं सहआदिकं विपर्ययो विपरीतमव्ययमभूदित्यपि योजयन्ति । स्वागारगतस्य सम्भवदिदमेधनमिति भावः ॥ ३० ॥

छलारी — सहः सहनशक्तिर्बलं शरीरसामर्थ्यमोज इन्द्रियबलम् । तेषां व्ययो ह्रासः । जले विकृष्यमाणस्यावसीदतः क्लेशितस्य गजेन्द्रस्य जलौकसो जलवासिनो नक्रस्य सकलं बलादि विपर्ययो गजेन्द्रबलाद्यपेक्षया विपरीतमधिकम् ॥ ३० ॥

लिङ्गेरी — ततः सहस्रवर्षानन्तरं जले ग्राहेण विकृष्यमाणस्यात एवावसीदतः क्लिश्यतो गजेन्द्रस्य मनोबलोजसां अन्तःकरणशरीरशक्तिविपन्निरोधशक्तीनां महान्व्ययो ऱ्हासो दीर्घेण कालेनाभूत् । जलमुदकमोकमाश्रयो यस्य ग्रहस्य तस्य यत्सकलं समस्तं मन आदि तस्य मनोबलोजसां विपर्ययो वैपरीत्यमभिवृद्धिरभूत् ॥ ३० ॥

इत्थं गजेन्द्रः स यदाप सङ्कटं प्राणस्य देही विवशो यदृच्छया ।
अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३१ ॥

सत्यधर्मीया — स गजेन्द्रो यदा सङ्कटं कष्टं प्राणस्य प्राणानामाप । तत्र निमित्तमाह ॥ देहीति । तदभिमानवानित्यर्थः । यदृच्छयेति सङ्कटमापेत्यत्रैव दध्यौ इमां बुद्धिमथाभ्यपद्यतेत्यत्राप्यन्वेति । विवशोऽस्वाधीनेन्द्रियो भगवदधीन इति वा । आत्मविमोक्षणे स्वमोचनेऽपारयन् असमर्थो भवन् । देहीति प्रशस्तदेहवान्प्रागिति चिरं दध्यौ । अथ ध्यानानन्तरमिमामुत्तरत्र वक्ष्यमाणां बुद्धिं निश्चितमतिम् । बुद्ध्यतेऽनयेति बुद्धिस्तां स्तोत्रवाचं वा । बुद्ध्यतेऽनयेति बुद्धिः सांख्यविषया यया वाचा बुद्ध्यते सा वागिति । बुद्धिं कार्याकार्यविनिश्चयम् । ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिश्चय इत्यनभिदधानमिति गीताभाष्योक्तेः । अभ्यपद्यत प्राप्तवान् । आत्मनो ग्राहमोक्षण इत्यभिधानोऽभि-धास्यंश्च केवलमात्मविमोक्षण इति शरीरविमोचनमोक्षप्राप्त्यै दध्याविति ध्वनयामास । विमेन विरुद्धा स्वमतिविरुद्धा मा ज्ञानं मतिर्यस्य सः विमो विमतो वैरी ग्राहस्तेनोक्षणे सेचने जलान्तःपातनेन प्रसक्तेऽपसङ्कटमपगतसङ्कटं यथा भवति तथा । इमां स्वतनुमपारयन् । यन्नितीर्णो रूपम् ।

अन्तर्णीतण्यर्थं च । पारं परतटं प्रान्तं वा यन् गमयन्नुच्यते पारयन्स न भवतीत्यपारयन् । पारं परतटे प्रान्त इति विश्वः । स्वयं पारमगच्छन्वा । प्रस्तुतविवक्षयेदम् । कथितं कृषेरिव पलालकुलमितिवत् प्राप्तभगवद्ध्यानबुद्धेस्तु महामोक्ष एव महाफलमिति भावः ।। ३१ ।।

छलारी — गजेन्द्रो देही । हेतुगर्भविशेषणमेतत् । देहधारित्वात् । इत्थं प्राणस्य संकटं मरणबाधां यदाऽऽप तत्तदाऽऽत्मविमोक्षणेऽपारयन्नशक्तो यदृच्छया हरीच्छया विवशः स्मरणरहितः सन् चिरं दध्यावितः परं किं कार्यमिति चिन्तितवान् । अथेमां वक्ष्यमाणां बुद्धिमभ्यपद्यतैवं करिष्यामीति निर्णीतवान् ।। ३१ ।।

लिङ्गेरी — देही स्थूलशरीरो यदृच्छया विवशः परवशो गजेन्द्रो प्राणस्य संकटमित्थमाप । आत्मविमोक्षणे स्वस्य ग्राहान्मोक्षणविषयेऽपारयन् अन्तगमनासमर्थश्चाभूत् । तदा स गजेन्द्रश्चिरं दध्यावालोचनं कृतवान् । अथालोचनानन्तरमिमां वक्ष्यमाणप्रकारां बुद्धिमभ्यपद्यत प्राप्तवान् । स यदेत्यत्र तच्छब्दस्य एतत्तदोः सुलोपोऽकोरनञ्समासे हलीति सुलोपः ।। ३१ ।।

न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् ।
ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ।। ३२ ।।

सत्यधर्मीया — बुद्धिर्यमर्थमगोचरयत्तमाह ।। नेति । आतुरम् । मामिमे गजाः पुमांसो मोचितुं मोचयितुं न प्रभवन्ति न शक्ता भवन्ति । करिण्यः कुतः प्रभवेयुः । पुरुषाणामसामर्थ्ये योषितो न शक्ता इति किं वक्तव्यमिति भावः । विधातुर्जगतः स्रष्टुः पाशेन कर्मरूपेणान्तर्बहिर्ग्राहेण वृतोऽहं चाहमपि न शक्तोऽप्यतः परं जगद्विलक्षणं परायणं मुख्याश्रयं यामि । शरणमिति शेषः । मे ज्ञातयोऽङ्गजाः पुत्रा अपि यद्यपि । आत आततुः आतुः । अत सातत्यगमने लिट् । आतुरागतवन्तः । कुतः कौ भूमौ । ग्राहेण तद्रूपेण पाशेन सहितं मोचितुं न प्रभवन्ति कुतः भूमेः । ग्राहेण पाशेन मोचितुं न शक्ताः तथा करिण्योऽपि न । योषितामस्त्वसामर्थ्यं पुरुषा अधुना परीक्ष्या इति नेत्याह ।। आतुरावृत इति । आतुराभिरातुरैश्चावृतोऽप्यतो मे ममेयं विधा प्रकारः । दशेति यावत् । निमित्तमेवं सर्वेषामसामर्थ्य इदमित्यावेदयति ।। न विधेति । विधास्मदुपभोग्यमन्नं नास्त्यप्यतोऽपि न सामर्थ्यमिति भावः । विधा गजान्ने ऋद्धौ च प्रकारे रेचने विधाविति विश्वः । अं गजा इति वा । अप्यतोऽहं चतं सर्वयाचितम् । चते याचने चेति स्मरणात् । यामिपरं याम उपरमो विनाशो येषां ते यामिनः । द्वौ यामप्रहरौ समाविति व्याख्यावसरे यमयत्युपरमयतीति याम इत्युक्तेर्याम उ[illegible]प्रापका

येषामस्ति ते यामिनो नाशकसहितास्तेभ्य: परं विलक्षणं नाशनाशकातीतं परायणं अं नारायणं नमामीत्यन्वय: । न माममी ज्ञातय इत्यनिबन्धनो न मामिम इत्यमुमप्यन्वयं सूचयामासेत्यवसेयम् । यामश्चोपरमे पुंसि प्रहरे संयमेऽपि चेति वोपालितधनपालौ ॥ ३२ ॥

छलारी — तामेव बुद्धिमाह ॥ न मामिति । ज्ञातय: स्वजातीया इमे गजा आतुरं ग्राहपीडितं मां ग्राहान्मोचयितुं न प्रभवन्ति न शक्ता: । करिण्य: कुतो न शक्ता इति किम्वहं न प्रभवामीति । यतो ग्रहरूपेण विधातुरदृष्टप्रेरकेश्वरस्याधीनेन पाशेन कर्मलक्षणपाशेनावृतो बद्ध: । अपिशब्दो हेत्वर्थे । तस्मात्परेषां ब्रह्मादीनामयनमाश्रयभूतं परमेश्वरं शरणं यामि ॥ ३२ ॥

लिङ्गेरी — मे मम ज्ञातय एककुलोत्पन्ना गजा: करिण्यश्च ग्राहगृहीतमत एवातुरं मां ग्राहान्मोचितुं कुत: प्रभवन्ति समर्था न भवन्ति । अहं तु यस्य विधातु: सर्वकर्तुर्हरेर्ग्राहिण ग्राहरूपेण पाशेनावृत: । तं परायणं मुक्तानामप्याश्रयं परं सर्वोत्तमं शरणं यामि । मुक्तानां परमा गतिरिति वचनम् । सगोत्रबांधवज्ञातीत्यमर: ॥ ३२ ॥

य: कश्चनेशो बलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशम् ।
भीतं प्रपन्नं परिपाति यद्भयान्मृत्यु: प्रधावत्यरणं तमीमहि ॥ ३३ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे द्वितीयोऽध्याय: ।

सत्यधर्मीया — वयं तमरणं शरणमीमहि व्रजेम । स क इत्यत आह ॥ य इति । य: कश्चनेत्यनेन साकल्येन वर्णनालब्धवर्णतामभिप्रैति । ईश: सर्वेशनशीलो रमारमणस्तत्सुखदो वा । बलिन: स्वदयोदयमतिहायेतरापरिहार्यबलवत: । प्रचण्डवेगात्केनाप्यप्रतिबद्धवेगादभिधावत आगच्छतोऽन्तकोरगादन्तको यमस्तदाख्योरगात्सर्पात् । चक्षु:श्रवस्त्वेनान्तकोत्प्रेक्षणं प्रस्तुतग्राहस्य प्राणस्य सङ्कटमित्युक्ते: स्वान्तर्वातघातप्रयत्नवत्त्वाद्धाताशनत्वात्तस्य युक्तियुक्तमिव कालीयं कालिन्दितो बहिष्कृत्य निर्भीतान्कृत: वतस्तवनेऽमुमपि स तनुयाद्बहिराकृष्टमिति वा सम्भवादिति मन्तव्यम् । भृशं भीतं तथा भृशं प्रपन्नमितरानुपेक्ष्य शरणागतं जनं परिपाति । यद्भयान्मृत्यु: प्रधावति । आगच्छति गच्छति च । ''भीषाऽस्माद्वात: पवते भीषोदेति सूर्य: । भीषाऽस्माद-ग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम'' इति श्रुते: । मृत्युमृत्युं नमाम्यहमित्यादे: । पूर्वपद्यव्याकृत्य-न्तरपक्षेऽमिति स्फुटमुक्त्यानुकूल्याय । य: कश्च य: कोऽपि यस्मान्नेशो न समर्थ: । य:

कश्चतुराननः । चन अपि । अथैतयोः पथोर्नैकतरेण चनेति छान्दोग्योपनिषद्भाष्यादिव्याकृत्यादौ चनेत्यप्यर्थ इत्युक्तेरित्यर्थः। अभिधावतो लोके ख्यातिमतो लोकान्प्रत्यप्यभिधावत इत्यावृत्यान्वयो वा । यो ज्ञानात्मकः । येति ज्ञानं समुद्दिष्टमिति तात्पर्यान्तरात् । कश्चानन्दस्वरूपत इति गीतातात्पर्यात्सुखात्मकः । बलिनश्चन बलिनोऽपि । तमित्युक्तेर्य इत्यध्याहारः । बलिनोऽन्तः परिवर्तमानात् । अन्तकोरगादन्तप्रापकं कं यामुनमुदकं येन स चासावुरगः कालियस्तस्माद्भीतं प्रपन्नं शरणागतं गोपालजनं पर्यपात्स मां परिपाति । यद्भयान्मृत्युरयं यः कश्चाप्येष्यन्प्रधावति तमरणमीमहीति कृष्णप्रार्थनं वा । कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः । जलं भित्वा यथा पद्मं नरकादुद्धराम्यहमित्यादेः । पद्मं गजमिति जगदुः साम्प्रदायिकाः । प्रपन्नगस्य पन्नगभीतत्रायकतोचितेति वाऽन्तकोरगादिति जगादेति युक्तिमुद्भावयति । अरणं नक्रकृतयुद्धाभावमुद्दिश्य तमीमहीति वा । तमी तमो हि दुर्गेत्युक्तेस्तमस्तमीशब्दयोश्च पर्यायतया दुर्गा च मही भूश्च तयोः समाहारः । तमीमहि दुर्गाभूश्च । प्रधावति तं नमामीत्यन्वयो वा । तमं प्रवर्तनीयत्वेनास्याव्यक्तस्यास्तीति तमि । तत्त्वमव्यक्तं दुर्गा ई श्रीश्च मही भूश्च तासां दुर्गाश्रीभुवां समाहारो वा । तमं तु तमसा सार्धं तमा तम्यपि गीयत इति द्विरूपकोशः । तामसी निशि दुर्गायां तामसो भुजगे खगे इति भानुनाऽप्युक्तेस्तमी । तमिश्रा तामसीति पर्यायतयाऽमरेऽप्युक्तेस्तमी दुर्गेति वा । यः ईयौ यः। इति श्रीभूदुर्गाः । को ब्रह्मा ईशो रुद्रश्चेत्येते चन अपि न बलिनः । यद्भयात्तान्प्रत्यपि मृत्युरत्यन्तसामीप्यात्मा प्रसिद्धमृत्युश्च । प्रधावतीति तेषां दौर्बल्यं ज्ञेयमिति वा । ईशः समर्था नेति वा ।

आवृत्तमीशपदं बहुवचनमीट् शब्दस्य सदन्वेतीति ज्ञेयम् । ईमह इति क्वचित्पाठः । ईमहीति पाठेऽपि अरणमित्यस्य रणाभावार्थकत्वे प्रार्थयाम इत्यर्थः । यथोक्तम् । वचोभिरीमहे यमित्यृग्भाष्यटीकायाम् । ईमहे प्रार्थयामहे । याश्चाकर्मसु पाठादिति तट्टिप्पणे । ईमहे यामीत्यादिषु सप्तदशसु पाठादित्युक्तेः । इण गतौ । इट किटीति प्रश्लिष्टस्य चेद्बहुछान्दसं कल्पनीयमिति वा गतीत्यत्र प्रश्लिष्टस्य वा ईङ् गतावित्यस्य पूर्वत्रात्मनेपदत्वमपरत्र श्यनो लोप इति लाघवाद्रूपमिति ज्ञेयम् । माधवेन ऋग्व्याख्यायामीङ् गतावित्यस्येदं रूपमित्युक्तेः । अरणं शरणमित्यर्थपक्ष ईमहे प्राप्नुम इत्यर्थः । इदमप्यवदत् तमित्सखित्व ईमह इत्यृकूटीकाटिप्पणे प्राप्नुम इति ॥ ३३ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ ८-२ ॥

छलारी –– कोऽसौ यं शरणं यासीति तत्राह ।। य इति । कश्चन लोकविलक्षणो य ईशः प्रचण्डवेगादवार्यवीर्यादभिधावत आपततोऽन्तक एव मृत्युरेवोरगः सर्पस्तस्माद्भीतं प्रपन्नं स्वशरणं प्राप्तं परिपाति । यस्य भयादीदृशान्मृत्युरन्तकः प्रधावति देहिनं प्राप्नोति । मृत्युर्धावति पञ्चम इति श्रुतेः । तमीश्वरमरणं शरणमीमहि व्रजेम ।। ३३ ।।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ।। ८-२ ।।

लिङ्गेरी –– कश्चनालौकिको यो हरिः । बलिनोऽतिबलात् । अभ्याभिमुखेन प्रचण्डवेगादतितीक्ष्णजवाद्भृशं धावत आश्वागच्छतोऽन्तकोरगान्मृत्युलक्षणसर्पाद्भीतं स्वं प्रपन्नं शरणं गतं परिपाति । यस्य हरेर्भयान्मृत्युः प्रधावति हरिशरणागतं त्यक्त्वा गच्छति । प्रागपि हरिभयादेव यमदुर्गादिरूपो मृत्युर्हर्यनुग्रहरहितं प्रति प्रधावति । भीषाऽस्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चम इति श्रुतेः । न चैवमेव हरिमपि गृहीतुं प्रवर्तते । यतः स हरिः स्वस्येशः स्वामी । अघटितघटनासामर्थ्यवांश्च । वयं तं हरिमरणं शरणमीमहे यामः ।। ३३ ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ।। ८-२ ।।

।। अथ तृतीयोऽध्यायः ।।

श्रीशुक उवाच–

एवंव्यवसितो बुद्ध्या समाधाय मनो हृदि ।
जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ।। १ ।।

सत्यधर्मीया –– जगदीशभजका नावसीदन्तीत्यत्र दन्तीन्द्रापत्प्रच्युतिनिदर्शनेन दर्शयितुमयमध्यायः । तत्रादौ हीनयोनिजस्य कथमित्थं मतिरुदभूदित्यतः प्राचीनाचीर्णसत्कर्मसंस्कारपाटवादित्याह ।। एवंव्यवसित इति । एवं व्यवसितो निश्चयो यस्य स तथा बुद्ध्या मनो हृदि समाधाय । वृत्तिभेदादियमुक्तिः । अबुद्ध्या बुद्धिहीनया हस्तिजात्याऽप्येवं व्यवसितो मनो हृदि । हृदयमारुणय इति श्रुत्याद्युक्तेः । ब्रह्मणि समाधाय । परमं जाप्यम् । जप्यमिति क्काचित्कः पाठः सुसरलः । ऋहलोर्ण्यतो बाधनेन पोरदुपधादिधिति यतो विधानात् । यदि मूलकोशेषु बहुषु जाप्यमिति

वर्तेत तर्हि जप्तुं योग्यं जप्यं तदेव जाप्यमिति स्वार्थिकेऽणि रूपमिति तत्सम्भवो विभावनीयः । मन्त्रं जजाप । प्राग्जन्मन्यनुशिक्षितमभ्यस्तम् । इन्द्रद्युम्नजन्मनि अनुशिक्षितम् अभ्यस्तम् । तत्रापि नानुपदेशेन स्वमनीषयेत्यप्याह ॥ प्राग्जन्मनीति । प्रथमजविप्रगुरौ । तन्निकट इति यावत् ॥ १ ॥

छलारी — शरणागतिप्रकारमेवाह ॥ एवमिति । व्यवसितो निश्चयवान् गजेन्द्रो मनोऽन्तःकरणं हृदि । अन्तरे । बहिरिन्द्रियसंयोगं विहायेत्यर्थः । समाधाय विधाय । जाप्यं मन्त्रं जाप्यस्तोत्ररूपमन्त्रम् । तिर्यग्योनेरेतदसंभावितमिति तत्राह ॥ प्रागिति । प्राग्जन्मनीन्द्रद्युम्न-जन्मन्यनुशिक्षितं स्वेनाभ्यस्तम् ॥ १ ॥

लिङ्गेरी — अत्रापि गजेन्द्रस्तोत्रादिना प्रसन्नाद्धरेः यथा गजेन्द्रस्य ग्राहान्मोक्षोऽभूत्तथा संसाराख्यग्राहग्रस्तस्यापि भगवत्स्तोत्रादिना तत्प्रसादात्तस्मादपि मुक्तिर्भविष्यतीति ज्ञापनाय गजेन्द्रकृत्यमाह ॥ एवमित्यादिना । स गजेन्द्र एवमुक्तप्रकारेण बुद्ध्या व्यवसितो निश्चयवान्सन् । हृद्ययनादवस्थिते हृच्छब्दवाच्ये हरौ मनोऽन्तःकरणं समाधाय संस्थाप्य यत्स्वगुर्वादिभिः प्राग्जन्मनि पूर्वजन्मन्यनुशिक्षितमुपदिष्टं परममुत्तमं जाप्यं मन्त्रावृत्त्या तोषणीयं तं नारायणाख्यं परं ब्रह्म जजाप तन्मन्त्रावृत्त्या सिषेवे ॥ १ ॥

गजेन्द्र उवाच–

ओं नमो भगवते तस्मै यत एतच्चिदात्मकम् ।
पुरुषायाऽऽदिबीजाय परेशायाभि धीमहि ॥ २ ॥

सत्यधर्मीया — महामन्त्रत्वात् स्रवत्यनोङ्कृतं ब्रह्मेत्युक्तेरोमित्युक्तिः । प्राग्जन्मन्यनुशिक्षितमिति सम्भवतीति तस्मा इत्युक्तिः । यत एतच्चिदात्मकं चेतनजातं चिदात्मा देहस्तत्सहितं कं सुखं च यस्य तच्चिदात्मकम् । चिदात्मनां कं यत इति वा । स क्व वर्तत इत्यत आह ॥ पुरुषायेति । पूर्षु शेत इति स तथा । 'पूर्षु शेते पुरिशय' इत्यादेः । आदिबीजाय आदित्वेन सम्प्रतिपन्नानामपि व्यञ्जकत्वाद्बीजम् । तस्मै । उपादानताऽनुपादानाय परेशायेत्युक्तिः । एतत् एतत्सन्निन-हितत्वादित्यादेः । ब्रह्माभिधीमह्यन्तर्ध्यायाम च । तदपि भययुतं चेत्तव स्तवनेन तस्य किमित्यत आह ॥ अभीति धीमहि । न विद्यते भीर्यस्य तत् । भवतु स्वयमभि न भयं तस्मादन्यस्य चेन्न नक्रवक्त्रतोऽतिक्रम इत्यतोऽप्याह ॥ एतज्जगद्यतोऽभीति सम्यग्भययुतमिति । एतच्चित् एतदपि ब्रह्मादिकमपि आत्मकं स्वरूपं सुखम् । तदाविर्भाव इति यावत् । यस्य तत् । किञ्च धीमहि धिया

सहिता मही आश्रयो यस्य तत् । महीति भावप्रधानम् । महित्वं यस्येति वा । महित्वमस्त्वित्यादेः । धीश्च मह उत्सवश्च तौ अस्य स्त इति वा । तत्सहितश्चासौ महश्च सोऽस्यातीति । एकदेशिनेत्यादिवत्समाधिरवधेयः । हि धीमहीति पठित्वा पुरुषमीक्षत इति श्रुतिप्रसिद्धिं दर्शयतीति व्याचिख्युः । तस्मै नमः । अस्तु धीमहीति वेदवागनुकृतिः ॥ २ ॥

छलारी — तस्मै नमोऽस्तु । तमभिधीमहि ध्यायेम च । अथवा । तस्मै नमो नमः अभिधीमहीत्यन्वयः । केवलं ग्राहगृहीतत्वेन कायप्रणामस्याशक्यत्वात् । तस्मै च नमनहेतुमाह ॥ यत इति । यस्माद्धरेरेतच्चेतनावृतं चिदात्मकं चिदात्मवच्चेतनस्वरूपभूतं कं सुखं यस्य तद्भवति । तत्प्रसादाच्चेतनजातस्य मुक्तिसुखमाविर्भवति । तस्मा इत्यर्थः । स च कुत्रास्त इत्यत आह ॥ पुरुषायेति । पुरि देहे शेते इति । षष्ठीतत्पुरुषः । तस्मै परात्परं पुरिशयं पुरीषमीक्षत इति श्रुतेः । जीवस्यापि देहस्थत्वात्तद्व्यावृत्त्यर्थमाह ॥ आदिबीजायेति । आदिकरणायेति । उपादानकारणं जडप्रकृतिं व्यावर्तयति ॥ परेशायेति । परेषां रमादीनां नियामकायेत्यर्थः ॥ २ ॥

लिङ्गेरी — तं प्रकारमेव दर्शयति ॥ ॐ नमो भगवत इत्यादिना । ॐ देशकालगुणैः पूर्णाय । तस्मै भगवते वासुदेवाय नमोऽस्तु । वयमादिबीजाय मूलकारणाय परेशाय ब्रह्माद्युत्तमस्वामिने पुरुषाय पूर्णषड्गुणाय नारायणाय । तत्प्रीतय इति यावत् । अभिधीमहि स्तुमः । आदि-बीजत्वादिगुणविशिष्टं पुरुषं नारायणमिति विभक्तिविपरिणामेन धीमहि ध्यायेमेति च । तं भगवन्तं स्तौति । यतो वासुदेवादेतत्प्रमाणप्रमितं चिदात्मकं चेतनसमुदायो मोक्षमुखसर्वपुरुषार्थान् लभत इति । मुक्तिप्रदो वासुदेवोऽखिलस्येत्यादेः । अत्र ओं नमो भगवत इत्यनेन वासुदेवद्वादशाक्षरजपः सूचितः । धीमहीत्यनेन तत्सवितुरित्यादिगायत्रीजपः ॥ २ ॥

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ॥ ३ ॥

तात्पर्यम् – यत इति स्रष्टृत्वम् । येनेति प्रवर्तकत्वम् । य इति सत्ताप्रदत्वम् । न सन्ति यदुपेक्षयेत्युक्तत्वात् । 'उत्पन्नस्यापि यत्सत्ता हरेस्तत्स इतीर्यते । हरेर्विश्वं भिन्नमपि परमोऽसौ यतो विभुरि'ति ब्रह्मतर्के ॥ ३ ॥

सत्यधर्मीया — यस्मिन्निदमित्यादि श्लोके यत इति पञ्चम्युपादाने ततश्च विकारिता । सा च निर्विकार इत्यादिमानबाधितेत्यतो विवक्षितं पञ्चम्यर्थमाह ॥ यत इति ॥ स्रष्टृत्वमिति । ततश्च हेतौ

पञ्चमी । ज्ञानादिमत्कर्ता तदर्थ इत्युक्तं भवति । कर्तृताया यत इत्यनेन बोधनात्करणत्वं तु न प्रधानस्य ब्रह्मणः सम्भवतीति येनेति निरर्थकमित्यतः कुरुपाण्डवन्यायेन समाधत्ते ।। येनेति । प्रवर्तकत्वमिति । स्रष्टृत्वं बहिष्ठस्य कुलालादेरिव न भगवतः किन्तु प्रकृष्टो वर्तकः । प्रकृष्टता चान्तर्निष्ठतादिरूपिणीति । तद्वांश्चासौ वर्तकश्चेति स तथा तस्य भावस्तत्त्वम् । तृतीयार्थ इत्यर्थः । य इदं स्वयमिति जगत्तादात्म्यमुच्यत इति मतिं च्यावयन्व्याकरोति ।। य इति । सत्ताप्रवर्तकत्वं कुतः सत्ता न तदायत्तेत्यतस्तत्र मानमाह ।। न सन्ति यदुपेक्षयेत्युक्तत्वादिति । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षयेति मानात्तत्सत्ता तदायत्तेति ज्ञायत इत्यर्थः । प्रस्तुतानुरोधेन द्रव्यं कर्म चेत्यादिकमादावुदाहार्यं कण्ठतस्तत्कुतो न सन्ति यदुपेक्षयेत्यंशोदाहरणमिति चेत् । सत्यम् । व्यतिरेककथनेन तत्स्थैर्यं भवतीति तत्स्थेम्न एवमाम्नानमित्यवेहि । भवतु भगवान्प्रवर्तको य इदमिति तादात्म्योक्तेः का गतिरित्यत इयमिति मानेनाह ।। उत्पन्नस्येति । उत्पन्नस्य विश्वस्य यत यद्यतः सत्ता हरेः सकाशात्तद्विश्वं तत्तस्मात्स हरिरितीर्यते कथ्यते । साक्षादभेदः कुतो नार्थत इत्यतस्तत्र युक्तिमभिदधत्तमंशमुदाहरति ।। हरेर्विश्वं भिन्नमपीति । यतोऽसौ परमो विभुश्चेति ततः सत्तायास्तदधीनत्वादेव तत्त्वेनोक्तिस्तथाऽन्यत्रापि । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादेर्जगत्सत्तादि तदायत्तमिति । य इदं स्वयमित्युक्तिर्ममात्मा भद्रसेन इत्यादिवदिति ज्ञेयम् ।। ततश्चायं मूलार्थः ।। इदं जगत् यस्मिन्यदधिष्ठानकम् । यस्मिन्निदं खं चेत्यादेः । यस्मिंल्लये मुक्तौ चेदं वर्तत इति वा । यत्प्रयन्त्यभिसंविशन्तीत्यादेः । यत्प्रति प्रलये यदभि स्वेच्छया विशन्ति मुक्ताविति तत्त्वप्रकाशिकोक्तेः । इदं जगन्नित्यमनित्यं यथायोग्यं जायते । यतो वा इमानि भूतानि जायन्ते । येन भगवतेदं प्रवर्तते । येन जातानि जीवन्तीति श्रुतेः । एकेनेदंशब्देनात्यापेक्षितसर्वस्यान्वयसम्भवे बहुवारमुक्तिः श्रुतिगतानीमानीति बहुवचनविवक्षया वा इदंशब्दघटित 'सर्वं खल्विदं' 'इदमग्रे' 'यस्मिन्नित्यादि' वाक्यसङ्ग्रहाय वा । यतश्चेदमित्यत्र इदं सम्पत्प्रदं इदं कामितदातारम् । इष्टदानात्तथेंदव इत्यृग्भाष्युटीकायाम् इः कामः समुदाहृत इत्युदाहृत्य इं कामं ददन्तींदव इति विवृतत्वात् । इं तमेव द्यति कदाचिद्विरक्तिविवक्षयेतीदस्तम् । य इत् । य एव इदमित्येकमेवेदं पदम् । सर्वान्वयि । अतं प्रपद्य इत्यन्वयः । इत्यर्थविवक्षया वेति ज्ञेयम् । य इदम् । यदधीनसत्तां यः स्वयं स्वसामर्थ्येनैव । अस्मादमुक्तवर्गात्परस्मान्मुक्तवर्गाच्च परो विलक्षणः । स्वयम्भूस्तु स्वस्मादेव भवस्तं प्रपद्ये । शरणमिति शेषः । स्वयमनन्याधीनतया शुभावहस्य दैवस्यायशब्दवाच्यस्य सुना शोभनता ज्ञेया । महादैवं वा । स्वयंभुवं स्वाश्रयं वा । ननु नावतार्यमाचार्यैस्तात्पर्यमेतत् श्लोके । य इदमित्यनेन प्रतीताभेदं बादरायण एव यो यस्मात्परस्माच्च

पर इत्यनेनापववादेति चेत् । सत्यम् । य इदमिति तदपवादकं वेदं तदपवादकं वा य इदम् इति तादात्म्यं योऽस्मादित्यादिना भेदं चशब्देन समुच्चितवानिति भेदाभेदमिति वा कश्चिदविपश्चिच्छङ्केतेति ब्रह्मतर्कानुरोधेन पराक्रान्तवन्त इति नाचातुरीबोधिकत्वप्रयुक्तेति युक्तमुक्तम् ।। ३ ।।

छलारी — पूर्वं मुक्तिप्रदत्वमुक्तमिदानीं सृष्ट्यादिहेतुत्वमाह ।। यस्मिन्निति । इदं जगद्यस्मिन्हरौ तिष्ठति । विष्ण्वधीनमित्यर्थः । इदं यतः । यतो वा इमानि भूतानि जायन्त इति श्रुतेः । इदं येन प्रवर्तते । येन जातानि जीवन्तीति श्रुतेः । इदं विश्वं यः स्वयं स्वाधीनसत्ताकम् । सर्वं खल्विदमिति श्रुतेः । य इदं स्वयमित्यनेन तादात्म्यं किं न स्यादित्यत आह ।। योऽस्मादिति । योऽस्मात्प्रत्यक्षसिद्धप्रपञ्चात्परस्मात्परोक्षान्मुक्तप्रपञ्चाच्च पर उत्तमस्तं स्वयंभुवं स्वत एव प्राप्तसत्ताकं हरिं शरणं प्रपद्ये ।। ३ ।।

लिङ्गेरी — अभिधीमहीत्युक्तं स्तोत्रं व्यनक्ति ।। यस्मिन्निति । यस्मिन्नारायणे इदं चेतनरूपं जगत्प्रलये आसीत् । इदं यतश्च यस्मादेव नारायणाज्जातम् । येनैवेदं जीवति चेतनजातमचेतनं चावतिष्ठते । यो नारायणः स्वयमेव जगतः सृष्ट्यादिकर्तृतयोपजीव्यत्वेनास्मिन् जगति व्याप्ततया च पुरुष एवेदं तद्विश्वमुपजीवति । सर्वं समाप्नोषि ततोऽसि सर्व इति प्रत्यक्षैतरेयभगवद्गीतोक्तप्रकारेण ब्रह्मैवेदं सर्वमित्यादावुच्यते । नारायणाभिधं ब्रह्मणो जगदैक्यं किं न स्यादित्याशङ्क्य परिहरति । यो नारायणोऽस्मात्प्रत्यक्षप्रतीताज्जगतः परस्माच्चैतद्भिन्नादनपरोक्षादपि परोऽन्य इति । तम् । नारायणस्याप्यन्याधीनस्थित्यादिमत्त्वे तत्स्तुतिराविद्यैव किं न क्रियत इत्यतः स नास्तीति दर्शयति । स्वयंभुवमिति स्वयमेव भवत्यवतिष्ठत इति स्वयंभूस्तमहं प्रपद्य इति । परेऽव्यये सर्व एकीभवन्ति । यतो वा इमानि भूतानि जायन्त इत्यादिप्रमाणं यस्मिन्नित्यादिना सूचितमिति ज्ञातव्यम् । उक्तं चैवं प्रमाणेनानन्दतीर्थभगवत्पादैः । उत्पन्नस्यापि यत्सत्ता हरेस्तत्स इतीर्यते । हरेर्विश्वं भिन्नमपि परमोऽसौ यतो विभुरिति च ।। ३ ।।

यः स्वात्मनीदं निजमाययाऽर्पितं क्वचिद् विभातं क्व च तत्तिरोहितम् ।
अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ।। ४ ।।

सत्यधर्मीया — सङ्क्षिप्योक्तं विविच्याह ।। य इति । यः स्वात्मनि । स्वदेहे । उदर इति यावत् । निजमायया स्वशक्त्याऽर्पितम् । जगत्क्वचित्सृष्टिकाले विभातम् । क्वचिल्लयकाले तिरोहितम् । कार्योन्मुखानुन्मुखताभ्यां विभाततिरोहितत्वे ज्ञेये । तदुभयम् इति स्वयमीक्षते । सेक्षाऽव्यभिचारिणी

इति ईरयत्यविद्धदृगिति । अविद्धाऽप्रतिहता दृग्ज्ञानं यस्य स तथा । अविलुप्तावबोधात्मेत्यादेः । न परतः परस्येक्षणं परवदित्याह ।। साक्षीति । ननु विरिञ्चो जगदादिरिति श्रूयतेऽतः कथं कथय हरिरादिबीजमित्यत आह ।। आत्ममूल इति । आत्मा विरिञ्चः सुमना इत्यादेः आत्मनो विधातुर्मूलः प्रतिष्ठापकः कारणं च । तस्याप्येको मूलोऽस्ति चेत्स उपास्तियोग्यः स्यादित्यतो नेत्याह ।। आत्ममूल इति । आत्मैव मूलं यस्य सः । तव कोऽनुबन्धोऽन्येषामयं मूलश्चेदुपास्तावित्यतोऽस्ति ममाप्युक्तोऽनुबन्ध इति वक्ति ।। आत्मनो ममापि मूलः कारणमिति । शीलमूलमङ्गलतालेति लिङ्गानुशासने पुंसि चेत्युक्तेर्मूलशब्दः पुल्लिङ्गः । विभातम् । जाग्रतिकाले । तिरोहितं सुषुप्त्यादौ । विभातं ब्रह्मादौ तिरोहितमस्मदादौ । स्वात्मनि मूलरूपेऽर्पितं स्वाभाविकं रूपं तदेव । निजमायया विभातं रामकृष्णादि । तिरोहितं तद्वद्विद्यमानं मत्स्यादिकम् । अत एव नमः शान्ताय घोराय मूढायेति पठित्वा मूढो मत्स्यादिरिति व्याख्यातम् । एते च परस्परसहकारिण इति ज्ञेयम् । तत्तिरोहितं विभातमित्युभयमपि । तत् ततत्वात् । तत्सर्वमीक्षतेऽविद्धदृक् च स यः स्वात्मा आत्ममूल इत्यपि योजयन्ति । पूर्णमदः पूर्णमिदमित्यादेः । स परात्परोऽत्युत्तमो मामवतु । इदं जगन्निजमायया न जायत इति निजा । सा च सा माया चेति तत् प्रकृत्याऽर्पितं सम्पृक्तं यत्तत्तस्मात् अविद्धदृक् । क्व । न क्वापि । तर्हि तज्ज्ञानं किमाकारमित्यत आह ।। क्वचिद्विभातमिति । भावे क्तः । प्रमेति यावत् । तिरोहितम् । भ्रम इति । ब्रह्मणोऽपि मध्यान्हार्कक्षोभवत् क्षोभ एव तिरोधानमिति ज्ञेयम् । तर्हि क्व तादृगित्यत आह ।। य इति । यः साक्षी सन्नीक्षते तस्यैव चित् । दृग्ज्ञानम् । यश्च परात्परः । तदसम्भावनोच्छ्रित्या इदं विशेषणम् । स मामवत्वित्यपि योजयन्ति । यत इदमवित् तत्ततो दृक् क्व । ह खेदे । यया निजमायया स्वपत्न्या । उभयम् । ओ रुद्रस्य भयम् । उः शंभुः समुदाहृत इत्यादेः । अहं रुद्राय धनुरातनोमीत्यादेः । तां मां स्वात्मनि देहे । उरसीति यावत् । ईक्षते पश्यति स मामवतु । अनेन नारायणासाधारणलक्षणं कथितं भवतीत्यपि भावं विभावयन्ति । क्वचिद्विभातं क्व चक्षते यत्कर्तृके जाते सति छेदेन तिरोहितम् । ब्रह्मचर्मशिरःपट्टी दिक्पालोर्ध्वाङ्गभूषण इत्यादेः । यया । स्वात्मनि विभातं सा । ई । येन निजमा स्वरूपभूतसम्पत्काऽपि । मां पुनरीक्षते पश्यति । नवनवसुविशेषोपलम्भा । श्रियोऽपि च ज्ञानस्फूर्तिरित्यादेः । स्वात्मनि तम् । भावप्रधानोऽयम् । तकारः कीर्तितश्चोर इति विश्वात्तत्त्वं चोरत्वम् । नान्यकृतं तदित्याह ।। निजमायया । स्वेच्छयैव क्वचिद्विभातं प्रकाशितम् । क्वचित्तिरोहितं निलीनतां यातम् । आर्पि । ऋ गतावित्यस्माण्णिचि अर्तिह्रीति पुकि तदन्तात्कर्मणि लुङि चिणन्तमेतत् । तर्हीदमैन्द्रजालिकं बालकृष्णकर्मेत्यतो नेत्याह ।। अविद्धदृक् । अविद्धाऽप्रतिबद्धा जनानां दृग्येन तत् । चोरवदाचरेत्स्वसखिजातम् । उभयम् । उ

कुत्सा । तत्सहितं भयमस्मिन्कर्मणि तद्यथा भवति तथेक्षते । यः स आत्ममूल आत्मात्मीयं मूलं दरी निकुञ्जो वासाय यस्य सः । उर्वाच्ये चापि कुत्सायाम् । मूलमाद्ये शिफायां स्याद्दरीकुञ्जेति केऽपि चेति विश्वः । परात्परः कृष्णो मामवत्विति वेति दिक् ॥ ४ ॥

छलारी — ननु जगतो मिथ्यात्वाद्भगवतो जगत्सृष्ट्यादिकं कथमिति तत्राह ॥ य इति ॥ यः प्रलयकाले स्वात्मनि स्वोदरे निजमायया स्वेच्छयाऽर्पितं प्रकाशितमिदं जगदीक्षते पश्यति । तथा सृष्टिकालेऽपि जीवानां तज्जगत्क्वचिज्जाग्रदादौ विभातं प्रकाशितं क्वचित्सुप्त्यादौ तिरोहितमप्रकाशितम् । एवमुभयं तज्जगदीक्षते पश्यति । तदीक्षणं स्वातन्त्र्येणेत्याशयेनाह ॥ साक्षीति । साक्षाद्द्रष्टा स्वातन्त्र्येण द्रष्टेत्यर्थः । नेदमीक्षणमयथार्थमित्याह ॥ अविद्धेति । अबाधितज्ञानमित्यर्थः । कुत इत्यत आह । अविद्धेति । अविलुप्तज्ञानमित्यर्थः । तथा च जगतः सर्वदेश्वरेण दृश्यमानत्वान्न मिथ्यात्वमिति भावः । स मामवत्वित्यन्वयः । कथम्भूतः । आत्मा स्वयमेव मूलमाश्रयो यस्य स तथा । स्वे महिम्नीति श्रुतेः । पराच्छ्रीतत्वात्पर उत्तमः । अक्षरात्परतः पर इति श्रुतेः ॥ ४ ॥

लिङ्गेरी — उक्तमेव भगवतो जगदाश्रयत्वादि विवृणोति ॥ यः स्वात्मनीत्यादिना । यो हरिः स्वात्मनि स्वस्मिन्निजमायया स्वकीयेच्छयाऽर्पितं समर्पितम् । क्वचिदालोचनदशायां ब्रह्मादीनां विभातं ज्ञातं क्वचिदनालोचनदशायां तिरोहितमज्ञातं क्वचिज्जागरावस्थायां विभातम् । स्वस्वयोग्यज्ञानवत् क्व च सुप्त्याद्यवस्थायां तिरोहितं जागरवत्स्पष्टज्ञानशून्यम् । इदमुक्तं चेतनजातम् । स्वयमविद्धाऽप्रतिहता दृग्दृष्टिः यस्य स सन् तदुभयमुभयविधं जीवजातं साक्षी सन्नीक्षते साक्षादीक्षते । आत्मनां ब्रह्मादिजीवानां मूल उत्पत्त्यादिकारणः । परब्रह्मादेरपि पर उत्तमः स नारायणो मामवतु रक्षतु । आत्ममूलः स्वाश्रयो मामवत्विति । तुरीयं तत्सवर्दृक् सदा । पतिं विश्वस्यात्मेश्वरं, स्वे महीम्नीत्यादिश्रुतेः । आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषण इत्यादिस्मृतेः । यः स्वात्मनीत्यादिना ईक्षत इत्यन्तेन यस्मिन्निदमिति भागो विवृतः । आत्ममूलः परात्पर इत्यनेन स्वयंभुवमिति भागः ॥ ४ ॥

कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु लीनेषु च सर्वहेतुषु ।
तमस्तदासीद् गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥ ५ ॥

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितम् ।
यथा नटस्याकृतिभिर्विचेष्टतो दुरन्वयानुक्रमणः स माऽवतु ॥ ६ ॥

सत्यधर्मीया — परात्परत्वस्वरूपासिद्धिं परिहर्तुं साकल्येन सकलाज्ञेयत्वं श्लोकद्विकेनाह ॥ कालेनेति । कालेन । लयरूपेण । कृत्स्नशः सामस्त्येन । लोकेषु पृथिव्यादिषु । पञ्चत्वं पञ्चभूतभूततामितेषु प्राप्तेषु सर्वहेतुषु । एतत्पृथिव्यादिकारणेषु महदादिषु च लीनेषु । स्वस्वकारणप्रवेशेनादर्शनं यातेषु । तदा तमो गहनं ज्ञातुमशक्यम् । इतरानुत्तार्यतयाऽगाधम् । गभीरम् । गाङ् गतौ। गभीरादयश्चेति गभीरगम्भीराविति वा निपातितो गभीरशब्दः । निम्नं गभीरं गम्भीरमित्यमरः। दुर्गात्मकम् । तमो हि दुर्गेत्यादेः । तस्य तमसः पारेऽतत्सम्पर्कः सन् विभुर्विराजते । तदस्पृष्टदेशे । तत्र तमोगमने हेतुमाह ॥ कालेनेति । तन्नाम्ना स्वेनैवेति । यस्य देवा ऋषयश्चेति प्रतिपत्तृत्वेन सम्प्रतिपन्ना अपि पदं स्वरूपं न विदुर्यत् अतः पुनर्जंतुर्मादृशहीनयोनिः । को गन्तुमवगन्तुम् ईरितुं साकल्येन वक्तुम् अर्हति शक्तो भवति । निदर्शनं तत्राह ॥ यथेति । आकृतिभिस्तत्तदाकारैर्विचेष्टितो विचेष्टमानवेषधारिणः पदम् अयमेतादृश इति अतत्कौशल्येन जना न जानते तथेति । दुरन्वयानुक्रमणो दुरन्वयं ज्ञानिभिर्दुज्ञेयमनुक्रमणं चरितं यस्य स तथा । हरिर्मामवतु । येन कृष्णेन । काला कालो हि नीलिमाऽस्यास्तीति कालातो न ङीबिति तु न । एवं च गुणिवाचककालब्दादर्श आद्यचि गवादिपरत्वे कालीति सिद्ध्यतीति शब्देन्दुशेखरोक्तेः टाबार्षः । कालः श्यामलमेचका इत्यमरः । कालान्येत्युक्ते रूढ्यान्यवाचकोऽपि कालशब्दः कालिमवदुपस्थापकोऽपि सन्नकुबेरपुरीविलोकनं ह्यधरासूनुकरमित्यादौ यथा ग्रहवाचिनो मङ्गलशब्दस्य पुल्लिङ्गत्वेऽपि श्रेयोवाचिनपुंसकलिङ्गकमङ्गलपदोपस्थापतैवं कृष्णोपस्थापको भवतीति न ङीबन्तताभावदोष इति केचित् । काला कृष्णा द्रौपदी । इनपञ्चत्वं इनानां पतीनां पञ्चत्वं पञ्चकम् । इता । उतामृतत्वस्येतिवत् वर्गार्थे त्वप्रत्ययः । इनाः पञ्च यस्याः सा तस्या भावस्तत्त्वमिति वा । प्रियपञ्चा द्रौपदी यथा । उलोकेषु कुत्सितजनेषु । तमो दुःखमासीत् । तमः शोके गुणान्तर इति विश्वः । तेन च सर्वहेतुषु । अर्व षर्व हिंसायाम् । हिंसाकारणेष्वपि लीनेषु पलायितेषु च । इषुकृत्स्नशा । इषुणा बाणेन तद्वारा कृत्स्नं शं सुखं यस्याः साऽऽसीत् । यद्गभीरमितरापरिहार्यं गहनं वनं चासीत् । तस्य पञ्चकस्य पारे पारणे आसीत् । विभुः समर्थः । नयस्य यन्नीतेर्देवा ऋषयश्च पदमियत्तां मा विदुर्मायें न विदुः । लीलाकाले नटस्याकृतिभिर्विचेष्टतः कृष्णस्य । नटौ रङ्गगतावित्यादेः । यश्च दुरन्वयानुक्रमणः । यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्तीत्यादेः अणुत्वमहत्त्वयौगपद्यप्रदर्शनरूपलोकविरुद्धचर्यश्चौर्यादिचर्यावान्वा । अभिवि गरुडे । विभक्त्यर्थेऽव्ययीभावः । यश्च राजते स

मामवत्विति वा । दुरत्ययानुक्रमण इति पाठ इतरानतिक्रमणीयानुक्रमण इत्यर्थः । गहनं गभीरं तमोऽन्धकारश्च तस्य पञ्चकमध्यस्थस्यार्जुनस्य । पारे सति सवितरि सैन्धववधसन्धापारणविषये येनासीद्विप्रपुत्रानयनकाले यद्गहनं गभीरं तमस्तस्य पारे च य आसीत्स मामवत्विति वा ॥ ५,६ ॥

छलारी — परात्परत्वं स्पष्टयति ॥ कालेनेति । कालनाम्ना हरिणा लोकेषु भूतकार्येषु कृत्स्नशः साकल्येन पञ्चत्वं पृथिव्यादिपञ्चभूतात्मत्वम् । नाशमिति यावत् । इतेषु प्राप्तेषु सत्सु सर्वहेतुषु पृथिव्यादि महत्तत्त्वान्तेषु सर्वकारणेषु स्वस्वकारणतां प्राप्तेषु सत्सु तदा गहनं दुरवगाहं गंभीरमगाधं यत्तमो दुर्गाभिमन्यमानमासीत्तस्य तमसःपारे तमःसम्पर्करहिते देशे यो विभुरभिविराजते प्रकाशते । आदित्यवर्णं तमसस्तु पारे इति श्रुतेः ॥

हरेर्दुर्ज्ञेयत्वं वदन्प्रार्थयते ॥ न यस्येति । देवा यस्य हरेः पदं स्वरूपं न विदुर्यतोऽतः को जन्तुरर्वाचीनः प्राणी तत्पदं गन्तुं ज्ञातुं पुनरीरितुं वक्तुं वाऽर्हति । तत्र दृष्टान्तमाह ॥ यथेति । आकृतिभिर्भिन्नभिन्नस्त्रीपुरुषा- द्याकारैर्विचेष्टतः प्रवर्तमानस्य नाट्यं कुर्वतः पुरुषस्य स्वरूपं निधार्यैदृशमिति ज्ञातुं वक्तुं वा यथा नार्हति जनस्तथेति । सुदुरत्ययं दुर्ज्ञेयमनुक्रमणं चरितं यस्य दुरत्ययानुक्रमणो हरिर्मामवतु ॥ ५, ६ ॥

लिङ्गेरी — परात्परात्वं प्रकृतिशक्त्यविषयत्वप्रतिपादनेनाविष्करोति ॥ कालेनेत्यादिपद्यद्वयेन । कालेन कालनियामकत्वादिनिमित्तेन कालशब्दवाच्येन कालरूपेण च हरिणा प्रेरितेन प्रसिद्धेन कालेन प्रलयेन कृत्स्नशः समस्तेषु लोकेषु भूरादिषु पञ्चमहाभूतेषु । पञ्चत्वं स्वोपादानभूत- पृथिव्यादिसूक्ष्मपञ्चात्मताम् इतेषु प्राप्तेषु सर्वहेतुषु च पृथिव्यादिसर्वकारणेषु गन्धादितन्मात्रामहदादिषु च । लीनेषु स्वोपादाने स्वाच्छादितेषु यत्तद्गहनमज्ञेयं गभीरमगाधं तम आसीदन्धकारापरपर्याय- जडप्रकृतिस्तन्नियामिका चित्प्रकृतिश्चासीत् । यो विभुरघटितघटनासामर्थ्यवान्हरिस्तस्य तमसः पारे पराग्देशे तत्स्थितोऽपि तदशक्तिविषयतया तत्कृतविकारशून्यतया अभिविराजते सुखेन सम्यक् सर्वतः प्रकाशमानो वर्तते । 'कालाख्यरूपिणस्तव । नासदासीन्नोसदासीत्तदानीं तमसा गूळ्हम् । आनीदवातं स्वधयेत्यादि प्रत्यक्ष, दशमस्कन्ध, ऋगादिप्रमाणैरस्मदुक्तार्थप्रमापनान्नात्र कस्यचित्क्षुद्रचोद्यावकाशः ॥

ऋषयस्त्रिकालज्ञानिनो ब्रह्मादयः, आकृतिभिर्ब्राह्मणाद्याकारैर्विचेष्टितः क्रीडां कुर्वतो नटस्य नर्तकस्य जातिकारस्य पदं स्वरूपं यथा जना न जानन्ति तथा हरेरपि । पद्यते गम्यत इति पदं

स्वरूपं साकल्येन न विदुर्न ज्ञातवन्तो नोक्तवन्तश्च । पुनस्तदवतारः को वाँ जन्तुः प्रणीतस्य हरेः पदं गन्तुं ज्ञातुमीरितुं वक्तुं चार्हति योग्यो भवति । न कोऽपि । एवं ब्रह्मादिभिरपि दुरन्वयो ज्ञातुमशक्योऽनुक्रमणः पराक्रमो यस्य स विष्णुर्मामवतु रक्षतु । इत्येवं गजेन्द्रो ब्रह्माद्यज्ञेयत्वं वक्तुमशक्यगुणोत्कर्षस्य हरेस्तद्गुणोत्कर्षख्यापनरूपस्तुतौ नाहं शक्तस्तथाऽपि भक्तवत्सलतया स हरिर्मां प्रकृतापदो रक्षतु रक्षत्विति स्वाभिप्रायं व्यनक्ति । व्यक्तं चैतत् । द्युपतिभिर-जशक्रशङ्कराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मीत्यादेः ॥ ५, ६ ॥

दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः ।
चरन्त्यलोकव्रतमव्रणं वने सर्वात्मभूताः सुहृदः स मे गतिः ॥ ७ ॥

सत्यधर्मीया — नात्र मन्मात्रस्याधिकारः किन्तु प्राचीनाः प्रेक्षावन्त एवं वासुदेवोपासां कुर्वत इति सप्रमाणकमुक्तमिति वक्ति ॥ दिदृक्षव इति । यस्य सुमङ्गलं महामङ्गलदं पदम् । दिदृक्षवो द्रष्टुमिच्छावन्तः सुसाधवो मुनयो विमुक्तसङ्गा दारागारादिसम्बन्धविधुराः । सर्वात्मभूताः सर्वस्वामी हि सर्वात्मा तस्मिन् भूताः सन्तस्तत्स्थिताः स भूतो येषु त इति वा । सुहृदः शुद्धबुद्धयः । अलोकव्रतम् । जनजनितनियमविलक्षणनियमम् । अव्रणम् । निश्छिद्रम् । यथा तथा वने । चरन्ति । कुर्वन्ति । स मे गतिः प्राप्यं स्थानम् । दिदृक्षवः । अयसि अपदं सुमङ्गलं विम् उक्तसङ्गाः इति पदानि । उक्तसङ्गाः शास्त्रे यः सत्सङ्ग उक्तस्तदुपेता विं परमात्मानं दिदृक्षवः । न स सुमिल इत्यालपति । अपदं दुर्लभ्यमयसि । तप्त इति शेषः । क्वचिदपदं श्वासनिरोधेन क्षितावक्षिप्तं यथा तथा चरन्तीति वा । तच्चूर्णे सति । तच्चरन्ति । भक्षयन्ति । वने सुमं गलम् । सुमं स्यात्पुष्पफलयोरिति फलानि पुष्पाणि वा । सूनं प्रसूनं कुसुमे सुमं च परिकीर्तितमिति द्विरूपकोशः । गलं सर्जरसम् । गलः सर्जरसे कण्ठ इति विश्वः । वने जले वा । चरन्ति भक्षयन्ति । संचरन्ति वेति विवरणमलोकव्रतस्येति ज्ञेयम् । यस्य कृष्णस्य वने कानने विमुक्तसङ्गाः । पतिसुतान्वयभ्रातृ-बान्धवानतिविलंघ्येति त्यक्तैतत्सङ्गाः । सुसाः । सा लक्ष्मी समुदीरितेत्येकाक्षरनिघण्टुः । सारत्वात्सा लक्ष्मीः सु शोभना यासां ताः । पदं पदानि । दिदृक्षवो मुनय इव । परस्परं वार्तावित्यै मौनव्रतधरा वा । अव्रणम् । अलोकव्रतमेकान्तव्रतं चरन्ति । सर्वात्मना भूताः पिशाचप्रायाः सुहृदो मे स गतिः स वः पतिरिति यं चरन्ति अचरन्व्यजानन् । अगेन गोवर्धनेन तिरानन्दो यस्य सः । अगस्य माहेन्द्रस्य महेन्द्रक्लृप्तमखान्नखादनेन स्वावेशेन तिर्येनेति वा । सोऽप्यन्यगतिमांश्चेत्स एवाभ्यर्थनीयः किमन्तर्गडुनाऽनेनेत्यतो गतिरन्या न विद्यते गतिर्यस्य तथेति । यस्य पदम् । गलं कण्ठं वोद्दिश्य सुमं

पुष्पाणि । दिदृक्षवः सुसाधवो मुनय इव वने विचरन्ति । स मे सुहृदः शुद्धबुद्धेर्गतिरिति वा । विम् अव्रणं छेदभेदादिरहितम् । क्व व्रणादिः क्व चाज्ञानमित्यादिना तत्त्वनिर्णयोक्तेः । विम् अव्रणं नित्यपूर्णगुणत्वत इति ईशावास्यभाष्योक्तेः । पूर्णगुणमिति वा । अलोकव्रतं लोकनियमातीतं पदं स्वप्राप्यस्थानमुद्दिश्य वने दिदृक्षवो मुनयश्चरन्ति । न तेऽपि पश्वशा इति भ्रमः सम्भावित इत्याह ॥ सम इति । सर्व इत्यर्थः । न हि प्रेक्षावतां बहूनां प्रवृत्तिरेकविधाऽमानिकी भवतीति भाव इति वा । यस्य गलमुद्दिश्य सुमं सुमानि दिदृक्षव इति वा ॥ ७ ॥

छलारी — नन्वेतादृशमहिम्नो भगवतो ज्ञानं कथं स्यादित्यतो तज्ज्ञानोपायं कथयन्प्रार्थयते ॥ दिदृक्षव इति । सुमङ्गलं यस्य पदं दिदृक्षवो द्रष्टुकामा विमुक्ता सङ्गा विषयासक्तिर्यैस्ते विरक्ता मुनयो मननशीलाः सुसाधवो वनेऽव्रणं निच्छिद्रमलोकव्रतं लोकैः कर्तुमशक्यं व्रतं तपआदि कर्माचरन्ति कुर्वन्ति । सो हरिर्मे गतिः प्राप्यः अस्तु । कथम्भूताः साधवः । सर्वात्मना सर्वस्वामिनि भूताः स्थिता ब्रह्मनिष्ठाः सुहृदः शुद्धान्तःकरणाः फलेच्छाशून्या इत्यर्थः ॥ ७ ॥

लिङ्गेरी — नन्वेवं हरेरज्ञेयत्वे तत्प्रसादेन मोक्षादिपुरुषार्थापेक्षा तत्साधनतत्साक्षात्काराशा चानुचितेत्याशङ्क्य हरेः स्वानुग्रहमन्तरेणाज्ञेयत्वादिमत्वेऽपि स्वानुग्रहे ज्ञेयत्वादेरपि सत्वादेव तत्साधनवैराग्यादौ ऋषयः प्रवर्तन्त इति मोक्षाद्याकांक्षाऽप्युचितैवेति परिहरति ॥ दिदृक्षव इति । मुनयो ऋषयः सुमङ्गलमतिमङ्गलं यस्य हरेः पदं दिदृक्षवो द्रष्टुमिच्छवः सन्तस्तदर्थं विमुक्तसङ्गा-स्त्यक्तविषयस्नेहा मुनयो मननशीलाः सुसाधवो भक्त्याद्यतिसाधुभावोपेता वने एकान्तेऽव्रणं विच्छेदादिदोषरहितमलोकव्रतमसंप्रज्ञातसमाधिलक्षणं ध्यानमाचरन्ति । अलोकव्रतं स्वेतरब्रह्मादि-जनाशक्यजगत्सर्जनादिलक्षणं व्रतं व्यापारो यस्य तत् अव्रणमदोषं यस्य पदमिति वाऽन्वयः । सर्वात्मभूतः सर्वचेतनस्थः स हरिः सुहृदः समीचीनान्तःकरणस्य मे गतिरस्तु । सर्वात्मभूत इत्यनेन नक्रस्याप्येवंविधशक्तिप्रदो भगवानेवेति स्वज्ञानं प्रकटितम् । जगद्व्यापारवर्जमित्यादिनाऽन्येषां स्रष्टृत्वाद्यभावः स्पष्टः ॥ ७ ॥

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ।
तथापि लोकाश्रयसंभवाय यः स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥

सत्यधर्मीया — देवोऽयं देवदत्तादिवन्न सम्मतजन्मादिरित्यादित उदितमुचितं दुर्विज्ञेयत्वं ज्ञेयमित्याह ॥ न विद्यत इति । यस्य जन्म शुक्ररक्तसम्पर्ककायसम्पत्तिर्न विद्यत इति

यथायथमविपरिणतं विपरिणतं सदन्वेति । न शुक्लप्रभवोऽस्य देहः । न जायत इत्यादेः । कर्म । दुष्टम् । नामरूपे । अनामा सोऽप्रसिद्धत्वादरूपो भूतवर्जनादित्यादेरप्रसिद्ध्याऽनामा प्राकृतरूपराहित्यादरूपश्चेति भावः । गुणदोषः गुणयुतो दोषः । सत्त्वादिगुणकृतो दोषो वा । निरनिष्टो निरवद्य इत्यादेः । गुणो नेति वैशकलित्येन निषेधे मन्दधियां निर्गुण इति भ्रमः स्यादिति समस्यैकवचनेन च निर्दिशन् दोषसमानाधिकृतैकोऽपि गुणो नास्तीति गुणनिषेधं बोधयामासेति ज्ञेयम् । तर्हि गर्हितस्य तव तद्दर्शनं कथं कथयेत्यतः कथयति ॥ तथाऽपीति । स्वमायया स्वेच्छया लोकाश्रयसम्भवाय लोकानामाश्रयस्याधारस्य सम्भवो युक्तता तस्मै । मयेत्थं नटनमाटीकितं चेल्लोकाः प्रवर्तन्ते तथा नो चेन्नेति । यदि ह्यहं, मम वर्त्मानुवर्तंत इत्यादेः । तानि जन्मादिचत्वारि । अनुकालं यस्तत्तत्कालमनुसृत्य ऋच्छति प्राप्नोति स मे गतिरिरिति पूर्वेण तस्मै नम इत्युत्तरेण वाऽन्वयो ज्ञेयः । निर्देशक्रमानुरोधेन परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति तानिति वक्तव्यम् । तथाऽपि तानीत्यनेन गुणदोषविषये नटनस्यापि विघटनेति त्याग एवेत्यभिप्रैति ग्रन्थकृदिति मन्तव्यम् । अथवा । विद्धवन्मुग्धवच्चैवेत्यादेर्जारत्वादेश्च प्रदर्शनं दृश्यत इति यदा तदा गुणदोषो जन्मकर्म नामरूपे इत्यन्वयः । ततश्च नपुंसकमनपुंसकेनेत्युक्तेः स च तानि च तानीत्येकशेषे तानीत्यस्य सम्भवो ज्ञेयः । विद्यते वित् विज्ञानित्वेन मतो यतिरर्जुनात्मा यस्य स तथा तस्य सम्बुद्धिः । ततत्वादन्यथाज्ञानं तीत्येव समुदीर्यत इति तात्पर्यान्तरोक्तेर्नविद्यवदज्ञवत्तिरन्यथामतिर्यस्य तस्य सम्बुद्धिरिति वा । हे लोकाश्रय । सहस्रशीर्ष्णोऽस्य बतैकमूर्ध्नि । धराऽखिलेयं ननु सर्षपायतीत्यादेः । अगुण अग्रजत्वादनप्रधानबल । यस्य च न जन्म नैतत्कुले जननमिति ज्ञानमित्यर्थः । तथा कर्म च । भगवान्यं ननाम नमस्कृतवान् । यस्य रूपे आकारे । रूपमाकारश्लोकयोरपीति विश्वः । दोष एव विद्यते । नमनं तव मनःपूर्वकमित्याह ॥ सु अमाययेति । योऽहं च सम्भवायाग्रजानुव्रजनजनितमङ्गलार्थं भवन्तम् । अनु इति कालपदसमस्तमाकृष्यते । अतानि अनुसरामि । अनुकालं कालानुसारमृच्छति । जन इति शेषः । त्वं करोषि किं कालो बलीयानिति भावः । हे आय । सम्यग्ज्ञान । सुदैव वा । स्वं भवन्तं मां वा । अनुयाता । अनुजेति यावत् । न्यनुका निश्चयेन अनुकाः । अनुकामिकेति साधुः । कामिके कमितानुक इत्यमरः । यस्याः सा । अलमृच्छति । गच्छति । हे अगुणद कुलापकीर्त्यादिदोषद । उष एव प्रातरेव ऋच्छतीति वा । अहं स्वमायया कापट्येन भवन्तमतानि । स त्वनुकालं समयमनतिक्रम्य । ऋच्छतीति योऽवदत्स कृष्णो मम गतिरिरिति तस्मै नम इति वाऽन्वयः । यश्च स्वमाययाऽनुकालं कालयवनं निन्दित्वा ऋच्छत्यगच्छत्स इति वा । यो भगवान्मायया फल्गुणवचनेन तथा निश्चयेन । तथा निश्चय इति विश्वः । आपि प्रापित इति वा । क्लिष्टतोऽक्लिष्टता कार्ष्णी भोजना योजना पुरः कर्तुं

शक्यमपि आदराद्विस्तरादुपरम्यते । यस्य जन्म कर्म वा न नास्ति तथाऽपि यस्तानि ऋच्छति तद्विषये नविदज्ञोऽप्यहं यते प्रयत्नम् करोमीति वा । प्रयत्नमेकमग्रत इत्यादेरिति वा ।। ८ ।।

छलारी — देवदत्तवद्भगवतो जन्मादिकं नास्तीत्याह ।। न विद्यत इति । कर्मक्लेशहेतुर्नास्ति । हरेरप्रसिद्धत्वान्नाम नास्ति । प्राकृतरूपराहित्याद्रूपं च नास्ति । गुणदोषः सत्वादिगुणनिमित्तक-दोषोऽज्ञानदुःखादिश्च । निरनिष्टो निरवद्य इति श्रुतेः । ननु रामकृष्णादिरूपेण जन्मादिदर्शनात्कथ-मेतदित्यत आह ।। तथाऽपीति । यद्यपि देवदत्तस्येव हरेर्जन्मादिकं नास्ति तथाऽपि यो हरिः स्वमायया स्वेच्छया लोकत्रयस्य संभवाय सुखप्राप्तये तानि जन्मादीन्यनुकालं काले काले ऋच्छति स्वीकरोति तस्मै नम इत्युत्तरेणान्वयः ।। ८ ।।

लिङ्गेरी — ननु नारायणस्य सृष्ट्यादिना साध्यप्रयोजनसत्वे सृष्टेः पूर्वं तदभावादपूर्णता । तस्याभावेऽपि तत्र प्रवृत्तौ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति न्यायादतिमन्दता स्यात् । किं च जन्मकर्मादिमत्त्वे देवदत्तादिवज्जगत्स्रष्टृत्वाद्यनुपपत्तिः । अपि चास्यान्यप्रेर्यतया जन्मादिमत्त्वे तस्यैवोत्तमत्वात्तत्प्रार्थनैवोचिता नास्येतीमां शङ्कां भगवतो नारायणस्यावाप्तसर्वाभीष्टतया जगत्सृष्ट्यादिसाध्यप्रयोजनाभावेऽपि त्रैलोक्यस्थस्वभक्तानां मोक्षादिशुभफलप्राप्त्यै अन्याप्रेरित-दुष्कर्माद्यप्राप्तप्रादुर्भावलक्षणजन्मादिमत्त्वेन न काऽप्यनुपपत्तिरिति परिहरति ।। न विद्यते यस्येति । यस्य हरेः । यद्यपि जन्मादिदुष्कर्मान्यप्रेरणाप्राप्तं न विद्यते । कर्म च स्वापेक्षितफलाय कर्तव्यम् । नामरूपे निरर्थकसांकेतिकप्राकृतादिलक्षणे न विद्येते । गुणः सत्त्वादिः सादिविनाशित्वादिदुष्ट आनन्दादिरपि न विद्यते । तथाऽपि अनुकालं तत्तत्काले लोकत्रयसंभवाय त्रैलोक्यजनशुभप्राप्त्यै स्वमायया स्वेच्छयैव तानि जन्मादीनि ऋच्छति प्राप्नोति । देवस्यैषः स्वभावोऽयमाप्तकामस्य का स्पृहा । ज्ञानिनां मोक्षदश्च । अनन्यचोदितम् । निष्कलंकः शुद्धो देव एको नारायणः । न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि । न मां कर्माणि लिंपन्तीत्यादिप्रमाणप्रसिद्धिर्वाशब्दसूचिता । नन्वेवमप्युत्पत्त्यादिदोषराहित्यं कुतः । यत्र गुणास्तत्र दोषा इति दोषस्यापि संभवादित्यतो दोष एव दोषत्वावच्छिन्नसर्वोऽपि नास्तीत्याह ।। दोष एव न विद्यत इति । वाशब्देन जन्म असतः सत्तासंबन्धलक्षणं न विद्यते प्रादुर्भावरूपं विद्यते । कर्म च स्वप्रयोजनाय कर्तव्यं न विद्यते भक्तानुग्रहाय कार्यं विद्यते । नाम च निरर्थकं सांकेतिकं न विद्यते सार्थकं विद्यते । रूपं च भौतिकं प्राकृतं न विद्यतेऽप्राकृतं विद्यते । गुणः सत्त्वादिर्न विद्यते आनन्दादिर्विद्यते इति व्यवस्था चोच्यते । अजोऽपि सन्नव्ययात्मा । संभवाम्यात्ममायया । अरूपो

भूतवर्जनात् । त्रिगुणवर्जितमित्याद्युक्तवक्ष्यमाणप्रमाणात् । तस्मै ब्रह्मणे नम इत्युत्तरेणान्वयः । न च मन्तव्यं हरेः स्वरूपतो जन्माद्यभाव एव किं न स्यात्कुत इयं व्यवस्थेति । जन्मादिसद्भाव-ज्ञापकोक्तप्रमाणविरोधात् । उरुरूपाया श्चर्यकर्मण इत्याद्युत्तरग्रन्थविरोधाच्च ॥ ८ ॥

तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये ।
अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥

सत्यधर्मीया — तस्मै परेशाय परेषां ब्रह्मादीनामीशाय स्वामिने । या ईशः ईशः पराया ईशः । परपदार्थस्य तादात्म्यसम्बन्धेन ईशदार्थे योग्यतयाऽन्वयः । गतम् । परा च सा ई च परे तस्याः परयाः शं यस्मात्स तस्मै वा । एकारान्तस्त्रीलिङ्गः परेशब्दः । अनन्तशक्तये । अनन्ता बह्वोऽप्रतिबद्धा वा शक्तयो यस्य तस्मै । सर्वोपिता च तद्दर्शनात् । परास्य शक्तिर्विविधैव श्रूयत इत्यादेः । अनन्तस्य शेषस्य । योऽनन्तनामा गरुडस्तदंसक इत्याचार्योक्तेर्गरुडस्य वा शक्तिर्येन तस्मा इति वा । अरूपाय प्राकृतरूपरहिताय । उरुरूपाय उरूणि रूपाणि यस्य स तथा । सरूपत्वमरूपत्वं चासम्भावितमितरत्रात्र कथमित्यतः सम्भावकं लक्षणमाह ॥ आश्चर्यकर्मण इति । आश्चर्यमद्भुतं कर्म यस्य तस्मै । आचर्यतेऽभिनीयत इत्याश्चर्यम् । आश्चर्यमनित्य इति निपातनात्साधुः । विस्मयोऽद्भुतमाश्चर्यमित्यमरः ॥ ९ ॥

छलारी — उरुरूपाय बहुरूपाय । आश्चर्यकराणि कर्माणि यस्य तस्मै नमः ॥ ९ ॥

लिङ्गेरी — हरेः स्तुतावशक्तानां भूयिष्ठान्ते नम उक्तिं विधेमेत्युक्तनतिरेव गतिरिति भावेनादराद्भूयो नमति ॥ तस्मै नम इत्यादिना । परेशाय ब्रह्मादिमुक्तस्वामिने । अनन्तशक्तये देशकालापरिच्छिन्नसामर्थ्यवते । तस्मै ब्रह्मणे नारायणाख्यपरब्रह्मणे । नमोऽस्तु । प्राकृतभौतिकरूपरहितायारूपाय । रुग्मवर्णं सुवर्णं ज्योतिः । शुक्लो रक्तस्तथापीत इदानीं कृष्णतां गत इत्यादिश्रुतिस्मृतिप्रमिताप्राकृतभौतिकानश्वरोत्कृष्टरूपवते । अत एवाश्चर्यकर्मणे तस्मै नारायणाय नमः ॥ ९ ॥

नम आत्मप्रदीपाय साक्षिणे परमात्मने ।
नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥

सत्यधर्मीया — आत्मप्रदीपाय स्वप्रकाशाय । जीवस्वरूपप्रकाशकाय वा । गिरां वचनानां विदूराय साकल्येनागोचराय मनसश्च विदूराय । गिरामिति चेतसामित्यत्र सति बहुवचने मनसामिति वक्तव्ये यन्मनस इति जगौ तेन यतो वाचो निवर्तंतेऽप्राप्य मनसा सहेति श्रुतिमनुचकारेति ज्ञेयम् । चेतसां वृत्तिभेदाद्बहुवचनम् । यद्वा बहुवचनमाद्यर्थे । चेतआदीनाम् । अशब्दमस्पर्शमरूपम् । न तत्र चक्षुर्गच्छतीत्यादेः ॥ १० ॥

छलारी — आत्मैव प्रदीपः प्रकाशो यस्य तस्मा आत्मप्रदीपाय स्वप्रकाशकायेत्यर्थः । गिरां वचसां मनसश्चेतसामपि चित्तवृत्तीनामपि विदूराय साकल्येनाविषयाय । यतो वाचो निवर्तन्तेऽप्राप्य मनसा सहेति श्रुतेः ॥ १० ॥

लिङ्गेरी — आत्मप्रदीपाय स्वप्रकाशाय । आत्मनां मोक्षयोग्यचेतनानामेव स्वाराधनेन प्रकाशमानाय । प्रकाशश्च कर्मण्यभ्यासादिति सूत्रात् । साक्षिणे साक्षात्सर्वजगद्द्रष्ट्रे । परमात्मने चेतनोत्तमाय । आत्मेश्वरमिति श्रुतेः । तस्मै नमः । गिरां वेदवचसां मनसोऽन्तःकरणस्य चेतसां तद्वृत्तिज्ञानानामपि विदूराय साकल्येनागोचराय । तस्मै नमः । यतो वाचो निवर्तन्तेऽप्राप्य मनसा सहेत्यादेः ॥ १० ॥

सत्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिताम् ।
नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥

सत्यधर्मीया — तर्हि कथंकारं स लभ्यत इत्यत आह ॥ सत्त्वेनेति । सत्त्वं ज्ञानं व्यवसायो वा । सोऽपि ज्ञानपूर्वकः । बलज्ञानसमाहारः सत्त्वं केवलमेव चेत्यभिधानम् । सत्त्वं व्यवसाय इति विश्वः । तत्सत्त्वं कथं लभ्यत इत्यतस्तद्धेतुमाह ॥ नैष्कर्म्येण । निष्कर्म निवृत्तिमार्गस्तत्साध्यमिति नैष्कर्म्यम् । तेनेति । विपश्चितां ज्ञानिनाम् । विपश्चितेति पाठे ज्ञानिना कर्त्रेत्यर्थः । विद्वान्विपश्चिदित्यमरः । विप्रकृष्टे निश्चिनोति चिन्तयति वा विपश्चित् । सर्वः संसारः पृषोदरादिः । कैवल्यनाथाय । मुक्तिस्वामिने । केवलस्य बन्धवैधुर्येण भावः । गुणवचनेति ष्यञ् । मुक्तिः कैवल्यनिर्वाणेत्यमरः । स्वयं निर्वाणम् । प्राकृतशरीराभोग्यं यत्सुखं तस्य संविदनुभवो यस्य । निर्वाणाः प्राकृतदेहहीनास्तेषां सुखं संविच्च येन स तस्मै वा । अथवा कैवल्यनाथाय निर्वाणसुखसंविद इति व्यधिकरणे चतुर्थ्यौ । तत्र प्रथमा षष्ठ्यर्थे । यद्वैकपदम् । कैवल्यस्य मुक्तेर्नाथो नाथनं तं प्रत्ययत इति कैवल्यनाथायः, तस्य निर्वाणसुखसंविच्च यस्मात्स तथा तस्मै । अथवा । बहुव्रीह्यन्तर्गर्भार्थिकक्रियाभिप्रेरणाच्चतुर्थ्येव ।

आयाः लाभरूपाः निर्वाणसुखसंविदोऽयेन शुभदैवेन ता येनेति तस्मै वा । कैवल्यं नाथति याचत इति स तथा । तदधिकारी तस्मै । निर्वाणं लिङ्गभङ्गस्तस्य तत्सम्बन्धिन्यौ सुखसंविदौ स्वरूपभूते येन स । तस्मै । निर्वाणं मुक्तिस्तस्य यत्सुखं तस्य संविदनुभवो येन स तस्मै वा ॥ ११ ॥

छलारी — विपश्चितां नैष्कर्मेण निवृत्तधर्मलब्धेन सत्त्वेन ज्ञानेन प्रतिलभ्याय प्राप्याय कैवल्यनाथाय मुक्तिस्वामिने निर्वाणसुखसंविदे निर्वाणसुखस्य स्वरूपसुखस्य संविदनुभवो यस्य तस्मै ॥ ११ ॥

लिङ्गेरी — वेदाद्यगोचरत्वेऽस्य आत्मा वा अरे द्रष्टव्य इत्यादिश्रवणविध्यादिवैयर्थ्यमित्याशङ्क्य मोक्षयोग्यानां ज्ञानभक्त्यादिना तस्य प्राप्यत्वान्न वैयर्थ्यमित्यभिप्रायेणाप्युक्तमात्मप्रकाशायेत्ये- तत्स्पष्टयति ॥ सत्वेनेति ॥ विपश्चितां सम्यग्ज्ञानयोग्यानां तद्वतां च नैष्कर्म्येण निवृत्तिमार्गेण प्राप्तेन सत्त्वेन वैराग्यभक्त्यादिना शुद्धेनान्तःकरणेन तज्जन्यसम्यग्ज्ञानेन च प्रतिलभ्याय प्राप्याय । निर्वाणसुखसंविदे प्राकृतशरीरशून्याय सुखज्ञानरूपिणे । कैवल्यनाथाय मोक्षस्वामिने । तस्मै नम इति ।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥

ज्ञानवान्मां प्रपद्यन्त इत्यादेः ॥ ११ ॥

**नमः शान्ताय घोराय गूढाय गुणकर्मणे ।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥**

सत्यधर्मीया — बाहुरूप्यमरूपायेत्युक्तं निरूपयति ॥ नमःशान्तायेति । शान्ताय सौम्यरामादिरूपाय सुखनिर्णायकाय वा । अन्तो निर्णय इति गीताभाष्योक्तेः । घोराय वैरिघोरनृसिंहादिरूपिणे । गूढायेति पाठे स्वप्रसादमन्तरेणाप्रकाशायेत्यर्थः । मूढायेति पाठे मीनादिहीनयोनय इत्यर्थः । गुणत्रयकार्यप्रवर्तकत्वेनैकोऽप्येवं व्यवह्रियत इति भावः । सत्त्वादि- मत्त्वेनैवैवंविध इति किं नाभिधास्यत इत्यतोऽभिधत्ते ॥ गुणकर्मण इति । गुणानां सत्त्वादीनां कर्माणि व्यापाराः सन्तोऽसन्तश्च येन स तस्मै । स्वतन्त्रत्वात्सर्वं नासम्भवीति वाऽऽह ॥ गुणकर्मण इति ॥ गुणाः कर्माणि जीवा अप्रधाना यस्मात् । करोऽस्मिन्मीयत इति कर्म जीव उदाहृत इति

गीतातात्पर्योक्तेः । विस्तरस्तु प्राक् स्कन्धे सटीकोदाहृतिकृतोऽनुसन्धेयः । निर्विशेषायावतारेषु विशेषविकलाय । साम्याय । अर्श आद्यचि वा, स्वार्थे ष्यञि वा । समाय तत्तद्योग्यतानुसारेण । अमगत्यादौ । अम्याः स्वप्रसादासादकत्वेनाङ्गदेवतास्तत्सहितायेति वा । पोरदुपधादिति यत् इति वा । ज्ञानघनाय ज्ञानात्मा तस्मै । ज्ञानामृतवर्षणमेघरूपाय वा । ज्ञानेन महते वा ॥ १२ ॥

छलारी — शान्ताय सतां सौम्यरूपाय खलानां घोराय क्रूरायासतां मूढाय मोहजनकाय । मुह वैचित्य इति धातोः । मूढायेति पाठेऽव्यक्तायेत्यर्थः । गुणकर्मणे तत्तद्योनिगुणकर्महेतवे निर्विशेषा-यावतारेषु विशेषरहिताय । साम्याय । भावप्रधानो निर्देशः । तत्तद्योग्यतानुसारेण समाय ज्ञानघनाय ज्ञानमूर्तये ॥ १२ ॥

लिङ्गेरी — शान्ताय वासुदेवादिरूपाय । घोराय संकर्षणजामदग्र्यादिरूपाय । गूढाय वराहमत्स्यादिरूपाय । गुणकर्मिणे ज्ञानानन्दादिगुणवते सृष्ट्यादिप्रशस्तकर्मवते । तस्मै नमः । निर्विशेषाय स्वोत्तमरहिताय । स्वमूलरूपावताररूपेषु गुणकर्मादिभिर्विशेषशून्याय । स्वनियम्य-नीचोच्चतया प्राप्तविशेषशून्याय । तत्तद्योग्यतातिरेकेण शत्रुमित्ररहिताय । ज्ञानघनाय च पूर्णज्ञानाय । तस्मै नमः । मत्तः परतरं नान्यत् । न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीत्यादेः ॥ १२ ॥

क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ।
पुरुषायाऽऽत्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥

सत्यधर्मीया — नैर्विशेष्यस्थेम्नेऽवतारानवतारयोग्यैः गुणैर्विशिष्टं भगवन्तमभिष्टौति ॥ क्षेत्रज्ञायेति । क्षीयतेऽत्रेति क्षेत्रं शरीरादि । तज्जानातीति स तथा । ज्ञा अवबोधने अतोऽनुपसर्गे कः । क्षेत्रमव्यक्तम् । महदहङ्कारादिकं जानातीति स तथा । तस्मै । महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । एतत्क्षेत्रमिति गीतागीतेः । विवृतं विस्तरतः षष्ठेऽनुसन्धेयम् । सर्वाध्यक्षाय सर्वस्वामिने । साक्षिण इति गतम् । पुरुषायेति चात्ममूलाय चेतिवत् । मूलप्रकृतये । मूलस्य प्रतिष्ठापकस्य तत्सम्बन्धिनी प्रकृष्टा कृतिर्यस्य तस्मै । प्रकृतिः प्रकृष्टकरणादित्युक्तेर्मूलश्चासौ प्रकृतिस्तस्मा इति वा ॥ १३ ॥

छलारी — क्षेत्रमव्यक्तं महदहंकारादिकं जानातीति क्षेत्रज्ञस्तस्मै महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । एतत्क्षेत्रं समासीनेति गीतावचनात् । सर्वाध्यक्षाय सर्वव्यापिने साक्षिणे जीवकर्मद्रष्ट्रे पुरुषाय पूर्णषड्गुणायात्मनां जीवानां मूलायाश्रययाय मूलप्रकृतये मूलप्रकाराय ॥ १३ ॥

लिङ्गेरी — क्षेत्रज्ञाय सर्वप्राणिशरीरान्तर्नियामकतयाऽन्तःस्थितसर्वव्यापाराद्यभिज्ञाय । सर्वाध्यक्षाय सर्वजगत्स्वामिने साक्षिणे तुभ्यं नमः । आत्ममूलाय ब्रह्मादिचेतनसृष्ट्यादिकर्त्रे । मूलप्रकृतये चिज्जडप्रकृत्योरप्याश्रयत्वादिना मूलप्रकृतिनाम्ने । पुरुषाय तुभ्यं नमः । क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेत्यादेः । क्षेत्रज्ञायेत्यनेन हरेर्जीवाभेद उच्यत इति प्रतीतिस्तत्त्ववादि-कण्ठाभरणेऽस्मत्कृते परिहृता द्रष्टव्या ॥ १३ ॥

सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ।
असत्याच्च विमुक्ताय सदाभासाय ते नमः ॥ १४ ॥

सत्यधर्मीया — सर्वेन्द्रियगुणद्रष्ट्रे । सर्वेतीन्द्रियविशेषणमिव गुणविशेषणम् । सर्वाणि च तानीन्द्रियाणि च तेषाम् । सर्वे गुणाः शब्दाद्यास्तान् द्रष्टा तस्मै । सर्वप्रत्ययहेतवे । सर्वेषां प्रत्ययानां ज्ञानानां कारणायोपदेशेनार्जुनादिसर्वविश्वासकारणाय । असत्यात् सति सज्जनसङ्घे साधु सत्यं तन्न भवतीत्यसत्यं दुर्जनजातं तस्माद्विमुक्तस्य । सदाभासाय । सन्नाभासो यस्य प्रकाशः स तस्मै । सन्तो वाय्वाद्याः साक्षात्परम्परया वा आभासाः प्रतिबिम्बरूपा यस्येति । आभास एव च । आभासकोऽस्य पवनः पवनस्य रुद्र इत्यादेः । सदा शाश्वतिकोऽविलुप्त आभासो ज्ञानं यस्येति वा । सदाभासं आ सम्यक् स्वातन्त्र्येणैतीति सदाभासयन् तस्मा इति पदमेकं वा ॥ १४ ॥

छलारी — सर्वेन्द्रियाणां ये गुणाः शब्दादिविषयास्तेषां द्रष्ट्रे । सर्वेषां प्रत्ययानां ज्ञानानां कारणाय । असत्यादसाराद्विमुक्ताय नित्यमुक्तायेत्यर्थः । अनृताद्विमुक्तायेति वा । सदाभासाय सन्वायुराभासः प्रकाशो यस्य तस्मा इति वा ॥ १४ ॥

लिङ्गेरी — क्षेत्रज्ञायेत्याद्युक्तं विवृणोति ॥ सर्वेति । सर्वेन्द्रियगुणद्रष्ट्रे श्रोत्राद्यन्तःकरणान्तै-कादशेन्द्रियाणां गुणानां शब्दादितद्विषयाणां साक्षात्कारवते । सर्वेषां जीवानां प्रत्यायानां ज्ञानानां हेतवे कारणाय । असत्यादयथार्थवचनात् विमुक्ताय । 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमि'त्यादि सत्यप्रतिज्ञाय च । सदा सर्वविषयकाप्रति-हतज्ञानतयासदाभासाय । तुभ्यं नम इत्यनेन गजेन्द्रेण स्वस्यापि तद्भक्ततया स्वानुद्धरणमनुचितं हरेरिति ज्ञाप्यते । सन्निर्दुष्टः आभासो देहो यस्य स तथा तस्मै । नम इत्यनेन स्वकृतस्तोत्राश्रोतृत्वादिकं तस्य निवारयति । तस्य देहस्य मायाकल्पितत्वं परिहरति ॥ असत्याच्च विमुक्तायेति । सदेहःसुखगन्धश्च ज्ञानभाःसत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षरः । उपलब्धिमात्रधाम्ने ज्ञानविज्ञानमूर्तय इत्यादेः ॥ १४ ॥

नमो नमस्तेऽखिलकारणाय नारायणायार्तिविनाशनाय ।
सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ।। १९ ।।

सत्यधर्मीया — इयता प्रबन्धेन प्रस्तुतं स्तुतं च वस्तु धर्मैरसाधारणैर्धारणावद्भिर्ज्ञातं सदपि न ज्ञातं साधरणैर्नेदं मुद्रणेन दर्शितमिति पामरामरप्रमितनाम्ना प्रकाश्य नमति ।। नमो नमस्ते नारायणेति । अखिलकारणाय समस्तकारणाय । अदृढकारणं चास्वतन्त्रकारणम् । तन्न भवतीति । अखिलकस्य समग्रसुखस्य स्वरूपसुखस्य वाऽरणाय शरणायेति । नारायणाय गतम् । आर्तिविनाशनाय पीडापीडकाय । रामादेतस्य च न विशेष इत्यप्याह ।। आर्तिः पिनाककोटी । तस्य विनाशनस्तस्मै । आर्तिः पीडाधनुष्कोटयोरिति विश्व इति । हे नारायण ते नमः । अया अज्ञास्तेषामार्तिरपि येन स च । येति ज्ञानं समुद्दिष्टमिति तात्पर्यान्तरात् । विनाऽशनेनाशनं वा । अनश्नन्न्योऽभिचाकशीती- त्यादेर्वर्तत इति स च तथा । तस्मै । एवमुपासने ममापि विनाऽशनं न तु तनुयाद्विनाशनमिति समयोचितं वच इति ज्ञेयम् । सर्वागमाम्नायमहार्णवाय । सर्वे चागमाः पौरुषेया आम्नाया वेदास्तेषाम् । महार्णवास्तन्नदीनां तदधिप इव तस्मा इत्यर्थः । नदीनां सागरो गतिः । सर्वे वेदा यत्पदमामामनन्तीत्यादेः । सर्वागमानां पौरुषेयापौरुषेयाणामाम्नायः सन्ततिस्तस्य महार्णव इति वा । आगमः शास्त्र आम्नाये । आम्नायः सम्प्रदाये स्याद्वेदाभ्यासे च सन्तताविति विश्वः । अपवर्गाय मोक्षरूपाय षड्वर्गरहिताय वा । परायणाय मुख्याश्रयाय ।। १९ ।।

छलारी — पूर्वोक्तविशेषणविशिष्टः क इत्यतस्तं निर्दिशति ।। नारायणायेति । आर्तेर्दुःखस्य नाशाय । एवंभूते नारायणे किं प्रमाणमित्यत आह ।। सर्वागमेति । सर्वागमानां पञ्चरात्रादीनामाम्नायानां साङ्गवेदादीनां च महार्णवाय नदीनामिव पर्यवस्थानाय वेदादिमुख्यतात्पर्याय विश्वासाय विषयायेत्यर्थः । अपवर्गाय मोक्षहेतवे परायणाय परेषां मुक्तानामाश्रयाय ।। १९ ।।

लिङ्गेरी — इदानीं गजेन्द्रः स्वस्तुत्यं प्रसिद्धतन्नाम्ना नारायणेत्यनेन ख्यापयन्स्वोक्त-वक्ष्यमाणगुणैस्तस्य विशिष्टत्वे वेदशास्त्रमेव प्रमाणमिति सूचयन्सर्वापत्परिहारकतया तं स्तुवन् भूयो भूयो नमति भक्त्युद्रेकेण ।। नमो नमस्त इति । अखिलकारणाय निःशेषचिदचिज्जगत्कर्त्रे । स्वशरणागतार्तेः विपदो विनाशनाय निःशेषपरिहारकाय । स्वोक्तवक्ष्यमाणगुणविशिष्टत्वे प्रमाणतया पञ्चरात्रभारताद्यागमऋगादिवेदलक्षणसमुद्रवते । परायणाय मुक्ताश्रयाय । अपवर्गाय नित्यमुक्ताय । नारायणाय ते नम इति । स इदं सर्वमसृजत । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । नारायणपरा वेदाः । वेदैश्च सर्वैरहमेव वेद्यः । वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च

मध्ये च विष्णुः सर्वत्र गीयते । मुक्तोपसृप्यव्यपदेशात् । मुक्तानां परमा गतिः । द्वावेतौ नित्यमुक्तौ प्रकृतिश्च परमश्चेत्यादेः ॥ १५ ॥

गुणारणिच्छन्नचिदूष्मपाय
तत्क्षोभविस्फूर्जितमानसाय ।
युक्तात्मभिः स्वहृदये परिभाविताय
ज्ञानात्मने भगवते नम ईश्वराय ॥ १६ ॥

सत्यधर्मीया — सर्वप्रत्ययकारणमयमिति सर्वप्रत्ययहेतव इत्यनेनोक्तम् । तर्ह्यन्यस्तदाविकः किमित्यतो नेत्याह ॥ गुणारणीति । गुणाः सत्त्वाद्या एवारणिर्निर्मथ्यदारु । तत्र छन्नश्चिदाख्य ऊष्मो घर्मस्तेन तत्कारणं वह्निर्गृह्यते । यद्वा तपो वा ऊष्मा । पूर्ववदेव विग्रहः । त्विड्वाचकः स्त्रीलिङ्गः । ऊष्मा घर्मेऽश्रुणि तथा ज्येष्ठेऽप्युष्मा स्त्रियां त्विषि । तथानान्ते च ऊष्मातपनिदाघयोरिति वोपालितः । तं तद्वा पातीति स तथा तस्मै । निर्मथ्यदारुणि त्वरणिर्द्वयोरित्यमरः । स्वयं तदसम्बद्ध इत्याह ॥ तदिति । तेषां गुणानाम् । तत्कारणीभूतप्रकृतिरप्युपलक्षणीया । तदादिगुणानां क्षोभे कार्योन्मुखीभवनेऽपि विस्फूर्जितं स्फूर्जितं तद्विकारस्तद्विरुद्धं विस्फूर्जितम् । मानसं यस्य स इति । प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान्सृष्ट्यर्थं जगतो विभुरित्यादेः तत्क्षोभे विस्फूर्जितं व्यावृत्तं मानसं यस्येति स तस्मै । टु ओ स्फूर्जावज्रनिर्घोष इति स्मरणं यद्यपि तथाऽप्यनेकार्था हि धातव इत्यादेरिदमाद्यर्थतेति ज्ञेयम् । अज्ञेयोऽपि दयापयोधिरिदंगुणलुब्धोऽस्मद्देव इत्यावेदयति ॥ युक्तात्मभिरिति । युक्त आत्मा मनो येषां ते तथा तैः । परिभाविताय चिन्तिताय । परिभावितपदं तदुक्तीः परिभाव्येत्युदाहरणपूर्वकं विभावितार्थं प्रागस्माभिस्ततोऽनुसन्धेयम् । योगिनां हृदये हरिरित्युक्तेः स्वहृदय इत्यनेन योगित्वं तेषामभिप्रैति । युक्तात्मभिः परितो भाविताय वा । सर्वत्र विदितात्मनामित्यादेः । परि स्यात्सर्वतो भावे व्याप्ताविति विश्वः । नमो ज्ञानघनाय चेत्यनेन ज्ञानेन घन इति वा, ज्ञानं घनं यस्मिन्निति वा विग्रहे मन्दानां भेदशङ्का स्यात्तां शमयितुमाह ॥ ज्ञानात्मन इति । अनेन भगवत इत्यपि शोधितार्थम् । तर्हि गुणित्वादिव्यवहाराणां किं भैषिज्यमित्यत आह ॥ ईश्वरायेति । तादृशवृत्तिर्नान्यत्र तत्रैश्वर्याभावादिति भावः ॥ १६ ॥

छलारी — सत्त्वादिगुण एवारणिः काष्टविशेषस्तत्र छन्नं तिरोहितं चिदुष्मपाय ज्ञानाख्याग्निं पाति व्यञ्जयतीति गुणारणिच्छन्नचिदुष्मपः तस्मै । तेषां गुणानां क्षोभोऽपि कार्योन्मुखत्वे

विस्फूर्जितमेकप्रकारं मानसं यस्य तस्मै । सत्त्वादिगुणशक्त्युद्रेकावस्थायामपि मनोविकारशून्यायेत्यर्थः । युक्तात्मभिर्वशीकृतमनआदीन्द्रियैः पुरुषैः परिभावितायेश्वरायाचिन्त्यैश्वर्ययुक्ताय ।।१६।।

लिङ्गेरी — सर्वप्रत्ययहेतव इत्युक्तं स्पष्टयति ।। गुणेति । गुणारणिच्छन्नं सत्त्वादिगुणरूपाग्निमथनकाष्ट आच्छादितं यच्चिदूष्म ज्ञानाख्यं तेजस्तत्पातीति गुणारणिच्छन्नचिदूष्मपस्तमै । बलमानन्दओजश्चेत्यादेः । शब्दादिगुणारणिच्छन्नज्ञानदानादिना तद्रक्षकाय । तेषां सत्त्वादिगुणानां क्षोभे उद्रेकावस्थायामपि विस्फूर्जितं निर्विकारतयाऽतिप्रकाशमानं मानसं मनो यस्य तस्मै । युक्तात्मभिर्वैराग्यभक्त्याद्युपेतान्तःकरणैरधिकारिभिः स्वहृदये परिभाविताय ध्याताय । ज्ञानात्मने केवलज्ञानात्मकशरीरवते । ईश्वराय सर्वस्वामिने भगवते नारायणाय नमः । ज्ञानात्मन इत्यस्य ज्ञानस्वरूपायेत्यर्थो जीवसाधारण्येन परमात्मस्तुतावनुचितः ।। १६ ।।

यं धर्मकामार्थविमुक्तकामा भजन्त इष्टां गतिमाप्नुवन्ति ।
किन्त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ।। १७ ।।

सत्यधर्मीया — सर्वेऽपि पुरुषार्थाः सर्वेश्वरादेतस्मादेव भवन्तीति न भवन्ति तदितरे केऽपि नाकनिकेतनास्तदर्थमर्थ्या इत्याह ।। यमिति । धर्मकामार्थविमुक्तिकामाः पुरुषार्थचतुष्टयेच्छावन्तो यं भजन्तः सेवमाना इष्टां स्वस्वापेक्षितां गतिमाप्नुवन्ति । आशिष ऐहिकीः संपदः प्राप्नुवन्तीति किमाश्चर्यमिति भावः । तुशब्दो यथाऽधिकारं फललाभ इति विशेषद्योतकः । साऽपि विमुक्तिर्निराकारब्रह्मभाव इति नेत्याह ।। अव्ययम् । कदाऽपि विनाशरहितम् । देहम् । ज्ञानानन्दात्मकं राति वितरति । यद्वा । आशिषो राति । देहमिदानीन्तनम् । अव्ययं प्रस्तुतबाधाबाध्यत्वेन नाशशून्यं करोतु । अप्यनन्तरं विमोक्षणं च करोत्वित्यन्वयः । एतत्पक्षे विशब्द एव मुक्तेः साकारतां द्योतयति । अभद्रदयः पुरुकरुण इति सर्वत्र हेतूक्तिः । अदभ्रधिय इत्यप्यदभ्रधियः पठन्ति । तत्र अदभ्राऽनल्पा धीर्यस्य स इत्यर्थो ज्ञेयः ।। १७ ।।

छलारी — भजतां सर्वपुरुषार्थावाप्तिरनेनैव स्यादिति भावेन स्वापेक्षितं प्रार्थयते ।। यमिति । यं भजन्तस्तत्प्रसादादिष्टां गतिं स्वापेक्षितं पुरुषार्थमाप्नुवन्ति । कामितमेव प्राप्नुवन्ति किमिति शङ्कते ।। किं त्विति । उत्तरमाह ।। आशिष इति । प्रार्थितान्पुत्राद्यवान्तरपुरुषार्थानपि प्राप्नुवन्तीत्यन्वयः । मोक्षमपि साकारमेव ददाति न निराकारमित्याशयेनाह ।। रातीति । अव्ययं नाशरहितं देहमपि मुक्तिं च राति ददाति । यः सोऽदभ्रदयो बहुदयो हरिर्मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थय इति ।। १७ ।।

लिङ्गेरी —— धर्मकामार्थविमुक्तिकामा धर्मार्थकामविमोक्षाख्यप्रधानचतुर्विधपुरुषार्था-कांक्षिणोऽप्यधिकारिणो यं नारायणं भजन्ते तेन नारायणेन स्वेष्टां स्वापेक्षितां गतिमाप्नुवन्ति । यश्च स्वभक्ताभिलषितं पुत्रैश्वर्याद्याशिषोऽपि राति ददाति । अव्ययं ध्वंसाप्रतियोगिनं ह्रासादिदोषवर्जितं च । देहं ज्ञानानन्दात्मकं तदावरणनिवर्तनादिना राति ददाति । स उक्तगुणविशिष्टो भगवान्नारायणो मे हृदयग्रन्थेर्लिंगशरीरादिरूपान्मोक्षणं करोतु । अनेन मम स्तुतिना ग्राहान्मोक्षमात्रेच्छा न किन्तु परममोक्षेच्छाऽपीति सूचितम् ॥ १७ ॥

एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ते वै भगवत्प्रधानाः ।
अत्यद्भुतं यच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥ १८ ॥

सत्यधर्मीया —— एकान्तानां न कस्यचिदर्थे नारायणो देवः सर्वमन्यत्तदर्थकमिति श्रुत्यर्थमनु-सन्दधदभिधत्ते ॥ एकान्तिन इति । स्वयमेकान्तिलोकान्तर्निविष्टोऽपि पारोक्ष्येण निर्दिशन् स्वस्यापक्वभक्तित्वमभिप्रैति । न त्वनैकान्तित्वम् । पार्षदतां गमितेनेति वक्ष्यमाणत्वात् । केचित्त्वेकान्तिन इत्यच्छिन्नभक्ता इत्यभ्युपगम्य परशुक्लत्रयमिति वर्णयन्ति । तत्पक्षेऽयं नैकान्तभक्त इति परोक्षव्यवहारः सम्भवति सुलग्न इति ज्ञेयम् । यस्य सकाशाद्ये कञ्चन कमप्यर्थं न वाञ्छन्ति । नार्थयन्ति । वै यतः । ते भगवत्प्रधाना इति एकान्तिनः । यच्चरितं एकान्तिलोकव्यापारं गायन्त इतरेऽपि आनन्दसमुद्रमग्नाः भवन्तीति भगवानेव प्रधानो मुख्येष्टो येषां ते तथा । अनेनार्थे नारायणो देव इत्यंशो विवृतः । कुतो नाकाङ्क्षन्ति मोक्षादिकमित्यत आह ॥ यच्चरितम् । भगवच्चरितं गायन्त आनन्दसमुद्रमग्नास्तस्मान्न वाञ्छन्तीति । यस्य सकाशात् ये कञ्चनार्थं न वाञ्छन्ति वै यतोऽत्यद्भुतं सुमङ्गलं ते भगवत्प्रधाना इत्येकान्तिनो यच्चरितमेकान्तिलोकव्यापारं गायन्त इतरेऽप्यानन्दसमुद्रमग्ना भवन्तीति तच्चरितमत्यद्भुतमिति भिन्नवाक्यतया योजयन्ति । तेषां भगवत्प्रधानपदेनैव गानानन्द-समुद्रमग्नतादेः सर्वस्य लाभभीतिर्मूलम् । तमक्षरमित्यस्य व्यवहितान्वयदोषश्च । प्राचीनविवरणे चोक्तविवरणरूपता चेति किञ्चित्सङ्कोचश्चेति ज्ञेयम् ॥ १८ ॥

छलारी —— अल्पभक्तत्वादहं पुरुषार्थं प्रार्थये । एकान्तभक्तास्तु न पुरुषार्थं प्रार्थयन्त इत्याह ॥ एकान्तिन इति । एकान्तिनो ये ते यस्य सकाशात्कञ्चनार्थं न वाञ्छन्ति । तं हरिमीड इत्युत्तरेणान्वयः । एकान्तिन इत्यस्य विवरणम् ॥ भगवत्प्रधाना इति । भगवानेव प्रधान इष्टत्वेन प्रार्थ्यो येषां ते तथोक्ताः । अनाकांक्षणे निमित्तमाह ॥ अत्यद्भुतमित्यादिना ॥ १८ ॥

लिङ्गेरी — ये एकान्तिनो भगवत्प्रपन्ना नारायणशरणागतास्ते यस्य भगवतो नारायणात् कञ्चन कमप्यर्थं न वाञ्छन्ति । एकान्तानां न कस्यचिदर्थे नारायणो देव इत्यादेः । तदाकांक्षाभावे निमित्तमाह । अत्यद्भुतं सुमंगलं यच्चरितं गायन्तः सन्त आनन्दमग्ना यत इति । नाहं तथैकान्तिकेष्वेकः । येन कस्यापि पुरुषार्थस्यानाकांक्षी स्याम् । किं चैवमापद्गतोऽप्यहं हृदयग्रन्थिमोक्षणमेवाशासे नास्य विपदो मोक्षणं प्राधान्यादिति स्वस्य मध्यमभक्तत्वं प्रकटितमित्यवगन्तव्यम् । एवंविधोऽहं तमनन्तमीड इत्युत्तरेणान्वयः ॥ १८ ॥

तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ।
अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे ॥ १९ ॥

सत्यधर्मीया — उपनिषदुक्तगुणकत्वेन स्तवने स हरिः स्वस्योपनिषीदतीति मन्वानस्तथा स्तौति ॥ तमिति । ॐमित्येकाक्षरं ब्रह्म । अक्षरात्सम्भवतीह विश्वम् । ब्रह्मविदाप्नोति परम् । अव्यक्तमचलम् । अध्यात्मयोगेन सुनिष्ठितेन । नेन्द्रियाणि नानुमानम् । वेदा ह्येवैनम् । वि मे कर्णा पतयतो विचक्षुः । सूक्ष्मात्सूक्ष्मतरं प्रपद्ये । तद्दूरे तद्वन्तिके । पूर्णमदः पूर्णमित्यादि श्रुतिप्रतीकानि पदानीति न परस्परकृत्यान्वेषणेन मनः खेदनीयमिति ज्ञेयम् । न क्षरतीत्यक्षरं ब्रह्म गुणपूर्णं परं लोकविलक्षणं परेशं तत्त्वेन सम्मतब्रह्माद्युत्तमम् । ब्रह्मपरम्परायाः । ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगा इत्युक्तेर्ब्रह्मणां जीवानां परम्परायास्तत्सहितरमाया वा ईशः स्वामी शं सुखं यस्मात्स तं वा । अव्यक्तम् । अन्तरेण स्वप्रसादम् । व्यक्तं विशेषेण संसारसम्बद्धं तन्न भवतीति वा तं तथोक्तम् । नक्तोषा सेत्यृग्भाष्ये, नक्ता स्यान्नाक्तो यस्मात्स सर्वत इति तट्टीकायां चाञ्जतेः क्त इति । आध्यात्मिको योगोऽधिक आत्मा नारायणस्तस्यायमाध्यात्मिकः । स चासौ योग उपायस्तेन गम्यो हि प्राप्यः । योगः प्राणायामादिस्तेनेति वा । अतीन्द्रियमितरेन्द्रियाण्यतिक्रम्य वर्तमानम् । अतीन्द्रियं तत्तदिन्द्रियव्यापारमतिक्रम्य अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णमित्यादेः सर्वेन्द्रियैः कृतसर्वव्यापृतित्वात्तथोच्यत इति तम् । स्तुत्येन्द्रियमुत्कृष्टेन्द्रियं वा । अतिशब्दः प्रशंसायामुत्कर्षे लम्भनेऽपि चेति विश्वः । अतिदूरम् । अतिक्रान्तो दूरमित्यन्तिके च विद्यमानमिति तद्वन्तिक इत्यर्थस्य च ग्रहणे समग्रश्रुत्यानुपूर्वी भवत्यनुकृतेति ज्ञेयम् । अनन्तं नाशरहितम् । अनितरप्रेरणया चेष्टमान इत्यनन् । तमबद्धं वा । आद्यमिदमग्र इत्यादेः आदौ जगतो भवम् । सर्वोपजीव्यं वा । आद्यात्रीभोग्यत्त्वादाद्य इत्युक्त इत्याद्यैतरेयोपनिषद्भाष्ये उपजीव्यत्वमेवाद्यत्वमिति भाष्योक्तेश्च । परिपूर्णं विश्वव्यापिनम् । पूर्णं पुरि वैकुण्ठे भवो णो निवृत्तिः

पुराणस्तत्सम्बन्धिसुखम् । परि योग्यतानुसारेण व्याप्तः पूर्णो येनेति तं वा । परि स्याद्व्याप्तौ निवसनेऽपि चेति विश्वः । ईडे स्तौमि । वृत्त्यन्तरे वाक्यान्तरं मूलमिति नोदाहृतं श्रुतिवैसंवाद्यमिति ज्ञेयम् ॥ १९ ॥

छलारी — उपनिषद्गुणवत्तया हरिं स्तौति ॥ तमक्षरमित्यादिना । कथम्भूतम् । अक्षरं नाशरहितम् । अक्षरात्संभवतीह विश्वमिति श्रुतेः । जीवस्यापि नाशरहितत्वात्तद्व्यावृत्त्यर्थं परं ब्रह्मेति । परब्रह्मशब्दवाच्यमित्यर्थः । ब्रह्मविदाप्नोति परमिति श्रुतेः । एतादृशं ब्रह्म कुतो न दृश्यत इत्यत आह ॥ अव्यक्तमिति । अव्यक्तमचलं शान्तमिति श्रुतेः । नन्वव्यक्तस्य ज्ञानं कथं स्यादिति तत्राह ॥ आध्यात्मिकेति । अधिकश्चासावात्माचाध्यात्मा हरिस्तत्सम्बन्ध्यात्मिको तेन योगेन श्रवणादिसाधनेन तज्जन्यप्रसादेनेत्यर्थः । गम्यं ज्ञेयमध्यात्मयोगाधिगमेन देवमत्येतीति श्रुतेः । अतीन्द्रियं साकल्येन सर्वेन्द्रियागोचरम् । न चक्षुर्गच्छति न वाग्गच्छति न मन इति श्रुतेः । सूक्ष्ममणुपरिमाणम् । सूक्ष्मात्सूक्ष्मतरं प्रपद्यत इति श्रुतेः । महत्परिमाणमप्यस्तीति सूचनायेवशब्दः । महतोऽपि महीयानिति श्रुतेः । अतिदूरमभक्तानामप्राप्यम् । तद्दूरे तद्वदन्तिक इति श्रुतेः । अनन्तं देशतः कालतो वस्तुतः परिच्छेदशून्यम् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । आद्यं आदिकालीनम् । तं च ब्रह्मेति श्रुतेः । आत्मा वा इदमेक एवाग्र आसीदिति श्रुतेः । परिपूर्णं सर्वरूपेषु सर्वगुणपूर्णम् । पूर्णमदः पूर्णमिदमिति श्रुतेः ॥ १९ ॥

लिङ्गेरी — अहं तं पूर्वोक्तगुणविशिष्टमक्षरं चतुर्विधनाशशून्यम् । परेशं चतुर्मुखादिमुक्तस्वामिनम् । अव्यक्तं पुरुषप्रयत्नेन स्वप्रसादमन्तरेण व्यक्तीकर्तुमशक्यम् । आध्यात्मिकयोगगम्यं मनःप्रणिधानभक्त्याद्युपायप्राप्यम् । चक्षुरादीन्द्रियाविषयम् । सूक्ष्ममिव स्थितम् । स्थूलत्वात् अनियतपरिमाणम् । दूरमिवान्तिकेऽपि सत्वात् । व्याप्तत्वात् । आद्यं आदिकाले स्थितम् । परिपूर्णं देशकालगुणैः पूर्णमनन्तं नारायणाख्यं परं ब्रह्म ईडे स्तौमि । अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता । नाशश्चतुर्विधः प्रोक्तस्तदभावो हरेः सदा । तदव्यक्तमाह हि । न चक्षुषा पश्यति कश्चनैनम् । विमे कर्णा पतयतः । अणोरणीयान्महतो महीयान् । तद्दूरे तद्वन्तिके । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । नारायण एवेदमग्र आसीत् । मय्यनन्तगुणे । अनन्त इत्यहं पार्थ । सत्यं ज्ञानमनन्तं ब्रह्मेत्यादेः । अत्र स्तोत्रेऽधिकगुणविधानायोक्तगुणस्यापि पुनरुक्तौ न वैय्यर्थ्यम् । अक्षरात्संभवतीह विश्वम् । ब्रह्मविदाप्नोति परम् । परात्परं पुरिशयम् । अव्यक्तमचलं शान्तम् । अध्यात्मयोगाधिगमेन धीरः । मत्वा देवं हर्षशोकं जहाति । सूक्ष्मात्सूक्ष्मतरम् । इत्याद्युपनिषत्प्रतिपाद्यत्वं विष्णोरेवेति प्रकटितम् ॥ १९ ॥

यस्य ब्रह्मादयो देवा वेदा लोकाश्चरचराः ।
नामरूपविभेदेन जल्प्या च कलया कृताः ॥ २० ॥

सत्यधर्मीया — परेशत्वासिद्धिं परिहर्तुमितरानवकाशं लिङ्गं विशेषकेनाह ॥ यस्येति । यस्य कलया भिन्नांशेन जल्प्या च वाचा ब्रह्मादयो देवा वेदा लोकाश्चेति चराचराः । चेतनाचेतनात्मकं जगदिति यावत् । चशब्देनोपादानप्रकृत्युपादानम् । नामरूपविभेदेन नाम्नां विध्यादीनां रूपाणां चतुर्मुखत्वाद्याकाराणां विभेदो विलक्षणता तेन कृता उत्पादिताः । स जयतादित्यन्वयः । अंशो नाना, स्मरन्ति चेति सूत्रभाष्ये स्वांशश्चाथो विभिन्नांश इति द्वेधांऽश इष्यते । विभिन्नांशोऽल्पशक्तिः स्यादित्युक्तेरिममेवांशं शंसयन्व्यासो विभेदेनेत्यूच इति ज्ञेयम् । आभास एव चेति सूत्रभाष्ये, वाराहे च द्विरूपावंशकौ तस्य परमस्य हरेर्विभोः । प्रतिबिंबांशकश्चाथ स्वरूपांशक एव च । प्रतिबिम्बांशका जीवाः प्रादुर्भावाः परे स्मृताः । प्रतिबिम्बेष्वल्पसाम्यमित्युक्तेः । नाम च रूपं च तयोर्विभेदश्च स इति इनोऽयमेतत्पतिरिति च जल्पिर्व्यवहृतिस्तयेति वा । नामरूपादीनां कार्याणां ग्रहणे प्रकृतिरुपादानभूता गृहीतप्रायेत्यभिप्रायेणानुक्तिवदनुपलक्षणीयता चशब्देनेति वा बोध्यम् । जल्पेर्भावे इकारप्रत्ययः । ब्रह्मादयः सर्वेऽपि न समर्था इत्यभिन्नांशा नेत्यप्याह ॥ चराचरा इति । चरन्ति सामान्यतो जानन्त्याज्ञया सञ्चरन्तीति ते तथा वा । चरिचलीति वार्तिकाद् द्वित्वमागागमश्च नात्रेति ज्ञेयम् । वाण्येत्यादि वार्णी विना जल्प्येति जल्पन्, नामरूपविभेदेन नाम्नां रूपाणां च विना साक्षान्नारायणांशेन भेदेन । उत्तरश्लोकादाकृष्टं यत इत्येतत् तसेः सार्वविभक्तित्वेन येति भूतं सदन्वेति । या जल्प्या भिन्नेति व्यवहार्या । तया कलया कृता इति भावमाविरकार्षीदृषिऋषभ इति मन्तव्यम् । यस्यादयः आ समीचीना दया यस्य स आदयो ब्रह्मा । आदय इति बहुवचनान्तं देवपदेनाप्यन्वेति । भाविकार्यभावकदयावन्तो देवाश्च ये तैर्नामरूपविभेदेन वेदाश्चराचरा लोका ज्ञान्यज्ञानिनो जनाः जल्प्या कलया च । दत्तं दूर्वाससं सोममात्मेशब्रह्मसम्भवानित्युक्तेर्यथा-यथमावेशाभिमानसाक्षादंशेन सोमदूर्वासोऽर्जुनादिविभेदेन कृतः स जयतादिति वा । ब्रह्मादयो देवा वेदाः लोकाश्चराचरा नामरूपविभेदेन । कलया साक्षादंशेन । कृता आविर्भूता मत्स्यादिवदिति वादाः जल्प्या । अन्यथाज्ञानहेतुवाचा । दुःशास्त्रेणेति यावत् । कृता इत्यप्यर्थः । यथोक्तम् । जल्प्या वृत्तमिति व्याख्यावसरे द्वितीयतात्पर्ये, अन्यथाज्ञानहेतुर्या वाक् सा जल्पिः प्रकीर्तितेति तन्त्रमालायामिति । न च प्राचीनविवरणं तर्हि कथमिति वाच्यम् । यत्रेतरोऽर्थो न सम्भवति तत्र तदर्थतेत्येवंपरत्वात्तत्तात्पर्यस्य । अन्यथा या याऽन्यथाज्ञानहेतुर्वाक् सा सेत्यवक्षदिति ज्ञेयम् ॥ २० ॥

छलारी — इदानीं जगत्सर्जकत्वं वर्णयति ।। यस्येति । यस्य नारायणस्य कलया पुरुषरूपेण जल्प्या वचसा । चशब्दोऽनुक्रमसमुच्चायकः । प्रकृत्या ब्रह्मादयो नामभेदेन भिन्नभिन्ननामवत्तया रूपभेदेन भिन्नभिन्नाकारतया कृता उत्पन्नाः । हरिर्जडप्रकृतिमुपादानीकृत्य ब्रह्मादिस्थावरान्तं जगच्चतुर्मुखपञ्चमुखत्वादिभिन्नभिन्नाकारं सृष्ट्वा वागिन्द्रियेण विरिञ्चरुद्रेत्यादि नाम चकारेति भावः । यच्छब्दस्य स जयतादिति तृतीयेनान्वयः ।। २० ।।

लिङ्गेरी — यस्य नारायणस्य ब्रह्मादयो देवाश्चराचराः स्थावरजंगमरूपा लोकाश्च तथा वेदा अपि कलयांऽशेन जल्प्या वाचा च नामरूपविभेदेन शब्दा अर्था इत्येवं भेदेन कृतास्तमीड इति पूर्वेणान्वयः ।। अत्रायं विवेकः ।। भगवदवतारपुरुषादिरूपैः ब्रह्मादय उत्पादिताः । वेदास्तु नारायणस्य वचनरूपा इति । यस्य वाकृतन्तिः । नारायणाद्ब्रह्मा जायत इत्यादेः ।। २० ।।

यथाऽर्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत् स्वरोचिषः ।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गः ।। २१ ।।

सत्यधर्मीया — तदेव देवमाहात्म्यं निदर्शनेन विशदयति ।। यथेति । अग्नेरर्चिषो ज्वालाः । अर्चतेरचिशुचिहुसृपिच्छादिछर्दिभ्य इसिः । ज्वालकीलावर्चिर्हेतिरित्यमरः । अर्चिष इति सवितृपदेनाप्यन्वेति । न च वाच्यं वह्नेर्द्वयोर्ज्वालकीलावित्याद्यमरोक्तेः कथं तन्मात्रसम्भव-दन्वयकस्यार्चिःपदस्य सवितृपदेनाप्यन्वयः सम्भावित इति । वन्हेरिति प्रायो वादः । हेतिः स्यादायुधज्वालासूर्यतेजः सयोषितीति दर्शनादिति भानुनोक्तेस्तत्पर्यायशब्दानामप्येतद्वाचक-ताऽभ्युपगमे तद्बाधावैधुर्यात् । अर्चिर्मयूखशिखयोरिति विश्वोऽपि । सवितुः सकाशाद्गभस्तयः किरणा अर्चिषो ज्वालाश्च निर्यान्ति संयान्ति । किरणोऽस्त्री मयूखांशुगभस्तिघृणीत्यमरः । गम्यतेऽन्यत्रापीति डः गो ज्ञेयवर्गस्तं बभस्ति दीपयतीति गभस्तिः । भस भर्त्सनदीप्त्योः । जुहोत्यादेः क्तिच् । स्वरोचिष इति द्वयोरग्निसूर्ययोर्विषेषणमिति केचित् । तत्र स्वेन 'परः स्व' इत्यादेर्हरिणा रोचिर्यस्येति विग्रहो ज्ञेयः । भीषोदेतीत्यादेः न स्वरोचिष्टं तदादेः । स्वरोचिषः स्वप्रकाशाद्यत इति भगवतोऽन्वयोऽपि सम्भवी । बहिरायान्त्यन्तः सयान्ति निविशन्ते यथा तथा । स्वरोचिष इति गुणकार्याज्ञानादिसम्बन्धव्युदासार्थम् । यतो हरेर्गुणसम्प्रवाहोऽसकृत्सन्ततं निर्याति कार्योन्मुखी भवति संयान्ति स्वकारणप्रवेशद्वाराऽन्तर्निलीयते । तमेव प्रकटयति ।। बुद्धिरित्यादिना । खानीन्द्रियाणि । मनो बुद्धिरिति वृत्तिभेदादुक्तिः । शरीरसर्गः । शरीरपदं कार्यमात्रोपलक्षकम् । तत्सृष्टिरसकृदिति प्रवाहाविहतिमाचष्टे ।। २१ ।।

छलारी — सृष्टिं विवृण्वन् भगवतः सकाशाज्जगतो लयप्रकारमपि दृष्टान्तमुखेनाह ॥ यथेति । यथाऽग्नेः सकाशादर्चिषो ज्वाला यथा वा सवितुर्गभस्तयः किरणा असकृत्पुनः पुनर्निर्यान्त्युद्गच्छन्ति संयान्ति लीयन्ते च । स्वरोचिषः स्वेन रोचिः प्रकाशो यस्य तस्मात् । इदं चाग्निसूर्यविशेषणम् । तद्वत् यतो यस्माद्धरेर्गुणसंप्रवाहोऽसकृद्भवति लीयते च । स जयतादित्युत्तरेणान्वयः । गुणसंप्रवाहः क इत्यत आह ॥ बुद्धिरित्यादिना । खानीन्द्रियाणि । शरीरसर्गः कार्यदेहप्रवाहश्च । असकृदित्युक्त्या जगत्प्रवाहस्य नित्यत्वं ज्ञापितं भवति ॥ २१ ॥

लिङ्गेरी — यथाऽग्नेः सकाशादर्चिषो ज्वालादिरूपसूक्ष्मभागाः । सवितुः सूर्याद्गभस्तयः किरणाः निर्यान्ति निर्गच्छन्ति संयान्त्यागच्छन्ति तथा स्वस्माद्रोचिषः स्वप्रकाशाद्धरेर्बुद्धिर्मनः खानीन्द्रियाणि शरीरसर्गः शरीरोत्पादनं इत्येवंरूपोऽयं गुणसंप्रवाहः सत्त्वादिगुणजसृष्ट्यादि-प्रवाहोऽसकृन्मुहुर्मुहुर्निर्याति संयाति । स देवादिषु नियमेनैको भवतीत्युत्तरेण तमीड इति पूर्वेण वाऽन्वयः ॥ २१ ॥

स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान् न जन्तुः ।
नायं गुणः कर्म न सन् न चासन् निषेधशेषो जयतादशेषः ॥ २२ ॥

सत्यधर्मीया — एतद्रूप इति चेतसा न निश्चेतुं योग्य इति निरूपयन् स्तौति ॥ स वा इति । यो ब्रह्मादिकर्ता स देव एव न । असुरस्तु सर्वथा न षंढोऽप्यसुरवत् । भगवान्न नपुंसक इत्यादेः । मर्त्य एव न । तिर्यक् पश्वादिकम् । न स्त्री । न पुमान् । जन्तुर्न । चेतनः । चेतनो जन्मी जन्त्वित्यमरः । जायते । कमिगमिजनीति तुन् । अयं गुणो रूपादिः । कर्म परिस्पन्दः । सत्पृथिव्यादित्रिक-मसद्वाय्वाकाशद्विकम् । यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सद्वायुरन्तरिक्षं चासदिति श्रुतेः । तर्हि मन्ये स शून्यप्राय इत्यतो न देवासुर इत्यादेरभिप्रायमाह ॥ निषेधशेष इति । निषेधेन शिष्यत इति निषेधशेषः । सर्वविलक्षण इत्यर्थः । स एष आत्मा नेति नेतीत्यादिश्रुतेः । शेषोऽप्रधान इति किं नेत्याह ॥ अशेष इति । स्वप्रधान इत्यर्थः । एतादृशो जयतात् । सोऽपि न नारायणान्य इत्यप्याह ॥ नद इति । नदे समुद्रे वासुर्वसतीति वासुः । अमर्त्यतिर्यगिति छेदः । वसतेरौणादिक उण् बाहुलिको वा । सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयत इति विष्णुपुराणात् । वासनाद्वासुदेवोऽसि वासितं ते जगत्त्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु त इत्यादेः । एतत्पक्षे अमर्त्यपदेन पूर्वापूर्वदेवग्रहणेनान्यूनता ज्ञेया । असुरत्वस्याप्रसञ्जनीयकोटितयाऽनुक्तिर्वेति ज्ञेयम् । समुद्रवासी श्रीनारायण इत्यर्थः । नैक एव समुद्रवासी किन्तु लक्ष्मीसहित इत्यप्याह ॥

नदेवासुरिति पदमेकम् । नदे समुद्रे या रमया सह वसतीति नदेवासुरिति । नो नियामकश्चासौ दे दाता चासौ वा चासौ सुश्चेति वा । वासुदेवशब्दनिर्णयप्रस्तावे यथोक्तं कर्मनिर्णयभाष्यटीकयोः । वानात्सूतेर्देवनाद्वासुदेवो वासाद्युतेः छादनात् क्रीडया च । बलादत्तृत्वाद्वा ततो वर्तनाद्वा तं वासुदेवं प्रवदन्ति वेदा इति सौकरायणश्रुतिः । वानादिति । वानाज्ज्ञानात् । वातेर्विच् । सूतेरुत्पादनात् । सूतेर्डुः । देवनात्क्रीडनात् । दीव्यतेरच् । वाश्चासौ सुश्चासौ देवश्चेति विग्रहः । वासात्सर्वत्र वासकर्तृत्वात्सर्ववासाधिकरणत्वाद्वा । वस निवास इत्यस्मादुण् । द्युतेर्देवः । वासुश्चासौ देवश्चेति द्वितीयोऽर्थः । छादनात्सर्वव्यापनात् । अविद्यादिनाऽऽवरणाद्वा । वस आच्छादनेऽस्मादुण् । क्रीडया देवः पूर्ववद्विग्रह इति तृतीयः । बलाद्वः असुत्वात्प्राणरूपत्वादसुः । दातृतो दातृत्वात् दे । ददातेरेकारः । कृन्मेजन्त इत्यव्ययम् । वर्तनात्सर्वत्र वः । वृतु वर्तनेऽतो डः । वश्चासावसुश्चासौ देचासौ वश्चेति चतुर्थ इति ॥ २२ ॥

छलारी — सर्ववैलक्षण्यं प्रतिपादयन्स्वाभीष्टमाशास्ते ॥ स इति । यो देवादिजगत्कर्ता सः । अत एव देवासुरमर्त्यतिर्यक् नैको देवादीनां मध्ये कोऽपि न भवति । पश्वादि न । स्त्री न । नियतस्त्र्याकाराभावात् । न षण्ढो नपुंसको न भवति । सर्वथा तदाकाराभावात् । पुमान्न । नियतेन पुल्लिङ्गाभावात् । किं बहुना न जन्तुः कृम्यादिप्राणिमात्रं न भवति । अयं गुणो रूपाद्याकारोऽपि न । कर्म परिस्पन्दादिरूपो न । स तु सच्छदवाच्यं पृथिव्यप्तेजाख्यभूतत्रयं न । असच्छब्दवाच्य-वाय्वाकाशरूपभूतद्वयं च न भवति । यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सदिति श्रुतेः । किं त्वेवं सर्वस्य निषेधे सर्वविलक्षणत्वेन विशिष्यते ॥ अवशिष्यत इति । निषेधशेषः । सर्वविलक्षण इत्यर्थः । स एष आत्मा नेतीत्यादि श्रुतेः । शेषत्वेनाप्राधान्यशङ्कां वारयति ॥ अशेष इति । शेषो न भवतीत्यशेषः स्वप्रधान इत्यर्थः । एतादृशो हरिर्जयतात् । मद्विमोक्षणायाविर्भवतु ॥ २२ ॥

लिङ्गेरी — यस्मान्नारायणाद्गुणसंप्रवाहः स देवासुरमर्त्यतिर्यग्जातिर्न । स्त्रीपुरुषषंढजातिर्न । जन्तुः कृमिविशेषजातिर्न । गुणः सत्त्वादिगुणलक्षणो न । कर्म च पुण्यपापादिलक्षणं न । सत् यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सदिति माध्यन्दिनश्रुत्युक्तवाय्वाकाशातिरिक्तपृथिव्यप्तेजोरूपं च न । असद्वाय्वन्तरिक्षरूपं च न । चशब्दादत्रानुक्तवस्त्वन्तररूपं च नेत्यर्थः । एवं निषेधे सति शेषे । अविशिष्टो यः पूर्वोक्तदेवादिविलक्षणः स जयतात् । ममानिष्टं परिहृत्योत्कृष्टो वर्तताम् । वा इत्यनेन स एष आत्मा नेति नेतीत्यादिश्रुतिं सूचयति । अत्रायं विवेकः । असुरमर्त्यषंढजंतु गुणकर्म-सदसदात्मता सर्वथा नैव । नियतस्त्रीत्वं तिर्यक्त्वं च नास्ति । नारायणीमत्स्यरूपादेः

कादाचित्कत्वात् । देवतात्वं नास्तीत्येतन्मनुष्याणामेव सतां कर्मादिना प्राप्यदेवत्ववत् । असुरजातेरेव राहोः शिरसोऽमृतसंबन्धेन नवग्रहेषु देवत्ववच्च नास्तीत्यभिप्रायेण न तु सर्वथा स्वरूपेण देवत्वं नास्तीति । विष्णुमुखा वै देवाः । सुरऋषभायेत्यादिश्रुतिस्मृतिविरोधात् । नैवं हरेरसुरत्वादिकं क्वचिच्छ्रूच्छ्रुत्यादावावेद्यते । पुंस्त्वं नेत्येतदपि स्वरूपेण पुरुषस्यैव स्वदुष्कर्मणा प्राप्यस्त्रीत्वं षंढत्वं समानाधिकरणपुंस्त्वं नेतीति । अन्यथा सहस्रशीर्षः पुरुषः उत्तमः पुरुषस्त्वन्य इत्यादिश्रुतिस्मृतिविरोधात् ॥ २२ ॥

जिजीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या ।
इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षणम् ॥ २३ ॥

सत्यधर्मीया — स्वाशयं प्रकटयति ॥ जिजीविष इति । अहमिह अस्यामवस्थायाम् अमुया इभयोन्या गजजन्मना किं किं प्रयोजनमिति । न जिजीविषे जीवितुं नेच्छामि । कुतः । प्रयोजनं नेत्यत आह ॥ अन्तर्बहिश्चावृतयेति । तिर्यग्जन्मत्वाज्ज्ञानहीनेत्यावृता तयेति । स्वाहन्ताशान्त्यै वा जातिस्वरूपकीर्तनाय वेति ज्ञेयम् । तर्हीदं तुच्छमिति नेच्छसि चेत्किमिच्छसीत्यत आह ॥ इच्छामीति । कालेन केवलेन । यस्य लिङ्गाङ्गस्य । विप्लवो नाशो न तस्य आत्मलोक आत्मस्वरूपभूतो लोको ज्ञानं तस्यावरणमावृतिर्येन तस्य । मोक्षणं भङ्गमिच्छामीत्यन्वयः । तर्हि केन कालेनैव न चेत्तस्य विलय इत्यतो लपति तदपि ॥ कालेनेति । ज्ञानेन । कल ज्ञान इति स्मरणात् । आत्मलोक स्वप्रकाश आत्मनि लोका यस्येति वा । नयस्य नीतेः प्लवोऽतिक्रमः स नेति विप्लवोऽनतिलङ्घनम् । आवरणस्य पुनरिदं देहीति कामनावरणं तस्य मोक्षणं त्यागस्तं कालं ज्ञानमिच्छतीति वा । प्लवतेः । प्लुङ् गतौ पचाद्यच् । प्लवः प्लक्षे प्लुतौ कपौ क्रमान्निम्नमहीभागेविक्रमे जलवायस इति हैमः । हे इभ या रमया सह भातीति तत्सम्बुद्धिः । भातेरन्येष्वपीति डः । यद्वा भृञो डः । ईं लक्ष्मीं बिभर्तीत्युरसि स तत्सम्बोधनम् । अन्तरावृतयाऽप्रकाशितयाऽमुया योन्या मकररक्षणोद्यमेन बहिरहं यस्यैतच्छरीरस्य विप्लवो नाशस्तं नेच्छामि । किन्तु इह अस्यामवस्थायाम् । जिजीविषे जीवितुमिच्छामि । काले दुर्मरणमात्रत्याजनेन क्लृप्ते नेच्छामीति नेत्यन्वयो वा । अत आत्मलोक । रणस्याच्छादितजलजन्तुकृतस्य युद्धस्य मोक्षणं चेच्छामि । अतोऽन्तर्बहिश्चावेति वा । अनन्तरमनन्तैतदिच्छामीत्यप्याह ॥ कालेन त्वयाऽऽवरणस्य । कामनाया मोक्षणं त्यागम् । निष्कामुकमिति यावत् । इच्छामीति वा । योनिर्भगे रणोद्योग इति विश्वः । उक्षणममुया मेतीच्छामीति वा । जिजीविष इत्यात्मनेपदता छान्दसी । ज्ञाश्रुस्मृदृगन्यतमत्वाभावात् । यद्वा ।

अहमित्यस्येच्छामीत्यनेनान्वयः । जिजीविषा इनेति छेदः । हे इन । यस्य मम जीवनेच्छा जिजीविषा नेत्यर्थः । भिद्यते हृदयग्रन्थिश्छिद्यते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर इत्यादेर्ज्ञानप्रार्थनावश्यकीति ज्ञेयम् । इच्छामि । कालेन । नयसि । अविप्लवः । तस्य । आत्मलः । अकौ । अरणस्य । मोक्षणमिति पदानि । तस्यागतस्य । तकारश्चागते चोर इति विश्वः । अरणस्य शरणरूपस्य । गतम् । सकाशात् । मोक्षणं मया उक्षणं ज्ञानामृतसेकमिच्छामि । कालेन मा नयसि चेत् । आत्मल आत्मानं स्वस्वभावं लात्यादत्त इत्यात्मलः । आत्मा यत्ने धृतौ जीवे स्वभाव इति विश्वः । ला दाने । आदान इत्यपि पठन्तीत्युक्तेः । आविर्भूतस्वभावः सन् । अकौ । नकुरकुः । पृथिवीभिन्नायामुपरितन्याम् । वैकुण्ठनगर्यामिति यावत् । अविप्लवः प्रच्युतिरहितः स्यामितीच्छामि । तत्र जिजीविष इति वा ॥ २३ ॥

छलारी — स्वापेक्षितं मोक्षं प्रकटयति ॥ जिजीविष इति । अहमिह शरीरे गृहाद्विमोक्षणेन न जिजीविषे । जीवितुं नेच्छामि । कुतः । अन्तर्बहिश्चावृतया अविवेकव्याप्तं यत्तिर्यग्योनित्वेन अज्ञानहेतु-नाऽमुयाऽनयेभयोन्या गजशरीरेण किं प्रयोजनं न किमपि । इति यत अत इत्यर्थः । तर्हि किमिच्छसीत्यत आह ॥ इच्छामीति । आत्मलोकावरणस्यात्मने स्वात्मनः परमात्मनो लोकस्य ज्ञानस्यावरकस्य तस्य लिङ्गशरीरस्य मोक्षणमिच्छामि । अस्यापि कालेन नाशः स्यात्किं तन्मोक्षप्रार्थनेनेत्यत आह ॥ कालेनेति । यस्य हरेरपरोक्षज्ञानमन्तरेण विप्लवो नाशो नास्ति तस्येत्यर्थः । भिद्यते हृदयग्रन्थिस्तस्मिन्दृष्टे परावर इति श्रुतेः ॥ २३ ॥

लिङ्गेरी — अहं त्वां स्तोत्रेणैतद्ग्राहाद्विमोक्षणेनैतन्मम शरीररक्षणं नाशासे । किन्तु मोक्षमिति गजेन्द्रः स्वाभिप्रायं प्रकटयति । जिजीविष इति । अहं न जिजीविषे जीवितुमिच्छामि । इहास्मिन्देशे काले संसारेऽन्तर्बहिश्चावृतयाऽमुया तयेभयोन्या गजशरीरेण किं प्रयोजनं साध्यमस्ति । किन्तु कालेन कालवेगेन यस्य लोकावरणस्य मत्स्वरूपप्रकाशावरकस्य लिङ्गशरीरस्य विप्लवो मत्परित्यागेनान्यत्र गमनं नास्ति । तस्य तस्मान्मोक्षणमिच्छामि । अनेन करोतु मे हृदयग्रन्थिमोक्षणमिति प्रार्थनमनुचितम् । हृदयग्रन्थेःकालान्तरेण स्वत एव नाशे परित्यागे वा तन्मोक्षसिद्धेरिति कुचोद्यं निराकृतम् ॥ २३ ॥

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥ २४ ॥

सत्यधर्मीया — प्राग्जन्मन्यनुशिक्षितमिति प्रागभिहितत्वाद्वेदान्तवेदितभगवद्गुणोपासनाधिकारानुगुणवर्णनं विधाय स्वयं गजजन्मेति गजमुखं विश्वनामानं नमति ॥ सोऽहमिति । तद्रूपैतद्रूपोभयानुकूल्यमुपासनायाः स्फोरयितुं पूर्वावहमित्येतावता सोऽहमिति वचनमिति ज्ञेयम् । स इन्द्रद्युम्नरूप्यहमिदानीं गजरूपी चेति सोऽहम् । विश्वात्मानं जगत्स्वामिनं विश्वादानादिकर्तारं वा । अजमुत्पत्तिरहितम् । परं पदं मुख्यप्राप्यम् । ब्रह्म नारायणाख्यं प्रणतोऽस्मीत्यन्वयः । नासिद्धं परत्वमिति तं तथा विशिनष्टि ॥ विश्वसृजमित्यादिना । जगत्सर्जकम् । नोपादानतयेति वक्ति ॥ अविश्वमिति । विश्वविलक्षणम् । जगदन्तर्निवेशेऽपि न तस्य तत्कृतदौर्भाग्यं ज्ञानलोपादिप्रयुक्तमिति वक्ति ॥ विश्ववेदसमिति । विश्वं वेत्तीति विश्ववेदाः सर्वज्ञस्तम् । विदेरसुन् । विश्वं तन्नामानम् । सप्ताङ्ग एकोनविंशतिमुखः । मध्यमं तु गजाकारमित्यादिमाण्डूकोपनिषद्भाष्योक्तेः । यद्वा विश्वात्मानं जगति तत्तदाकारेणान्तर्यामितया स्थितम् । पुरुषस्यानुविधां विहितास्तेऽन्नादा अन्नमितरे पशवस्तस्मात्त इतरान्पशूनधीव चरन्तीत्यैतरेयोपनिषद्भाष्ये पुरुषस्य हरेर्वै तु सदाकारेण संस्थिताः । देवगन्धर्व इत्याद्यास्तेषु सङ्कर्षणो हरिः । प्रद्युम्नश्च स्थितो नित्यं पुरुषाकृतिरेवतु । तौ भोक्तारौ च भोज्यानां भोजकावखिलस्य च । नारायणानिरुद्धौ तु तथाऽन्यपशुषु स्थितौ । वृषभाश्वादिरूपेण तृप्तिदावखिलस्य च । वाहनेत्याद्युक्तेः ॥ २४ ॥

छलारी — तिर्यग्योनित्वेन साधनान्तरानुष्ठानासंभवान्मोक्षार्थं भगवत्प्रणाममाचरति ॥ सोऽहमिति । सः मुमुक्षुरहमुत्तमं पद्यत इति पदं गम्यं ब्रह्म नारायणं प्रणतोऽस्मीत्यन्वयः । तस्य परमगम्यत्वमुपपादयति ॥ विश्वसृजमित्यादिना । विश्वसृजं जगत्सृष्टारं विशति प्रविशतीति विश्वनियमनार्थं स्वसृष्टजगत्प्रविष्टमित्यर्थः । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । बहिष्ठत्वादविश्वम् । विश्वस्माद्विलक्षणमिति श्रुतेः । गात्रेण शरीरादिजगत्प्रवेशेऽपि ज्ञानलोपो नास्तीत्याह ॥ विश्ववेदसमिति । विश्ववेदास्तं सर्वज्ञमित्यर्थः । विश्वात्मानं विश्वस्य स्वामिनमजमुत्पत्तिशून्यम् ॥२४॥

लिङ्गेरी — सोऽहमुक्ताभिप्रायवानहं विश्वसृजं समस्तजगदुत्पादकम् । अविश्वं जगद्भिन्नम् । विश्ववेदसं सर्वजगज्ज्ञानिनम् । विश्वात्मानं सर्वजगत्स्वामिनम् । अजमुत्पत्तिरहितम् । विश्वस्रष्टृत्वादिना विश्वमेवेदं पुरुष इत्युच्यमानम् । विश्वं पूर्णं च । परं पदं मुख्यप्राप्यम् । ब्रह्म नारायणं प्रणतोऽस्मि ॥ २४ ॥

योगरन्धितकर्माणो हृदि योगविभाविते ।
योगिनो यं प्रपश्यन्ति योगीशं तं नतोऽस्म्यहम् ॥ २५ ॥

सत्यधर्मीया — लुलोकिरे लोका लोके केऽपि न तमिति त्वया नतः कथमित्यतः कथयति ॥ योगेति । योगेन समाध्यादिना लब्धेन ज्ञानोपायेन रंधितानि दग्धानि कर्माणि येषां ते तथा । योगेन नैष्कर्म्येण । विभाविते परिशोधिते । हृदि मनसि । योगिनो यं प्रपश्यन्ति प्रकर्षेण पश्यन्ति । अनेन तत्साक्षिणमेतत्सद्भावे मानीकरोति । स च योगो वा ते च योगिनो वा तदायत्ता इति दिदर्शयिषुराह ॥ योगीशमिति । रधहिंसासंराध्योरिति रधे रधादिभ्यश्च । वलाद्यार्धधातुकस्य वेट् स्यादित्युक्तेरिडागमे रधिजभोरचीति नुमि यस्य विभाषेति नेटचलिटि रधेरिति चेण् नुम्निषेधाच्छान्दसाविण्नुमौ ण्यन्तान्निष्ठायां सेटीति णिलोपे स्थानिवद्भावेन नुमुपपत्तिर्वा । योगेन रन्धितानि ध्वस्तानि कर्माणि प्रतिबन्धकदुष्कर्माणि येषाम् । योगेन रन्धितानि संसिद्धानि मोक्षसाधकानि ज्ञानद्वारा कर्माणि येषां त इति वा ॥ २५ ॥

छलारी — स तादृशेश्वरसद्भावे ज्ञानिप्रत्यक्षं प्रमाणमित्याशयेन तं नमति ॥ योगरन्धितेति । योगेन ज्ञानेन रन्धितानि दग्धानि कर्माणि येषां ते योगरन्धितकर्माणो योगिनो ज्ञानिनो योगेन निष्कामकर्मणा विभाविते शुद्धे हृदि यं पश्यन्ति । तं योगानां मोक्षोपायानामीशं नियामकं हरिमहं नतोऽस्मि ॥ २५ ॥

लिङ्गेरी — योगिनो हरौ मनःस्थापनाद्युपायवन्तो योगेन हरिध्यानादिरूपेण रन्धितानि दग्धानि कर्माणि संचितरूपाणि येषां ते तथा सन्तो योगविभाविते ध्यानादिना प्रकाशिते हृदि स्वहृदये यं नारायणं प्रपश्यन्ति साक्षात्कुर्वन्ति । मनसेति शेषः । अहं योगिनामीशं स्वामिनं तं नतोऽस्मि । हृदा मनीषा मनसाभिक्लृप्तो य एवं विदुरमृतास्ते भवन्तीत्यादिश्रुतेः ॥ २५ ॥

नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ।
प्रपन्नपालाय दुरन्तशक्तये बुद्धीन्द्रियाणामनवाप्यवर्त्मने ॥ २६ ॥

सत्यधर्मीया — तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तिप्रबोधकः । सर्वोपेता चेत्याद्युक्तेः प्रकृतस्य कार्यस्य शक्तिनिवर्त्यत्वेन तद्वत्त्वेन तं नमति ॥ नमो नम इति । असह्यो वेगो यासां सृष्टिस्थितिसंहृतिहेतूनामुत्साहमन्त्रप्रभुविषयाणां वा शक्तीनां त्रयम् । यस्य स तस्मै । असह्यवेग असदसह्यजव । शक्तित्रयाय । शक्यत्वाच्छक्तयो भार्या इत्यादेः शक्तीनां श्रीभूदुर्गाणां त्रयं यस्य तस्मै । अभेदेऽपि मुनित्रयमित्यत्रेव विशेषबलेन वाऽवयवावयविभावविवक्षया यच् सम्भवति । ताश्च ज्ञाननिदानका इति तत्सर्वस्ववानयमित्याह । अखिलाः कालाद्यप्रतिहता धीगुणा धियो गुणा विशेषा

यस्य स तस्मै । अखिलानां धियो गुणा वा । धियश्च गुणा इतरे यस्मदिति तस्मै वा । दुरन्ता अपरिमिताः शक्तयो यस्य स तस्मै । दुरन्तेषु दुष्टस्वरूपेषु शक्तिः प्रहरणविशेषो बलं वा तेषामप्यस्यैवेति वा प्रभावो यस्य तस्मै वा । बुद्धीन्द्रियाणामनुग्रहं विनाऽनवाप्यमप्राप्यं वर्त्म यस्य तस्मै । स्वोपयुक्तगुणकतया तमाह ॥ प्रपन्नपालायेति । तर्हि सर्वथाऽनवाप्यश्चेत्त्वदर्थना व्यर्थेत्यतोऽप्याह । बुद्धीन्द्रियाणां बुद्धेरिन्द्रियाणि प्रकाशविशेषाः । इन्द्रियं च हृषीकं स्यादिन्द्रियं तेजसि स्मृतमिति विश्वः । तेषां सकाशात् । अनेन मुख्यप्राणेन वाप्यमवाप्यं वर्त्म यस्येति वा । अनव आद्यो हिरण्यगर्भस्तेनाप्यं वर्त्म यस्येति वा । वाप्यां वापौ वा वर्त्म उपरि परिसरणसरणिः । न यस्य स वाप्यवर्त्मा कृकलासरूपी नृगः । तस्यानो बंहिर्गमनचेष्टा येन तस्मै । नञन्वयप्रकारस्तु प्राचीनस्कन्धविवृतावुक्तोऽनुसन्धेयः । टु वपूबीजतन्तुसन्तानेऽस्माद्वसिवपियजिराजीति इञ् । कृदिकारादिति ङीष् । वाप्यां वापिरपि स्मृतेति द्विरूपकोशः । वापी तु दीर्घिकेत्यमरः । तिर्यक्ष्वप्यस्मत्पतेर्दया दृष्टचरीति मम न याश्वाप्रच्युतिः स्यादिति तथा स्तुत्वा ननामेति भावः ॥२६॥

छलारी — आदराद्गुणाद्विशिष्टत्वेन पुनर्नमति ॥ नम इति । असह्यो वेगो यासां तास्तथाऽप्रतिहतमित्यर्थः । तादृशानां शक्तीनां प्रभुमन्त्रोत्सहविषयाणां त्रयं यस्य तथा तस्मै । अखिलधीगुणायाखिलाऽप्रतिहता धीर्गुणो यस्य स तथा तस्मै । प्रपन्नानां शरणागतानां पालाय दुरन्ताऽपरिमिता शक्तिरघटितघटकशक्तिर्यस्य तस्मै । बुद्धीन्द्रियाणामनवाप्यवर्त्मने बुद्धेर्मनस इन्द्रियाणां चानवाप्यमविषयं वर्त्म स्वरूपं यस्य तस्मै ॥ २६ ॥

लिङ्गेरी — असह्या वेगा यासां ताः शक्तयः शक्तिविषयत्वाच्छक्तिशब्दवाच्याः सत्त्वादयस्तासां त्रितयवते उत्पत्त्यादित्रितयशक्तिमते उत्साहमन्त्रप्रभुशक्तित्रयवते । अखिलगुणाय सर्वविषयकज्ञानलक्षणगुणवते । दुरन्तशक्तयेऽपरिच्छिन्नशक्तिमते । सर्वेन्द्रियाणां सर्वजीवचक्षुराद्येकादशेन्द्रियाणामनवाप्यवर्त्मनेऽप्राप्यस्वविषयकज्ञानमार्गाय नारायणाय तुभ्यं नमो नमः ॥ २६ ॥

नायं वेद स्वमात्मानं यच्छक्त्याऽहं धिया हतः ।
तं दुरत्ययमाहात्म्यं भगवन्तं नतोऽस्म्यहम् ॥ २७ ॥

सत्यधर्मीया — अयमहम् । यच्छक्त्या यस्य मायया । धिया वा हतो रहितः सन् । स्वं मामात्मानं परमात्मानं न वेद । प्रागितिशेषः । दध्याविमां बुद्धिमथाभ्यपद्यतेत्युक्तेर्यच्छक्त्यैवंविधयाऽहतः सहितः । इदानीमितिशेषः । अहं दुरत्ययं दुरतिक्रमं माहात्म्यं यस्य स तं नतोऽस्मि ।

अयं जनो यच्छक्त्याऽहंधिया । अहमित्यव्ययम् । अहंताधिया हतः सन् स्वमात्मानं च न वेद तं भगवन्तं नतोऽस्मीति वा । भगवन्तमितोऽस्मीति पाठे इतः प्राप्त आश्रित इति यावदित्यर्थः ॥ २७ ॥

छलारी — ननु तर्हि मोक्षप्रदं भगवन्तं सर्वेऽपि कुतो न भजन्तीत्यतस्तत्र कारणं वदन् स्तुत्या परममेव हेतुं वदन् शरणं प्रार्थयते ॥ नायमिति । अयं जनो यच्छक्त्या यस्य शक्त्या मोहकशक्त्याऽहन्धियाऽहंबुद्ध्या स्वस्वातन्त्र्याश्रयेणेत्यर्थः । हतो बद्धः सन् स्वं स्वात्मानमात्मानं परमात्मानं च न वेद न जानाति । स्वस्वातन्त्र्याश्रयेण स्वस्वातिरिक्तपरमात्मज्ञानाभावान्न भजन्त इति भावः । तं दुरत्ययमाहात्म्यं दुर्जयमाहात्म्यमनन्तमाहात्म्यमित्यर्थः । हरिमहमित आश्रितोऽस्मि । अनन्तमाहात्म्यस्य हरेः साकल्येन मम स्तुतौ सामर्थ्याभावादुपरम इति भावः ॥ २७ ॥

लिङ्गेरी — अयं जीवो यच्छक्त्या यस्य हरेर्मोहकशक्त्याऽहं धियाऽहमेव स्वतन्त्र ईश्वर इत्यादि बुध्या हतस्तिरस्कृतज्ञानः सन् स्वं स्वरूपमात्मानं परमात्मानं च तत्त्वतो न वेद । एवं स्वस्वरूप-विधिकत्वादिना दुरत्ययमनतिलङ्घ्यं माहात्म्यं यस्य तं भगवन्तं नारायणमहं नतोऽस्मि ॥ २७ ॥

श्रीशुक उवाच–

एवं गजेन्द्रमुपवर्णितनिर्विशेषं
ब्रह्मादयो विविधलिङ्गभिदाभिमानाः ।
नैते यदोपससृपुर्निखिलात्मकत्वात्
तत्राखिलामरवरो हरिराविरासीत् ॥ २८ ॥

सत्यधर्मीया — एवं स्तुतः प्रस्तुतविषये किं कृतवान्कृतज्ञो हरिरित्यत आह ॥ एवमिति । उपवर्णितनिर्विशेषमुपवर्णितो निर्विशेषः स्वगतभेदशून्यः स्वयं येन सः । समो निर्विशेषः । पूर्णमदः पूर्णमिदमित्यादेर्मूलरूपलीलारूपविशेषविकलम् । यदा विविधलिङ्गभिदाभिमानाः । विविधानि लिङ्गानि स्वस्वचिन्हानि हंसासनवृषभवाहनत्वादीनि तेषां या भिदा वैलक्षण्यं तेन जातो योऽभिमानोऽहन्ता येषां ते तथा ये ब्रह्मादय एते गजेन्द्रं नोपससृपुरस्मदाव्हयादि गृहीत्वाऽनाव्हानादिति नागतास्तदा हरिस्तापसनामा यत्र गजेन्द्रस्तत्राविरासीत्प्रादुरभूत् । क उक्तवानेवं गजस्तुष्टाव त्वामित्यत आह ॥ निखिलात्मकत्वादिति । सर्वान्तर्यामित्वादित्यर्थः । स्वयमेव विदित्वाऽऽविरभूदित्यर्थः । सर्वस्वामित्वाद्वा । अखिलामरवर इति तदितरानागमने प्रादुर्भावे सर्वान्तर्यामित्वादौ च सम्भावककथनमिति ज्ञेयम् । यदा तदा च हेत्वर्थ इत्यादेर्यदा यस्मात् ।

ब्रह्मादयो विविधलिङ्गभिदाभिमाना विना भगवता विधा विधिर्नियतिर्येषां लिङ्गविकरणानि तेषां या भिदा इदानीमिदं कार्यं मयेदं तेन कारयामीति विशेषस्तस्या अभिमानं अभीत्थमेवेत्यन्यान्प्रति कथनम्। अभीत्थंभूतकथन इति विश्वः । मानं ज्ञानं च मर्यादा वा येषाम् । मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यत इति वचनात् । केवलं भगवत्कार्यप्रवृत्तौ वित्ततच्चित्ता वयमागस्कृतः स्याम पश्यामः उत्सवं तदनुपायिनः संत इति तन्नोपससृपुस्तदा हरिराविरासीदिति वा । आन्तरालिकसङ्कल्पितैतत्कं करिणमित्यपीरयति ।। उपवर्णितनिर्विशेषमिति । उपवर्णिता नमामि म इत्यादिना । सम्पदादित्वात् क्विम्भावे । टापं चैव हलन्तानां विट् विशा । जलान्तःप्रवेशस्त-स्यामीषेच्छा निर्गता विशेषा येन तम् । ईषा लाङ्गलदण्डे स्यादिच्छायामिति वोपलितः । उपवर्णितं वर्णनं यस्य स उपवर्णितः । निर्गता विशेषा यस्मात्स चासौ स चेति वा तम् ।। २८ ।।

छलारी — अनन्तरं किमभूत् । उपवर्णितमिति । एवं पूर्वोक्तप्रकारेणोपवर्णितं स्तुतं निर्विशेषं ब्रह्म येन स तथा तम् । उच्चजातौ दया नीचजातौ तदभाव इत्यादिवैषम्यरहितमित्यर्थः । अवतारमूलरूपयोर्विशेषशून्यमिति वा निर्विशेषमित्यर्थः । पूर्णमदः पूर्णमिदमिति श्रुतेः । गजेन्द्रं प्रति ब्रह्मादय एते देवा यदा नोपससृपुर्नागतास्तदाऽखिलामरवरः सकलदेवनायको हरिर्मनुत्वेनावतीर्ण-स्तापसनामा हरिनामको नारायणो यत्र गजेन्द्रोऽभूत्तत्राविरासीत् । हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगत्प्रभुरिति वचनात् । ब्रह्मादीनामनागमने हेतुमाह ।। विविधेति । विविधानि लिङ्गानि हंसवृषभादीनि चिन्हानि तेषां भिदा भेदेन जातोऽभिमानो येषां तेऽभिमानिनोऽहं हंसवाहनोऽहं वृषभवाहन इत्यादिलक्षणो येषां ते तथा । हंसवाहन-त्वाद्यसाधारणस्वस्वनाम्नाऽऽहूतत्वान्नागता इति भावः । हरिस्तु निखिलात्मकत्वात्सर्व-स्वामित्वात्पूज्यते । गजेन्द्रस्तुतिज्ञानमसन्निहितस्य हरेः कथमित्यतोऽपीदमेव पदं निखिलात्म-कत्वात्सर्वान्तर्यामित्वादिति ।। २८ ।।

लिङ्गेरी — एवं गजेन्द्रेण स्तुतौ समापितायां देवेषु को देवस्तदा तद्विमोचनाय प्रवृत्तः । हरिश्चेत्प्रवृत्त इत्युच्यते तर्हि तन्नोपपद्यते । गजेन्द्रकृतस्तुतेर्ब्रह्मादिसाधारण्यादिति परीक्षिच्छङ्कां शुकः परिहरतीत्याह सूतः शुक इत्यादिना । एवमुक्तरीत्योपवर्णितनिर्विशेषं स्वज्ञातगुणेषु कमपि गूढमविहाय स्तुवन्तं गजेन्द्रं ब्रह्मादयो ब्रह्मरुद्रप्रभृतयो देवा विविधैः । आदिबीजत्व, परेशत्व, चिदचित्सर्व-जगत्स्रष्टृत्व, पालकत्व, संहर्तृत्व, स्वतन्त्रत्व, अतिलुप्तसार्वकालिकदृष्टित्व, सर्वसाक्षित्व, सर्वचेतनपतित्व, महाप्रलयावस्थितत्व, तमःशब्दितप्रकृतिशक्त्यविषयत्व, ब्रह्मादिदेवागम्यत्व,

दुष्कर्मादिप्राप्तजन्मादिशून्यत्व, समस्तदोषविधुरत्व, आश्चर्यकरकर्मित्व, स्वप्रकाशत्व, साकल्येन श्रुत्याद्यगोचरत्व, ज्ञानिप्राप्यत्व, मोक्षस्वामित्व, अप्राकृतज्ञानानन्दाद्यात्मकदेहवत्व, स्वोत्तमरहितत्व, नारायणानन्तादिवाच्यत्वादिरूपैर्लिङ्गैरप्रकटितस्तुत्यवस्तुज्ञापकैर्न वयं गजेन्द्रस्तुत्यं वस्त्विति भिदाभिमाना भेदप्रमावन्तः सन्तो नैवोपससृपुः समीपं नैव प्राप्नुवन्तो यदा तदा हरिर्नाम्ना हरिरित्यभिहितो नारायणः । निखिलात्मकत्वाद्गजेन्द्रस्तुत-आदिबीजत्वादिनिःशेषगुणात्मकत्वात्तत्र गजेन्द्रसमीपे आविरासीदाविष्कर्तुं मनश्चक्रे । एको नारायण आसीन्न ब्रह्मा न च शङ्करः । तत एते व्यजायन्त । तमहमजमनन्तमात्मतन्त्रं जगदुदयस्थितिसंयमात्मशक्तिम् । द्युपतिभिरजशक्रशङ्कराद्यैर्दुर-वसितस्तवमच्युतं नतोऽस्मि । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्यादि प्रसिद्धप्रत्यक्ष-श्रुतिस्मृतिभिर्गजेन्द्रप्रकटितस्तुत्यलिङ्गानां विष्ण्वैकनिष्ठत्वावगमात् । उक्तगुणो विष्णुरेवेत्यत्र न कश्चित्सन्देहः । विष्णोरेव सर्वोत्तमत्वादेः समर्थनमन्यत्रास्मत्कृतविराटोद्योगपर्वटिप्पण्यादौ द्रष्टव्यः । विस्तरभिया नेहोच्यते । ननु ब्रह्मादिष्वविद्यमानं गजेन्द्रोक्तगुणवत्वं विष्णोरेव कुत इत्यत उक्तम् ॥ अखिलामरवर इति । अनेन हरेः सर्वदेवोत्तमत्वकथनेन हरेरप्युत्तमदेवतात्वे तेनैव देवेन गजेन्द्रसमी-पागमनादि किं नाकारीति शङ्का निरस्ता ॥ २८ ॥

तं तद्वदार्तमुपलभ्य जगन्निवासः
स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ।
छन्दोमयेन गरुडेन समुह्यमान-
श्चक्रायुधो ह्यगमदाशु यतो गजेन्द्रः ॥ २९ ॥

सत्यधर्मीया — प्रादुर्भूतस्तं तत्रैव स्थित्वाऽऽवत्किं वा अत्रायात इत्यतस्तदाह ॥ तमिति । जगन्निवासो जगदाश्रयस्तदाश्रयको वा । जगत्प्राणेत्यमराज्जगदाख्या स्मृता वात इति विश्वात्प्राणाश्रयो वा । चक्रायुधः प्रकृतनक्रवक्त्रविपाटनार्थम् । तद्वदार्तम् । ययाऽऽर्त्या प्रादुर्भावो भावी तादृशार्तिमत्सदृशम् । तं तद्वदेवार्तमिति तमिवार्तमित्यन्वयो वा । रामरावणयोर्युद्धमित्यादिवत् । नैवं विधार्तिमानितरोऽस्तीति भावः । संस्तुवद्भिर्दिविजैर्दिवि जायन्त इति ते तथा तैः । हृद्युभ्यां चेति ङेरलुक् । इदानीमागमने नापराधिनो वयमित्यागतैर्देवैः सह । स्तोत्रं तत्कृतम् । निशम्य श्रुत्वा । छन्दोमयेन । छन्दसाऽऽरूढभगवदिच्छया । अयपयमयेति मयिर्गत्यर्थः । मयत इति गच्छतीति स तथा तेन छन्दोमयेन । उपलभ्य ज्ञात्वा वेदाभिमानितया तन्मुख्येनेति वा । यथोक्तमैतरेयभाष्ये । सर्ववेदाभिमान्येव गरुडो वेदपूरुष इति । सामस्तोमोच्चारिपत्रवत्वाद्वा छन्दोमयस्तेन । यथोक्तं भागवते

तृतीये । आकर्णयन्पत्ररथेन्द्रपत्रैरुच्चारितं स्तोममुदीर्णसामेति । यतो यत्र गजेन्द्रस्तत्राशु शीघ्रमगमत् । हिराह 'या त्वरा द्रौपदीत्राणे या त्वरा गजरक्षण इत्यादि' त्वराप्रसिद्धिम् । आश्वनाश्वासने श्वासो न स्थास्यतीत्यपि कथयति ।। मुह्यमान इति । यो मुह्यमानो मोहं वैचित्यं प्राप्नुवानो दिवादिः । कर्तरि श्यन् । चान्द्रादिरित्याऽऽत्मनेपदता । यद्वा । मोहं प्रापयिता नक्रस्तेन । मोहं प्राप्नुवान इत्यन्तर्णीतण्यर्थान्मुहेः कर्मणि शानचि अन्तर्भूतक्रियान्तरैः सर्वैरकर्मकैर्योगे कर्मत्वमुपजायत इति वचनात् । स चक्रायुध इत्यन्वयोऽस्मिन्पक्षे ज्ञेयः । गरुद्भिर्डीयते । डीङ् विहायसा गतौ । अन्येभ्योऽपीति डः । पृषोदरादित्वात्तलोपः । गरुत्मान् गरुडस्तार्क्ष्य इत्यमरः । गरुडेन तद्रूपवाहनेन सहागमदित्यन्वयः ।। २९ ।।

छलारी — आगमनमेव विशदयति ।। तमिति । तद्वद्दर्शनेन यथा कृपा भवेत्तथा आर्तं दुःखितमुपलभ्य ज्ञात्वा दिविजैः सह छन्दोमयेन हरीच्छानुसारिणा हरीच्छया शीघ्रगतिमित्यर्थः । यद्वा । गरुडो हरिमूढ्वा हरिगमनागमनसमये स्वपक्षाभ्यामभिव्यक्तं सामगायनं श्रीहरिं श्रावयतीति हेतोः छन्दोमयेनोर्तं युक्तं सामवेदप्रधानेनेत्यर्थः । आकर्णयन् पत्ररथेन्द्रपत्रैरुच्चरितं स्तोममुदीर्णसाममिति तृतीयस्कन्धोक्तेः । गरुडेन समुह्यमानः समारूढो यतो यत्र तत्रागमत् ।। २९ ।।

लिङ्गेरी — जगन्निवासः सर्वजगदाश्रयो हरिस्तं गजेन्द्रं तद्वत्तथाऽऽर्तं दुःखितमुपलभ्य दृष्ट्वा गजेन्द्रकृतस्तोत्रं निशम्य श्रुत्वा चक्रायुधः सन् छन्दोमयेन वेदप्रतिपाद्यदेवेन्द्रेभ्यः श्रेष्ठेन गरुडेन समूह्यमानो गरुडारूढः सन्निति यावत् । संस्तुवद्भिर्दिविजैर्देवैः सह यतो यत्र गजेन्द्रस्त-त्राश्वगमदागतः ।। २९ ।।

सोऽन्तः सरस्युरुबलेन गृहीत आर्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रा-
न्नारायणाखिलगुरो भगवन् नमस्ते ।। ३० ।।

सत्यधर्मीया — सरसि सरोवरे तत्राप्यन्तः गुरुबलेन बहुबलवता ग्राहेण गृहीत इत्यार्तः । खे गगने । गरुत्मति गरुडे गरुतोऽस्य पक्षाः सन्तीति स तथा । यवादिरिति वत्वं न । उपविष्टं हरिं विष्णुमुपात्तचक्रमुद्धृतचक्रं दृष्ट्वा । साम्बुजकरमम्बुजेन कमलेन सहितश्चासौ करः शुण्डा च । तमुत्क्षिप्योत्तानीकृत्य । साम्बुजकरत्वेन त्वदम्बुजाक्षीगृहाश्रयोऽहमिति दयनीय इति द्योतयति ।

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् । लिहभ्द्यां लोचनालिभ्यां भगवान्पातु नो हरिः । सूर्यः छायाश्रितानां न करोति तापम् । क्रूरोऽपि मर्त्यः स्वकलत्रसान्द्रसम्बन्धभाजां न हि तापदायीत्यादौ तथाऽवगतेः । अखिलगुरो । हे नारायण भगवन् । ते नम इति गिरमाह । बह्वहमनाहारात्कृच्छ्रादि-त्युक्तिः । या सरसी । कासारः सरसी सर इत्यमरः । तस्या अन्तरिति । सरस्यामेवोरुबलस्तेन गृहीतोऽन्तः शरीरान्तः कृच्छ्रादिति वा । रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुमिति सभाजनार्थमम्बुजं करेऽदीधरदिति वा ॥ ३० ॥

छलारी — स गजेन्द्रमुरुबलेन बहुबलेन ग्राहेण । गरुत्मत्यारूढं खे आकाशे दृष्ट्वोपात्तमुद्यतं चक्रं येन तम् । साम्बुजकरं पद्मसहितशुण्डमुत्क्षिप्योर्ध्वमुखं कृत्वा कृच्छ्रात्कष्टाद्गिरं वचनम् । किं तद्वचनमित्यत आह ॥ नारायणेत्यादिना । नमस्त इत्यतः परमितिशब्दोऽध्याहार्यः । इति गिरमाहेत्यन्वयः ॥ ३० ॥

लिङ्गेरी — स गजेन्द्र उरुबलेन ग्राहेण सरोवरान्तर्गृहीतो यतोऽत एवार्तः सन् स्थितोऽपि स एवाकाशे उपात्तचक्रं स्वीकृतसुदर्शनं गरुत्मति गरुडे स्थितं हरिं दृष्ट्वा । साम्बुजकरं कमलसहितं स्वशुण्डामुत्क्षिप्याखिलगुरो भगवन्नारायण ते नम इति गिरं वाक्यं कृच्छ्राद्बह्वायासादाह ॥ ३० ॥

तं वीक्ष्य पीडितमजः सहसाऽवतीर्य
सग्राहमाशु सरसः कृपयोज्जहार ।
ग्राहाद् विपाटितमुखादरिणा गजेन्द्रं
सम्पश्यतां हरिरमूमूचदुस्रियाणाम् ॥ ३१ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे तृतीयोऽध्यायः ।

सत्यधर्मीया — आगत्य किं कृतवानित्यत आह ॥ तमिति । अजः उत्पत्तिरहितोऽवतीर्य सहसा भक्तभक्तिपारवश्येन । अजः पादाभ्यां गच्छन् । अज गतिक्षेपणयोरिति स्मरणात् । विवृतं च व्यादेशाभावविषये ऋग्भाष्याद्युदाहरणेनातीतस्कन्धेऽनुसन्धेयम् । गरुडो न त्वरितगतिरित्यर्थोपबर्हकं तं गरुडं पीडितं वीक्ष्येत्यन्वयलापने पदत्रिकं ज्ञेयम् । अतः कृपया सहसाऽवतीर्येत्यपि सुलग्नम् ।

त्राहीति व्याहरन्तं त्रिदशरिपुसुतं त्रातुकामो रहस्ये
विस्रस्तं पीतवस्त्रं निजकटियुगले सव्यहस्तेन गृण्हन् ।
वेगश्रान्तं नितान्तं खगपतिममृतं पाययन्नन्यपाणौ
सिंहाद्रौ शीघ्रपातक्षितिपिहितपदः पातु मां नारसिंहः ॥

इति सिंहाचलमाहात्म्योक्तेः । अत्रामृतं घृतं सलिलं वा ज्ञेयम् । न तु पीयूषम् । अतत्पानतोऽजरामरत्ववरवितरणस्य हरिकृतस्यादिपर्वण्युक्तेः । तथा हि तत् ।

तमुवाचाव्ययो देवो वरदोऽस्मीति खेचर । सर्वव्रतावतिष्ठेयमुपरीत्यन्तरिक्षगः । उवाच चैनं भूयोऽपि नारायणमिदं वचः । अजरश्चामरश्चस्याममृतेन विनाऽऽप्यहम् । एवमस्त्विति तं विष्णुरुवाच विनतासुतमिति । अमृते सलिले घृत इति विश्वः । अथवा । स्वचरणसञ्चरणेनोपात्तपावित्र्याया धरित्र्याः संसर्गे तयोर्विमुक्तिर्दुष्कायात्स्यादिति मतिः सहसाऽवततारेति । पीडितं गजेन्द्रं वीक्ष्य सग्राहं ग्राहेण सहितं सरसः सरोवरात्कृपयेज्जहारोद्दधारेति फलितलपनम् । अरिणा सहस्रदलवता चक्रेण विपाटितमुखाद्विदारिताननाद्ग्राहात् । उस्रियाणाम् । उस्रिया विजया देवा आदित्या अमराः सुरा इत्यभिधानम् । देवानां पश्यतां सतां हरिस्तापसाख्यो गजेन्द्रममूमुचत् । मुचेर्ण्यंताल्लङि चङ् । मोचयामास । वस निवासेऽस्मात् स्फायितंचीति रकि यजादित्वात्सम्प्रसारणेन रपरत्वे षत्वे उस्रशब्दो निष्पन्नः । ततस्तद्धिता इति बहुवचनेन ज्ञापितः स्वार्थे घस्तस्यायने इत्यादि नेयि उस्रिय इति भवति। अविंद उस्रिया अन्वित्यृग्भाष्यटीकाटिप्पणीषु । प्रकाशत्वानि लब्धवान् । उस्रियाः प्रकाशत्वानि प्रकटत्वानि नानाविधं प्राकटचम् । यद्यपि गोनामसूस्रियेति पठितम् । तथाऽपि रश्मिनामसु उस्रा इत्यस्य पठितत्वादित्यादेरभिधानात् । प्रकाशवतां उस्रियाणां सम्पश्यता-मित्यनादरेवाष्टी तस्य चानितरसाधारणस्य देवेष्वेवोपलब्धेरिति वा । पान्ति । शंसाधनानीति पशवो देवा इति विवृतत्वात्तद्विशेषगोसदृशतया वा देवानामित्युक्तिरिति । प्राचीनैरभिधानाभिधानविधानेन ऋग्भाष्ये देवत्वेन विवरणाभावेन चेति मन्तव्यम् । उस्राः किरणास्ते सन्तीति । मत्वर्थे घः । बहुवचनं चाद्यर्थे । सूर्यादीनां संपश्यतामित्यर्थः । सत्सु तदुत्तमेषु ब्रह्मादिषु तदादीकरणं साम्बुजकरमुत्क्षिप्येत्युक्तेस्तत्तामरसाम्लानता कलनानुकूल्यायेति युक्तमिति वा मन्तव्यम् । उस्रियाणां पश्यतामित्यनादरे षष्ठी ॥ ३१ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ८-३ ॥

छलारी — पीडितं महान्तं वीक्ष्येति गरुडोऽपि मन्दगतिरिरिति गरुडात्सहसाऽतिशीघ्रमवतीर्यावरुह्य सग्राहं गजेन्द्रं सरसः सरोवरादुज्जहारोर्ध्वं चकर्ष । अरिणा चक्रेण विपाटितं विदारितं मुखं यस्य तस्माद्ग्राहान्नक्रात् । उस्रियाणां देवानां संपश्यतां सताम् । उस्रिया विजया देवा इत्यभिधानम् । अमूमुचन्मोचयामास । मुचि मोचने इत्यस्माद्धातोः कर्तरि लिट् ॥ ३१ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ८-३ ॥

लिङ्गेरी — अज उत्पत्तिरहितो हरिर्ग्राहिेण पीडितं तं गजेन्द्रं वीक्ष्य सहसा गरुडादवतीर्य सग्राहं नक्रसहितं गजेन्द्रं सरसः सरोवरात्कृपयोज्जहारोद्धृतवान् । उद्धृतेनन्तरं हरिरुस्रियाणां देवानां संपश्यतां सताम् । अरिणा चक्रेण विपाटितमुखाद्विदारितवदनाद्ग्राहाद्गजेन्द्रममूमुचत् मोचयामास । उस्रिया अमरा देवा इति नाममहोदधिः ॥ ३१ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ८-३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

श्री शुक उवाच–

तदा देवर्षिगन्धर्वा ब्रह्मेशानपुरोगमाः ।
मुमुचुः कुसुमासारं शंसन्तः कर्म तद्धरेः ॥ १ ॥

सत्यधर्मीया — दूरीकृतदुरितस्य हरौ निरतिशयभक्तिर्भवति । तद्दूरकारणानि निरूपयन्नादौ गजेन्द्रमोचनानन्तरं का कथा प्रवृत्तेति राजसमाजसंशयं पराकरोति ॥ तदेति । यदाऽमूमुचद्गजं तदा देवा ऋषयो वसिष्ठाद्या देवर्षयो नारदाद्याश्च गन्धर्वाश्च ते । ब्रह्मेशानौ पुरोगमौ येषां ते तथा । कुसुमानामासारो धारासम्पातस्तम् । तत्कर्म शंसन्तः सन्तो मुमुचुः ॥ १ ॥

छलारी — देवादीनां गजेन्द्रमोक्षणमहिमानं दृष्ट्वा पुष्पवर्षादिकमाह ॥ तदेति । तदा गजेन्द्रमोचनकाले कुसुमानामासारं वृष्टिं मुमुचुश्चक्रुः । तत् गजेन्द्रमोचनरूपं कर्म चरितम् ॥ १ ॥

लिङ्गेरी — अत्रापि भगवति श्रीनारायणे दृढतरभक्तिजननाय हरेर्माहात्म्यं निरूप्यते ॥ तदेत्यादिना । हरिर्यदा गजेन्द्रममूमुचत्तदा ब्रह्मेशानपुरोगमाश्चतुर्मुखपुरःसराः देवर्षिगंधर्वा

हरेर्गजेन्द्रमोचकस्य तत्कर्म तन्मोक्षणरूपचरितं शंसन्तः स्तुवन्तः कुसुमासारमविच्छिन्नधारपुष्पसमूहं हरौ मुमुचुः क्षिप्तवन्तः ॥ १ ॥

नेदुर्दुन्दुभयो दिव्या गन्धर्वा ननृतुर्जगुः ।
ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥

सत्यधर्मीया — दिवि भवा दिव्याः । दुन्दुभयो विनेदुः स्वयमेव । देववाद्यान्यवाद्यंत स्वयमेवेति हरिवंशोक्तेः । दुन्दुभयो दिव्या देवसम्बन्धिन्य इति व्याख्यानम् । दुन्दुभिरक्षेषु । अक्षेषु किम् । अयं दुन्दुभिर्वाद्यविशेष इति । तथोभावक्षत्रिय इति च लिङ्गानुशासने विशिष्योक्तेर्विश्वे, दुन्दुभिर्दितिजे भेर्याम् । भेरीस्त्रीदुन्दुभिः पुमान् इत्यमरोक्तेर्लेखकदोषायातमवसेयम् । गन्धर्वाः ननृतुर्जगुश्च । गन्धर्व्यश्च गन्धर्वा अप्सरसो ननृतुः । पुमांसश्च जगुरिति वा । पुमांस्त्रियेत्येकशेषः ॥ २ ॥

छलारी — नेदुरवाद्यन्त । दिव्या देवसंबन्धिन्यः ॥ २ ॥

लिङ्गेरी — तदा दिव्यादुंदुभयो भेर्यो नेदुर्ध्वनियुक्ता बभूवुः । विद्याधरा अप्सरसो ननृतुर्नर्तनं चक्रुर्गन्धर्वा जगुर्गानं चक्रुः । ऋषयश्चारणाः सिद्धाश्च पुरुषाभ्यां क्षराक्षराभ्यामुत्तमं हरिं तुष्टुवुः अस्तुवन् ॥ २ ॥

योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् ।
मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ॥ ३ ॥

सत्यधर्मीया — ग्राहं च किमनुजग्राह हरिः किं वा न । स च किं जात्या तथा किंवा द्विपवच्छापोपात्ततद्देहस्तथा चेत्स च प्राक इत्येतत्सर्वं निरूपयति ॥ य इति । देवलशापप्रकारस्तु भारतोक्तेर्वक्ष्यते । परमाश्चर्यरूपधृक् पुरुषाकारधरो देवलशापेन यो ग्राहोऽसावित्यन्वयः । मुक्तो दुर्योनेः । मुक्तशब्दयोगेऽपादानपञ्चम्या भाव्यम् । कथं तृतीयेति निरस्तमनेनेति ज्ञेयम् । हूहूर्गन्धर्वसत्तम इति सुपठम् । हू इति व्हयतेः । व्हेञः क्विप् । वचिस्वपीति सम्प्रसारणम् । हल इति दीर्घः । हाहाहूहूश्चैवमाद्या गन्धर्वा इत्यमरः । हूहूगन्धर्वेति पाठेऽपि हूहूश्चासौ गन्धर्वसत्तमश्चेति ऐकपद्येन व्याख्येयम् । भोजस्त्वनयोरव्ययत्वमाहेति भानुराहेति न कोऽपि क्लेशस्तत्पक्ष इति ज्ञेयम् ॥ ३ ॥

छलारी — नक्रगजेन्द्रयोर्मध्ये प्रथमं नक्रस्य स्वरूपमवदत् । तस्य गतिमाह ।। योऽसाविति । योऽसौ ग्राहो देवलस्य ऋषेः शापेन शापप्राप्तग्राहयोनेः सद्यो मुक्तः परमाश्चर्यरूपं पुरुषाकारं धरतीति तथोक्तः । उत्तमश्लोकमगायतेत्यन्वयः । स पूर्वं क इत्यत आह ।। हूहूनामको गन्धर्वसत्तम इति । अत्रैवं हि कथा । कस्मिंश्चित्सरसि स्त्रीभिः सह जलक्रीडां कुर्वन्नसौ हूहूगन्धर्वस्तत्र स्नातुं प्रविष्टं देवलं मुनिं पदि प्रगृह्य विचकर्ष । स कुपितः सन् ग्राहो भवेति तं शशाप । पुनस्तेन प्रसादितः सन्नुवाच । एवमेव गजेन्द्रं गृणीष्व । तदा गजेन्द्रमुद्धृतवान्हरिस्त्वामपि शापान्मोचयिष्यतीति ।। ३ ।।

लिङ्गेरी — ग्राहदेहवान् यश्चेतनोऽसौ पूर्वं हूहूनामकगन्धर्वोत्तमो देवलस्य ऋषेः शापेन ग्राहोऽभूदिदानीं तस्माच्छापाद्भगवत्स्पर्शमहिम्ना मुक्तः सन् । परमाश्चर्यरूपं धृग्धारी सन् ।। ३ ।।

प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ।
अगायत यशोधाम कीर्तन्यगुणसत्कथम् ।। ४ ।।

सत्यधर्मीया — यशोधाम कीर्तिविशेषाश्रयम् । कीर्तन्यगुणसत्कथम् । कीर्तनशब्दादर्हार्थे तद्धितो यत्प्रत्ययः । कीर्तन्याः कीर्तयितुं योग्यास्तत्र साधुरिति । यद्वा । सदिति देहलीदीपन्यायेन सन्तो गुणाः सत्यः कथाश्चेत्यन्वेति । यस्य स तम् । अगायतागायत् ।। ४ ।।

छलारी — यशसः कीर्तेर्धामाश्रयम् । अत एव कीर्तन्यगुणसत्कथं कीर्तनीया गुणाः सत्यो निर्दोषाः कथा यस्य तम् ।। ४ ।।

लिङ्गेरी - उत्तमश्लोकं ब्रह्मादिस्तुत्यमव्ययं यशोधाम सत्कीर्तिसागरं कीर्तन्यगुणसत्कथं कीर्तनीय-भक्तानुकंपित्वादिगुणनिर्दुष्टकथावन्तमधीशमधिकस्वामिनं हरिं शिरसा प्रणम्यागायतास्तौत् ।। ४ ।।

सोऽनुकम्पित ईशेन परिक्रम्य प्रणम्य तम् ।
लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ।। ५ ।।

सत्यधर्मीया — अनुकम्पितः कृपापात्रीकृतः । इतजन्तः । मुक्तकिल्बिषो लोकस्य देवादेः पश्यतः सतः । स्वं लोकं गन्धर्वस्थानमगमद्गतवान् ।। ५ ।।

छलारी — सोऽनुकंपित ईशेन नारायणेन स गन्धर्वोऽनुकंपितः कृपापात्रीकृतः परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य नमस्कृत्य पश्यतः सतो मुक्तकिल्बिषो गतपापः सन् स्वलोकं प्रत्यगात्प्राप ।। गम्लृ गतौ ।। ५ ।।

लिङ्गेरी — स हूहूनामगन्धर्व ईशेन हरिणाऽनुकंपितोऽनुग्रहीतो मुक्तदोषः सन् । तं हरिं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य लोकस्य तत्र स्थितजनस्य पश्यतः सतः । स्वं स्वकीयलोकमगादगच्छत् । इणो गा लुङीति गत्यर्थादिष्टो लुङि गादेशः ।। ५ ।।

गजेन्द्रो भगवत्स्पर्शाद् विमुक्तोऽज्ञानबन्धनात् ।
प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ।। ६ ।।

सत्यधर्मीया — प्रसङ्गसङ्गत्या वक्तव्यमुक्त्वा प्रकृतमनुसरति ।। गजेन्द्र इति । भगवत्स्पर्शात्सग्राहमाशु सरसः कृपयोज्जहारेत्युक्तभगवत्स्पर्शात् । उपलक्षणमेतत् । दृष्ट्वा गरुत्मति हरिमितीरितादृर्शनाच्च । अज्ञानबन्धनादज्ञानेन बन्धयतीति तत्तथा च । तस्माद्गजजन्मनो भगवतो रूपं सदृशाकारम् । तदेव व्यनक्ति ।। पीतवासाश्चतुर्भुज इति ।। ६ ।।

छलारी — किमिदानीं फलमभूदित्यतः स्तुत्या प्रसन्नस्य हरेर्दर्शनेन मुक्तकिल्बिषस्य तत्सारूप्यं फलमभूदित्याह ।। गजेन्द्र इति । अनेन बन्धयतीत्यज्ञानबन्धनं गजयोनिस्तस्मात् । रूपं समाकारं सारूप्यमित्यर्थः । तदेवाह ।। पीतवासाश्चतुर्भुज इति ।। ६ ।।

लिङ्गेरी — गजेन्द्रो भगवत्स्पर्शादज्ञानबन्धनात्परमात्माविद्याप्राप्तसंसारबन्धनाद्विमुक्तः सन् । पीतवासाश्चतुर्भुजश्च सन् भगवतो रूपसदृशं रूपं प्राप्तः ।। ६ ।।

स वै पूर्वमभूद्राजा पाण्ड्यो द्रविडसत्तमः ।
इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ।। ७ ।।

सत्यधर्मीया — जन्मकर्मावदातः प्रागिति झडिति भगवदनुग्रहपात्रमासीदयमिति तत्स्वरूपं निरूपयति ।। स इति । पाण्ड्य इति । तद्देशभवः । द्रविडसत्तम इति तज्जात्युक्तिः । इन्द्रद्युम्न इति ख्यात इति नामोक्तिः । विष्णुव्रतपरायणो विष्णुव्रतासक्त इति तदाचारोक्तिः ।। ७ ।।

छलारी — गजेन्द्रः पूर्वजन्मनि क इत्यत आह ।। सवा इति । पाण्ड्यः पाण्ड्यदेशाधिपो द्रविडसत्तमो द्राविडो विष्णोर्व्रतमर्चनमेव परं मुख्यमयनमाश्रयो यस्य स तथा । इन्द्रद्युम्नस्तन्नामकराजाऽभूदासीत् । भू सत्तायां लङ् ।। ७ ।।

लिङ्गेरी — गजेन्द्रस्य पूर्वं स्वरूपं शापेन गजत्वप्राप्त्यादि वर्णयति ॥ स वा इत्यादिना । स गजेन्द्रः पूर्वं द्रविडसत्तमो द्राविडेष्वत्युत्तमः पाण्ड्यदेशाधिपतिर्विष्णुव्रतपरायण इन्द्रद्युम्न इति ख्यातो राजाऽभूत् ॥ ७ ॥

स एकदाऽऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम् ।
जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रयः ॥ ८ ॥

सत्यधर्मीया — एतादृशस्येन्द्रद्युम्ननाम्नः कुतो दशेदृशीत्यतस्तन्निदानं वक्तुमुपोद्घातमाह ॥ स इति । आत्मवान् यतमना आराधनकाले गृहीतमौनव्रतो गृहीतं मौनं व्रतं येन स तथा । आप्लुतः शिरस्नात ईश्वरमच्युतं हरिम् । कुलाचलाश्रयः कुलाचलो मलयाद्रिराश्रयो यस्य सः । कुलाचलाश्रम इति पाठेऽप्याश्रम आश्रयो यस्य स इति तदर्थः । जटाधरो धरतीति धरो जटानां धरो हि सः । अत एव तापसः । एकदा समर्चयामासापूजयत् ॥ ८ ॥

छलारी — तस्य गजयोनिप्राप्तौ निमित्तं वक्तुमुपोद्घातं रचयति ॥ स एकदेति । आत्मवान्मनोजयवान् । परमात्मज्ञानीति वा । आराधनकाले गृहीतं मौनव्रतं लौकिकसंभाषणराहित्यं व्रतं येन स तथा । तापसस्तपस्व्याप्लुतः स्नातः कुलाचलपर्वतमाश्रयतीति स तथोक्तः ॥ ८ ॥

लिङ्गेरी — स इन्द्रद्युम्न एकदा हरेराराधनकाले कुलाचले माहेन्द्रनाम्न्याश्रयो यस्य स तथा सन् । तापसस्तपःकरणे प्रवृत्तः सन् जटाधरोऽप्याप्लुतस्तत्रस्थनद्यां स्नातः सन् गृहीतमौनव्रतः आत्मवान्मनोनिग्रहवांश्च सन् अच्युतं देशकालगुणैश्च च्युतिरहितमीश्वरं सर्वस्वामिनं हरिं समर्चयामास सम्यगाराधितवान् ॥ ८ ॥

यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ।
तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥

सत्यधर्मीया — यदृच्छा तु तदिच्छा स्यादित्युक्तेर्हरीच्छया । परिश्रितः परिवारितः । अकृतमर्हणादिकं येन तम् । रहस्येकान्ते तूष्णीमुपासीनम् । अनेनानुत्थानं च सूचयति । ऋषिर्वीक्ष्य । तस्मा इत्युत्तरपद्यादाकृष्यते । तस्मै चुकोप । ह खेदे । अनेन क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति स्मरणात्कथमुपासीनमिति द्वितीयेति परास्तम् । यद्वा शब्दशक्तिप्रकाशिकोक्तरीत्या शिष्यमीर्ष्यति ॥ ॥ ९ ॥

छलारी —— इदानीं तन्निमिमाह ॥ यदृच्छयेति । तत्रेन्द्रद्युम्नाश्रमे । मुनिरगस्त्यः । परिश्रितः परिवृत इत्यर्थः । अकृतमर्हणादिकं प्रत्युत्थानाद्यर्चनादिकं येन तं तूष्णीं रहस्युपासीनमिन्द्रद्युम्नं वीक्ष्य ऋषिर्ज्ञानी चुकोप कोपं चकार ॥ ९ ॥

लिङ्गेरी —— यदृच्छयाऽदृष्टप्रेरकहरीच्छया तत्रेन्द्रद्युम्नतपःस्थले महायशाः प्रशस्तकीर्तिर्मुनिरगस्त्याख्यः शिष्यगणैः परिश्रितः सन् समागमत् । तमगस्त्यं वीक्ष्याकृतार्हणादिकं प्रत्युत्थानाभिवादनरूपपूजारहितं रहस्येकान्ते उपासीनं तूष्णीं स्थितं चलनमात्रेणापि विधुरमिन्द्रद्युम्नं दृष्ट्वा ऋषिरगस्त्यश्चुकोप । कोपं चकार । हेत्यनेन राज्ञोऽनिष्टं सूचयति ॥ ९ ॥

तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ।
मद्धेलनात् प्राविशतां तमिस्रं यथा गजः स्तब्धमतिः सदोषः ॥ १० ॥

सत्यधर्मीया —— अत्राप्यन्वेति तस्मा इति । इमं वक्ष्यमाणम् । दुरात्मा दुर्मनस्कोऽकृतबुद्धिः कृता पाद्यार्घ्यादौ बुद्धिर्यस्य स तथा । स न भवतीति तथा । अतो न दुरात्मेत्यनेनार्थिकी पुनरुक्तिः । मद्धेलनान्ममानादरणात्तमिस्रमज्ञानप्रचुरं जन्म । तिरस्कार्यं जन्मेति वा । तमिस्रेव तमिस्राऽस्त्यत्रेति पक्षद्वयेऽप्यर्श आद्यच् । ज्योत्स्ना तमिस्रेति साधु । क्षेपे तमिस्रं तिमिरे कोपे स्त्री तु तमस्तताविति विश्वो मेदिनी च । प्राविशतां प्रविशतु । सूचितं जन्म निदर्शनद्वारा दर्शयति ॥ यथेति । स्तब्धमतिर्मन्दबुद्धिस्तथाऽयं सदोष इति । तथा तज्जातिर्भवत्विति शेषः । विशापमपीदं व्यपदेशेन दत्तवानित्यप्याह । सदा कृतबुद्धिः शिक्षितमनाः । अद्य मद्धेलनात् । हेडृहोडृनादर इति स्मरणात् । स्तब्धमतिर्गजो भवतु । यदा तदेत्यध्याहार्यौ । उषः ब्रह्म कृतबुद्धिः । त्वदुद्धृतौ कृतमतिर्भवति । तदा हे रद्य । रदावश्यस्य इति मत्त्वर्थे तद्धिता इति बहुवचनज्ञापितो यः । दन्तिन् । अगजो गजेतरः । भवसीति शेषः । नक्तोषासेत्यृग्भाष्ये । उषा प्रकाशरूपत्वादिति तट्टीकायां च । नक्तेति रात्रिदेवतोष इत्यपररात्रिदेवतेति प्रसिद्धम् । शब्दद्वयं विष्णौ योजयति ॥ नक्तेति । वश कान्तावित्यस्मात्युसन् । प्रकाशरूपत्वादुषेत्युक्तेरुषो ब्रह्म । वशेः कसुनि कित्वाद् ग्रहिज्येति सम्प्रसारणे पूर्वरूपत्वे शेषत्वे चोष इति भवतीति ज्ञेयम् । उषः किच्चेत्युणादावुषा रात्रिविशेष इति व्युदपादि । तथाऽप्युपायस्योपायान्तरादूषकत्वात्प्रकृतोपयोगायेत्थमाश्रितं टीकायामित्यदोषः ॥ १० ॥

छलारी —— इमं वक्ष्यमाणं शापमेवाह ॥ असाधुरिति । अकृताऽशिक्षिता बुद्धिर्यस्य स तथा । मम हेलनादवज्ञानान्निमित्तात्तमिस्रमज्ञानजं प्राविशतां प्राप्नुयात् । अज्ञानजन्मैवाह ॥ यथेति । गजो यथा स्तब्धमतिस्तथैवायं राजा स्तब्धमतिरभूदिति यतोऽतः स एव । गज एव त्विति शेषः ॥ १० ॥

लिङ्गेरी — दुरात्मा दुष्टान्तःकरणोऽकृतबुद्धिरशिक्षितबुद्धिमानत एवासाधुरयमिन्द्रद्युम्नः । मद्धेलनान्ममावज्ञानाद्द्रोहाद्गजो यथा स्तब्धमतिस्तथाऽयं यतः सदोषस्ततस्तमिस्रमज्ञानप्रचुरं गजदेहं प्राविशतां प्रविष्टो भवतु । स एवेति पाठे गज एवास्त्वित्यर्थः । इतीमं शापमगस्त्यस्तस्मा इन्द्रद्युम्नायादाद्दत्तवान् ॥ १० ॥

श्री शुक उवाच–

एवं शप्त्वा गतोऽगस्त्यो भगवान् नृप सानुगः ।
इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥

सत्यधर्मीया — शप्त्वैवं विशापं च दत्वाऽगस्त्यः । इदं शापान्तरमेकस्येति ज्ञेयम् । सानुगः सदासो भगवान्पूज्यः । दिष्टं दैवविहितमुपधारयन् ॥ ११ ॥

छलारी — भगवान्पूज्यः सानुगः सशिष्यस्तद्गजजन्म दिष्टं प्रेरकेश्वरेण प्रापितमवश्यमनुभोक्तव्यमित्युपधारयन्नालोचयन् ॥ ११ ॥

लिङ्गेरी — हे नृप । भगवान् अगस्त्य एवमिन्द्रद्युम्नं शप्त्वा सानुगः सन् गतः । राजर्षिरिन्द्रद्युम्नोऽपि एतद्दिष्टं मदद्दष्टोद्बोधकेश्वरप्रापितमिति मत्वा तच्छापवचनमुपधारयद्दधार ॥ ११ ॥

आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम् ।
हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥ १२ ॥

सत्यधर्मीया — कौञ्जरीं गजसम्बन्धिनीं योनिमापन्नः । तज्जन्ममहिमानमाह । आत्मस्मृतिविनाशिनीमात्मा स्वयं हरिश्च तत्स्मृतिविनाशिनीम् । नः, एवमापदिति कौञ्जरीं योनिमापन्न इत्यावृत्त्याऽन्वयो वा । अत्रेन्द्रद्युम्नः प्राक्त इति शङ्का भारते आनुशासनिके शान्तिपर्वणि भीष्मयुधिष्ठिरसंवादे । युधिष्ठिर उवाच । कथं शापोद्भवं नागं गन्धर्वाणां महात्मनाम् । एतदिच्छाम्यहं श्रोतुं विस्तरेण पितामह । भीष्मः । हाहाहूहूरिति ख्यातौ गीतवाद्यविशारदौ । इति तौ शापितौ तेन देवलेन महात्मना । ततो दृष्ट्वा शक्रेण । एकस्य नौ जयं देहि यत्ते मनसि वर्तते । पृथक् चिरन्तौ गायन्तौ । मौनस्य धारणात्तदा तौ कुपितौ । ऊचतुस्ते तदा वाक्यं गन्धर्वौ कालनोदितौ । मूढोऽयं नाभिजानाति निश्चयं द्वन्द्वगीतयोः । निशम्य तद्वचस्तेषां क्रोधादुत्थाय । एष हूहूर्दुरात्मा तु ग्राहत्वं यातु मूढधीः । त्वमेव गजराजस्तु भवस्व गिरिगह्वरे । ततस्तौ शापितौ तेन । प्रणम्य शिरसा विप्रं

गन्धर्वाविदमूचतुः । सरोवरे रम्ये नित्यं ग्राहो वसिष्यति । तृषार्तस्तत्र मातङ्गो गमिष्यति न संशयः । तदैवं देवदेवेशं स्तोष्यते नात्र संशयः । ततो नारायणः प्रीतो मोचयिष्यति शापितौ । शापाद्विमुक्तौ युगपद्गजो गन्धर्व एव तु । गजोऽपि यक्षतां यातः श्रीकृष्णेन विमोक्षितः । पस्पर्श पाणिना तावित्यादिग्रन्थेन वारणीया । अतो हस्ती हाहाः । तस्य चैतद्वचोऽनुरोधेन देवलशापानन्तरं गजजन्मनः प्राक् राजजन्माप्येकं कल्पनीयम् । कल्पभेदो वा कल्प्य इति । अथवा । त्वमेव गजराजस्तु इति देवलो गजश्चासौ राजा च गजराजः । प्राग्राजानन्तरं गज इत्यभिप्रायेण शशापेत्यर्थकरणे भागवतैककण्ठ्यसम्भवात् । न च प्रायो यदि मुनेरभिप्रायोऽयं स्याद्धन्त तर्हि जन्मक्रममनुरुध्य राजगज इति वक्तव्यं स्यादिति वाच्यम् । तस्यात्युल्बणतया बह्वनिष्ठतया पूर्वमुक्तरिति सम्भवत्वसम्भवात् । अगस्त्योऽपि मौनविघातकतया मौनकाल एव देवलः शशापेत्यानुरूप्यं च । दिष्टमित्यस्य पूर्वं देवलेनातिसृष्टमित्यप्यर्थः । गजश्रेष्ठतया च भाव्यमिति भावाद्वा सर्वमनवद्यम् । हर्यर्चनानुभावेन तन्महनमाहात्म्येन । न भक्त्या नधिया हत इति पाठे भक्त्या धिया च न हतो न त्यक्तो यद्गजत्वेऽप्यनुस्मृतिरिति सुगमार्थः पाठः ॥ १२ ॥

छलारी — आत्मनः स्वपरमात्मनश्च स्मृतिविनाशिनीं कौञ्जरीं गजसम्बन्धिनीं योनिं जन्म प्रपन्नः प्राप्तवान् । तर्ह्येतादृशगजजन्मनि पूर्वजन्मस्मृतिः कथं जातेत्यत आह ॥ हरेरिति । गजत्वेऽप्यात्मस्मृतिविनाशकगजजन्मन्यप्यनुस्मृतिः पूर्वजन्मस्मृतिरभूदिति यद्धरेरर्चनस्य पूर्वजन्मनि कृतस्यातिशयितपूजाया अनुभावेन महिम्नेति ज्ञेयम् ॥ १२ ॥

लिङ्गेरी — इन्द्रद्युम्न आत्मनः स्वस्य परमात्मनोऽपि स्मृतिविनाशिनीं कौञ्जरीं गजसंबन्धिनीं योनिं देहमापन्नः प्राप्तः । तथाऽपि हरेरर्चनानुभावेन पूजामहिम्ना भक्त्या चाहं धिया न हतः । गजत्वेप्यनुस्मृतिरिति यत्तद्धर्यर्चनानुभावेनेति पाठान्तरेऽर्थः ॥ १२ ॥

एवं विमोक्ष्य गजयूथपमब्जनाभ-
स्तेनापि पारिषदतां गमितेन युक्तः ।
गन्धर्वसिद्धविबुधैरुपगीयमान-
कर्माऽद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥

सत्यधर्मीया — गजयूथपं गतम् । पारिषदताम् । परिषदि साधुः । परिषदो ण्य इत्यत्र योगविभागाण्णः । भक्ताण्ण इत्यनुवृत्तेः । अणिति प्रमादतः । पर्षदोण्य इति पाठे एकाक्षरन्यौन्यस्य

छन्दस्यदोषत्वेन पार्षदतामित्यपि सम्भवति । योगविभागादिकं तु प्राग्वत् । प्रमथाः स्युः पारिषदाः भूताः शिवस्य पार्षदा इति चामरसंसारावर्तौ । यक्षताया भारत उक्तेः श्लिष्टता ज्ञेया । गमितेन प्रापितेन । चतुर्भुजत्वपीताम्बरत्वादिसारूप्यं तु सांसारिकं तात्कालिकमेव ज्ञेयम् । अमुक्तिसमयत्वात् । गरुडासनः । गरुडध्वज इत्याद्यवचनेन गरुडासन इति वचनेन चावतीर्येत्यनेन सूचितम् । गरुडस्यासनं येन प्राक् स गरुडासनः सन् अगादिति कारुणिकत्वं हरेर्द्योत्यते । गरुड आसनं यस्य सोऽगात् । त्रिकूटादित्यप्यावृत्त्यार्थो ज्ञेयः । त्रिकूट इति विश्रुत इति प्रागुक्तेः । अगाल्लोकलोचनापेक्षया । पारिषदतायाः तत्सम्बन्ध्यङ्गं तदितेनेत्यप्यर्थः । अनेन रूपपदप्राप्ततादात्म्य भ्रमो भ्रंशित इति ज्ञेयम् ॥ १३ ॥

छलारी — गजेन्द्रस्य गजयोनिप्राप्तौ निमित्तमुक्त्वेदानीं गजेन्द्रमोक्षणानन्तरं किं कृतवानित्याकाङ्क्षायामाह ॥ एवमिति । पार्षदगतिं पार्षदस्वरूपं गमितेन प्रापितेनापीन्द्रद्युम्नेनाप्युपगीयमानानि कर्माणि चरितानि यस्य स तथा । अद्भुतं स्वभवनमावासस्थानम् ॥ १३ ॥

लिङ्गेरी — अब्जं नाभौ यस्य स हरिर्गजयूथपं गजेन्द्रमेवमुक्तरीत्या विमोक्ष्य स्वस्य पार्षदगतिं समीपवर्तिसेवकतां गमितेन प्रापितेन तेनापि युक्तः सन् । गन्धर्वैः सिद्धैर्विबुधैर्देवैश्चोपगीयमानकर्मा स्त्युत्यचरितः सन् । गरुडासनो गरुडारूढः सन् अद्भुतं स्वभवनं स्वमंदिरमगात् ॥ १३ ॥

एवं महाराज तवेरितो मया
कृष्णानुभावो गजराजमोक्षणम् ।
स्वर्ग्यं यशस्यं कलिकल्मषापहं
दुःस्वप्रनाशं कुरुवर्य शृण्वताम् ॥ १४ ॥

सत्यधर्मीया — स्वर्ग्यं तदधिकारिणाम् । पूर्वस्कन्धविवृतरीत्या मोक्षसाधनं वा । दुःस्वप्ननाशं दुःस्वप्नानां नाशो यस्मात् । तन्नाशो नाम तत्सूचितदुष्फलानुपलम्भकता ॥ १४ ॥

छलारी — गजेन्द्रमोक्षणरूपहरिमाहात्म्यश्रवणे आदरजननाय तत्स्तौति ॥ एवमिति । गजराजमोक्षणं नाम कृष्णस्योत्कृष्टानन्दरूपस्य हरेरनुभावो महिमा तवेरितः कथितः । कथंभूतं गजेन्द्रमोक्षणमित्यत आह ॥ स्वर्ग्यमिति । शृण्वतां स्वर्गसाधनं यशःसाधनं कलिदोषनाशनम् ॥ १४ ॥

लिङ्गेरी — हे महाराज कुरुवर्य कुरुश्रेष्ठ । शृण्वतां वक्तॄणां च स्वर्ग्यं स्वर्गप्रदं यशस्यं कीर्तिकरं कलिकल्मषाणि कलियुगेन कलिनाऽसुरेण च प्राप्तपापान्यपहन्ति संहरतीति तथोऽक्तम् । दुःस्वप्नसूचितारिष्टनाशकं कृष्णस्य पूर्णसुखस्य हरेरनुभावो गजेन्द्रमोक्षणं चेत्येतदेवं मया तवेरितं कथितम् । कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचक इत्यादिकृष्णशब्द उक्तार्थ एव ॥ १४ ॥

अथानुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः ।
शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये ॥ १५ ॥

सत्यधर्मीया — श्रेयस्कामाः केचन दुःस्वप्नाद्युपशान्तय इति वा सामानाधिकरण्येनेष्टप्राप्त्यनिष्टनष्ट्या इति वाऽन्वयो ज्ञेयः ॥ १५ ॥

छलारी — आदरजननाय शिष्टाचारमप्याह ॥ अथेति । श्रेयस्कामाः पुरुषार्थकामा द्विजातयो ब्राह्मणवर्याः प्रातरुत्थाय शुचयः सन्तो दुःस्वप्नादीनां दुःस्वप्नप्रभृत्यपायानामुपशान्तये नाशाय यथावद्भक्तिपूर्वकमित्यर्थः । एतद्गजेन्द्रमोक्षणस्तोत्रमनुकीर्तयन्ति ॥ १५ ॥

लिङ्गेरी — अथ गजेन्द्रमोक्षणादिरूपहरिचरितस्य स्वर्गादिफलहेतुत्वादेव श्रेयस्कामाः पुरुषार्थापेक्षा द्विजातयस्त्रैवर्णिकाः प्रातरुत्थाय शुचयः शौचाचमनादिना निर्मलाः सन्तो दुःस्वप्नाद्युपशान्तये एतद्गजेन्द्रमोक्षणरूपं हरिचरितमनुकीर्तयन्ति पठन्ति ॥ १५ ॥

इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम ।
शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १६ ॥

सत्यधर्मीया — सर्वभूतमयः तत्प्रधानः । तानि मयत इति स तथेति वा । केचिद्यथेति पठन्तो यथा यथावद्भक्तियुक्ततयेति व्याकुर्वन्ति । हरिगिरैवेदं पुण्यस्थानमिति ज्ञायत इति भावः ॥ १६ ॥

छलारी — अनेन स्तोत्रेण श्रेयो भवतीति कस्मात्ज्ञातम् । साक्षाद्भगवद्वचनादेवेत्याह ॥ इदमिति । सर्वभूतमयः सर्वभूतेषु प्रधानः । स्मर्यमाणपदार्थानां भगवदधिष्ठानत्वं ज्ञेयमिति भावेनेदं विशेषणम् । अत एव विभुर्व्याप्तः ॥ १६ ॥

लिङ्गेरी — हे कुरुसत्तम । सर्वभूतानां मयः प्रधानो विभुः सर्वसामर्थ्यवान् हरिः प्रीतः सन् सर्वभूतानां शृण्वतां सतां गजेन्द्रं प्रति वक्ष्यमाणमाह ॥ १६ ॥

श्रीभगवानुवाच–

ये मां त्वां च सरश्चेदं गिरिकन्दरकाननम् ।
वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥

सत्यधर्मीया — स्मरन्तीत्यष्टमश्लोकस्थेन मामित्यादीनामन्वयः । यद्यपि विश्वादौ गुल्मः स्तम्ब इत्यादिना पुल्लिङ्गतैवोक्ता तथाऽपि लिङ्गानुशासने मोपधेरुग्मसिद्धचुग्मगुल्माध्यात्मकुङ्कुमानि नपुंसक इत्युक्तेर्गुल्मानि स्तम्बान् । सर्वस्यापि स्मरणीयत्वे स्वचरणादिसंस्पर्शो निमित्तमिति ध्वनयितुमादौ मामित्युक्तिः । तत्काननमित्युत्तरपदलोपिसमासतो वा सम्भवति । गिरिकन्दरकाननमिति सर्वो द्वन्द्व एकवद्भवतीति वा गिरिकन्दरसहितं च तत्काननमित्युत्तरलोपसमासतो वा सम्भवति ॥ १७ ॥

छलारी — ये मां चेत्यादि श्लोकेषु सर्वेषां द्वितीयान्तानां स्मरन्तीत्यनेनान्वयः । कंदरं गुहा । गुल्मानि समूहान् ॥ १७ ॥

लिङ्गेरी — इदमित्युक्तं विवृणोति ॥ येमामित्यादिना ॥ सुरपादपान् मन्दारपारिजातादि देववृक्षान् ॥ १७ ॥

शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ।
क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८ ॥

सत्यधर्मीया — धिष्ण्यानि स्थानानि । क्षीरोदं क्षीरसमुद्रम् । यथोक्तं भारते । क्षीरोदजल-वीच्युग्रैर्धौतामलशिलातल इति । शृङ्गाणि त्रीणि । तत्रैकं काञ्चनात्मकं द्वितीयं राजतं तृतीयं पद्मरागसमकान्ति । यथोक्तं तत्रैव । तस्यैकं काञ्चनं शृङ्गं द्वितीयं राजतं स्मृतम् । तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम् । पद्मरागसमप्रख्यमिति । तदेतदैककण्ठ्यं ज्ञेयम् ॥ १८ ॥

छलारी — शृङ्गाणि शिखराणि । धिष्ण्यानि गृहभूतानि । प्रसंगादन्यस्यापि स्मरणे फलमाह ॥ क्षीरोदमित्यादिना । क्षीरोदं क्षीरसमुद्रम् ॥ १८ ॥

लिङ्गेरी — धिष्ण्यानि स्थानानि । धिष्ण्यमोकोनिवासनमित्यमरः ॥ १८ ॥

श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ।
सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥

सत्यधर्मीया — कौस्तुभं ब्रह्माभिमन्यमानं मणिम् । तत्कण्ठगं कौस्तुभमास धातेत्याचार्योक्तेः । कुं भुवं स्तुभ्नाति व्याप्नोतीति कुस्तुभोऽब्धिस्तस्यायम् । कुं स्तोभत इति कुस्तुभो भगवांस्तस्यायं वा । ष्टुभस्तम्भे । मूलविभुजादित्वात्कः । मालां वैजयन्तीम् । गदाम् गदतीति गदेः पचाद्यच् । तन्नामाह ॥ कौमोदकीमिति । कोः पृथिव्या मोदको हरिस्तस्येयम् । विष्णुः कुमोदकः शौरिरिति दुर्गः । तस्या एव कौपोदकीति नामान्तरम् । कूपोदकजातत्वात्कौपोदकीति तत्पक्षे व्युत्पत्तिः । ममेति श्रीवत्समालापदेन वा सुदर्शनमित्यादिना वाऽन्वेति । कौस्तुभकौमोदकीपदार्थयोः प्रत्ययेनैव भगवत्सम्बन्धिताबोधनादिति मन्तव्यम् । सुदर्शनं शोभनं दर्शनमस्येति । सुखेन दृश्यत इति वा सुदर्शनस्तम् । भाषायां शासि युधिदृशिधषिमुषिभ्यो युजिति युचि युवोरनाकावित्यनेन सुदर्शन इति भवति । सुदर्शनो हरेश्चक्रे मेरुवंशे द्रुमे पुमान् । सुदर्शनोऽस्त्रियां चक्र इति नामनिधानम् । पाञ्चजन्यं पञ्चजने दैत्यविशेषे भवः । बहिर्देवपञ्चजनेभ्य इत्युपसङ्ख्यानात् यञ् । पञ्चजने पाताले भव इति केचित् । पतगेश्वरं सुपर्णं शोभने पर्णे पक्षौ यस्य तम् ॥ १९ ॥

लिङ्गेरी — पतगानां पक्षिणामीश्वरं गरुडम् । पतत्त्रिपक्षिपतगेति । सुपर्णः पन्नगाशन इति च ॥ १९ ॥

शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम् ।
ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥ २० ॥

सत्यधर्मीया — शेषं, मम कलांशो यस्यां सा तां सूक्ष्मामणीयसीं मदाश्रयामहमाश्रयो यस्याः सा तां देवीं द्योतमानां कृताभिषेकां वा ॥ २० ॥

छलारी — मम कलांऽशो यस्यां सा तां सूक्ष्मामणुपरिमाणां मदाश्रयां मद्वक्षस्थलाश्रितां लक्ष्मीं भवं रुद्रम् ॥ २० ॥

लिङ्गेरी — भवं रुद्रम् । व्योमकेशो भव इति च ॥ २० ॥

मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ।
कर्माण्यनन्तपुण्यानि सूर्यसोमहुताशनान् ॥ २१ ॥

सत्यधर्मीया — अनन्तपुण्यानि तदाधायकानि ॥ २१ ॥

छलारी — अनन्तपुण्यप्रदानि कर्माणि चरितानि ॥ २१ ॥

लिङ्गेरी — हुताशनोऽग्निः ॥ २१ ॥

प्रणवं सत्यमव्यक्तं गोविप्रान् धर्ममक्षयम् ।
दाक्षायणीं धर्मपत्नीं सोमकश्यपयोरपि ॥ २२ ॥

सत्यधर्मीया — प्रणवं त्रिमात्राद्यनन्तमात्रमोङ्कारम् । सत्यं ब्रह्म । यथार्थभाषिणीं देवीम् । अव्यक्तं जडप्रकृतिमक्षयं फलतः । धर्मं हरिभक्त्यात्मकम् । धर्मपत्नीं दाक्षायणीम् । ददौ स दश धर्मायेति प्रागुक्तेर्दाक्षायणीरिति वक्तव्यमिति चेन्न । नारायणप्रसवित्र्या एव ग्रहणं मुख्यत्वात् । धर्मस्य दक्षदुहितुतर्यजनिष्ट मूर्त्यामित्यादेः । गतम् । सोमस्य दाक्षायणी रोहिण्याद्याः कश्यपस्यादि-त्याद्या दाक्षायणीः पत्नीः ॥ २२ ॥

छलारी — प्रणवमोङ्कारं सत्यं यथार्थभाषिणीमव्यक्तजडप्रकृतिमव्ययं धर्मं विष्णुभक्तिलक्षणं दाक्षायणीं दक्षपुत्रीं धर्मस्य यमस्य पत्नीं सोमकश्यपयोरपि दाक्षयणीं पत्नीम् ॥ २२ ॥

लिङ्गेरी — प्रणवमोङ्कारम् । सत्यमनारोपितमव्यक्तं प्रधानम् । विश्वं सत्यं मघवाना इत्यादिश्रुतेः । दाक्षायणीं दक्षपुत्रीं सतीम् । दक्षप्रजापतिभार्यां च । धर्मस्य यमस्य पत्नीम् । सोमस्य चन्द्रस्य कश्यपस्य च पत्नीम् ॥ २२ ॥

गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणम् ।
ध्रुवं ब्रह्मऋषीन् सप्त पुण्यश्लोकांश्च, मानवान् ॥ २३ ॥

सत्यधर्मीया — नन्दां तदभिधाम् । कालिंदीं यमुनाम् । सितवारणमैरावतम् । ध्रुवं राजानं सप्त ब्रह्मर्षीन्मरीच्यादीन् । पुण्यश्लोकान् नलगयादिकान् मानवान्पुत्रान् ॥ २३ ॥

लिङ्गेरी — गङ्गां भागीरथीं, नन्दामलकनन्दां, कालिन्दीं यमुनाम् । कालिन्दी सूर्यतनया यमुनेत्यमरः । ध्रुवं राजानम् ॥ २३ ॥

उत्थायापररात्रान्ते प्रयताः सुसमाहिताः ।
स्मरन्ति मम रूपाणि मुच्यन्ते तेंऽहसोऽखिलात् ॥ २४ ॥

सत्यधर्मीया — अपररात्रान्ते । अपररात्रिरपररात्रः । अहःसर्वैकदेशेत्यच् । उषःकाले । मां च त्वां चेत्यारभ्य मानवान्तानि मम रूपाणि कानिचित्स्वरूपभूतानि कानिचिदाविष्टानि चेति । तानि ये स्मरन्ति तेऽखिलात्समस्तादंहसः पापादितरापरिहार्यत्वेन खिलभिन्नात् मुच्यन्ते ॥ २४ ॥

छलारी — य अपररात्रान्तेऽरुणोदयप्रारंभे उत्थाय प्रयता नियमवन्तः शुद्धाः सुसमाहिता एकाग्रचित्ताः सन्तो मम रूपाणि विभूतिरूपाणि ये मां चेत्यादि पूर्वोक्तानि स्मरन्ति तेऽखिलादंहसः पापान्मुच्यन्ते ॥ २४ ॥

लिङ्गेरी — येऽधिकारिणोऽपररात्रान्ते ब्राह्मे मुहूर्ते उत्थाय प्रयताः शुचिर्भूताः सुसमाहिताः अत्यन्तसमाधानवन्मनस्काश्च सन्तो मां त्वां चेत्यादिनोक्तमानवान्तान्मम रूपाणि च स्मरन्ति तेऽखिलात्समस्तादंहसः पापान्मुच्यन्ते । अंहो दुरितदुष्कृतमित्यमरः ॥ २४ ॥

ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुद्ध्य निशात्यये ।
तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥

सत्यधर्मीया — तृणबिन्दुं कुरुक्षेत्रमित्यारभ्य भारते गजेन्द्रमोक्षे कथिता अत्राकथिता स्मर्तव्यत्वेन ज्ञातव्याः । अङ्ग हे राजन् । विमलां मतिम् । गतिं चेति पाठे ज्ञानं मुक्तिं चेत्यर्थः ॥ २५ ॥

छलारी — फलान्तरमाह ॥ यो मामिति । अनेन गजेन्द्रमोक्षणस्तोत्रेण । हे अंग प्रिय । निशात्ययेऽअरुणोदये प्राणात्यये देहात्प्राणोत्क्रमणसमये विमलां निर्दोषाम् ॥ २५ ॥

लिङ्गेरी — अङ्ग प्रिय । हे गजेन्द्र । ये निशात्यये रात्र्यवसाने ब्राह्मयमुहूर्तेऽनेन त्वत्कृतस्तोत्रेण मां स्तुवन्ति तेषां प्राणात्यये प्राणत्यागकाले विपुलां पूर्णां स्वयोग्यां मतिं बुद्धिं मद्विषयां गतिं च ददामि । इतीदं हरिर्गजेन्द्रमाह ॥ २५ ॥

श्रीशुक उवाच–

इत्यादिश्य हृषीकेशः प्राध्माय जलजोत्तमम् ।
हर्षयन् विबुधानीकमारुरोह खगाधिपम् ॥ २६ ॥

इति श्रीमद्भागवते अष्टमस्कन्धे चतुर्थोऽध्यायः ।

सत्यधर्मीया — स्मरणमपि मदनुग्रहेणैवेतिद्योतयितुं हृषीकेश इत्याद्युक्तिः । जलजोत्तमं शङ्खशेखरम् । अन्ते शङ्खपूरणेन पाञ्चजन्यनिजध्वानध्वस्तपातकसञ्चयेत्यादेरेतत्स्तोत्रपारायणपाठादितः पातकपातो भविष्यतीति स्तोत्रायातयामीकरणं द्योत्यते ॥ २६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां चतुर्थोऽऽध्यायः ॥ ८-४ ॥

छलारी — आदिश्योपविश्य जलजोत्तमं शङ्खोत्तमं प्राध्माय वादयित्वा विबुधानीकं देववृन्दम् ॥ २६ ॥

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ८-४ ॥

लिङ्गेरी — हृषीकेशो नियामकतया सर्वेन्द्रियस्वामी हरिर्गजेन्द्रमित्यादिश्य जलजोत्तमं शङ्खश्रेष्ठं पांचजन्यं प्राध्माय ध्वनयित्वा विबुधानां देवानामनीकं समूहं हर्षयन्सन्तोषयन् खगाधिपं पक्ष्युत्तमं गरुडमारुरोह ॥ २६ ॥

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ८-४ ॥

॥ अथ पञ्चमोऽध्यायः ॥

श्रीशुक उवाच–

राजन्नुदितमेतत् त्ते हरेः कर्माघनाशनम् ।
गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ॥ १ ॥

सत्यधर्मीया — अधुनाऽपि मधुनाथं स्तुवतो भक्त्याऽधिकृतः प्रसत्तिस्तस्य भवतीति परमप्रमेयं निरूपयंस्तत्रादौ क्रमप्राप्तां मन्वन्तरकथां कथयति ॥ राजन्निति । राजन्निति प्रथमतः सम्बोधयन् बोधयति नेन्द्रद्युम्नवद्भव भव च जाग्रदितीति ज्ञेयम् । रैवतं रेवतस्येदं रैवतम् । विशेषेणान्तरं शृणु ॥ १ ॥

छलारी — इदानीं क्रमात्प्राप्तमन्वन्तराधिपकथां प्रसंजयति ॥ राजन्निति । रैवतमन्तरं रैवतमन्वन्तरम् ॥ १ ॥

लिङ्गेरी — अत्रापि भगवानभिवृद्धभक्त्युदयाय ब्रह्मादिस्तुतात्प्रसन्नादजितनाम्नो नारायणाद्ब्रह्मादीनामिष्टप्राप्तिमाह । तत्रादौ क्रमप्राप्तपञ्चममनुस्थितिं शुकः परीक्षितेऽविस्मरणाय पूर्वकथानुवादपूर्वमाह ॥ राजन्नित्यादिना । हे राजन् । अघानां पापानां नाशकं पुण्यं पुण्यकरम् । एतद्गजेन्द्रमोक्षणं ते तवोदितम् । इतः परं त्वं मयोच्यमानं रैवतमन्वन्तरं शृणु ॥ १ ॥

पञ्चमो रैवतो नाम मनुस्तापससोदरः ।
बलविन्ध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥

सत्यधर्मीया — तापससोदरस्तापसेन सह सदृशं तुल्यम् । सहसाकल्यसादृश्ययौगपद्य-समृद्धिष्विति विश्वः । उदरं यस्य सः । वोपसर्जनस्येति सभावः । केचित्तु सहस्य सोऽन्यतरस्यामिति पाक्षिके सभावे सोदर इति जगुः । तन्न । सूत्रस्यैव तादृशस्याभावात् । बलश्च विंध्यश्चेत्येतावादी येषां ते तथा । बलिश्चेति पाठेऽपि बलीयान् । ते चार्जुनपूर्वका अर्जुनस्तन्नामा पूर्वकः प्रधानो वाऽग्रजो वा येषां ते तथा ॥ २ ॥

छलारी — तापसस्य मनोः सोदरो भ्राता बलविंध्यावादी येषां ते तथा । अर्जुनः पूर्वः प्रधानो येषां ते तथा ॥ २ ॥

लिङ्गेरी — तापसश्चतुर्थो मनुस्तस्य सोदरो नाम्ना रैवतः पञ्चमो मनुरभवत् । तस्य रैवतस्य बलिविंध्यादयोऽर्जुनप्रभृतयश्च सुता आसन् ॥ २ ॥

विभुरिन्द्रः सुरगणा राजन् भूतरयादयः ।
हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥

सत्यधर्मीया — विभुर्नाम्ना । हिरण्यरोमा वेदशिराश्चेति द्वौ । ऊर्ध्वबाव्हादयश्च द्विजाः । वेदश्रीरित्यपि वेदशिरोनाम । ऊर्ध्वजानुरिति चोर्ध्वबाहोः । यथोक्तं मात्स्ये । हिरण्यरोमा वेदश्रीरूर्ध्वजानुस्तथाऽपर इति ॥ ३ ॥

छलारी — तदाऽश्विनोर्मध्ये दस्रो विभुस्तन्नामेन्द्र आसीत् । द्विजाः सप्तर्षयः ॥ ३ ॥

लिङ्गेरी — रैवतेऽन्तरे नाम्ना विभुर्विष्णुरिन्द्रो भूतरयादयः सुरगणाः । हिरण्यरोमा, वेदशिराः, उर्ध्वबाहुनामप्रभृतयो द्विजाः सप्तर्षयः ॥ ३ ॥

पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥ ४ ॥

सत्यधर्मीया — शुभ्रस्त्वेतत्सप्तर्ष्यन्यतमोऽन्यो वैतन्मन्वन्तरभव ऋषिर्वा । तस्य पत्नी विकुण्ठा । तयोर्वैकुण्ठैः स्वावरजतया तज्जातत्वेन तन्नामभिरमरश्रेष्ठैः सह जज्ञे । स्वकलया कलयांशेन ।

जननमात्रे सहभावो न तु कलायामिति ज्ञेयम् । विकुण्ठाया अपत्यं वैकुण्ठः । शिवाद्यण् ठगपवादेनेति ज्ञेयम् ॥ ४ ॥

छलारी — शुभ्रस्य शुभ्रनामकस्य ऋषेर्विकुण्ठानाम्नी पत्न्यासीत् । तयोः शुभ्रविकुण्ठयोर्विकुण्ठापुत्रत्वेन वैकुण्ठैर्देवश्रेष्ठैः सह विशेषो भगवान् विष्णुः स्वयं साक्षात्कलयांऽशेन विकुण्ठायाः पुत्रो वैकुण्ठस्तन्नामा सन् जज्ञे ॥ ४ ॥

लिङ्गेरी — शुभ्रस्य ऋषेर्विकुंठाख्यपत्न्यभूत् । तयोर्विकुण्ठाशुभ्रयोः स्वयं साक्षाद्भगवान्विष्णुर्नाम्ना वैकुण्ठैः सुरसत्तमैर्देवोत्तमैः सह स्वकलया स्वांशेन नाम्ना वैकुण्ठः सन् जज्ञे प्रादुरभूत् ॥ ४ ॥

वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः ।
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥

सत्यधर्मीया — तस्य कर्माह ॥ वैकुण्ठ इति । तस्येदमित्यण् । कुतो लोको लोकोत्तरेण रचित इत्यत आह ॥ रमयेति । तत्प्रियकाम्यया रमाप्रीतीच्छया । प्रियशब्दात्काम्यच्चेति काम्यच् प्रत्ययान्तादप्रत्यय इत्यकारप्रत्यये टापि रूपम् ॥ ५ ॥

छलारी — अवतारप्रयोजनमाह ॥ वैकुण्ठ इति । येन वैकुण्ठेन तत्प्रियकाम्यया तस्या लक्ष्म्याः प्रियचिकीर्षया ॥ ५ ॥

लिङ्गेरी — रमया लक्ष्म्या प्रार्थ्यमानेन येन वैकुण्ठनाम्ना हरिणा तत्प्रियकाम्यया श्रीदेवीष्टकरणेच्छया लोकैर्जनैर्नमस्कृतो वैकुण्ठलोकः कल्पितो निर्मितः ॥ ५ ॥

तस्यानुभावः कथितो गुणाश्च परमोदयाः ।
भौमान् रेणून् स विममे यो विष्णोर्वर्णयेद् गुणान् ॥ ६ ॥

सत्यधर्मीया — तस्य वैकुण्ठस्यानुभावो माहात्म्यं कथितः । अथ ते मुनयो दृष्ट्वा नयनानन्दभाजनम् । वैकुण्ठं तदधिष्ठानं वैकुण्ठं च स्वयं प्रभुमित्यादिना । गुणाः परमोदयाः । परम उदयः समृद्धिर्येषां ते तथा कथिता इति सदावर्तितमन्वेति । किं सामस्त्येन कथिता इत्यत आह ॥ य इति । यो ज्ञानी ब्रह्मा स । भौमान् भूमेरिमे भौमास्तान्रेणून्धूलीर्विममे गणयेत् । विष्णोर्गुणांस्तु यः को वर्णयेत् । आनन्त्यान्न कोऽपि समर्थः । यच्छब्दः किंशब्दार्थे । यतश्चोदेति सूर्य इत्यादेर्यः क इति

सम्भवति । यथोक्तं द्वितीयतात्पर्ये । यच्छब्दः प्रश्न इत्यादि । विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादिश्रुतेः ॥ ६ ॥

छलारी — तस्य वैकुण्ठस्यानुभावो महिमा गुणाश्च ब्रह्मण्यादयः परमोदया महासमृद्धा याश्च कथितास्तृतीयादिषु स्कन्धेषु । यः सर्वसत्वेन प्रसिद्धो ब्रह्मा । भूमान् रेणून् पृथिवीरजांसि विममे गण्यात् । परिच्छिन्नत्वात् । विष्णोर्गुणांस्तु यः को वर्णयेत् साकल्येन वदेत् न कोऽपि । अपरिच्छिन्नत्वादिति भावः ॥ ६ ॥

लिङ्गेरी — तस्य वैकुण्ठाख्यस्य हरेरनुभावः सामर्थ्यलक्षणो महिमा गुणाश्च ज्ञानानन्द-स्वातन्त्र्यादिरूपाः शुभधर्मा अपि वक्तृश्रोतॄणां परमोदयाः उत्तमैश्वर्याद्यभिवृद्धिप्रदाः । न कर्मणा लिप्यते पापकेन । विज्ञानमानन्दं ब्रह्म । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति । एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् । यो वेद निहितं गुहायाम् । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता । मन्मना भव । मामेवैष्यसि । इत्यादि श्रुतिस्मृतीषु कथिताः । तर्हि तान् गुणान्मे वदस्वेत्यतः आह । यो गुणान् वर्णयेत्स भौमान् भूमिसम्बन्धिनः रेणून् विममे संख्यातुं समर्थः स्यात् । यथा भूरजसां संख्यायां समर्थो नास्ति तथा विष्णोर्गुणानामपीति । अनेन मय्यनन्तगुण इत्यादिना प्रमापितं विष्णोरनन्तगुणत्वं प्रकटितम् । श्रूयते चैवम् । विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादि ॥ ६ ॥

षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ।
पुरुःपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥

सत्यधर्मीया — चक्षुषस्तन्नाम्नो मुनेः पुत्रस्ततश्चाक्षुषः । षष्ठो मनुरित्यन्वयः । पुरुःपुरुष-सुद्युम्नप्रमुखाश्चाक्षुषात्मजा इति पाङ्क्तः पाठः । पुत्रा इति काचित्कः पाठः । पुरुषादयः पुत्रास्ते च न चानौरसाः किन्तु साक्षादिति वक्ति चाक्षुषात्मजा इत्यनेनेति किञ्चित्क्लेशिष्टो मार्गः । पुरुः पुरुषेति पाठे गतिः प्रागुक्तानुसन्धेया ॥ ७ ॥

छलारी — चाक्षुषमन्वन्तरं निरूपयति ॥ षष्ठश्चेति । चक्षुषस्तन्नामकस्य ऋषेः पुरुषा-दयश्चाक्षुषस्य मनोरात्मजाः ॥ ७ ॥

लिङ्गेरी — चक्षुषः पुत्रोऽत एव चाक्षुषो नाम प्रसिद्धो यः सः षष्ठो मनुः । चाक्षुषात्मजा उच्यन्ते । पुरुषसुद्युम्नप्रमुखाश्चाक्षुषस्य पुत्रा वै प्रसिद्धाः ॥ ७ ॥

इन्द्रो मन्द्रद्युमस्तत्र देवा आप्यादयो गणाः ।
मुनयस्तत्र वैराजहरिमद्वीरकादयः ॥ ८ ॥

सत्यधर्मीया — इन्द्रश्च मन्द्रद्युम आप्यादयो गणा देवाः । चाक्षुषस्यान्तरे देवा लेखानामपरिश्रुताः । ऋजवोऽथ ऋभाद्याश्च परिसूता दिवौकसः । चाक्षुषस्यान्तरे प्रोक्ता देवानां पञ्चयोनय इति मात्स्योक्तेराप्योऽप्येतन्मध्यस्थऋभाद्येक इति ध्येयम् । अत एव गणा इति शोभते । मन्द्रद्युम्न इति न स्वरसम् । छन्दश्छेदात् । मूलकोशेष्वदर्शनाच्च । तत्र तन्मन्वन्तरे वैराजहरिमद्वीरकादयो मुनयोऽभवन् । वैराजन्निति लेखकप्रमादः । वैराजस्येत्यनुवादस्वारस्यात् ॥ ८ ॥

लिङ्गेरी — हे राजन्! तत्र चाक्षुषेऽन्तरे मन्द्रद्युमनामेन्द्रः । आप्यादयो गणा देवा । हविष्मद्वीरकादयो मुनयः सप्तर्षयो वै प्रसिद्धाः ॥ ८ ॥

तत्रापि देवः सम्भूत्यां वैराजस्याभवत् सुतः ।
अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥

सत्यधर्मीया — वैराजस्यर्षेः सम्भूत्यां तन्नाम्न्यां तद्भार्यायां जगतः पतिर्भगवान्देवोंऽशेन नाम्नाऽजितः सन् सुतोऽभवदित्यन्वयः ॥ ९ ॥

छलारी — तथा चाक्षुषमन्वन्तरेऽपि वैराजस्य तन्नामकस्य संभूत्यां तन्नाम्न्यां पत्न्यां अजितो नामाऽजित इति ख्यातः सन् अंशेन स्वकलया ॥ ९ ॥

लिङ्गेरी — तत्रापि चाक्षुषमन्वन्तरेऽपि जगतः पतिर्भगवान्विष्णुर्नाम्ना वैराजस्य ऋषेः संभूतिनाम्न्यां भार्यायाम् । अंशेनाजितो नाम सुतोऽभवत् ॥ ९ ॥

पयोब्धिं येन निर्मथ्य सुराणां साधिता सुधा ।
भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः ॥ १० ॥

सत्यधर्मीया — येनाजितेन पयोब्धिं निर्मथ्य सुराणां सुधा साधिता । तत्कथं साधनमित्यतो बोधयति ॥ भ्रमेति । अजितेनैव कूर्मरूपं गृहीतवताऽम्भसि भ्रममाणोऽन्तर्मज्जन्मन्दरः पृष्ठे धृत इति च सुधा साधितेत्यर्थः । हे गिरे । त्वं यथेच्छं भ्रम चल । अन्तर्गच्छामि किल । कथमिदं भ्रमणं ममेति न वदेत्याह ॥ मा अणेति । नान्तराण गच्छेति । उपायस्तत्र क इत्यत आह ॥ कूर्मरूपेण

मयेति । पृष्ठे धृतो मन्दरस्त्वम्, उम्भसि पूरयसि कार्यं पर्यवसाययसीत्यर्थः । इति निर्मथ्यालोच्य सुधा साधितेत्यप्यन्वयः । भ्रममाण इति कथमिति शङ्कायां व्यत्ययश्चान्द्रादिर्वेति चोत्तरायासो नेति ज्ञेयम् ।। १० ।।

छलारी — अवतारप्रयोजनमाह ।। पयोब्धिमिति । येनाजितनाम्ना हरिणा धृतः स्वपृष्टे तेनैव हरिणा कूर्मरूपेण कूर्मावतारेण मन्दरगिरिः ।। १० ।।

लिङ्गेरी — येनाजितेन पयोब्धिं क्षीरसमुद्रं निर्मथ्य सुराणां सुधाऽमृतं साधिता प्रापितम् । कूर्मरूपेण येनाजितेनांभसि क्षीरसमुद्रोदके भ्रममाणः स्वस्थानात्परितोऽतिलंघ्य गच्छन्, तत्रापि विशेषतोऽधो गच्छन् मन्दरो धृतः, सोऽजितः सुतोऽभवदिति पूर्वेणान्वयः ।। १० ।।

राजोवाच–

यथा भगवता ब्रह्मन् मथितः क्षीरसागरः ।
यदर्थं वा यतश्चान्द्रिं दधाराम्बुचरात्मना ।। ११ ।।

सत्यधर्मीया — अब्धिमन्थनं कुतः । कथं च तत् । किं किमापुः सुरा मथित्वा मथित्वा । सर्वज्ञ सर्वं वदेति परीक्षित्पृच्छति ।। यथेति । यथा कथम् । यतः कुतः । यदर्थं किमर्थम् । अम्बुचरात्मना कूर्मरूपेण ।। ११ ।।

छलारी — हरेः क्षीराब्धिमथनादिकं चरितं विशेषाकारेण श्रोतुं राजा पृच्छति ।। राजोवाचेति । यथा कथम् । यदर्थं किमर्थं यतः कुतो हेतोरम्बुचरात्मना कूर्मरूपेण ।। ११ ।।

लिङ्गेरी — हे ब्रह्मन् शुक । भगवताऽजितेन क्षीरसागरो यथा येन प्रकारेण मथितो यदर्थं वा यत्प्रयोजनाय च यतश्च कस्माच्च कारणात् । अम्बुचरात्मना कूर्मरूपेणाद्रिं मन्दरं दधार ।। ११ ।।

यथाऽमृतं सुरैः प्राप्तं किमन्यदभवत् ततः ।
एतद् भगवतः कर्म वदस्व परमाद्भुतम् ।। १२ ।।

सत्यधर्मीया — ततः समुद्राद्धरेरेतत्कर्म वद । स्वपरमाद्भुतं स्वेषां परेषां च माया ज्ञानस्याद्भुतमाश्चर्यरूपम् । तदविषयस्वरूपमित्यर्थः । भासनोपेत्यादिना प्रकाशमानः सन्वदेत्यर्थ आत्मनेपदमिति वा ।। १२ ।।

छलारी — दैत्येषु सत्सु सुरैर्यथा कथममृतं प्राप्तम् । ततोऽमृतप्राप्त्यनन्तरं ॥ १२ ॥

लिङ्गेरी — सुरैरमृतं यथा प्राप्तम् । ततोऽमृतपानानन्तरम् । अन्यत्किमभवत् । तथा तेन प्रकारेण परमाद्भुतमेतत्क्षीरसागरमथनप्रयोजनादितद्धेतुभूतं भगवत्कर्म च मे वदस्व ॥ १२ ॥

त्वयेत्थं कथ्यमानेन महिम्ना सात्वतां पतेः ।
नातितृप्यति मे चित्तं सुचिरं तापतापितम् ॥ १३ ॥

सत्यधर्मीया — सात्त्वतां ब्रह्मादिभक्तानां पतेरिति पदमेकम् । पतिरित्याख्यातः । पतिरिति सीतायाः पतय इत्यादिवदुपपत्तिर्ज्ञेया वा । अथो अहल्यां पतिनाऽभिशप्तामित्येतद्व्याख्यानावसरे वितत्योक्तमस्माभिरनुसंधेयम् । अंचासौ व्यासात्मकश्चासौ पतिश्च । सात्त्वतानाम् अम्पतिस्तस्मा इति समासे वोपपत्तिः । अम् आ अः पुराणर्षिर्व्यास इति गीताभाष्यप्रमेयदीपिकोक्तेः । सात्त्वतर्षभ इत्यादिप्रयोगात् । तापैस्तापितम् । मुख्यकर्ता कर्मद्वारा हरिरित्यवान्तरप्रयोजकताऽऽध्यात्मिकानां तापानामिति ध्वनयति तापितमित्यनेनेति ज्ञेयम् ॥ १३ ॥

छलारी — सात्त्वतां ब्रह्मादीनां पतेः । हरेः । तापैराध्यात्मिकादिदुःखैस्तापितं क्लेशितम् ॥१३॥

लिङ्गेरी — हे शुक । त्वयेत्थं कथ्यमानेन सात्वतां पाञ्चरात्राणां पतेः पालकस्य हरेर्महिम्ना सुचिरं बहुकालं तापैराध्यात्मिकाधिभौतिकाधिदेवैस्तापितं सन्तप्तं मे चित्तं मनो नातितृप्यति । भगवन्महिमाश्रवणादिविषयेऽलं बुद्धिमन्न भवति ॥ १३ ॥

सूत उवाच–

सम्पृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ।
अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥ १४ ॥

सत्यधर्मीया — अभ्याचष्टुं वक्तुम् । ख्यात्रादेशाभावश्छान्दसः । प्रचक्रमे आरब्धवान् ॥ १४ ॥

छलारी — द्वैपायनसुतो वेदव्यासपुत्रः शुकः । हे द्विजा इति शौनकादीन् सूतः सम्बोधयति ॥ अभिनन्द्य साधु पृष्टमिति अनुमोद्य । वीर्यं चरितम् अभ्याचष्टुं वक्तुं प्रचक्रमे आरब्धवान् ॥ १४ ॥

लिङ्गेरी — हे द्विजाः शौनकादयः । भगवान्स्वोचितैश्वर्यादिगुणवान् द्वैपायनसुतो व्याससूनुः शुकः परीक्षितैवं संपृष्टः सन् । अभिनन्द्य सन्तुष्टो भूत्वा परीक्षितं च सन्तोषयित्वा हरेर्वीर्यमभ्याचष्टुं स्पष्टं वक्तुं प्रचक्रमे उपक्रान्तवान् । व्याख्यातुमिति पाठेऽप्ययमेवार्थः ॥ १४ ॥

श्रीशुक उवाच—

यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः ।
गतासवो निपतिता नोत्तिष्ठेरन् स्म भूयशः ॥ १५ ॥

सत्यधर्मीया — गतासवस्तत्प्रायाः । शितानि निशितानि च तान्यायुधानि तैः करणैर्येषामित्यसुरविशेषणं वा । भूयशोऽतिशयेन बहु । बहोर्लोपो भू च बहोः ईयसुन् । भूयश इति । भूयःशब्दसलोप आर्षः । पृषोदरादिलोपो वा । स्वार्थे शः । भूयशो बहुवारमित्यर्थः । बह्वल्पार्थादित्यर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्च शस् । भूरिशस्त्रिश इति तत्त्वसुबोधिन्युक्तेः ॥ १५ ॥

छलारी — यदा युद्धे देवासुरयुद्धे शितानि निशितान्यायुधानि येषां तैर्गतासवो मृतप्रायाः सन्तो भूयशो बहुशो देवाः ॥ १५ ॥

लिङ्गेरी — यदा यस्मिन्काले युद्धे देवाः शितानि शाणोल्लीढान्यायुधानि येषां तैरसुरैर्बाध्यमानाः पीड्यमानाः सन्तो गतासवो विगतप्राणादिशक्तयः सन्तः । भूरिशो बहवो निपतिता नोत्तिष्ठेरन् स्म । उत्थितुमपि शक्ता नाभवन्स्मेति ज्ञापकात् एष्यदर्थस्यापि लिङः भूतार्थत्वम् ॥ १५ ॥

यदा दुर्वासशापेन सेन्द्रा लोकास्त्रयो नृप ।
निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादिकाः क्रियाः ॥ १६ ॥

सत्यधर्मीया — पराजययोजकं किमित्यत आह ॥ यदेति । दुर्वासस्य दूर्वाससः । सदुःखवासनामकेत्याचार्यवर्यप्रदर्शितव्युत्पत्त्या ह्रस्वादिर्दुर्वासःशब्दः इति बोध्यम् । शापेन ''स्वदत्तमाला भुवि पातकोपतो दूर्वाससः शापत आशु हि श्रिया । शक्रे विहीने दितिजैः पराजित इत्याद्याचार्योक्तेः । नीतिरपि 'तृणेनापि समं सख्यं कर्तव्यं भूतिमिच्छता । अर्कपुष्पावमानेन महेन्द्रोऽभूत्पदच्युत इत्येवंजातीयका । न कपीति न ह्रस्वः । निःश्रीका निःसम्पत्का अभवन्यदा तत्र तदा इज्यादिका इज्याध्ययनदानादिकाः क्रिया नेशुर्नष्टाः । कदाचिद्दूर्वासा मध्येऽध्वनो गजमैरावतमारुह्य गच्छन्तं दुश्च्यवनं निरीक्ष्य रुद्रावतारत्वाद्धार्यामर्ककुसुममालां गलविलसितामुन्मुच्य शचीशाय व्यतारीत्स च तत्कुसुमौदासीन्येन कुम्भिकुम्भयोरादधौ । स च तां क्ष्मातले पातयामास । ततः कुपितो दूर्वासाः स्वत एव कोपनो यन्मदेन 'मदवमतिः सा श्रीः सह त्रिलोक्या त्वां जहातु सद्यः' इति शशापेति तत्प्रकारोऽनुसन्धेयः ॥ १६ ॥

छलारी —— यदा च दूर्वाससो मुनेः शापान्निःश्रीका ऐश्वर्यभ्रष्टाश्चाभवन् । तत्र तदेज्यादयो यागादयो नेशुः । शापप्रकारस्तु इत्थम् । दुर्वाससा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं दृष्ट्वा स्वकण्ठस्थमालेन्द्राय दत्ता । तेन च श्रीमदेनानादृत्यैरावतस्य कुंभस्थले निक्षिप्ता । स च गजराट् भूमौ पातयामास । ततः कुपितो दुर्वासास्तमिन्द्रं शशाप । त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति ॥ १६ ॥

लिङ्गेरी —— हे नृप । यदा सेन्द्रास्त्रयो लोका दुर्वासशापेन निःश्रीका अभवन् तत्र तस्मिन्काले इज्यादयो देवपूजारूपयागादयः क्रियाश्च नेशुरदृश्या अभवन् ॥ १६ ॥

निशाम्यैतत् सुरगणा महेन्द्रवरुणादयः ।
नाध्यगच्छन् स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम् ॥ १७ ॥

ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः ।
सर्वं विज्ञापयाञ्चक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥

सत्यधर्मीया —— निशाम्य दृष्ट्वा । मन्त्रैर्गुप्तालोचनभाषणैर्विनिश्चयं निर्णयं नाध्यगच्छन् नागुर्यदा ततस्तदा मेरोर्मूर्ध्नि स्थितां ब्रह्मसभां शतकोटिसञ्ज्ञाम् । यथोक्तं पञ्चमे । मेरोर्मूर्ध्नि भगवत आत्मयोनेरुपक्लृप्तामयुतयोजनसहस्रीं समचतुरस्रां शातकौम्भीं शतकोटिं वदन्तीति । सर्वशो महेन्द्रवरुणादय इति सर्वे सुरगणा जग्मुः । पुरुहूतपुरस्करणं श्रैष्ठ्यात् । विहितागस्कत्वाच्च । विहितं तदव्यवधाननिर्देशः । पाशिनः सत्स्वन्तरा तदधीशेष्वितरेषु न समञ्जस इति तु तन्मथनसमयत्वात्तत्सुमुखतासम्पत्त्या जल्पनमित्यल्पीकरणीयम् । परमेष्ठिने प्रणताः सन्तः सर्वं विज्ञापयाञ्चक्रुः ॥१८॥

छलारी —— स्वयं मन्त्रैः स्वविचारैः कार्यनिश्चयं नाध्यगच्छन्न प्रापुः । मेरोर्मूर्धनि स्थितां ब्रह्मसभाम् ॥ १७, १८ ॥

लिङ्गेरी —— तदा महेन्द्रवरुणादयः सुरगणा एतत्स्वैश्वर्यादिनाशं निशाम्य दृष्ट्वा परस्परं स्वयं मन्त्रैर्विचारहेतुभिर्वाक्यैर्मन्त्रयन्तो विचारयन्तोऽपि विनिश्चयं स्वकर्तव्यनिर्णयं नाध्यगच्छन्न प्राप्ताः ॥ ततस्तदनन्तरं सर्वशः सर्वे इन्द्रादयो देवा मेरोः पर्वतस्य मूर्ध्नि शिखरे स्थितां ब्रह्मसभां जग्मुर्गताः । तत्र परमेष्ठिने चतुर्मुखाय प्रणताः सन्तः सर्वं स्वाभिभवादि विज्ञापयांचक्रुः सम्यग्ज्ञापितवन्तः ॥ १७, १८ ॥

स विलोक्येन्द्रवाय्वादीन् निःसत्वान् विगतप्रभान् ।
लोकानमङ्गलप्रायान् सुरांश्चैव यथा विभुः ॥ १९ ॥

सत्यधर्मीया — स धाता । इन्द्रवाय्वादीनिति पुरुहूतपुरस्कृतिरागस्कृत्त्वात् । आधिकारिकत्वाच्च । यदि न तरतमभावो निर्देशे तर्हि शिवानन्तरं वायूक्तिर्न कुत इति चेत् । भाविविषपानमनितरसाध्यं साध्यं मरुत एव तदनन्तरं किञ्चिच्छिवोऽपिबदिति विशेषसूचनार्थं वायुरादावुदाहृत इत्येव हि । मानं चात्र स्वावसरे वक्ष्यामः । इन्द्रश्च वायुश्चेन्द्रवायू तावादी येषां तान् । न वायुपरस्येत्युक्तेर्नानङ् । निःसत्त्वान्निर्बलान् । विगतप्रभान् गतकान्तीन् । लोकांस्त्रीन् । अमङ्गलप्रायांस्तत्प्रचुरान् असुरान् । यथा पूर्वप्रकारेण निःसत्त्वत्वादिना नेत्ययथा । ससत्त्वत्वादिना विलोक्य । दुर्बलकोपः स्वदंष्ट्रापीडामूल इतिवन्नेत्याह ॥ विभुरिति । समर्थः । विप्रसंभ्यो ड्वसञ्ज्ञायामिति डुः ॥ १९ ॥

छलारी — निःसत्त्वान्विगतबलान्विगतप्रभान्कान्तिरहितान् । इन्द्रवाय्वादीन्देवान् । अमङ्गलप्रायान् अमङ्गलप्रचुरान् । लोकांश्चासुरांश्चान्यथा देवविलक्षणत्वेन बलयुक्तानित्यर्थः ॥ १९ ॥

लिङ्गेरी — विभुः स्वप्रपन्नसमाधानसमर्थः स चतुर्मुख इन्द्रवाय्वादीन्सुरान्निःसत्त्वान्विगत-प्रभान् लोकांश्चामंगलप्रायान्विलोक्य ॥ १९ ॥

समाहितेन मनसा संस्मरन् पुरुषं परम् ।
उवाचोत्फुल्लवदनो देवान् स भगवान् परः ॥ २० ॥

सत्यधर्मीया — परं कामितपूरकम् । उत्फुल्लवदनो ज्ञातैतत्सम्पत्तिसम्पादनोपायत्वादुत्फुल्लं वदनम् । उत्फुल्लानि वदनानि वा यस्य स तथा । परः प्रस्तुतोत्तमः ॥ २० ॥

छलारी — समाहितेन सावधानेन पुरुषं पूर्णं हरिं परं भक्ताभीष्टरूपकम् । पालकं वा । पालन पूरणयोरिति धातोः । संस्मरन्नुत्फुल्लवदनः परः सर्वदेवोत्तमः ॥ २० ॥

लिङ्गेरी — भगवान् ऐश्वर्यादिगुणपूर्णः परो रुद्राद्युत्तमः स चतुर्मुखो यथा श्रुतिस्मृत्यादि तथा समाहितेन सम्यग्भगवति स्थापितेन मनसा परं पुरुषं नारायणं संस्मार । तदनन्तरमुत्फुल्लं विकसितं वदनं यस्य स तथा सन् देवान्प्रत्युवाच ॥ २० ॥

अहंभवो यूयमथो सुरादयो मनुष्यतिर्यग्द्रुमघर्मजादयः ।
यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥

सत्यधर्मीया — अहंभवो रुद्रः । अहंभव इति वदन् रुद्रस्याहंतत्त्वविग्रहकत्वं सूचयामासेति ज्ञेयम् । सुरादयः सुरासुरादयः । मनुष्यशब्दो जरायुजमात्रोपलक्षकः । तिर्यञ्चोऽण्डजा । द्रुमा उद्भिजाः । घर्मजादयः स्वेदजा मत्कुणादयः । यस्य नारायणस्यावतारः पुरुषो वा पद्मनाभो वा तस्यांशो मात्रा तस्य कला भिन्नोंऽशस्तया विसर्जिता उत्पादिताः । सर्वे वयं तमव्ययं निर्नाशम् । तमस्य तमसः एतदाद्यापदापादकस्याज्ञानस्य ग्लानेर्वाऽव्ययो नाशो यस्मात्स तम् । तमिति शेषः । तमन्तु तमसा सार्धमिति द्विरूपकोशः ॥ २१ ॥

छलारी — हे इन्द्रादयो देवाः । अहं भवो रुद्रो यूयं सुरादयो । आदिशब्देन दैत्याः । मनुष्यशब्देन जरायुजाः सर्वेऽपि गजाश्वादयो ग्राह्याः । तिर्यंचोंऽडजाः पक्ष्यादयः । द्रुमा उद्भिजाः । घर्मजादयः स्वेदजा मूर्धजाः कृमयः । एते सर्वे जीवा यस्य मूलनारायणस्यावतारः पुरुषनामा तस्यांशो भिन्नांशो ब्रह्मा तस्य कला मरीचादयस्ताभिर्विसर्जिताः पुत्रपौत्रद्वारा जनिताः । यद्वा । तस्यावतारः पुरुषस्तस्यांशः सामर्थ्यं तस्य कलयैकांशेन विसर्जिता उत्पन्नाः । मच्छक्त्यैकांशसंभूतं जगदेतच्चराचरमिति वचनात् । तं हरिम् ॥ २१ ॥

लिङ्गेरी — इदानीं चतुर्मुखः स्वप्रभृतिदेवानां पारतन्त्र्यमाविष्कुर्वन् हरिरेव नः शरणमित्याह ॥ अहमित्यादिना । अहं चतुर्मुखो भवो रुद्रो यूयमथोऽसुरादयो मनुष्यास्तिर्यक् पश्वादि, द्रुमा वृक्षा घर्मजाः स्वेदजनितकृमिमुखा यस्य हरेरवताररूपस्यांशस्य पुरुषादेः कलया विसर्जिताः संसृष्टाः । अव्ययं चतुर्विधनाशशून्यं तं नारायणं शरणं रक्षकं सर्वे वयं व्रजाम ॥ २१ ॥

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।
अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्वतमांसि काले ॥ २२ ॥

तात्पर्यम् – 'अनुग्राह्यतया पक्षा देवा नात्मार्थतो हरेरि'ति च ॥ २२ ॥

सत्यधर्मीया — न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्ष इति श्लोके उपेक्षणीयादरणीयपक्षप्रतिक्षेपः क्रियत इति प्रतीयते । सा चोपेक्षणीयानां दैतेयानामादितेयानां चादरणीयानां च बाधितेत्यतः प्रमाणेनैव निषेधतात्पर्यमाह ॥ अनुग्राह्यतयेति । हरेरनुग्राह्यतया

निमित्तेन पक्षा इत्युच्यन्ते । आत्मार्थतः स्वप्रयोजनार्थं ते पक्षा नेति योजना । निग्राह्यतया दैतेया उपेक्षणीयाः, स्वभावतो न तु भगवान्विषमः सन् तानुपेक्षते । आत्मार्थत इत्युपलक्षणीयम् । अथवा । आदरणीयपक्षो नेति न । देवानां तथात्वादित्यतः प्रतिषेधतात्पर्यमाह । अनुग्राह्यतयेत्येकपक्षे योजना ज्ञेया । अनु हीनतया ग्राह्यतया ये देवा न तेऽसन्तः । हरेरपक्षा उपेक्षणीयाः । आत्मार्थतः स्वविनाशमुद्दिश्येति वेतरपक्षेऽन्वयः । इति च ब्रह्मतर्के इति शेषः ॥ अथ पद्यार्थः ॥ यस्य वध्यो योग्यताऽनतिक्रमेण न रक्षणीयोऽपि तथा । उपेक्षणीयादरणीयपक्षः । उपेक्षणीयसहितश्चा-सावादरणीयपक्षश्चेत्युत्तरपदलोपी समासः न । भक्तिवशः भक्त्यैव तुष्टिमभ्येति । यमेवैष वृणुते तेन लभ्य इत्यादेः । देवानामनुग्राह्यतया तत्पक्षत्वं स्वार्थं नेति तात्पर्यम् । उपेक्षणीयश्चासावा-दरणीयपक्षात्मा । उपेक्षणीयो देवादिः पूर्वदेवादिर्नास्तीति क्रमादन्वयो वा । उत्तरत्र वक्ष्यमाणः समुद्रमथनादिर्मधुमथनस्य नासम्भाव्यत एवेति ज्ञेयम् । अथाऽपि परेभ्यः स्वप्रयोजनाभावेऽपि सर्गस्थितिसंयमार्थं काले तत्तत्कार्यानुकूले रजःसत्त्वतमांसि क्रमात्सृष्ट्यादिकारणानि धत्ते ॥ २२ ॥

छलारी — ननु तर्हि सर्वदेवस्य समत्वेनानादरणीयत्वेनादरणीयपक्षाभावात्किं तच्चरणाश्रयेण । सत्यम् । तथाऽपि । अनुग्राह्यतयोपदेवानामात्माऽर्थतो हरेरित्युक्तेः । देवानामनुग्रहपात्रत्वे-नादरणीयपक्षत्वादस्मत्पक्षपाती भविष्यतीत्याशयेनाह ॥ न यस्येति द्वाभ्याम् । उपेक्ष-णीययुक्तश्चासावादरणीयपक्षश्चेति मध्यमपदलोपी समासः । यद्यपि हरेः स्वार्थं वध्यादिपक्षो नास्ति तथाऽपि परार्थं काले तत्तत्कालविशेषे सृष्टिस्थितिसंहारार्थं रजःसत्त्वतमोगुणान्क्रमेण धत्ते ॥ २२ ॥

लिङ्गेरी — यस्य नारायणस्य स्वप्रयोजनाय योग्यतां विना च वध्यादिर्नास्ति । यद्यप्यथाऽपि काले जगतः सर्गस्थितिसंयमार्थं सृष्टिपालनसंहाराय रजःसत्त्वतमोगुणान्धत्ते धारयति । तस्यायं स्थितिपालनलक्षण इत्युत्तरेणान्वयः । वध्यादिर्नास्तीत्यस्यायमेवार्थः न तु स्वरूपत एव कदाऽपीति । प्रतिहन्मि भूरि किमन्यं निन्दति शत्रवोऽनिन्द्राः । अनन्याश्चिन्तयन्तो माम् । योगक्षेमं वहाम्यहम् । तानहं द्विषतः क्रूरान् । सुरप्रियः । असुराणां सुधादानं सर्पाणामिव दुर्नयम् । इत्यादिश्रुति-स्मृतिविरोधपरिहारात् । देहिनां भवाय सत्त्वं जुषाणस्येत्यादिना स्वप्रयोजनाभावे स्थित्यादि-प्रवृत्त्यवगतेः ॥ २२ ॥

अयं तु तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनाम् ।
तस्माद् व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२३॥

सत्यधर्मीया — नायं समयस्तार्तीय इत्यार्तिः सम्पादनीयेत्याह ॥ अयं त्विति । स्थितेः पालनं नामाव्यत्यासेन तत्स्थापनम् । तस्य क्षणः समयः । तत्र हेतुमाह । देहिनामस्मदादीनां भवाय श्रेयसे । भवः संसारसत्तास्ति श्रेयः शङ्करजन्मस्त्विति विश्वः । सत्त्वं गुणं जुषाणस्य सेवमानस्य तस्माज्जगद्गुरुं शरणं व्रजामः । स नः स्वानां ज्ञातीनामस्माकं शं सुखं धास्यति स्वत्वं दर्शयति सुरप्रिय इति ॥२३॥

छलारी — ते च देहिनां प्राणिनां भवाय सुखाय सत्त्वं जुषाणस्य सत्त्वगुणधारकस्य हरेरयं स्थितिपालनस्य पालनरूपायाः स्थितेः क्षणः कालस्तस्माद्रक्षणकालत्वात्तत्रापि भक्तवशत्वात्सुरप्रियः स हरिः स्वानां स्वभक्तानां नः सुराणां शं सुखं विधास्यति अतः शरणं व्रजाम इति ॥ २३ ॥

लिङ्गेरी — अयं तु कालस्तस्य हरेर्जगत्स्थितिपालनलक्षणः । तत्र हेतुमाह । देहिनामधिकारिजीवानां भवाय क्षेमादिमङ्गलाय सत्त्वं गुणं जुषाणस्येति यस्मादेवमयं कालोऽस्मदनुकूलस्तस्माद्वयं जगद्गुरुं हरिं शरणं रक्षणं व्रजामः । यस्मात्स हरिः सुरप्रियस्तस्मात्स्वानां स्वकीयानां नोऽस्माकं शं सुखं धास्यति करिष्यति ॥ २३ ॥

श्रीशुक उवाच–

इत्याभाष्य सुरान् वेधाः सह देवैररिन्दम ।
अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥

सत्यधर्मीया — वेधाः सुरानाभाष्य देवैः सह । तमसः परं तदतीतं प्रकाशात्मकं साक्षान्मुख्यतया पदमावासस्थानम् । भाविमथनकार्यस्य साक्षात्पदमिति वा । क्षीराब्धिं जगाम ॥ २४ ॥

छलारी — वेधा ब्रह्मा अरिन्दम शत्रुसंहारहेतुं राजानं संबोधयति । अजितस्य हरेस्तमसः परं दूरे विद्यमानं प्रकाशात्मकं साक्षात्सर्वदा प्रत्यक्षत्वेनावासयोग्यं पदं क्षीराब्धिरूपं स्थानं जगाम ॥२४॥

लिङ्गेरी — हे अरिन्दम बाह्यान्तःशत्रुशिक्षक । वेधाश्चतुर्मुखः । सृष्टा प्रजापतिर्वेधा इत्यमरः । सुरान्प्रति इति उक्तरीत्याऽऽभाष्य देवैः सह तमसः परं साक्षादनुपचारेणाजितस्य विष्णोः पदं स्थानं जगाम ॥ २४ ॥

तत्रादृष्टस्वरूपाय श्रुतपूर्वाय चाभ्यधात् ।
स्तुतिमद्भुतदैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥ २५ ॥

सत्यधर्मीया — तत्र क्षीरनीरधौ । अदृष्टस्वरूपाय अदृष्टं स्वरूपं यस्य तस्मै । इदानीं श्रुतपूर्वाय। पूर्वं श्रुतः श्रुतपूर्वस्तस्मै । अद्भुतदैवीभिरद्भुता देव्यो देवसम्बन्धिन्यस्ताभिर्गीर्भिर्वेदवाणीभिः । अवहितेन्द्रियः । संस्तुतिं तद्गुणवर्णकशब्दरूपाम् । अभ्यधादुच्चचार ॥ २५ ॥

छलारी — अदृष्टं स्वरूपं यस्य तस्मै । अद्भुताभिः लोकेऽप्रसिद्धत्त्वेनाद्भुताभिर्दैवीभिर्देवस्य क्रीडादिगुणविशिष्टस्य हरेः संबन्धिनीभिर्हरिगुणगणप्रतिपादकादिभिरित्यर्थः । गीर्भिर्वेदवाग्भिः स्तुतिं व्यधात् । देवैः सहेति शेषः । अवहितेन्द्रियो वशीकृतेन्द्रियः ॥ २५ ॥

लिङ्गेरी — तत्र स्थानेऽदृष्टं स्वरूपमाकारो यस्य तस्मै श्रुतपूर्वाय पूर्वं श्रुताय हरयेऽद्भुतदैवीभिरत्याश्चर्यरूपहरिविषयाभिर्गीर्भिर्वेदानुकारिभिरवहितेन्द्रियः सन् स्तुतिमभ्यधात् ॥ २५ ॥

ब्रह्मोवाच–

अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ।
मनोग्रयाणं वचसाऽनिरुक्तं नमाम हे देव वरं वरेण्यम् ॥ २६ ॥

सत्यधर्मीया — निर्विकारोऽक्षरः । सत्यं ज्ञानमनन्तम् । आत्मा वा इदमेक एवाग्र आसीत् । हृदय आहितं यत् । निष्कलं निष्क्रियं शान्तम् । नैषा तर्केण मतिरापनेया । मनसो जवीयः । यद्वाचाऽनभ्युदितम् । यतो वाचो निवर्तन्ते । तत्सवितुर्वरेण्यम् । अग्निर्वै देवानामवमो विष्णुः परमः इत्यादि वेदपदानीदं प्रतीकतो गृह्णानः स्तौति हरिं हंसवाह इत्याह ॥ अविक्रियमिति । न विद्यते क्रिया विकारो यस्य तम् । सत्यं साधुगुणं भूतहितभूतं वा । अनन्तमपरिच्छिन्नमबद्धं वा । आद्यं पुराणपुरुषम् । आ धात्रीत्यैतरेयोपनिषदुक्तेरुपजीव्यमिति वा । गुहाशयम् । अधिकरणे शेतेरित्यच् । गुहायां शेत इति स तथा । गुहां प्रविष्टावित्यादेः । निष्कलं भिन्नावयवादिविकलम् । अप्रतर्क्यं शास्त्रयोनित्वात्केवलानुमानागोचरम् । मनोऽग्रयाणं मनसोऽप्यग्रे यानं गमनं यस्य तम् । रषाभ्यामिति नस्य णत्वम् । वचसा साकल्येनानिरुक्तम् । वरेण्यम् । वृञ एण्य इति कर्मणि एण्यप्रत्ययः । तत्सवितुर्वरेण्यमित्यृग्व्याख्यावरणीय इति भाष्यटीकायाम् । वरणीयो भजनीय इति वरेण्यः । वृञ एण्य इति वृणोतेः कर्मणि एण्यप्रत्यये वरेण्यशब्द इत्युक्तेः । हे देव वरं नमामि इत्यन्वयः ॥ २६ ॥

छलारी — ब्रह्मा वेदान्तोक्तविशेषणविशिष्टत्वेन हरिं स्तुवन्प्रणमतीत्याह ॥ ब्रह्मोवाचेति । हे विष्णो । वयं देववरं त्वां नमामहे नमाम । हे देव वरं त्वां नमामेति वा । कथंभूतं अविक्रियं वृद्ध्यादिविकारशून्यम् । न कर्मणा वर्धते नो कनीयानिति श्रुतेः । सत्यमबाधितस्वरूपम् । सच्छब्द

उत्तमं ब्रूयादानन्दं तीति वै वदेत् । येति ज्ञानं समुद्दिष्टं पूर्णानन्दस्य दर्शितमिति वचनात् । सत्यं पूर्णानन्दज्ञानरूपं वा । अनन्तम् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । आद्यं जगदादौ वर्तमानम् । आत्मा वा इदमेक एवाग्र इति श्रुतेः । गुहाशयं हृदयगुहायां निहितं नियामकत्वेन स्थितम् । हृदय आहितं यदिति श्रुतेः । न विद्यन्ते कला भिन्नावयवा यस्य तं निष्कलम् । निष्क्रियं शान्तमिति श्रुतेः । अप्रतर्क्यमनुमानाविषयम् । नैषा तर्केण मतिरापनेयेति श्रुतेः । मनोग्रयाणं मनसापेक्षयाऽधिकवेगयुतम् । अनेजदेकं मनसो जवीय इति श्रुतेः । वचसाऽनिरुक्तं निर्वक्तुमशक्यं साकल्येन वागिन्द्रियाविषयत्वात् । यद्वा । वक्तुमशक्यमिति श्रुतेः । देववरं देवोत्तमम् । आत्मा देवानां भुवनस्य गर्भ इति श्रुतेः । वरेण्यं वरणीयम् । तत्सवितुर्वरेण्यमिति श्रुतेः ॥ २६ ॥

लिङ्गेरी — वयमविक्रियं सर्वविकाररहितं सत्यमनारोपितमनन्तं देशकालगुणैः परिच्छेदरहितम् । आद्यं पुरातनं गुहाशयं हृद्गुहस्थं निष्कलं भिन्नदोषयुक्कलारहितमप्रतर्क्यं प्रत्यक्षागमाननुगृहीतयुक्त्यगोचरं सदागृणानं वाग्व्यापारोपेतम् । वचसा वेदादिरूपेणाधिकारिणां साकल्येनानिरुक्तं वरेण्यं भजनीयं देववरं सर्वदेवोत्तमं त्वां नमामहे । इति स्तुत्या चतुर्मुखो हरेः शबलब्रह्मत्वमतिरिक्तस्य निर्गुणस्याविक्रियादिरूपस्य सत्वं निवारयति । अन्यथा तद्गुणैरविक्रियादिभिरयथाभूतहरिस्तवनानुपपत्तेः । मायाशबलेऽपि हरौ चिद्भागदृष्ट्येयं स्तुतिरित्यस्य देववरत्वस्तुतिप्रहतत्वात् । चिन्मात्रे देववरत्वादिविकारस्य परमतेऽङ्गीकारानर्हत्वात् । विष्णुव्यतिरिक्ताविक्रियादिरूपस्य पराभिमतचितः प्रमाणतोऽसिद्धेः । एतद्विषये विस्तरोऽस्मत्कृतमध्वतन्त्रमुखमर्दनत्वेन परसंकेतितग्रन्थमर्दने द्रष्टव्यः । निर्विकारोऽक्षरः शुद्धः । सत्यं ज्ञानमनन्तम् । आद्यं पुरुषम् । यो वेद निहितं गुहायाम् । निष्कलं निष्क्रियं शान्तम् । नैषा तर्केण मतिरापनेया । येन वागभ्युद्यते । यद्वाचाऽनभ्युदितम् । वरेण्यं तत्सवितुरित्यादिश्रुतिप्रतिपाद्यो हरिरेवेत्येतच्छ्लोकार्थः ॥ २६ ॥

विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ।
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥

तात्पर्यम् – **'छाया त्वविद्या सम्प्रोक्ता जन्यविद्याऽऽतपः स्मृतः ।**
जीवगृध्रस्य तौ पक्षावध ऊर्ध्वपथोः पृथक् ।
तौ विष्णोस्तु न विद्येते नित्यं विद्यास्वरूपिणः' इति च ॥ २७ ॥

सत्यधर्मीया — छायातपौ यत्रेति श्लोके गृध्रः पक्षिविशेषः । गृध्रः खगान्तरे गृध्रो वाच्यवाच्यार्थलुब्धक इति विश्वः । तस्य पक्षौ छाया चातपश्चेत्येतौ लोकप्रसिद्धावेवेति किं केन सङ्गतमुच्यत इत्यतस्तदर्थं मानेनाह ॥ छाया त्विति । नातपाभावादिः छायापदार्थः किं त्वविद्याऽज्ञानम् । ज्ञानविरोधित्वाच्छायेत्युच्यते । जन्यविद्या शास्त्रजनितं ज्ञानम् । आतपः प्रकाशः स्मृतः । आतपपदविवक्षया स्मृत इति पुल्लिङ्गप्रयोगः । गृधु अभिकाङ्क्षायाम् । विषयादिकं सदा काङ्क्षतीति जीवो गृध्रस्तस्य । तौ छायातपौ पक्षौ अध ऊर्ध्वपथोरधरोर्ध्वमार्गयोः । ऋक्पूरब्धूःपथामिति निर्दिशन्ननित्यताम् अप्रत्ययस्य प्रत्यजिज्ञपदिति नाप्रत्ययः इति प्राञ्चः । नवीनास्तु अंश्यादिगणे राजन् शब्दस्य पाठात् तदनित्यतेत्याहुः । अध ऊर्ध्वं पथोरिति ऋजुः पाठः । तत्प्रसक्तेरेवाभावात् । पृथक् पृथगिति पाठोऽतिनिःशठः । तावविद्याजन्यविद्यापक्षौ विष्णोर्नैव विद्येते । किं तन्त्रं तत्रेत्यत आह ॥ नित्यं विद्यास्वरूपिण इति चेति । ऊर्ध्वाधरगतिसाधनत्वात्तौ पक्षाविव पक्षौ जीवश्चाभिकाङ्क्षावानिति गृध्रवद्गृध्र इत्यर्थः ॥ अथ मूलयोजना ॥ प्राणमनोधियात्मनाम् । प्राणा इन्द्रियाणि । प्राणो मुख्यो वा वायुः, मनश्च धीश्चात्मा देहश्च तेषाम् । धियात्मनामित्यत्र त्रियाद्यवयवात्मिका । स्त्रियादिकमित्यादाविव यणागमो ज्ञेयः । विस्तृतं च तत्त्वनिर्णयटीकाप्रमेयदीपिकादिष्वनुसन्धेयमित्यत्र त्रियम्बकः साक्षी । विपश्चितं वेदितारम् । यः प्राणे तिष्ठन् । यो मनसि तिष्ठन् । य आत्मनि तिष्ठन्नित्यादेः । अर्थेन्द्रियाभासमिन्द्रियैराभासो ज्ञानमिन्द्रियाभासः । अर्थानां विषयाणामिन्द्रियाभासो येन स तम् । अर्थानामिन्द्रियैः संनिकर्षं प्रापय्य तज्ज्ञानजनकमित्यर्थः । त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो इत्यादेः । अर्थेन्द्रियाणां संनिकर्षद्वारा भासो यस्येति वा । यस्य भासेत्यादेः । अनिद्रम् । न निद्रामित्यादेः श्रमशामकनिद्रारहितम् । अजमनिद्रमस्वप्नमित्यादेः । अव्रणं नित्यपूर्णतः । अकायमव्रणमित्यादेः । यत्र हरौ । गृध्रपक्षौ । गृध्रस्य विषयाभिलाषितया तत्तुलस्य जीवस्य । गृधु अभिकाक्षायां सुसूधागृधिभ्यः क्रन्निति क्रन् । पक्षौ ताविव तौ छायातपौ अविद्याशास्त्रजन्यज्ञानात्मकौ । ऊर्ध्वाधो गतिसाधकौ । न नस्तः । तमक्षरं न क्षरतीत्यक्षरस्तम् । एतद्ध्येवाक्षरमित्यादेः । त्रियुगम् । त्रियुगस्त्रीणि युगान्यवतार्यत्वेन यस्य स तथा । युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यत इति वचनात् । स्वयम्भूस्त्रियुगः कृष्णः शार्ङ्गी दामोदरस्तथेत्यभिधानात् । खम् । सुखरूपत्वात् । खं ब्रह्मेति श्रुतेः । व्रजामहे व्रजामः ॥ २७ ॥

छलारी — इदानीमिन्द्रियत्वादित्यादिना हरिं स्तुवन् प्रार्थयत इत्याह ॥ विपश्चितमिति । प्राणमनोधियात्मनां बुद्धिदेहिनां विपश्चितं ज्ञातारम् । अर्थान् शब्दादिविषयान् इन्द्रियाणि श्रोत्रादीनि

चाभासयति दीपयतीत्यर्थेन्द्रियाभासस्तम् । अर्थेन्द्रियाणां सन्निकर्षमुत्पाद्य तद्विषयज्ञानं जनयतीत्यर्थः । तस्य भासा सर्वमिदं विभातीति श्रुतेः । अक्षरं न क्षरतीत्यक्षरम् । एतद्ध्येवाक्षरं ब्रह्मेति श्रुतेः । खं ज्ञानरूपम् । कं ब्रह्म खं ब्रह्मेति श्रुतेः । त्रियुगेष्ववताराद्युगनामकं स्वयंभूस्त्रियुगः कृष्ण इत्यभिधानात् । यत्र हरौ गृधु कांक्षायामिति धातोः । सर्वमाकांक्षमाणस्य जीवस्य पक्षौ पत्रवद्वर्तमानौ पृथग्गधो मार्गोर्ध्वमार्गौ छायाऽविद्याऽऽतपः शास्त्रजन्यविद्यैतौ न स्तः । छाया त्वविद्या संप्रोक्ता जन्यविद्याऽऽतपः स्मृतः । जीवगृध्रस्य तौ पक्षावध ऊर्ध्वपथोः पृथक् । तौ विष्णोस्तु न विद्येते नित्यं विद्यास्वरूपिण इत्युक्तेः । तं शरणं व्रजामह इत्यन्वयः ।। २७ ।।

लिङ्गेरी — वयं यत्र भगवति नारायणे गृध्रस्य विषयकाङ्क्षिणो जीवस्य पक्षौ गरुत्वद्वर्तमानावध ऊर्ध्वगतिहेतुच्छायातपाविद्याशास्त्रज्ञानरूपौ न स्तो नाभूतां न भविष्यतश्च ।। तदुक्तम् ।। छाया त्वविद्या संप्रोक्ता जन्यविद्याऽतपः स्मृतः । जीवगृध्रस्य तौ पक्षावध ऊर्ध्वपथोः पृथक् । तौ विष्णोस्तु न विद्येते नित्यं ज्ञानस्वरूपिण इति ।। तं प्राणमनोधियात्मनां विपश्चितं ज्ञातारम् । अर्थान् शब्दादीन् इन्द्रियैः श्रोत्रादिभिराभासयति जीवेभ्य इत्यर्थः । अर्थेन्द्रियाभासमर्थानीन्द्रियाणि च भासयतीति च तथोक्तस्तम् । यस्य भासा सर्वमिदं विभातीत्यादेः । अनिद्रं अज्ञानकार्यनिद्राविधुरम् । अव्रणं क्षतादिदोषरहितम् । लिङ्गशरीरशून्यं च । तुरीयरूपम् । न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः । अजमनिद्रमस्वप्नम् । अकायमव्रणमित्यादेः । अक्षरं चतुर्विधनाशरहितम् । खं सर्वेन्द्रियनियामकम् । यः प्राणे तिष्ठन्नित्यादेः । ज्ञानपूर्णम् । कं ब्रह्म खं ब्रह्मेत्यादेः । त्रिष्वेव युगेषु मनुष्यादिदृष्ट्यादिगोचरत्वात् । त्रियुगनामानं नारायणं व्रजामहे शरणं यामः ।। २७ ।।

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु ।
त्रिनाभि विद्युद्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ।। २८ ।।

तात्पर्यम् – गुणत्रयनाभि । विद्युद्ब्रह्मा । 'विद्युद्ब्रह्मेत्युपासीते'ति श्रुतेः । 'जगच्चक्रस्याक्षभूतो बलरूपश्च केशव' इति च ।। २८ ।।

सत्यधर्मीया — अजस्य चक्रमिति श्लोके त्रिनाभीति नाभित्रयोपेतमित्यसङ्गतं भातीत्यतो विवक्षितमर्थमाह ।। गुणत्रयेति । गुणत्रयं सत्त्वादयो नाभिर्मध्यं यस्य तत् । विद्युच्चपलेति चापल्यं वारयति ।। विद्युद्ब्रह्मेति । विद्युद्ब्रह्मेत्युपासीतेति श्रुतेरिति । विद्योतते स्वातन्त्र्येणेति तत्तथा । अक्षत्वं बलरूपत्वं च प्रामाणिकमित्येकस्य युज्यत इत्याह ।। जगच्चक्रस्येति । ।। अथ श्लोकार्थः ।। अजस्य

हरेरधीनम् चक्रं, जगदाख्यम् । चक्रं न वृत्तमिति श्रुतेः । परिवर्तमानम् प्रवाहतः चक्रं चेच्चक्रे कस्तत्प्रेरणमित्यत ईरयति । अजयेति । अजयेर्यमाणमित्येकं पदम् । अजयार्थं जीवापजयार्थं ईर्यमाणं प्रेर्यमाणम् । अजया प्रकृत्येर्यमाणं प्रेर्यमाणम् । मनोमयं तत्प्रधानकम् । मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्यादेरिति । पञ्चदशारम् । श्रोत्रादिदशकं शब्दादयः पृथिव्यादयः प्राणादयो वाऽराणि दलानि यस्य तत् । अरं शीघ्रे च चक्राङ्ग इति विश्वः । आशु शीघ्रगम् । त्रिनाभि । त्रयो गुणाः सत्त्वाद्या नाभिर्मध्यभागो यस्य तत् । नाभि नरक्षत्रिये । उभावन्यत्र पुंसि । नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमानिति लिङ्गानुशासनसूत्रविश्वाद्युक्तेः । विद्युद्ब्रह्म बलमाधारभूतं यस्य तत् । अष्टनेमि अष्टौ देवदानवमानवगन्धर्वराक्षसपिशाचतिर्यक्स्थावररूपाणि नेमयस्तदन्तर्भागा यस्य तत् । नेमिस्त्रिकायां कूपस्य चक्रान्त इति विश्वः । यो भगवानक्षो रथाङ्गविशेषः । अक्षमिन्द्रिये । इन्द्रिये किम् । रथाङ्गादौ मा भूदिति सविवरणलिङ्गानुशासनात् । महाचक्रान्तर्वर्ती च अवान्तरवर्तुल-चक्रप्रान्तभाग इत्यर्थः । आहुर्महान्तः । ऋतं ज्ञानात्मकम् । तदेवर्तं तदु सत्यमाहुरित्यादेः । तं प्रपद्ये । अहमित्यस्य लाभ उत्तमपुरुषत्वात् । चक्रं द्वितीयैकवचनम् । चक्रवज्रान्धकारेत्यादिना लिङ्गानुशासने पुल्लिङ्गताया उक्तेः । आशु यथा भवति तथेर्यमाणमित्याश्वन्वयः । त्रिनाभिविद्युद्बल-मिति पदमेकम् । क्वचित्पुस्तकेऽष्टनेमिमिति लेखाऽस्ति । समूलमेवं विवरणस्येति ज्ञेयम् ।। २८ ।।

छलारी — इदानीं जगच्चक्राधारत्वेन परमात्मानं स्तौतीत्याह ।। अजस्येति । चक्रं चक्रवत्पुनः प्रवाहरूपेण हरौ वर्तमानत्वाच्चक्रसंज्ञं जगद्यदक्षं, यः केशवोऽक्षोऽक्षस्थानीयो यस्य तद्यदक्षं यदाधारमाहुः । चक्रं न वृत्तं व्यती९ रवीविपदिति श्रुतेः । तं ऋतं ऋतशब्दवाच्यं प्रपद्ये । तदेवमिति श्रुतेः । कथम्भूतम् । अजस्य विष्णोः । अधीनमिति शेषः । अजया प्रकृत्येर्यमाणं प्रेर्यमाणम् । कार्यते ह्यवशः कर्म सर्वप्रकृतिजैर्गुणैरिति स्मृतेः । मनोमयं मनःप्रधानम् । मन एव मनुष्याणां कारणं बन्धमोक्षयोरिति स्मृतेः । पञ्चदशारमिन्द्रियाणि दश शब्दादयः पञ्च पृथिव्यादीनि वा पञ्चेत्येवं पञ्चदशारा दलानि यस्य स तथा । आशु शीघ्रम् । त्रिनाभि त्रितयः सत्त्वादयो गुणा नाभिरिव यस्य स तथा । विशेषेण द्योतमानत्वात् । विद्युद्ब्रह्म बलं यस्य स तथा । विद्युद्ब्रह्मेत्युपासीतेति श्रुतेः । जगच्चक्रस्याक्षभूतो बलरूपश्च केशव इत्युक्तेः ।। अष्टनेमीति । अष्ट देवदानवमानवगन्धर्वराक्षसपिशाचतिर्यक्स्थावराणि नेमयो यस्य स तथा ।। २८ ।।

लिङ्गेरी — यस्याजस्य विष्णोर्वशमजया जडप्रकृतिनियामकचित्प्रकृत्या जडप्रकृतितत्त्वादि गुणैश्चेर्यमाणं प्रेर्यमाणम् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरित्यादेः । मनोमयमन्तः

करणप्रधानकम् । मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्यादेः । पञ्चदशारं श्रोत्रादिदशेन्द्रिय-शब्दादिपञ्चकरूपपञ्चदशदलोपेतम् । पञ्चमहाभूतपञ्चप्राणश्रोत्रादि पञ्चेन्द्रियरूपपञ्चदशदलोपेतम् । आशु शीघ्रभ्रमणं व्याप्तं च । गुणत्रयलक्षणनाभित्रयोपेतत्वात्त्रिनाभिः । विशेषतो द्योतमानत्वाद्विद्युद्धरिः स एव बलमाधारो यस्य तद्विद्युद्बलम् । विद्युद्ब्रह्मेत्युपासीत । अष्टौ देवदानवमनुष्यगन्धर्वतिर्यक्पिशाचराक्षसस्थावराख्याः ॥ देवदानवगन्धर्वतिर्यङ्नरपिशाचकाः । राक्षसाः स्थावरा अप्यष्टौ विटपा इति वायुपुराणोक्ताः । नेमयो वर्तुलाकारधारा यस्य तत्तथा । प्रवाहरूपेणावृत्त्या भ्रमणात् । चक्रसंज्ञं जगत् । ज्ञानिनो यदक्षं यो हरिरक्षश्चक्रद्वयमध्यस्थ छिद्रगस्थूलदारुस्थानीयो यस्य तत्तथा आहुः । अहं तं ऋतं पूर्वारिगतवत्सदावस्थितं निर्विकारं हरिं प्रपद्ये शरणं गतोऽस्मि । जगच्चक्रस्याक्षभूतो बलरूपश्च केशव इति वचनबलादत्र चक्रशब्देन जगद्ग्राह्यम् ॥ २८ ॥

यदेकवर्णं तमसः परं सदलोकमव्यक्तमनन्तपारम् ।
आसाञ्चकारोपसुपर्णपत्रमुपासते योगरथेन धीराः ॥ २९ ॥

सत्यधर्मीया — स्वापेक्षितापरोक्षज्ञानावाप्त्यै तंनमति ॥ यत् ब्रह्मेति । एकवर्णम् अनवान्तरभेद एको वर्णः । ॐ इत्येकाक्षरं ब्रह्म । प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम् । सर्वव्यापिनमोङ्कारमित्यादेः । तमसः प्रकृतेरज्ञानाद्वा परमतीतं विलक्षणम् । अक्षरात्परतः परः । कूटस्थोऽक्षर उच्यते । द्वाविमौ । उत्तमः पुरुषस्त्वन्य इत्यादेः । क्वाज्ञानादिः परस्येत्यादेः । सत् साधुगुणोपेतम् । सद्भावे साधुभावे चेत्यादेः । ज्ञानात्मकं वा । ऐकात्म्यप्रत्ययसारमित्यादेः । अलोकं लोकविलक्षणम् । अव्यक्तं प्रसादमन्तरा । व्यक्तम् विविधसङ्गोपेतं तन्न भवतीति वाऽव्यक्तम् । अनन्तपारम् अनन्तान् जीवान्पारयति संसृतेस्तारयतीति तत्तथा । अनंतः स्वयं स्वतोऽबद्धः पारयति तत्तथेति वा । अन्तो नाशः पारो गुणेयत्ता न स्तो यस्य तत्तथा । यत् उपसुपर्णपत्रम् सुपर्णा जीवा त एव । पत्रं तु वाहने पर्णे पक्ष इति विश्वात्पत्रं वाहनम् । तस्योप समीपे । उपसुपर्णपत्रम् । तदुपरीति यावत् । आसाञ्चकारोपविवेश । यदेकवर्णमित्यादि न देवतान्तरपरं किन्तु श्रीहरिविषयकमेवेत्युपसुपर्णपत्रमासाञ्चकारेत्यनेन ध्वनयति । तस्यैव गरुडारूढत्वादि मुख्यमिति विख्यातेः । द्वा सुपर्णा सयुजेत्यादेः । य आत्मनि तिष्ठन्नित्यादेः । तत् धीराः धिया रमन्त इति रमेर्यमन्ताड्ड इति डः । ते योगरथेन । योगानां समाध्यादीनां रथो गतिस्तेन भक्तिपूर्वकध्यानजनितावान्तरज्ञानेन । उपासते तं नमामीत्युत्तरेणान्वयः । योगो योगी उपायवान् । रथः कायस्तेन । रथः स्यात्स्यन्दने काय इति विश्व इति वा ॥ २९ ॥

छलारी — एवं जगच्चक्राधारत्वेन स्तुत्वेदानीं सर्वजीवनियंतृत्वेन हरिं स्तौतीत्याह ।। यदिति । एकवर्णमेको मुख्यो वर्ण ओङ्कारो यस्य स तथा तम् । प्रणवप्रतिपाद्यमित्यर्थः । प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितमिति श्रुतेः । तमसः प्रकृतेः परम् । अक्षरात्परतः पर इति श्रुतेः । सीदति जानातीति सत् । षद्लृ गताविति धातोः । गत्यर्थस्य ज्ञानार्थत्वात् । निर्दोषज्ञानमित्यर्थः । ऐकात्मप्रत्ययसारमिति श्रुतेः । अलोकं लोकविलक्षणम् । स आत्मा नेति नेतीति श्रुतेः । अव्यक्तं स्वप्रसादमन्तरेणाप्रत्यक्षम् । यमेवैष वृणुते तेन लभ्य इति श्रुतेः । न विद्यतेऽन्तपारौ यस्येत्यनन्तपारं कालतो देशतश्चापरिच्छिन्नमित्यर्थः । एतादृशं यद्रूपमुपसुपर्णपत्रं सुपर्णो जीवः । द्वा सुपर्णा स युजेति श्रुतेः । पत्रं वाहनम् । पत्रं वाहनपक्षयोरित्यभिधानात् । जीवाख्यवाहनस्योपोपर्यासांचकार तं नियन्तृत्वेनोपविवेश । प्राज्ञेनात्मनाऽन्वारूढ इति श्रुतेः । तदेतद्रूपं धीरा ज्ञानिनो योगरथेन योगेन भक्तिपूर्वकध्यानलक्षणेन रथेन विष्णुप्राप्तिसाधनेनोपासते भजन्ते । तं नमामीत्युत्तरेणान्वयः ।। २९ ।।

लिङ्गेरी — यत् नारायणाख्यं ब्रह्म । एकवर्णं ॐकाररूपैकाक्षरप्रतिपाद्यम् । ओमित्येकाक्षरं ब्रह्मेत्यादेः । तमसः प्रकृतेः परमुत्तमम् । सन्निर्दोषम् । अलोकं लोकविलक्षणमव्यक्तं स्वप्रसादमन्तराऽधिकारिप्रयत्नेन व्यक्तिशून्यम् । अनन्तपारं विनाशदेशकालादिपरिच्छेदाभ्यां विधुरम् । यच्चोपसर्पणपत्रं गरुडपक्षसमीपे । तत्स्कन्ध इति यावत् । आसांचकारोपविवेश । धीरा ज्ञानिनो योगरथेन रथवद्वेगवता ध्यानादिरूपयोगेनोपासते ।। २९ ।।

न यस्य कश्चातितिपिपर्ति मायां यया जनो मुह्यति वेदनार्थम् ।
तं निर्जितात्मात्मगुणं परेशं नमामि भूतेषु समं चरन्तम् ।। ३० ।।

तात्पर्यम् – आत्मा च आत्मगुणाश्च निर्जिता येन ।। ३० ।।

सत्यधर्मीया — तं निर्जितात्मात्मगुणमित्यप्रतीतेर्व्याकरोति ।। आत्मा चेति । आत्मा चात्मगुणाश्च निर्जिता येन स तम् । आत्मा मनश्च । आत्मगुणा रागादयो निर्जिताः पराजिता येन स तथा तम् ।। अथ मूलार्थः ।। यस्य हरेः । कश्च कोऽपि । मायां नातिपिपर्त्यत्येति । विना तद्दयाम् । दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यादेः । वेदनार्थम् । वेदना ज्ञानं तस्यार्थो मुख्यविषयस्तं प्रति । यथा मायया मुह्यति विचित्रो भवति । मुह्यत्यर्थं भगवन्तं न वेदेति वा । ज्ञानरूपप्रयोजनमुद्दिश्य जनो मुह्यतीति वा । ज्ञानी चेदर्थं वेद न मुह्यतीति । स च नयस्य नीतेः सकाशात् । यया जन इतरो मुह्यति तां मायां कश्च

कोऽप्यतिपिपर्त्यत्येतीति वा । निर्जितात्मात्मगुणम् । निर्जिता आत्मा प्रकृतिरात्मगुणा दुःखाज्ञानादयो येन स तथा । आत्मा जीव आत्मगुणा दुःखादयो निर्जिता येन स तं वा । अनीशया शोचति मुह्यमानः । अनादिमायया सुप्तो यदा जीवः प्रबुद्धयते । निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्यय इत्यादेः । परेशं, सर्वभूतेषु समं तत्तद्योग्यतामनुसृत्य चरन्तम् । एको देवः सर्वभूतेषु गूढः । एष सर्वेश्वर इत्यादेः । समं निर्दोषमिति वा । निर्दोषं हि समं ब्रह्मेत्यादेः । परेषां मुक्तानामीशः । उतामृतत्वस्येशान इत्यादेः । परा च ई तस्याः शं येन तमिति वा । समं मया सहितं रमापतिमिति वा ।। ३० ।।

छलारी — इदानीं मायानियन्तृत्वेन स्तौतीत्याह ।। न यस्येति । यस्य हरेरधीनां यां मायां प्रकृतिं कश्च कोऽपि तत्प्रसादं विना नातिपिपर्ति नातिक्रामत्यत्येतुं समर्थो न भवति । दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इति स्मृतेः । तं नमामीत्यन्वयः । मायाकार्यमाह ।। ययेति । यया प्रकृत्या जनो मुह्यति बद्धयते तेनार्थं भगवत्स्वरूपं स्वस्वरूपं च न वेद न जानाति । न चानिष्टं प्राप्नोतीति भावः । अनीशया शोचति मुह्यमान इति श्रुतेः । कथम्भूतम् । निर्जितात्मात्मगुणं नितरां जिताऽऽत्मा प्रकृतिरात्मगुणाः दुःखाज्ञानादिदोषा येन तम् । यद्वा । निर्जिताः आत्मगुणा रागादयो येन तमिति । निरनिष्टो निरवद्य इति श्रुतेः । परेषां मुक्तानामीशम् । उतामृतत्वस्येशान इति श्रुतेः । भूतेषु सर्वेषु प्राणिषु विषये समं तत्तद्योग्यतानुसारेणाचरन्तं प्रवर्तकम् ।। ३० ।।

लिङ्गेरी — कश्च कोऽप्यधिकारी यस्य हरेर्मायां बन्धनादिशक्तिं जडप्रकृतिं च यस्य प्रसादेन विना नातिपिपर्ति नातितरति । दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यादेः । यया मायया जनोऽसुरस्वभावो मुह्यति विपरीतज्ञानवान्भवति । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसीत्यादेः । जनोययाऽऽवृतोऽर्थं स्वस्वरूपादिलक्षणं न वेद । निर्जिता आत्मानो रमादिचेतनास्तद्गुणाश्च येन स तथा । सर्वचेतनोत्तमत्वतन्नियामकत्वादेरात्मेश्वरम् । शाश्वतं शिवमच्युतं नारायणं महाज्ञेयम् । य आत्मानमन्तरो यमयतीत्यादेः । परेशं मुक्तस्वामिनम् भूतेषु सर्वप्राणिषु समं ज्ञानानन्दादिभिश्चरन्तं नियामकतया संचरन्तम् । तं हरिं नमामि । सर्वेषां भूतानामन्तरपुरुषः सम आत्मेति विद्यात् । ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिन इत्यादेः ।। ३० ।।

इमे वयं यत्प्रिययैव सृष्टा सत्वेन सृष्टा बहिरन्तरं विभो ।
गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥

सत्यधर्मीया — सात्त्विका अपि तात्त्विकीं यत्कृपामपहाय न शक्ता ज्ञातुमितरे तामसराजसा न समर्था इति किं वक्तव्यमिति स्पष्टमाचष्टे ॥ इमे वयमिति । सत्वेन सृष्टा अपि यत्कृपयैव सृष्टा इत्यन्वयः । इमेवयम् । यत्प्रियया सृष्टाः सन्निधानपात्रत्वेन प्रियया तन्वा प्रतिमास्थानीयेन सत्वेनेत्यन्वयः । यत्कृपयेति स्फुटार्थः पाठः । अनेन संवित्सम्पत्तावनुबन्धः सूचितः । अत एव ऋषयश्चेदप्यन्तरं बहिश्च । हे विभो व्याप्त । एतेनासन्निकर्षान्निष्कृष्य संविदसम्भवासम्भावित्वं वारितं भवति । सूक्ष्मां तव गतिं स्वरूपम् । न विद्महे न जानीम इति वा । विदो लटो वेति मसो मादेशः । सुदृशामपि दृशोदृशी यदा तदेतरेषां कथा केत्याह ॥ कुतोऽसुराद्या इति । तामसा असुरा राजसा नित्यसंसारिणश्च कुतो जानीयुः । उभयत्र क्रमाद्धेतू ॥ सूक्ष्मामितरप्रधाना इति । सूक्ष्मत्वादृषीणामपि विना कृपां (न) पदप्राप्तिरसुरादीनामितरौ तमोरजोगुणौ प्रधानौ सृष्टिनष्टिहेतुभूतौ येषां ते तथेति तेषां च तदप्राप्तिरिति ज्ञेयम् ॥ ३१ ॥

छलारी — इदानीं साकल्येनाज्ञेयत्वेन हरिं स्तौतीत्याह ॥ इम इति । यस्य हरेः प्रियया तन्वा प्रतिमास्थानीयेन सत्त्वेनैव ज्ञानहेतुसत्त्वगुणेनैव सृष्टा उत्पादिताः । यत्कृपयैव सृष्टा इति पाठे यस्य कृपया सृष्टाः संबद्धाः कृपाविषयभूता इत्यर्थः । अत एव ऋषयश्च ज्ञानिन एतादृशा अपीममेव यं देवाः । हे विभो सर्वत्र व्याप्त । बहिरन्तरं ब्रह्माण्डाद्बहिरन्तरश्च सूक्ष्मामाकाशवदतिव्याप्य द्योतत्वेन स्थिताम् । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेः । तव गतिं त्वद्वपुः न विद्महे न जानीमः । साकल्येनेति शेषः । इतरप्रधाना इतरौ तमोगुणरजोगुणौ प्रधानौ प्रचुरौ येषां ते तथा तामसराजसस्वभावा असुराद्याः । असुरशब्देन तामसास्तमोयोग्या ग्राह्याः । आदिशब्देन राजसा नित्यसंसारिणो ग्राह्याः । कुतो हेतोर्न जानीयुरिति शेषः । तं नमामीति पूर्वेणान्वयः ॥ ३१ ॥

लिङ्गेरी — इमे सप्तलोकाधिपत्यादिनाऽतिप्रसिद्धा वयं यस्य हरेः कृपयैव केवलं दयया न तु स्वप्रयोजनाद्यर्थं दृष्टा दृष्टिविषयीकृताः सन्तः सत्त्वेन गुणेन ब्रह्माण्डाद्बहिः सृष्टा ब्रह्माण्डादन्तरं च सृष्टाः । तदैक्षत । स इदं सर्वमसृजतेत्यादेः । ऋषयश्च ज्ञानिनोऽपि वयं यस्य विभोः सूक्ष्मां तदनुग्रहमन्तरा स्वप्रयत्नेन ज्ञातुमशक्यां गतिं स्थितिं न विद्महे । इतरप्रधाना तमोगुणप्रधाना अतितामसा असुराद्यास्तां गतिं कुतः कस्माद्धेतोर्विद्युः न कुतोऽपि । स नः प्रसीदतामित्युत्तरेणान्वयः ॥ ३१ ॥

पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ।
स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३२ ॥

सत्यधर्मीया — अन्यस्या देवताया नैवंविधं विविधभवनमिति वन्दनीयोऽयमेवेति वक्तुं विराड्रूपिणः प्रसादमाशास्ते ॥ पादाविति । स्वकृता हरिणैव रचितेति मही इयं पादौ । स्वशब्देन पादयोर्ग्रहणम् । यस्य हरेः स्वाभ्यां पदाभ्यामियं मही कृतेति । इयं पादावुच्यत इति वा । तदुत्पन्ना तदाश्रितेत्येव तच्छब्दवाच्या । न तु तादात्म्येनेति ज्ञेयम् । पद्भ्यां भूमिरजायत । यत्र मह्याम् । चतुर्विधो जरायुजस्वेदजाण्डजोद्भिजेति चतस्रो विधा यस्य सः । भूतसर्गो भूतोत्पत्तिर्भवति सेयं महीत्यन्वयः । महापुरुषः पुरुषोत्तमो विराट्पुरुषः । हेतुस्तत्रात्मतन्त्र इति । स्वतन्त्रः । आत्मानोऽस्मदादयस्तन्त्रं कुटुम्बव्यापारे सेवका इति यावत् । तन्त्रं कुटुम्बव्यापार इति विश्व इति यस्य स वा । आत्मनां तन्त्रं स एव येन कुटुम्बी । महाविभूतिर्महती मेदिनी पादकत्वादिकाऽत्रोक्ता विभूतिर्विविधभवनमैश्वर्यं यस्य सः । महती विभूतिर्महालक्ष्मी यस्येति स वा । किमभिधेयं तस्येत्यत आह ॥ ब्रह्मेति । अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणा इति श्रुतेः । अत्रोक्तं सर्वं युक्तमित्याह ॥ ब्रह्मेति । गुणपूर्णमिति हेतोर्नासम्भावितमिदमिति । वै हि । विश्वतः परमां नित्यमित्यादिश्रुतिसिद्धिं महापुरुषत्वादेर्द्योतयत इति ज्ञेयम् ॥ ३२ ॥

छलारी — इदानीं विराड्रूपेण स्तुवन् प्रार्थयते ॥ पादौ महीति । यत्र यस्यां मह्यां जरायुजाण्डजस्वेदजोद्भिज्जत्वेन चतुर्विधो भूतसर्गो जीवसृष्टिरभूत् । सेयं स्वकृतैव स्वपादोत्पन्नैव । पद्भ्यां भूमिर्दिश इति श्रुतेः । मही भूमिर्यस्य विराड्रूपस्य पादाविव न स्वरूपपादौ । स महापुरुषः स्थूलरूपी पुरुषनामा हरिः । सहस्रशीर्षा इति श्रुतेः ॥ ३२ ॥

लिङ्गेरी — यस्येयं मही भूमिः पादौ स्वकृतैव पादजत्वेन पादाश्रिततया परमात्मकृतैव । यत्र भूमौ चतुर्विधोऽण्डजादिभेदेन चतुःप्रकारो भूतसर्गः प्राणिसृष्टिरभूत् । वेत्यनेन पद्भ्यां भूमिरित्यादि श्रुतिप्रसिद्धिं च सूचयति । स महापुरुषो ब्रह्मा परं ब्रह्म गुणपूर्णत्वाद्ब्रह्म नाम । अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणा इत्यादेः । महाविभूतिः साक्षाच्छ्रीपतित्वेनापरिच्छिन्नैश्वर्यः । आत्मतन्त्रः स्वसत्ताप्रतीतिप्रवृत्त्यादिषु परानपेक्षो हरिर्नः प्रसीदतां प्रसन्नो भवतु ॥ ३२ ॥

अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः ।
लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३३ ॥

तात्पर्यम् – 'सूर्यसोमयमेन्द्रादीनृतेऽन्ये लोकपा अपि ॥ अद्भिर्जीवन्ति सोमाच्च महेन्द्रादीनृतेऽखिलाः । अपां सोमस्य चेन्द्राद्याः सर्वे वै जीवनप्रदाः' इति च ॥ ३३ ॥

सत्यधर्मीया — अम्भस्तु यद्रेत इति श्लोके लोकेशानामिन्द्रादीनां जीवानां जीवनमुच्यते । तथा सोमं मनो यस्येति श्लोके च तेषामेव सोमो बलद इत्युच्यत इति भाति । अत उभयत्र विवक्षितमर्थं मानेनैवाह ॥ सूर्येति । सूर्यः सोमो यमश्चन्द्रश्चादयो येषां ते तान् ऋते विना । अन्ये वरुणावराः । अद्भिस्तदभिमानिना वरुणेन जीवन्ति । तमुपजीव्य वर्तंत इत्यर्थः । महेन्द्रादीनृतेऽखिलाः लोकपा इत्यन्वेति । ते च चन्द्रावरा वरुणाद्याः । तर्हि वरुणस्य चन्द्रस्य च क उपजीव्य इत्यत आह ॥ अपामिति । वरुणस्य चन्द्रस्य चेन्द्राद्याः सर्वे उत्तमा जीवनप्रदा इत्यर्थः ॥ अथ श्लोकद्विकयोजना ॥ उदारवीर्यमुदारमुत्कृष्टं वीर्यं बलं यस्य तद्यद्रेतः शुक्रमंभ उदकम् । तज्जातमिति यावत् । शिश्नाद्रेतो रेतस आप इति श्रुतेः । त्रयो लोकाः, अखिललोकपालाः वरुणवरान्विहायान्ये तदवराः । तथा सोमोत्तमानतिहाय तदवराश्चेति सर्वे । यदिति विश्लिष्टमावर्तते । तच्च यत इति विपरिणतमन्वेति । रेतस इति पञ्चमी । श्रुतेः श्रुतौ । यतो रेतसो वर्धमानाः सिद्ध्यन्ति सिद्धिमाप्नुवन्ति । उतापि जीवन्ति तृप्ता भवन्ति । यतस्त्रयो लोकास्तत्स्था जनाः । सिद्ध्यन्त्युत्पद्यंते । जीवन्ति प्राणान्धारयन्ति । उत वर्धमाना बलादिमन्तो भवन्ति । तदम्भो यद्रेतः स महाविभूतिः । सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्त । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । तद्यत्प्रथमममृतं तद्वसव उपजीवन्तीत्यादि पूर्वाचार्योदाहरणं हरिजत्वमात्रविवक्षयेति ज्ञेयम् । तुश्च त्याज्यत्यागग्राह्यग्रहण-रूपमानिकविशेषद्योतकः । इयमेका महाविभूतिस्तद्वान्प्रसीदतामित्यन्वयः ॥ ३३ ॥

छलारी — अप्स्रष्टृत्वमंभसा त्रिलोकजीवनादिप्रदत्वरूपमाह । विभूतियुक्तत्वेन परमात्मानं स्तौति ॥ अंभस्त्विति । उदारमुत्कृष्टं वीर्यं शक्तिर्यस्य तदुदारवीर्यमंभो यद्रेतो यस्य रेतसो जातम् । शिश्नात्तारो रेतस आप इति श्रुतेः । सप्तसु प्रथमेति सूत्रात् रेत इति प्रथमा पञ्चम्यर्थे । सः प्रसीदताम् । उदारवीर्यत्वमेवाह ॥ सिद्ध्यन्तीति । त्रयो लोकास्त्रिलोकस्था जना अथाखिललोकाश्च येनांभसा सिद्ध्यन्ति जायन्ते । जीवन्त्युत जीवनमपि प्राप्नुवन्ति । वर्धमानाः पुष्टिबलादिनाऽभिवृद्धा भवन्ति ॥ ३३ ॥

लिङ्गेरी — उदारवीर्यं वक्ष्यमाणोत्कृष्टसामर्थ्यमंभो जलं यस्य हरे रेतो वीर्यस्थानीयम् । यद्रेतः कर्म । त्रयो लोकास्त्रिलोकस्था जना जीवन्त्युपजीवन्ति । रेतोपजीवनेन सिध्यन्ति न निवृत्तिलक्षणं फलं प्राप्नुवन्ति । वर्धमानाः शरीरोपचयेनैधमानाश्च भवन्ति । न केवलमेवं साधारणा जनाः किं

त्वखिललोकपालाः सूर्यसोमयमेन्द्रादिव्यतिरिक्ताः सर्वलोकपालाः । अथाऽपि उपजीवनादिकं कुर्वन्ति। यद्यत्प्रथमममृतं तद्वसव उपजीवन्तीत्यादिश्रुतेः । न त्विन्द्रसूर्यादयोऽपि येषामबादि-सर्वैरुपजीव्यत्वात् । अपां सोमस्य चेन्द्राद्याः सर्वे वै जीवनप्रदा इत्यादेः । एवं ब्रह्मणि श्रुति-स्मृत्यादिरूपशब्दराशयः । महतां मुख्यप्रतिपाद्यविभूतिरैश्वर्यं यस्य स हरिर्नः प्रसीदताम् ॥ ३३ ॥

सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः ।
ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥ ३४ ॥

सत्यधर्मीया — यश्च सोमो दिवौकसां दिवमोको येषां ते । अदन्तो दिवशब्दः । दिवोकसामिति पाठोऽपि अछन्दो विच्छेदात् । मन्दरः सौरभः शक्रभवनं खं दिवं नभ इति त्रिकाण्डशेषात् । द्यौरोको येषामित्येकमात्रपक्षे विग्रहः । स्यादिवोका दिवौकाश्च देवे वापीह पक्षिणीति रन्तिदेवः । दिवोकाश्च दिवौकाश्च पुंसि देवे च चातके । शब्दपरविप्रतिषेधात् । परयणादेशः । स्थानिवत्त्वेन पूर्वस्य न यण् । सकृद्गताविति न्यायात् नात्र भाष्यकृदिष्टिर्यद्यपि तथाऽपि प्रयोगानिर्वाह्या इति भान्वादयः । स्वावराणां देवानामन्धोऽन्नरूपम् । आयुस्तद्धेतुरेव बलं च । नगानां वनस्पतिमुखानामोषधीनां वा ईशः अङ्कुरजननशक्तिदः । प्रजानां प्रजनः प्रजोत्पादेन बलदस्तं सोमं यस्य मनस्तज्जातं तदाश्रितं च । समामनन्ति आम्नायाश्चन्द्रमा मनसो जात इत्याद्याः । स प्रसीदतामित्यन्वयः । सोमो ददद्गन्धर्वाय । सोमो वै राजा वनस्पतीनाम् । सोमः प्रथम इत्यादेः ॥ ३४ ॥

छलारी — यः सोमो दिवौकसां स्वाधमानां देवानां बलमन्धोऽयमायुर्बलाभिवृद्धिहेतुः । नगानां वृक्षाणामंकुरजननसामर्थ्यप्रदत्वेनेशः । प्रजानां प्रजनः सुरतानन्दहेतुः । तं सोमं चन्द्रं यस्य मनो मनसो जातं समामनन्ति विदन्ति । चन्द्रमा मनसो जात इति श्रुतेः । स इत्यन्वयः । देवादिबलादिप्रदसोमजनकत्वलक्षणमहाविभूतिः ॥ ३४ ॥

लिङ्गेरी — ज्ञानिनो यश्चन्द्रो दिवौकसां देवानां बलं शक्तिप्रदोऽन्धोऽन्नप्रद आयुरायुष्यहेतुः शैत्यकरः स्वरश्मिभिरोषधाद्यभिवृद्धिहेतुत्वाच्चन्द्रस्य देवानामप्यन्नादिदातृत्वं ज्ञेयम् । यश्चन्द्रो नगानां वृक्षानामुक्तरीत्यैवाङ्कुरोत्पत्त्यादिहेतुत्वेनेशः । यश्च प्रजानां जनानां प्रजननः स्वदर्शनेन स्त्रीपुंसां सुरतोद्योगहेतुत्वात्सन्तानहेतुः । प्रजा स्यात्सन्ततौ जन इत्यभिधानम् । तं सोमम् । यस्य विष्णोर्मनः समामनन्ति मनसो जातं मनःश्रितं चाहुः । वेति स्वोक्तार्थे चन्द्रमा मनसो जात इत्यादिकं प्रमाणयति । ज्ञानिनः सोमं हरेर्मन इत्युक्तत्वादस्मिन्नर्थे प्रमाणान्तरं संवादयति । वेत्यनेनैवमग्रे ज्ञातव्यम् ॥ ३४ ॥

अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा ।
अन्तः समुद्रे पचतः स्वधातून् प्रसीदतां नः स महाविभूतिः ॥ ३५ ॥

तात्पर्यम् – समुद्रे उदरे ॥ ३५ ॥

सत्यधर्मीया — अन्तः समुद्र इति श्लोके समुद्रश्च न प्रसिद्ध इत्याह ॥ समुद्र उदर इति । कुक्षिः समुद्रा गिरय इत्युक्तेः । जन्यशब्देन जनकग्रहः । मुखमग्निः । यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखमित्यादेः सामानाधिकरण्यं सम्भवति । पूर्वत्रोत्तरत्र संभवत्स्थलेऽत्र च जातपदस्य सत्वात्प्रथमा पञ्चम्यर्थे । सप्तसु प्रथमेति चिरन्तनव्याकरणसूत्रात् । मुखादिन्द्रश्चाग्निश्चेत्यादि श्रुतेः । जातं वेत्तीति स तथा । जातं वेदो धनं यस्मादिति वा । उभयपक्षेऽपि विद्ट लाभे विद ज्ञान इत्याभ्यां क्रमादसुन् । श्रुतिप्रतीकग्रहणमेतदादिनात्रैवान्यत्रापि क्रियत इति न कृत्यविचारणेनायासः सम्पादनीयः । अग्निर्वाऽहमस्मीत्यब्रवीज्जातवेदा वाऽहमस्मीत्यादि श्रुतेः । क्रियाणां यज्ञादीनां काण्डं वर्गः । समूह इति यावत् । काण्डं वर्गे समीरितमिति विश्वः । तदेव तन्निष्पत्तिरेव निमित्तं यस्य तज्जन्म । यस्य क्रियाकाण्डस्य क्रियाकलापस्य निमित्तं जन्म यस्य स वा । अग्निर्वै देवानां मुखम् । तद्रसव उपजीवन्ति । अग्निनैव मुखेनेत्यादेः । समुद्रे । कुक्षेः समुद्रकारणत्वात्तथोक्तिः । कुक्षावन्तः तदन्तरस्थान् स्वधातून् स्वकीया स्वाधीना इति यावत् । तान्धातून्पाकविषयान् । धातुः स्यादश्मविवृतौ विषयेष्विति विश्वः । अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमित्यादेर्मुख्यतो भगवतोऽमुख्यतस्त्वग्नेरपि पचनं कार्यमिति चतुर्विधं यथा तथाऽन्नादीन्पचतः । अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणुस्तन्मन इत्यादेरेवं जरयतः । अनुपचयन्निति पाठः सरलः । अनुपदेनामुख्यपाचकत्वमेवाग्नेरावेदितमिति । यस्य मुखाज्जातोऽग्निः स महाविभूतिः प्रसीदताम् ॥ ३५ ॥

छलारी — अग्निर्यस्य मुखं मुखाज्जातः । मुखादिन्द्रश्चाग्निश्चेति श्रुतेः । कथम्भूतः । जातं वेत्तीति जातवेदाः । क्रियाकाण्डं कर्मप्रतिपादकवेदप्रतिपाद्यं यज्ञादिकर्म निमित्तं जन्म यस्य सः क्रियाकाण्डनिमित्तजन्मा । अग्निर्वै देवानां मुखमिति श्रुतेः । अग्निमुखेनेन्द्रादिदेवानां स्वस्वहविर्भागप्राप्त्यर्थमग्निहोत्रादौ मथनादग्नेर्जन्मनः प्रसिद्धत्वात् । पुनः कथम्भूतः । अन्तः समुद्रेऽनुचरन् । अत्र समुद्रशब्देन यज्जनकः कुक्षिर्लक्ष्यते । कुक्ष्यः समुद्रा गिरयोऽस्थिसंघा इत्युक्तेः । तथा चान्तःसमुद्रे उदरान्तः स्थित्वा स्वधातून् स्वपाकार्हान् अन्नादीननुपचन् । तथा प्रसिद्धसमुद्रेऽपि वडवानलरूपेणोदकान्यनुपचन् । सः सर्वोपकाराग्निजनकत्वलक्षणमहाविभूतिः ॥ ३५ ॥

लिङ्गेरी — जातं सर्वं वेत्तीति जातवेदाः । क्रियाकाण्डनिमित्तं यागादिसर्वकर्मसमुदायनिर्वाहाय जन्मोत्पत्तिर्यस्य स तथा । जातः । अग्निर्यस्य हरेर्मुखं मुखाज्जातो मुखाश्रितश्च । मुखादिन्द्रश्चाग्निश्च । यस्माद्यज्जायते चांगाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तदित्यादेरग्निर्मुखमित्यादि- सामानाधिकरण्योपपत्तिः । एवंविधोऽग्निरन्तः शरीरेऽन्तः समुद्रे च स्वधातून्पच्यतया स्वकीयान् जलान्नादीन् पचतो यस्य विष्णोर्मुखं द्वारम् । सोऽग्निप्रेरकत्वादिमहाविभूतिर्नः प्रसीदताम् । अग्निर्वाऽहमस्मीत्यत्र जातवेदा वाऽहमस्मीत्युपनिषद्यग्निनैव चास्य जातवेदत्वोक्तेर्नैतस्येतर- साधारण्यम् । अहं वैश्वानरो भूत्वा पचाम्यन्नं चतर्विधम् । तुशब्देन वाचोऽपि हरेर्मुखत्वं सूचयति । वाचो वह्नेर्मुखं क्षेत्रमिति स्वोक्तेः ॥ ३५ ॥

यच्चक्षुरासीत् तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ।
द्वारं च मुक्तेरमृतस्य मृत्योः प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥

तात्पर्यम् – अमृतस्येति मुक्तेरित्यस्य विशेषणम् ॥ ३६ ॥

सत्यधर्मीया — यच्चक्षुरासीदिति श्लोके मुक्तेरमृतस्येत्यनतिभिन्नार्थे पदे इत्यन्यतरवैय्यर्थ्यमित्यतो विवक्षितार्थपरां योजनां दर्शयति ॥ अमृतस्येति मुक्तेरित्यस्य विशेषणमिति । अतो न पौनरुक्त्यप्रयुक्तवैय्यर्थ्यमिति भावः । मृतं मृतिः नास्ति यत्र तदमृतमिति विग्रहः । ननु बहुव्रीहौ मुक्तिशब्दानुरोधेन तद्विशेषणस्यामृतपदस्य स्त्रीलिङ्गतायाममृताया इति वक्तव्यं कथममृतस्येतीति चेत् । सत्यम् । मुखनासिकावचनसूत्रमहाभाष्यकैयटादिदिशोपपत्तिसम्भवात् । तथा हि तत् । मुखद्वितीया वा नासिकावचनमस्य सोऽयं मुखनासिकावचनः । मुखोपसंहिता नासिका वचनमस्य सोऽयं मुखनासिकावचनः ॥ मुखद्वितीयेति मुखसहायेत्यर्थः । तत्र नासिका मुखसाहचर्यान्मुखशब्देनोच्यते । मुखं च तन्नासिका च सा वचनमस्येति । मुखोपसंहितेति । मुखस्य नासिकायाश्च यदन्तरालं स्थानान्तरमेवानुनासिकस्य दर्शयति । अत्र सामीप्यान्मुखं च तन्नासिका चेत्युभाभ्यामन्तरालं व्यपदिश्यते । पदसंस्कारपक्षे च मुखनासिकापदनिरपेक्षं वचनमित्येतत्पदं लिङ्गसर्वनामनपुंसकताश्रयेण संस्क्रियते । पश्चात्स्त्रीत्वस्य पदान्तरसम्बन्धेन प्रतीयमानत्वाद्बहिरङ्गत्वात् ङीप् प्रत्ययो न भवति। अन्यथा मुखनासिकावचनीक इति स्यादिति । शक्यं चक्षुदपहन्तुमिति । अमृतपदाद्बहिरङ्गटाबभावेऽमृतस्य मुक्तेरित्यनयोर्विशेष्यविशेषणभावो भिन्नलिङ्गयोरुपपन्नः । यद्वा । मृतं मर्त्यस्थानं तन्नेत्यमृतम् । तस्य मुक्तेः । वनपर्वणि सावित्र्युपाख्याने स च दोषः प्रयत्नेन न शक्यमतिवर्तितुमिति प्रयोगाच्चेति दिक् ॥ अथ मूलार्थः ॥ यस्य । तरणिस्तरन्त्यनेनानिष्टनिचयमिति

सूर्यः । अर्ति सृधृ इत्यादिना तरतेरनिः । द्युमणिस्तरणिर्मित्रः । तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियामित्यमरो रभसश्च । चक्षुरासीत् । तत्तारकतां व्यनक्ति ।। देवयानमिति । अर्चिरादिमार्गदेवतात्वात् । चक्षोः सूर्योऽजायत । अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यादेः । त्रयीमयस्त्रय्या वेदेन गायत्र्याद्यात्मना मय्यते गम्यते ज्ञायत इति यावत् । सैषा त्रय्येव विद्या तपतीति श्रुतेर्मुख्यवेद्य इति वा । ब्रह्मण । एष धिष्ण्यमावासस्थानम् । य एषोऽन्तरादित्ये हिरण्मयः । योऽसावादित्ये पुरुषः । ध्येयः सदा सवितृमण्डलमध्यवर्तीत्यादेः । मृत्योः संसारात् । मुक्तेः । सा च सत्यसती चेति द्विविधा । तत्र का ग्राह्येत्यत आह ।। अमृतस्येति । न विद्यते मृतं मृतिर्याचनं तदुपलक्षितदैन्यं यत्र तदमृतम् । मृतं स्याद्याचिते मृत्याविति विश्वः । तस्य सतो मोक्षस्य । द्वारं मार्गो मृत्योश्च द्वारमिति वा । स यावत्क्षिपेन्मनस्तावदादित्यं गच्छेत्येतयैव खलु लोकद्वारं विदुषां प्रपदनं निरोधो विदुषामिति श्रुतेः । चक्षुःस्थितजगच्चक्षुष्ट्वरूपमहाविभूतिः प्रसीदतां नः । अस्मदादीनामुपरि समहाविभूतिरिति पदमेकं वा । महाविभूत्या सहित इति तदर्थः ।। ३६ ।।

छलारी —— तरणिः सूर्यो यच्चक्षुर्यस्य चक्षुष आसीत् । चक्षोः सूर्योऽजायत इति श्रुतेः । कथम्भूतः । देवयानमर्चिरादिमार्गदेवता त्रय्या वेदेन मीयते ज्ञायत इति त्रयीमय एष तरणिर्ब्रह्मणो विष्णोर्धिष्ण्यमुपासनास्थानम् । य एषोत्तर आदित्ये हिरण्मयः पुरुष इति श्रुतेः । ध्येयः सदा सवितृमण्डलमध्यवर्तीति स्मृतेः । अरिष्टस्वरूपात्संसारान्मुक्तेर्द्वारम् । देवयानमार्गात्सुखदुःखात्मकत्वेन मुक्तेर्द्वैविध्यात्तद्दुःखात्मकतमोरूपमुक्तिव्यावृत्त्यर्थममृतस्येति मुक्तेर्विशेषणम् । अमृतरूपायाः सुखरूपाया मुक्तेरित्यर्थः । एतादृशमाहात्म्योपेतसूर्यजनकत्वमहाविभूतिः स नः प्रसीदताम् ।। ३६ ।।

लिङ्गेरी —— देवस्य कांत्यादिगुणवतः, उत्तरायणमुच्यमानचेतनवर्गस्य । य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छति । यानं मुक्तेर्मार्गभूतः । स यावत्क्षिपेन्मनः । मनस्तावदादित्यं गच्छत्येतयैव खलु लोकद्वारम् । विदुषां प्रपदनिरोध इत्यादेः । त्रय्यां ऋग्यजुःसामरूपायां श्रुतौ प्रतिपाद्येषु वर्णादिषु मयः प्रधानः । आकृष्णेन रजसेत्यादिवेदप्रतिपाद्यः । ब्रह्मणो नारायणाख्यस्य धिष्ण्यमधिष्ठानभूतः । य आदित्ये तिष्ठन् । यश्चासावादित्ये । ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण इत्यादेः । अमृतस्य मुच्यमानजीवजातस्य मृत्योः संसाराख्यान्मुक्तेर्मोचनस्य द्वारम् । स्वाधिष्ठितहरिध्यानादिना सन्मोक्षहेतुः । एष प्रत्यक्षप्रतीयमानमण्डलस्थस्तरत्यनेनाधिकारी संसारमिति तरणिः सूर्यः यस्य हरेश्चक्षुरासीत् । चक्षुषो जातोऽभूत् । सप्तसु प्रथमेति स्मरणात् । चक्षोः सूर्योऽजायतेति श्रुतेः । स सूर्यजनकश्चक्षुष्ट्वादिमहाविभूतिर्नः प्रसीदताम् ।। ३६ ।।

प्राणादभूद् यस्य चराचराणां प्राणः सहो वै बलमोजश्च वायुः ।
अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥ ३७ ॥

सत्यधर्मीया — सम्राजमखण्डेशम् । अनुगा अनुचरा इव । वयं यमन्वास्म अनुसृत्य वर्तामहे । इवावधारणे । यस्य प्राणाद्वायुराधिभौतिकः । प्राण आध्यात्मिकः । चराचराणां जङ्गमाजङ्गमानां सह ओजो बलं तद्धेतुः । तैः सहाभूदिति वा । महाविभूतिश्चराचरबलादिदप्राणसर्जकप्राणवतात्मकमहाविभूतिमान् । वैशब्दः आत्मत एष प्राणो जायते । तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथ । अहमेवैतत्पञ्चधाऽऽत्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति । ते च प्रीताः प्राणं स्तुवन्ति । एषोऽग्निस्तपत्येष सूर्यः । प्राणैकऋषिरत्ता विश्वस्य सत्पतिः । वयमद्यस्य दातारः पिता त्वं मातरिश्वनः । यथा सम्राडेवाधिकृतो नियुङ्क्ते एतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक् पृथगेव सन्निधत्त इत्यादिप्रसिद्धिद्योतकः । कथं यमन्वास्म यस्येत्यादि प्राग्वत् । इतरे प्राणा इति शेषः । सम्राजमनुगा इव यस्य वर्तन्ते स कथं प्राण इति वाऽन्वयः ॥३७॥

छलारी — यश्चराचराणां जन्तूनां सहः सहनशक्तिर्बलं शारीरमोजोऽवष्टंभशक्तिश्च सहनादिधर्महेतुः स्वयं तादृग्गुणोऽधिभूतं वायुनामाऽध्यात्मं प्राणनामा पञ्चप्राणमनुगा भृत्याः सम्राजमिव वयं सूर्यादयो देवा अन्वास्मानुसृत्य वर्तामहे । यथा सम्राडेवाधिकृतान्नियुंक्त एतान्ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान् पृथगेव संन्निधत्त इति श्रुतेश्च । यद्वा । उक्तगुणो वायुर्यस्य प्राणादभूत् । यन्तेति श्रुतेः । वयं ब्रह्मादयो देवाः पञ्च परमात्मानमनुगाः सम्राजमिवान्वास्मानुसृत्य वर्तामह इति योजना । स सर्वोत्तमः प्राणजनकमहाविभूतिर्नः प्रसीदताम् ॥ ३७ ॥

लिङ्गेरी — चराचराणां जंगमस्थावरचेतनानां प्राणो जीवधारणहेतुः । प्रकृष्टव्यापारहेतुश्च । सहः सहनशक्तिप्रदः । बलं शक्तिदः । ओजः परप्रहारनिरोधशक्तिप्रदः । आयुरायुष्यप्रदतया देहधारकः । ''तान्वरिष्ठप्राण उवाच । मा मोहमापद्यथ । अहमेवैतत्पञ्चधाऽऽत्मानं विभज्यैतत्प्राणमवष्टभ्य विधारयामीति । ते प्रीताः प्राणं स्तुवंत्येषोऽग्निस्तपत्येष सूर्यः प्राणैकऋषिरत्ता विश्वस्य सत्पतिः । वयमासाद्य दातारः पिता त्वं मातरिश्व न इत्यादेः । एवंभूतो मुख्यप्राणो यस्य प्राणादभूत् । यं च वयं सम्राजमिवान्वनुसृत्यानुगाः स्मः । स प्राणादिनियामकमुख्यप्राणजनकत्वादिमहाविभूतिर्नः प्रसीदताम् । मुख्यप्राणस्य प्राणादिनियामकत्वं च । यथा सम्राडेवाधिकृतान्नियुङ्क्ते एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान् पृथक् पृथगेव सन्निधत्ते । पायूपस्थेऽपानं चक्षुः श्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतितिष्ठत इत्यादि प्रसिद्धम् ॥ ३७ ॥

श्रोत्राद् दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ।
प्राणेन्द्रियात्मा स्वशरीरबन्धुः प्रसीदतां नः स महाविभूतिः ॥ ३८ ॥

सत्यधर्मीया — यस्य श्रोत्राद्दिशः । यस्य हृदो हृदयाच्च खानीन्द्रियाणि । यस्य नाभ्याः नाभेः । यद्यपि नाभेरित्यभिधाने न छन्दश्छेदस्तथाऽपि नाभ्या आसीदन्तरिक्षमिति श्रुतिस्मारणार्थमुक्तं तथेति ज्ञेयम् । नाभीशब्दो वाऽयम् । मुरजिन्नाभीसरोजेत्यादिप्राचीनप्रयोगस्य सत्वात् प्राणिप्रतीके स्यात्स्त्रियामियं नाभिरिति लिङ्गानुशासनोक्तेः कृदिकारङीषि नाभीति लोके भवतीति ज्ञेयम् । खमन्तरिक्षं चेति प्रजज्ञिरे । दिशः श्रोत्रादित्यादिश्रुतेः । तैजसाहङ्कारकार्यव्यञ्जकत्वाद्धृदयस्येन्द्रियाणां च तैजसानीन्द्रियाण्याहुरित्यादेस्तज्जत्वमिति ज्ञेयम् । अतीतपद्योक्तप्राणैः सहितानामिन्द्रियाणां चात्मा स्वामी व्याप्य तानि वर्तत इति वा । ब्रह्मणो वा एतानि कारणानि एतत्सर्वं परे आत्मनि संतिष्ठते । पृथिवी चेत्यादी कृत्यप्राणश्च विधारयितव्यं चेत्यन्तषट्प्रश्नोपनिषद्भाष्यादितो विशेषोऽवसेयः । पूर्वटिप्पणे काठकोपनिषदिति लेखकहस्तदोषत इति ज्ञेयम् । स्वशरीरबन्धुः । यस्य पृथिवी शरीरमित्युक्तेः तस्याः स्वशरीररूपिण्या बन्धुः । दिशां वत्सं वेदेत्यादेर्दिङ्नामकतद्देवता रमा । तदितराविर्भावाभिमत्युत्पादनादिमहाविभूतिः प्रसीदतामित्यन्वयः ॥ ३८ ॥

छलारी — यस्य पुरुषस्य पुरुषनामकस्य श्रोत्राद्दिशो जज्ञिरे । दिशः श्रोत्रादिति श्रुतेः । हृदो हृदयात् । खानीन्द्रियाणि प्रजज्ञिरे । नाभ्या नाभेः खमन्तरिक्षं जज्ञिरे । नाभ्या आसीदन्तरिक्षमिति श्रुतेः । स प्रसीदतामित्यन्वयः । कथम्भूतः । प्राणान् प्राणापानादीन् इन्द्रियाणि च व्याप्य तिष्ठतीति । प्राणेन्द्रियात्मा स्वशरीरबन्धुः स्वशरीरभूतायाः पृथिव्या बन्धुः । यस्य पृथिवी शरीरमिति श्रुतेः । दिङ्नामदेवतादिसर्जनप्रतीतमहाविभूतिः ॥ ३८ ॥

लिङ्गेरी — यस्य श्रोत्राद्दिशो दिगभिमानिचन्द्रादयो यस्य हृदयाच्च खानीन्द्रियाणि प्रजज्ञिरे । यस्य पुरुषस्य नाभेः खमन्तरिक्षं जज्ञे । दिशः श्रोत्रात्, नाभ्या आसीदन्तरिक्षमित्यादेः । यश्च प्राणानां मुख्यप्राणानामिन्द्रियाणां श्रोत्रादीनां च नियामकतया तत्स्थितः स्वामी च । यः प्राणे तिष्ठन् यः प्राणमन्तरो यमयति । प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमित्यादेः तत्तच्छक्तिप्रदतया तत्र तत्र स्थित्युक्तेः । स्वशरीरस्यात्मशरीररूपस्य जीवस्य बन्धुः सखा । यस्यात्मा शरीरम् । द्वासुपर्णा सयुजा सखायेत्यादिश्रुतेः । स दिग्देवतादिजननादिमहाविभूतिर्हरिर्नः प्रसीदताम् ॥ ३८ ॥

बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशोऽशरणाद् विरिञ्चः ।
खेभ्यश्च छन्दांस्यृषयस्तु मेढ्रतः प्रसीदतां नः स महाविभूतिः ॥ ३९ ॥

सत्यधर्मीया — एवं धर्मानित्यादेर्गुणानां तदभेदाद्गुणेभ्योऽप्युत्पत्तिमाह ॥ बलादिति । त्रिदशास्तृतीया दशा नित्यं यौवनमेव येषां ते तथा । प्रसादात् । प्रसादो नामेच्छाविशेषो गुणान्तरम् वा । न नः काचित्क्षतिः इति सुधोक्तेः । अनुग्रहः । प्रसादोऽनुग्रह इति विश्वाद्गुणान्तरपदेन ग्राह्यस्तस्मात् । देवास्त्रिर्दश येषाम् । सङ्ख्यायाव्ययेति बहुव्रीहिः । बहुव्रीहौ सङ्ख्येय इति डच् । जन्मसत्ताविनाशाख्यास्तिस्रो दशा येषामिति वेति व्याख्या उपेक्ष्या । माहात्म्यातिशयालाभात् । केचित्तु राजदेवादयस्त्रींस्तापान्दंशन्ति । पचाद्यच् । नलोपः पृषोदरादित्वादिति विगृह्णन्ति । तथात्वे कर्मण्यणप्रसङ्गेन त्रिदांश इत्यापत्तेः । दंशन्तीति दशास्त्रयाणां तापानां दशा इति विग्रहे तु ओमिति वदामः । मन्योः क्षमारूपात् । क्रोधः क्षमात्मकस्तस्य चिदानन्दात्मकस्तथेत्यादेः । अशरणात् स्वव्यतिरिक्तं शरणमधिष्ठानं नास्ति यस्य स तथा तस्मात् । किंस्विदासीदधिष्ठानमारंभण-मित्यादिश्रुतिव्याख्याभाष्ये कतमस्वित्कथाऽऽसीदिति ह्याक्षेपः । अधिष्ठानाद्यनुक्तेरित्युक्तेः । स्वे महम्नीति श्रुतेः स्वाधाराद्विरिञ्चो ब्रह्मा । धिषणादिति पाठे बुद्धेरित्यर्थः । लिङ्गमात्रं चातन्त्रम् । लिङ्गमशिष्यं लोकाश्रयत्वादिति महाभाष्योक्तेः । अथवा । आगमशासनस्यानित्यत्वाच्छे चेति न तुक् । खेभ्यः सप्तेभ्यो ज्ञानेन्द्रियेभ्यः सप्त छन्दांसि । धिषणाया आतत्यागच्छतीति स तथेति प्रथमान्तं सद्विरिञ्चपदेनान्वेति । ब्रह्म च तथा । तदध्येतारो ऋषयश्च मरीच्याद्याः । मेढ्रतः शिश्नात् । तुस्तु तज्जन्यदक्षवाचकपदाध्याहाररूपविशेषसूचक इति ज्ञेयम् । कस्तस्य मेढ्रमित्युक्तेर्विरिञ्च इति परोक्षत उक्ती रूपान्तराभिप्राया । क इति निरङ्कः पाठः ॥ ३९ ॥

छलारी — यस्य हरेर्बलादिभ्य इन्द्रादयो जाताः । स विरिञ्चादिदेवजनकत्वमहाविभूतिः प्रसीदताम् । मन्योः क्रोधात् । नायं क्रोधो दोषरूपः । किन्तु क्षमादिरूपत्वाद्गुणरूप एव । क्रोधः क्षमात्मकस्तस्य चिदानन्दात्मकस्तथेत्युक्तेः । धिषणाद्बुद्धेः । खेभ्यो गायत्र्यादि सप्तच्छन्दांसि ऋषयो मरीच्यादिसप्तर्षयश्च जज्ञिरे । मेढ्रतः शिश्नात् कः दक्षप्रजापतिः ॥ ३९ ॥

लिङ्गेरी — यस्य बलान्महेन्द्रः शचीपतिः, प्रसादात्त्रिदशा देवा, मन्योः कोपसदृशाच्छत्रु-निग्रहेच्छायाः गिरिशो रुद्रो, धिषणात् बुद्धेर्विरिंचश्चतुर्मुखः, खेभ्य इन्द्रियेभ्यश्च सप्तच्छन्दासि । ऋषयः कर्दमादयो मेढ्रतो जाताः । स महेन्द्रादिजनकत्वविभूतिर्नः प्रसीदताम् ॥ ३९ ॥

श्रीर्वक्षसः पितरश्छायया॰सन् धर्मः स्तनादितरः पृष्ठतो॰भूत् ।
द्यौर्यस्य शीर्ष्णो॰प्सरसो विहारात् प्रसीदतां नः स महाविभूतिः ॥ ४० ॥

सत्यधर्मीया — श्रीश्च सम्पच्छोभा वा । पितरः छायया । तदर्थमेव सृष्टया । इतरो॰धर्मः । द्यौः शीर्ष्णः शिरसः । विहारात्क्रीडायाः । युक्तोपयुक्तत्वेन साक्षात्परम्परया सहस्रशीर्षा पुरुष इत्यादि पुरुषसूक्तं मूलमनुसन्धेयं पूर्वत्रात्रोत्तरत्रेति ज्ञेयम् ॥ ४० ॥

छलारी — यस्य पुरुषस्य वक्षसः श्र्यादय आसन् स इत्यन्वयः । इतरो॰धर्मो । द्यैः स्वर्गलोकः ॥ ४० ॥

लिङ्गेरी — यस्य वक्षसः श्रीरासीत् । छायया पितर आसन् । स्तनाद्धर्मस्तदभिमानी यमः । स्तनादितरो॰धर्मस्तदभिमानी निर्ऋतिः पृष्ठतो॰भूत् । शीर्ष्णः शिरसो द्यौरभूत् । विहारात्क्रीडाविशेषादप्सरसो॰भूवन् । सः लक्ष्म्यादिजननविभूतिर्नः प्रसीदताम् ॥ ४० ॥

विप्रो मुखाद् ब्रह्म च यस्य गुह्यं राजन्य आसीद् भुजयोर्बलं च ।
ऊर्वोर्विशो॰ङ्घ्रेरभवंश्च शूद्राः प्रसीदतां नः स महाविभूतिः ॥ ४१ ॥

सत्यधर्मीया — यस्य मुखाद्विप्रा ब्राह्मणाः । गुह्यं रहस्यम् । ब्रह्म वेदः । भुजयोः सकाशाद्राजन्यः क्षत्रियो बलं च । ब्रह्मबलयोर्द्विजराजयोग्यत्वात् । एवमुत्तरत्रापि ज्ञेयम् । ऊर्वोरुत्सङ्गाभ्यां विशः । बहुवचनमाद्यर्थे । वैश्यस्तद्व्यापाराः कृष्यादय इत्यर्थः । एवमङ्घ्रेः शूद्रा इत्यपि । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्र इति श्रुतौ श्रुतैकवचनाभिप्रायकथनमिति मन्तव्यम् । ऊर्ध्वोविडोजो॰ङ्घ्रिरवेदशूद्राविति पाठे । ओजः कृष्यादिकौशल्यम् । अवेदं वेदाध्ययनरहितम् परिचर्यात्मकं कर्म । शूद्रस्यापि स्वभावजमित्युक्तेस्तत्कर्मापि ॥ ४१ ॥

छलारी — यस्य मुखाद्यवयवेभ्यो ब्राह्मणादयो वर्णास्तत्कर्माण्यभवन् स इत्यन्वयः । गुह्यं रहस्यं, ब्रह्म वेदश्च ब्राह्मणवृत्तिर्भुजयोः सकाशात् बलं च क्षत्रियवृत्तिरूर्वोः सकाशात् विशो वैश्यास्तेषां वृत्तिश्च क्रियादि । अङ्घ्रेरङ्घ्रिभ्यां शूद्रास्तद्वृत्तिस्त्रिवर्णसेवा च ॥ ४१ ॥

लिङ्गेरी — यस्य मुखाद्विप्रा ब्राह्मणाः । गुह्यं रहस्यं ब्रह्म च वेदराशिरासीत् । ब्राह्मणो॰स्य मुखमासीत् । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेत्यादेः । भुजयो राजन्यः क्षत्रियो बलं चासीत् । बाहूराजन्यः कृत इत्यादेः । ऊर्वोर्विशो वैश्याः । अङ्घ्रेः पादाच्छूद्रा आसन् । ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो॰जायतेत्यादेः । स ब्राह्मणादिजननमहाविभूतिर्नः प्रसीदताम् ॥ ४१ ॥

लोभोऽधरात् प्रीतिरुपर्यभूद् द्युतिर्नस्तः पशव्यं स्पर्शेन कामः ।
भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥

सत्यधर्मीया — लोभः अधरात् । अधरादित्यावर्तनीयम् । अधरादधो वर्तिनोऽधरादोष्ठादिति । अधरो दन्तवसन इति विश्वः । पुनश्चोपरितनात्तस्यान्वयः । उपरितनादधरोष्ठादिति । द्युतिः कान्तिः । नस्तो नासिकायाः । पशव्यं पशुभ्यो हितं तृणाद्यपि । स्पर्शेन कामः । स्त्र्यभिलाषरूपः । भ्रुवोर्यमः । पक्ष्मभ्यां भवतीति स तथा । कालो मृत्युः स महाविभूतिः ॥ ४२ ॥

छलारी — अधरादोष्ठादुपर्योत्तरोष्ठात्प्रीतिर्द्युतिः कान्तिश्च । नस्तो नासिकायाः पशव्यं पशुजीवनं तृणादि आदि शब्देनौषधानि । नासाऽश्विनावभवतामित्यर्थः । स्पर्शेन गुणेन कामः स्त्रीविषयेच्छा । कालो मृत्युः पक्ष्मभवश्चक्षुःपद्मजन्यः । यस्याधरादिभ्यो लोभादिकमुत्पन्नं स इत्यन्वयः ॥ ४२ ॥

लिङ्गेरी — यस्याधरोष्ठाल्लोभाभिमानी जातः । उपर्युत्तरोष्ठात्प्रीत्यभिमानी अभूज्जाता द्युतिः कान्तिश्च जाता । नस्तो नासिकायाः पशव्यं पशुहितं तृणादि । स्पर्शेन गुणेन कामः स्त्र्यादिविषयेच्छा । कालो मृत्युः पक्ष्मभवः । स लोभादिजननमहाविभूतिर्नः प्रसीदताम् ॥ ४२ ॥

द्रव्यं वयः कर्म गुणाश्च शेषं यद्योगमायापहिताः पतन्ति ।
यद् दुर्विभाव्यं प्रबुधावबोधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥

सत्यधर्मीया — सृष्टसत्ताऽप्येतदायत्तेत्याह ॥ द्रव्यमिति । द्रव्यं भूतपञ्चकम् । वय आयुष्कालः । कर्म पुण्यपापलक्षणम् । गुणा भक्त्याद्याः । शेषम् । मान्तमव्ययम् । जसो लोपः । शिष्टाः स्वभावादयः । यद्योगमायापहिताः यस्य योगमाया स्वरूपभूतेच्छाविशेषस्तयाऽपहिता अहिततया कृताः । उपेक्षिता इति यावत् । पतन्ति अकार्यकारिणः प्रच्युता भवन्ति । स वा एष आत्मा नेतीत्यादेः । यच्च दुर्विभाव्यमिदमित्थमिति भावयितुमशक्यम् सौमुख्याभावे । तद्भावे च प्रबुधावबोधम् । प्रबुधानां ज्ञानयोग्यानामवबोधो ज्ञानं यस्मात्तम् । प्रगतो बुधोऽवगमो ज्ञानं येषां ते ज्ञानयोग्याश्चेति वा । अज्ञानां ज्ञानदो विष्णुरित्यादेः । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपक्षयेत्यादेः । प्रबुध्यत इति प्रबुत् वेदस्तेनावबोध इति । अवबोधमिति वा छेदः । आ ईषदवबोधो यस्य तमिति वा । न विद्यतेऽवबोधो यस्येति वा विग्रहः । वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरित्युक्तेः । विशेषस्त्वत्र सुधाऽभिधानं षष्ठे स्पष्टीकृतोऽस्माभि-रवलोकनीयः ॥ ४३ ॥

छलारी — एवं स्थूलरूपमुपवर्ण्येदानीं सूक्ष्मरूपमुपवर्णयन्प्रार्थयते ।। द्रव्यमिति । द्रव्यं भूतपञ्चकं वय आयुर्लक्षणं कर्मादृष्टं गुणा भक्त्यादयः । शब्दादयो वा । शेषं स्वभावजीवकालादि-कमेते यस्य हरेर्योगमायया स्वरूपभूतेच्छयाऽपहिता उपेक्षिताः पतन्ति प्रच्युतस्वरूपा भवन्ति । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षयेति वचनात् । किञ्चिद्रूपं दुर्विभाव्यमेवंविधमिति चिन्तयितुमशक्यम् । स एष आत्मा नेति नेतीति श्रुतेः । प्रबुधावबोधं प्रबुधानां तत्त्वज्ञानयोग्यानामवबोधो ज्ञानं यस्मात्तथा । अनेन हर्यनुग्रेण तद्विषयं ज्ञानं सुखमित्युक्तं भवति । अज्ञानां ज्ञानदो विष्णुरिति श्रुतेः । यमेवैष वृणुत इति श्रुतेश्च । द्रव्यादिसत्ताप्रदत्वेन ब्रह्माद्यचिन्त्यमहिमत्वेन ज्ञानदातृत्वेन च पूर्णैश्वर्यः सः नोऽस्माकं प्रसीदतामिति ।। ४३ ।।

लिङ्गेरी — द्रव्यमाकाशादिरूपं, वयो बाल्यतारुण्यादि, कर्म प्रवृत्तिनिवृत्तिरूपं धर्माधर्मसाधनं च गुणाः सत्त्वादयः शुक्लादयश्च, शेषं प्रकृत्यादि यस्य हरेः योगमायया तत्कार्योपायभूतस्वेच्छया अपहिता उपहिताश्च नश्यन्तु न नश्यंत्विति विषयीकृताः पतन्ति नश्यन्ति न पतन्ति चेति ग्राह्यम् । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षयेत्यादेः । द्रव्यं पृथिव्यादिनवकम् । वयस्तरणिपरस्पंदज्ञाप्यं परत्वापरत्वादिरूपम् । कर्मोत्क्षेपणादिपञ्चकम् । गुणा रूपरसादिचतुर्विंशतिः, शेषमवशिष्टं समवायादिरूपम् । गौतमकणादादीनां बुद्धौ यद्योगमाय-याऽपहिता नरकादिहेतुतयाऽनिष्टा निरर्थकाश्च पतन्ति वक्तव्यतया पतन्ति । आन्वीक्षकीं तर्कविद्यामनुरक्तो निरर्थक इति सृगालोक्तेर्विषकण्ठकणभक्षसंकरोक्तिदशबलपञ्चशिखाऽक्षपादवादान् । महदपि सुविचार्य लोकतन्त्रं भगवदुपास्तिमृतेन सिद्धिरस्तीत्यादेः । नन्वेवं गौतमादयो भगवत्स्वरूपमविज्ञाय किं विपरीतमाचख्युरित्यत आह ।। यदुर्विभाव्यमिति । गौतमाद्ययोग्य-जनोक्तप्रकारेणाष्टगुणत्वादिना ज्ञातुमशक्यम् । नन्वेवं हरेः स्वरूपत एव दुर्विभाव्यत्वे कथंकारं मुक्तियोग्यानां तज्ज्ञानं स्यादित्यत उक्तम् ।। प्रबुधावबोधमिति । प्रबुधानां प्रकृष्टज्ञानयोग्यानामवबोध सम्यग्ज्ञानं यस्मात्तथोक्तम् । अज्ञानां ज्ञानदो विष्णुरित्यादेः । महाविभूतिरेवमाकाशादि-सत्त्वप्रदत्वायोग्यमोहत्वाज्ञेयत्वज्ञानयोग्यदेयत्वादिलक्षणापरिच्छिन्नैश्वर्यः स हरिर्नः प्रसीदताम् ।।४३।।

नमोऽस्तु तस्मा उपशान्तशक्तये स्वाराज्यलाभपरिपूरितात्मने ।
गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नमः स्वभूतये ।। ४४ ।।

सत्यधर्मीया — न शक्ता वयं वक्तुं वितत्येति नम इति प्रह्वत्वमेवार्हणं हरेरिति नियमं स्फोरयितुमभ्यस्यन्वक्ति ।। नमोऽस्त्विति । उपशान्ताः अकार्यकाले व्यक्ताः शक्तयो हि

सर्जनादिसामर्थ्यानि यस्य । सर्वोपेता च तद्दर्शनादित्यादेः । शान्ताः शस्य सुखस्यान्तोऽवधिर्यासां ताः शक्तयो भार्या यस्येति वा । उं पातीत्युपश्वासौ शस्यान्तो निर्णयो यया सा शक्तिर्यस्य चेति । तस्मै । स्वाराज्यलाभपरिपूरितात्मने । स्वाराज्यशब्दोऽयमखण्डः । स्वयंप्रकाशमानो लाभ आनन्दादेः तेन परिपूरित आत्मा देहो यस्य तस्मै । स लाभोऽस्मज्ज्ञानविषयोऽल्पीयानिति द्योतयितुं लघुः पः सन् न करोति गुरुं भमिति वा भो न दैर्घ्यादिकं भेज इति वा मन्तव्यम् । प्रतिपूरितात्मन इति पाठस्तु वृत्तविच्छित्तिभीत्या कल्पित इति ज्ञेयम् । अनेकेषु मूलकोशेष्वदर्शनात् । स्वित्यानन्दः समुद्दिष्ट इत्युक्तेः । सुनाऽऽनन्देन राज्यः प्रकाश्यः परिपूरितो व्याप्त आत्मा देहो यस्य तस्मै वा । मायया मुख्यया स्वेच्छया मायया प्रकृत्या च रचितेषु गुणेषु सत्त्वादिषु वृत्तिभिः तद्विषय प्रवृत्तिभिर्न सज्जमानाय । तत्र सन्नपि न तद्बाधितस्वप्रवृत्तिरित्यर्थः । या मा रमा चितेषु । सदा सम्बन्धेषु गुणेषु निमित्तभूतेषु सत्सु यम् । वृत्तिभिः अनुवृत्तिभिः । उपसर्गाश्च धातुलीनार्थद्योतका इति वृत्तिरनुवृत्तिः सेवा प्रकारभेदाद्भेदः । आर । सर्वान्विहाय प्राप । मा स्वा यद्यपि तथाऽपि तस्यां न सज्जमानायानासक्ताय । सज्जमानाय न इवेति । स्वभूतये स्वकमङ्गलरूपाय । स्वा भूतिर्महालक्ष्मीर्यस्य तस्मै । दक्षिणाभिः साकमित्युक्तेः । बहुवारं महाविभूतिस्वभूतिरित्युक्तिः तथोपासनं महाफलदमिति भावेन । नभस्वदूतय इत्यपपाठः । क्रमातिक्रमात् । नभस्वान्वायुस्तस्योतिर्लीलेव लीला यस्येति व्याकरणमपि वैय्याकरणैरूतिजूतीति निपातित ऊतिशब्दोऽभिप्रायार्थतया विवृत इति नेदमर्थता तच्छशब्दस्येति कथं नोपेक्षणीयं स्यात् ॥ ४४ ॥

छलारी — इदानीं भगवत्प्रसादसाधनं नमस्कार एवेत्यादराद्भगवन्तं नमतीत्याह ॥ नमोऽस्त्विति। तस्मै पूर्वोक्तमहिम्ने हरये नमो नमोऽस्त्वित्यन्वयः । कथम्भूताय । उपशान्ता अव्यक्ताः शक्तयो यस्य तस्मै । उपोऽधिके समीपे चेति वचनात् । उप सर्वाधिका अघटितघटकाः शान्ताः सुखस्वरूपशक्तयो यस्य तस्मा इति वा । पराऽस्य शक्तिर्विविधैव श्रूयते इति श्रुतेः । स्वाराज्यलाभप्रतिपूरितात्मने स्वाराज्येन स्वयं प्रकाशमानेन लाभेनानन्देन प्रतिपूरितः पूर्ण आत्मा स्वरूपं यस्य तस्मै । सर्वदाऽऽविर्भूतानन्दस्वरूपायेत्यर्थः । मायया स्वाधीनप्रकृत्या रचितेषु निर्मितेषु गुणेषु देहेषु विषयेषु वा । प्रवर्तकत्वेन विद्यमानाया अपि तद्योग्याभिर्वृत्तिभिर्दुःखलक्षणाभिर्मनोवृत्तिभिर्न सज्जमानायालिप्ताय । निरनिष्टो निरवद्य इति श्रुतेः । दुःखानुभूतिरहितायेत्यर्थः । स्वभूतये स्वरूपभूताणिमाद्यष्टैश्वर्याय ॥ ४४ ॥

लिङ्गेरी —— उपशान्ता अधिकानन्दपूर्णाः शक्तयः शक्तिप्रतिष्ठादिरूपा यस्य तस्मै । स्वाराज्यलाभेन स्वरूपभूतानन्दलाभेन परिपूरित आपूर्ण आत्मा स्वरूपं यस्य तस्मै । मायया स्वेच्छया जडप्रकृत्या च रचितेषु निर्मितेषु सत्त्वादिषु नियामकतया स्थितोऽपि यस्तद्वृत्तिभिर्दुःखादिकार्यैर्न सज्जमानो निर्लिप्तस्तस्मै । स्वभूतये स्वरूपभूतानन्याधीनसर्वेश्वरत्वादिरूपसंपदे तुभ्यं नमोऽस्त्वित्यादराद्विरुक्तिः । उपोऽधिक इति सूत्रम् । शर्मशान्तसुखानि चेत्यमरः । भूतिर्भस्मनि संपदीति च । असंगो ह्ययं पुरुष इत्यादिश्रुतिः ॥ ४४ ॥

स त्वं नो दर्शयात्मानमस्मत्करणगोचरः ।
प्रयतानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ॥ ४५ ॥

सत्यधर्मीया —— प्रसादसाधनीयं शंसति हंसवाहः ॥ स इति । सस्मितं ते मुखाम्बुजं दिदृक्षूणां दर्शनेच्छावतां नः । न शठा वयमित्याह ॥ प्रपन्नानामिति । शरणागतानाम् । य इत्थं प्रसादितः स त्वम् । अस्मत्करणगोचर इन्द्रियविषयः सन् आत्मानं स्वं दर्शय नः । मद्रूपं कदापि न प्रत्यक्षविषयं कृतमित्यतो नेत्याह ॥ करणगा इति ॥ पूर्वं प्रत्यक्षविषयः सन् त्वं यस्मादचरः तस्मात् आत्मानं दर्शयेति । सस्मितमिति प्रसन्नताहेतुकथनम् । उत्तरत्र भाविभाषणादेर्मुखसाध्यत्वात्तद्दिदृक्षूणामित्युक्तिः । सर्वाभिलषितसम्पत्सम्पत्त्यै चात्मानमित्युक्तिः । वयं दुर्बलाः इतः परीक्षार्थं सत्त्वं तव बलं नो दर्शय । नायं परीक्षावसर इति वा भावः ॥ ४५ ॥

छलारी —— प्रसीदतामित्युक्तम् । इदानीं तत्प्रसादफलमाशास्त इत्याह ॥ स त्वमिति । सस्मितं प्रसन्नं ते तव मुखांबुजं दिदृक्षूणां द्रष्टुमिच्छतां प्रपन्नानां त्वच्छरणं प्राप्तानां नोऽस्माकं त्वन्मुखं प्रसन्नत्वेन यथाऽस्मत्करणगोचरमस्मच्चक्षुर्विषयो यथा भवेत्तथा सः त्वमात्मानं स्वरूपं दर्शय । प्रसन्नमुखः सन् प्रसन्नो भवेत्यर्थः ॥ ४५ ॥

लिङ्गेरी —— हे हरे! सः पूर्वोक्तमहिमोपेतस्त्वमस्माकं करणानां चक्षुषां गोचरोऽयं भवत्विति त्वां प्रपन्नानां शरणागतानां दिदृक्षूणां साक्षात्कर्तुमिच्छावतां नोऽस्माकं तवात्मानं देहं स्मितेन हासेन सहितं ते मुखांबुजं च नोऽस्माकं दर्शय ॥ ४५ ॥

तैस्तैः स्वेच्छाकृतै रूपैः काले काले स्वयं विभो ।
कर्म दुर्विषहं यन्नो भगवान् वै करोति हि ॥ ४६ ॥

सत्यधर्मीया — विना नावतारं सिद्ध्यत्यस्मत्कार्यमिति सूचयितुं प्राक् तथाऽनुष्ठानं स्मारयति ॥ तैस्तैरिति । काले काले । नोऽस्माकं प्रत्यापत्कालम् । हे विभो । स्वेच्छाकृतैरिच्छयैवोपात्तैस्तैस्तै रूपै रामकृष्णादिरूपैः नोऽस्मदर्थम् । दुर्विषहमितरासह्यं कर्म रावणहननादिकम् । भगवान्करोति । वै हीति बह्वनुभवसिद्धतामिदमर्थस्य द्योतयतः । यद्यस्मातत्ते मुखाम्बुजम् । दर्शय । स्वेच्छाकृतैः स्वकीयाद्यस्मदिच्छाद्यनुरूपरूपैरिति वा । तैरागतैः तैश्चोरैरसुरैः । तकारश्चागते चोर इत्येकाक्षर-निघण्टुर्विश्वोऽप्येवम् । स्वेच्छाकृतैर्मायिकै रूपैः । अकाले काले नाशे प्रसक्ते । दुर्विषहं तदसह्यं नोऽस्मदर्थं स्वेच्छाकृतै रूपैर्भवान् भगवान्करोति । यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहमित्यादेरिति वा ॥ ४६ ॥

छलारी — भक्तानुकंपामन्तरेण तवान्यप्रयोजनं नास्तीत्याशयेनाह ॥ तैस्तैरिति । नोऽस्माकं दुर्विषहमशक्यं यत्कर्म धर्मसंरक्षणं तत्कर्म भगवान्स्वयमेव करोति हि । कथम् । काले काले तत्तत्काले विशेषे स्वेच्छया भक्तानुजिघृक्षया कृतैः प्रादुर्भूतैस्तै रूपै रामकृष्णादिरूपैः । यद्वा हे विभो । यद्यदा दुर्विषहं सोढुमशक्यं कर्म दुःखरूपमसुरादेः सकाशादिति शेषः । तदा भगवान्स्वयमसुरादीनां दुर्विषहं कर्म पराक्रमरूपं करोति । शेषं पूर्ववत् । धर्मसंस्थापनार्थाय दैत्यानां निधनाय चेत्यादि स्मृतिप्रसिद्धिं हिशब्देनाह । अतोऽस्मत्प्रयोजनाय प्रीत्या प्रत्यक्षो भवेति भावः ॥ ४६ ॥

लिङ्गेरी — हे विभो अघटितघटनासमर्थ हरे । भगवांस्त्वं नोऽस्माकं दुर्विषहं मनसाऽपि धर्तुमशक्यं कर्म असुरहननसुरसंरक्षणादिरूपम् । काले काले असुरैर्धर्माद्युच्छेदकाले स्वेच्छाकृतैस्तै-स्तैर्मत्स्यादिरूपैः करोति हि । वा इत्यनेन

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् । परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय संभवामि युगे युगे । इत्यादिप्रमाणं सूचयति ॥ ४६ ॥

क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ।
देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ४७ ॥

सत्यधर्मीया — अस्मदनुष्ठितानि कर्माणि त्वत्समर्पितानीति न निष्फलानि भाव्यानीव सकामानीति विज्ञापयति ॥ क्लेशेति । क्लेशो भूरिः । भूरिः प्राज्यसुवर्णयोरिति विश्वः । येषु तानि च ।

अल्पः सारः फलोपलम्भकता बलं येषां तानि च तानि तानि च । विषयार्तानां हीनदेहधारिणाम् । कर्माणि विफलानि स्वर्गाद्युक्तफलविकलानि । किञ्च विरुद्धफलकानि च भवन्ति । हर्यर्पितमेकं कर्म तथा विफलं नैव भवति । एकवचनेन बहुकर्माणि त्वय्यर्पितानि तानि न जातुचित् विफलानि भवेयुरिति दर्शयिः स्वमस्मान्निष्कर्ष इति ध्वनयतीत्याशयः ।। ४७ ।।

छलारी — किञ्चित्त्वद्भक्तैरस्माभिस्त्वत्प्रीत्यर्थं कृतानि त्वयि समर्पितानि पूर्वपुण्यानि सकामानामिव विफलानि भवितुं नार्हन्ति । अतश्च प्रत्यक्षो भवेत्याशयेनाह ।। क्लेशभूरीति । विषयार्तानां सकामानां देहिनां कर्माणि त्वय्यनर्पितत्वाद्यथा विफलानि विरुद्धफलान्यभीष्टफलरहितानि च स्युः तथा त्वय्यर्पितं कर्म न विफलं स्यादित्यन्वयः । कथम्भूतानि क्लेशभूरीणि । बहुक्लेशेन कृतान्यल्पसाराण्यैहिकाल्पफलानि च ।। ४७ ।।

लिङ्गेरी — हे विभो । विषयार्तानां शब्दादिविषयाकांक्षया दुःखितानां तत्तद्विषयप्राप्त्यर्थं क्रियमाणकर्माणि क्लेशभूर्यल्पसाराणि बहुक्लेशहेतुदेहायासद्रव्यनाशादियुक्तानि स्वल्पसुखप्रदानि च कदाचिद्भवन्ति कदाचिद्विफलानि च व्यर्थानि विरुद्धफलानि च भवन्ति यथा तथा त्वय्यर्पितं कर्म न भवति ।। ४७ ।।

नाधमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ।
कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ।। ४८ ।।

सत्यधर्मीया — साङ्गं चेत्कर्म शर्म यच्छेद्धर्यर्पितं व्यङ्गं चेद्विफलं स्यादित्यतो मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वं करोति निच्छिद्रमनुसङ्कीर्तनं तवेत्यादेस्तदपि प्रापयत्यर्पितं पुरुषार्थमित्याह ।। नाधम इति । नायं कल्पशब्दः किन्तु तदाभासार्थकः कल्पपूप्रत्ययः । ईषदसमाप्तौ कल्पप् । परिगणनाभावात्प्रातःकल्पमिति तत्त्वसुबोधिन्युक्तेः देवकल्प इत्यादिवत् कर्मकल्प इति भवति । कर्मकल्पो व्यङ्गत्वात्तद्वदवभासमानः अत एवाधमो यः सोऽपीश्वरार्पितश्चेत्पुरुषस्य विफलाय फलाभावाय विरुद्धफलाय । न कल्पते नैव भवति । कुत इत्यत आह । हि यतो यदुद्देशेन कर्म क्रियते स आत्माऽऽदानादिकर्ता स्वामी दयितोऽनिमित्तबन्धुर्हितो नित्यवृद्धश्चेति ।। तस्मादिति । नैरपेक्ष्येणोपेक्ष्य न्यूनतां दयां तनोतीति भावः । नाधर्म इति पाठे तत्तुल्योऽपीत्यर्थः । अल्पमात्रकृतो धर्मो भवेज्ज्ञानवतो महानित्यादेः । व्यङ्गकर्मकार्यपि सह्योऽकिञ्चित्कर्ताऽपि सहनीयः आत्माऽधिकारी यस्य स इति वा ।। ४८ ।।

छलारी — तत्र वैकल्यमुपपादयति ॥ नाधम इति । पुरुषस्य कर्मकल्पः कर्माभासोऽङ्गसाकल्येन रहितोऽधमोऽप्यल्पोऽपीश्वरार्पितश्चेत् विफलाय न कल्पते न भवति । किन्तु फलवानेव स्यात् । कुतः । यत्प्रियायैव कर्म कृत्वा तस्मिन्समर्पयति स आत्मा परमात्मा हितः प्रेष्ठकारी दयितोऽनिमित्तबन्धुर्हि यस्मात्तस्मादित्यर्थः । नाधर्म इति पाठे कर्माभासत्वादधर्मतुल्योऽपीत्यर्थो ज्ञेयः । अल्पमात्रकृतो धर्मो भवेत्ज्ञानवतो महान् । महानपि कृतोऽधर्मो ह्ययोग्यान्निष्फलो भवेदित्युक्तेः ॥ ४८ ॥

लिङ्गेरी — अधिकारिकृतोऽङ्गवैकल्येन कर्मकल्पः कर्माभासोऽत एवाधमोऽपि यदीश्वरार्पितः कृष्णेऽर्पितस्तर्हि विफलाय फलाभावाय न कल्पते समर्थो न भवति । किन्तु फलायैव कल्पते । हि यस्मादस्य पुरुषस्याधिकारिणः स आत्मा परमात्मा दयितः प्रिय एव । अस्य हरेरपि पुरुषोऽधिकारी हि यस्माद्धितस्तस्मात्पुरुषार्थायैव कर्मकल्पो भवतीति । अहं ज्ञानिप्रियो नित्यं ज्ञानिनोऽपि मम प्रियाः । तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः । क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नम इत्यादेः । नाधर्मकर्मकल्पोऽपीति पाठान्तरम् । तत्राविवेकिनां कर्मकल्पः कर्माभासतया प्रतीतोऽपि यदीश्वरार्पितस्तर्हि सोऽधर्मो न भवति । धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युतेत्यादेः ॥ ४८ ॥

यथा हि स्कन्धशाखानां तरोर्मूलावसेचनम् ।
एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥

सत्यधर्मीया — यदि कर्म सर्वं सर्वेश्वरार्पितं सफलं तर्हि का गतिर्वायव्यं श्वेतमालभेतेत्यादि-वचसामित्यतः सर्वशब्दवाच्यहरिप्रसत्त्या तदङ्गदेवताप्रसत्तिर्भविष्यतीत्येतत्सनिदर्शनं दर्शयति ॥ यथा हीति । तरोर्वृक्षस्य । मूलावसेचनम् । मूल उदकसेकः । स्कन्धाश्च महान्तः शाखाश्चोपस्कन्धास्ते-षाम् । तृप्तिजनकमिति शेषः । एवं तथा विष्णोर्व्याप्तस्य हरेराराधनं सर्वेषां तदङ्गाश्रितानां वाय्वादीनां देवानामात्मनः कर्तुः स्वस्य । आत्मनो विष्णोरिति सामानाधिकरण्यं वा । इति सर्वेषां तृप्तिजनकमिति न तद्वचननैरर्थक्यमिति भावः । विष्णुर्विटपी विटपाश्च देवा इति तत्तृप्तावेतत्तृप्तिस्ततः स्वस्यानन्दाविर्भाव इति भावः ॥ ४९ ॥

छलारी — ननु भगवदर्पितकर्मणा भगवत्प्रीतिरेव स्यान्न देवानाम् । तत्प्रीत्यभावे स्वस्य फलं न स्यादित्यत आह ॥ यथा हीति । यथा तरोर्मूले जलावसेचनं स्कन्धानां शाखानामुपशाखानां च तृप्तिम् । जनयतीति शेषः । परं विष्णोराराधनं सर्वेषामिन्द्रादिदेवानां तृप्तिकरं भवति । आत्मनः स्वस्यापि स्वरूपानन्दानुभवकरं भवति । अनेनेन्द्रादीनां नारायणावयवत्वेन शाखास्थानीयत्वं दर्शितं भवति ॥ ४९ ॥

लिङ्गेरी — ननु ज्ञात्वा शिवं शान्तिमत्यन्तमेति । कस्मै देवाय हविषा विधेमेत्यादि श्रुतिविहितब्रह्मरुद्रादिसेवापरित्यागेन विष्ण्वैकविषयतया कृतः कर्मकल्पोऽपि यदि धर्मस्तर्हि रुद्रादिसेवा तत्प्रसादादि चास्याधिकारिणो न स्यादित्याशङ्क्याह ।। यथा हीति । लोके तरोर्मूलावसेचनं यथा तत्स्कन्धशाखानामपि हितं भवति । एवं विष्णोराराधनं च सर्वेषां ब्रह्मादीनामात्मनश्च स्वस्यापि हितं भवति ।। ४९ ।।

नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे ।
निर्गुणाय गुणेशाय सत्वस्थाय च साम्प्रतम् ।। ५० ।।

इति श्रीमद्भागवते अष्टमस्कन्धे पञ्चमोऽध्यायः ।

सत्यधर्मीया — फलितमभिलप्योपसंहरति ।। नम इति । अनन्तायेति स्ववद्बद्धतां वारयति । दुर्वितर्क्याणि अनूह्यानि आत्मकर्माणि यस्य तस्मै । आत्मा च कर्माणि च दुर्वितर्क्यानि यस्येति वा । निर्गुणाय सत्त्वादिगुणैः स्वभिन्नगुणै रहिताय वा । गुणेशाय सत्त्वादिप्रवर्तकत्वेन तत्स्वामिने । सर्वं सत्यं सत्यलोकेश न कालस्तादृश इत्यतो नैवमित्याह साम्प्रतम् । सत्त्वस्थायेति । पालनकालोऽयमिति नोपेक्षणीयाः । किन्तु रक्षणीया वयं विभो । अतस्तुभ्यं नमोऽस्तु । उपक्रमे पालनक्षण इत्युक्तम् । पुनरुपसंहारेऽपीरयन्सत्त्वस्यापीति सर्वथा सर्वरक्षणं कर्तव्यमिति दृढयति ।। तुभ्यमिति । दर्शयामात्मानमिति निश्चित्योक्तिः ।। ५० ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां अष्टमस्कन्धे पञ्चमोऽध्यायः ।। ८-५ ।।

छलारी — स्वाभिप्रेतं सूचयन् प्रणामेन स्तुतिमुपसंहरतीत्याह ।। नम इति । अनन्तायापरिच्छिन्नाय । दुर्वितर्क्यात्मकर्मणेऽचिन्त्यानि आत्मकर्माणि स्वभावचेष्टितानि यस्य तस्मै । निर्गुणाय सत्त्वरजस्तमोगुणकार्यशून्याय । गुणानां सत्त्वादिगुणानाम् । इदानीं सत्त्वगुणं प्रवर्तयसि तस्मादस्मान्न आपदः पालयेति भावः सूचितो भवति ।

इति श्रीछलारी शेषाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे पञ्चमोऽध्यायः ।। ८-५ ।।

लिङ्गेरी — इदानीं चतुर्मुखः स्वकर्तृकहरिकर्मकस्तुतिसमापने निमित्तं सूचयन्नेव हरिं स्तुवन् तत्स्तुतिं समापयति ।। नमस्तुभ्यमित्यादिना । दुर्वितर्क्यान्यूहितुमशक्यान्यात्मदेहकर्माणि च यस्य तस्मै। सत्त्वादिगुणविधुरतया निर्गुणाय । सृष्ट्याद्यर्थगुणानामीशाय प्रेरकतया स्थितस्वामिने । सांप्रतमिदानीं सत्त्वगुणस्थाय स्थितिपालकाय तुभ्यं नमोऽस्त्विति ।। ५० ।।

इति श्रीलिङ्गेरी श्रीनिवासाचार्यकृतायां श्रीभागवतटिप्पण्यां अष्टमस्कन्धे पञ्चमोऽध्यायः ।। ८-५ ।।

द्वैतवेदान्तप्रतिष्ठानेन प्रकाशिताः ग्रन्थाः

Publications of Dvaita Vedanta Foundation

		Price
संस्कृत ग्रन्थाः		(Rs.)
1.	न्यायामृतम् Vol. I, II, III	750/-
2.	ऋग्भाष्यम् Vol.I	270/-
	ऋग्भाष्यम् Vol.II	300/-
3.	ब्रम्हसूत्रभाष्यम्	
	with eight commentaries Vol. I, II,	270/-each
	Vol. III to VII,	200 each
4.	श्रीमद्भागवतम् with यादवार्य's commentary.	
	Vol. I, II, III	200/- each
	Vol. IV	300/-
	Vol. V, VI in the press.	
5.	तात्पर्यचन्द्रिका Vol. I to III	300/- each
6.	सुमध्व विजयः Vol. I & II	200/- each
7.	विष्णुतत्वविनिर्णयः with English translation	40/-
8.	सत्तत्त्वरत्नमाला	65/-
9.	व्यासयोगिचरितम्	20/-
10.	सर्वमूलग्रन्थाः-गीताभाष्यम्, गीतातात्पर्यम्	70/-
11.	पूर्णप्रज्ञदर्शनम्	15/-
12.	मध्वसिद्धान्तसारः	24/-
13.	जयतीर्थविजयः	40/-
14.	तत्वप्रकाशिका (ब्रह्मसूत्रभाष्यटीका)	
	with English translation	25/-
15.	तत्वप्रकाशिका (ब्रह्मसूत्रभाष्यटीका)	
	with Kannada translation	20/-
16.	मायावादखण्डनम्	20/-

17.	नारायणोपनिषत्	40/-
18.	मिथ्यात्वानुमानखण्डनम्	40/-
19.	प्रमाणवचनसङ्ग्रहः Vol. I, II & III each volume	80/-
20.	वादावली	100/-
21.	उपाधिखण्डनम्	80/-
22.	अध्यात्मरसरञ्जनी	40/-
23.	पुराणेषुनिसर्गपरिसरवर्णनम्	300/-
24.	न्यायविवरणम्	100/-
25.	भागवततात्पर्यनिर्णयम्	300/-

English

1.	Madhva's Philosophy of Vishnu Faith	75/-
2.	Brihadaranyakopanisad	70/-
3.	Upaniṣad Khandartha	100/-
4.	Aupaniṣadam Darśanam	20/-
5.	Commentaries on Bhagavadgita	100/-
6.	Principal Upaniṣads Vol.I & II	220/-
7.	Environment in Puranas	300/-

ಕನ್ನಡ

೧.	ದ್ವೈತ ವಾಙ್ಮಯ ಮತ್ತು ಇತಿಹಾಸ ಸಂಪುಟ-೧	60/-
೨.	ದ್ವೈತ ವಾಙ್ಮಯ ಮತ್ತು ಇತಿಹಾಸ ಸಂಪುಟ-೨	75/-
೩.	ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರ ಜೀವನ ಚರಿತ್ರೆ ಮತ್ತು ಉಪದೇಶಗಳು	80/-
೪.	ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರ ದ್ವೈತದರ್ಶನ	40/-
೫.	ದ್ವೈತ ವಾಙ್ಮಯ ಕೊಡುಗೆ	20/-
೬.	ದೇವರ್ಷಿ ನಾರದರು	40/-

महर्षि श्री वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित भागवततात्पर्यनिर्णयेन
श्री यदुपत्याचार्यविरचित भागवततात्पर्यप्रकाशिकया
श्री सत्यधर्मतीर्थविरचित भागवतविवृत्या
श्री व्यासतत्त्वज्ञविरचितमन्दनन्दिन्या च सहितम्

पञ्चमं सम्पुटम्

(सप्तमस्कन्धः अष्टमस्कन्धे अध्यायपञ्चकं च)

Edited by
Mahāmahopādhyāya
Prof. K.T. Pandurangi
Formerly Prof. of Sanskrit, Bangalore University

Associate Editor
Vidwan Krishnacharya Upadhyaya, M.A.

This volume is published with the grant from the Govt. of Karnataka for the Research Project undertaken by Dvaita Vedanta Studies and Research Foundation.

2002

Published by
Dvaita Vedanta Studies and Research Foundation
No.11, Uttaradi Matha Compound, Sankarapuram, Bangalore-4.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha, Prakāśikā of Śrī Yādupatyāchārya, Bhāgavata vivṛti of Śrī Satyadharmatīrtha and Mandanandini of Śrī Vyāsatatvajña. Edited by Prof. K.T. Pandurangi, Hon. Director of Dvaita Vedānta Studies and Research Foundation, Upakulapati, Poornaprajna Vidyapeetha, Bangalore. and Vidwan Krishnachārya Upādhyāya, Research Scholar at Dvaita Vedanta Foundation. Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Sankarapuram, Bangalore-560 004.

No. of Pages : xxiv+ 630

No. of Copies : 1000

Price : Rs.300/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation,
No.11, Uttaradi Matha Compound,
Sankarapuram, Bangalore-560 004.
Phone : 080-662 7272

Printed at :
Raghavendra Enterprises
Bangalore-560 085.

Preface

This is the fifth volume of Srimad Bhāgavatam. This contains the seventh skandha and five cantos of Eighth skandha. In this volume the commentary of Sri Satyadharma tirtha and Mandanandini commentary of Vyāsatatvajña are given. Durghatabhāvadīpikā and virodhoddhāra are separately given at the end as these do not comment on all verses.

The description of the incarnation of Narasimha is the main theme of the seventh skandha. Detailed guidelines for developing bhakti are given. The cruel behavior of Hiraṇyakaṣipu is graphically described. In the portion of Eighth skandha included in this volume Gajendra mokṣa is described.

Prof. Pandurangi the Hon. Director of the Dvaita Vedanta Foundation has metaculously gone through the manuscript of the commentaries of Śri Satyadharma tirtha and Vyāsatatvajña for preparing this edition. Vidwan Krishnacharya Upādhyāya has considerably helped him. We record our appriciation of the hard work of these two scholars.

We offer our praṇāmas to Sri 1008 Sri Satyātmatīrtha Swāmīji for providing the manuscript of Sri Satyadharma tirtha's commentary which is very rare. We thank Raghavendra Enterprices for neat printing and good get up.

N. Narasimha Rau
Chairman

Introduction

The seventh skandha commences with an interesting question by King Parīkṣit. The Supreme God is stated to be kind to all. He does not like or dislike any. He treats all equally. This being his true nature, how is it that he always takes the side of the deities and tortures the demons. He is always portial to Indra and against the demons.

This question provides an opportunity to Śuka to explain the role of the three guṇas viz. satva, rajas and tamas in bringing to the prominence the deities, demons and Yakṣa, Rakṣasa etc. When satva is prominent the deities thrive, when rajas is prominent the demons thrive, and when the tamas is prominent the yakṣa, rakṣasa etc thrive.

To explain the role of these further the episode of Śiṣupala is narrated. When Yudhiṣthira performed Rājasūya sacrifice, the question as to who is to be honoured first arose. Naturally Śrī Kriṣṇa's name was suggested. All agreed. However, Śiṣupāla claimed that he is entitled for it. He abused Śrī Kriṣṇna. Śrī Kriṣṇa tolerated it upto a certain point. Then he hit him with his sudarṣana and killed him. A light moved from the body of Śiṣupāla and merged into Śrī Kriṣṇa's heart. This indicated that he attained his original nature and attained God. This was strange. Śiṣupāla who hated the God all along his life attained the God but king Vena who also hated God fell into hell. It was difficult to uderstand this kind of different treatment by the God. Yudhiṣthira who observed this event asked Nārada to explain. Nārada said Śiṣupāla abusing Śrīkṛṣṇa did not affect him as he is above praise and censure. Śiṣupāla always concentrated on Śrī Kṛṣṇa to hate him. Hating was only a step to concentrate on him. It is the latter that enabled Śiṣupāla to attain God. This is a kind of devotion intitated by the hatred. Vena did not have such a devotion. He had only hatred. Nārada gives the background of devotion on the part of Śiṣupāla though seemingly he hated Śrī Kṛṣṇa.

Śiṣupāla and his brother Dantavaktra originally were the door keepers of Vaikuntha with the names Jaya and Vijaya. Once Sanaka, Sanandana etc young sages arived at Vaikuntha. The door keepers laughed at them and denied the entry. On this the young sages were angry and cursed them to be born on the earth. When the doorkeepers appealed to them to pardon, the sages said after three births you

will attain your original status. Śiṣupāla and Dantavaktra were third generation of these. The time was ripe for Śiṣupāla to attain his original nature. The God bestowed the same on him. As his original nature was that of Jaya he always had devotion for God though seemingly he hated him. It was an Asura jīva that was present in his body that was responsible for his hating the God.

In this context Bhāgavata explains how the other emotions serve as the initiators of devotion.

गोप्यः कामाद् भयात् कंसो द्वेषात् चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं प्रभो ॥ (I-32)

The Gopikas are devoted to God by passion. The sage Bhṛgu present in Kamsa is devoted by fear, Śiṣupāla etc are by hatred, the Vṛṣṇis on account of kinship, the Pandavas by affection and we by pure devotion.

In all these cases the devotion is primary and the passion etc emotions are a stepping stone. The deities have the knowledge of the greatness of God and devotion for him on equal basis while the sages have the knowledge of the greatness of God supported by the devotion.

In the first birth Jaya and Vijaya were born as Hiraṇyākṣa and Hiraṇyakaśipu. Hiraṇyākṣa was killed by God taking the Varāha form. This enraged Hiraṇyakaśipu.

Hiraṇyakaśipu was affected by deep grief and retorted that he will confront Viṣṇu who is responsible for the death of his brother and destroy all his associates viz the deities. sages, brāhmaṇas and all others who are on the side of Viṣṇu. He called upon his close associates like Dvimurdha, Sambara, Hayagrīva, Namuchi and Ilvala and asked them to attack the deities, obstruct the penance of the sages, destroy the sacrifices of brāhmaṇas, kill the cows and see that the entire Varṇāśrama order of Society collapses. Obeying the order of Hiraṇyakaṣipu these went round and started recklessly destroying the cities, villages, cultivated lands and cowherds. They used all kinds of weapons. Observing this calamity on the earth the deities vacated the heaven and moved on the earth incognito.

Hiraṇyakaṣipu performed the last rites of his brother, consoled his mother and tried to console the wives of his brother. He gave a bit of philosophy for them

saying that it is only the body that is destroyed, the ātman is eternal. Hence, one should not feel sorry on the death of a person. He also quoted the diologue between the God of death i.e. Yama who appeared in the form of a boy and the relatives of king Suyajna on whose death these relatives were very unhappy.

After consoling the wives of Hiraṇyākṣa, Hiraṇyakaṣipu proceeds to forest and undertakes a severe penance to seek a boon from Chaturmukha brahmā to become very strong and to overcome the old age and the death. His penance was so sever that anthill and cane creepers had grown around him. The ants were eating his flesh and sucking his blood but still these were not able to disturb his concentration.

तं ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः । पिपीलिकाभिराकीर्णं मेदत्वङ्मांसशोणितम् ॥

The deities felt insecure by his penance as they knew that he would use the strength obtained by him against them. They approached Chaturmukha brahmā to save them from the possible calamity.

Brahmā appeared before him. Hiraṇyakaṣipu profusely praised him and asked for the boon that he should not face death either by men or animals, either during the day or during the night, either on the earth or over the sky, either inside or outside. No weapon should kill him.

नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः । न भूमौ नाम्बरे मृत्युर्न नरैः न मृगैरपि ॥

Brahmā granted this boon to him knowing fully well that if he misuses his strength the Supreme God will take care of him. Hiraṇyakaṣipu should have asked deathlessness unconditionally. He tried to be too clever by imagining all possible ways of inflicting death on him by his enemies and wanted to be safe from these. Just as too many arguments spoil a good case in a philosophical debate or in law Court, too many conditions defeat the very purpose. Probably the Supreme God willed that he should committ this folly and reap the consequences of his evil deeds.

Hiraṇyakaṣipu immediately started his aggression. He conquered the three worlds, occupied the throne of Indra and enjoyed all his luxaries. He forced sacrificers to offer the havis to him only. The earth was forced to yeald crops without cultivation. The ocean offered the gems voluntarily, the trees yeilded the fruits and flowers out of seasons. Every one was afraid of him.

i) स विजित्य दिशः सर्वाः लोकांश्च त्रीन् महासुरः ।
जहार सर्वलोकानां स्थानानि सहतेजसा । (4-5,7)

ii) इज्यमानो हविर्भागानग्रहीत् स्वेन तेजसा । (4-15)

iii) अकृष्टपच्या तस्यासीत् सप्तद्वीपवती मही । (4-16)

iv) रत्नाकराश्च रत्नानि तत्पत्न्यश्चोहुरञ्जसा । (4-17)

He ruled for a long time in such an aggressive way.

एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः । कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ॥ (4-20)

Opressed by his rule in this way the deities and sages approached the Supreme God Nārāyaṇa to save them from his cruelty. They prostrated at Kṣīrasāgara and prayed him. He assured them through the airial voice that he will destroy him at an appropriate time. A person who hates the deities, sages, cows and noble persons is bound meet his end.

यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु । धर्मे मयि च विद्वेषः सवा आशु विनश्यति ॥ (4-28)

I will destroy him when he tortures his own son Pralhāda in spite of his securing a boon from brahmā.

निर्वैराय प्रशान्ताय स्वसुताय महात्मने । प्रल्हादाय यदा द्रुह्येद् हनिष्येपि वरोर्जितम् ॥ (4-29)

In due course Hiraṇyakaṣipu got four sons viz Pralhāda, Anulhāda, Salhāda and Lhāda. Among these Pralhāda had great qualities. He had natural and sponteneous devotion to the Supreme God Vāsudeva. He always remembered God whether he was sitting, walking, sleeping, eating, or speaking. He was never aware of these acts separately.

आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन् । नानुसन्दध एतानि गोविन्दपरिरक्षितः (4-39)

Hiraṇyakaṣipu appointed Chandāmarka the two sons of Śukrāchārya to educate Pralhāda. They started teaching Pralhāda and the other demon boys. After sometime, Hiraṇyakaṣipu affectionately asked his son about the progress of his learning. Pralhāda said the education that teaches that a person is a master of himself is a wrong education. One should realise that the Supreme God Hari is only independent and all others are dependent upon him. All should surrender to him. Hiraṇyakaṣipu was upset by this statement. He desired to know whether

Pralhāda is influenced by some persons to hold such a view. He instructed the teachers to find out. When the teachers enquired, Pralhāda said this is my natural understanding. Just as a peace of iron is attracted by a magnet, my heart is attracted by the Supreme God.

यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसन्निधौ । तथा मे भिद्यते चेतः चक्रपाणौ यदृच्छया ॥ (5.14)

The teacher taught him the method of employing the sāma, dāna, bheda and danda by the kings and continued his usual style of educating him. He sent the boy to meet the father. Hiraṇyakaṣipu asked him to inform him the best of what is he has learnt. Pralhāda narrated the nine ways of practicing devotion to God and said this is the best of knowledge.

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ (5-24)

Hiraṇyakaṣipu lost his temper and scolded the teacher. The teacher pleaded that he did not teach such a thing nor he could trace anyone who could have taught it. This idea seems to be the very natural idea for this boy.

न मत्प्रणीतं न परप्रणीतं सुतोवदत्येष तवेन्द्रशत्रो ।
नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं क्व तदात्ममानः ॥ (5-28)

Pralhāda confirmed this statement by stating that his devotion to Nārāyaṇa is natural and sponteneous.

Hiraṇyakaṣipu was enraged again and ordered the demons to kill him. Immediately the demons started hitting him by all kinds of weapons. They also tried to harm him with elephants and other cruel animals, threw him from the top of the hill, and also gave poison. However none of these could harm him even slightly. Hiraṇyakaṣipu was greatly depressed by the failure of his efforts. However, the teacher advised to put him under prison until Śukrāchārya returns. He said it is quite likely that Pralhāda will realise his mistake as he grows in age.

इमं तु पाशैः वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ (5-49)

Hiraṇyakaṣipu instructed the teacher to teach him Rājadharma only. Accordingly the teacher started teaching him again. Whenver the teacher left the class-room for his daily routine, Pralhāda himself started to teach the other boys.

Pralhāda addressed the boys 'O my friends, do not waste your valuable life only by play. Do not postpone the task of aquiring the right knowledge. Life is short, the death is imminent.

हन्तार्भकाः मे श्रुणुत वचो वः सर्वतः शिवम् ।
वयस्यान् पश्यत मृतान् क्रीडान्धा मा प्रमाद्यथ ॥ (6-1)

One should observe the Bhāgavatadharma right from the young age. During the hundred years of life time, first twenty years are spent as boys with playfullness. The last twenty years as old age. During the middle sixty years one is stuck up with family affairs. Hence, one should start aquiring the right knowledge right at the boyhood.

कौमार आचरेत् प्राज्ञः धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ (6-6)
मुग्धस्य बाल्यकौमारैः क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥
दूरापूरेण कामेन मोहेन च बलीयसा
शेषं गृहेषु सक्तस्या प्रमत्तस्यापयाति हि ॥ (6-12, 13)

It is not a difficult task to serve the God. He is every where and he is the lord of all. To be compassionate and friendly to all beings is the best service to all. God will be pleased if you eschew your evil tendencies.

नह्यच्युतं प्रीणयतो बह्वा यासोऽसुरात्मजाः ।
आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ (6-25)
तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
भावमासुरमुन्मुच्य तया तुष्यत्यधोक्षजः ॥ (6-30)

Pralhāda explained the background of his aquiring the right knowledge.

When Hiraṇyakaṣipu proceeded to forest to perform the penance, Indra attacked the City of Hiraṇyakaṣipu. He arrested the queen of Hiraṇyakaṣipu and

carried her. On the way sage Nārada met him and advised that she should be released. He told him that a great devotee of the Supreme God Nārāyaṇa is in her womb. Indra released her. Nārada took her to his āśrama. During her stay in the āśrama, Nārada taught her and me present in the womb the glory of the Supreme God.

ऋषिः कारुणिकः तस्याः प्रादादुभयमीश्वरः । धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ॥(7-15)

Pralhāda put the teaching of Nārada briefly as

आत्मा नित्योऽव्ययः शुद्धः एकः क्षेत्रज्ञः आश्रयः ।
अविक्रियः स्वदृक् वश्यो व्यापकोऽसङ्ग्यनावृतः ॥

The Supreme God is eternal, imperishable, pure, central, knows the kṣetra i.e. prakṛti, mahat etc all non-sentient that are his body, he is support for all, he does not undergo any change, he alone knows himself fully, he regulates all, he is everywhere, he is not attached to anyone or anything and he is not covered. These twelve are the distinct attributes of the Supreme God.

Just as a goldsmith discovers the gold from the rock, the devotee should discover God within the body by yogic practice.

हेमं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैः तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत ॥ (7-21)

There are many ways by which service can be rendered to Supreme God but the following are prominent.

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च ।
सङ्गेन साधुभक्तानामीश्वराराधनेनच ।
श्रद्धया तत्कथायां च कीर्तनैः गुणकर्मणाम्
तत्पदाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः ॥ (7-31,32)

Pralhāda concluded his teaching with a suggestion that Bhakti be practice as the central means to please the God.

ततो हरौ भगवति भक्तिं कुरुत दानवाः । (7-54)

The boys imbibed the teachings of Pralhāda devotedly and rejected the lessons given by the son of Śukrāchārya. He went and reported to Hiraṇyakaṣipu. He became furious and asked Pralhāda who is the power behind him. Pralhāda said the Supreme God is the power behind me, you, and all, one has to only realise it.

न केवलं मे भवतश्चराजन् स वै बलं बलिनां च परेषाम् ।
परावरेषां स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ (8-8)

Hiraṇyakaṣipu retorted that there is no one other than me who is the Supreme Lord. Probably you want to meet your death by stating that someone else is the Supreme lord. If there is any, and if he is everywhere call him out in this pole. I shall cut your head. Let your God protect you.

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
कासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ॥ (8-13)
सोऽयं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितः ॥ (8-14)

Hiraṇyakaṣipu hit the pole by his first. A loud sound broke that caused the feeling that the very brahmānda is exploded.

The Supreme God appeared from the pole in the form that was neither that of a man nor that of an animal. He appeared to prove the words of his devotee Pralhāda and also to establish the fact that he is every where.

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ (8-14)

Hiraṇyakaṣipu was taken aback on seeing the Narasimha form of God. He tried to attack him. He fell in the fire of the form of Narasimha like a moth falling in the fire. Narasimha tore him into pieces. By the force employed by Narasimha the ocean moved, the mountains shevered, and the sky was full of his luster. Then, Narasimha occupied the throne.

शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो विरेजिरे ।
ततः सभायामुपविष्टमुत्तमे नृपासने सम्भृततेजसं विभुम् ॥ (8-34)

The wives of deities showered flowers on him. The drums were beaten, the Gandharvas danced. Brahma, Rudra, Indra, Sages, Siddhas, Vidyādharas, and Nāgas praised him.

Śrī Narasimha was so furious that the deities, the sages etc gathered there were not able to cool him. They asked goddess Śrī to pacify him. She did not accept this suggestion as she desired to favour Pralhāda by entrusting this task to him. Brahmā asked Pralhāda to pacify Narasimha. Pralhāda agreed and prostrated at the feet of Śrī Narasimha.

साक्षात् श्रीः प्रेषिता देवैः दृष्ट्वा तन्महदद्भुतम् । अदृष्टाश्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ॥(9-2)
तथेति शनकैः राजन् महाभागवतोऽर्भकः । उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ (9-4)

Pralhāda profusely praised the God, recalled his destroying Madhu-kaitabha etc in the past and described his greatness. Śrī Narasimha was pleased and asked Pralhāda to ask for a boon.

प्रह्लाद भद्र भद्रं ते प्रीतोहं ते सुरोत्तम । वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणाम् ॥ (9-52)

Pralhāda appeals to him not to tempt him by offering a boon. Those who expect some boon from you are not your devotees. They are commercial. I request you to grant me the boon not to ask for a boon.

i) मा मा प्रलोभयोत्पत्त्याऽसक्तं कामेषु तैर्वरैः । (१०-२)
ii) यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् । (१०-५)
कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् । (१०-५)

However, the boon I ask from you is to purify my father from all the sins that he has committed.

तस्मात् पिता मे पूयेत दुरन्ताद् दुस्तरादघात् । (10-18)

Chaturmukha brahmā asked Śrī Narasimha to pardon him for granting the boon to Hiraṇyakaśipu. Narasimpha cautioned him not to grant such boons to the demons, in future.

मैवं विधोऽसुराणां ते प्रदेयः पद्मसम्भव । (10-31)

Bhāgavata conclúdes the episode of Pralhāda with the observation that the entire Bhāgavata dharma and the glory of God is described in this episode.

धर्मो भागवतानां च भगवान् येन गम्यते । आख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ॥

(10-46)

After narrating the episode of Pralhāda, Nārada narrates the event of the distruction of three cities built by the demon architect Maya for the demons.

When the deities defeated the demons they approached Maya to help them. He built three cities of gold, silver and iron respectively. These were invisible, very strong and could move wherever the demons wanted to move. The demons started attacking the deities sitting in these cities. The deities approached Rudra to help them. He destroyed the demons with his pāśupata bow. Maya took pity on them, put their bones in the lake of nector constructed by him and revived their life. Rudra was unhappy as his purpose of destroying the demons was defeated. Then the Supreme God Viṣṇu took the form of a cow and made Chaturmukhabrahmā the calf, suck the nector from the lake and made it dry. This took away all the strenth of the demons. Then he provided the weapons made from dharma, jñāna, virakti, tapas, vidya and kriya to Rudra. Armed with these Rudra destroyed the three cities and restored peace.

i) स निर्ममे पुरस्तिस्रः हैमरोप्यायसीर्विभुः ।
दुर्लक्ष्यापायसंयोगाः दुर्वितर्क्यपरिच्छदाः ॥ (10-55)

ii) वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।
प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ (१०-६३)

iii) अथासौ शक्तिभिः स्वाभिः शम्भोः प्राधानिकं व्यधात् ।
धर्मज्ञानविरक्त्यादि तपोविद्याक्रियादिभिः ॥ (१०-६६)

शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः ।
भगवत्तेजसागुप्तो ददाह त्रिपुरं नृपः ॥

In contos elevan to fifteen Varṇaśrama dharmas are described in detail. Streedharmas are separately described.

Mahāmahopādhyāya
Prof. K.T. Pandurangi

ಮುನ್ನುಡಿ

ಪರೀಕ್ಷಿತರಾಜನು ಹಿಂದಿನ ಸ್ಕಂಧಗಳಲ್ಲಿ ಭಗವಂತನ ಅನೇಕ ಚರಿತ್ರೆಗಳನ್ನು ಕೇಳಿದನು. ಆ ಕಥೆಗಳನ್ನು ಕೇಳಿದ ಪರೀಕ್ಷಿತರಾಜನು ಶುಕಾಚಾರ್ಯರಿಗೆ ಸಪ್ತಮಸ್ಕಂಧದಲ್ಲಿ ಮೊದಲಿಗೇ ಒಂದು ಸಂದೇಹವನ್ನು ಮುಂದಿಡುತ್ತಾನೆ-

ಪರೀಕ್ಷಿತನ ಪ್ರಶ್ನೆ

ಬ್ರಹ್ಮಜ್ಞಾನಿಗಳಾದ ಹೇ ಶುಕಮುನಿಗಳೇ! ಭಗವಂತನು ಅನಂತ ಗುಣಪರಿಪೂರ್ಣ. ಅವನಲ್ಲಿ ಯಾವ ದೋಷಕ್ಕೂ ಅವಕಾಶವಿಲ್ಲ, ಎಂದು ನೀವು ಹೇಳುತ್ತಿದ್ದೀರಿ. ಜ್ಞಾನಿಗಳೂ ಹೀಗೆ ಹೇಳುವುದನ್ನು ಕೇಳಿದ್ದೇನೆ. ಆದರೆ ಭಗವಂತನ ಗುಣದ ಬಗ್ಗೆ ನನಗೊಂದು ದೊಡ್ಡ ಸಂಶಯ ಮೂಡಿದೆ. ಅದನ್ನು ತಾವು ಪರಿಹರಿಸಬೇಕು.

ಸಮಃ ಪ್ರಿಯಃ ಸುಹೃದ್ ಬ್ರಹ್ಮನ್ ಭೂತಾನಾಂ ಭಗವಾನ್ ಸ್ವಯಾಮ್ ।
ಇಂದ್ರಸ್ಯಾರ್ಥೇ ಕಥಂ ದೈತ್ಯಾನ್ ಅವಧೀಯದ್ವಿಷಮೋ ಯಥಾ ॥

ಭಗವಂತ ಪ್ರಕೃತಿಯನ್ನು ಮೀರಿನಿಂತವ. ನಾವೆಲ್ಲರೂ ಪ್ರಕೃತಿ ಸಂಬಂಧಿಯಾದ ಅನೇಕ ದೋಷಗಳಿಗೆ ಒಳಗಾಗುತ್ತೇವೆ. ಆದರೆ ಭಗವಂತ ಅಪ್ರಾಕೃತ ಚೈತನ್ಯಮೂರ್ತಿ. ಪ್ರಕೃತಿಯ ಬಂಧನ, ಪ್ರಕೃತಿಯ ಲೇಪ ಇದಾವುದೂ ಅವನಲ್ಲಿ ಇಲ್ಲ. ಹೀಗಿದ್ದರೂ ಭಗವಂತ ಒಬ್ಬ ಸಾಮಾನ್ಯ ರಾಜನಂತೆ ವರ್ತಿಸುತ್ತಿದ್ದಾನೆ.

ಭಗವಂತನು ದೇವತೆಗಳ ಮೇಲಿನ ಪ್ರೀತಿಯಿಂದ ದೇವತೆಗಳಿಗೋಸ್ಕರ ದೈತ್ಯನಿಗ್ರಹರೂಪವಾದ ಸಂಹಾರಕಾರ್ಯವನ್ನು ಮಾಡಿದ್ದಾನೆ. ಆದರೆ ಈ ರೀತಿಯಾದ ಪ್ರೀತಿ ದ್ವೇಷಗಳು ಪ್ರಕೃತಿಯ ಬಂಧನವನ್ನು ಮೀರಿನಿಂತ ಭಗವಂತನಿಗೆ ಹೇಗೆ ಕೂಡುತ್ತದೆ? ಒಬ್ಬ ಬೇಕಾದವ ಒಬ್ಬ ಬೇಡವಾದವನೆಂಬ ಪಕ್ಷಪಾತ ನಮಗಿರಬಹುದು. ನಮ್ಮನ್ನು ಹೊಗಳಿದವರಲ್ಲಿ ಅತಿಯಾದ ಪ್ರೀತಿ. ಅವನಿಗೆ ವಿಶೇಷ ಮರ್ಯಾದೆ. ಯಾರು ನಿಂದಿಸುತ್ತಾರೋ ಅವರನ್ನು ಹಿಂಸಿಸುವುದು, ಇವೆಲ್ಲವೂ ಪ್ರಕೃತಿಯ ದ್ವಂದ್ವಕ್ಕೆ ಸಿಲುಕಿದ ಸಾಮಾನ್ಯ ಜನರಲ್ಲಿ ತೋರಬಹುದು. ಆದರೆ ಅದನ್ನು ಮೀರಿನಿಂತ ಭಗವಂತನಿಗೆ ಎಲ್ಲರೂ ಒಂದೇ. ಹೀಗಿದ್ದರೂ ನಮ್ಮಂತೆ ಹೊಗಳು ಭಟರಾದ ದೇವತೆಗಳಲ್ಲಿ ಭಾರೀ ಪ್ರೀತಿ ತೋರಿಸುತ್ತಾನೆ. ದೈತ್ಯರನ್ನು ದ್ವೇಷಿಸುತ್ತಾ ಹಿಂಸಿಸುತ್ತಾನೆ.

ಲೋಕದ ಒಬ್ಬ ಸಾಮಾನ್ಯ ರಾಜನಲ್ಲಿ ತೋರುವ ಗುಣಗಳು ಪ್ರಕೃತಿಯ ಬಂಧನವನ್ನು ಮೀರಿನಿಂತ ಭಗವಂತನಲ್ಲಿಯೂ ತೋರುತ್ತಿದೆಯೆಲ್ಲಾ! ಏನಿದು!! ನಿರ್ದೋಷನಾದ, ಆನಂದಪೂರ್ಣನಾದ ಭಗವಂತನ ಈ ಪ್ರವೃತ್ತಿಯನ್ನು ನೋಡಿ ಆಶ್ಚರ್ಯವಾಗುತ್ತದೆ. ಎಲ್ಲರಿಗೂ ಒಂದೇ ತೆರನಾದ ಪ್ರೀತಿಯನ್ನು ತೋರಿಸುವ ಭಗವಂತ ಪಕ್ಷಪಾತನೀತಿಯನ್ನು ಏಕೆ ಅನುಸರಿಸುತ್ತಿದ್ದಾನೆ. ಅವನ ಗುಣಗಳ ಬಗ್ಗೆ ನಮಗೆ ಸಂಶಯ ಉಂಟಾಗಿದೆ. ದಯಮಾಡಿ ಈ ಸಂಶಯವನ್ನು ಪರಿಹರಿಸಿರಿ, ಎಂದು ಪರೀಕ್ಷಿತ ಶುಕಾಚಾರ್ಯರ ಬಳಿ ನಿವೇದಿಸಿದನು.

ಶುಕಾಚಾರ್ಯರ ಉತ್ತರ :

ಪರೀಕ್ಷಿತ- ಭಗವಂತನು ದ್ವೇಷ, ಅಸೂಯೆ, ಸ್ವಾರ್ಥ ಇವುಗಳೆಲ್ಲವನ್ನೂ ಮೀರಿ ನಿಂತವ. ದೇವತೆಗಳು ಹೊಗಳಿದ್ದರಿಂದ ಇವನಿಗೇನು ಪ್ರೀತಿಯಿಲ್ಲ. ದೈತ್ಯರು ತೆಗಳಿದ್ದರಿಂದ ಹಾನಿಯೂ ಇಲ್ಲ. ಎಂದಿಗೂ ಈ ಸ್ತುತಿನಿಂದೆಗಳ ಪರಿಣಾಮ ಇಲ್ಲ.

ಸತ್ವಂ ರಜಸ್ತಮ ಇತಿ ಪ್ರಕೃತೇರ್ನಾತ್ಮನೋ ಗುಣಾಃ ।
ನ ತೇಷಾಂ ಯುಗಪದ್ರಾಜನ್ ಹ್ರಾಸ ಉನ್ನಾಹ ಏವ ವಾ ॥

ಈ ಜಗತ್ತಿನಲ್ಲಿ ಸತ್ವ, ರಜಸ್ಸು, ತಮಸ್ಸು ಎಂಬ ಮೂರು ಗುಣಗಳಿವೆ. ಇವುಗಳಿಂದಲೇ ಎಲ್ಲ ಏರು ಪೇರುಗಳುಂಟಾಗುತ್ತವೆ. ಸತ್ವಗುಣಗಳ ಅಭಿವೃದ್ಧಿಯಾದರೆ, ಒಳ್ಳೆಯ ಸಾತ್ವಿಕಪ್ರವೃತ್ತಿ-ಸದ್ಗುಣಗಳು ವ್ಯಾಪಕ-ವಾಗಿ ಹರಡುತ್ತವೆ. ತಮೋಗುಣ ರಜೋಗುಣಗಳೇ ಹೆಚ್ಚಾದರೆ ಅನರ್ಥಗಳು ಘರ್ಷಣೆ, ಹಿಂಸೆ, ಹೋರಾಟ ಇವೆಲ್ಲವೂ ವಿಜೃಂಭಿಸುತ್ತವೆ. ಈ ಮೂರುಗುಣಗಳನ್ನು ಮೀರಿನಿಂತ ಭಗವಂತ ಜಗತ್ತಿನ ಈ ಮೂರು ಗುಣಗಳಿಗೆ ಪ್ರೇರಕನಾಗಿದ್ದಾನೆ. ಆದ್ದರಿಂದ ದೇವತೆಗಳಲ್ಲಿ ಉತ್ಕೃಷ್ಟ ಪ್ರೀತಿಯನ್ನು ತೋರಿಸಿದ್ದಾನೆ ಎಂದರೆ ದೇವತೆಗಳ ಸತ್ವಗುಣದ ಪ್ರತೀಕರು. ಭಗವಂತನು ಸತ್ವಗುಣ ಬೆಳೆಯಬೇಕೆಂಬ ಕಾರಣದಿಂದ ದೇವತೆಗಳ ಪಕ್ಷ ವಹಿಸಿದನೆ ಹೊರತು ತನ್ನನ್ನು ದೇವತೆಗಳು ಹೊಗಳಿದರು ಎಂಬ ಕಾರಣದಿಂದಲ್ಲ.

ಇನ್ನು ದೈತ್ಯರನ್ನು ಕೊಂದದ್ದು ಅವರು ನಿಂದಿಸಿದರೆಂದಲ್ಲ. ದೈತ್ಯರೆಂದರೆ ರಜೋಗುಣ, ತಮೋಗುಣಗಳ ಪ್ರತೀಕರು. ಇವುಗಳ ದಮನವಾಗಬೇಕು. ದೈತ್ಯರದಮನ ಎಂದರೆ ಅನರ್ಥ ಸ್ವಾರ್ಥ, ಮುಂತಾದ ದುರ್ಗುಣಗಳ ದಮನ.

ಹೀಗೆ ಜಗತ್ತಿನಲ್ಲಿ ಸಾತ್ವಿಕ ಪ್ರವೃತ್ತಿಯು ಸಜ್ಜನರಿಗೆ ಹಿತವಾಗಬೇಕು. ಲೋಕಕ್ಕೆ ಕಲ್ಯಾಣವಾಗಬೇಕು. ಅನ್ಯಾಯ ಸ್ವಾರ್ಥಗಳನ್ನು ತಡೆಗಟ್ಟಬೇಕು. ಈ ದೃಷ್ಟಿಯಿಂದ ಭಗವಂತನ ಪ್ರವೃತ್ತಿ ಹೊರತು ಅವನು ಹೊಗಳಿದ ಎಂದು ಪ್ರೀತಿ, ಇವ ನಿಂದಿಸಿದ ಎಂದು ದ್ವೇಷ, ಈ ತೆರನಾದ ರಾಗದ್ವೇಷಗಳು ಪರಮಾತ್ಮನ ವ್ಯವಹಾರದಲ್ಲಿ ಇಲ್ಲ.

ನಿರ್ಗುಣೋಽಪಿ ಹ್ಯಜೋಽವ್ಯಕ್ತೋ ಭಗವಾನ್ ಪ್ರಕೃತೇಃ ಪರಃ ।
ಸ್ವಮಾಯಾಗುಣಮಾವಿಶ್ಯ ಬಾಧ್ಯಬಾಧಕತಾಂ ಗತಃ ॥

ಅಘಟಿತ ಘಟನಾಸಾಮರ್ಥ್ಯವುಳ್ಳ ಭಗವಂತ ಸ್ವೇಚ್ಛಾಗುಣಾನುಸಾರವಾಗಿ ತನ್ನ ಅಧೀನವಾದ ಪ್ರಕೃತಿ ಗುಣದಿಂದ ನಿರ್ಮಿತವಾದ ದೇವಾಸುರದೇಹಗಳನ್ನು ಪ್ರವೇಶಿಸಿ ಅವರಲ್ಲಿದ್ದುಕೊಂಡು ಮತ್ತು ನರಸಿಂಹಾದಿ ರೂಪಗಳಿಂದ ಅವತರಿಸಿ ದೈತ್ಯರನ್ನು ಬಾಧಿಸುವುದರಿಂದ ಬಾಧಕನೆನಿನಿಕೊಳ್ಳುತ್ತಾನೆ. ಬಾಧ್ಯರಾದ ದೈತ್ಯರಲ್ಲಿ ನಿಯಾಮಕನಾಗಿದ್ದು ಬಾಧ್ಯನೆನಿಸಿಸುತ್ತಾನೆ. ತಾತ್ಪರ್ಯದಲ್ಲಿ ಶ್ರೀಮದಾಚಾರ್ಯರು ಇದೇ ಅರ್ಥವನ್ನು-

ಬಾಧ್ಯಾದಿಸ್ಥೋ ಹರಿರ್ನಿತ್ಯಂ ಬಾಧ್ಯತಾದಿಗತೇತ್ಯಪಿ ।
ಗೀಯತೇ ನ ತು ಬಾಧ್ಯತ್ವಾದಿದೋಷಯುತತ್ವತಃ ॥

ಎಂಬ ಭವಿಷ್ಯತ್ಪರ್ವವಚನದಿಂದ ದೃಢೀಕರಿಸಿದ್ದಾರೆ.

ಈ ದೇಹದಲ್ಲಿಯೂ ಕೂಡ ಭಗವಂತನು ದೇಹೇಂದ್ರಿಯ ಪ್ರಾಣಜೀವರಿಂದ ಭಿನ್ನನಾಗಿ ಮೊಸರಿ-ನಲ್ಲಿರುವ ಬೆಣ್ಣೆಯಂತೆ, ಕಟ್ಟಿಗೆಯಲ್ಲಿರುವ ಬೆಂಕಿಯಂತೆ, ತೋರುವುದಿಲ್ಲ. ಮೊಸರನ್ನು ಕಡೆದಾಗ ಬೆಣ್ಣೆಯು ಪ್ರತ್ಯೇಕವಾಗುವುದು. ಹಾಗೆ ಭಗವಂತ ಅಜ್ಞಾನಿಗಳಿಗೆ ತೋರುವುದಿಲ್ಲ. ಸಾಧನೆಗಳಿಂದ ಪರಿಪಕ್ವರಾದ ಅಪರೋಕ್ಷ ಜ್ಞಾನಿಗಳಿಗೆ ಕಾಣುವನು. ಆದ್ದರಿಂದ ಭಗವಂತನ ಈ ಪ್ರವೃತ್ತಿಗಳ ಬಗ್ಗೆ ಯಾವ ವಿಧದಲ್ಲಿಯೂ ಸಂದೇಹ ಆಕ್ಷೇಪಗಳಿಗೆ ಅವಕಾಶವಿಲ್ಲ. ಆದ್ದರಿಂದ ನಮ್ಮ ಭಾವನೆ ಪ್ರವೃತ್ತಿಗಳ ಜೊತೆಗೆ ಭಗವಂತನ ವ್ಯವಹಾರವನ್ನು ತೂಗಿದರೆ ಅನರ್ಥಕ್ಕೆ ಕಾರಣರಾದೇವು ಎಂದು ಭಗವಂತನ ನಿಃಸ್ವಾರ್ಥದೃಷ್ಟಿ, ಲೋಕಕಲ್ಯಾಣ

ಮುಂತಾದ ಸದ್ಗುಣಗಳನ್ನು ಶುಕಮುನಿಗಳು ತಿಳಿಸುತ್ತಾ, ಪರೀಕ್ಷಿತರಾಜರಿಗೆ ಸಂದರ್ಭಕ್ಕನುಗುಣವಾಗಿ ಧರ್ಮರಾಜ ನಾರದರ ಸಂವಾದವನ್ನು ತಿಳಿಸುತ್ತಿದ್ದಾನೆ.

ಶಿಶುಪಾಲನಿಗೆ ಸದ್ಗತಿ ಹೇಗೆ?

ಧರ್ಮರಾಜ ನಾರದರ ಬಳಿ ಕೇಳುತ್ತಿದ್ದಾನೆ- ನಾರದರೇ! ಸಭೆಯಲ್ಲಿ ಶಿಶುಪಾಲನು ಶ್ರೀಕೃಷ್ಣಪರಮಾತ್ಮನನ್ನು ಕರ್ಣಕಠೋರವಾದ ಮಾತುಗಳಿಂದ ನಿಂದಿಸಿದ, ಹಂಗಿಸಿದ. ಅವನ ನುಡಿಗಳಿಂದ ಸಿಡಿದೆದ್ದು ಶ್ರೀಕೃಷ್ಣ ಕಾದಾಟಕ್ಕೆ ಇಳಿದ. ಯುದ್ಧದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನು ಶಿಶುಪಾಲನ ಶಿರವನ್ನು ಚಕ್ರದಿಂದ ತರಿದ. ಕೂಡಲೇ ಶಿಶುಪಾಲನ ಶರೀರದಿಂದ ತೇಜಸ್ಸೊಂದು ಹೊರಟು ಶ್ರೀಕೃಷ್ಣನ ದಿವ್ಯ ಶರೀರದಲ್ಲಿ ಸೇರಿತು. ಈ ಪ್ರಸಂಗವನ್ನು ಕಂಡ ನನಗೆ ಆಶ್ಚರ್ಯವಾಗುತ್ತಿದೆ.

ಭಗವಂತನನ್ನೇ ಅನವರತ ನೆನೆಯುವ ಏಕಾಂತ ಭಕ್ತರೂ ಇಂತಹ ಸ್ಥಾನವನ್ನು ಸುಲಭವಾಗಿ ಹೊಂದ-ಲಾರರು. ಹೀಗಿರಲು ಬಿರುನುಡಿಗಳಿಂದ ಜರೆದ ಪಾಪಿಯಾದ, ದುರಾತ್ಮನಾದ ಶಿಶುಪಾಲನು ಹೇಗೆ ಅವನನ್ನು ಹೊಂದಿದ? ಭಗವಂತನ ಅಭಿಪ್ರಾಯವಾದರೂ ಏನು?

ಕಥಂ ತಸ್ಮಿನ್ ಭಗವತಿ ದುರವಗ್ರಾಹ್ಯಮಾತ್ಮನಿ ।
ಪಶ್ಯತಾಂ ಸರ್ವಲೋಕಾನಾಂ ಲಯಮೀಯತುರಂಜಸಾ ॥

ದುಷ್ಟರನ್ನು ಲೋಕಕ್ಕೆ ಅಪಾಯಕಾರಿಗಳೆಂದು ಶಿಕ್ಷಿಸುವ ಭಗವಂತ, ಅತ್ಯಂತ ದುಷ್ಟನಾದ ಶಿಶುಪಾಲನನ್ನು ರಕ್ಷಿಸುತ್ತ ಸದ್ಗತಿಯನ್ನು ಏಕೆ ನೀಡಿದ? ಎನ್ನುವುದು ಮತ್ತೊಂದು ಪ್ರಶ್ನೆ.

ದುರಾತ್ಮರೆಲ್ಲರನ್ನೂ ಸದೆಬಡಿಯುವ ಭಗವಂತ ದುರಾತ್ಮನಾದ ಶಿಶುಪಾಲನನ್ನು ಏಕೆ ಶಿಕ್ಷಿಸಲಿಲ್ಲ? ಪರಮಾತ್ಮನ ವ್ಯವಹಾರವೇ ವಿಚಿತ್ರವಾಗಿ ತೋರುತ್ತಿದೆ. ಅನೇಕ ದುಷ್ಟರನ್ನು ದಮನ ಮಾಡಿದ್ದಾನೆ. ಆದರೆ ದುಷ್ಟನಾದ ಶಿಶುಪಾಲನಿಗೆ ಸದ್ಗತಿಯನ್ನು ನೀಡಿದ್ದಾನೆ. ಈ ಭಗವಂತನ ವ್ಯಾಪಾರಗಳನ್ನು ನೋಡಿ ನನ್ನ ಬುದ್ಧಿ ಗಾಳಿಗೆ ಸಿಲುಕಿದ ದೀಪದಂತಾಗಿದೆ, ಎಂದಾಗ ನಾರದರು ಉತ್ತರಿಸುತ್ತಾರೆ.

ಭಗವಂತನಿಗೆ ರಾಗದ್ವೇಷಾದಿಗಳು ಇಲ್ಲ ಎನ್ನುವುದಕ್ಕೆ ಇದೇ ಉದಾಹರಣೆ. ಶಿಶುಪಾಲ ಶ್ರೀಕೃಷ್ಣನನ್ನು ನೂರಾರು ಬಿರುನುಡಿಗಳಿಂದ ಜರೆದರೂ ಅನುಗ್ರಹವನ್ನೇ ಮಾಡಿದ. ಬೈದವನಿಗೂ ಉತ್ತಮ ಗತಿ ಕೊಟ್ಟನೆಂದರೆ ದ್ವೇಷಾದಿಗಳು ಇಲ್ಲವೆಂದೇ ಆಯಿತು.

ಶಿಶುಪಾಲ ಬೈದರೂ ಉತ್ತಮಗತಿ ಕೊಟ್ಟನೆಂದರೆ ಅಲ್ಲಿ ಶಿಶುಪಾಲನನ್ನು ಮಾತ್ರ ನೋಡಲಿಲ್ಲ. ಅವನ ಕೆಟ್ಟಮಾತುಗಳನ್ನು ಮಾತ್ರ ಕೇಳಿಸಿಕೊಳ್ಳಲಿಲ್ಲ. ಅವನ ಹಿನ್ನೆಲೆಯನ್ನು ನೋಡಿದ ತನ್ನ ಲೋಕದ ದ್ವಾರಪಾಲಕ-ನಾದ ಜಯ ಪ್ರಮಾದದಿಂದ ಸನಕಾದಿಗಳ ಶಾಪಕ್ಕೆ ಗುರಿಯಾಗಿ ಅಸುರೀಜನ್ಮಗಳನ್ನು ಪಡೆದ. ವಾಸ್ತವಿಕವಾಗಿ ಅವನು ಉತ್ತಮಭಕ್ತ. ಅವನ ಅಂತರಂಗದ ಭಕ್ತಿಯನ್ನು ಗಮನಿಸಿ ಬಿರುನುಡಿಗಳನ್ನಾಡಿದರೂ ಅವುಗಳನ್ನು ಗಮನಿಸದೆ ಉದ್ಧಾರ ಮಾಡಿದ. ಆದ್ದರಿಂದ ಪರಮಾತ್ಮನಿಗೆ ಇವನು ಬೈದ, ಇವ ಹೊಗಳಿದ ಎನ್ನುವುದು ಮುಖ್ಯವಲ್ಲ. ಯಾರು ಸಹಜವಾಗಿಯೇ ಸಜ್ಜನರಾಗಿರುವರೋ ಅವರು ತಾತ್ಕಾಲಿಕ ಅಪರಾಧ ಮಾಡಿದರೂ ಅದನ್ನು ಗಮನಿಸುವುದಿಲ್ಲ. ಭಕ್ತರನ್ನು ಎಂದೂ ಶ್ರೀಹರಿ ಕೈಬಿಡನು. ಎನ್ನುವುದಕ್ಕೆ ಶಿಶುಪಾಲ ಒಂದು ಉದಾಹರಣೆ. ಇನ್ನೊಂದು ಉದಾಹರಣೆ ದೈತ್ಯಬಾಲಕ ಪ್ರಹ್ಲಾದರಾಜರು. ಇವರೂ ದೈತ್ಯಕುಲದಲ್ಲಿ ಜನಿಸಿದರೂ ಭಗವಂತ ಇವರಿಗೆ ಅನುಗ್ರಹ ಮಾಡಿದ. ಭಗವಂತ ತೋರಿದ ಅನುಗ್ರಹದಿಂದ ಭಗವಂತನಿಗೆ ಪಕ್ಷಪಾತವಿದೆಯೆಂಬ ದುರ್ವಾದವನ್ನು ದೂರ ಮಾಡಿದ್ದಾರೆ, ನಾರದರು.

ರಾಗ-ದ್ವೇಷಗಳು ಮುಕ್ತಿಗೆ ಸಾಧನವಲ್ಲ

ಇನ್ನು ಭಾಗವತದ ಕೆಲವು ಮಾತುಗಳನ್ನು ಕಂಡಾಗ ದ್ವೇಷದಿಂದಲೇ ಮುಕ್ತಿ, ಎಂದು ಮೇಲುನೋಟಕ್ಕೆ ಹಾಗೆ ಕಾಣುವುದು. ಆದರೆ ನಿಜವಾದ ಅರ್ಥವನ್ನು ಶ್ರೀಮದಾಚಾರ್ಯರು ತೋರಿದಂತೆ ತಿಳಿಯಬೇಕು.

ತಸ್ಮಾದ್ ವೈರಾನುಬಂಧೇನ ನಿರ್ವೈರೇಣ ಭಯೇನ ವಾ ।
ಸ್ನೇಹಾತ್ ಕಾಮೇನ ವಾ ಯುಂಜ್ಯಾತ್ ಕಥಂಚಿನ್ನೇಕ್ಷತೆ ಪೃಥಕ್ ॥

ಅತ್ಯಂತ ವಿಲಕ್ಷಣನಾದ ಸರ್ವಕರ್ತೃವಾದ ಗುಣಪೂರ್ಣನಾದ ಚಿದಾನಂದಾತ್ಮಕ ಶರೀರವುಳ್ಳ ಶ್ರೀಹರಿಗೆ ಮಾಡುವ ಪೀಡೆಯು ಹಿಂಸೆಯೆಂದು ಯಾವ ಕಾರಣದಿಂದ ಕಲ್ಪನೆ ಮಾಡಲು ಸಾಧ್ಯ. ಹಿಂಸೆಗೆ ನಿಮಿತ್ತವೇ, ಪ್ರಾಕೃತದೇಹ, ಅಭಿಮಾನ, ಇದು ಯಾವುದೂ ಇಲ್ಲ. ಅಂದಮೇಲೆ ನೈಮಿತ್ತಿಕ ಹಿಂಸೆಯೂ ಇಲ್ಲವೆಂದೇ ಅರ್ಥ. ಇವನಿಗೆ ಮತ್ತೊಬ್ಬ ಕರ್ತೃವಿಲ್ಲವೆಂದಮೇಲೆ ಇವನನ್ನು ಹಿಂಸಿಸುವರಾರು? ಹೀಗಾಗಿ ಭಗವಂತನಿಗೆ ಹಿಂಸೆಯೂ ಇಲ್ಲ. ಕಾರಣ ಭಗವಂತನ ಸ್ವರೂಪ ಹೀಗಿರುವಾಗ ಸ್ವಯೋಗ್ಯಾನಂದಾಭಿವ್ಯಕ್ತಿರೂಪವಾದ ಮೋಕ್ಷಕ್ಕೆ ಸಾಧನವು ಅಕ್ಷೀಣವಾದ ಭಕ್ತಿಯೇ ಹೊರತು ದ್ವೇಷಾದಿಗಳು ಮೋಕ್ಷಸಾಧನಗಳಲ್ಲ.

ದ್ವೇಷಾದಿಗಳನ್ನು ಹೇಳಿದ್ದು ಅರ್ಥವಾದ. ಅವರವರ ಸ್ವಭಾವವನ್ನು ತಿಳಿಸಲಿಕ್ಕೆ ಹೀಗೆ ಹೇಳಿರುವುದೆಂದು ಅಭಿಪ್ರಾಯ.

ದ್ವೇಷದಿಂದಲೇ ಭಗವಂತನಲ್ಲಿ ಮನಸ್ಸಿರುವಾಗ ಭಗವಂತನನ್ನು ಬಿಟ್ಟು ಬೇರೆನೂ ದ್ವೇಷಿಗೆ ಕಾಣುವುದಿಲ್ಲ. ಅದಕ್ಕೊಂದು ಚಿಕ್ಕ ಉದಾಹರಣೆ ಹೀಗೆ ನೀಡಬಹುದು-

ಒಬ್ಬ ಭಗವಂತನ ದ್ವೇಷಿ. ಅವನಲ್ಲೊಂದು ಹರಿಹರಪ್ರತಿಮೆ. ಆ ಹರಿಹರ ಪ್ರತಿಮೆಯನ್ನೇ ಪೂಜಿಸುವಾಗ ತಾನು ಮಾಡುವ ಅಭಿಷೇಕ, ಗಂಧ, ಹೂ ಯಾವುದೂ ಕೂಡಾ ಹರಿಗೆ ದೊರೆಯದಿರುವಂತೆ ಮಾಡಲು ಪ್ರತಿಮೆಯ ಹರಿಯ ಭಾಗಕ್ಕೆ ಪೂರ್ಣವಾಗಿ ಬಟ್ಟೆಯಿಂದ ಸುತ್ತಿದ. ಹರನನ್ನು ಪೂಜೆ ಮಾಡುವಾಗ ಮನದ ತುಂಬ ಹರಿಯೇ ತುಂಬಿಕೊಂಡಿದ್ದ. ತಾನು ಮಾಡುವ ಪೂಜೆ ಅವನಿಗೆ ದೊರೆಯದಂತೆ ಎಷ್ಟು ಜಾಗ್ರತೆ ವಹಿಸಬೇಕೋ ಅಷ್ಟೆಲ್ಲ ಪ್ರಯತ್ನ ಮಾಡಿದ. ಹರನ ಮೇಲಿನ ಅಭಿಮಾನದಕ್ಕಿಂತ ಹರಿಯಲ್ಲಿಯ ದ್ವೇಷದಿಂದಾಗಿ ಅವನೇ ತುಂಬಿಕೊಂಡಿದ್ದ. ಅವನ ಪೂಜೆ ಮುಗಿದಾಗ ಹರಿಪ್ರತ್ಯಕ್ಷನಾದ. ಅವನಿಗೆ ಆಶ್ಚರ್ಯ. ಏನಿದು! ಹರಿಯನ್ನು ದ್ವೇಷಿಸುವ ನನಗೆ ಹರಿ ಪ್ರತ್ಯಕ್ಷನಾದನಲ್ಲ! ಎಂದು. ಈ ದ್ವೇಷದಿಂದ ಅವನಿಗೆ ಮೋಕ್ಷವಾಗುವುದಿಲ್ಲ. ಮತ್ತು ಶ್ರೀಹರಿಗೂ ಕೂಡ ಇವನು ನನ್ನ ದ್ವೇಷಿಯೆಂದು ಯಾವುದೇ ರೀತಿಯ ಹಿಂಸೆಯೂ ಇಲ್ಲ. ಹೀಗೆ ಆ ವ್ಯಕ್ತಿಯ ಸ್ವಭಾವವನ್ನು ತೋರುತ್ತದೆ. ಹೊರತಾಗಿ ದ್ವೇಷದಿಂದಲೇ ಸರ್ವಥಾ ಮುಕ್ತಿಯಲ್ಲ. ಶ್ರೀಹರಿಗೆ ದೈತ್ಯರು ಮಾಡುವ ದ್ವೇಷಾದಿಗಳಿಂದ ಯಾವ ತೊಂದರೆಯೂ ಇಲ್ಲ. ಸ್ವಭಾವತಃ ದ್ವೇಷಿಗಳು. ಅವರನ್ನು ಹಾಗೆಯೇ ಪ್ರೇರಿಸುತ್ತಾನೆ. ಒಂದು ವೇಳೆ ತನಗೆ ತೊಂದರೆಯಾಗುತ್ತಿದ್ದರೆ ಸರ್ವಪ್ರೇರಕನಾದ ಶ್ರೀಹರಿ ಅವರನ್ನು ಹಾಗೆ ಪ್ರೇರಿಸುತ್ತಿರಲಿಲ್ಲ. ಅವರವರ ಸ್ವಭಾವವನ್ನು ಪ್ರೇರಿಸುವ ಅವನು ಅವರವರು ತಮ್ಮ ತಮ್ಮ ಸ್ವಭಾವಕ್ಕೆ ತಕ್ಕಂತೆ ತನ್ನ ವಿಷಯದಲ್ಲಿ ಮನಸ್ಸಿಡುವಂತೆ ಪ್ರೇರಿಸುವನು. ಅದಕ್ಕೆ ತಕ್ಕಂತೆ ಫಲವನ್ನು ಕೊಡುವನು. ದ್ವೇಷವು ದ್ವೇಷ ಮಾಡುವವನಿಗೆ ಮಾತ್ರ ಅನರ್ಥಕಾರಿಯಲ್ಲ. ಅವನ ತಂದೆ ಮೊದಲಾದವರಿಗೂ ಅನರ್ಥಕರ.

ಕರ್ಮಣಾ ಮನಸಾ ವಾಚಾ ಯೋ ದ್ವಿಷ್ಯಾತ್ ವಿಷ್ಣುಮವ್ಯಯಂ ।
ಮಜ್ಜಂತಿ ಪಿತರಸ್ತಸ್ಯ ನರಕೆ ಶಾಶ್ವತೀಃ ಸಮಾಃ ॥

ಎಂಬ ಈ ಮಾತು ದ್ವೇಷಿಯ ಪಿತೃಗಳಿಗೂ ನರಕ ಹೇಳುತ್ತದೆ. ಒಂದು ಬಾರಿ ಮಾಡಿದ ದ್ವೇಷಕ್ಕೆ ನರಕವಾದರೂ ಅದನ್ನು ಅನುಭವಿಸುವುದರಿಂದ ನರಕಕ್ಕೆ ಕಾರಣವಾದ ಪಾಪವು ಹೋದ ಮೇಲೆ ಮತ್ತೆ ಅಂತಃಕರಣವು ಶುದ್ಧವಾಗಿ ಭಕ್ತಿ ಮಾಡಬಹುದು? ಆ ಭಕ್ತಿಗೆ ಕಾರಣವಾದ ಜನ್ಮವೂ ಬರಬಹುದಲ್ಲಾ? ಎಂದರೆ ಅದೂ ಸಾಧ್ಯವಿಲ್ಲ–

ತಾನಹಂ ದ್ವಿಷಾತಃ ಕ್ರೂರಾನ್ ಸಂಸಾರೇಷು ನರಾಧಮಾನ್ ।
ಕ್ಷಿಪಾಮ್ಯಜಸ್ರಂ ಅಶುಭಾನ್ ಆಸುರೀಷ್ವೇವ ಯೋನಿಷು ॥
ಆಸುರೀಂ ಯೋನಿಮಾಪನ್ನಾ ಮೂಢಾ ಜನ್ಮನಿ ಜನ್ಮನಿ ।
ಮಾಂ ಅಪ್ರಾಪ್ಯೈವ ಕೌಂತೇಯ ತತೋ ಯಾಂತ್ಯಧಮಾಂ ಗತಿ ॥

ಎಂದು ಗೀತೆಯಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನು ದ್ವೇಷಿಗಳಿಗೆ ಮತ್ತೆ ಮತ್ತೆ ಅಸುರಯೋನಿಯನ್ನು ಹೇಳಿ ತನ್ನ ಪ್ರಾಪ್ತಿಯೇ ಇಲ್ಲದೆ ಶಾಶ್ವತ ಅಂಧಂತಮಸ್ಸಿಗೆ ಅವರು ಬೀಳುವರೆಂದು ತಿಳಿಸಿರುವನು.

ಹಾಗಾದರೆ ಪ್ರಲ್ಹಾದರಾಜರು ಭಗವಂತನನ್ನು ಹೀಗೆ ಪ್ರಾರ್ಥಿಸಿದರು-

ಯದನಿಂದತ್ ಪಿತಾ ಮೇ ತ್ವಾಂ ಅವಿದ್ವಾನ್ ತೇಜ ಐಶ್ವರಂ ।
ತಸ್ಮಾತ್ ಪಿತಾಮೇ ಪೂಯೇತ ದುರಂತಾತ್ ದುಸ್ತರಾದಘಾತ್ ॥

ನನ್ನ ತಂದೆ ನಿನ್ನ ಸಾಮರ್ಥ್ಯವನ್ನರಿಯದೆ ನಿನ್ನ ದ್ವೇಷಿಸಿದನಲ್ಲಾ, ಆ ದುಸ್ತರವಾದ ದುರಂತವಾದ ಪಾಪದಿಂದ ಪುನೀತನಾಗಲಿ, ಎನ್ನುವರು. ಹಿರಣ್ಯಕನ ಪಾಪ ದೂರವಾಗಿದೆಯೆಲ್ಲಾ ಎಂದರೆ? ಇಲ್ಲಿಯೂ ಕೂಡ ದುಷ್ಟರಾದ ಹಿರಣ್ಯಕಶಿಪು ಮೊದಲಾದವರಲ್ಲಿ ಆವಿಷ್ಟರಾಗಿದ್ದ ಅಸುರರು ಮಾಡಿದ ಪಾಪ ಮುಕ್ತಿಯೋಗ್ಯರಾದ ಜಯ ಮೊದಲಾವರಿಗೆ ಅವರ ಸಂಪರ್ಕದಿಂದ ಬಂದಿತ್ತು. ಜಯಾದಿಗಳ ಪಾಪ ಪ್ರಲ್ಹಾದಾದಿಗಳಿಂದ ಹೋಗಲಾಡಿಸಲ್ಪಟ್ಟಿತೇ ಹೊರತು, ಅಸುರರ ದ್ವೇಷ ಎಂದಿಗೂ ದೂರವಾಗಿಲ್ಲ. ದೂರವಾಗುವುದೂ ಇಲ್ಲ. ಇದನ್ನೇ

ಅನ್ಯಾದೇಶಕೃತಂ ಪಾಪಂ ತದ್ವರಾದ್ಯೈರಪೋದ್ಯತೇ ।
ತದ್ವಿರುದ್ಧ ಸ್ವಭಾವಾನಾಂ ಅನ್ಯಥಾ ನ ಕಥಂಚನ ॥

ಎನ್ನುವ ಮಾತಿನಿಂದ ಶ್ರೀಮದಾಚಾರ್ಯರು ವಿಶದ ಪಡಿಸಿರುವರು.

ಅದರಂತೆ-

ಗೋಪ್ಯಃ ಕಾಮಾತ್ ಭಯಾತ್ ಕಂಸಃ ದ್ವೇಷಾಚ್ಚೈದ್ಯಾದಯೋ ನೃಪಾಃ ।
ಸಂಬಧಾದ್ ವೃಷ್ಣಯಃ ಸ್ನೇಹಾತ್ ಯೂಯಂ ಭಕ್ತ್ಯಾ ವಯಂ ವಿಭೋ ॥

ಎನ್ನುವಲ್ಲಿಯೂ ಗೋಪಿಕಾಸ್ತ್ರೀಯರ ಕಾಮದಿಂದ, ಕಂಸನು ಭಯದಿಂದ, ಚೈದ್ಯಾದಿಗಳು ದ್ವೇಷದಿಂದ, ದೇಹಾನುಬಂಧದಿಂದ ಯಾದವರು, ಸ್ನೇಹದಿಂದ ನೀವು (ಪಾಂಡವರು) ಭಕ್ತಿಯಿಂದ ನಾವು ಅವನ ಗತಿಯನ್ನು ಹೊಂದುವೆವು ಎನ್ನುತ್ತಾರೆ ನಾರದರು. ಕೇವಲ ಕಾಮಾದಿಗಳು ಮೋಕ್ಷಕ್ಕೆ ಕಾರಣವಲ್ಲ. ಭಕ್ತಿಯೇ. ಗೋಪಿಕಾಸ್ತ್ರೀಯರು ಕೃಷ್ಣಾವತಾರ ಕಾಲದಲ್ಲಿ ಕಾಮಯುಕ್ತ ಭಕ್ತರು. ದೇವತಾರೂಪದಲ್ಲಿ ಕೇವಲ ಭಕ್ತರು. ಈ ಗೋಪಿಯರೆಲ್ಲ ಅಗ್ನಿಪುತ್ರರು ಕಾರಣ ಕೇವಲ ಭಕ್ತರೇ. ಕಂಸನು ಭಯದಿಂದ ಭಕ್ತನು ಅಂದರೆ, ಇಲ್ಲಿ

ಕಂಸಭಕ್ತನಲ್ಲ. ಕಂಸಾವಿಷ್ಟರಾದ ಭೃಗುಋಷಿಗಳು ಭಯಮಿಶ್ರ ಭಕ್ತರು. ಚೈದ್ಯ ಮೊದಲಾದ ದೈತ್ಯರಲ್ಲಿ ಜಯ ಮೊದಲಾದವರು ತಮ್ಮಲ್ಲಿ ಆವಿಷ್ಟರಾದ ಹಿರಣ್ಯ ಮೊದಲಾದ ದೈತ್ಯರ ಸಂಬಂಧದಿಂದ ಅವರಲ್ಲಿದ್ದವರು ಇವರು ಎನ್ನುತ್ತೇವೆ. ಈ ದೈತ್ಯರು ದ್ವೇಷ ಮಾಡಿದರೂ ಸ್ವಾಭಾವಿಕ ಭಕ್ತರಾದ ಜಯಾದಿಗಳು ಭಕ್ತಿಯನ್ನು ಮಾಡಿರುವರು. ಸ್ನೇಹಯುಕ್ತಭಕ್ತರು ನೀವು, ನಾವು ಶುದ್ಧ ಕೇವಲ ಭಕ್ತಿಯನ್ನು ಮಾಡಿದೆವು.

ಗೋಪಿಕಾದಿಗಳೆಲ್ಲರೂ ಈ ಅವತಾರದಲ್ಲಿ ತತ್ತತ್ತ್ವಯುಕ್ತವಾಗಿ ಭಕ್ತಿಯನ್ನು ಮಾಡಿದರು. ಇವರೆಲ್ಲ ದೇವತೆ-ಗಳು ಮುನಿಗಳು. ಹೀಗಾಗಿ ಸ್ವಾಭಾವಿಕವಾಗಿ ಇವರು ಭಕ್ತರೇ. ಕಾರಣ ಆ ಭಕ್ತಿಯಿಂದಲೇ ಮುಕ್ತರಾದದ್ದು. ಕೇವಲ ಕಾಮಾದಿಗಳಿಂದಲ್ಲ.

ಗೋಪ್ಯಃ ಕಾಮಯುತಾಭಕ್ತಾಃ ಕಂಸಾವಿಷ್ಟಃ ಸ್ವಯಂ ಭೃಗುಃ ।
ಜ್ಞೇಯೋ ಭಯಯುತೋ ಭಕ್ತಃ ಚೈದ್ಯಾದಿಸ್ಥಾ ಜಯಾದಯಃ ॥
ವಿದ್ವೇಷಸಂಯುತಾ ಭಕ್ತಾಃ ವೃಷ್ಣಯೋ ಬಂಧುತಾಯುತಾಃ ।
ಬಹುಮಾನಸ್ನೇಹಸಾಮ್ಯಾತ್ ದೇವಾ ಭಕ್ತಾಃ ಪ್ರಕೀರ್ತಿತಾಃ ॥

ಎಂಬ ಬ್ರಹ್ಮತರ್ಕದ ಮಾತಿನಿಂದ ಶ್ರೀಮದಾಚಾರ್ಯರು ವಿವರಿಸಿರುವರು. ಒಟ್ಟಾರೆ ಈ ಎಲ್ಲ ವೇದವ್ಯಾಸರ ವಾಣಿ ನಮಗೆ ಅರ್ಥವಾಗುವುದು ಶ್ರೀಮದಾಚಾರ್ಯರ ''ಭಾಗವತತಾತ್ಪರ್ಯ ನಿರ್ಣಯ'' ನೆಂಬ ಸ್ನೇಹಿತನಿದ್ದಾಗ ಮಾತ್ರ ಸಾಧ್ಯ, ಇಲ್ಲವಾದರೆ ಅನರ್ಥವೇ ಆದೀತು? ''ಭವತಾ ಸುಸಖಾ ಚಕ್ರೇ ಶ್ರೀಭಾಗವತನಿರ್ಣಯಃ'' ಎನ್ನುವ ನಾರಾಯಣಪಂಡಿತರ ಮಾತು ಅರ್ಥಪೂರ್ಣ, ಅನುಭವದ ಪರಿಪಾಕ.

ಇನ್ನು ಸಪ್ತಮಸ್ಕಂಧದಲ್ಲಿ ಹಿರಣ್ಯಕಶಿಪು. ಹಿರಣ್ಯಾಕ್ಷರ ಚರಿತ್ರೆ, ಪ್ರಲ್ಹಾದರಾಜರು ಭಗವಂತನಲ್ಲಿ ಮಾಡಿದ ಭಕ್ತಿ, ಅವರಿಗೆ ಬಂದ ಅನೇಕ ತೊಂದರೆಗಳಿಂದ ರಕ್ಷಣೆ, ''ಸತ್ಯಂ ವಿಧಾತುಂ ನಿಜಭೃತ್ಯಭಾಷಿತುಂ'' ನರಸಿಂಹಾವತಾರ, ದೈತ್ಯರ ಸಂಹಾರ, ದೇವತೆಗಳ ಸ್ತೋತ್ರ, ಹೀಗೆ ಅನೇಕ ಕಥೆಗಳನ್ನು ಭಾಗವತ ವಿವರಿಸುತ್ತದೆ. ಆದರೆ ಇಲ್ಲಿ ಮತ್ತೊಂದು ಸಂದೇಹ.

ಪ್ರಲ್ಹಾದರಾಜರು ಪಾರಿಜಾತಪುಷ್ಪ

ಬ್ರಹ್ಮಾದಿ ದೇವತೆಗಳು ಭಗವಂತನನ್ನು ಸ್ತುತಿಸಿದರು. ಲಕ್ಷ್ಮೀದೇವಿಯಂತು ಲೋಕ ಮೋಹಕ್ಕಾಗಿ ನರಸಿಂಹನನ್ನು ಕಂಡು ಇತರ ಜನ ಹೆದರುವಂತೆ ತಾನೂ ಹೆದರಿ ಭಗವಂತನೆಡೆಗೆ ಹೋಗಲಿಲ್ಲ. ಆಗ ಪ್ರಲ್ಹಾದ ರಾಜರನ್ನು ಬ್ರಹ್ಮದೇವರು ನರಸಿಂಹನನ್ನು ಶಾಂತನನ್ನಾಗಿಸಲು ಕಳುಹಿಸಿದರು. ಏನಿದು? ಬ್ರಹ್ಮಾದಿಗಳಿಂದ ಶಾಂತನಾಗದ ನರಹರಿ ಪ್ರಲ್ಹಾದರಾಜರಿಂದ ಶಾಂತನಾಗಲು ಸಾಧ್ಯವೇ? ಇದಕ್ಕೂ ಆಚಾರ್ಯರು ಉತ್ತರಿಸಿರುವರು-

ಪ್ರಲ್ಹಾದೇ ಚೈವ ವಾತ್ಸಲ್ಯದರ್ಶನಾಯ ಹರೇರಪಿ ।
ಏಕತ್ರೈಕಸ್ಯ ವಾತ್ಸಲ್ಯಂ ವಿಶೇಷಾತ್ ದರ್ಶಯೇದ್ಧರಿಃ ॥

ಪ್ರಲ್ಹಾದರಾಜರಲ್ಲಿ ಭಗವಂತನಿಗೆ ಈ ಪ್ರಸಂಗದಲ್ಲಿ ವಿಶೇಷ ವಾತ್ಸಲ್ಯ. ಹೀಗಾಗಿ ಬ್ರಹ್ಮದೇವರು ಭಗವಂತನ ಹಾರ್ದ ತಿಳಿದು ಅವರನ್ನು ಕಳುಹಿದರು. ಒಂದೊಂದು ಪ್ರಸಂಗದಲ್ಲಿ ಒಬ್ಬೊಬ್ಬರಿಗೆ ಭಗವಂತ ಅನುಗ್ರಹಿಸುತ್ತಾನೆ. ಹೀಗಾಗಿ ಈ ಪ್ರಲ್ಹಾದರಾಜರ ಮಾತಿಗೆ ಭಗವಂತ ಶಾಂತನಾದ. ಇಷ್ಟು ಮಾತ್ರಕ್ಕೆ ಪ್ರಲ್ಹಾದ-ರಾಜರು ಇತರರಿಗಿಂತ ಉತ್ತಮರೆಂದು ತಿಳಿಯುವುದಲ್ಲ. ನಾವು ಪೂಜೆಯಲ್ಲಿ ಭಗವಂತನಿಗೆ ಹೂವನ್ನು

ಸಮರ್ಪಿಸುತ್ತೇವೆ. ಅನರ್ಘ್ಯವಾದ ಆಭರಣಗಳನ್ನೂ ಹಾಕಿರುತ್ತೇವೆ. ಅದರ ಮೇಲೆ ಆಭರಣ ಮುಚ್ಚುವಂತೆ ಈ ಪಾರಿಜಾತ ಭಗವಂತನಿಗೆ ಸಮರ್ಪಿತವಾಗಿರುತ್ತದೆ. ಪಾರಿಜಾತವೇ ಉತ್ತಮವಾಗುವುದಿಲ್ಲ. ಇದರ ಮೌಲ್ಯವೆಷ್ಟು? ಆಭರಣಗಳು ಅನರ್ಘ್ಯ. ಆದರೂ ಆ ಹೂವುಗಳನ್ನು ಸಮರ್ಪಿಸುವುದಿಲ್ಲವೆ? ಹಾಗೆ ಬ್ರಹ್ಮಾದಿ ದೇವತೆಗಳು ಉತ್ತಮೋತ್ತಮರು. ಆದರೂ ಪ್ರಲ್ಹಾದರಾಜರನ್ನು ಮುಂದೆ ಮಾಡಿದ ಮಾತ್ರದಿಂದ ಅವರಿಗಿಂತ ಉತ್ತಮರಾಗಲು ಸಾಧ್ಯವಿಲ್ಲ.

ವಾಯುದೇವರ ಮಾತಿನಿಂದ ಹರಿಗೆ ಸಂತೋಷ

ಇಷ್ಟಲ್ಲದೇ ಪ್ರಲ್ಹಾದರಾಜರಲ್ಲಿ ವಾಯುದೇವರ ಆವೇಶ. ವಾಯುದೇವರ ಮಾತಿನಿಂದಲೇ ಹರಿಗೆ ಸಂತೋಷ. ಎಲ್ಲ ದೇವತೆಗಳು ಸ್ತುತಿಸಿದರೂ ಹೋಗದ ನರಸಿಂಹನ ಕೋಪ ಪ್ರಲ್ಹಾದನ ಸ್ತುತಿಗೆ ಶಾಂತವಾಯಿತು. ವಾಯುದೇವರ ಆವೇಶವಿದ್ದುದರಿಂದ ಪ್ರಲ್ಹಾದರಿಗೆ ಈ ಅನುಗ್ರಹ ದೊರೆಯಿತು. ''ಸ ಏನಾನ್ ಬ್ರಹ್ಮ ಗಮಯತಿ'' ಅಲ್ಲವೇ! ಹೀಗೆ ವಾಯುದೇವರನ್ನು ಆಶ್ರಯಿಸಿದ ರಾಜರಿಗೆ ಅನುಗ್ರಹ. ಆಶ್ರಯಿಸದ ಹಿರಣ್ಯಕಶಿಪುವಿಗೆ ಮರಣ. ಈ ಅಭಿಪ್ರಾಯ ಭಗವಂತನ ಮಾತಿನಿಂದಲೇ ತಿಳಿಯುವುದು.

ನಿರ್ವೈರಾಯ ಪ್ರಶಾಂತಾಯ ಸ್ವಸುತಾಯ ಮಹಾತ್ಮನೇ ।
ಪ್ರಲ್ಹಾದಾಯ ಯದಾ ದ್ರುಹ್ಯೇತ್ ಹನಿಷ್ಯೇಪಿ ವರೋದ್ಧತಂ ॥

ನಿಜವಾಗಿ ಈ ಎಲ್ಲ ವಿಶೇಷಣಗಳು ವಾಯುದೇವರಿಗೆ ಸಲ್ಲುವವು. ಇನ್ನು 'ಸ್ವಸುತಾಯ' ಅಂತು ಬೇರೆಯವರಿಗೆ ಸಾಧ್ಯವೇ ಇಲ್ಲ, 'ಪರಸ್ತ್ವೋ ಹರಿರಾದ್ದಾಮಃ' 'ಸ್ವ' ಭಗವಂತ. ಅವನ ಸುತ. ವಾಯುದೇವರು. 'ಪ್ರಲ್ಹಾದಃ' ಪ್ರಕೃಷ್ಟಃ ಆಹ್ಲಾದಃ ಯಸ್ಯಸಃ'' ಪೂರ್ಣವಾದ ಆನಂದ ಉಳ್ಳವರೂ ವಾಯುದೇವರೇ. ಎಲ್ಲರನ್ನೂ ಆನಂದ ಗೊಳಿಸುವರೂ ಅವರೇ. ಏನಂ ದೀನಂ ದೂನಂ ಅನಾಥಂ ಉದ್ಧರೇತಿ ವಿಜ್ಞಾಪನ ಕರ್ತೃಗಳು ಇವರೇ ಅಷ್ಟೆ! ವಾಯುದೇವರೇ ನಿಜವಾಗಿ ಪ್ರಲ್ಹಾದರು. ಅವರ ಸ್ತೋತ್ರಕ್ಕೆ ಭಗವಂತ ಪ್ರೀತನಾದ. ಶಾಂತನಾದ ಅನುಗ್ರಹಿಸಿದ.

ಸಾಕಷ್ಟು ವಿಚಾರಗಳು ಇಲ್ಲಿ ಅಡಗಿವೆ. ನನ್ನ ಬರವಣಿಗೆಯಲ್ಲಿ ಅದನ್ನು ಹಿಡಿದಿಡಲು ಸಾಧ್ಯವಿಲ್ಲ. ಪ್ರಲ್ಹಾದರಾಜರ ಸ್ತೋತ್ರವಂತೂ ಕಬ್ಬಿನ ಜಲ್ಲೆ. ಹಿಂಡಿದಷ್ಟು ರಸ.

ಇನ್ನು ಇಲ್ಲಿ ಭಾಗವತ ತಾತ್ಪರ್ಯಗಳ ಜೊತೆಯಲ್ಲಿ ಸತ್ಯಧರ್ಮರ ವ್ಯಾಖ್ಯಾನ, ವ್ಯಾಸತತ್ವಜ್ಞರ ಮಂದನಂದಿನೀ ಎರಡನ್ನೂ ಸೇರಿಸಿ ಮುದ್ರಿಸಿದೆ.

ಸತ್ಯಧರ್ಮರ ಬಗ್ಗೆ ಅವರ ವ್ಯಾಖ್ಯಾನದ ಬಗ್ಗೆ ಬಹಳಷ್ಟು ಬರೆಯಬೇಕೆನಿಸುತ್ತದೆ. ಆದರೆ ಸ್ಥಳಾವಕಾಶ, ಕಾಲಾವಕಾಶ, ಇವುಗಳ ಗಮನವಿಟ್ಟು ಬರೆಯಬೇಕಾಗಿದೆ. ಹಾಗಾಗಿ ಹೆಚ್ಚು ಬರೆಯುವುದಿಲ್ಲ. ಸತ್ಯಧರ್ಮರು ಅನೇಕ ಅರ್ಥಗಳನ್ನು ಹೇಳುತ್ತಾರೆ. ಅನೇಕ ಪ್ರಮೇಯಗಳನ್ನು ತಿಳಿಸುತ್ತಾರೆ. ಪುರಾಣವಿರೋಧಗಳನ್ನು ಪರಿಹರಿಸುತ್ತಾರೆ. ನರಸಿಂಹನ ಅವತಾರ ಹೇಗೆ? ಇದರ ಬಗ್ಗೆ ಯಾಕಿಷ್ಟು ತಲೆ ನೋವು ಎನ್ನುತ್ತಾರೆ. ಒಂದು ಬಾರಿ ಕಂಭದಿಂದ, ಮತ್ತೊಂದು ಬಾರಿ ನಡೆದುಬಂದ. ಅವೆಲ್ಲವೂ ಬೇರೆ ಬೇರೆ ಕಲ್ಪ ಎನ್ನುತ್ತಾರೆ. ಮುಷ್ಟಿ ಪ್ರಹಾರವೋ? ಗದಾಪ್ರಹಾರವೋ? ಹೀಗೆ ಅನೇಕ ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿರುವರು.

ನರಹರಿಯ ಶ್ವಾಸ ಎಂತಹುದು? ಪ್ರಾಕೃತವೋ? ಸ್ವರೂಪಭೂತವೋ? ಇದರ ಬಗ್ಗೆಯಂತು ಸಾಕಷ್ಟು ಟೀಕಾಟಿಪ್ಪಣಿ, ಚಂದ್ರಿಕಾದಿಗಳ ಮಾತನ್ನು ಉಲ್ಲೇಖಿಸಿ ಸ್ವರೂಪ ಭೂತವಾದ ಶ್ವಾಸ ಇದೆ ಎನ್ನುತ್ತಾರೆ.

''ಸತ್ಯಂ ವಿಧಾತುಂ'' ಇದಕ್ಕಂತೂ ''ಚಂಚರೀಕತಿಮನಃ'' ಎನ್ನುವಂತೆ ವ್ಯಾಖ್ಯಾನಿಸಿರುವರು.

ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಪರಮಪೂಜ್ಯ ಶ್ರೀ ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು ಈ ಗ್ರಂಥ ಪ್ರಕಾಶನಕ್ಕೆ ತಮ್ಮ ಗ್ರಂಥ ಭಂಡಾರದಲ್ಲಿರುವ ಶ್ರೀಸತ್ಯಧರ್ಮತೀರ್ಥರ ವ್ಯಾಖ್ಯಾನದ ಹಸ್ತಪ್ರತಿಯನ್ನು ನೀಡಿರುವರು. ಇದು ನಮ್ಮ ಭಾಗ್ಯ. ಮತ್ತು ನನ್ನ ಏಳಿಗೆಗೆ ಸರ್ವವಿಧದಿಂದಲೂ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿರುವರು. ಹಾಗೂ ಆಧ್ಯಾತ್ಮಿಕಸಾಧನೆಗೆ ತೊಡಗಿಸಿ ನಿರ್ವ್ಯಾಜವಾದ ಅಭಿಮಾನದಿಂದ ಅನುಗ್ರಹಿಸುತ್ತಿರುವ ಈ ಮಹಾಗುರುಗಳಿಗೆ ಅನಂತ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳ ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಯನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶಾಸ್ತ್ರಗ್ರಂಥಗಳನ್ನು ಉಪದೇಶಿಸಿ ಸಾಧನ ಮಾರ್ಗದಲ್ಲಿ ತೊಡಗಿಸಿ ಸ್ವರೂಪೋದ್ಧಾರಗೈಯ್ದ ಸುಧಾ-ವಿಶಾರದರಾದ ಶ್ರೀ ಗುತ್ತಲಾಚಾರ್ಯರಿಗೆ (ಶ್ರೀ ರಂಗಾಚಾರ್ಯ ಗುತ್ತಲ) ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಈ ಗ್ರಂಥಗಳ ಸಂಪಾದನೆಯ ಕಾರ್ಯದಲ್ಲಿ ನನ್ನನ್ನು ತಮ್ಮ ಜೊತೆಯಲ್ಲಿ ನಿಯೋಜಿಸಿ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿರುವ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಶ್ರೀ ಪ್ರೊ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿಯವರಿಗೆ ಕೃತಜ್ಞತಾ ಪೂರ್ವಕ ನಮನಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ನನಗೆ ಈ ಸಾಧನಶರೀರವನ್ನಿತ್ತು ನನ್ನನ್ನು ಸಾಧನಮಾರ್ಗಕ್ಕೆ ತೊಡಗಿಸಿದ ಮಾತಾಪಿತೃಗಳಿಗೆ (ಶ್ರೀಮತಿ ಶಿಲಾಬಾಯಿ ಶ್ರೀ ಪ್ರಲ್ಹಾದಾಚಾರ್ಯ ಉಪಾಧ್ಯಾಯ) ನನ್ನ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಕೊನೆಯಲ್ಲಿ ಸರ್ವಪ್ರೇರಕನಾದ ಮುಖ್ಯಪ್ರಾಣಪತಿ ಶ್ರೀಹರಿಯನ್ನು ಸ್ಮರಿಸಿ ಅವನ ಪರಮಪವಿತ್ರ ಚರಣಕಮಲಗಳಲ್ಲಿ ಅನಂತನಮನಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ವಿದ್ವದನುಚರಂ
ಕೃಷ್ಣಾಚಾರ್ಯ ಪ್ರ. ಉಪಾಧ್ಯಾಯ

श्रीमद्भागवतस्य विषयानुक्रमणिका

सप्तमः स्कन्धः

प्रथमाध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

चतुर्थोध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमस्कन्धस्य श्लोकानुक्रमणिका

अ

ख

अष्टमस्कन्धस्य श्लोकानुक्रमणिका